आदर्शपुस्तकोलेखपत्रिका ।

अथैतस्यैतरेयब्राह्मणस्य श्रीमत्सायणाचार्यभाष्योपेतस्य पुस्तकानि यैः परहितैकपरतया संस्करणार्थं प्रदत्तानि तेषां नामग्रामादिनिर्देशः प्रतिपुस्तकस्थितनानाविधपाठसंकेतानिर्दिष्टाः पुस्तकानां संज्ञाश्च कृतज्ञतयाऽधोदेशे प्रकाश्यन्ते—

क. इति संज्ञितम्—मूलं सभाष्यम्, पुस्तकमेतद्दक्षिणापथवर्तिविद्यालयस्थपुस्तकसंग्रहस्थम् ।

ख. इति संज्ञितम्—मूलं सभाष्यम्, शाहूनगरनिवासिनां वे. शा. रा. रा. 'श्रीधरभट्टजी माटे' इत्येतेषाम् ।

ग. इति संज्ञितम्—केवलं मूलम्, खेडग्रामनिवासिनां रा. रा. 'नागूभाऊ वकील' इत्येतेषाम् । लेखनकालः—शके १७७० पौषकृष्णत्रयोदश्याम् ।

घ. इति संज्ञितम्—केवलं मूलं, किंचित्त्रुटितम्, एतदपि दक्षिणापथवर्तिविद्यालयस्थपुस्तकसंग्रहस्थम् ।

ङ. इति संज्ञितम्—मूलमात्रं पूर्णं, रा. रा. 'शंकर रानचन्द्र भामवत' इत्येतेषाम् । लेखनकालः—शके १७३३ श्रावणकृष्णे षष्ठ्याम् ।

च. इति संज्ञितम्—पूर्णं केवलं मूलम्, एतदपि दक्षिणापथवर्तिविद्यालयस्थपुस्तकसंग्रहस्थमेव ।

छ. इति संज्ञितम्—पूर्णं मूलमात्रम्, दक्षिणापथवर्तिविद्यालयस्थपुस्तकसंग्रहस्थमेव । लेखनकालः—शके १७५१ फाल्गुन शुक्ल चतुर्थ्याम्.

ज. इति संज्ञितम्—मूलं सभाष्यं प्रथमपञ्चिकापरिमितम्, श्री. रा. रा. 'अण्णासाहेब विंचुरकर' इत्येतेषाम् । लेखनकालः—शके १७४५ आषाढमासे ।

झ. इति संज्ञितम्—मूलं सभाष्यम्, आष्टेग्रामनिवासिनां रा. रा. 'गोविंदराव लिमये' इत्येतेषाम् ।

ञ. इति संज्ञितम्—मूलं सभाष्यं चतुर्थपञ्चमषष्ठपञ्चिकात्रयरहितम्, आठल्ये. इत्युपाह्वानां शिपोशिग्रामनिवासिनां कै. वे. शा. रा. 'रामकृष्ण जगन्नाथ शास्त्री इत्येतेषाम् । लेखनकालः—शके १८७६ मार्गशीर्षकृष्णैकादश्याम् ।

ॐ तत्सद् ब्रह्मणे नमः ।

ऐतरेयब्राह्मणम् ।

श्रीमत्सायणाचार्यविरचितभाष्यसमेतम् ।

तत्र प्रथमोऽध्यायः ।

वागीशाद्याः सुमनसः सर्वार्थानामुपक्रमे ।
यं नत्वा कृतकृत्याः स्युस्तं नमामि गजाननम् ॥ १ ॥
यस्य निश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥ २ ॥
तत्कटाक्षेण तद्रूपं दधद्बुक्कमहीपतिः ।
आदिशन्माधवाचार्यं वेदार्थस्य प्रकाशने ॥ ३ ॥
ये पूर्वोत्तरमीमांसे ते व्याख्यायातिसंग्रहात् ।
कृपालुर्माधवाचार्यो वेदार्थं वक्तुमुद्यतः ॥ ४ ॥

ननु कोऽयं वेदो नाम ? के वा तस्य विषयप्रयोजनसंबन्धाधिकारिणः ? कथं वा तस्य प्रामाण्यम् । न खल्वेतस्मिन्सर्वस्मिन्नसति वेदो व्याख्यानयोग्यो भवति । अत्रोच्यते । इष्टप्राप्त्यनिष्टपरिहारयोरलौकिकमुपायं यो ग्रन्थो वेदयति स वेदः । अलौकिकपदेन प्रत्यक्षानुमाने व्यावर्त्येते । अनुभूयमानस्य स्रक्चन्दनवनितादेरिष्टप्राप्तिहेतुत्वमौषधादेरनिष्टपरिहारहेतुत्वं च प्रत्यक्षतः सिद्धम् । स्वेनानुभाविष्यमाणस्य पुरुषान्तरगतस्य च तथात्वमनुमानगम्यम् । एवं तर्हि भाविजन्मगतमप्यनुमानगम्यमिति चेन्न । तद्विशेषस्यानवगमात् । न खलु ज्योतिष्टोमादिरिष्टप्राप्तिहेतुः कलञ्जभक्षणवर्जनादिरनिष्टपरिहारहेतुरित्यमुमर्थं वेदव्यतिरेकेणानुमानासहस्रेणापि तार्किकशिरोमणिरप्यवगन्तुं शक्नोति । तस्मादलौकिकोपायबोधको वेद इति लक्षणस्य नातिव्याप्तिः । अत एवोक्तम्—

" प्रत्यक्षेणानुमित्या वा यस्तूपायो न बुध्यते ।
एनं विदन्ति वेदेन तस्माद्वेदस्य वेदता " इति ॥

स एवोपायो वेदस्य विषयस्तद्बोध एव प्रयोजनं तद्बोधार्थी चाधिकारी । तेन सहोपकार्योपकारकभावः संबन्धः । नन्वेवं सति स्त्रीशूद्रसहिताः सर्वेऽपि वेदाधिकारिणः स्युः । इष्टं मे स्यादनिष्टं मा भूदित्याशिषः सार्वजनीनत्वात् ।

मैवम् । स्त्रीशूद्रयोः सत्यप्युपायबोधार्थित्वे हेत्वन्तरेण वेदाधिकारस्य प्रतिबद्धत्वात् । उपनीतस्यैवाध्ययनाधिकारं ब्रुवच्छास्त्रमनुपनीतयोः स्त्रीशूद्रयोर्वेदाध्ययनमनिष्टप्राप्तिहेतुरिति बोधयति । कथं तर्हि तयोस्तदुपायावगमः, पुराणादिभिरिति ब्रूमः । अत एवोक्तम्-

" स्त्रीशूद्रद्विजबन्धूनां त्रयी न श्रुतिगोचरा ।

इति भारतमाख्यानं मुनिना कृपया कृतम् " इति ॥

तस्मादुपनीतैरेव त्रैवर्णिकैर्वेदस्य संबन्धः । तत्प्रामाण्यं तु बोधकत्वात्स्वत एव सिद्धम् । पौरुषेयवाक्यं तु बोधकमपि सद्भ्रान्तिमूलत्वसंभावनया तत्परिहाराय मूलप्रमाणमपेक्ष्यैव प्रमाणम् । न तु वेदो मूलप्रमाणमपेक्षते । तस्य नित्यत्वेन कर्तृदोषशङ्कायां अनुदयात् । एतदेव जैमिनिना सूचितम् -' तत्प्रमाणं बादरायणस्यानपेक्षत्वात् ' इति । ननु वेदोऽपि कालिदासादिवाक्यवत्पौरुषेय एव । ब्रह्मकार्यत्वश्रवणात्--" ऋचः सामानि जज्ञिरे । छन्दांसि जज्ञिरे तस्माद्यजुस्तस्मादजायत " इति हि श्रुतेः । अत एव भगवान्बादरायणः- शास्त्रयोनित्वात् ' इति सूत्रेण ब्रह्मणो वेदकारणत्वमवोचत् । मैवम् । श्रुतिस्मृतिभ्यां नित्यत्वावगमात् । ' वाचा विरूपनित्यया ' इति श्रुतिः । " अनादिनिधना नित्या वागुत्सृष्टा स्वयंभुवा " इति स्मृतिः । बादरायणोऽपि देवताधिकरणे सूत्रयामास--' अत एव च नित्यत्वम् ' इति । परस्परविरोध इति चेन्न । नित्यत्वस्य व्यावहारिकत्वात् । सृष्टेरूर्ध्वं संहारात्पूर्वो व्यवहारकालस्तस्मिन्नुत्पत्तिविनाशादर्शनात् । कलाकाष्ठादयो यथा नित्या एवं वेदोऽपि व्यवहारे कालिदासवाक्यवत्पुरुषविरचितत्वाभावान्नित्यः । आदिसृष्टौ तु कलाकाष्ठादिवद्वेदोत्पत्तिराम्नायते । अतो विषयभेदान्न परस्परविरोधः । ब्रह्मणो निर्दोषत्वेन वेदस्य कर्तृदोषासंभवात्स्वतःसिद्धं प्रामाण्यं तदवस्थम् । तस्माल्लक्षणप्रमाणसद्भावाद्विषयप्रयोजनसंबन्धाधिकारिसद्भावात्प्रामाण्यस्य सुस्थितत्वाद्वेदो व्याख्यातव्य एव । ननु वेदार्थावबोधे विध्यभावाद्बोधसाधनं व्याख्यानं व्यर्थमिति चेन्न । अध्ययनविधेर्बोधपर्यवसायित्वात् । एतच्च भट्टगुरुमतानुसारिभिर्बहुधा प्रपञ्चितम् ।

आम्नायते च-" यदधीतमविज्ञातं निगदेनैव शब्द्यते ।

अनग्नाविव शुष्कैधो न तज्ज्वलति कर्हिचित् ॥

स्थाणुरयं भारहारः किलाभूदधीत्य वेदं न विजानाति योऽर्थम् ।

योऽर्थज्ञ इत्सकलं भद्रमश्नुते नाकमेति ज्ञानविधूतपाप्मा ॥
ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च" इति ॥

एवं तर्हि ज्ञानस्य पृथग्विधानाद्ध्ययनं पाठमात्रमिति चेदस्तु नाम । वर्णयन्त्येवमेव शांकरदर्शनानुसारिणः । कर्तुर्विधिव्यतिरेकेणानुष्ठानान्यथानुपपत्त्या वेदार्थज्ञानस्य प्रापितत्वान्नैतद्विधेयमिति चेत्तर्हि तद्विधिबलाद्वेदनमात्रेण स्वतन्त्रं किंचिदपूर्वमस्तु । श्रूयते ह्यनुष्ठानज्ञानयोः स्वतन्त्रं पृथक्फलम्—' तरति ब्रह्महत्यां योऽश्वमेधेन यजते य उ चैनमेवं वेद ' इति । अल्पप्रयाससाध्येन वेदनेन तत्सिद्धौ बह्वायाससाध्यमनुष्ठानं व्यर्थमिति चेन्न । तरणीयाया ब्रह्महत्याया मानसवाचिककायिकत्वादिभेदेन तारतम्योपपत्तेः । मनसा संकल्पिता वाचाऽभ्यनुज्ञाता परहस्तेन कारिता स्वयं कृता पुनः कृता चेत्येवं तारतम्येनावस्थिता ब्रह्महत्या अनेकविधाः । अतस्तत्तरणमप्यनेकविधम् । यथा स्वर्गो बहुविधस्तद्वत् । अग्निहोत्रं जुहुयात्स्वर्गकामः । दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत । ज्योतिष्टोमेन स्वर्गकामो यजेतेत्याद्युच्चावचकर्मणामेकविधफलासंभवात्स्वर्गो बहुविधोऽभ्युपगन्तव्यः । तथा ब्रह्महत्यादिपापनिवृत्तेरपि बहुविधत्वाद्वेदनेनापि कांचिद्ब्रह्महत्या निवर्तत इति योग्यतानुसारेण कल्प्यताम् । किंच तत्तद्विधिसमीपे य एवं वेदेति वचनानि वेदनफलं ब्रुवते तान्यर्थवादा इति चेत् । अस्तु नाम सहामह एवैतमपरार्धं तेषां वचनानाम् । विधेयार्थप्रशंसापरत्वात् । तर्हि यत्परो हि शब्दः स शब्दार्थ इति न्यायेन स्वार्थे प्रामाण्यं नास्तीति चेत् । महातात्पर्यस्य विधेयविषयत्वेऽप्यवान्तरतात्पर्यस्य स्वार्थविषयत्वानिवारणात् । ग्रावाणः प्लवन्त इत्याद्यर्थवादस्यापि स्वार्थे प्रामाण्यं प्रसज्येतेति चेन्न । प्रमाणान्तरबाधित्वात् । द्विःसंवत्सरस्य सस्यं पच्यत इत्याद्यर्थवादस्य तु बाधाभावेऽप्यनुवादत्वान्न स्वार्थे प्रामाण्यम् । वेदनफलवचनानि तु नानुवादकानि नापि बाध्यानि । तस्मादर्थवादत्वेऽप्यस्त्वेषां स्वार्थे प्रामाण्यमन्यथा मन्त्रार्थवादादिभ्यो देवादीनां विग्रहादिमत्त्वं न सिध्येत् ।

अत एवोक्तम्—

" विरोधे गुणवादः स्यादनुवादोऽवधारिते ।
भूतार्थवादस्तद्ज्ञानादर्थवादस्त्रिधा मतः " इति ॥

किं बहुना विद्यत एवावश्यं वेदनमात्रादपूर्वमतो वेदनाय वेदो व्याख्यायते । तस्य च वेदस्य भागद्वयं कल्पसूत्रकारैरुदाहृतम्—' मन्त्रब्राह्मणयोर्वेदनामधेयम् ' इति । तत्र मन्त्रविषया विचाराः संहिताव्याख्याने द्रष्टव्याः । ब्राह्मणलक्षणं तु द्वितीयाध्यायस्य प्रथमपादे विचारितम्—

नास्त्येतद्ब्राह्मणेत्यत्र लक्षणं विद्यतेऽथवा ।
नास्तीयन्तो वेदभागा इति कल्पेरभावतः ॥
मन्त्रश्च ब्राह्मणं चेति द्वौ भागौ तेन मन्त्रतः ।
अन्यद्ब्राह्मणमित्येतद्भवेद्ब्राह्मणलक्षणम् " इति ॥

चातुर्मास्येष्विदमाम्नायते—' एतद्ब्राह्मणान्येव पञ्च हवींषि ' इति । तत्र ब्राह्मणस्य लक्षणं नास्ति । कुतः । वेदभागानामियत्तानवधारणेन ब्राह्मणभागेष्वन्यभागेषु च वाच्यलक्षणस्याव्याप्त्यतिव्याप्त्योः शोधयितुमशक्यत्वादिति चेन्न । भागद्वयाङ्गीकारेण मन्त्रव्यतिरिक्तो भागो ब्राह्मणमिति लक्षणस्य निर्दोषत्वात् । ननु ब्रह्मयज्ञप्रकरणे मन्त्रब्राह्मणव्यतिरिक्ता इतिहासादयो भागा आम्नायन्ते यद्ब्राह्मणानीतिहासान्पुराणानि . कल्पान्गाथा नाराशंसीरिति । मैवम् । विप्रपरिव्राजकन्यायेन ब्राह्मणाद्यवान्तरभेदानामेवेतिहासादीनां पृथगभिधानात् । दैवासुराः संयत्ता आसन्नित्यादय इतिहासाः । इदं वा अग्रे नैव किंचनाऽऽसीन्न द्यौरासीदित्यादिकं जगतः प्रागवस्थानमुपक्रम्य सर्गप्रतिपादकं वाक्यजातं पुराणम् । कल्पस्तु, आरुणकेतुकचयनप्रकरणे समाम्नायते—' इति मन्त्राः कल्पोऽत ऊर्ध्वं यदि बलिं हरेत् ' इति । अग्निचयनप्रकरणे यमगाथाभिः परिगायतीति विहिता मन्त्रविशेषा गाथाः । मनुष्यवृत्तान्तप्रतिपादिका ऋचो नाराशंस्यः । तस्मान्मन्त्रब्राह्मणव्यतिरिक्तवेदभागाभावान्मन्त्रव्यतिरिक्तं ब्राह्मणमित्येतल्लक्षणं सुस्थितम् । तस्य लक्षणस्याग्निर्वै देवानामवम इत्यादिग्रन्थे विद्यमानत्वादिदं ब्राह्मणम् । तच्चेश्वरानुग्रहादितरायाः पुत्रेण लब्धत्वादैतरेयकमित्युच्यते । महर्षीणां तत्तद्वेदभागलाभः स्मर्यते—

" युगान्तेऽन्तर्हितान्वेदान्सेतिहासान्महर्षयः ।
लेभिरे तपसा पूर्वमनुज्ञाताः स्वयंभुवा " इति ॥

प्रकृतस्य तु ब्राह्मणस्यैतरेयकत्वे संप्रदायविद एतामाख्यायिकामाचक्षते । कस्यचित्खलु महर्षेर्बह्व्यः पत्न्यो विद्यन्ते । तासां मध्ये कस्याश्चिदितरेति नामधेयम् । तस्या इतरायाः पुत्रो महिदासाख्यः कुमारः । एतच्चाऽऽरण्यकाण्डे समाम्नायते—' एतद्ध स्म वै तद्विद्वान्महिदास ऐतरेयः ' इति । तदीयस्य तु पितुर्भार्यान्तरपुत्रेष्वेव स्नेहातिशयो न तु महिदासे । ततः कस्यांचिद्यज्ञसभायां तं महिदासमवज्ञायान्यान्पुत्रान्स्वोत्सङ्गे स्थापयामास । तदानीं खिन्नवदनं महिदासमवगत्येतराख्या तन्माता स्वकीयकुलदेवतां भूमिमनुसस्मार । सा च

भूमिर्देवता दिव्यमूर्तिधरा सती यज्ञसभायां समागत्य महिदासाय दिव्यं सिंहासनं दत्त्वा तत्रैनमुपवेश्य सर्वेष्वपि कुमारेषु पाण्डित्याधिक्यमवगमय्यैतद्ब्राह्मणप्रतिभासनरूपं वरं ददौ । तदनुग्रहात्तस्य मनसाऽग्निर्वै देवानामवम इत्यादिकां स्तृणुते स्तृणुत इत्यन्तं चत्वारिंशदध्यायोपेतं ब्राह्मणं प्रादुरभूत् । तत ऊर्ध्वमथ महाव्रतमित्यादिकमाचार्या आचार्या इत्यन्तमारण्यकव्रतरूपं च ब्राह्मणमाविरभूदिति । तस्यैतरेयस्य प्रादुर्भूते चत्वारिंशदध्यायोपेतब्राह्मणे चतुःसंस्थो ज्योतिष्टोमः प्रथमं विधीयते । ततो गवामयनं तत आदित्यानामयनं ततोऽङ्गिरसामयनं ततो द्वादशाहस्ततोऽन्यत्सर्वं प्रासङ्गिकमिति द्रष्टव्यम् । गोष्टोमायुष्टोमादिषु ज्योतिष्टोमस्य प्रायण्यमुक्तम्—'एष वाव प्रथमो यज्ञो यज्ञानां यज्ज्योतिष्टोमः' इति श्रुतेः । तस्य ज्योतिष्टोमस्य सप्तसंस्थोपेतस्याग्निष्टोम उक्थ्यः षोडश्यतिरात्रश्चेत्येताश्चतस्रः संस्था अत्रानुक्रमेण वक्ष्यन्ते । तस्मिन्नपि चतुष्टयेऽग्निष्टोमः प्रकृतिः कृत्स्नस्यानुष्ठेयस्य । तस्मिन्नग्निष्टोमे प्रत्यक्षश्रुत्यैवोपदिष्टत्वात् । प्रकर्षेण क्रियते साकल्येनानुष्ठेयमुपदिश्यते यस्यां सा प्रकृतिरिति हि तच्छब्दव्युत्पत्तिः । उक्थ्यादयस्तु विकृतयः । विशेषस्यैव तत्र प्रत्यक्षोपदेशेन संपादितत्वात् । अवशिष्टं तु सर्वमनुष्ठेयं प्रकृतिवद्विकृतिः कर्तव्येति न्यायेनैव संपाद्यते । अत एवोपजीव्यत्वादग्निष्टोम एवाऽऽदौ वक्तव्यः । यद्यपि तस्याग्निष्टोमस्योपक्रमेऽवश्यमृत्विग्वरणं वक्तव्यं सोमेन यक्ष्यमाणो ब्राह्मणानार्षेयानृत्विजो वृणीत इत्यापस्तम्बेनाभिधानात्तथाऽप्यृग्वेदस्य होतृकर्तव्यप्रतिपादकत्वादृत्विग्वरणस्य तु हौत्रत्वाभावात्तदुपेक्ष्य दीक्षणीयेष्टिरादौ विधीयते । ऋग्वेदस्य हौत्रत्वं समाख्याबलात्तृतीयाध्यायस्य तृतीयपादे विचारितम्—

"वेदत्रयोक्तधर्माणामृत्विग्भिः संगतिस्त्रिभिः ।
आनियत्या नियत्या वा नियतिर्नानिरूपगात् ॥
हौत्रत्वादिसमाख्यानं नियतेर्गमकं स्वतः ।
निर्बाधं चान्यवत्तच्च तेनात्र विनियोजकम्" ॥ [इति]

याज्यापुरोनुवाक्यापाठादयो धर्मा ऋग्वेदे प्रोक्ताः । दोहननिर्वापादयो यजुर्वेदे । आज्यस्तोत्रपृष्ठस्तोत्रादयः सामवेदे । तत्रास्यैवैते धर्मा इति नियामकस्य दुर्निरूपत्वाद्येन केनाप्यृत्विजा यः कोऽपि धर्मं इच्छया संगच्छत इति चेन्नैवम् । हौत्रमाध्वर्यवमौद्गात्रमिति समाख्यानेन नियतिर्बोध्यते । न च समाख्यानस्य बाधकं किंचित्पश्यामः । तस्मादबोधकत्वबाधितत्वयोरभावाच्छ्रुतिलिङ्गादिपञ्चकवत्समाख्यानेन धर्मा व्यवस्थाप्यन्ते । नन्विष्टेर-

प्यध्वर्युकर्तृकत्वाद्यजुर्वेदे कर्तव्यता न त्वत्रेति चेत्सत्यम् । तथाऽपीष्टिगतयोर्याज्यानुवाक्ययोर्हौत्रत्वेनात्र वक्तव्यत्वादिष्टेरनुक्तौ याज्यानुवाक्ये कुत्रत्ये इति विशेषसंबन्धस्य ज्ञातुमशक्यत्वात्तद्बोधाय प्रथममिष्टिर्विधातव्याऽतस्तां विधातुं तद्देवतारूपमाग्निं विष्णुं चाऽऽदौ प्रशंसति—

ॐ अग्निर्वै देवानामवमो विष्णुः परम-
स्तदन्तरेण सर्वा अन्या देवताः, इति ।

योऽयमग्निरस्ति सोऽयं देवतामध्येऽवमः प्रथमो द्रष्टव्यः । यस्तु विष्णुः सोऽयं परम उत्तमः । वैशब्द उक्तार्थे मन्त्रप्रसिद्धिद्योतनार्थः । 'अग्निर्मुखं प्रथमो देवतानां संगतानामुत्तमो विष्णुरासीत्' इति हि मन्त्र आम्नायते । यद्वा वैशब्द उपपत्तिप्रसिद्ध्यर्थः । उपपत्तिश्चैवं योजनीया । यद्यपि देवशब्दः साधारणत्वात्सर्वदेवतावाची तथाऽप्यत्र प्रकरणबलादग्निष्टोमाङ्गेषु शस्त्रेषु प्रतीयमानाः प्रधानदेवता विवक्ष्यन्ते । शस्त्राणि च द्वादश । तेष्वाज्यशस्त्रं प्रथमं तस्मिंश्च भूरग्निर्ज्योतिरित्यग्निरान्नातः । आग्निमारुतं शस्त्रमन्तिमं तस्मिन्विष्णोर्नु कमिति विष्णुरान्नातः । एवमग्निष्टोमसंस्थायां शस्त्रपाठापेक्षमग्नेः प्राथम्यं विष्णोरुत्तमत्वं च । यद्वा सर्वासु संस्थासूक्तन्यायेनाग्नेः प्राथम्यं विष्णोरुत्तमत्वमन्तिमसंस्थायामाप्तोर्यामाख्यायां त्रयस्त्रिंशत्स्तोत्रशस्त्रोपेतायामान्तिमं स्तोत्रं शस्त्रं च वैष्णवमिति तदपेक्षया द्रष्टव्यम् । यद्वा प्रथमायां दीक्षणीयेष्टावग्निरिज्यते । अन्तिमायामुदवसानीयेष्टेः स्थाने वैष्णवी पूर्णाहुतिर्वाजसनेयिभिराम्नाता । सर्वथाऽपि स्तोतव्यान्यष्टव्यांश्च देवानपेक्ष्याग्नेः प्राथम्यं विष्णोरुत्तमत्वं च युक्तम् । तदन्तरेण तयोः प्रथमोत्तमयोरग्निविष्णवोर्मध्ये यत्तच्छस्त्रप्रतिपाद्या अन्या इन्द्रवाय्वादयः सर्वाः प्रधानदेवता वर्तन्ते । तस्मात्सर्वदेवतानामुभयतो रक्षकवदवस्थितावग्निविष्णू प्रशस्तावित्यर्थः ।

सौमिकेषु यष्टव्यासु स्तोतव्यासु च सर्वासु देवतास्वग्निविष्णू प्रशस्य तद्देवताकामिष्टिं विधत्ते—

आग्नेयं पुरोळाशं निर्वपन्ति
दीक्षणीयमेकादशकपालम्, इति ।

अग्निश्च विष्णुश्च अग्निविष्णू तावुभौ परस्परव्यात्तकौ यस्य पुरोडाशस्यैका देवता सोऽयमाग्नेयो वैष्णवो यथोक्तदेवतां प्रति हविष्ट्वेन प्रदेयद्रव्यरूपः पक्वः पिष्टपिण्डः पुरोडाश इत्युच्यते । डकारस्यात्र ळकार एतच्छाखाध्ययनसंप्रदायेन ज्ञापितः । शकटावस्थापितव्रीहिसंघान्निष्कृष्य मुष्टिचतुष्टयपरिमितानां

व्रीहीणां शूर्पे प्रक्षेपो निर्वापस्तत्पूर्वको यागोऽत्र निर्वापेणोपलक्ष्यते । आग्नावैष्णवं पुरोडाशमिति सामानाधिकरण्येनावगतस्य द्रव्यदेवतासंबन्धस्य यागमन्तरेणानुपपन्नत्वात् । सति तु यागे संबन्ध उपपद्यते ।

" उद्दिश्य देवतां द्रव्यत्यागो यागोऽभिधीयते "

इति यागलक्षणस्य पूर्वाचार्यैरुक्तत्वात् । निर्वपन्तीत्ययं शब्दो न वर्तमानार्थः किंतु विध्यर्थः । स च लकारो लिङर्थे लेडिति सूत्रेण विध्यर्थो द्रष्टव्यः । एवं च सति शाखान्तरेण संवादो भवति । तथा च तैत्तिरीया विस्पष्टं विधिमामनन्ति- ' आग्नावैष्णवमेकादशकपालं निर्वपेद्दीक्षिष्यमाणः ' इति । तत्रैकपयोगापेक्षमेकवचनम् । अत्र तु बहुपयोगगतं सत्रगतं वा यजमानबहुत्वमपेक्ष्य निर्वपन्तीति बहुवचनम् । यद्वा छान्दसो वचनव्यत्ययः । सोमयागे प्रवृत्तस्य यजमानस्य संस्कारो दीक्षणम् । तस्य च संस्कारस्य हेतुः कर्मविशेषो दीक्षणी। यशब्दवाच्यः । तस्य च कर्मविशेषस्य वाचकेन शब्देन तत्कर्मसाधनमुपलक्ष्यते - ततो दीक्षणीयाख्यकर्मसाधनं पुरोडाशमिति सामानाधिकरण्यमुपपन्नम् । एकादशसु कपालेषु संस्कृतः पुरोडाश एकादशकपालः । तेषु हि पुरोडाशः श्रप्यते ।

अत्र प्रथमोत्तमयोरग्नाविष्णवोः पुरोडाशदेवतात्वे फलितं दर्शयति -

सर्वाभ्य एवैनं तद्देवताभ्योऽनन्तरायं निर्वपन्ति, इति ।

तत्तेनाऽऽग्नावैष्णवत्वेन तयोरग्नाविष्णवोर्मध्यवर्तिनीनां सौमिकीनां सर्वासां देवतानामुपलक्षितत्वादनन्तरायं निरवशेषं काचिदपि देवताऽवशिष्टा यथा न भवति तथैनं पुरोडाशं यजमाना निर्वपन्त्येव । अनेन निर्वापेण सर्वा देवतास्तृप्यन्तीत्यर्थः । यथा वैयाकरणाः प्रत्याहारेष्वाद्यन्तयोर्वर्णयोर्ग्रहणेन मध्यपातिनां सर्वेषां वर्णानां ग्रहणमिच्छन्ति । न्यायस्तदीय एषं व्यवह्रियते-' तन्मध्यपतितस्तद्ग्रहणेन गृह्यते ' इति । यथा वा लोके भुञ्जानानामेकपङ्क्तावुपविष्टानामाद्यन्तयोर्ब्राह्मणयोः परितोषेण मध्यवर्तिनः सर्वे परितुष्टा इति निश्चितं तथेदं द्रष्टव्यम् ।

नन्वग्नाविष्णवोरेव निर्वापसंबन्धः श्रूयते न तु मध्यवर्तिदेवतानां तत्कथं तासां तृप्तिरित्याशङ्क्य तत्सिद्ध्यर्थं तयोरेव सर्वदेवतान्तर्भावं दर्शयति—

अग्निर्वै सर्वा देवता विष्णुः सर्वा देवताः, इति ।

अग्नेः सर्वदेवतारूपत्वे श्रुत्यन्तरप्रसिद्धिद्योतनार्थो वैशब्दः । तथा च तैत्तिरीयाः पौरोडाशिके काण्डे समामनन्ति-' ते देवा अग्नौ तनूः संन्यदधत तस्मा

दाहुरग्निः सर्वा देवताः' इति । सौमिकेऽपि काण्डे श्रूयते-'देवासुराः संयत्ता आसंस्ते देवा बिभ्यतोऽग्निं प्राविशंस्तस्मादाहुरग्निः सर्वा देवताः' इति । विष्लृ व्याप्तावित्यस्माद्धातोरुत्पन्नो विष्णुशब्दः । व्याप्तिश्च सर्वजगदुपादानकारणत्वेन सर्वात्मकत्वादुपपद्यते । अत एव स्मरन्ति-'भूतानि विष्णुर्भुवनानि विष्णुः' इति ।

सर्वदेवतात्मकत्वेनाग्नाविष्णू प्रशस्य प्रकारान्तरेण पुनः प्रशंसति-

एते वै यज्ञस्यान्त्ये तन्वौ यदग्निश्च विष्णुश्च तद्यदाग्नावैष्णवं पुरोळाशं निर्वपन्त्यत एव तद्देवानृध्नुवन्ति, इति ।

अग्निश्च विष्णुश्चेत्यनयोर्देवतयोर्यच्छरीरद्वयमस्ति, एते उभे तन्वौ यज्ञस्यान्त्ये सोमयागस्याऽऽदावन्ते च वर्तमाने । आद्या चान्त्या चेति विवक्षायामेकशेषेणान्त्ये इति भवति । यथा माता च पिता चेत्यत्र पितरावित्येकशेषस्तद्वत् । आद्यन्तवर्तित्वं चाग्निर्वै देवानामवम इत्यत्रैवोपपादितम् । तत्तथा सत्याद्यन्तवर्तित्वे सति तादृशदेवताकं पुरोडाशं निर्वपन्तीति यदस्ति तत्तेन यथोक्तनिर्वापेणान्ततो यागस्याऽऽदावन्ते च देवान्सर्वानृध्नुवन्त्येव परिचरन्त्येव । तमेतं सार्थवादं दीक्षणीयेष्टिविधिं तैत्तिरीया अपि विस्पष्टमामनन्ति-' आग्नावैष्णवमेकादशकपालं निर्वपेद्दीक्षिष्यमाणोऽग्निः सर्वा देवता विष्णुर्यज्ञो देवताश्चैव यज्ञं चाऽऽरभतेऽग्निरवमो देवानां विष्णुः परमो यदाग्नावैष्णवमेकादशकपालं निर्वपति देवता एवोभयतः परिगृह्य यजमानोऽवरुन्धे ' इति ।

इदानीं यथोक्तविधौ ब्रह्मवादिचोद्यमुद्भावयति--

तदाहुर्ब्रह्मवादिनः पुरोळाशो द्रव्यमाग्नावैष्णवः कैनयोस्तत्र क्लृप्तिः का विभक्तिरिति, इति ।

तत्र तत्र कपालसंख्यायां ब्रह्मवादिन आहुश्चोदयन्ति । एकादशसु कपालेषु संस्कृतः पुरोडाश एकमेव द्रव्यं तस्य भोक्तारौ द्वौ देवौ । एनयोर्देवयोः समप्रधानत्वेन विषमांशस्यायुक्तत्वात्तत्र द्रव्ये का क्लृप्तिर्विभागकल्पनानिमित्तं किं स्यात्का विभक्तिर्निमित्तविशेषाभावे नैमित्तिको विभागविशेषः कथं घटेत । इतिशब्दश्चोद्यसमाप्त्यर्थः ।

ब्रह्मवादिष्वेव मध्येऽभिज्ञानां चोद्यपरिहारमुद्भावयति--

अष्टाकपाल आग्नेयोऽष्टाक्षरा वै गायत्री गायत्रमग्नेश्छन्दस्त्रिकपालो वैष्णवस्त्रिर्हीदं विष्णुर्व्य-

क्रमत सैषोऽष्टाक्षरा कल्पिः सा विभक्तिः, इति ।

अष्टसु कपालेषु संस्कृतः पुरोडाशभागोऽग्नेः संबन्धी । स च संबन्धश्छन्दोद्वारा द्रष्टव्यः । गायत्र्याख्यं छन्दोऽग्नेः संबन्धि तयोरग्निगायत्र्योः प्रजापतिमुखजन्यत्वसाम्यात् । एतच्च मुखजन्यत्वं तैत्तिरीयाः सप्तमकाण्डे पठन्ति--'प्रजापतिरकामयत प्रजायेयेति स मुखतस्त्रिवृतं निरमिमीत तमग्निर्देवताऽन्वसृज्यत गायत्रीछन्दः' इति । तस्याश्च गायत्र्याः पादाक्षरेष्वष्टत्वं संख्या दृश्यते । सोऽयं यथोक्तपुरोडाशभागस्याग्नेश्च संबन्धः । त्रिषु कपालेषु संस्कृतः पुरोडाशभागो विष्णोः संबन्धी । हि यस्मात्कारणाद्विष्णुरिदं सर्वं जगत्त्रिर्व्यक्रमत त्रिरावृत्तेन स्वकीयपादविक्षेपेण व्याप्तवान् । तथा च मन्त्र आम्नायते--' इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम्' (ऋ० सं० म० १ सू० २१ ऋ० १७) इति । 'त्रीणि पदा विचक्रमे विष्णुर्गोपा अदाभ्यः' (ऋ० सं० म० १ सू० २२ ऋ० १८) इति च । सा यथोक्ताऽष्टत्वसंख्या त्रित्वसंख्या चैनयोर्देवतयोस्तत्र पुरोडाशे क्लृप्तिर्विभागकल्पनाहेतुः । तदनुसारेण विभक्तिस्तादृशो विभागोऽवगन्तव्यः ।

इत्थं सार्थवादेन विधिवाक्येन दीक्षणीयेष्टिं विधाय तस्यामेवेष्टौ प्रतिष्ठाकामस्य पुरोडाशमपोह्य द्रव्यान्तरं विधत्ते--

घृते चरुं निर्वपेत योऽप्रतिष्ठितो मन्येत, इति ।

पुत्रादिप्रजया गवादिपशुभिश्च रहितत्वमप्रतिष्ठितत्वं तादृशोऽहमिति मन्यमानो यजमानः प्रतिष्ठार्थं घृतेन तण्डुलैश्चरुं निष्पादयेत् ।

अप्रतिष्ठितत्वस्याऽऽत्यन्तिकदोषत्वं दर्शयति--

अस्यां वाव स न प्रतितिष्ठति यो न प्रतितिष्ठति, इति ।

यो यजमानः प्रजापशुरूपया प्रतिष्ठया वर्जितः सोऽस्यां वाव लक्ष्यमाणायामप्येतस्यां भूमौ न प्रतितिष्ठति श्लाघ्यो न भवति । तस्मादप्रतिष्ठा परिहर्तव्येत्यर्थः ।

घृतचरुणा तत्परिहारं दर्शयति--

तद्यद्घृतं तत्स्त्रियै पयो ये तण्डुलास्ते पुंसस्तान्मिथुनं मिथुनेनैवैनं तत्प्रजया पशुभिः प्रजनयति प्रजात्यै, इति ।

तत्तत्र घृतपक्वे चरौ यद्घृतमस्ति तत्स्त्रियै पयः स्त्रियाः शोणितम् । द्रवत्वसाम्येन पयःशब्दः शोणितमुपलक्षयति । विलीनस्य घृतस्येषद्रक्तत्वसाम्येन

योषिद्वीर्यत्वमुपचर्यते । चरौ ये तण्डुलाः सन्ति ते पुंसो रेत इति शेषः । श्वेतत्वं त्वत्र साम्यम् । तद्घृततण्डुलोभयात्मकं चरुद्रव्यं मिथुनसदृशं तत्तस्मात्कारणान्मिथुनरूपेणैव चरुद्रव्येणैवैनं यजमानं पुत्रादिप्रजया गवादिपशुभिश्च प्रजनयति प्रवर्धयति । तस्मादिदं चरुद्रव्यं प्रजात्यै प्रजननाय प्रतिष्ठारूपाय संपद्यत इत्यर्थः।

चरोः प्रतिष्ठाहेतुत्ववेदनं प्रशंसति-

प्रजायते प्रजया पशुभिर्य एवं वेद, इति ।

तावेतौ पुरोडाशचरुपक्षावापस्तम्बेन दर्शितौ- दीक्षणीयायास्तन्त्रं प्रक्रमयत्याग्नावैष्णवमेकादककपालं निर्वपत्याग्नावैष्णवं वा घृते चरुं पुरोडाशो ब्रह्मवर्चसकामस्य घृते चरुः प्रजाकामस्य पशुकामस्य वाऽऽदित्यं घृते चरुं द्वितीयं प्रजाकामस्य पशुकामस्यैके समामनन्ति ' इति ।

उक्तायां दीक्षणीयेष्टेः कालं विधत्ते-

आरब्धयज्ञो वा एष आरब्धदेवतो यो दर्शपूर्णमासाभ्यां यजत आमावास्येन वा हविषेष्ट्वा पौर्णमासेन वा तस्मिन्नेव हविषि तस्मिन्बर्हिषि दीक्षेतैषा एका दीक्षा, इति ।

यः पुमान्दर्शपूर्णमासाभ्यां यजते तेन सर्वोऽपि यज्ञः प्रारब्धः सर्वस्य तदपेक्षितत्वात् । सोमयागस्य दर्शपूर्णमासविकृतित्वाभावेऽप्यङ्गादीनां दीक्षणीयापायणीयादीनामिष्टीनां तद्विकृतित्वादास्ति तदपेक्षा । अग्निहोत्रस्य तदङ्गानां च तन्निरपेक्षत्वेऽप्याहवनीयाद्यग्निसापेक्षत्वादग्नीनां च पवमानेष्टिसाध्यत्वादिष्टीनां दर्शपूर्णमासविकृतित्वादस्ति परम्परया तदपेक्षाऽतस्तदनुष्ठानेन सर्वस्यापि यज्ञस्य प्रारम्भः सिध्यति । यद्यपि यज्ञारम्भेणैव तदीयदेवतानां पूजयितुमारम्भः सिद्ध एव तथाऽपि प्राधान्यख्यापनार्थमारब्धदेवत इति पुनर्देवताभिधानम् यस्माद्दर्शपूर्णमासयाजिना सर्वोऽपि यज्ञ आरब्धप्रायोऽत एव देवतानां पूजाऽप्यारब्धप्राया तस्मादारब्धस्य सोमयागस्यानुष्ठेयत्वाद्दर्शपूर्णमासानुष्ठानादूर्ध्वं दीक्षेत दीक्षणीयेष्टिं कुर्यात् । अमावास्याकाले कर्तव्यं हविरामावास्यं तद्वत्पौर्णमासं च । हविःशब्दोऽत्र यज्ञमुपलक्षयति । वाशब्दौ समुच्चयार्थौ । अमावास्यादिसंबन्धिना पौर्णमासीसंबन्धिना च यज्ञेनेष्ट्वा दीक्षेत । उक्तार्थ एव

तस्मिन्नित्यादिनाऽऽप्रपञ्च्यते । हविःशब्दवद्बर्हिःशब्दोऽपि यज्ञोपलक्षकः । तस्मिन्नामावास्याख्ये हविषि यज्ञे तस्मिन्पौर्णमासाख्ये बर्हिषि यज्ञेऽनुष्ठिते सति पश्चादेव दीक्षेत । तदाहाऽऽश्वलायनः—'दर्शपूर्णमासाभ्यामिष्ट्वेष्टिपशुचातुर्मास्यैरथ सोमेन' इति । यजेतेति शेषः । इष्टिराग्रयणेष्टिः । पशुर्निरूढपशुबन्धः । आपस्तम्बोऽप्याह—'अथ दर्शपूर्णमासावारभते ताभ्यां संवत्सरमिष्ट्वा सोमेन पशुना वा यजते' इति । एतच्छब्दादुत्तर उकारोऽपिशब्दपर्यायः । एषाऽऽप्येका दीक्षा । एवमुक्ते सत्यन्याऽपि काचिद्दीक्षाऽस्तीति सूचितं भवति । अत एवाऽऽश्वलायन इष्टिपूर्वत्वं सोमपूर्वत्वं चेत्युभौ पक्षावुदाजहार—'ऊर्ध्वं दर्शपूर्णमासाभ्यां यथोपपत्त्येके प्रागपि सोमेनैके' इति । उपपत्तिर्द्रव्यादिसंपत्तौ सत्यां सोमेनयतेति केषांचिन्मतम् । ताभ्यां प्रागपि संपत्तौ सोमपानमित्यपरेषां मतम् । तैत्तिरीयाश्चेष्टिपूर्वत्वमभिप्रेत्य वसन्तादिकालविशेषेष्वाधानमाम्नाय पुनः सोमपूर्वत्वमभिप्रेत्य कालनियममन्तरेऽऽधानमामनन्ति—'अथो खलु यदैवैनं यज्ञ उपनमेत् । अथाऽऽदधीत सैवास्य(र्द्धिः)' इति । आपस्तम्बोऽपीदमेव सोमाधानमभिप्रेत्य वसन्तादिकालविशेषप्रतीक्षां वारयति—'नर्तून्सूर्क्षेच्च नक्षत्रम्' इति । तस्मात्पक्षद्वयम् ।

चोदकप्राप्तां पञ्चदशसंख्यामपवदितुं संख्यान्तरं विधत्ते—

सप्तदश सामिधेनीरनुब्रूयात्, इति ।

प्र वो वाजा अभिद्यव [ऋ० सं० म० ३ सू० २७ ऋ० १] इत्याद्या एकादशसंख्याका ऋचो वह्निसमिन्धनहेतुत्वात्सामिधेन्य इत्युच्यन्ते । तासु त्रिः प्रथमामन्वाह त्रिरुत्तमामिति वचनात्ताः पञ्चदश संपद्यन्ते । प्रकृतावेव विहितासु पञ्चदशस्वृक्षु चोदकप्राप्तासु ये समिध्यमानसमिद्धवत्यौ द्वे ऋचौ तयोर्मध्ये धाय्याभिधेये ऋचौ प्रक्षेतव्ये । तथा चाऽऽश्वलायनः—'दीक्षणीयायां धाय्ये विराजौ' इति । तत्र पृथुपाजा अमर्त्य इत्येका तं सबाधो यतस्रुच इति द्वितीया । एतच्च प्रयोगसंग्रहकारेणोदाहृतम्—'अथ दीक्षणीयायां धाय्ये भवतः शोचिष्केशस्तमीमहे पृथुपाजास्त्वं सबाधः' इति । अग्नये समिध्यमानायानुब्रूहीत्येवमध्वर्युणा प्रेषितो होता सामिधेनीः सप्तदशानुब्रूयात् ।

तामेतां संख्यां प्रशंसति—

सप्तदशो वै प्रजापतिर्द्वादश मासाः पञ्च-

र्तवो हेमन्तशिशिरयोः समानेन तावान्सं-
वत्सरः संवत्सरः प्रजापतिः, इति ।

सप्त दश चावयवा यस्य प्रजापतेः सोऽयं सप्तदशस्तस्मिन्नर्थे वैशब्दोकप्रसिद्धिर्द्वादशेत्यादिना स्पष्टी क्रियते । चैत्राद्या मासा द्वादश प्रसिद्धाः । यद्यपि षड्वा ऋतव इति श्रुत्यन्तरालोकप्रसिद्धेश्च वसन्ताद्याः षट्संख्याकास्तथाऽपि शीतत्वसाम्येन हेमन्तशिशिरावेकीकृत्य पञ्चसंख्योच्यते । द्वादशभिर्मासैस्तन्मेलनात्मकपञ्चर्तुभिश्च यावान्कालो भवति तावान्कालः संवत्सर इत्युच्यते । स च संवत्सरस्तत्तदृतूचितवर्षादिनिष्पादनेन प्रजानां पालकत्वात्प्रजापतिस्तदीयत्वेन सप्तदशसंख्या प्रशस्तेत्यर्थः ।

सप्तदशसंख्यावेदनं प्रशंसति--

प्रजापत्यायतनाभिरेवाऽऽभी राध्नोति
य एवं वेद ॥ १ ॥ इति ।

संवत्सरात्मकः प्रजापतिरायतनमाश्रयो यासां सामिधेनीनां ताः प्रजापत्यायतनास्तदीयसंख्योपेतत्वात्तदायतनत्वं तादृशीभिराभिः सामिधेनीभिर्वेदिता राध्नोति समृद्धो भवति । सति वेदने तदनुष्ठानप्रवृत्तेः फलप्राप्तिसमृद्धिरुपपद्यते । अत्र मीमांसोदाहियते । पञ्चमाध्यायस्य चतुर्थपादे द्वयं चिन्तितम्-

"दर्शादीष्ट्वा सोमयागः क्रमोऽयं नियतो न वा ।
उक्तेराद्यो न सोमस्याऽऽधानानन्तर्यश्रुतेः" ॥

दर्शपूर्णमासाविष्ट्वा सोमेन यजेतेति क्त्वाप्रत्ययेनावगम्यमानः क्रमो नियत इति चेन्नैवम् । सोमेन यक्ष्यमाणोऽग्नीनादधीतेत्याधानानन्तर्यश्रुतेरपि श्रवणात् । तस्मादिष्टिसोमयोः पौर्वापर्यं न नियतम् ।

"विप्रस्य सोमपूर्वत्वं नियतं वा न वाऽग्रिमः ।
उत्कर्षतो नैवमग्नीषोमीयस्यैव तच्छ्रुतेः" ॥

इष्टिपूर्वत्वं सोमपूर्वत्वं च विकल्पितमिति यदुक्तं तत्र ब्राह्मणस्य सोमपूर्वत्वं नियतम् । कुतः, उत्कर्षश्रवणात् । 'आग्नेयो वै ब्राह्मणो देवतया सोमेनेष्ट्वाऽग्नीषोमीयो भवति यदेवादः पौर्णमासं हविस्तच्चार्धर्चुनिर्वपेत्तार्हि स उभयदेवतो भवति' इति । अस्यमर्थः । प्रजापतेर्मुखादग्निर्ब्राह्मणश्चेत्युभावुत्पन्नौ । ततो ब्राह्मणस्याग्निरेक एव देवतेत्याग्नेय एव ब्राह्मणो न तु सौम्यः । सोमस्य तद्देवतात्वाभावात् । यदा स ब्राह्मणः सोमेन यजेत तदा सोमोऽप्यस्य देवतेत्यग्नीषोमीयो भवति । तस्याग्नीषोमीयस्य ब्राह्मणस्यानुत्वं पौर्णमासमग्नीषोमीयपुरो-

डाशरूपं हविः सोमादूर्ध्वमनुनिर्वपेत् । तदा स ब्राह्मणो देवताद्वयसंबन्धी भवतीति । यद्यप्यत्र कर्मान्तरं किंचिद्विधीयत इति कश्चिन्मन्यते तथाऽपि पौर्णमासं हविरिति विस्पष्टप्रत्यभिज्ञानान्न कर्मान्तरं किंतु दर्शपूर्णमासयोः सोमादूर्ध्वमुत्कर्षः । तस्माद्विप्रस्य सोमपूर्वत्वमेव नियतमिति प्राप्ते ब्रूमः । नात्र दर्शशब्दः पूर्णमासशब्दो वा कश्चिद्यागवाची श्रूयते । पौर्णमासमित्येतत्तद्धितान्तं हविर्विशेषणत्वेनोपन्यस्यते । तच्च हविरग्नीषोमीयपुरोडाशरूपमिति देवताद्वयेन संस्तवादवगम्यते । तस्मादेकस्यैव हविष उत्कर्षो न तु कृत्स्नयोर्दर्शपूर्णमासयोः । तथा सति ब्राह्मणस्यैकस्मिन्नेवाग्नीषोमीयपुरोडाशे सोमपूर्वत्वनियम इतरत्र क्षत्रियवैश्ययोरिवास्यापीष्टिपूर्वत्वसोमपूर्वत्वे विकल्प्यते । तृतीयाध्यायस्य षष्ठे पादे चिन्तितम्—

" सामिधेनीः सप्तदश प्रकृतौ विकृतावुत ।
पूर्ववत्प्रकृतौ पाञ्चदश्येनैताद्विकल्प्यते ॥
विकृतौ सप्तदश्यं स्यात्प्रकृतौ प्रक्रियाबलात् ।
पाञ्चदश्यावरुद्धत्वादाकाङ्क्षाया निवृत्तता " ॥

अनारभ्य श्रूयते सप्तदश सामिधेनीरनुब्रूयादिति । प्र वो वाजा इत्याद्या अग्निसमिन्धनार्था ऋचः सामिधेन्यस्तासां सप्तदश्यं पूर्वापायेन प्रकृतिगतं यदि प्रकृतौ पञ्चदश सामिधेनीरन्वाहेति विधिः स्यात्तर्हि पाञ्चदश्यसप्तदश्ये विकल्येयातामिति प्राप्ते ब्रूमः । विकृतावेव सप्तदश्यं निविशते प्रकृतौ पाञ्चदश्यावरुद्धायां सामिधेनीनां संख्याकाङ्क्षाया अभावात् । न च पाञ्चदश्यसप्तदश्ययो समानबलत्वादवरोधाभाव इति शङ्कनीयम् । पाञ्चदश्ये प्रकरणानुग्रहस्याधिकत्वात् । तस्मान्मित्रविन्दाध्वरकल्पादिविकृतौ सप्तदश्यमवतिष्ठते । न चात्र पूर्वन्यायोऽस्ति । सप्तदश्यस्य चोदकप्राप्त्यभावेन पुनर्विधानदोषाभावात् ।

" साप्तदश्यं तु वैश्यस्य विकृतौ प्रकृतावुत ।
पूर्ववच्च न संकोचो नित्यनैमित्तिकोक्तितः ॥
गोदोहनेन पशुमान्भवतीत्यन्यदुदाहरत् ।
भाष्यकारस्तदप्यस्तु न्यायस्यात्र समत्वतः " ॥

सप्तदशानुब्रूयाद्वैश्यस्येति स्थितं वैश्यनिमित्तकं साप्तदश्यं पूर्वन्यायेन विकृतिगतमिति चेन्नैवम् । नैमित्तिकेनानेन वचनेन प्रकृतिगतस्य नित्यस्य पाञ्चदश्यस्य वैश्यव्यतिरिक्तविषयतया संकोचनीयत्वात् । नित्यं सामान्यरूपतया सावकाशत्वेन दुर्बलं नैमित्तिकं तु विशेषरूपत्वान्निरवकाशत्वाभ्यां प्रबलं तस्माद्वैश्यनिमित्तकं

साप्तदश्यं प्रकृताववतिष्ठते । अत्र भाष्यकारोऽन्यदुदाजहार—चमसेनापः प्रणये-द्गोदोहनेन पशुकामस्येति । तत्र प्रकृतेश्चमसेनावरुद्धत्वाद्गोदोहनं विकृताविति पूर्वः पक्षः । कामनानिमित्तकेन गोदोहनेन नित्यस्य चमसस्य निष्कामविषयतया संकोचनीयत्वात्प्रकृतावेव गोदोहनमिति सिद्धान्तः। दशमाध्यायस्याष्टमपादे चिन्तितम् -

" सामिधेनीसाप्तदश्यं वैमृधादावपूर्वगीः ।
संहृतिर्वोपकारस्य क्लृप्त्याऽऽद्योऽस्त्वाज्यभागवत् ॥
सामिधेनी(न्य)श्चोदकाप्ताः साप्तदश्यं तु वैमृधे ।
पुनर्वाक्येन संहार्यमनारभ्योक्तिचोदितम् " ॥

अनारभ्य किंचिदाम्नायते—सप्तदश सामिधेनीरनुब्रूयादिति । तथा वैमृधेऽध्वर-कल्पायां पशौ चातुर्मास्येषु नित्यविन्दायामाग्रयणेष्ट्यादौ च पुनः साप्तदश्यं विहितम् । यद्यप्यनारभ्याधीतानां प्रकृतिगामित्वं न्याय्यं तथाऽपि श्रुतेन पाञ्चदश्येनावरुद्धत्वाद्विकृतिष्वेव निविशते । तथा सति वैमृधादिषु विकृतिष्वनारभ्यवाद-प्राप्ताः सप्तदश सामिधेन्यः प्राकरणिकेन विधिना पुनर्विधीयमाना गृह्यमेधीया-ज्यभागवत्क्लृप्तोपकारत्वेनेतिकर्तव्यताकाङ्क्षां पूरयन्त्यश्चोदकं लोपयन्त्यो वैमृधा-देरपूर्वकर्मतां गमयन्ति । साप्तदश्यं त्वनारभ्यवादप्राप्तमनूद्यत इति प्राप्ते ब्रूमः । वैमृधादिषु सामिधेन्य आज्यभागवन्न विधीयन्ते किंतु चोदकप्राप्ता अनूद्य साप्त-दश्यं विधीयते । तच्च साप्तदश्यं वैमृधादिप्रकरणेष्वाम्नातैर्विधिभिः कातुविदेव विकृतिषु तत्रानारभ्यवादो विलम्बते प्रथमं विधेयस्य साप्तदश्यस्य सामिधेनीसंब-न्धमवबोध्य । तत्संबन्धान्यथानुपपत्त्या क्रतुप्रवेशं परिकल्प्य प्रकृतौ पाञ्चदश्य-पराहतत्वेन विकृतिषु सर्वासु निवेशः क्रियत इति विलम्बः । प्राकरणिकैर्विधिभिः सामिधेनीसंबन्ध एव बोधनीयः । विकृतौ तद्विशेषे च प्रवेशो न कल्पनीयः । प्रत्यक्षप्रकरणपाठेनैव तत्सिद्धेः । तत्र साप्तदश्यस्य वैमृधादिविकृतिविशेषसंबन्धे सहसा प्रतिपन्ने सति तद्विरोधात्सर्वप्रकृतिसंबन्धो न कल्पयितुं शक्यः । अनार-भ्यवादस्तु चोदकप्राप्तस्य पाञ्चदश्यस्य बाधकः । सर्वथाऽपि चतुर्धाकरणवदुप-संहारो न त्वाज्यभागवदपूर्वं कर्म ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऐतरेयब्राह्मण-भाष्यस्य प्रथमाध्याये प्रथमः खण्डः ॥ १ ॥

दीक्षणीयेष्टिं निरूप्य तत्प्रशंसार्थमिष्टिशब्दनिर्वचनं दर्शयति--

यज्ञो वै देवेभ्य उदक्रामत्तामिष्टिभिः प्रैषमैच्छन्यदि-
ष्टिभिः प्रैषमैच्छंस्तदिष्टीनामिष्टित्वं तम्वि॒न्दन्, इति।

ज्योतिष्टोमाभिमानी यज्ञपुरुषः केनापि निमित्तेनापरक्तो देवेभ्योऽपक्रान्तवान्। तं यज्ञं देवा दीक्षणीयाप्रायणीयादिभिरिष्टिभिः प्रैषमन्वेष्टुमैच्छन्। इच्छान्ति यज्ञमाभिरितीष्टिशब्दव्युत्पत्तिः। यजतेर्धातोरिष्टिशब्दः सर्वत्र प्रसिद्धः। अत्र त्विच्छतिर्धातोरिति विशेषः। अन्विष्य तं यज्ञमनुक्रमेण लब्धवन्तः।

तल्लाभवेदनं प्रशंसति--

अनुवित्तयज्ञो राध्नोति य एवं वेद, इति।

वेदिता तदनुष्ठानेन लब्धयज्ञः फलेन समृद्धो भवति। पुनरपि दीक्षणीयादीष्टिप्रशंसार्थं तास्विष्टिषु विद्यमानानामाहुतीनां वाचकं शब्दं निर्वक्ति--

आहूतयो वै नामैता यदाहुतय एताभिर्वै देवा
न्यजमानो ह्वयति तदाहुतीनामाहूतित्वम्, इति।

आहुतय इत्युकारेण ह्रस्वेनाऽऽहूतय इत्येवं दीर्घेण युक्तं द्रष्टव्यम्। ह्वयत्याभिरिति तद्व्युत्पत्तिः। जुहोतिधातोरुत्पन्नः शब्दः पूर्वं प्रसिद्धः। अयं तु हूवयतिधातोरुत्पन्न इति विशेषः।

इष्टीराहुतीश्च मिलित्वा प्रकारान्तरेण प्रशंसति--

ऊतयः खलु वै ता नाम याभिर्देवा यजमानस्य हव-
मायन्ति ये वै पन्थानो याः सुतयस्ता वा ऊतयस्
उ एवैतत्स्वर्गयाणा यजमानस्य भवन्ति, इति।

हूयन्ते देवा अस्मिन्निति हवोऽत्र सोमयागो याभिरिष्टिभिस्तत्र ताभिराहुतिभिश्च निमित्तभूताभिर्देवा यजमानस्य यज्ञमागच्छन्ति ता इष्टय आहूतयश्चोतय इत्येतन्नाम प्रतिपद्यन्ते। खलुशब्दो वैशब्दश्च प्रसिद्ध्यर्थः। अवन्ति रक्षन्तीत्यवतेर्धातोरूतिशब्दः प्रसिद्धः। आयन्त्यागच्छन्ति याभिरित्याङ्पूर्वस्यायतिधातोर्वा वर्णविकारेणोतिशब्दः। यद्वा तस्मादेव धातोः स्वर्गप्रापकत्वाभिप्रायेण शब्दो व्युत्पाद्यते। ये केचित्पन्थान इष्टिरूपाः स्वर्गस्य प्रौढमार्गाः सन्ति याश्च सुतयस्तन्मार्गावयवरूपा आहुतयः सन्ति ता द्विविधा ऊतय इत्युच्यन्ते। त उ एवैतत्त

एवैते द्विविधा अपि मार्गा यजमानस्य स्वर्गयाणाः स्वर्गप्रापका भवन्ति ।

पुनरपीष्टिप्रशंसार्थं तदङ्गभूतयोर्याज्यानुवाक्ययोर्वक्तारि प्रयुज्यमानं होतृशब्दं निर्वक्तुं ब्रह्मवादिनां प्रश्नमवतारयति —

तदाहुर्यदन्यो जुहोत्यथ योऽनु चाऽऽह यजति च कस्मात्तं होतेत्याचक्षत इति, इति ।

तत्तास्विष्टिषु किंचिच्चोद्यमाहुः । यद्यस्मात्कारणाद्धोतुरन्योऽध्वर्युर्जुहोति तस्मात्तत्कारणात्तद्धातुनिष्पन्नो होतृशब्दस्तस्याध्वर्योर्युक्तः । याज्ञिकास्तु तमध्वर्युं होतेति नाऽऽचक्षते । अथ यः पुमाननु चाऽऽह पुरोनुवाक्यां चानुब्रूते यजति च याज्यां च पठति तं पुमांसमनुवक्तेति यष्टेति चानभिधाय कस्मात्कारणाद्धोतेत्याचक्षते । इतिशब्दः प्रश्नसमाप्त्यर्थः ।

अभिज्ञानामभिप्रेतं प्रश्नस्योत्तरं दर्शयति- —

यद्धाव स तत्र यथाभाजनं देवता अमुमावहामुमावहेत्यावाहयति तदेव होतुर्होतृत्वं होता भवति, इति ।

यद्धाव यस्मादेव कारणाद्याज्यानुवाक्ययोर्वक्ता स पुमांस्तत्र यागे यथाभाजनं यथास्थानं सर्वा देवता आवाहयति–अमुमग्निमावह, अमुं सोममावहेति तदेव तस्मादेव कारणाद्याज्ञिकप्रसिद्धस्य होतुस्तन्नाम संपन्नम् । अत्र ण्यन्तस्य वहधातोश्छान्दस्या प्रक्रियया होतृशब्दनिष्पत्तिर्न तु जुहोतिधातोस्तस्माद्धोमकर्तृत्वाभावेऽप्यावाहयितृत्वसद्भावाद्धोतृत्वमुपपन्नमित्ययं याज्यानुवाक्ययोर्वक्ताऽपि होता भवत्येव ।

होतृत्ववेदनं प्रशंसति— -

होतेत्येनमाचक्षते य एवं वेद ॥ २ ॥ इति ।

याज्ञिका एनं वेदितारं होतारं मुख्यो होतेति कथयन्ति । हौत्रे कर्मणि कुशलो भवतीत्यर्थः ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे ऐतरेय-
ब्राह्मणभाष्यस्य प्रथमाध्याये द्वितीयः खण्डः ॥ २ ॥

इत्थमिष्ट्याहु(हू)त्यूतिहोतृशब्दानां निर्वचनेन दीक्षणीयेष्टिं प्रशस्य तयेष्ट्या दीक्षितस्य संस्कारविशेषान्विधातुं प्रस्तौति— —

पुनर्वा एतमृत्विजो गर्भं कुर्वन्ति यं दीक्षयन्ति, इति ।

यं यजमानं दीक्षणीयेष्ट्या दीक्षितं कुर्वन्ति तं यजमानं पुरा मातापितरौ कांचित्काले गर्भं कृतवन्तौ पुनरप्येनमिदानीमृत्विजो यज्ञकाले गर्भं कुर्वन्ति गर्भवदसौ संस्कारैः पालनीय इत्यर्थः।

एकं संस्कारं विधत्ते–

अद्भिरभिषिञ्चन्ति, इति ।

अप्सु स्नपयन्तीत्यर्थः। एतदेवाभिप्रेत्य तैत्तिरीया यजमानस्य वपनादूर्ध्वं स्नानमामनन्ति–'आङ्गिरसः सुवर्गं लोकं यन्तोऽप्सु दीक्षातपसी प्रावेशयन्। अप्सु स्नाति साक्षादेव दीक्षातपसी अवरुन्धे' इति। यजमानस्य स्नानकर्तृत्वेऽपि ऋत्विजां स्नापयितृत्वमभिप्रेत्याभिषिञ्चन्तीत्युक्तम्।

उक्तानामपां प्रशंसामाह–

रेतो वा आपः सरेतसमेवैनं तत्कृत्वा दीक्षयन्ति, इति ।

कार्यकारणयोरभेदादपां रेतस्त्वं वैराजदेहगताद्रेतस आप उत्पन्नाः। तथा चाऽऽरण्यके सृष्टिप्रकरणे समाम्नायते--'शिश्नाद्रेतो रेतस आपः' इति। यद्वा मनुष्यादिशरीरगतं रेतोमूत्रादिकमपां कार्यम्। तच्च गर्भोपनिषद्याम्नातम्--'अस्मिन्पञ्चात्मके शरीरे यत्कठिनं सा पृथिवी यद्द्रवं तदापः' इति। तत्तेनाभिषेचनेनैनं यजमानं सरेतसं पुत्रोत्पादनसमर्थं कृत्वा संस्कुर्वन्ति।

संस्कारान्तरं विधत्ते--

नवनीतेनाभ्यञ्जन्ति, इति ।

सर्वस्मिन्नपि शरीरेऽनुलेपयन्तीत्यर्थः।

नवनीतस्य गर्भस्थानीययजमानयोग्यतां दर्शयति--

आज्यं वै देवानां सुरभि घृतं मनुष्याणामायुतं पितॄणां नवनीतं गर्भाणां तद्यन्नवनीतेनाभ्यञ्जन्ति स्वेनैवैनं तद्भागधेयेन समर्धयन्ति, इति ।

आज्यघृतयोर्भेदः पूर्वाचार्यैरुदाहृतः--"सर्पिर्विलीनमाज्यं स्याद्घनीभूतं घृतं विदुः" इति। ईषद्विलीनमायुतं सुरभि योग्यं प्रियमित्यर्थः। घृतायुतनवनीतेष्वप्येतत्पदमनुवर्तते। ननु तैत्तिरीया घृतस्य देवप्रियत्वमामनन्ति--'घृतं देवानां मस्तु पितॄणां निष्षक्कं मनुष्याणाम्' इति। ईषद्विलीनं मस्तु। निःशेषेण विलीनं निष्षक्कम्। नायं दोष उभयत्र नवनीतप्रशंसारूपार्थवादत्वेन घृताज्ययोर्व्यत्ययेन

पाठेऽपि विरोधाभावात् । तथा सति नवनीतस्य गर्भयोग्यत्वे सति यदि नवनीते-नाभ्यङ्गं कुर्यस्तदानीमेनं यजमानं स्वोचितेनैव भागेन समृद्धं कुर्वन्ति ।

नेत्रयोरञ्जनेन संस्कारं विधत्ते--

आञ्जन्त्येनम्, इति ।

अक्ष्णोर्दृष्टिप्रसादहेतुत्वेनाञ्जनं प्रशंसति--

तेजो वा एतदक्ष्योर्यदाञ्जनं सतेज-समेवैनं तत्कृत्वा दीक्षयन्ति, इति ।

आञ्जनस्याक्षितेजस्त्वं लोके प्रसिद्धम् । तत्प्रकारविशेषः शाखान्तरे दक्षिणं पूर्वमाङ्क्त इत्यादिना विहितः ।

संस्कारान्तरं विधत्ते--

एकविंशत्या दर्भपिञ्जूलैः पावयन्ति, इति ।

दर्भपिञ्जूलशब्देन कुशसंघा उच्यन्ते । तैरेकविंशतिसंख्याकैर्यजमानं मार्ज-यित्वा शुद्धं कुर्युः ।

यद्यप्यसावभिषेकेणैव शुद्धस्तथाऽप्यतिशयेन शुद्धिरित्येवमभिप्रायं दर्शयति--

शुद्धमेवैनं तत्पूतं दीक्षयन्ति, इति ।

पूर्वमपि शुद्धमेव सन्तमेनं यजमानं पुनरपि तत्तेन कुशसंघमार्जनेन पूतं कृत्वा संस्कुर्वन्ति । यद्यपि शाखान्तरे--'द्वाभ्यां पावयति अहोरात्राभ्यामेवैनं पावयति त्रिभिः पावयति' इत्यादिना संख्यान्तरविषया बहवः पक्षा उपन्यस्तास्तथाऽप्येते सर्वं एकविंशतावन्तर्भावादवयुत्यानुवादरूपाः प्रशंसार्थाः । अत एव तत्रान्तिमे पर्याय एकविंशत्या पावयतीत्युपसंहारः कृतः ।

उक्तैः संस्कारैः संस्कृतस्य दीक्षितस्य प्राचीनवंशाख्यशालाप्रवेशं विधत्ते--

दीक्षितावेशितं प्रपादयन्ति, इति ।

दीक्षितस्य प्रवेशार्थं विशेषेण निर्मितः प्राचीनवंशो दीक्षितविमितस्तं प्रवेशयेयुः ।

पूर्वत्र दीक्षितस्य गर्भत्वाभिधानादौचित्येन प्राचीनवंशं योनित्वेन प्रशंसति--

योनिर्वा एषा दीक्षितस्य यद्दीक्षितविमितं योनिमेवैनं तत्स्वां प्रपादयन्ति, इति ।

प्राचीनवंशस्य योनित्वोपचारात्तत्तेन प्राचीनवंशप्रवेशेन स्वकीययोनिप्रवेशः संपाद्यते । सोऽयं प्रवेशः शाखान्तरे विस्पष्टमाम्नायते–' बहिः पावयित्वाऽन्तः प्रपादयति मनुष्यलोक एवैनं पावयित्वा पूतं देवलोकं प्रणयति ' इति । आपस्तम्बोऽप्याह–' आवो देवास ईमह इति पूर्वया द्वारा प्राग्वंशं प्रविश्य ' इति ।

तस्य दीक्षितस्य कंचिन्नियमं विधत्ते–

तस्माद्ध्रुवाद्योनेरास्ते च चरति च, इति ।

अत्र तिस्रः पञ्चम्यः सप्तम्यर्थे द्रष्टव्याः । तस्मिन्दीक्षितार्थं निर्मितदेवयजनाख्ये स्थिरस्थाने स दीक्षित उपवेशनं संचरणं च कुर्यात् ।

विहितमर्थं प्रशंसति–

तस्माद्ध्रुवाद्योनेर्गर्भो धीयन्ते च प्र च जायन्ते, इति ।

यस्माद्गर्भस्थानीयस्य दीक्षितस्य स्थिरे देवयजनस्थाने योनिरूप उपवेशनं संचरणं च तस्माल्लोकेऽपि स्थिरे योनिमध्ये नवसंख्याकान्मासान्गर्भा धार्यन्ते तस्मादेव स्थिराद्योनिमध्यादुत्पद्यन्ते ।

तस्य दीक्षितस्य देवयजनाद्बहिर्निर्गमनं निषेधति–

तस्माद्दीक्षितं नान्यत्र दीक्षितविमितादाादित्योऽभ्युदियाद्वाऽभ्यस्तमियाद्वाऽपि वाऽभ्याश्रावयेयुः, इति ।

यस्माद्दीक्षितस्योपवेशनसंचरणयोर्देवयजनमेव स्थानं तस्मात्कारणाद्दीक्षितविमितादेवयजनदेशाद्-यत्र बहिर्देशे दीक्षितमभिलक्ष्याऽऽदित्यो नोदियान्नास्तमियाच्च । किंचर्त्विजो यं बहिरवस्थितं दीक्षितमभिलक्ष्याऽऽश्रावणादिकं न कुर्युः । यद्यपि ध्रुवाद्योनेरास्ते (च) चरति (चेति) विधानादेवायमर्थः सिद्धस्तथाऽपि मलमूत्रविसर्गाद्यावश्यककार्यार्थं कदाचिद्बहिर्निर्गमनमभ्युपगम्य तत्र विशेषाभिधानमेतत् । कालान्तरे कथंचिद्गमनेऽप्युदयास्तमयाश्रवणादिकालेषु सर्वथा न निर्गच्छेदित्यर्थः । तदेतद्दृष्टान्तपुरःसरं शाखान्तरे प्रपञ्चितम् -' गर्भो वा एष यद्दीक्षितो योनिर्दीक्षितविमितं यद्दीक्षितो दीक्षितविमितात्प्रवसेद्यथा योनेर्गर्भः स्कन्दति तादृगेव तन्न प्रवस्तव्यमात्मनो गोपीथाय ' इति ।

संस्कारान्तरं विधत्ते–

वाससा प्रोर्णुवन्ति, इति ।

ऋत्विजो यजमानं वस्त्रेणाऽऽच्छादयेयुः ।

गर्भस्थानीयं दीक्षितं प्रत्यौचित्येन वस्त्रस्योल्वत्वं दर्शयति—

उल्बं वा एतद्दीक्षितस्य यद्वास
उल्बेनैवैनं तत्प्रोर्णुवन्ति, इति ।

उल्बशब्देन गर्भस्याभ्यन्तरं चर्म सर्ववेष्टनमुच्यते । अयमर्थः शाखान्तरे स्पष्टीकृतः—' गर्भो वा एष यद्दीक्षित उल्बं वासः प्रोर्णुते तस्माद्गर्भाः प्रावृता जायन्ते इति ।

वाससो बहिर्वेष्टनान्तरं विधत्ते—

कृष्णाजिनमुत्तरं भवति, इति ।

बहिर्वेष्टनत्वसाम्येन कृष्णाजिनस्य जरायुरूपत्वं दर्शयति—

उत्तरं वा उल्बाज्जरायु जरायुणैवैनं तत्प्रोर्णुवन्ति, इति ।

संस्कारान्तरं विधत्ते—

मुष्टी कुरुते, इति ।

यजमानो हस्तयोर्मुष्टिं कुर्यात् । तत्प्रकार आपस्तम्बेन स्पष्टमभिहितः—' अथाङ्गुलीर्न्यञ्चति । स्वाहा यज्ञं मनसेति द्वे इभ्यः स्वाहा दिव इति द्वे स्वाहा पृथिव्या इति द्वे स्वाहोरोरन्तरिक्षादिति द्वे स्वाहा यज्ञं वातादारभ इति मुष्टी करोति ' इति ।

गर्भसाम्येन यज्ञस्य सर्वदेवतानां च धारणेन प्रशंसति—

मुष्टी वै कृत्वा गर्भोऽन्तः शेते मुष्टी कृत्वा
कुमारो जायते तद्यन्मुष्टी कुरुते यज्ञं चैव
तत्सर्वाश्च देवता मुष्ट्योः कुरुते, इति ।

गर्भस्य मुष्टिद्वये शास्त्रप्रसिद्ध्यर्थो वैशब्दः । जायमानस्य मुष्टिद्वयं लोके प्रसिद्धम् । मुष्टिमध्ये यज्ञधारणं शाखान्तरेऽप्यान्नातम्—' मुष्टी करोति वाचं यच्छति यज्ञस्य धृत्यै ' इति ।

प्रकारान्तरेण मुष्टिद्वयं प्रशंसति—

तदाहुर्न पूर्वदीक्षिणः संसवोऽस्ति परिगृहीतो
वा एतस्य यज्ञः परिगृहीता देवता नैतस्याऽऽ-
र्तिरस्त्यपरदीक्षिण एव यथा तथेति, इति ।

तत्तत्र मुष्टयोः करणे ब्रह्मवादिनः कंचिद्गुणमाहुः । द्वयोर्बहूनां वा यजमानानां संभूय सोमाभिषवः संसवः । स च महान्दोषस्तस्मिन्नेव देशे तस्मिन्नेव काले मत्सरग्रस्तैर्यजमानैः प्रवर्तितत्वात् । नद्या वा पर्वतेन वा व्यवधानरहितयोः समीपवर्तिनौ यौ सोमयागौ तयोरयं संसवाख्यो दोषः । तथा च सूत्रकार आह– 'संसवोऽनन्तर्हितेषु नद्या वा पर्वतेन वा' इति । सोऽयं दोषः पूर्वदीक्षिणो नास्ति । एकस्मिन्नेव दिवसे द्वयोर्यजमानयोर्मध्ये यः पूर्वं दीक्षणीयेष्टिं करोति स पूर्वदीक्षी । एतस्य मुष्टयोर्मध्ये यज्ञः परिगृहीतः सर्वाश्च देवताः परिगृहीताः । तदानीमितरसंबन्धिनो यज्ञस्यापवृत्तत्वेन तत्र गच्छाम इत्येवं यज्ञस्य देवतानां वाऽऽलोचनाभावात् पश्चाद्दीक्षणीयेष्टिं कुर्वाणस्यापरदीक्षितस्य यज्ञो देवताश्च सुलभा न भवन्ति । पूर्वमन्येन यजमानेनावरुद्धत्वात् । तस्मादपरदीक्षिण आर्तियो विनाशो यथाऽस्ति तथा पूर्वदीक्षिण आर्तिर्नैवास्तिः 'संवेशाय त्वोपवेशाय त्वा' इत्यादिमन्त्रेण येयं संसवप्रायश्चित्ताहुतिः सेयमपरदीक्षिणैव कर्तव्या न पूर्वदीक्षिणेत्यर्थः । इतिशब्दो ब्रह्मवादिवचनसमाप्त्यर्थः ।

यदेतत्कृष्णाजिनवेष्टनं विहितं तस्यावभृथगमनात्प्रागेवोन्मोचनं विधत्ते––

उन्मुच्य कृष्णाजिनमवभृथमभ्यवैति तस्मान्मुक्ता गर्भा जरायोर्जायन्ते, इति ।

योनिस्थानीयादेवयजनदेशान्निर्गत्यावभृथगमनं गर्भरूपस्य दीक्षितस्य जन्मस्थानीयं जन्म च लोके जरायुरूपवेष्टने छिन्ने सति पश्चात्संपद्यते । तस्मादत्रापि जरायुस्थानीयं कृष्णाजिनमुन्मुच्य जन्मस्थानीयमवभृथदेशगमनं कुर्यात् ।

कृष्णाजिनवद्वाससोऽपि प्रसक्तमुन्मोचनं वारयति––

सहैव वाससाऽभ्यवैति तस्मात्सहैवोल्बेन कुमारो जायते ॥ ३ ॥ इति ।

उल्बाख्यस्याभ्यन्तरवेष्टनस्य जन्मकालेऽप्यनिवृत्तिदर्शनादुल्बस्थानीयवस्त्रस्यावभृथगमनकालेऽप्यनुवृत्तिर्द्रष्टव्या । अथ मीमांसा । पञ्चमाध्यायस्य तृतीयपादे चिन्तितम्––

"इष्टिदण्डादिभिर्दीक्षा किंवेष्टयैवोक्तितोऽग्रिमः ।
युक्तः संस्कार इष्टयैव दण्डादिव्यञ्जकत्वतः" ॥

ज्योतिष्टोमे श्रूयते-'आग्नावैष्णवमेकादशकपालं निर्वपेद्दीक्षिष्यमाणः' इति। अन्यदपि श्रुतम्-'दण्डेन दीक्षयति कृष्णाजिनेन दीक्षयति' इति । अत्रेष्टिवद्दण्डादीनामपि साधनत्वविधानात्सर्वैरियं दीक्षेति चेन्नैवम् । इष्टेः क्रियारूपत्वात्संस्कारहेतुत्वं युक्तं दण्डादयस्तु द्रव्यरूपा न पुरुषं संस्कर्तुं प्रभवन्ति । न चैवं दण्डादिवैयर्थ्यं दीक्षितोऽयमित्यभिव्यक्तिरूपस्य दृष्टप्रयोजनस्य सद्भावात् । तस्मादिष्टचैव दीक्षा सिध्यति ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऐतरेय-

ब्राह्मणभाष्यस्य प्रथमाध्याये तृतीयः खण्डः ॥ ३ ॥

विवक्षितस्य हौत्रस्योपोद्घातत्वे दीक्षणीयेष्टिं विधाय तां च बहुधा प्रशस्य प्रसङ्गादीक्षितसंस्कारा विहिताः। अथ विवक्षितं हौत्रं विधत्ते-

त्वमग्ने सप्रथा असि सोम यास्ते मयो-
भुव इत्याज्यभागयोः पुरोनुवाक्ये अनु-
ब्रूयाद्यः पूर्वमनीजानः स्यात्तस्मै, इति ।

यो यजमान इतः पूर्वं सोमयागं न कृतवानिदानीं क्रियमाण एव प्रथमः प्रयोगस्तस्मै यजमानाय तदर्थं दीक्षणीयेष्टौ प्रथमस्याऽऽज्यभागस्य त्वमग्न इति पुरोनुवाक्या । द्वितीयस्य सोम यास्त इति पुरोनुवाक्या । तदुभयमध्वर्युणा प्रेषितो होताऽनुब्रूयात् ।

उक्तस्य प्रथममन्त्रस्य प्रथमप्रयोगानुकूल्यं दर्शयति--

त्वया यज्ञं वितन्वत इति यज्ञमेवास्मा एतद्वितनोति. इति ।

तस्मिन्मन्त्रे त्वयेत्यादिस्तृतीयः पादस्तस्यायमर्थः हेऽग्ने क्रियमाणमस्मद्यज्ञमिममृत्विजस्त्वया त्वत्प्रसादेन वितन्वते विस्तारयन्तीति । एतदेतेन मन्त्रवचनेनास्मै यजमानाय यज्ञं वितनोत्येव पूर्वमविस्तारितमपि यज्ञमिदानीं विस्तारयन्त्येव ।

अधिकारिविशेषेण प्रकारान्तरं विधत्ते–

अग्निः प्रत्नेन मन्मना सोम गीर्भिष्ट्वा वय-
मिति यः पूर्वमीजानः स्यात्तस्मै, इति ।

यो यजमानः पूर्वं सोमयागं कृतवांस्तस्मै यजमानार्थं पुनः सोमयागप्रयोगे दीक्षणीयेष्टावग्निः प्रत्नेनेति प्रथमस्याऽऽज्यभागस्य पुरोनुवाक्या । सोम गीर्गि-रिति द्वितीयस्य ।

तत्र प्रथममन्त्रस्य पुनः प्रयोगानुकूल्यं दर्शयति–

प्रत्नमिति पूर्वं कर्माभिवदति, इति ।

तस्मिन्मन्त्रे यत्प्रत्नमिति पदं तेन पदेन पूर्वमनुष्ठितं सोमयागाख्यं कर्माभिधी-यते । "पुराणप्रतनप्रत्नपुरातनचिरंतनाः" इति प्रत्नशब्दस्याभिधानैकारैः पुरातन-पर्यायत्वाभिधानात् ।

ईजानानीजानभेदेन व्यवस्थितं यन्मन्त्रचतुष्टयमुक्तं सोऽयं पूर्वः पक्ष इत्य-भिप्रेत्य दूषयति–

तत्तन्नाऽऽदृत्यम्, इति ।

तत्र दीक्षणीयेष्टिगतयोराज्यभागयोस्त्वमग्न इत्यादिकमनुब्रूयादिति यन्मतमास्ति तन्मतं नाऽऽदरणीयम् ।

किं तर्ह्यादरणीयमित्याशङ्क्याऽऽह–

अग्निर्वृत्राणि जङ्घन॰ त्वं (त्त्वं) सोमासि
सत्पतिरिति वार्त्रघ्नावेव कुर्यात्, इति ।

वृत्रं शत्रुं हन्तीति वृत्रहा । वृत्रघ्नः संबन्धिनौ मन्त्रौ वार्त्रघ्नौ । वृत्राणि जङ्घनादिति तल्लिङ्गाच्चेत्संबन्धित्वम् । अग्निर्वृत्राणीति प्रथमस्याऽऽज्यभागस्य पुरोनुवाक्या । त्वं सोमासीति द्वितीयस्य ।

एतयोर्मन्त्रयोरानुकूल्यं दर्शयति–

वृत्रं वा एष हन्ति यं यज्ञ उपन-
मति तस्माद्वार्त्रघ्नावेव कर्तव्यौ, इति ।

यं यजमानं यज्ञ उपनमति सोमयागे प्रेरयति एष यजमानो वृत्रं पापरूपं शत्रुं हन्त्येव तस्मात्कारणाद्वृत्रहत्यासंबन्धिनावेव मन्त्रौ कर्तव्यौ । यथा प्रथममन्त्रे वृत्राणि जङ्घनदिति लिङ्गमस्ति तथा द्वितीयेऽपि त्वं राजोत वृत्रहेति लिङ्गं विद्यते । तस्मादुभयोरपि तत्संबन्धित्वं पूर्वोक्तयोस्तु पक्षयोर्वितन्वते प्रत्नमित्यानुकूल्यलिङ्गं प्रथमयोरेव मन्त्रयोर्दृश्यते न तूत्तरयोस्तस्मात्तन्नाऽऽदरणीयमिति दूषयित्वोभयलिङ्गसद्भावादयं पक्षः स्वीकृतः ।

आज्यभागरूपेऽङ्गकर्मणि पुरोनुवाक्यायुग्मं विधाय प्रधानकर्मणि हविषि याज्यानुवाक्ये विधत्ते-

अग्निर्मुखं प्रथमो देवतानामग्निश्च विष्णो तप उत्तमं मह इत्याग्नावैष्णवस्य हविषो याज्यानुवाक्ये भवतः इति ।

प्रथमनिर्दिष्टत्वाग्निर्मुखमित्येषा पुरोनुवाक्या । पश्चान्निर्दिष्टत्वादग्निश्चेति याज्या। यद्यप्यर्थानुसारेणानुवाक्यायाज्ये भवत इति विधातव्यं तथाऽप्यल्पाच्तरमिति व्याकरणसूत्रानुसारेण याज्याशब्दस्य पूर्वनिपातो द्रष्टव्यः ।

तयोर्ऋचोः कर्मानुकूल्यं दर्शयति-

आग्नावैष्णव्यौ रूपसमृद्धे एतद्वै यज्ञस्य समृद्धं यद्रूपसमृद्धं यत्कर्म क्रियमाणमृगभिवदति, इति ।

अग्निश्च विष्णुश्च ययोर्ऋचोः प्रतिपाद्ये देवते भवतस्ते उभे ऋचावाग्नावैष्णव्यौ । ते च कर्मानुकूल्येन रूपेण समृद्धे । न च रूपसमृद्धं (द्ध) वैयर्थ्यं शङ्कनीयम् । कर्मणो यदङ्गं रूपसमृद्धं भवत्येतदेव यज्ञस्याङ्गेषु समृद्धं संपूर्णं न तु तस्मिंकिंचिदपि वैकल्यमास्ति । केयं रूपसमृद्धिरिति चेत् । पठ्यमानेयमृगनुष्ठीयमानं कर्माभिवदति साकल्येन ब्रवीतीति यदस्ति, एषैव रूपसमृद्धिः ।

मन्त्रप्रतिपाद्यदेवताप्रशंसाद्वारेण पुनरपि मन्त्रौ प्रशंसति-

अग्निश्च ह वै विष्णुश्च देवानां दीक्षापालौ तौ दीक्षाया ईशाते तद्यदाग्नावैष्णवं हविर्भवति यौ दीक्षाया ईशाते तौ प्रीतौ दीक्षां प्रयच्छतां यौ दीक्षयितारौ तौ दीक्षयेतामिति, इति ।

योऽयमग्निः सर्वेषां देवानां प्रथमो यश्च विष्णुः सर्वेषामुत्तमस्तावुभौ देवानां

मध्ये दीक्षाख्यस्य च व्रतस्य पालयितारौ तावुभौ दीक्षाया ईशाते स्वामिनौ भवतस्तस्मात्तयोर्दीक्षापालकत्वं युक्तम् । तथा सति यद्यग्नाविष्णुदेवताकं हविर्दीक्षणीयेष्टौ भवति तदानीं यौ दीक्षायाः स्वामिनौ देवौ तौ प्रीतौ यजमानाय दीक्षां प्रयच्छताम् । उक्तस्यैव व्याख्यानं यौ दीक्षयितारावित्यादिकम् । इतिशब्दोऽभिप्रायपरामर्शार्थः । अनेनाभिप्रायेणाऽऽग्नावैष्णवं हविः क्रियते तस्मान्मन्त्रपतिपाद्यावग्नाविष्णू प्रशस्तावित्यर्थः ।

मन्त्रगतं छन्दः प्रशंसति—

त्रिष्टुभौ भवतः सेन्द्रियत्वाय ॥ ४ ॥ इति ।

त्रिष्टुप्छन्दस इन्द्रियसाधनत्वेनेन्द्रियरूपत्वं श्रुत्यन्तरे श्रुतम्—'इन्द्रियं वै त्रिष्टुप्' इति । अतो मन्त्रगतं छन्दो यजमानस्य सेन्द्रियत्वाय भवति । अथ मीमांसा । द्वादशाध्यायस्य चतुर्थपादे चिन्तितम्—

"पुरोनुवाक्यया याज्या विकल्प्या वा समुच्चिता ।
पुरैवाऽऽद्यः समाख्यानाद्वचनाच्च समुच्चयः" ॥

देवताप्रकाशनकार्यस्यैकत्वाद्युग्मयोर्यथा विकल्पस्तथैवैकयुग्मगतयोरिति चेन्नैवम् । पुरोनुवाक्येति समाख्याया उत्तरकालीनयाज्यामन्तरेणानुपपत्तेः । किंच पुरोनुवाक्यामनूच्य याज्यया जुहोतीति प्रत्यक्षवचनेन देवतोपलक्षणहविःप्रकाशनकार्यभेदोक्तिपुरःसरं साहित्यं विधीयते तस्मात्समुच्चयः ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऐतरेयब्राह्मणभाष्ये प्रथमाध्यायस्य चतुर्थः खण्डः ॥ ४ ॥

प्रधानस्य हविषो याज्यानुवाक्ये विधाय स्विष्टकृद्रूपस्य यागस्य फलविशेषाय च्छन्दोविशेषयुक्ते याज्यानुवाक्ये विधातुकामः प्रथमं द्वे ऋचौ विधत्ते—

यत्र्यौ स्विष्टकृतः संयाज्ये कुर्वीत तेजस्कामो ब्रह्मवर्चसकामः, इति ।

स ह्व्यावाळमर्त्य (ऋ० सं० म० ३ सू० ११ ऋ० २) इत्येका गायत्री अग्निर्होता पुरोहित (ऋ० सं० म० ३ सू० ११ ऋ० १) इत्यपरा गायत्री ते उभे स्विष्टकृद्यागस्य संयाज्ये कुर्यात् । कीदृशोऽधिकारी । तेजः शरीरकान्तिः । ब्रह्मवर्चसं श्रुताध्ययनसंपत्तिः तदुभयकामोऽत्राधिकारी । संयाज्याशब्दार्थमाश्वलायन आह—'स्विष्टकृतः संयाज्ये इत्युक्ते सौविष्टकृती प्रतीयात्' इति । स्विष्टकृत्संबन्धिन्यौ याज्यानुवाक्ये इत्यर्थः ।

गायत्र्या उक्तफलसाधनत्वमुपपादयति —

तेजो वै ब्रह्मवर्चसं गायत्री, इति।

तत्सवितुर्वरेण्य (ऋ० सं० म० ३ सू० ६२ ऋ० १०) मित्यस्यामृचि यद्गायत्रीछन्दस्तस्य तेजोब्रह्मवर्चससाधनत्वेन तद्रूपत्वं लोके प्रसिद्धम् । स्नान-धौतवस्त्रदर्भतिलकधारणपुरःसरं गायत्रीं जपतो ब्राह्मणस्य देहे काचिदाकारशोभा दृश्यते तदिदं तेजः । स च जपिता वेदमधीते तदर्थं च शृणोति तदिदं ब्रह्म-वर्चसम् ।

वेदनपुरःसरमनुष्ठातुः फलं दर्शयति—

तेजस्वी ब्रह्मवर्चसी भवति य एवं विद्वान्गायत्र्यौ कुरुते, इति।

यद्यपि विधिवाक्येऽनुष्ठानमात्रात्फलमुक्तं तथाऽपि वेदनपूर्वकानुष्ठाने तस्मिन्नेव फले कश्चिदतिशयो द्रष्टव्यः ।

फलान्तराय च्छन्दोन्तरं विधत्ते—

उष्णिहा वाऽऽयुष्कामः कुर्वीत, इति।

अग्ने वाजस्य गोमत (ऋ० सं० म० १ सू० ७९ ऋ० ४) इत्येकोष्णिक् । स इधानो वसुष्कवि (ऋ० सं० म० १ सू० ७९ ऋ० ५) रित्यपरा । ते उभे शतसंवत्सरपर्यन्तायुष्कामः कुर्वीत ।

गायत्र्या अप्यक्षरचतुष्टयेनोष्णिक्छन्दसोऽधिकत्वादायुर्वृद्धिहेतुत्वं युक्तमित्य-भिप्रेत्योष्णिगायुषोरभेदमाह—

पूर्ववद्वेदनं प्रशंसति—

आयुर्वा उष्णिक्, इति।

फलान्तराय च्छन्दोन्तरं विधत्ते--

अनुष्टुभौ स्वर्गकामः कुर्वीत इति।

त्वमग्ने वसू (ऋ० सं० म० १ सू० ४५ ऋ० १) निति द्वे अनुष्टभौ । अनुष्टभोः स्वर्गहेतुत्वमुपपादयति--

द्वयोर्वा अनुष्टुभोश्चतुःषष्टिरक्षराणि त्रय इम ऊर्ध्वा एकविंशा लोका एकविंश-त्यैकविंशत्यैवेमाँल्लोकान्रोहति स्वर्ग एव लोके चतुःषष्टित्वेन प्रतितिष्ठति, इति।

श्रुत्यन्तरे द्वात्रिंशदक्षराऽनुष्टुबित्यभिधानाद्द्वयोरनुष्टुभोर्मिलित्वा चतुःषष्टिसंख्याकान्यक्षराणि संपद्यन्ते । इमे पृथिव्यन्तरिक्षस्वर्गरूपा एकैकस्माद्ऊर्ध्वत्वेन वर्तमानाः प्रत्येकमेकविंशत्यवयवसमूहरूपा लोकास्त्रयो विद्यन्ते । तेष्वेकैकं लोकमेकैकाक्षरगतयैकविंशतिसंख्यया यजमान आरोहति । अन्तिमेन चतुःषष्टितमेनाक्षरेण तृतीये स्वर्ग एव लोके यजमानः प्रतितिष्ठति स्थिरोऽवतिष्ठते ।

वेदनं प्रशंसति—

प्रतितिष्ठति य एवं विद्वाननुष्टुभौ कुरुते, इति ।

फलान्तराय च्छन्दोन्तरं विधत्ते—

बृहत्यौ श्रीकामो यशस्कामः कुर्वीत, इति ।

श्रीर्धनधान्यादिसंपत्तिः । यशः सत्कुलदानादिजन्या कीर्तिः । एना वो अग्निं (ऋ० सं० म० ७ सू० १६ ऋ० १) मिति द्वे बृहत्यौ ।

श्रीयशसोः कारणत्वेन बृहत्यास्तदुभयरूपत्वं दर्शयति—

श्रीर्वै यशश्छन्दसां बृहती, इति ।

गायत्र्यादीनां छन्दसां मध्ये या बृहती सैव श्रीरूपा यशोरूपा च । सर्वेषां छन्दसां पशुसंपादनमात्सर्ये सति बृहत्या विजयमानायाः पशुरूपत्वाच्छ्रीरूपत्वम् । तथा च तैत्तिरीया आमनन्ति—' छन्दांसि पशुष्वाजिमयुस्तान्बृहत्युदजयत्तस्माद्धार्हताः पशव उच्यन्ते ' इति । इतरच्छन्दोभिराश्रितत्वादपि श्रीरूपत्वं त एवाऽऽमनन्ति—' यानि च च्छन्दाꣳस्यत्यरिच्यन्त । यानि च नोदभवन् । तानि निर्वीर्याणि हीनान्यमन्यन्त । साऽब्रवीद्बृहतीम् । मामेव भूत्वा मामुपसꣳश्रयत ' इति । मध्यं ह्येषामङ्गानामात्मा मध्यंछन्दसांबृहतीति मध्यत्वेन प्रशंसनाद्यशोरूपत्वमपि द्रष्टव्यम् ।

वेदनं प्रशंसति—

श्रियमेव यश आत्मन्धत्ते य एवं विद्वान्बृहत्यौ कुरुते, इति ।

एवकारः श्रीयशसोः समुच्चयार्थः ।

अहीनसत्राद्युत्तरयज्ञप्राप्तिकामस्य च्छन्दोन्तरं विधत्ते—

पङ्क्ती यज्ञकामः कुर्वीत, इति ।

अग्निं तं मन्य (ऋ० सं० म० ५ सू० ६ ऋ० १) इति द्वे पङ्क्ती ।

यज्ञस्य पङ्क्तिसंबन्धित्वं दर्शयति-

पाङ्क्तो वै यज्ञः, इति ।

वैशब्दो वक्ष्यमाणबहुविधपाङ्क्तत्वप्रसिद्धिप्रदर्शनार्थः ।

वेदनं प्रशंसति-

उपैनं यज्ञो नमति य एवं विद्वान्पङ्क्ती कुरूते, इति ।

वीर्यप्राप्त्यर्थं छन्दोन्तरं विधत्ते--

त्रिष्टुभौ वीर्यकामः कुर्वीत, इति ।

द्वे विरूपे चरत (ऋ० सं० म० १ सू० ९५ ऋ० १) इति द्वे त्रिष्टुभौ । त्रिष्टुप्छन्दसो वीर्यसाधनत्वेन तद्रूपत्वं दर्शयति--

ओजो वा इन्द्रियं वीर्यं त्रिष्टुप्, इति ।

वीर्यं शरीरबलम् । तच्चौजस इन्द्रियस्य चोपलक्षणम् । ओजो बलहेतुरष्टमो धातुः । इन्द्रियं चक्षुरादिपाटवम् ।

वेदनं प्रशंसति--

ओजस्वीन्द्रियवान्वीर्यवान्भवति
य एवं विद्वांस्त्रिष्टुभौ कुरुते, इति ।

गवादिपशुप्राप्तये छन्दोन्तरं विधत्ते--

जगत्यौ पशुकामः कुर्वीत इति ।

जनस्य गोपा (ऋ० सं० म० ५ सू० ११ ऋ० १) इति द्वे जगत्यौ । पशूनां जगतीछन्दःसाध्यत्वेन तत्संबन्धं दर्शयति-

जागता वै पशवः, इति ।

वेदनं प्रशंसति--

पशुमान्भवति य एवं विद्वाञ्जगत्यौ कुरुते, इति ।

अत्तुं योग्यमन्नं कामयमानस्य च्छन्दोन्तरं विधत्ते--

विराजावन्नाद्यकामः कुर्वीत, इति ।

प्रेद्धो अग्न (ऋ० सं० म० ७ सू० १ ऋ० ३) । इमो अग्न (ऋ० सं० म० ७ सू० १ ऋ० १८) इति द्वे विराजौ ।

अन्नस्य विराजनहेतुत्वेन विराड्रूपत्वमाह--

अन्नं वै विराट्, इति ।

तदेव स्पष्टयति—

तस्माद्यस्यैवेह भूयिष्ठमन्नं भवति स एव भूयिष्ठं लोके विराजति तद्विराजो विराट्त्वम्, इति ।

यस्मादन्नस्य विराजनहेतुत्वं तस्मात्कारणादिह लोके यस्यैव पुरुषस्यान्नं प्रभूतं भवति स एव जनमध्येऽत्यन्तं शोभते । तस्माद्विराजत्यनेनेति व्युत्पत्त्या विराट्शब्दो निष्पन्नः ।

वेदनं प्रशंसति—

वि स्वेषु राजति श्रेष्ठः स्वानां भवति य एवं वेद ॥५॥ इति ।

यः पुमान्विराजो महिमानं वेत्ति स पुमान्स्वकीयेषु ज्ञातिषु मध्ये विशेषेण राजति लौकिकसामर्थ्येन शोभते । तथा स्वीयानां मध्ये ज्ञातीनां वृत्तविद्याविनयादिभिः श्रेष्ठो भवति ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऐतरेयब्राह्मणभाष्ये प्रथमाध्याये पञ्चमः खण्डः ॥ ५ ॥

काम्ये संयाज्ये नानाविधे विधाय नित्ये संयाज्ये विधातुं विराट्छन्दः प्रशंसति—

अथो पञ्चवीर्यं वा एतच्छन्दो यद्विराट्, इति ।

अथो काम्यसंयाज्याकथनानन्तरं नित्ये संयाज्ये कथ्येते इति शेषः । विराडाख्यं यच्छन्दोऽस्ति, एतच्छन्दः पञ्चविधवीर्योपेतत्वेन प्रसिद्धम् ।

तदेव विस्पष्टयति

यत्त्रिपदा तेनोष्णिहागायत्र्यौ यदस्या एकादशाक्षराणि पदानि तेन त्रिष्टुब्यत्त्रयस्त्रिंशदक्षरा तेनानुष्टुभ्न वा एकेनाक्षरेण छन्दांसि वियन्ति न द्वाभ्यां यद्विराट् तत्पञ्चमम्, इति ।

यस्मात्कारणादियं विराट् पादत्रयोपेता तेन कारणेनोष्णिग्रूपा गायत्रीरूपा च भवति । तयोरपि पादत्रयोपेतत्वेन समत्वादुतस्त्योरुभयोर्वीर्यं विराज्यस्ति । यस्मात्कारणादस्या विराजः पादा एकादशाक्षरोपेतास्तेन कारणेनेयं त्रिष्टुब्रूपा भवति तदीयं वीर्यं प्राप्नोति । यस्मात्कारणादियं त्रयस्त्रिंशदक्षरोपेता तेन कार

णेनानुष्टुब्रूपा तदीयं वीर्यं प्राप्नोति । यद्यप्यनुष्टुब्द्वात्रिंशदक्षरा तथाऽप्येकेनाक्षरेण न्यूनेनाधिकेन वा छन्दांसि नैव नश्यन्ति । तथा द्वाभ्यामक्षराभ्यां न्यूनाभ्यामधिकाभ्यां वा न नश्यन्ति । "एको हि दोषो गुणसंनिपाते निमज्जतीन्दोः किरणेष्विवाङ्कः" इति न्यायात् । ननु त्रिंदशक्षराडिति श्रूयते । तत्र प्रेद्धो अग्न इत्यस्यामृचि एकोनत्रिंशदक्षराणीमो अग्न इत्यस्यामृचि द्वात्रिंशदक्षराण्यतस्तयोर्न विराट्त्वमिति चेन्नैवम् । न वा एकेनाक्षरेणेति वाक्येनैव परिहृतत्वात् । यस्माद्विराट्तस्मादेतदीयं पञ्चमं वीर्यमस्ति ।

एवंविधविराड्वेदनं प्रशंसति—

सर्वेषां छन्दसां वीर्यमवरुन्धे सर्वेषां छन्दसां वीर्यमश्नुते सर्वेषां छन्दसां सायुज्यं सरूपतां सलोकतामश्नुतेऽन्नादोऽन्नपतिर्भवत्यश्नुते प्रजयाऽन्नाद्यं य एवं विद्वान्विराजौ कुरुते, इति ।

गायत्र्युष्णिक्त्रिष्टुबनुष्टुब्विराड्रूपाणां सर्वेषां छन्दसां यत्सामर्थ्यमस्ति तदयं वेदिताऽवरुन्धेऽभिमुखी करोति । कृत्वा चाश्नुते प्राप्नोति । तथा सर्वच्छन्दोभिमानिदेवानां सायुज्यं सहभावं सरूपतां समानरूपत्वं सलोकतामेकस्थाननिवासं च प्राप्नोति । अन्नादोऽन्नभक्षणसमर्थो नीरोगः । अन्नपतिर्बहूनन्नस्वामी भवति । न केवलं स्वयमेव किंतु स्वकीयया पुत्रादिप्रजया सहान्नाद्यमश्नुते ।

इत्थं छन्दः प्रशस्येदानीं विधत्ते—

तस्मादिराजावेव कर्तव्ये, इति ।

यस्माद्विराजो ह्युक्तमहिमाऽस्ति तस्मादित्यर्थः ।

तयोः प्रतीकद्वयं दर्शयति—

प्रेद्धो अग्न इमो अग्न इत्येते, इति ।

इत्थं दीक्षणीयेष्टौ स्विष्टकृतः संयाज्ये विधाय दीक्षितस्य सत्यवदनं विधत्ते—

ऋतं वाव दीक्षा सत्यं दीक्षा तस्माद्दीक्षितेन सत्यमेव वदितव्यम्, इति ।

मनसा यथावस्तुचिन्तनमृतशब्दाभिधेयं वाचा यथावस्तुकथनं सत्यशब्दा-

भिधेयं तदुभयात्मिका दीक्षा तद्वैकल्ये विनश्यति । यस्मादेवं तस्माद्दीक्षितेन सत्यमेव वदितव्यं न तु किंचिदप्यनृतं वदेत् ।

तदशक्याभिधानमित्यभिप्रेत्यानुजिघृक्षया प्रकारान्तरं विधातुं प्रस्तौति—

अथो खल्वाहुः कोऽर्हति मनुष्यः सर्वं सत्यं वदितुं सत्यसंहिता वै देवा अनृतसंहिता मनुष्या इति, इति ।

प्रकारान्तरप्रारम्भार्थोऽयमथोशब्दः । ब्रह्मवादिन एवमाहुः खलु मनुष्यः को नाम सर्वं वाक्यं सत्यं वदितुमर्हति न कश्चिदपि तथा कर्तुं शक्नोति । देवा एव सत्यसंहिताः सत्ये तात्पर्यवन्तः । मनुष्यास्तु प्रायेणानृते तात्पर्ययुक्ताः । इतिशब्दो ब्रह्मवाचिवचनसमाप्त्यर्थः ।

इदानीं सत्यवदनफलसिद्ध्यर्थं प्रकारान्तरं विधत्ते—

विचक्षणवतीं वाचं वदेत् इति ।

विचक्षणेत्यक्षरचतुष्टयात्मकोऽयं मन्त्रस्तद्युक्तं वाक्यं प्रयुञ्जीत । देवदत्त विचक्षण गामानाय यज्ञदत्त विचक्षण गां बधानेत्येवं तत्प्रयोगः । यदाहाऽऽपस्तम्बः— 'चनसित विचक्षण इति नामधेयान्तेषु दधाति चनसितेति ब्राह्मणं विचक्षणेति राजन्यवैश्यौ' इति ।

विचक्षणेति मन्त्रस्य सत्यवदनपूर्तिहेतुत्वं प्रतिपादयति—

चक्षुर्वै विचक्षणं वि ह्येनेन पश्यति, इति ।

चक्षुरिन्द्रियमेव विचक्षणशब्दवाच्यं तदेवं स्पष्टी क्रियते । चक्षिङ्दर्शन इत्यस्माद्धातोरयं शब्दो निष्पन्नः । तथा सति विशेषेण वस्तुतत्त्वमनेनाऽऽचष्टे पश्यतीति विचक्षणं नेत्रम् । तस्माच्चक्षुर्विचक्षणमिति पर्यायौ । उक्तनिर्वचनप्रदर्शनार्थ इतिशब्दः ।

अस्त्वेवं तयोः पर्यायत्वं कथमेतावता सत्यसंपूर्तिसिद्धिरित्याशङ्क्याऽऽह—

एतद्ध वै मनुष्येषु सत्यं निहितं यच्चक्षुः, इति ।

प्रत्यक्षानुमानादिप्रमाणानां मध्ये प्रत्यक्षप्रमितिसाधनं यच्चक्षुरिन्द्रियमस्ति, एतदेव मनुष्येषु सत्यं निहितं यथावस्तुज्ञानसाधनत्वेनाभिमतम् । तस्माच्चक्षुष्पर्यायविचक्षणशब्दप्रयोगेण सत्यसंपूर्तिर्भवति ।

अन्वयव्यतिरेकाभ्यां चक्षुषो यथावस्तुदर्शनसाधनत्वं साधयति—

तस्मादाचक्षाणमाहुरद्रागिति स यद्यदर्शमि-

त्याहाथास्य श्रद्दधति यद्यु वै स्वयं पश्यति न बहूनां चनान्येषां श्रद्दधाति, इति ।

यस्माच्चक्षुषस्तत्त्वदर्शनहेतुत्वं मनुष्याणामभिप्रेतं तस्माल्लोके सभायामागत्य कांचिद्वार्तामाचक्षाणं पुरुषं प्रति सभ्या एवमाहुरद्रागिति । किंत्वेवमेवाद्राक्षीरित्यर्थः । स च पुरुषो यद्यहमेवाद्राक्षमिति ब्रूयात्तदाऽस्य वचनं सत्यमिति सभ्याः सर्वे श्रद्दधति विश्वासं कुर्वन्ति । तदिदमेकमुदाहरणम् । यद्यु वा इत्ययं निपातसमूह उदाहरणान्तरप्रदर्शनार्थः । अथवा कश्चित्पुमान्स्वयमेव चक्षुषा स्कन्धमूलाद्युपेतं स्थाणुं पश्यति । अन्ये बहवः पुरुषा दूरवर्तिनोऽपश्यन्तः पुरुषोऽयमित्याचक्षते । चनशब्दोऽपिशब्दार्थः । बहूनामप्यन्येषां वचनमयं पुरुषो न श्रद्दधाति किंतु स्वकीयं चाक्षुषं दर्शनमेव श्रद्दधाति । वाजसनेयिनोऽप्यामनन्ति—'द्वौ विवदमानावेवाऽऽतामहमदर्शमहमश्रौषमिति य एवं ब्रूयादहमदर्शमिति तस्मा एव श्रद्दधीत' इति । तैत्तिरीयाश्चाऽऽमनन्ति—'अनृतं वै वाचा वदति । अनृतं मनसा ध्यायति । चक्षुर्वै सत्यम् । अद्रागित्याह । अहमदर्शमिति । तत्सत्यम्' इति ।

तथाविधचक्षुःपर्यायस्य विचक्षणशब्दस्य सत्यसंमूर्तिहेतुत्वमुपपाद्य पूर्वोक्तं विधिमुपसंहरति—

तस्माद्विचक्षणवतीमेव वाचं वदेत्सत्योत्तरा हैवास्य वागुदिता भवति भवति ॥ ६ ॥ इति इत्यैतरेयब्राह्मणे प्रथमपञ्चिकायां प्रथमोऽध्यायः ॥१॥

अस्य विचक्षणशब्दोपेतवचनवादिनो या वागस्ति सा सत्योत्तरा स्वरूपेणानृताऽपि विचक्षणेतिमन्त्रसामर्थ्येन सत्यभूयिष्ठैव भवति । अनृतदोषो न स्पृशतीत्यर्थः । भवतिशब्दस्याभ्यासोऽध्यायसमाप्त्यर्थः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऐतरेयब्राह्मणभाष्यस्य प्रथमाध्याये षष्ठः खण्डः ॥ ६ ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकवीरबुक्कणसाम्राज्यधुरंधरसायणाचार्यकृतावैतरेयब्राह्मणभाष्ये प्रथमपञ्चिकायां प्रथमोऽध्यायः ॥ १ ॥

अथ द्वितीयोऽध्यायः ।

प्रथमे दीक्षणीयेष्टिस्तत्स्तुतिस्तत्र संस्कृतिः ।
याज्यानुवाक्ये संयाज्याः सत्योक्तिश्चेति वर्णिताः ॥ १ ॥

अथ प्रायणीयादिकं विधातुं द्वितीयोऽध्याय आरभ्यते । तत्राऽऽदौ प्रायणीय-शब्दार्थं वदति—

स्वर्गं वा एतेन लोकमुपप्रयन्ति यत्प्रायणी-यस्तत्प्रायणीयस्य प्रायणीयत्वम्, इति ।

प्रायणीयाख्यो यः कर्मविशेषोऽस्त्येतेन यजमानाः स्वर्गं लोकं सामीप्येन प्राप्नुवन्ति । तस्मात्प्रयन्त्यनेनेति व्युत्पत्त्या तत्प्रायणीयनाम संपन्नम् ।

अथ विधास्यमानौ प्रायणीयोदयनीयाख्यौ कर्मविशेषौ स्तस्तौ सह प्रशंसति—

प्राणो वै प्रायणीय उदान उदयनीयः समानो होता भवति समानौ हि प्राणोदानौ प्राणानां क्लृप्त्यै प्राणानां प्रतिप्रज्ञात्यै, इति ।

प्राणवायोः प्रायणीयकर्मणश्च प्रशब्दसाम्यादभेदः । उदानवायोरुदयनीय कर्मणश्चोच्छब्दसाम्यादभेदः । किंच प्रायणीयोदयनीययोः कर्मणोर्याज्यानुवाक्या-दिप्रयोगार्थमेक एव होता भवति । प्राणोदानवायू चैकदेहवर्तित्वादेकेन होत्राऽनु ष्ठेयाभ्यां कर्मभ्यां समानवतो वायुविशेषयोश्चाभेदः । तच्च कर्मद्वयानुष्ठानं प्राण-वायूनां क्लृप्त्यै स्वस्वव्यापारसामर्थ्याय भवति । तथा प्राणवायूनां प्रत्येकमयं प्राणोऽयमुदान इत्यादिविशेषस्य प्रज्ञानाय भवति । तस्मात्कर्मद्वयं प्रशस्त-मित्यर्थः ।

अथ देवताविशेषविधानायाख्यायिकामुपक्रमते—

यज्ञो वै देवेभ्यः उपक्रामत्ते देवा न किंचनाश-क्नुवन्कर्तुं न प्राजानंस्तेऽब्रुवन्नादितिं त्वयेमं यज्ञं प्रजानामेति सा तथेत्यब्रवीत्सा वै वो वरं वृणा

इति वृणीष्वेति सैतमेव वरमवृणीत मत्प्रायणा यज्ञाः सन्तु मदुदयना इति तथेति तस्मादादित्यश्चरुः प्रायणीयो भवत्यादित्य उदयनीयो वरवृतो ह्यस्याः, इति ।

योऽयं यज्ञः सोमयागाभिमानी पुरुषः सोऽयं केनापि निमित्तेनापरक्तः सन् देवसकाशादुत्क्रम्य गतवान् । यज्ञपुरुषे गते सति ते देवाः किमपि यज्ञाङ्गं कर्तुं शक्तिरहितास्तदभिज्ञानरहिताश्चाभवन् । ततस्ते सर्वे समागत्यादितिं प्रार्थितवन्तो हेऽदिते त्वत्प्रसादेन वयमिमं यज्ञं कर्तुं ज्ञातुं च शक्ता भूयास्मेति । ततोऽदितिरङ्गीकृत्य ज्ञापयितुमुक्ता चरुरूपेणैतं वरमवृणीत । ये सोमयागास्ते सर्वे मत्प्रायणा मदुदयना मदवसानाश्च सन्त्विति । तस्य वरस्य देवैरङ्गीकृतत्वात्प्रायणीयः प्रारम्भकालीनेष्टिगतश्चरुरदितिदेवताकः कर्तव्य उदयनीयः समाप्तिकालीनोऽपि चरुरदितिदेवताकः कर्तव्यः । यस्मादस्या अदितेस्तादृशश्चरुर्वरेण प्रार्थितस्तस्मात्तथाऽनुष्ठानं युक्तम् । तमिममर्थं तैत्तिरीयाश्चाऽऽमनन्ति—' देवा वै देवयजनमध्यवसाय दिशो न प्राजानंस्तेऽन्योन्यमुपाधावंस्त्वया प्रजानाम त्वयेति तेऽदित्या ॐ समधियन्त त्वया प्रजानामेति साऽब्रवीद्वरं वृणै मत्प्रायणा एव वो यज्ञा मदुदयना आसन्निति तस्मादादित्यः प्रायणीयो यज्ञानामादित्य उदयनीयः ' इति ।

अदितेर्वरान्तरं दर्शयति—

अथो एतं वरमवृणीत मयैव प्राचीं दिशं प्रजानाथाग्निना दक्षिणां सोमेन प्रतीचीं सवित्रोदीचीमिति, इति ।

अथो अपि चेत्यर्थः । मयेत्यादिना वरः प्रपञ्च्यते । हे देवा यूयमिदं देवयजनं समीचीनमित्येवं बहुधा विचारयन्तस्तदर्थं बहुषु देशेषु पर्यटन्तो दिग्भ्रमं प्राप्य प्राच्यादिदिशं न ज्ञातवन्तोऽतो भवतां दिग्विशेषज्ञापनायाहमग्निः सोमः सॐविता चेत्येते चत्वारश्चतुर्षु देशेष्ववस्थिताः । तथा सति यत्राहमस्मि सा प्राची दिगित्येवं मयैव प्राचीं दिशं बुध्यध्वम् । एतमग्न्यादिभिर्दक्षिणादयस्तिस्रो दिशो बोद्धव्याः । इत्येष द्वितीयो वरः । एते देवा अनेन चरुणा तत्र यष्टुं योग्या इति तात्पर्यार्थः ।

तत्र प्रथमं यागं विधत्ते—

पथ्यां यजति, इति ।

पथ्येति देवतायाः नामधेयम् । यद्यपि शाखान्तरे—'पथ्याः स्वस्ति यजति प्राचीमेव तया दिशं प्रजानाति' इति पथ्या स्वस्तिरित्येतावन्नामधेयमाम्नातं तथाऽपि भीमशब्दवन्नामैकदेशेनात्र व्यवहारः । ननु पूर्वत्र मयैव प्राचीं दिशं प्रजानाथेत्यादितेर्वाक्यमाम्नातमिह तु पथ्यां यजतीत्युक्तौ पूर्वापरविरोध इति चेन्नायं दोषः । आदितिदेवतायाः एव पथ्याख्यं मूर्त्यन्तरमिति वक्तुं शक्यत्वात् ।

उक्तं विधिमनूद्य प्रशंसति—

यत्पथ्यां यजति तस्मादासौ पुर उदेति पश्चाऽस्तमेति पथ्यां ह्येषोनुसंचरति, इति ।

यद्यस्मात्कारणात्पूर्वस्यां दिश्यवस्थितां पथ्यां देवतां यजति तस्मात्कारणादसावादित्यः पुरः पूर्वस्यां दिश्युदेति पश्चा पश्चिमायां दिश्यस्तमेति । हि यस्मात्कारणादेष आदित्यः पथ्याख्यां देवतामनुसृत्य संचरति तस्मात्पूर्वापरयोरुदयास्तमयावुपपन्नौ । न च पूर्वदिशः पथ्यासंबन्धेऽपि पश्चिमदिशः स नास्तीति वाच्यम् । उदयनीयायां पश्चिमदिशि पथ्याया यक्ष्यमाणत्वात् । द्वयोर्दिशोस्तत्संबन्धे सत्यादित्यस्य तदनुसंचारो युक्तः ।

दक्षिणदिग्वर्तिनोऽग्नेर्यागं विधत्ते -

अग्निं यजति, इति ।

तं विधिमनूद्य प्रशंसति—

यदग्निं यजति तस्माद्दक्षिणतोऽग्रे ओषधयः पच्यमाना आयन्त्याग्नेय्यो ह्योषधयः इति ।

यस्मादत्र देवानां दिग्विशेषज्ञानपनाय दक्षिणस्यां दिश्यवस्थितमाग्नेयं यजति तस्मात्कारणाद्विन्ध्यपर्वतस्य दक्षिणभागे व्रीह्याद्योषधयोऽग्रे पच्यमाना आयन्ति तत्तत्स्वामिगृहेष्वागच्छन्ति । विन्ध्यस्योत्तरभागे यवगोधूमचणकादिधान्यप्राचुर्यम् । तानि च धान्यानि माघफाल्गुनयोः पच्यन्त इति पश्चाद्भावीनि । दक्षिणदिग्भागे तु यवादिप्राचुर्याभावात् । प्राचुर्याणि च व्रीह्यादीनिति कार्तिकमार्गशीर्षयोः पच्यमानत्वादग्रे पाकोऽभिहितः । हि यस्मात्कारणादोषधय आग्नेय्यः । आसां पाकस्याग्न्यधीनत्वात् । यथौदनरूपेण बाह्यपाकोऽग्न्धीन एवं बीजरूपेण सस्यपाकोऽपि तदन्तर्वर्त्यग्न्यधीन इति द्रष्टव्यम् । तस्मादग्निसंबन्धिन्यां दक्षिणस्यां दिश्यग्रे पाको युक्तः ।

पश्चिमदिश्यवस्थितस्य सोमस्य यागं विधते—

सोमं यजति, इति ।

तं विधिमनूद्य प्रशंसति-

यत्सोमं यजति तस्मात्प्रतीच्योऽप्यापो वहन्त्यः स्यन्दन्ते सौम्या ह्यापः, इति ।

यस्मादापः सोमसंबन्धिन्यः सोमस्यामृतकिरणत्वात्तस्माद्वहन्त्य आपः प्रतीच्योऽपि प्रत्यङ्मुख्योऽपि सत्यः स्यन्दन्ते । पश्चिमसमुद्रसमीपे प्रवहन्तीनां नदीनां पश्चिमाभिमुखत्वदर्शनात् । सोमस्यात्र पश्चिमदिश्यवस्थितत्वेन तदीयानामपां तन्मुखत्वं युक्तम् ।

उत्तरदिश्यवस्थितस्य सवितुर्यागं विधत्ते-

सवितारं यजति, इति ।

तं विधिमनूद्य प्रशंसति-

यत्सवितारं यजति तस्मादुत्तरतः पश्चादयं भूयिष्ठं पवमानः पवते सवितृप्रसूतो ह्येष एतत्पवते, इति ।

सविता प्रेरको देवः सोऽत्र यस्मादुत्तरस्यां दिश्यवतिष्ठते तस्मात्तेन सवित्रा प्रेरितो वायुरुत्तरपश्चिमयोरन्तरालवर्तिन्यां वायव्यां दिशि भूयिष्ठं पवतेऽत्यधिकं संचरति ।

ऊर्ध्वदिग्वर्तिन्या अदितेर्यागं विधत्ते -

उत्तमामदितिं यजति, इति ।

उत्तमां मूर्धावस्थितामित्यर्थः अत एव तैत्तिरीया आमनन्ति-' पथ्यां स्वस्तिमयजन्प्राचीमेव तया दिशं प्रजानन्नग्निना दक्षिणां सोमेन प्रतीचीं सवित्रोदीचीमदित्योर्ध्वाम् ' इति ।

उक्तं विधिमनूद्य प्रशंसति -

यदुत्तमामदितिं यजति तस्मादसाविमां दृष्ट्याऽभ्युनत्त्यभिजिघ्रति, इति ।

यस्मादूर्ध्वदिग्वर्ती(र्तीं)नां तस्मादूर्ध्वदिग्वर्तिनां द्यौरिमामधोवर्तिनीं स्वकीयया वृष्ट्याऽभ्युनत्ति सर्वतः क्लेदयति । पुनरपि घर्मकालेऽभिजिघ्रति भूमिगतं रसमाभिमुख्येनाऽऽदत्ते । अत्र पथ्यादीनां चतसृणां देवतानामाज्येन यागः । अदितेस्तु

चरुणेति द्रष्टव्यम् । तदाहाऽऽपस्तम्बः—' चतुर आज्यभागान्पति दिशं यजति पथ्यां स्वस्तिं पुरस्तादग्निं दक्षिणतः सोमं पश्चात्सवितारमुत्तरतो मध्येऽदितिं हविषा ' इति ।

यथोक्तदेवतागतां संख्यां प्रशंसति—

पञ्च देवता यजति पाङ्क्तो यज्ञः सर्वा दिशः कल्पन्ते यज्ञोऽपि, इति ।

पथ्याद्यादित्यन्ताः पञ्च देवता यज्ञस्य पञ्चसंख्यायोगात्पाङ्क्तत्वं बहुधा वक्ष्यतेऽतो यज्ञे देवताविषया पञ्चसंख्या युक्ता । दिशोऽपि प्राच्याद्या ऊर्ध्वान्ताः पञ्चसंख्याकाः । अतो देवतागतपञ्चसंख्यया गताः सर्वा दिशः कल्पन्ते समर्था भवन्ति । पूर्वमविज्ञाताः सत्यो ज्ञाता भवन्तीत्यर्थः । यज्ञोऽप्यनया कल्पते स्वप्रयोजनसमर्थो भवति ।

वेदनं प्रशंसति -

तस्यै जनतायै कल्पते यत्रैवं विद्वान्होता भवति ॥७॥ इति ।

यत्र यस्यां जनतायां याज्ञिकजनसमूहे होता प्रायणीयदेवतानां वेदिता भवति तस्यां जनतायामयं होता स्वप्रयोजनसमर्थो भवति ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऐतरेयब्राह्मणभाष्यस्य प्रथमाध्याये प्रथमः खण्डः ॥ १ ॥ (७) ।

— —

प्रायणीयेष्टिं विधाय तत्र प्रयाजानां काम्यप्रकारविशेषं विधत्ते-

यस्तेजो ब्रह्मवर्चसमिच्छेत्प्रयाजाहुतिभिः प्राङ् स इयात्तेजो वै ब्रह्मवर्चसं प्राची दिक्, इति ।

समिधो यजति तनूनपातं यजतीत्यादिना विहिताः पञ्च प्रयाजाहुतयस्तासां प्रकृतावनुष्ठानप्रकार आपस्तम्बेन दर्शितः—' पञ्च प्रयाजान्पाचो यजति प्रतिदिशं वा समिधः पुरस्तात्तनूनपातं दक्षिणत इडां पश्चाद्बर्हिरुत्तरतः स्वाहाकारं मध्ये ' इति । स प्रकारोऽत्र चोदकप्राप्तस्तमपोह्य शैरीरकान्तिश्रुताध्ययनसंपत्तिं च कामयमानस्य प्रकारान्तरं विधीयते । यः पुमांस्तेजो ब्रह्मवर्चसमिच्छेत्स पुमान्प्रयाजाहुतीभिः प्राङियात् । प्रागपवर्गात्सा आचेरीत्यर्थः । आदित्योदयेन प्राच्यास्तेजत्वं(स्त्वं) तदाभिमुख्येन गायत्रीजपानुष्ठानाद्ब्रह्मवर्चसत्वं च ।

वेदनं प्रशंसति

तेजस्वी ब्रह्मवर्चसी भवति य एवं विद्वान्प्राङेति, इति ।

अन्नाद्यकामस्य दक्षिणापवर्गत्वं विधत्ते--

योऽन्नाद्यमिच्छेत्प्रयाजाहुतिभिर्दक्षिणा स
इयादन्नादो वा एषोऽन्नपतिर्यदग्निः, इति ।

दक्षिणस्यां दिश्यवस्थितो योऽग्निः सोऽग्निरन्नादः । भक्षितस्यान्नस्योदराग्निना जीर्यमाणत्वात्सस्येष्ववस्थाय व्रीह्यादिपाकहेतुत्वात्स्थाल्यादिष्ववस्थायौदनपाकहेतुत्वादन्नपतित्वम् । अतोऽन्नकामस्य दक्षिणापवर्गत्वं युक्तम् ।

वेदनं प्रशंसति--

अन्नादोऽन्नपतिर्भवत्यश्नुते प्रजयाऽ-
न्नाद्यं य एवं विद्वान्दक्षिणैति, इति ।

पशुकामस्य प्रत्यगपवर्गत्वं विधत्ते--

यः पशूनिच्छेत्प्रयाजाहुतिभिः प्रत्यङ् स
इयात्पशवो वा एते यदापः, इति ।

प्रत्यग्दिश्यवस्थितस्य सोमस्य संबन्धिन्य आप इति पूर्वमुक्तम् । तासां चापां पानद्वारेण तृणोत्पादनद्वारेण वा पशूपकारित्वात्पशुत्वमतः पशुकामस्य तथाविधप्रत्यगवपवर्गत्वं युक्तम् ।

वेदनं प्रशंसति--

पशुमान्भवति य एवं विद्वान्प्रत्यङ्ङेति, इति ।

अहीनाद्युत्तरक्रतुषु सोमपानं कामयमानस्योत्तरापवर्गत्वं विधत्ते -

यः सोमपीथमिच्छेत्प्रयाजाहुतिभिरुदङ्
स इयादुत्तरा ह वै सोमो राजा, इति ।

यः सोमवल्लीरूपो राजमानत्वेन राजा तस्योत्तरस्यां दिशि प्रभूतत्वात्तद्रूपत्वमतः सोमपानद्वाराऽस्योत्तरापवर्गत्वं युक्तम् ।

वेदनं प्रशंसति--

प्र सोमपीथमाप्नोति य एवं विद्वानुदङ्ङेति, इति ।

स्वर्गकामस्याऽऽहवनीये प्रयाजहोमविधिमर्थवादेनोन्नयति--

स्वर्ग्यैवोर्ध्वा दिक्सर्वासु दिक्षु राध्नोति, इति ।

• येयंमूर्ध्वा दिक्स्वर्गाय हितैव तस्मात्स्वर्गकाम ऊर्ध्वां दिशं भावयन्नाहवनीयमध्ये प्रयाजान्यजेतेत्यर्थः । यथा स्वर्गं प्राप्नोति तथा सर्वासु दिक्षु स समृद्धश्च भवत्यत. समृद्धिकामो मध्ये यजेतेत्यवगन्तव्यम् ।

वेदनं प्रशंसति—

सम्यञ्चो वा इमे लोकाः सम्यञ्चोऽस्मा इमे लोकाः श्रियै दीद्यति य एवं वेद, इति ।

इमे भूरादयस्त्रयो लोकास्ते सम्यञ्चः स्वोचितभोगप्रदा अतो य एवमाहवनीयमध्ये होमं वेदास्मै यजमानाय भूरादय इमे लोकाः सम्यञ्चः स्वस्वोचितभोगप्रदाः सन्तः श्रियै धनधान्यादिसंपदे दीद्यति प्रकाशन्ते ।

इत्थं काम्यान्प्रयाजहोमप्रकारान्विधाय पूर्वोक्तप्रायणीयदेवताः क्रमेण स्तोतुं प्रथमदेवतां प्रशंसति--

पथ्यां यजति यत्पथ्यां यजति वाचमेव तद्यज्ञमुखे संभरति, इति ।

पथ्याभिधां देवतां यजतीति पूर्वोक्तविधिरत्र स्मारितः । प्रयाजविधिभिर्व्यवहितत्वात् । स्तोतव्यस्य स्मारणमपेक्षितम् । स्मारितस्य स्तुतावन्वेतुं पुनरनुवादः । पथ्यायागेन यज्ञमुखे सोमयागप्रारम्भे वाचमेव मन्त्ररूपां संभरति संपादयति । यतो यज्ञानुष्ठानरूपाय मार्गाय हिता पथ्या मन्त्ररूपा वाक्तादृश्यतः पथ्यायाग एव वाक्संपादनम् ।

आग्न्यादिकाश्चतस्रो देवताः प्रशंसति—

प्राणापानावग्नीषोमौ प्रसवाय सविता प्रतिष्ठित्या अदितिः, इति ।

मुखनासिकाभ्यो बहिः संचरन्नुच्छ्वासरूपो वायुः प्राणः । स हि औष्ण्यं शरीरे जनयति । ततोऽग्नेः प्राणरूपत्वं प्रतिनिर्दिश्य मुखनासिकाभ्यामन्तः संचरन्वायुरपानः । स च शरीरे शैत्यं जनयतीति निश्वासस्य सोमरूपत्वम् । सविता देवः प्रसवाय यज्ञकर्मणि प्रेरणायोपयुज्यते । अदितिर्भूमिः प्रतिष्ठित्यै स्थिरावस्थानायोपयुज्यते ।

पुनरपि प्रकारान्तरेण प्रथमां देवतां स्तौति--

पथ्यामेव यजति यत्पथ्यामेव यजति वाचैव तद्यज्ञं पन्थामपि नयति, इति ।

अत्रैवकारः पूर्वोक्तस्तुतिविशेषस्तस्यायमर्थः । देवतान्तरं परित्यज्य प्रथमतः पथ्यामेव यजति । ईदृशं यजनं यदस्ति तत्तेन यजनेन मन्त्ररूपया वाचैव च क्रियमाणं यज्ञं वैकल्यपरिहारेण समीचीनमनुष्ठानमार्गं प्रापयति देवतान्तरस्य प्रथमयागे तु नैतत्संभवतीति ।

द्वितीयाद्यां देवतां प्रशंसति—

चक्षुषी एवाग्नीषोमौ प्रसवाय सविता प्रतिष्ठित्या आदितिः, इति ।

अग्नीषोमयोस्तेजस्वित्वाद्दिग्विशेषज्ञानहेतुत्वाच्चक्षुरिन्द्रियरूपत्वम् । चतुर्थपञ्चमदेवतयोस्तु पूर्वोक्तस्तुतिरेव समीचीनेत्यभिप्रेत्य पुनस्तत्पाठः ।

अग्नीषोमयोश्चक्षुःस्वरूपत्वे कोऽतिशय इत्याशङ्क्याऽऽह—

चक्षुषा वै देवा यज्ञं प्राजानंश्चक्षुषा वा एतत्प्रज्ञायते यदप्रज्ञेयं तस्मादपि मुग्धश्चरित्वा यदैवानुष्ठ्या चक्षुषा प्रजानात्यथ प्रजानाति, इति ।

देवाः पुरा यज्ञपुरुष उत्क्रान्ते सत्यन्विष्य चक्षुषैव प्रज्ञातवन्तः । लोकेऽपि यद्वस्तु सहसा प्रज्ञातुमशक्यं तदेतच्चक्षुषैव प्रज्ञायते तस्मादित्यादिना तदेवोदाह्रियते । यस्माद्दुर्ज्ञेयमपि चक्षुषा ज्ञातुं शक्यं तस्मादेष कारणाल्लोके मुग्धो दिङ्मोहं प्राप्तः पुरुषो वनेषु बहुधा चरित्वा यदैव यस्मिन्नेव काले ऽनुष्ठ्या केनापि प्रयत्नविशेषेण पर्वतारोहणादिरूपेण सूर्योदयादिरूपं दिग्विशेषालिङ्गं चक्षुषा प्रजानाति, अथ तदानीमेव ग्रामादिमार्गं प्रजानाति । तस्माच्चक्षु स्वरूपाभ्यामग्नीषोमाभ्यां दिग्विशेषज्ञानं युक्तम् ।

अथादितेः प्रतिष्ठाहेतुत्वं प्रपञ्चयति—

यद्वै तद्देवा यज्ञं प्राजानन्नस्या वाव तत्प्राजानन्नस्यां समभरन्नस्यै वै यज्ञस्तायतेऽस्यै क्रियतेऽस्यै संभ्रियत इयं ह्यदितिस्तदुत्तमामदितिं यजति यदुत्तमामदितिं यजति यज्ञस्य प्रज्ञात्यै स्वर्गस्य लोकस्यानुख्यात्यै ॥ ८ ॥ इति ।

पूर्वत्र चक्षुषा वै देवा यज्ञं प्राजानन्निति यदुक्तं तत्प्रज्ञानं यद्वै यस्मिन्नेव काले संपन्नं तत्तस्मित्काले ऽस्यां वाव प्राजानन्भूमावेन यज्ञपुरुषं प्रज्ञातवन्तः ।

ततोऽस्यां भूमौ समभरन्यज्ञसाधनानि संपादितवन्तः । अस्यै वा अस्यामेव भूमौ यज्ञस्तायते विस्तीर्यते । न केवलं यज्ञस्यैव भूमिराधारः किंतु लौकिकं कृष्यादिकमप्यस्यां क्रियते तत्साधनमप्यस्यां संपाद्यते । न च भूमेः प्राशस्त्ये सत्यदितेः किमायातमिति वाच्यम् । हि यस्मादियं भूमिरादितेः । तत्तस्मादादितिमुत्तमां चरमदेवतां यजति । ईदृशं यजनं यदस्ति तत्क्रियमाणस्य यज्ञस्यादितिद्वारा देवेषु प्रज्ञानाय संपद्यते । तच्च देवप्रानस्य स्वर्गलोकावगमाय भवति ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऐतरेयब्राह्मणभाष्यस्य द्वितीयाध्याये द्वितीयः खण्डः ॥ २ ॥ (८) ।

— —

प्रायणीयेष्टौ काम्यान्प्रयाजप्रकारान्विधाय देवताश्च प्रशस्य तासां देवतानां संबन्धिन्यौ याज्यानुवाक्ये क्रमेणाभिसंधातुं प्रस्तौति--

देवविशः कल्पयितव्या इत्याहुस्ताः कल्पमाना अनु मनुष्यविशः कल्पन्त इति सर्वा विशः कल्पन्ते कल्पते यज्ञोऽपि, इति ।

विश इत्ययं शब्दः प्रजामात्रवाची वैश्यजातिविशेषवाची वा । सन्ति हि देवेष्वपि जातिविशेषाः । अग्निर्बृहस्पतिश्च देहेषु ब्राह्मणौ । ' अग्ने महाँ असि ब्राह्मणभारत । ब्रह्म वै देवानां बृहस्पतिः ' इति श्रुतेः । क्षत्रियादिजातयस्तु सृष्टिप्रकरणे वाजसनेयिभिः स्पष्टमेवाऽऽम्नाताः--' तच्छ्रेयोरूपमत्यसृजत क्षत्रं यान्येतानि देवताक्षत्त्राणीन्द्रो वरुणः सोमो रुद्रः पर्जन्यो यमो मृत्युरीशानः ' इति । 'स विशमसृजत यान्येतानि गणश आख्यायते[न्ते] वसवो रुद्रा आदित्या विश्वे देवा मरुतः' इति । ' तमथ शौद्रं वर्णमसृजत पूषणम् ' इति । एवमादित्यो वै दैवं क्षत्त्रमित्यादिकमुदाहार्यम् । एवं सति देवेषु विशो वैश्यजातिरूपाः प्रजा मरुदादयो याः सन्ति ता अस्मिन्यागे कल्पयितव्याः संपादयितव्या इत्येवं ब्रह्मवादिन आहुः । कल्पमानाः संपन्नास्ता देवविशोऽनुसृत्य मनुष्यविशोऽपि तदनुग्रहात्संपद्यन्त इत्येवं दैव्यो मानुष्यश्च सर्वा विशो यजमानस्य संपद्यन्ते । तासु संपन्नासु द्रव्यलाभाद्यज्ञोऽपि कल्पते स्वप्रयोजनसमर्थो भवति ।

एतद्वेदनं प्रशंसति-

तस्यै जनतायै कल्पते यत्रैवं विद्वान्होता भवति, इति ।

पूर्ववद्व्याख्येयम् -

प्रथमं देवतायाः पुरोनुवाक्यां विधत्ते--

स्वस्ति नः पथ्यासु धन्वस्वित्यन्वाह, इति ।

स एष प्रथमपादः कृत्स्नाया ऋचः प्रतीकग्रहणार्थः ।

अस्यामृचि देवविशां वाचकं मरुच्छब्दं दर्शयितुमवशिष्टं पादत्रयं पठति—

स्वस्त्यप्सु वृजने स्वर्वति । स्वस्ति नः पुत्रकृथेषु
योनिषु स्वस्ति राये मरुतो दधातनेति, इति ।

इतिशब्दो मन्त्रसमाप्त्यर्थः । मन्त्रस्यायमर्थः । हे मरुतो नोऽस्माकं धन्वसु पथ्यासु मरुदेशरूपेषु मार्गेषु स्वस्ति दधातन जलप्रदानेन क्षेमं कुरुत । किंच सतीष्वप्यप्सु वृजने वर्जिते जनशून्ये स्वर्वति स्वर्गयुक्ते मार्गे स्वस्ति दधातन । यथा पुत्रकृथेषु पुत्रोत्पत्तिकरणेषु योनिषु कलत्रेषु नोऽस्माकं स्वस्ति दधातन । तथा राये धनाय स्वस्त्यस्तु ।

अस्यामृचि मरुच्छब्दः कथमेतावता विशां कल्पनमित्याह--

मरुतो वै देवानां विशस्ता एवैतद्यज्ञमुखेऽचीक्लृपत्, इति ।

एतदेतेन मरुच्छब्दोपेतमन्त्रपाठेन यज्ञमुखे यज्ञप्रारम्भरूपे कर्मणि ता देवानां विशोऽचीक्लृपत्कल्पितवान्भवति ।

छन्दोबाहुल्यमभिधाय प्रशंसति -

सर्वैश्छन्दोभिर्यजेदित्याहुः सर्वैर्वै छन्दोभिरिष्ट्वा
देवाः स्वर्गं लोकमजयंस्तथैवैतद्यजमानः सर्वै-
श्छन्दोभिरिष्ट्वा स्वर्गं लोकं जयति, इति ।

स्पष्टोऽर्थः ।

मन्त्रविशेषान्मन्त्रच्छन्दांसि च पञ्चानां देवानां क्रमेणोदाहरति --

स्वस्ति नः पथ्यासु धन्वसु स्वस्तिरिद्धि प्रपथे

श्रेष्ठेति पथ्यायाः स्वस्तेस्त्रिष्टुभावग्ने नय सुपथा राये अस्माना देवानामपि पन्थामगन्मेत्यग्नेस्त्रिष्टुभौ त्वं सोम प्रचिकितो मनीषा या ते धामानि दिवि या पृथिव्यामिति सोमस्य त्रिष्टुभावा विश्वदेवं सत्पतिं य इमा विश्वा जातानीति सवितुर्गायत्र्यौ सुत्रामाणं पृथिवीं द्यामनेहसं महीमू षु मातरं सुव्रतानामित्यदितेर्जगत्यौ, इति ।

स्वस्ति न इत्यनुवाक्या । स्वस्तिरिद्धीति याज्या । अग्ने नयेत्यनुवाक्या । आ देवानामिति याज्या । त्वं सोमेत्यनुवाक्या । या ते धामानीति याज्या । आ विश्वदेवमित्यनुवाक्या । य इमेति याज्या सुत्रामाणमित्यनुवाक्या । महीमू ष्विति याज्या ।

नन्वत्र त्रीण्येव च्छन्दांस्युक्तानि न तु सर्वाणीत्याशङ्क्याऽऽह--

एतानि वाव सर्वाणि च्छन्दांसि गायत्रं त्रैष्टुभं जागतमन्वन्यान्येतानि हि यज्ञे प्रतमामिव क्रियन्ते, इति ।

मुख्यानि सर्वाणि च्छन्दांसि त्रीण्येव । इतराणि तु मुख्यान्यनुसृत्य वर्तन्ते । मुख्यत्वमेवैतानि हीत्यादिना स्पष्टी क्रियते । हि यस्मात्कारणादेतानि त्रीणि यज्ञे-प्रतमामिव क्रियन्तेऽत्यन्तप्राचुर्येणैव प्रयुज्यन्ते ततो मुख्यत्वम् ।

एतद्वेदनं प्रशंसति-

एतैर्ह वा अस्य च्छन्दोभिर्यजतः सर्वैश्छन्दोभिरिष्टं भवति य एवं वेद ॥ ९ ॥ इति ।

स्पष्टोऽर्थः ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऐतरेय-ब्राह्मणभाष्यस्य द्वितीयाध्याये तृतीयः खण्डः ॥ ३ ॥ (९) ।

पञ्चानां देवतानां क्रमेण याज्यानुवाक्ये उदाहृते । अथ संयाज्ये वक्तव्ये । तत्राऽऽदौ तावदुदाहृता याज्यानुवाक्याः प्रशंसति-

ता वा एताः परवत्यो नेतृमत्यः पथिमत्यः स्वस्तिमत्य एतस्य हविषो याज्यानुवाक्या एताभिर्वा इष्ट्वा देवाः स्वर्गं लोकमजयंस्तथैवै-तद्यजमान एताभिरिष्ट्वा स्वर्गं लोकं जयति, इति ।

स्वस्ति नः पथ्यास्वित्याद्या महीमू षु मातरमित्यन्ता दशर्चो याः पूर्वमुदाहृतास्ता एवैताः प्रशब्देनेतृशब्दपथिशब्दस्वस्तिशब्दवत्यः । तत्र प्रशब्दः स्वस्तिरिद्धि प्रपथे त्वं सोम प्रचिकित इत्यत्र श्रूयते । नेतृशब्दोऽग्ने नयेत्यत्र श्रूयते । नयतिधातोः कर्तुस्तत्रावगमात् । पथिशब्दोऽग्ने नय सुपथा, आ देवानामपि पन्थामित्यत्र श्रूयते । स्वस्तिशब्दः स्वस्ति नः पथ्यासु स्वस्तिरिद्धीत्यत्र श्रूयते । तथा सति च्छत्रिन्यायेन सर्वा अप्येता ऋचः प्रादिभिः शब्दैर्युक्ता इति वक्तुं शक्याः । एवं सत्युत्कर्षद्योतकैरेतैः शब्दैर्युक्ता एता ऋचः प्रायणीयेष्टिगतस्य हविषो याज्यानुवाक्याः प्रशस्ता भवन्ति । एताभिर्वा इत्यादेरर्थो विस्पष्टः ।

प्रथमायामृचि चतुर्थं पादमादाय तत्रत्यस्य मरुच्छब्दस्यान्वयव्यतिरेकाभ्यां तात्पर्यं दर्शयति-

तासु पदमस्ति स्वस्ति राये मरुतो दधातनेति मरुतो ह वै देवविशोऽन्तरिक्षभाजनास्तेभ्यो ह यो निवेद्यः स्वर्गं लोकमेतीश्वरा हैनं नि वा रोद्धोर्वि वा मथितोः स यदाह स्वस्ति राये मरुतो दधातनेति तं मरुद्भ्यो देवविड्भ्यो यजमानं निवेदयति न ह वा एनं मरुतो देवविशः स्वर्गं लोकं यन्तं निरुन्धते न विमथ्नते, इति ।

तासु पूर्वोक्तास्वृक्षु पदं पादस्तस्मिन्पादे प्रोक्ता मरुतो देवानां वैश्या अन्तरिक्षे निवसन्ति । एनं यजमानं नि वा रोद्धोः स्वर्गमनं निरोद्धुं वा वि वा मथि-

तोर्विशेषेण मथितुमालोडयितुं विनाशयितुं वा ते मरुत ईश्वराः समर्थाः सोऽयं व्यतिरेकः । बाधस्यापन्यस्तत्वात् । स यदाहेत्यादिरन्वयः । उक्तबाधसमाधानस्य तत्रोपन्यासात् । यदि होता स्वस्ति राय इत्यादिपादं पठेत्तदानीं मरुद्भ्यो यजमानं निवेदयति । ततो मरुतः स्वर्गं लोकं गच्छन्तं यजमानं नैव निरुन्धते नापि विमथ्नते नापि विनाशयन्ति ।

वेदनं प्रशंसति—

स्वस्ति हैनमत्यर्जन्ति स्वर्गं लोकमभि य एवं वेद, इति ।

स्वर्गमभिलक्ष्य जिगमिषुमेनं वेदितारं स्वस्ति क्षेमो यथा भवति यथा मरुतोऽतिशयेन प्रापयन्ति ।

इत्थमुक्ताः प्रधानहविषो याज्यानुवाक्याः प्रशस्य संयाज्ये विधत्ते—

विराजावेतस्य हविषः स्विष्टकृतः संयाज्ये स्यातां ये त्रयस्त्रिंशदक्षरे, इति ।

विराट्छन्दस्कानां बहूनां विद्यमानत्वात्त्रयस्त्रिंशदक्षरशब्देन ते ऋचौ विशेष्येते ।

तयोर्ऋचोः प्रथमपादावुदाहरति—

सेदग्निरग्नीरँत्यस्त्वन्यान्सेदग्नियो वनुष्यतो निपातीत्येते, इति ।

विराजौ प्रशंसति—

विराड्भ्यां वा इष्ट्वा देवाः स्वर्गं लोकमजयंस्तथैवैतद्यजमानो विराड्भ्यामिष्ट्वा स्वर्गं लोकं जयति, इति ।

तथैवैतादिति दार्ष्टान्तिकप्रतिज्ञा । यजमान इत्यादिकं तद्विवरणम् ।

ऋचोरवस्थितामक्षरसंख्यां प्रशंसति—

ते त्रयस्त्रिंशदक्षरे भवतस्त्रयस्त्रिंशद्वै देवा अष्टौ वसव एकादश रुद्रा द्वादशाऽऽदित्याः प्रजापतिश्च वषट्कारश्च तत्प्रथमे यज्ञमुखे देवता

अक्षरभाजः करोत्यक्षरेणाक्षरेणैव तद्देवतां प्रीणाति देवपात्रेणैव तदेवतास्तर्पयति ॥ १० ॥ इति ।

वषट्कारो देवताविशेषः तत्तथा सति देवतानामक्षराणां च संख्यासाम्ये सति । यज्ञमुखं यज्ञोपक्रमः । स च सुत्यादिने प्रातरनुवाकादिना भविष्यति । तदपेक्षया प्रायणीयेष्टिः प्रथमं यज्ञमुखम् । तस्मिन्यज्ञमुखे वस्वादिकाः सर्वदेवतासंख्यासाम्यादक्षरभाजः करोति । तत्तेन देवतानामक्षरप्रापणेनैकैकां देवतामेकैकेनाक्षरेण तोषयति । देवानां पात्रं फलमेकैकमक्षरं तेनैव पात्रेण तत्तदानीं देवतास्तर्पयति प्रीणातीत्यस्यैव विवरणमेतत् ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऐतरेय-ब्राह्मणभाष्ये द्वितीयाध्याये चतुर्थः खण्डः ॥ ४ ॥ (१०)

संयाज्ये विधाय प्रायाजानूयाजविषये किंचिद्विशेषविधानं पूर्वपक्षत्वेन शाखान्तरीयमतमुपन्यस्यते-

प्रयाजवदननुयाजं कर्तव्यं प्रायणीयमित्याहुर्हीनमिव वा एतदीङ्खितमिव यत्प्रायणीयस्यानुयाजा इति, इति ।

प्रायणीयेष्टेर्दर्शपूर्णमासविकृतित्वाच्चोदकेन प्रयाजा अनूयाजाश्च प्राप्ताः । समिधो अग्न आज्यस्येत्याद्या मन्त्रसाध्या ये प्रयाजा देवं बर्हिरित्याद्या मन्त्रसाध्यास्त्रयोऽनूयाजाः प्रायणीयाख्यं कर्म प्रयाजोपेतमनूयाजवर्जितं कर्तव्यमिति शाखान्तरीया आहुः । तत्रैषा युक्तिः प्रायणीयस्यानूयाजा इति यदस्ति तदेतद्धीनमिव वै तस्यैव व्याख्यानमीङ्खितमिवेति । विलम्बितमित्यर्थः । अनूयाजेष्विज्यमानेषु कर्मणि विलम्बो भवेत्तस्मान्न यष्टव्या अनूयाजाः । इतिशब्दः पूर्वसमाप्त्यर्थः । यथा प्रायणीये कर्मण्यनूयाजा वर्ज्यन्ते तथैवोदयनीये कर्मणि प्रयाजा वर्जनीया इति पूर्वाभिप्रायः । तमेतं तैत्तिरीया विस्पष्टमामनन्ति-'प्रयाजवदननुयाजं प्रायणीयं कार्यमनूयाजवदप्रयाजमुदयनीयम्' इति ।

स्वोक्तं पूर्वपक्षं निराचष्टे--

तत्तन्नाऽऽदृत्यं प्रयाजवदेवानुयाजवत्कर्तव्यम्, इति ।

तस्मिन्प्रायणीये कर्मणि तत्कर्मानुयाजवर्जनरूपं नाऽऽदरणीयम् ।

वर्जने बाधमुपन्यस्यति—

प्राणा वै प्रयाजाः प्रजाऽनुयाजा यत्प्रयाजानन्तरियात्प्राणांस्तद्यजमानस्यान्तरियाद्यदनुयाजानन्तरियात्प्रजां तद्यजमानस्यान्तरियात्, इति ।

प्रथमशब्दसामान्यात्प्रथमभावित्वाद्वा प्रयाजा यजमानस्य प्राणरूपाः । पश्चाद्भावित्वादनुयाजाः पुत्रादिरूपाः । यदा प्रयाजा वर्ज्यन्ते तदा यजमानसंबन्धिनां प्राणानामन्तरायो विच्छेदः स्यात् । अनुयाजवर्जने पुत्रादिविच्छेदः । अयमेव पूर्वपक्षबाधस्तैत्तिरीयैराम्नातः—'तत्तथा न कार्यमात्मा वै प्रयाजाः प्रजाऽनूयाजा यत्प्रयाजानन्तरियादात्मानमन्तरियाद्यदनूयाजानन्तरियात्प्रजामन्तरियात्' इति । यद्यपि प्रायणीये प्रयाजवर्जनमप्रसक्तं तथाऽप्युदयनीये तैत्तिरीयोपन्यस्तं प्रयाजवर्जनमभिप्रत्यायं बाधोपन्यासः ।

इत्थं पूर्वपक्षे बाधमुपन्यस्य चोदकैः प्राप्तस्योभयानुष्ठानस्य प्रतिप्रसवरूपं सिद्धान्तं विधत्ते—

तस्मात्प्रयाजवदेवानुयाजवत्कर्तव्यम् , इति ।

यस्मादन्यतरत्यागे बाधस्तस्मादित्यर्थः । तैत्तिरीया अप्येतदामनन्ति—'प्रयाजवदेवानूयाजवत्प्रायणीयं कार्यं प्रयाजवदनूयाजवदुदयनीयम्' इति । अत्र सर्वत्रैतरेयपाठेऽनुयाज इति ह्रस्व उकारः । तैत्तिरीयपाठे दीर्घ इति विवेकः ।

चोदकप्राप्तान्पत्नीसंयाजान्समिष्टयजुश्च निषेधति—

पत्नीर्न संयाजयेत्संस्थितयजुर्न जुहुयात् , इति ।

ततः किमित्यपेक्षायामाह

तावतैव यज्ञोऽसंस्थितः, इति ।

तदानीं यज्ञस्य समाप्तत्वादुत्तरकालीनं सोमक्रयादिकं न प्रवर्तेत । एतेषामननुष्ठानमात्रेण यज्ञोऽसमाप्तो भवति । तत उत्तरानुष्ठानं निर्बाधं प्रवर्तते ।

कंचिद्विशेषं विधत्ते ·

प्रायणीयस्य निष्कासं निदध्यात्तमुदयनीयेनाभिनिर्वपेद्यज्ञस्य संतत्यै यज्ञस्याव्यवच्छेदाय, इति ।

भाण्डगतो लेपरूपो हविःशेषो निष्कासः । प्रायणीयकर्मसंबन्धिनं निष्कासं कस्मिंश्चित्पात्रे स्थापयेत् । ततः सुत्यादिने सोमयागस्यावसान उदयनीयेष्टिगतेन

हविषा सह तं निष्कासं समभिनिर्वपेत् । एवं सति प्रायणीयशेषस्यानुवर्तनात्सो-मयागः संततो भवति न तु तस्य विच्छेदः प्रामोति । तैत्तिरीयाश्चाऽऽमनन्ति- 'प्रायणीयस्य निष्कास उदयनीयमभिनिर्वपति सैव सा यज्ञस्य संततिः' इति ।

प्रकारान्तरमाह-

अथो खलु यस्यामेव स्थाल्यां प्रायणीयं निर्वपे-त्तस्यामुदयनीयं निर्वपेत्तावतैव यज्ञः संततोऽ-व्यवच्छिन्नो भवति, इति ।

नात्र निष्कासोऽपेक्षितः किंतु स्थाल्येकत्वमात्रेण यज्ञस्य संततत्वाद्व्यवच्छे दराहित्यं सिध्यति । सातत्यव्यवच्छेदराहित्ययोरर्थत एकत्वेऽप्यन्वयव्यतिरेकरू-पत्वेन पृथगुपन्यासः ।

अथ प्रायणीयोदयनीयेष्ट्योर्याज्यानुवाक्याव्यत्यासं विधातुं प्रस्तौति-

अमुष्मिन्वा एतेन लोके राध्नुवन्ति नास्मिन्नि-त्याहुर्यत्प्रायणीयमिति प्रायणीयमिति निर्वपन्ति प्रायणीयमिति चरन्ति प्रयन्त्येवास्माल्लोकाद्यज-माना इति, इति ।

प्रायणीयमिति निर्वपन्ति प्रायणीयमिति चरन्ति ब्रह्मवादिनः कंचिद्दोषमाहुः । प्रायणीयमित्येवं विधिनोपेतं यत्कार्यमस्ति, एतेन कर्मणा यजमानाः स्वर्गलोक एव समृद्धिं प्राप्नुवन्ति नास्मिँल्लोके । कथमिति चेत् । प्रायणीयमित्येतन्नाम मनसा कृत्वा निर्वपन्ति । चरणकालेऽपि तथैव चरन्ति । चरणमाहुतिप्रक्षेपः । तस्य च नाम्नोऽयमर्थः । अनेन कर्मणा यजमाना अस्माल्लोकात्प्रयन्त्येव न त्वस्मिँल्लोके कंचित्कालं प्रतितिष्ठन्ति । तस्मात्प्रायणीयनाम संपन्नमिति । श्रौत इतिशब्दो ब्रह्मवाद्युद्भावितदोषसमाप्त्यर्थः ।

अथ तद्दोषसमाधानं विधत्ते-

अविद्ययैव तदाहुर्व्यतिषजेद्याज्यानुवाक्याः, इति ।

अज्ञानेनैव ब्रह्मवादिनस्तद्वचनमाहुः । न त्वत्र तदुक्तदोषोऽस्ति । तद्दोषानुद-याय स्वस्ति नः पथ्यास्वित्यारभ्य महीमू षु मातरमित्यन्तानां याज्यानुवाक्यानां व्यतिषङ्गं कुर्यात् ।

तमेव व्यतिषङ्गं विस्पष्टयति-

याः प्रायणीयस्य पुरोनुवाक्यास्ता उदयनीयस्य

याज्याः कुर्याद्या उदयनीयस्य पुरोनुवाक्यास्ताः प्रायणीयस्य याज्याः कुर्यात्तद्व्यतिषजत्युभयोर्लोकयोर्ऋद्ध्या उभयोर्लोकयोः प्रतिष्ठित्या उभयोर्लोकयोर्ऋध्नोत्युभयोर्लोकयोः प्रतितिष्ठति, इति ।

तत्तेन याः प्रायणीयस्येत्युक्तप्रकारेण व्यतिषङ्गः संपद्यते । स च लोकद्वये भोग्यवस्तुसमृद्धये स्थैर्येणावस्थानाय भवति । तथाऽनुष्ठानेन यजमानो लोकद्वये समृद्धः प्रतिष्ठितश्च भवति । यथोक्तदोषसमाधाने तैत्तिरीया आमनन्ति 'याः प्रायणीयस्य याज्यास्ता उदयनीयस्य कुर्यात्प्राङ्मुं लोकमाराहेत्प्रमायुकः स्याद्याः प्रायणीयस्य पुरोनुवाक्यास्ता उदयनीयस्य याज्याः करोत्यस्मिन्नेव लोके प्रतितिष्ठति' इति ।

व्यतिषङ्गवेदनं प्रशंसति—

प्रतितिष्ठति य एवं वेद, इति ।

योऽयं प्रथमखण्डे प्रायणीयोदयनीययोरदितिदेवताकश्चरुर्विहितस्तमिमं प्रशंसति—

आदित्यश्चरुः प्रायणीयो भवत्यादित्य उदयनीयो यज्ञस्य धृत्यै यज्ञस्य बर्सनद्ध्यै यज्ञस्याप्रस्रंसाय, इति ।

सोमयागस्याऽऽदौ प्रायणीयेष्टिः । अन्ते चोदयनीयेष्टिः । तयोरुभयोरयमदितिदेवताकश्चरुः । सोऽयं तस्य यज्ञस्य धारणाय मण्याकारो ग्रन्थिविशेषः । तस्य बन्धनं तत्सिद्ध्यर्थमुभयत्राऽऽदित्यचरुकरणम् । बन्धनस्थानीयेन चरुणा यज्ञस्य धारणं सिध्यति । सति च धारणे यज्ञाङ्गं किंचिदपि स्रस्तं लुप्तं न भवति । ततो यज्ञस्याप्रस्रंसायोभयतश्चरुः

अत्र दृष्टान्तमाह—

तद्यथैवाद इति ह स्माऽऽह तेजन्या उभयतोऽन्तयोरप्रस्रंसाय बर्सौ नह्यत्येवमेवैतद्यज्ञस्योभयतोऽन्तयोरप्रस्रंसाय बर्सौ नह्याति यदादित्यश्चरुः प्रायणीयो भवत्यादित्य उदयनीयः, इति ।

अदो वक्ष्यमाणं निदर्शनं यथा भवति तथा दार्ष्टान्तिकमित्येवं कश्चिद्ब्रह्मवाद्याह स्म तेजन्या इत्यादिना । तावेव दृष्टान्तदार्ष्टान्तिकौ स्पष्टौ क्रियेते । तेजनी रज्जुस्तस्या उभयोरन्तयोरप्रंसंसाय विश्लेषनिवारणाय लौकिकः पुरुषो बर्सौ नह्यति मण्याकारौ ग्रन्थी बध्नाति । एवमेव चरुद्वयं यदस्ति तदेतद्यज्ञस्योपक्रमोपसंहाररूपयोरुभयोरन्तयोरशैथिल्याय मण्याकारबन्धनस्थानीयं भवति ।

येयं प्रायणीये पथ्याख्या प्रथमा देवताऽस्ति, उदयनीये तस्या उत्तमात्वमर्थवादेनोन्नयति—

पथ्ययैवेतः स्वस्त्या प्रयन्ति पथ्यां स्वास्तिमभ्युद्यन्ति स्वस्त्येवेतः प्रयान्ति स्वस्त्युद्यन्ति स्वस्त्युद्यन्ति ॥ ११ ॥ इति ।

इत्यैतरेयब्राह्मणे प्रथमपञ्चिकायां द्वितीयोऽध्यायः ॥२॥

इतःशब्दः षष्ठ्यर्थे वर्तते । आसामाज्यहाविष्कानां देवतानां मध्ये पथ्ययैव स्वस्त्यैतच्छब्दद्वयाभिहितयैव देवतया प्रयन्ति प्रारभन्ते । प्रायणीये तां देवतां प्रथमं यजन्तीत्यर्थः । पथ्यां स्वास्तिमभिशब्दद्वयाभिहितां देवतामभिलक्ष्योद्यन्ति समापयन्ति । उदयनीये तां देवतामुत्तमां यजन्तीत्यर्थः । स्वस्त्याख्यायां देवतायां आद्यन्तयोर्यागे सति यजमाना इतोऽस्मिन्कर्मणि स्वस्त्येव क्षेम एव यथा भवति तथा प्रयन्ति प्रारभन्ते । तथा स्वस्त्युद्यन्ति क्षेमेण समापयन्ति । अभ्यासोऽध्यायसमाप्त्यर्थः ।

अथ मीमांसा । द्वादशाध्यायस्य द्वितीयपादे चिन्तितम्—

" प्रायणीयस्य निष्कासे यो निर्वापोऽर्थकर्म तत् ।
निष्कासप्रतिपत्तिर्वोदयनीयस्य संस्कृतिः ॥
उताऽऽद्यः पूर्ववन्नैवं मुख्यस्य प्रकृतत्वतः ।
मध्योऽस्तु नोपयोक्तव्यसंस्कारस्य गुरुत्वतः " ॥

ज्योतिष्टोमे श्रूयते--प्रायणीयस्य निष्कास उदयनीयमभिनिर्वपतीति । अत्र पूर्वन्यायेन निष्कासद्रव्यकमुदयनीयमवत्सा (समा) नधर्मकमन्यदर्थकर्मेत्याद्यः पक्षः । मुख्यस्यैवोदयनीयस्य प्रकृतत्वाद्विज्ञपकरणाम्नातावभृथधर्मातिदेशवदुदयनीयस्य धर्मातिदेशस्याप्यसंभवाच्चार्थकर्मत्वम् । यदि तर्हि निष्का-

सप्रतिपत्तिरिति मध्यमः पक्षोऽस्तु । सोऽपीत्थं न संभवति, उपयुक्तसंस्कारादुपयोक्ष्यमाणसंस्कारस्य गरीयस्त्वात् । तस्मादुदयनीयस्य संस्कारः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऐतरेयब्राह्मणभाष्ये द्वितीयाध्यायस्य पञ्चमः खण्डः ॥ ५ ॥ (११)।

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकवीरबुक्कणसाम्राज्यधुरंधरसायणाचार्यकृतावैतरेयब्राह्मणभाष्ये प्रथमपञ्चिकायां द्वितीयोऽध्यायः ॥ २ ॥

अथ तृतीयोऽध्यायः ।

प्रायणीया तदङ्गं च देवतादिकमीरितम्।
तथैवोदयनीया च तद्विशेषाश्च वर्णिताः ॥ १ ॥

अथ सोमप्रवहणाङ्गमन्त्रादयो वक्तव्याः । तत्राऽऽदौ सोमक्रयणस्य दिशं विधत्ते—

प्राच्यां वै दिशि देवाः सोमं राजानमक्रीणंस्तस्मात्प्राच्यां दिशि क्रीयते, इति ।

प्राचीनवंशात्पूर्वस्यां दिशि देवैः पुरा सोमस्य क्रीतत्वाद्दत्विग्भिरपि तथा सोमः क्रेतव्य इत्यर्थः ।

प्रसङ्गात्सोमविक्रयिणः प्रत्यवायं दर्शयति -

तं त्रयोदशान्मासादक्रीणंस्तस्मात्त्रयोदशो मासो नानुविद्यते न वै सोमविक्रय्यनुविद्यते पापो हि सोमविक्रयी, इति ।

पुरा संवत्सरस्य त्रयोदश मासाः सन्ति नेदानीम् । देवास्त्रयोदशस्य मासस्याभिमानिनः पुरुषात्तं सोमं क्रीतवन्तः । यस्मात्तदभिमानी पुरुषः सोमविक्रयी तस्माल्लोके तदीयस्त्रयोदशमासो नानुविद्यते शुभकर्मानुकूलो नास्ति । मेषादिसंक्रान्त्यादिरहितत्वान्मलमास इत्यभिप्रेत्य तस्मिन्मासे शिष्टाः शुभकर्माणि वर्जयन्ति । अत एवेदानीमपि सोमविक्रयी शिष्टाचारस्यानुकूलो नैव विद्यते । सोमविक्रयिणः पापरूपत्वे श्रुत्यन्तरप्रसिद्धिद्योतनार्थो हिशब्दः । अत एव श्रुत्यन्तरे तद्विषयो मन्त्र

एवं व्याख्यायते-'अस्मे ज्योतिः सोमविक्रायिणि तम इत्याह । ज्योतिरेव यजमाने दधाति । तमः सोमविक्रयिणमर्पयति' इति । तमःशब्दः पापवाची ।

क्रयादूर्ध्वं प्राचीनवंशं प्रति नीयमाने सोमे पठितव्यानामृचामष्टसंख्यामादौ प्रशंसति-

तस्य क्रीतस्य मनुष्यानभ्युपावर्तमानस्य दिशो वीर्याणीन्द्रियाणि व्युदसीदंस्तान्येकयर्चाऽवारुरुत्सन्त तानि नाशक्नुवंस्तानि द्वाभ्यां तानि तिसृभिस्तानि चतसृभिस्तानि पञ्चभिस्तानि षड्भिस्तानि सप्तभिर्नैवावारुन्धत तान्यष्टाभिरवारुन्धताष्टाभिराप्नुवत यदष्टाभिरवारुन्धताष्टाभिराप्नुवत तदष्टानामष्टत्वम्, इति ।

क्रीतः सोमो यदा मनुष्यान्यजमानादीनभिलक्ष्याऽऽगच्छति तदानीं तस्य सोमस्य दिगादीनि व्युदसीदन्विशेषेणोत्तस्थान्यभवन् । दिक्शब्देनाधिष्ठानमुपलक्ष्यते । सोमं नेतुं यदधिष्ठानं यच्च वीर्यं सोमनिष्ठं बलप्रदानसामर्थ्यं यच्चेन्द्रियचक्षुरादिपाटवहेतुत्वं तत्सर्वं विनष्टम् । तदानीं ते यजमाना ये मनुष्यास्तानि दिगादीन्येकयर्चाऽवरोद्धुं स्वाधीनं कर्तुमैच्छन्। ततस्तान्यवरोद्धुं नाशक्नुवन्। एवं द्वित्वादिसप्तपर्यन्तया मन्त्रसंख्यया नैवावरोधं कृतवन्तः । अष्टसंख्यया त्ववरोधं कृत्वा तानि दिगादीनि प्राप्तवन्तः । अष्टसंख्यया तस्मादवारुध्यन्त । एभिर्नश्यन्तेऽश्नुवत एभिरिति वा व्युत्पत्त्याऽष्टशब्दो निष्पन्नः ।

एतद्वेदनं प्रशंसति-

अश्नुते यद्यत्कामयते य एवं वेद, इति ।

तत्काम्यमश्नुत इति योज्यम् ।

इदानीमष्टसंख्यां विधत्ते-

तस्मादेतेषु कर्मस्वष्टावष्टावनूच्यन्त इन्द्रियाणां वीर्याणामवरुद्धयै ॥ १२ ॥ इति ।

इदानीं प्रस्तुतं सोमप्रवहणाख्यं यत्कर्म तत्र करिष्यमाणं कर्मान्तरं तथा-

विधेषु प्रत्येकमष्टावष्टावृचो होताऽनुब्रूयात् । तथाऽष्टसंख्ययेन्द्रियाणि वीर्याणि चावरुद्धानि भवन्ति ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऐतरेय-ब्राह्मणभाष्ये तृतीयध्यायस्य प्रथमः खण्डः ॥१॥ (१२)।

मन्त्रगतां संख्यां विधाय तन्मन्त्रान्विधातुमादौ प्रैषमन्त्रं विधत्ते -

सोमाय क्रीताय प्रोह्यमाणायानुब्रू३हीत्याहाध्वर्युः, इति।

यः सोमः क्रीतः स क्रयदेशात्प्राचीनवंशं प्रति प्रोह्यते नीयते तदर्थमनुकूला ऋचो हे होतरनुक्रमेण ब्रू३हि । तमेवं प्रैषमन्त्रमध्वर्युः पठेत् ।

अथ होतुः प्रथमामृचं विधत्ते—

भद्रादभि श्रेयः प्रेहीत्यन्वाह, इति ।

सेयमृक्तैत्तिरीयशाखायामेवमाम्नाता—' भद्रादभि श्रेयः प्रेहि बृहस्पतिः पुर एता ते अस्तु । अथेमवस्य वर आ पृथिव्या आरे शत्रून्कृणुहि सर्ववीरः ' इति । तस्यायमर्थः । हे सोम भद्रान्मङ्गलाद्भूलोकरूपात्तस्मात्क्रयदेशाच्छ्रेयः श्रेष्ठं स्वर्गलोकस्थानीयं प्राचीनवंशदेशमभिलक्ष्य प्रेहि प्रकर्षेण गच्छ । तथा गच्छ-तस्ते बृहस्पतिः पुर एता पुरतो गन्ताऽस्तु । अथ गमनादूर्ध्वं पृथिव्याः संबन्धि-न्वा समन्ताद्वरे श्रेष्ठे देवयजन ईमवस्येदं तवावस्थानयोग्यं स्थानं निश्चिनु । सर्वेभ्यो वीरः शूरस्त्वं शत्रून्पापरूपान्यज्ञविद्वेषिण आरे कृणुहि दूरे कुरु । निराकुर्वित्यर्थः ।

तस्यामृचि प्रथमपादं व्याचष्टे—

अयं वाव लोको भद्रस्तस्मादसावेव लोकः श्रेयान्स्वर्गमेव तल्लोकं यजमानं गमयति, इति ।

तत्तेन प्रथमपादपाठेन । स्पष्टमन्यत् ।

द्वितीयपादमनूद्य व्याचष्टे--

बृहस्पतिः पुर एता ते अस्त्विति । ब्रह्म वै बृहस्पति-र्ब्रह्मैवास्मा एतत्पुरोगवमकर्ण वै ब्रह्मण्वद्रिष्यति, इति ।

बृहस्पतेर्ब्रह्मत्वं ब्राह्मणजातिमत्त्वं ' ब्रह्म वै देवानां बृहस्पतिः ' इत्यादिश्रुत्य-

न्तरे प्रसिद्धम्। एतदेतेन द्वितीयपादपाठेनास्मै यजमानार्थं ब्रह्मैव ब्राह्मणमेव पुरोगवं पुरोगन्तारमकः करोति। ब्रह्मण्वद्ब्राह्मणसहायोपेतं कर्म न वै रिष्यति सर्वथा नाशं न प्राप्नोति।

तृतीयपादमनूद्य व्याचष्टे--

> अथेमवस्य वर आ पृथिव्या इति। देवयजनं वै वरं पृथिव्यै देवयजन एवैनं तद्भ्रातृव्यस्य रे शत्रून्कृणुहि सर्ववीर इति। द्विषन्तमेवास्मै तत्पापमानं भ्रातृव्यमपबाधतेऽधरं पादयति, इति।

देवयजनाख्यस्य यागदेशस्य पृथिवीसंबन्धिश्रेष्ठस्थानत्वात्तत्रैवैनं सोमं तत्तेन तृतीयपादपाठेनास्मै यजमानाय द्वेषं कुर्वन्तं पापरूपं शत्रुमपबाधते। अधरं पादयतीति। निकृष्टं पदं प्रापयतीत्यर्थः।

होत्राऽनुवक्तव्या द्वितीयाद्यास्तिस्र ऋचो विधत्ते--

> सोम यास्ते मयोभुव इति तृचं सौम्यं गायत्रमन्वाह सोमे राजनि प्रोह्यमाणे। स्वयैवैनं तद्दैवतया स्वेन च्छन्दसा समर्धयति, इति।

तिसृणामृचां संघातस्तृचः। स च सोमदेवताको गायत्रीछन्दस्कश्च। सोमानयनकाले तं तृचमनुब्रूयात्। तत्तेनानुवचनेन स्वात्मरूपया देवतया स्वकीयच्छन्दसा चैनं सोमं समृद्धं करोति। अत्र नीयमानद्रव्यविशेषः सोमो मन्त्रदेवताऽप्यसावेव तस्मात्स्वात्मरूपत्वम्। गायत्री द्युलोकात्सोममानीतवतीति वैत्तिरीयाः कद्रूश्चेत्यनुवाके समाम्नासिषुः। तस्माच्छन्दसः स्वकीयत्वम्।

पञ्चमीमृचं विधत्ते--

> सर्वे नन्दन्ति यशसाऽऽगतेत्येवाह, इति।

सा च संहितायामेवमाम्नाता-'सर्वे नन्दन्ति यशसाऽऽगतेन सभासाहेन सख्या सखायः। किल्बिषस्पृत्पितुषणिर्ह्येषामरं हितो भवति वाजिनाय' [ऋ० सं० म० १० सू० ७२ ऋ० १०] इति। तस्या ऋचोऽयमर्थः। सर्वे

सखायो यजमानप्रभृतयः सख्या सोमरूपेण नन्दन्ति तुष्यन्ति । कीदृशेन सख्या । यशसा यशोहेतुना । आगतेन समीपं प्राप्तेन । सभासाहेन विद्वत्सभां विद्याप्रसङ्गेन सहतेऽभिभवति सभासाहस्तादृशेन । स तादृशः सोमरूपः सखैषामृत्विग्यजमानानां किल्बिषस्पृत्किल्बिषात्पापात्स्पृणोति पालयति किल्बिषस्पृत् । पितुशब्दोऽन्नवाची । तस्य सनिर्दानं येन सोमेन लभ्यते सोऽयं पितुषणिः । सोमस्य पापनिवारकत्वमन्नप्रदानेन । सर्वशास्त्रप्रसिद्धिद्योतनार्थो हिशब्दः । तथाऽयं सोमो वाजिनशब्दाभिधेयेन्द्रियाय वीर्याय वाऽरं हितोऽलमत्यन्तहितो भवतीति ।

तस्या ऋचः प्रथमं पादं व्याचष्टे–

यशो वै सोमो राजा । सर्वो ह वा एतेन क्रीयमाणेन नन्दति, यश्च यज्ञे लप्स्यमानो भवति यश्च न, इति ।

यशःकारणात्सोमस्य यशस्त्वम् । यः पुमानृत्विग्भूत्वा यज्ञे धनं लप्स्यते यश्च द्रष्टुमागतो न तु धनार्थी सर्वोऽप्यसौ सोमक्रयणं दृष्ट्वा तुष्यति ।

द्वितीयपादे प्रथमं पदमनूद्य व्याचष्टे–

सभासाहेन सख्या सखाय इत्येष वै ब्राह्मणानां सभासाहः सखा यत्सोमो राजा, इति ।

योऽयं राजमानः सोमः सोऽयं ब्राह्मणसभामभिभवति । सर्वे ब्राह्मणाः सोमाधीना भवन्तीत्यर्थः ।

तृतीयपादे प्रथमं पदमनूद्य व्याचष्टे–

किल्बिषस्पृदित्येष उ एव किल्बिषस्पृत्, इति ।

योऽयं सोमोऽस्ति एष उ एव किल्बिषात्पालयति सर्वकामहेतोः सोमयागस्य पापक्षयायानुष्ठातुं शक्यत्वात् ।

यज्ञानुष्ठाने च प्रवृत्तानामृत्विग्यजमानानां कः किल्बिषप्रसङ्ग इत्याशङ्क्याऽऽह–

यो वै भवति यः श्रेष्ठतामश्नुते स किल्बिषं भवति, इति ।

यः पुमान्प्रौढे यज्ञे प्रवृत्तो भवति तत्रापि यः श्रेष्ठतां प्रयोगपाटवाभिमानमश्नुते प्राप्नोति स तादृशः पुरुषः कर्मसमाधिव्यग्रतया पण्डितंमन्यत्वेन वाग्वैकल्यं कुर्वन्किल्बिषं भवति पापं प्राप्नोति ।

तमेतं पापप्रसङ्गं विस्पष्टयति-

तस्मादाहुर्माऽनुवोचो मा प्रचारीः किल्विषं नु मा यातयन्निति, इति ।

यस्माद्दक्षिणां किल्बिषं संभाव्यते तस्माद्यजमाना एवमाहुर्हे होतस्त्वं माऽनुवोचोऽन्यचित्तः सन्पुरोनुवाक्यां मा पठ । हेऽध्वर्यो मा प्रचारीर्व्यग्रतया प्रचारमन्यथाऽनुष्ठानं मा कार्षीः । नु क्षिप्रं कुर्वन्तो भवन्तः किल्बिषं मा यातयन्मा प्राप्नुवन्तः । इतिशब्दो यजमानानामुक्तिसमाप्तौ । इत्थं संभावितात्किल्बिषात्सोमः पालयति ।

तृतीयपादे द्वितीयपदमनूद्य व्याचष्टे-

पितुष्पणिरित्यन्नं वै पितु दक्षिणा वै पितु तामेनेन सनोत्यन्नसानिमेवैनं तत्करोति, इति ।

अन्नवाची पितुशब्दो लब्धव्यत्वसाम्याद्दक्षिणामप्युपलक्षयति । तां दक्षिणामेतेन सोमेन निमित्तभूतेन सनोति ऋत्विग्भ्यो ददाति । तत्तेन पितुशब्दपाठेनैनं सोममन्नं(न्न)सानिमन्नदाननिमित्तभूतमेव करोति ।

चतुर्थं पादमनूद्य तत्र वाजिनशब्दं व्याचष्टे-

अरं हितो भवति वाजिनायेतीन्द्रियं वै वीर्यं वाजिनम्, इति ।

वेदनं प्रशंसति-

आजरसं हास्मै वाजिनं नापच्छिद्यते य एवं वेद, इति ।

जरासमाप्तिपर्यन्तं वेदितुरिन्द्रियवीर्ययोरपच्छेदो न भवति ।

षष्ठीमृचं विधत्ते-

आगन्देव इत्यन्वाह, इति ।

स च मन्त्रः संहितायामाम्नातः-'आगन्देव ऋतुभिर्वर्धतु क्षयं दधातु नः सविता सुप्रजामिषम् । स नः क्षपाभिरहभिश्च जिन्वतु प्रजावन्तं रयिमस्मे समिन्वतु' (ऋ० सं० म० ४ सू० ५३ ऋ० ७) इति । तस्यायमर्थः । सोमो देव आगच्चिह्नं कर्मण्यागच्छतु । आगत्य च ऋतुभिः सह क्षयं निवासस्थानं वर्धव वृद्धिं प्रापयतु । नोऽस्माकं सविता प्रेरकः स देवः सुप्रजां शोभनापत्यमिषमन्नं च दधातु संपादयतु । स देवो नोऽस्मान्क्षपाभी रात्रिभिरहोभिश्च जिन्वतु प्रीणयतु । तथा प्रजोपेतं धनमस्मे समिन्वत्वस्मासु सम्यक्प्रापयत्विति ।

अस्या ऋचः प्रथमपादे पूर्वभागं व्याचष्टे -

आगतो हि स तर्हि भवति, इति ।

तर्हि तस्मिन्क्रयोत्तरकाले स सोम आगतो भवतीति प्रसिद्धम् ।

उत्तरभागमनूद्य व्याचष्टे—

ऋतुभिर्वर्धतु क्षयमित्यृतवो वै सोमस्य राज्ञो राजभ्रातरो यथा मनुष्यस्य तैरेवैनं तत्सहाऽऽगमयति, इति ।

यथा लोके कस्यचिन्मनुष्यस्य भ्रातरोऽपि मनुष्यजातीयास्तथा राजजातीयस्य सोमस्य भ्रातरोऽपि राजजातीयाः । तत्तेन मन्त्रभागपाठेन तैर्ऋतुभिर्भ्रातृभिः सहैनं सोममस्मिन्कर्मण्यागमयति ।

द्वितीयपादमनूद्य व्याचष्टे—

दधातु नः सविता सुप्रजामिषमित्याशिषमाशास्ते, इति ।

आशासनीयोपेक्षणीयः प्रजादिपदार्थ आशीस्तामनेन पादपाठेनाऽऽशास्ते ।

तृतीयपादमनूद्य व्याचष्टे--

स नः क्षपाभिरहभिश्च जिन्वात्वित्यहानि वा अहानि रात्रयः क्षपा अहोरात्रैरेवास्मा एतामाशिषमाशास्ते प्रजावन्तं रयिमस्मे स जिन्वात्वित्याशिषमेवाऽऽशास्ते, इति ।

लोकप्रसिद्धान्यहान्येवात्र मन्त्रोक्तान्यहानि । अहोभिरिति वक्तव्ये वर्णविकारेणाहभिरित्युक्तत्वात् । शब्दान्तरभ्रमं व्युदसितुमिदं व्याख्यानम् । एवमत्र व्याख्यातव्यः पदविशेषो नास्ति किंत्वाशीः प्रार्थनरूपं तात्पर्यमेवेत्याभिप्रेत्यैवकारः प्रयुक्तः ।

सप्तमीमृचं विधत्ते--

या ते धामानि हविषा यजन्तीत्यन्वाह, इति ।

सेयमृक्संहितायामाम्नाता--' या ते धामानि हविषा यजन्ति ता ते विश्वा परिभूरस्तु यज्ञम् । गयस्फानः प्रतरणः सुवीरोऽवीरहा प्रचरा सोम दुर्यान् '

(१--९१- ४) इति । हे सोम ते तव धामानि यान्युत्तरवेद्यादिस्थानानि यजमाना हविषा यजन्ति ते तव ता विश्वा तानि सर्वाणि स्थानानि व्याप्येति शेषः । ततो भवान्यज्ञं परिभूरस्तु परित. प्राप्तवान्भवतु । किंच त्वं गयस्फानो गयानामस्मदीयानां गवां वर्धयिता प्रतरणः प्तारयिता सर्वापदुत्तारणहेतुः सुवीरः शोभनपुत्रपौत्रादिप्रदो भवेति शेषः । हे सोमावीरहाऽस्मदीयानां वीरपुरुषाणां हननमकुर्वाणो दुर्यानस्मदीयगृहान्प्रति प्रचर प्रकर्षेण गच्छ ।

अत्र प्रथमपादस्य स्पष्टार्थत्वबुद्ध्या व्याख्यानमुपेक्ष्य द्वितीयपादमपि स्पष्टार्थाभिप्रायेणैव पठति--

ता ते विश्वा परिभूरस्तु यज्ञम्, इति ।

तृतीयपादमनूद्य व्याचष्टे--

गयस्फानः प्रतरणः सुवीर इति गवां नः स्फावयिता प्तारयितैधीत्येव तदाह, इति ।

स्फावयिता वर्धयिता ।

चतुर्थपादमनूद्य व्याचष्टे--

अवीरहा प्रचरा सोम दुर्यानिति गृहा वै दुर्या बिभ्यति वै सोमाद्राज्ञ आयतो यजमानस्य गृहाः स यदेतामन्वाह शान्त्यैवैनं तच्छमयति सोऽस्य शान्तो न प्रजां न पशून्हिनस्ति, इति ।

आयत आगच्छतः सोमाद्राज्ञो यजमानस्य गृहा गृहवर्तिनो वीरपुरुषाः केनापि परिचर्यावैकल्येन राजा कोपं करिष्यतीति मत्वा तस्मात्सर्वे बिभ्यति । तदानीं स होता यद्येतामवीरहेतिपदयुक्तामृचमन्वाह । तच्चानुवचनेन शान्त्या शान्तिहेतुभूतया सुवीरपदोक्त्यैवैनं राजानं शमयति शान्तं करोति । स च राजा शान्तः सन्नस्य यजमानस्य पुत्रादिकां प्रजां गवादिपशूंश्च न हिनस्ति ।

अष्टमीमृचं विधत्ते--

इमां धियं शिक्षमाणस्य देवेति वारुण्या परिदधाति, इति ।

इयमृग्वरुणदेवताका तया परिदधाति । अनुवचनं समापयेदित्यर्थः । सेयमृक्संहितायामेवमाम्नाता--" इमां धियं शिक्षमाणस्य देव क्रतुं दक्षं वरुण

संशिशाधि । ययाऽति विश्वा दुरिता तरेम सुतर्माणमधि नावं रुहेम " (ऋ० सं० ८-४२-३) इति । तस्यायमर्थः । हे वरुण देवेभ्यो धियं यज्ञानुष्ठानविषयां बुद्धिं शिक्षमाणस्याभ्यस्यतो यजमानस्य क्रतुं यज्ञविषयं वीर्यं दक्षं कौशलं यज्ञविषयप्रज्ञानं संशिशाधि सम्यगुपदिश । यया वाय्वूपया नावा विश्वा दुरिता सर्वाणि पापान्यतितरेम । तादृशीं सुतर्माणं सुष्ठुतरणहेतुं वाय्वूपां नावमधिरुहेमाऽऽधिक्येनाऽऽरोहणं कुर्म इति ।

वारुण्या समापने कारणमाह—

वरुणदेवत्यो वा एष तावद्यावदुपनद्धो यावत्परिश्रितानि प्रपद्यते । स्वयैवैनं तद्देवतया स्वेन च्छन्दसा समर्धयति, इति ।

यावत्कालं सोम उपनद्धो वस्त्रादिना बद्धः स्याद्यावच्च परिश्रितानि प्राचीनवंशादिस्थानानि प्रतिपद्यते तावदेष सोमो वरुणदेवताको बन्धनस्य वरुणपाशाधीनत्वादावरणस्यापि वरुणाधीनत्वात् । तत्तथा सति वारुण्या परिदधानो होता स्वयैव सोमसंबन्धिन्यैव देवतया स्वेन संबन्धिना छन्दसा तमेनं सोमं समृद्धं करोति । अस्या ऋचस्त्रिष्टुप्छन्दः । सा च त्रिष्टुप् सोममाहर्तुं द्युलोके गत्वा दक्षिणा (णां) तपश्चाऽऽहृतवती । तथा च शाखान्तरे श्रूयते—' सा दक्षिणाभिश्च तपसा चाऽऽगच्छत् ' इति ' तस्मादिदं छन्दः सोमस्य स्वकीयम् ।

प्रथमपादे शिक्षमाणस्येति पदं व्याचष्टे—

शिक्षमाणस्य देवेति । शिक्षते वा एष यो यजते, इति ।

पुनः पुनरभ्यासः शिक्षा । यजनशीलस्य सोऽस्ति ।

द्वितीयपादमनूद्य व्याचष्टे—

क्रतुं दक्षं वरुण संशिशाधीति वीर्यं प्रज्ञानं वरुण संशिशाधीत्येव तदाह, इति ।

द्वितीयार्धमनूद्य व्याचष्टे—

ययाऽति विश्वा दुरिता तरेम सुतर्माणमधि नावं रुहेमेति यज्ञो वै सुतर्मा नौः कृष्णाजिनं वै सुतर्मा नौर्वाग्वै सुतर्मा नौर्वाचमेव तदा-

रुह्य तया स्वर्गं लोकमभि संतरति, इति।

यत्र यज्ञस्य वा कृष्णाजिनस्य वा प्रस्तावस्तत्र तत्परत्वेन सुतर्मशब्दो व्याख्येयः। इह तु मन्त्ररूपा वाग्विवक्षिता। तत्तेन मन्त्रपाठेन वाग्रूपामेव नावमारुह्य तया नावा स्वर्गमभिलक्ष्य सम्यक्स्वर्गं तरति।

उक्ताः सर्वा ऋचः प्रशंसति

ता एता अष्टावन्वाह रूपसमृद्धाः इति।

विवक्षितार्थप्रतिपादकेन रूपेण समृद्धाः।

तामेव समृद्धिं विशदयति-

एतद्वै यज्ञस्य समृद्धं यद्रूपसमृद्धं
यत्कर्म क्रियमाणमृगभिवदति. इति।

पूर्ववद्व्याख्येयम्।

आद्यन्तयोर्ऋचोरावृत्तिं विधत्ते-

तासां त्रिः प्रथमामन्वाह त्रिरुत्तमाम्, इति।

आवृत्तिसहितानामृचां संख्यां प्रशंसति -

ता द्वादश संपद्यन्ते। द्वादश वै मासाः
संवत्सरः। संवत्सरः प्रजापतिः, इति।

वेदनं प्रशंसति--

प्रजापत्यायतनाभिरेवाऽऽभी-
राप्नोति य एवं वेद, इति।

आवृत्तिं प्रशंसति -

त्रिः प्रथमां त्रिरुत्तमामन्वाह यज्ञस्यैव तद्दर्सौ
नह्यति स्थेम्ने बलायाविस्रंसाय ॥ १३ ॥ इति।

तत्तेनाऽऽवर्तनेन बर्सौ रज्ज्वा उभयोरन्तयोः स्थितौ मण्याकारौ ग्रन्थी तद्वदत्रापि नह्यति बध्नाति। तच्च बन्धनं स्थेम्ने स्थैर्याय भवति। तस्यैवान्वयव्यतिरेकाभ्यां व्याख्यानं प्राबल्यमविस्रंसनं च ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऐतरेयब्राह्मण
भाष्ये तृतीयाध्याये द्वितीयः खण्डः ॥ २ ॥ (१२)।

सोमप्रवहणीर्ऋचो विधाय सोमस्य शकटादवरोहणं विधत्ते--

अन्यतरोऽड्वान्युक्तः स्यादन्यतरो विमुक्तोऽथ राजानमुपावहरेयुः इति ।

क्रयदेशे सोमं शकटे प्रक्षिप्य प्राचीनवंशसमीपे समानीय शकटबद्धयोरनड्वाहोर्मध्ये कंचिदनड्वाहं विमुच्येतरमनड्वमुच्य राजानं शकटादधस्तादृत्विज उपावहरेयुः । युक्तः शकटे बद्धो विमुक्तः शकटाद्वियोजितः ।

उभयोरनड्वाहोर्विमोचने दोषमुपन्यस्यति -

यदुभयोर्विमुक्तयोरुपावहरेयुः पितृदेवत्यं राजानं कुर्युः, इति ।

राज्ञः सोमस्य पितृभिः स्वीकृतत्वादयं सोमो देवयोग्यो न भवेत् ।

उभयोरनड्वाहोः शकटयोगेऽपि दोषमाह-

यद्युक्तयोरयोगक्षेमः प्रजा विन्देत्ताः प्रजाः परिप्लवेरन्, इति ।

अप्राप्तस्य धनादेः संपादनं योगः । प्राप्तस्य रक्षणं क्षेमः । योगसहितः क्षेमो योगक्षेमस्तदभावः प्रजाः पुत्रादिका विन्देल्लभेत्प्राप्नुयात् ।

योऽनड्वान्विमुक्तस्तच्छालासदां प्रजानां रूपं यो युक्तस्तच्च क्रियाणां ते ये युक्तेऽन्ये विमुक्तेऽन्य उपावहरन्त्युभावेव ते क्षेमयोगौ कल्पयन्ति, इति ।

योऽनड्वान्विमुक्तस्तदेतच्छालासदां गृहावस्थितानां प्रजानां पुत्रादीनां रूपम् । योऽनड्वानधस्ताच्छकटे युक्तस्तच्च क्रियाणां लौकिकानां वैदिकानां च रूपम् । यद्वा चक्रमस्यास्तीति चक्रि शकटं तेन चक्रिणा यान्तीति शकटमारुह्य गच्छन्त्यः प्रजाश्चक्रियास्तासां रूपम् । एवं सति ते ये यजमानानां मध्ये ये कोचिद्बुद्धिमन्तो यजमाना अन्ये युक्त एकस्मिन्ननड्वाहि शकटबद्धेऽन्ये विमुक्त इतरस्मिन्ननड्वाहि शकटाद्वियोजिते सति सोममुपावहरन्ति ते बुद्धिमन्त उभावेव क्षेमं योगं च संपादयन्ति । तमिममर्थं तैत्तिरीयाश्चाऽऽमनन्ति-'यदुभौ विमुच्याऽऽतिथ्यं गृह्णीयाद्यज्ञं विच्छिन्द्यादुभौ विमुच्य यथाऽनागतायाऽऽतिथ्यं क्रियते तादृगेव तद्विमुक्तोऽन्योऽनड्वान्भवत्यविमुक्तोऽन्योऽथाऽऽतिथ्यं गृह्णाति यज्ञस्य संतत्यै"

इति । नन्वेकत्र सोमावरोहणकाल उच्यत इतरत्राऽऽतिथ्येष्टिकाल इति न समानविषयत्वमिति चेन्न । उभयोरेककालीनत्वात् ।

अथाऽऽख्यायिकामुखेन सोमोपावहरणस्यैशानीं दिशं विधत्ते--

देवासुरा वा एषु लोकेषु समयतन्त त एतस्यां प्राच्यां दिश्ययतन्त तांस्ततोऽसुरा अजयंस्ते दक्षिणस्यां दिश्ययतन्त तांस्ततोऽसुरा अजयंस्ते प्रतीच्यां दिश्ययतन्त तांस्ततोऽसुरा अजयंस्त उदीच्यां प्राच्यां दिश्ययतन्त ते ततो न पराजयन्त। सैषा दिगपराजिता। तस्मादेतस्यां दिशि यतेत वा यातयेद्वैश्वरो हानृणाकर्तोः, इति।

समयतन्त संग्राममकुर्वन् । प्राच्यादिषु चतसृषु दिक्षु देवानां पराजय आसीत् । ऐशान्यां दिशि नास्ति पराजयः । तस्मात्तस्यां दिशि सोमोपावहरणाय यतेत प्रयत्नं कुर्याद्वा यातयेत्प्रयत्नं कारयेद्वा । एवमेव वैकल्यराहित्यं कर्तुं प्रभुर्भवति । अथवा सोमस्य राज्ञो विजयित्वेनोत्तरत्र प्रशंसां कर्तुं देवासुरा वा इत्यादिना लौकिकस्य राज्ञ ऐशान्यां दिशि स्वकीयभृत्यप्रेरणं प्रतिपादितम् ।

इदानीं सोमस्य जयहेतुत्वं दर्शयति--

ते देवा अब्रुवन्नराजतया वै नो जयन्ति। राजानं करवामहा इति। तथेति। ते सोमं राजानमकुर्वंस्ते सोमेन राज्ञा सर्वा दिशोऽजयन्नेष वै सोमराजा यो यजते। प्राचि तिष्ठत्यादधाति तेन प्राचीं दिशं जयति। तं दक्षिणा परिवहन्ति तेन दक्षिणां दिशं जयति। तं प्रत्यञ्चमावर्तयन्ति तेन प्रतीचीं दिशं जयति। तमुदीचस्तिष्ठत उपावहरन्ति तेनोदीचीं दिशं जयति सोमेन राज्ञा, इति।

ते देवाः परस्परमेवमब्रुवन्, अस्माकं राजाभावात्प्राच्यादिदिक्षु पराजय आसीदसुराणां जय आसीत् । ततो राजानं संपादयाम इति विचार्य सोममेव राजानं कृत्वा प्राच्यादिदिक्षु जयं प्राप्ताः । एवं सति यो यजमानः सोमयागं करोति, एष एव सोमराजा । सोमो राजा यस्येति बहुव्रीहिः । अतः सोमाख्यस्वामिनः प्रचारादयं यजमानः सर्वत्र जयति । तत्कथमिति चेत्तदुच्यते । सोमवाहनार्थे शकटे प्राचि तिष्ठति प्राङ्मुखेऽवस्थिते सत्यृत्विजस्तत्र सोममादधति प्रक्षिरन्ति तेन सोमसंबन्धिशकटस्य प्राङ्मुखत्वेन यजमानः प्राच्यां दिशि जयं प्राप्नोति । शकटस्थितं सोमं दक्षिणा परिवहन्ति शकटं दक्षिणाभिमुखत्वेन पर्यावृत्य वहन्ति तेन दक्षिणस्यां दिशि जयः । तमुदीचस्तिष्ठत उदङ्मुखत्वेनावस्थिताच्छकटात्तं सोममुपावहरन्ति तेनोदङ्मुखत्वेनोदीच्यां दिशि जयः । एवं सोमराजप्रसादाद्यजमानः सर्वा दिशो जयति । अत्रार्थवादेन विधय उन्नेयाः । प्राङ्मुखे शकटे सोममादध्युः । ततो दक्षिणाभिमुखत्वेन परिवहेयुः । ततः प्रत्यङ्मुखत्वेनाऽऽवर्तयेयुः । तत उदङ्मुखाच्छकटात्सोममुपावहरेयुरिति । एतत्सर्वमभिप्रेत्याऽऽहाऽऽपस्तम्बः-' संजग्राह प्रत्यवस्तनुवस्यत इति प्राञ्चोऽभिप्रवाय दक्षिणमावर्तत इत्यग्रेण प्राग्वंशं प्रागीषमुदगीषं वा शकटमवस्थाप्य ' इति ।

वेदनं प्रशंसति--

सर्वा दिशो जयति य एवं वेद ॥ १४ ॥ इति ।

अत्र शब्दादेव श्रुतस्यापि सर्वा दिशो जयतीति वाक्यस्य द्विरावृत्तिः कर्तव्या ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऐतरेयब्राह्मणभाष्ये तृतीयाध्याये तृतीयः खण्डः ॥ ३ ॥ (१३)

सोमोपावहरणं विधायाऽऽतिथ्येष्टिरूपं कर्म विधत्ते--

हविरातिथ्यं निरुप्यते सोमे राजन्यागते, इति ।

प्राचीनवंशसमीपं सोमे राजनि समागते सति तस्यातिथिरूपत्वात्तदीयमातिथ्याख्यकर्मसंबन्धि हविर्निर्वपेत् । यद्यप्यस्य हविषोऽतिथिर्देवता न भवति विष्णुदेवताया वक्ष्यमाणत्वात्तथाऽपि सोमस्यातिथिरूपस्योपचाराय क्रियमाणत्वादातिथ्यमिति कर्मनाम युक्तम् ।

एतमेवाभिप्रायं विस्पष्टयति--

सोमो वै राजा यजमानस्य गृहानाग-च्छति । तस्मा एतद्धविरातिथ्यं निरु-प्यते । तदातिथ्यस्याऽऽतिथ्यत्वम्, इति ।

तिथिविशेषमनपेक्ष्य भोजनार्थं कस्यचिद्गृहं प्रत्यकस्माद्यः समागतः सोऽतिथिः । सोमोऽपि तथाविधत्वादतिथिरित्युच्यते । तत्संबन्धित्वादातिथ्यमिति नामधेयम् । हविर्विशेषं विधत्ते--

नवकपालो भवति । नव वै प्राणाः । प्राणानां क्लृप्त्यै प्राणानां प्रतिप्रज्ञात्यै, इति ।

नवसु कपालेषु संस्कृतः पुरोडाशो नवकपालः । पुरुषस्य शिरोगतेषु सप्तसु च्छिद्रेषु वर्तमानाः सप्त प्राणाः । अधोभागावस्थितयोर्वर्तमानौ द्वौ । एवं नवसंख्याकाः प्राणाः । तथा चान्यत्र श्रूयते -' सप्त वै शीर्षण्याः प्राणा द्वावधाञ्चौ ' इति । एवं सति कपालगता नवसंख्या प्राणानां क्लृप्त्यै स्वव्यापारसामर्थ्याय भवति । सामर्थ्ये च प्राणोऽयमीदृश इति सर्वैः प्राणाः प्रज्ञाता भवन्ति ।

द्रव्यं विधाय देवतां विधत्ते--

वैष्णवो भवति । विष्णुर्वै यज्ञः स्वयैवैनं तद्दे-वतया स्वेन च्छन्दसा समर्धयति, इति ।

विष्णुर्देवता यस्य पुरोडाशस्य सोऽयं वैष्णवः । विष्णोर्व्यापित्वात्सर्वयज्ञ-स्वरूपत्वम् । तथा सत्यातिथ्येष्टेरपि यज्ञत्वाद्विष्णुः स्वकीया देवता भवति । तया देवतयैनं समृद्धं करोति । यद्यप्यत्र मन्त्राविहितत्वात्तच्छन्दो न प्रकृतं तथाऽपि यज्ञस्य विहितत्वाद्याज्यानुवाक्ययोरवश्यंभावेन च्छन्दोऽर्थसिद्धम् । तेन स्वकीयेन च्छन्दसा यज्ञं समृद्धं करोति । ते च याज्यानुवाक्ये आश्वलायनेन दर्शिते-- ' इदं विष्णुर्विचक्रमे [१--२२- १७] तदस्य प्रियमभि पाथो अश्याम ' [१-१५४-५] इति । तयोश्च गायत्री त्रिष्टुप् चेति च्छन्दोद्वयम् । तेन च्छन्दो-द्वयेनास्य यज्ञस्य समृद्धिः ।

अत्र शाखान्तरोक्तानग्नेरातिथ्यमसि विष्णवे त्वेत्यादिकांश्च निर्वापमन्त्रान्हृदि निधाय तत्प्रशंसारूपमर्थवादं दर्शयति--

सर्वाणि वाव च्छन्दांसि च पृष्ठानि च सोमं राजानं क्रीतमन्वायन्ति । यावन्तः खलु वै राजानमनुयन्ति तेभ्यः सर्वेभ्य आतिथ्यं क्रियते, इति ।

गायत्री त्रिष्टुबित्यादीनि सर्वच्छदांसि बृहद्रथंतरवैरूपादिसामसाध्यानि पृष्ठस्तोत्राणि । तदुभयाभिमानिनो देवा अनुचराः सन्तो राजानमनु यजमानगृहं प्रत्यागच्छन्ति । अतो राज्ञा सहाऽऽगतेभ्यः सर्वेभ्यः सहाऽऽतिथ्यं कर्तव्यम् । तथा सत्यग्नेरातिथ्यमसीत्यादिमन्त्रैः सर्वेषामनुचराणां गायत्र्यादीनां तृप्तिर्भवतीत्यर्थः । तथा च तैत्तिरीया आमनन्ति-'यावद्धिर्वै राजाऽनुचरैरागच्छति सर्वेभ्यो वै तेभ्य आतिथ्यं क्रियते छन्दांसि खलु वै सोमस्य सज्ञोऽनुचराण्यग्नेरातिथ्यमसि विष्णवे त्वेत्याह गायत्र्या एवैतेन करोति सोमस्याऽऽतिथ्यमसि विष्णवे त्वेत्याह त्रिष्टुभ एवैतेन करोति' इत्यादि । अत्राऽऽतिथ्येष्टिमध्येऽग्निमन्थनमापस्तम्ब आह-'चतुर्होत्रातिथ्यमासाद्य संभारयजूंषि व्याचष्टे यजमानं वाचयतीत्येके । पशुवन्निर्मथ्यः सामिधेन्यश्च' इति । आश्वलायनोऽप्याह-'आतिथ्येलान्ता तस्यामग्निमन्थनम' इति ।

तदिदमग्निमन्थनं विधत्ते-

अग्निं मन्थन्ति सोमे राजन्यागते । तद्यथैवादो मनुष्यराज आगतेऽन्यास्मिन्वाऽर्हत्युक्षाणं वा वेहतं वा क्षदन्त एवमेवास्मा एतत्क्षदन्ते यदग्निं मन्थन्त्यग्निर्हि देवानां पशुः ॥ १५ ॥ इति ।

लोके यथैवादोऽतिथिसत्करणं तथैव सोमस्यापि तत्सत्करणं द्रष्टव्यम् । तावेतौ दृष्टान्तदार्ष्टान्तिकौ मनुष्यराज इत्यादिना स्पष्टौ क्रियेते । महति मनुष्यभूपतौ वाऽन्यस्मिंश्चिद्विद्यावृत्तादिसंपन्नत्वेनार्हति पूज्ये महति ब्राह्मणेऽब्राह्मणे वा गृहं प्रत्यागते सत्यतिथिसत्कारार्थं शास्त्रकुशलाः शिष्टाः कंचिदुक्षाणं वृषभं वा वेहतं गर्भघातिनीं वृद्धां गां वा क्षदन्ते हिंसन्ति । अयं सत्कारः स्मृतिषु प्रसिद्धो युगान्तरधर्मो द्रष्टव्यः । एवमेवात्रापि, अग्निं मन्थन्तीति यदस्ति, एतदस्मै सोमायातिथिसत्कारार्थं क्षदन्तेऽग्नेर्देवपशुत्वात् । यथाऽनड्वान्हव्यं वहति तथाऽग्निरपि

हव्यं वहति तस्मादग्नेः पशुसाम्यम् ।

अत्र मीमांसा । सप्तमाध्याये तृतीयपादे चिन्तितम्-

"वैष्णवे त्रिकपाले वैष्णवान्नवकपालतः ।
धर्मातिदेशः स्यान्वो वा विद्यतेऽत्राग्निहोत्रवत् ॥
श्रुत्या वैष्णवशब्दोऽयं देवताया विधायकः ।
स गौणवृत्तिमाश्रित्य धर्मान्नातिदिशत्यतः"

आतिथ्येष्टौ वैष्णवो नवकपालो विहितः । तत्र श्रुतौ वैष्णवशब्दो राजसूयगते वैष्णवे त्रिकपाले प्रयुज्यमानोऽग्निहोत्रशब्दवन्नवकपालधर्मानतिदिशतीति पूर्वः पक्षः । विष्णुर्देवता यस्येति विग्रहे विहिततद्धितप्रत्ययो देवतामभिधत्ते न तु धर्मान् । तस्मान्नातिदिशति ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऐतरेयब्राह्मण-
भाष्ये तृतीयाध्याये चतुर्थः खण्डः ॥ ४ ॥ (१५) ।

अग्निमन्थनं विधाय तत्रत्या ऋचो विधातुं प्रैषमन्त्रं विधत्ते -

अग्नये मथ्यमानायानुब्रूहीत्याहाध्वर्युः, इति ।

तत्र प्रथमामृचं विधत्ते -

अभि त्वा देव सवितरिति सावित्रीमन्वाह, इति ।

सविता देवता गायत्र्या ऋचः सा सावित्री । अत्र च, अभि त्वा देव सवितरिति सविता मन्त्रदेवत्वेन श्रूयते तस्मादियमृक्सावित्री ।

अत्र प्रैषानुवचनमन्त्रयोर्वैयधिकरण्यरूपं चोद्यमुद्भावयति—

तदाहुर्यदग्नये मथ्यमानायानुवाचाऽऽहाथ कस्मात्सावित्रीमन्वाहेति, इति ।

तत्तत्र ब्रह्मवादिनश्चोद्यमाहुः । यद्यस्मात्कारणादध्वर्युरग्नये मथ्यमानायेत्यग्नयेऽनुकूलया वाचा प्रैषमन्त्रमाह तत्तस्मात्कारणादाग्नेयी होत्राऽनुवक्तव्या । तां परित्यज्याथानन्तरं कस्मात्कारणाद्धोता सावित्रीमृचमनुब्रूते । इतिशब्दश्चोद्यसमाप्त्यर्थः ।

तस्य चोद्यस्योत्तरमाह—

सविता वै प्रसवानामीशे । सवितृप्रसूता एवैनं तन्मन्थन्ति । तस्मात्सावित्रीमन्वाह, इति ।

योऽयं सविता देवः स एव प्रसवानां कर्मस्वनुज्ञानामीशे स्वामी भवति । तथा सति तत्तेन मन्त्रपाठेन सावित्राऽनुज्ञाता एव सन्त एनमग्निं मन्थन्ति । तस्मात्कारणात्सावित्रीमृचमनुब्रूयात् ।

द्वितीयामृचं विधत्ते—

मही द्यौः पृथिवी च न इति द्यावापृथिवीयामन्वाह, इति ।

द्यौश्च पृथिवी च देवते यस्या ऋचः सेयं द्यावापृथिवीया ।

अत्रापि पूर्ववच्चोद्यपरिहारौ दर्शयति—

तदाहुर्यदग्नये मथ्यमानायानुवाचाऽऽहाथ कस्माद्द्यावापृथिवीयामन्वाहेति । द्यावापृथिवीभ्यां वा एतं जातं देवाः पर्यगृह्णंस्ताभ्यामेवाद्यापि परिगृहीतस्तस्माद् द्यावापृथिवीयामन्वाह, इति ।

पुरा कदाचिद्देवा उत्पन्नमग्निं द्यावापृथिवीभ्यां परिगृहीतवन्तः । अद्यापि ताभ्यामेव परिगृहीतो दृश्यते । पावकोऽग्निर्भूम्या परिगृहीतः प्रकाशकसूर्यरूपोऽग्निर्दिवा परिगृहीतः । तस्मादग्निपरिग्रहाय द्यावापृथिवीदेवताकाया ऋचोऽनुवचनं युक्तम् ।

तृतीयाद्यास्तिस्र ऋचो विधत्ते—

त्वामग्ने पुष्करादधीति तृचमाग्नेयं गायत्रमन्वाहाग्नौ मथ्यमाने । स्वयैवैनं तद्देवतया स्वेन च्छन्दसा समर्धयति, इति ।

अस्य तृचस्याग्निदेवताकत्वेन वैयधिकरण्यचोद्यानुदयात्स्वयैवेत्यादिना प्रशंसैव क्रियते । गायत्रीछन्दोऽग्नेः स्वकीयमुभयोः प्रजातिमुखजन्यत्वात् ।

प्रथमायामृचि द्वितीयपादमनूद्य प्रशंसति—

अथर्वा निरमन्थतेति रूपसमृद्धमेतद्वै यज्ञस्य समृद्धं यद्रूपसमृद्धं, यत्कर्म क्रियमाणमृगभिवदति, इति ।

अथर्वाख्य ऋषिर्निःशेषेण मन्थनं कृतवानित्युच्यते । तदेतद्वचनमग्निमन्थनस्याऽऽनुकूल्येन रूपेण समृद्धम् ।

इत्थमुक्तास्वग्निमन्थनास्वृक्षु पञ्चस्वनूक्तासु षष्ठप्रभृतीनामृचामनुवचनात्पूर्वं नैमित्तिकाः काश्चिदृचो विधत्ते—

स यदि न जायेत यदि चिरं जायेत
राक्षोघ्न्यो गायत्र्योऽनूच्याः, इति ।

पञ्चानामृचामनुवचने सति तस्मिन्काले यदि सोऽग्निर्नोत्पद्येत तत उत्पत्तिलिङ्गं धूमादिरूपं यदि न दृश्येत दृश्यमानेऽपि वा लिङ्गे यदि सहसा नोत्पद्यते किंतु विलम्बेन तदानीं सहसा तदुत्पत्त्यर्थं रक्षोहननलिङ्गोपेता गायत्रीछन्दस्का ऋचोऽनुब्रूयात् ।

प्रतीकग्रहणेन ता ऋचो दर्शयति—

अग्ने हंसिन्यात्रिणामित्येताः, इति ।

अग्ने हंसीत्यादिके सूक्ते नवर्चो विद्यन्ते । एता रक्षोहननलिङ्गकाः ।

तासामनुवचने प्रयोजनमाह—

रक्षसामपहत्यै, इति ।

कः प्रसङ्गो रक्षसामित्याशङ्क्याह -

रक्षांसि वा एनं तर्ह्यालभन्ते यर्हि
न जायते यर्हि चिरं जायते, इति ।

यस्मिन्काले मथ्यमानस्य वह्नेः सर्वथाऽनुत्पत्तिर्विलम्बो वा भवेत्तदानीमेनं वह्निं रक्षांस्येवाऽऽलभन्ते संस्पृशन्ति । प्रतिबध्नन्तीत्यर्थः । ततो रक्षोहननाय वा ऋचः पठनीयाः ।

नैमित्तिका ऋचो विधाय प्रकृतामेव षष्ठीमृचं विधत्ते—

स यद्येकस्यामेवानूक्तायां जायेत यदि
द्वयोरथोत ब्रुवन्तु जन्तव इति जाताय
जातवतीभिरूपामनुब्रूयात्, इति ।

राक्षोघ्नीनामृचां मध्ये यद्येकस्यामेव पठितायां स वह्निर्जायेत यदि वा द्वयोः पठित्योरुत्पद्येत । एवं तृतीयादीनामुपलक्षणम् । अथेदानीमुत्पत्तिक्षण एव, उत ब्रुवन्त्वित्येतामनुब्रूयात् । सा च जातायामिरूपा जातस्याग्नेरनुकूला । तदेवाऽऽनुकूल्यं जातवतीमितिशब्देन स्पष्टी क्रियते । जातं जन्मवाचिपदं तदस्यामस्तीति जातवती । तस्या ऋचो द्वितीयः पाद एवं पठ्यते–' उदग्निर्वृत्रहाऽजनि ' इति । तस्मिन्नजनीति जन्मवाचकं पदमस्ति ।

अस्या ऋचोऽभिरूपत्वं प्रशंसति–

यद्यज्ञेऽभिरूपं तत्समृद्धम्, इति ।

सप्तमीमृचं विधत्ते–

आ यं हस्ते न खादिनमिति, इति ।

अनुब्रूयादिति शेषः । सा च संहितायां पठिता–' आ यं हस्ते न खादिनं शिशुं जातं न बिभ्रति । विशामग्निं स्वध्वरम् ' इति । तस्या अयमर्थः । यंशब्दः प्रसिद्धवाची । नशब्द उपमार्थः । यं मन्थनेन प्रसिद्धमग्निं हस्ते न हस्त इव ऋत्विज आबिभ्रति समन्ताद्धारयन्ति । तत्तदृत्विजां हस्ताभ्यां मन्थनं हस्तधारणसदृशं शिशुं जातम् । नेत्यनेन दृष्टान्तोऽभिधीयते । जातं शिशुमिव । यथा सद्यः समुत्पन्नं शिशुं हस्ताभ्यां धारयन्ति तद्वत् । कीदृशमग्निम् । विशां स्वध्वरम् । शोभनोऽध्वरो यागो यस्याग्नेः सोऽयं स्वध्वरः । विशां प्रजानामृत्विग्यजमानरूपाणामध्वरनिष्पादकम् । पुनरपि कीदृशम् । खादिनं हविरादीनां भक्षकमिति ।

अस्यामृचि प्रथमपादे हस्तशब्देन विवक्षितमर्थं दर्शयति–

हस्ताभ्यां ह्येनं मन्थन्ति, इति ।

हि यस्मादेनमग्निं हस्ताभ्यां मन्थन्ति तस्माद्धस्ते धारणमुपपद्यते ।

द्वितीयपादे पूर्वभागमनूद्य तात्पर्यं दर्शयति–

शिशुं जातमिति शिशुरिव वा
एष प्रथमजातो यदग्निः, इति ।

योऽग्निर्मन्थनेन प्रथममुत्पन्न एष शिशुना सदृश इत्येतस्य भागस्य तात्पर्यम् ।

द्वितीयपादस्योत्तरभागं तृतीयपादं चानुवदति–

न बिभ्रति विशामग्निं स्वध्वरमिति, इति ।

अत्र नेति पदं व्याचष्टे-

यद्वै देवानां नेति तदेषामो३मिति, इति ।

देवानां संबन्धिनि मन्त्रे क्वचित्क्वचिन्नेति पदं यदेवास्ति तदेषां देवप्रतिपादकानां मन्त्राणां नेति पदमोमित्येतस्मिन्नर्थे वर्तते । लोके प्रतिषिद्धवाची नेति शब्दो वेदेऽङ्गीकारवाची । न ओमित्यस्य पदस्यार्थे वर्तते । तथा सति लोकवैपरीत्यस्य दृष्टत्वादुपमार्थोऽपि वक्तुं शक्यते । तदेतदुभयं निरुक्तकारेणोक्तम्- 'नेति प्रतिषेधार्थीयो भाषायाम्' इति । 'उपरिष्टादुपचार उपमार्थीयः' इति च । अयं च नेति शब्दः शिशुं जातं नेत्युपमेयादुपरिष्टात्प्रयुज्यते । तस्मादुपमार्थी । देवानामित्यत्र देवप्रतिपादकानां मन्त्राणां संबन्धीति व्याख्यातम् । यद्वा दकारवकारयोर्विपर्यासेन वेदानां संबन्धीति व्याख्येयम् ।

अष्टमीमृचं विधत्ते-

प्र देवं देववीतये भरता वसुवित्तम-
मिति प्रह्रियमाणायाभिरूपा इति ।

अनुवक्तव्येति शेषः । आहवनीये प्रक्षिप्यमाणोऽयं मथितोऽग्निः प्रह्रियमाणस्तस्येयमृगनुरूपा । कथमिति चेत्तदुच्यते । देववीतये देवानां कामायाभिलाषाय वसुवित्तममतिशयेन हविर्लक्षणधनाभिज्ञं देवं मथितमग्निं हे ऋत्विजः प्रभरत, आहवनीये प्रहरत प्रक्षिपत । तस्मात्प्राक्षियमाणानुरूपत्वम् । अत्र जातायानुब्रू३हीत्यध्वर्युणा प्रेषितो होता पूर्वोक्तामुत ब्रुवन्तु जन्तव इत्येतामनुब्रूयात् । तथा प्रह्रियमाणायानुब्रू३हीत्येवं प्रेषितः प्र देवमित्यादिकामृचं ब्रूयात् । एवमुत्तरा अपि च । तदेतत्सर्वं वैत्तिरीयाः संगृह्याऽऽमनन्ति-'अग्नये मथ्यमानायानुब्रू३हीत्याह । सावित्रीमृचमन्वाह सवितृप्रसूता एवैनं मन्थन्ति । जातायानुब्रू३हि प्रह्रियमाणायानुब्रूहीत्याह काण्डे काण्ड एवैनं क्रियमाणे समर्धयति । गायत्री सर्वाऽन्वाह' इति ।

प्र देवमित्यस्या ऋचः प्रह्रियमाणाभिरूपत्वे यज्ञाङ्गसमृद्धिरूपं प्रयोजनं दर्शयति-

यद्यज्ञेऽभिरूपं तत्समृद्धम्, इति ।

अस्यां ऋचस्तृतीयपादमनुवदति –

आ स्वे योनौ निषीदत्विति, इति ।

अयं मथितोऽग्निरागत्य स्वे योनौ स्वकीयस्थान आहवनीयाख्ये नितरामुपविशत्विति पादस्यार्थः ।

तस्मिन्पादे योनिपदं व्याचष्टे–

एष ह वा अस्य स्वो योनिर्यदग्निरग्नेः इति ।

आहवनीयाख्यो योऽग्निरस्ति, एष वा अस्य मथितस्याग्नेः स्वकीयं स्थानम् ।

नवमीमृचं विधत्ते–

अजातं जातवेदसीति, इति ।

अनुब्रूयादिति शेषः । सा चैवं संहितायामाम्नाता–'आजातं जातवेदसि प्रियं शिशीतातिथिम् । स्योन आ गृहपतिम्' इति । अस्यायमर्थः । कीदृशमाहवनीयस्य प्रीतिहेतुमतिथिम् । इदानीमागतत्वादतिथिरूपम् । स्योने सुखकर आहवनीय आ गृहपतिमागत्य गृहस्वामित्वेन वर्तमानम् ।

तस्यामृचि प्रथमपादे पदद्वयं व्याचष्टे–

जात इतरो जातवेदा इतरः, इति ।

इतर इदानीं मथितोऽग्निः सद्यःसमुत्पन्नत्वाज्जात इत्युच्यते । इतरः पूर्वसिद्धाहवनीयोऽग्निरिदानीं जातमिममग्निं वेत्तीति जातवेदा इत्युच्यते ।

द्वितीयपादमनूद्य व्याचष्टे–

प्रियं शिशीताथितिमित्येष ह वा
अस्य प्रियोऽतिथिर्यदग्निरग्नेः, इति ।

योऽग्निर्मन्थनेनोत्पन्न एष एवास्य पूर्वसिद्धस्याऽऽहवनीयस्याग्नेः प्रियश्चातिथिश्च ।

तृतीयपादमनूद्य व्याचष्टे–

स्योन आ गृहपतिमिति शान्त्यामेवैनं तद्दधाति, इति ।

स्योने सुखरूपे पूर्वाग्नौ स्थापनं यदस्ति तत्तेन स्थापनेन नूतनमेवमग्निं शान्त्यामेव स्थापयति । पूर्वाग्नेः सुखनिवासहेतुत्वाच्छान्तित्वम् ।

दशमीमृचं विधत्ते—

अग्निनाऽग्निः समिध्यते कविर्गृहपतिर्युवा ।
हव्यवाड् जुह्वास्य इत्यभिरूपा, इति ।

अनूच्येति शेषः । अस्या अयमर्थः । अग्निनाऽऽधारभूतेनाऽऽहवनीयेनानुगृहीत इदानीं प्रहृतोऽग्निः सम्यग्दीप्यते । कीदृशोऽग्निः । कविर्विद्वानाकूताभिज्ञोऽत एव गृहपतिर्यजमानस्य गृहस्य पालकः । युवा नूतनः । देवेभ्यो हव्यं वहतीति हव्यवाट्, होमसाधनभूतः । जुहूरेवाऽऽस्यं मुखं यस्यासौ जुह्वास्यः । सेयमृक्प्रह्रियमाणाग्निगुणकीर्तनात्तस्याग्नेरनुरूपा ।

तदेतदानुरूप्यं प्रशंसति—

यद्यज्ञेऽभिरूपं तत्समृद्धम्, इति ।

एकादशीमृचं विधत्ते—

त्वं ह्यग्ने अग्निना विप्रो विप्रेण सन्सतेति, इति ।

अनुब्रूयादिति शेषः । हे नूतनाग्ने त्वं सिद्धेनाऽऽहवनीयेनाग्निना समिध्यस इति तृतीयपादगतेन पदेन योज्यम । उभयोरग्न्योर्विद्यमानत्वात्सम्यगनुष्ठानानिर्वाहकत्वाद्वा सच्छब्दवाच्यत्वम् । 'अग्ने महाँ असि ब्राह्मणभारत' इति श्रुते ब्राह्मणजात्यभिमानित्वाद्विप्रत्वम् ।

तदेतदुभयं विशदयति—

विप्र इतरो विप्र इतरः सन्नितरः सन्नितरः, इति ।

तृतीयपादमनूद्य व्याचष्टे—

सखा सख्या समिध्यस इत्येष ह वा
अस्य स्वः सखा यदग्निरग्नेः, इति ।

योऽग्निराहवनीयाख्य एष एवास्याग्नेर्मथितस्य स्वकीयः सखा ।

द्वादशीमृचं विधत्ते—

तं मर्जयन्त सुक्रतुं पुरोयावानमाजिषु ।
स्वेषु क्षयेषु वाजिनमिति, इति ।

अनुब्रूयादिति शेषः । हे ऋत्विजस्तं नूतनमाग्निं मर्जयन्त शोधयन्त । कीदृशं शोभनस्य क्रतोर्निर्वाहकम् । आजिषु संग्रामेषु पुरोयावानं पुरोगन्तारम् । स्वेषु क्षयेषु स्वकीयेषु गृहेष्वाहवनीयादिषु वाजिनमन्नवन्तं गच्छन्तं वा ।

क्षयशब्देनात्राऽऽहवनीयाग्निरूपगृहविवक्षां दर्शयति–

एष ह वा अस्य स्वः क्षयो यदग्निरग्नेः, इति ।

त्रयोदशीमृचं विधत्ते–

यज्ञेन यज्ञमयजन्त देवा इत्युत्तमया परिदधाति, इति ।

उत्तमया चानया परिदधाति, अनुवचनं समापयेत् । यदाहाऽऽश्वलायनः– 'यज्ञेन यज्ञमयजन्त देवा इति परिदध्यात्सर्वत्रोत्तमां परिधानीयेति विद्यात्' इति ।

उदाहृतमृचः पादं व्याचष्टे–

यज्ञेन वै तद्देवा यज्ञमयजन्त । यदग्निनाऽग्निमयजन्त ते स्वर्गं लोकमायन्, इति ।

अग्निना प्रहरियमाणेन नूतनेन पूर्वसिद्धमाहवनीयाग्निमयजन्त पूजितवन्त इति यदस्ति तेन कारणेन यज्ञेन वै देवा यज्ञमयजन्तेत्युच्यते । उभौ यज्ञशब्दौ स्वकारणभूतमग्निद्वयमुपलक्षयतः । देवशब्देनेदानीं देवत्वेन वर्तमानाः पूर्वसिद्धा ऋत्विजो विवक्षिताः । ते च पूर्वमनुष्ठितेन यागेन स्वर्गलोकं प्राप्ताः ।

अवशिष्टं पादत्रयं पठति–

तानि धर्माणि प्रथमान्यासन् । ते ह नाकं महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवा इति, इति ।

इदानीं देवत्वेन वर्तमानैः पूर्वसिद्धैर्ऋत्विग्यजमानैर्यानि ज्योतिष्टोमादीनि कर्माण्यनुष्ठितानि [तानि] सर्वाणि प्रथमानि धर्माण्यादिसृष्टिकालीनानि सुकृतसाधनान्यासन् । ते ह ते चानुष्ठातारो महिमानो महत्त्वोपेता नाकं सचन्त कं सुखमकं दुःखं तद्रहितो भोगो नाकस्तं संप्राप्तवन्तः । यत्र यस्मिँल्लोके पूर्वे साध्याः पूर्वसृष्टिगता यज्ञादिसाधका इदानीं यज्ञादिभिः साध्यत्वेन वर्तमाना देवाः सन्ति वर्तन्ते तं नाकं सचन्तेति पूर्वत्रान्वयः ।

चतुर्थपादस्य तात्पर्यं दर्शयति--

छन्दांसि वै साध्या देवास्तेऽग्रेऽग्निनाऽग्निमयजन्त। ते स्वर्गं लोकमायन्, इति।

छन्दांसि वै गायत्र्यादिच्छन्दोभिमानिन एव साध्या इदानीं जनैः पूज्या देवास्तेऽग्रे च पूर्वसृष्टाग्निना मथितेनाग्निनाऽऽहवनीयमग्निमयजन्त पूजितवन्तः। ते च तेन यागेन स्वर्गं प्राप्ताः।

न केवलं छन्दोदेवा एव चतुर्थपादे विवक्षिताः किंत्वन्येऽपीत्याह -

आदित्याश्चैवेहाऽऽसन्नङ्गिरसश्च तेऽग्रेऽग्निनाऽग्निमयजन्त ते स्वर्गं लोकमायन्, इति।

इदानीमादित्यशब्देनाभिधेया देवा अङ्गिरःशब्देनाभिधेया ये चर्षयस्ते द्विविधा अपीहैवाऽऽसन्भूमावेव पूर्वसृष्टौ मनुष्यरूपेणावस्थिताः। तेऽग्र इत्यादि पूर्ववत्। तदेवं चतुर्थपादतात्पर्यद्वयमुक्तम्। यद्वा छन्दांसीत्यादिकमेव चतुर्थपादतात्पर्यम्। आदित्यादिकमितरपादतात्पर्यमिति द्रष्टव्यम्।

येयमाहवनीयेऽग्नौ मथिताग्निप्रक्षेपलक्षणाहुतिस्तां प्रशंसति--

सैषा स्वर्ग्याहुतिर्यदग्न्याहुतिर्यदि ह वा अप्यब्राह्मणोक्तो यदि दुरुक्तोक्तो यजतेऽथ हैषाऽऽहुतिर्गच्छत्येव देवान्न पाप्मना संसृज्यते, इति।

अग्निरूपद्रव्याहुतिर्या विद्यते सैषा स्वर्गाय हिता। यदि हेत्यादिना स्वर्गत्वमेव स्पष्टी क्रियते। ब्राह्मणं विधायकं वाक्यं तेन प्रेरितो ब्राह्मणोक्तः। तद्विपरीतः पण्डितंमन्यः स्वबुद्ध्यैव यत्किंचिद्योऽनुतिष्ठति सोऽयमब्राह्मणोक्तः। पुरुषेणान्यथाऽवबुद्धं विधिवाक्यं दुरुक्तं तेन प्रेरितो दुरुक्तोक्तः। अथवा स्मृतिष्वब्राह्मणत्वेन प्रतिपादितो योऽस्ति सोऽयमब्राह्मणोक्तः।

तद्यथा- -" अब्राह्मणास्तु षट् प्रोक्ता इति शातातपोऽब्रवीत्।
आद्यस्तु राजभृत्यः स्याद्द्वितीयः क्रयविक्रयी॥
तृतीयो बहुयाज्याख्यश्चतुर्थोऽश्रौतयाजकः।
पञ्चमो ग्रामयाजी च षष्ठो ब्रह्मबन्धुः स्मृतः" ॥

यद्यपि याजनाध्यापनप्रतिग्रहा ब्राह्मणस्य जीवनहेतुत्वेन विहितत्वादनिषिद्धास्तथाऽपि यावता जीवनं निष्पद्यते तावदेव याजनं ब्राह्मणाङ्गीकृतम्।

यस्तु सत्यपि जीवने धनाधिक्यवाञ्छया याजनशीलः सोऽत्र बहुयाजी विवक्षितः । यः पुमाञ्श्रौतकर्मण्यधिकृतोऽनादरेण स्वयं श्रौतं नानुतिष्ठति, अन्यानपि नानुष्ठापयति किंतु स्मार्तकर्मपरः सन्ननुतिष्ठत्यनुष्ठापयति सोऽयमश्रौतयाजकः । ग्रामे नगरे च योग्यायोग्याश्च यावन्तः सन्ति धनाभिलाषेण तावतां सर्वेषां याजको ग्रामनगरयाजी । यः पुमान्प्रातः सूर्योदयात्प्राक्संध्यां नोपास्ते सायं चास्तमयात्प्राङ्नोपास्ते सोऽयं ब्रह्मबन्धुः । एते षडब्राह्मणत्वेन स्मृतिषूक्ताः । दुष्टान्यपवादरूपाणि वचनानि दुरुक्तानि तैरभिशस्तो दुरुक्तोक्तः । अब्राह्मणोक्तो वा दुरुक्तोक्तो वा यद्यपि यजेत तथाऽप्येषाऽऽहवनीये हुता मथिताऽग्न्याहुतिर्देवान्प्रामोत्येव । ततो यजमानस्य पापसंसर्गो न भवति ।

वेदनं प्रशंसति—

गच्छत्यस्याऽऽहुतिर्देवान्नास्याऽऽहुतिः
पाप्मना संसृज्यते य एवं वेद, इति ।

उक्तार्थवेदिता यद्यपि यत्किंचित्कर्म विकलमनुतिष्ठति तथाऽपि तत्सर्वं सकलं भवति ।

न्यूनाधिकसंख्याभ्रमव्युदासाय विहितानामृचां संख्यां दर्शयति -

ता एतास्त्रयोदशान्याह रूपसमृद्धाः इति ।

राक्षोघ्नीनां नैमित्तिकत्वात्तत्परित्यागेनेतरास्त्रयोदशसंख्याकाः । ताश्च मथ्यमानस्य जायमानस्य प्रहियमाणस्याऽऽहवनीयेन संसृज्यमानस्य च प्रतिपादनेनानुकूलेनैव रूपेण समृद्धाः ।

तामेतां समृद्धिं प्रशंसति—

एतद्वै यज्ञस्य समृद्धं यद्रूपसमृद्धं
यत्कर्म क्रियमाणमृगभिवदति, इति ।

आद्यन्तयोर्ऋचोरावृत्तिविधिमावृत्तानां संख्याप्रशंसां वेदनप्रशंसामावृत्तिप्रशंसां च दर्शयति—

तासां त्रिः प्रथमामन्वाह त्रिरुत्तमां ताः सप्तदश
संपद्यन्ते । सप्तदशो वै प्रजापतिर्द्वादश मासाः
पञ्चर्तवस्तावान्संवत्सरः । संवत्सरः प्रजापतिः

प्रजापत्यायतनाभिरेवाऽऽभी राध्नोति य एवं वेद । त्रिः प्रथमां त्रिरुत्तमामन्वाह यज्ञस्यैव तद्धर्सौ नह्यति स्थेम्ने बलायाविस्रंसाय ॥ १६ ॥ इति ।

पूर्ववद्व्याख्येयम् ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऐतरेय-ब्राह्मणभाष्ये तृतीयध्याये पञ्चमः खण्डः ॥ ५ ॥ (१६) ।

आतिथ्येष्टिमध्ये कर्तव्यमग्निमन्थनमुक्त्वा तदिष्टिशेषं विधत्ते-

समिधाऽग्निं दुवस्यताऽऽप्यायस्व समेतु त इत्याज्यभागयोः पुरोनुवाक्ये भवत आतिथ्यवत्यौ रूपसमृद्धे । एतद्वै यज्ञस्य समृद्धं यद्रूपसमृद्धं यत्कर्म क्रियमाणमृगभिवदति, इति ।

समिधाऽग्निमिति प्रथमाज्यभागस्य पुरोनुवाक्या । आप्यायस्व समेतु त इति द्वितीयस्य । प्रथममन्त्रस्य द्वितीयपादे घृतैर्बोधयतातिथिमिति श्रूयमाणत्वादातिथ्यवत्यौ ।

तदेतदाक्षिपति-

सैषाऽऽग्नेय्यतिथिमती न सौम्याऽतिथिमत्यस्ति यत्सौम्याऽतिथिमती स्याच्छश्वत्सा स्यात्, इति ।

सौम्या त्वतिथिशब्दोपेता नास्ति । आप्यायस्वेत्यस्यामृच्यतिथिशब्दस्याश्रवणात् । यदि सौम्याऽतिथिशब्दोपेता स्यात्तदानीं शश्वदवश्यं सा सौम्या पुरोनुवाक्या भवेत् । न त्वसावतिथिमती । तस्मादातिथ्यवत्याविति द्विवचनमयुक्तमित्यर्थः ।

आक्षेपं समाधत्ते-

एतत्त्वेवैषाऽतिथिमती यदापीनवती, इति ।

तुशब्द आक्षेपनिवारणार्थः । आपीनमभिवृद्धिस्तद्वाचकस्याऽऽप्यायस्वेति शब्दस्य विद्यमानत्वादियं सौम्याऽऽपीनवती । यदापीनवत्त्वमस्ति, एतदेवैते-

नाऽऽपीनवत्त्वेनैवैषा सौम्याऽतिथिमती संपद्यते । आपीनवत्त्वस्यातिथ्युपलक्षकत्वात् ।

तदेवोपलक्षकत्वं विशदयति–

यदा वा अतिथिं परिवेविषत्या पीन इव वै स तर्हि भवति, इति ।

तमतिथिं गृहस्वामी यदैव परिवेविषति परिवेषणेन पात्रे भोज्यप्रक्षेपणेन भोजयति तर्हि तस्मिन्भोजनोत्तरकाले सोऽतिथिरापीन इवोदरपूर्त्या वृद्धिं प्राप्त इव भवत्येव । तस्माद्वृद्धिवाचक आप्यायस्वेति शब्दोऽतिथिलक्षकः । अतो द्विवचनं पुरोनुवाक्यात्वं च युक्तम् ।

आज्यभागयोर्याज्यां विधत्ते–

तयोर्जुषाणेनैव यजति, इति ।

प्रकृतावाम्नातौ जुषाणोऽग्निराज्यस्य वेतु । जुषाणः सोम आज्यस्य हविषो वेत्विति । तेनैव मन्त्रेण यजेत । अग्निर्वृत्राणीत्यादिके प्रकृतिगते पुरोनुवाक्ये चोदकप्राप्ते अपोह्य यथा समिधाऽग्निमित्यादिके विहिते तद्वद्याज्यान्तरप्रसक्तिं वारयितुं विधिः ।

प्रधानस्य हविषो याज्यानुवाक्यं विधत्ते–

इदं विष्णुर्विचक्रमे तदस्य प्रियमभि, पाथो अश्यामिति वैष्णव्यौ, इति ।

याज्यानुवाक्ये । कुर्यादिति शेषः ।

तयोर्विभागं विधत्ते–

त्रिपदामनूच्य चतुष्पदया यजति, इति ।

इदं विष्णुरिति त्रिपदा तां पुरोनुवाक्यारूपेणानुब्रूयात् । तदस्य प्रियमिति चतुष्पदा तया यजेत । याज्यारूपेण तां पठेत् ।

ऋग्द्वयगतां पादसंख्यां प्रशंसति–

सप्त पदानि भवन्ति । शिरो वा एतद्यज्ञस्य यदातिथ्यं सप्त वै शीर्षन्प्राणाः शीर्षन्नेव तत्प्राणान्दधाति, इति ।

आतिथ्येष्टेर्यज्ञशिरोरूपत्वाच्छिरसि च्छिद्रवर्तिनां प्राणानां सप्तत्वादत्र पादसंख्यया यज्ञस्य शिरसि सप्त प्राणाः स्थापिता भवन्ति ।

संयाज्ये विधत्ते-

होतारं चित्ररथमध्वरस्य प्र प्रायमग्निर्भरतस्य शृण्व इति ह स्माह याज्ञवल्क्यः संयाज्ये भवत आतिथ्यवत्यौ रूपसमृद्धे । एतद्वै यज्ञस्य समृद्धं रूपं रूपसमृद्धं यत्कर्म क्रियमाणमृगभिवदति, इति ।

होतारमिति पुरोनुवाक्या । प्र प्रायमिति याज्या । प्रथमाया ऋचश्चतुर्थपादे श्रिया स्व ग्निमतिथिं जनानामिति श्रूयमाणत्वादातिथ्यवत्त्वम् । द्वितीयस्या अपि चतुर्थपादे द्युतानो दैव्यो अतिथिरिति ।

मन्त्रद्वयगतं छन्दः प्रशंसति-

त्रिष्टुभौ भवतः सेन्द्रियत्वाय, इति ।

इन्द्रियं वै त्रिष्टुबिति श्रुत्यन्तरात्त्रिष्टुभ इन्द्रियहेतुत्वम् ।

अत्रेडाभक्षणादूर्ध्वभाविकर्तव्यमपि चोदकेन प्राप्तं तदेतद्वारयति-

इळान्तं भवतीळान्तेन वा एतेन देवा अराध्नुवन्यदातिथ्यं तस्मादिळान्तमेव कर्तव्यम्, इति ।

पुरोडाशसंबन्धि यदेतदिडाभागभक्षणं तदन्तमेवाऽऽतिथ्येष्टिरूपं कर्म भवेत् । तावतैव समृद्धिसिद्धेः । द्विविधमिडाभक्षणम् । अनुयाजयागात्पूर्वमुत्तरकालीनं च ।

तयोः पूर्वकालीनमन्तत्वेन दर्शयितुमनुयाजान्निषेधति-

प्रयाजानेवात्र यजन्ति नानुयाजान्, इति ।

अनुयाजानां यजने दोषं प्रकटयति-

प्राणा वै प्रयाजानुयाजास्ते य इमे शीर्षन्प्राणास्ते प्रयाजा येऽवाञ्चस्तेऽनुयाजाः स योऽनुयाजान्यजेद्यथेमान्प्राणानालुप्य शीर्ष धित्सेत्तादृक्तत्, इति ।

प्रशब्दसाम्यात्प्रयाजानां प्राणत्वं तदनुवर्तित्वसाम्यादनुयाजानामपि प्राणत्वम् । तथा सति ते य इमे शीर्षन्प्राणाः शिरस्यवस्थिताः श्वासादिकारिणः प्राणा ये केचित्सन्ति ते प्रयाजरूपाः । प्रकृष्टसाम्यादुत्तमाङ्गवर्तित्वेन प्राणानां प्रकृष्टत्वम् । प्रयाजानां च प्रथमानुष्ठानत्वेन प्रकृष्टत्वम् । ये त्ववाञ्चो नाभेरधस्ताद्वर्तमाना अपानवाय्वादयस्तेऽनुयाजरूपा निकृष्टत्वसाम्यादपानवाय्वादीनां मध्याङ्गवर्तित्वेन निकृष्टत्वम् , अनुयाजानां पश्चाद्भावित्वेन निकृष्टत्वम् । एवं सति यः पुमानत्राऽऽतिथ्येष्टावनुयाजान्यजेल्लोके कश्चिद्यथेमानवाग्देशवर्तिनोऽपानवाय्वादीनालुप्य च्छित्वा शीर्षं धित्सेत्, शिरसि स्थापयितुमिच्छेत्, तादृक्तत्, तथैव स पुमांस्तत्कर्तुमिच्छेत् । अधोदेशवर्तिप्राणस्थानीयानुयाजानां यज्ञशिरःस्थानीयातिथ्यकर्मण्यनुष्ठानमयुक्तं तथा पुत्रादिप्रजास्थानीयानामनुयाजानां शिरःस्थानीयेऽनुष्ठानयुक्तमित्यपि द्रष्टव्यम् ।

दोषान्तरमाह—

अतिरिक्तं तत्समु वा इमे प्राणा
विद्रे ये चेमे ये चेमे, इति ।

ये चेमे शिरसि योग्याः प्राणा येऽप्यमी नीचदेशस्थिताः प्राणास्ते सर्वे समुविद्रे संभूयैकत्र शिरस्यवतिष्ठेरन् । तच्चारिक्तं योग्यस्थानीयादधिकं शिरोरूपमातिथ्यं कर्म चक्षुरादीनामेव प्राणनां योग्यस्थानं न त्वधोदेशवर्तिनामपानादीनां तत्रावकाशोऽस्तीत्यर्थः ।

नन्वनुयाजानामनुष्ठानाभावे कर्माङ्गसाकल्यलक्षणः फलविशेषो न प्राप्येत इत्याशङ्क्याऽऽह—

तद्यदेवात्र प्रयाजान्यजन्ति नानुयाजांस्तत्र सकाम
उपाप्तो योऽनुयाजेषु योऽनुयाजेषु ॥ १७ ॥ इति ।
इत्यैतरेयब्राह्मणे प्रथमपञ्चिकायां तृतीयोऽध्यायः ॥ ३ ॥

तत्तस्मिन्नातिथ्यकर्मणि यदि प्रयाजानेव यजन्ति न त्वनुयाजांस्तदानीमनुयाजेषु यः कामः फलविशेषः स सर्वोऽपि तत्र कर्मणि प्राप्तो भवति । यथा लोके कंचिदान्दोलिकादिभारं वहत्सु बहुषु मध्ये कस्यचिदशक्तौ सत्यामवशिष्टा एव वहन्ति तद्वदित्यर्थः । द्विरभ्यासोऽध्यायसमाप्त्यर्थः ।

अत्र मीमांसा । दशमाध्यायस्य सप्तमपादे चिन्तितम् -

" प्रायणीयातिथ्ययोः किं विकल्पः शंय्विडान्तयोः ।
नियमो वा विकल्पः स्यान्निषेधपरिसंख्यया ॥
शंय्विडान्तत्ववाक्याच्च नियमो विधिमात्रतः ।
नित्यानुवादो नञ्वाक्यं दोषबाहुल्यमन्यथा " ॥

ज्योतिष्टोमे श्रूयते-' शंय्वन्ता प्रायणीया संतिष्ठते न पत्नीः संयाजयन्ति । इडान्ताऽऽतिथ्या संतिष्ठते नानुयाजान्यजति ' इति । प्रकृतौ यदा होता तच्छंयोरिति जपति तदानीमध्वर्युः परिधीनग्नौ प्रक्षिपति । तदाह कल्पसूत्रकारः-' अनूच्यमाने शंयुवाक आहवनीये परिधीन्प्रहरति ' इति । ततो हविःशेषेषु भक्षितेषु पत्नीः संयाजयन्तीति क्रमः । पत्नीसंयाजानामुपरि फलीकरणप्रायश्चित्तहोमकपालोद्वासनैरिष्टिः समाप्यते । एवं स्थिते विकृतिरूपायाः प्रायणीयेष्टेः शंयुवाकान्तत्वम्, आतिथ्येष्टेरिडाभक्षणान्तत्वं च विकल्पितं स्यात् । कुतः, निषेध[विधि]-वाक्याभ्यां प्रकारद्वयप्रतीतेः । तथा हि । शंय्वन्तत्वेडान्तत्वविधिनैवोपरितनपत्नीसंयाजानुयाजनिषेधे पुनर्निषेधवचनं परिसंख्यार्थम् । पत्नीसंयाजानुयाजव्यतिरिक्ते नास्ति निषेध इति परिसंख्या । तेन प्रकृतिवद्यथाप्राप्तं कपालोद्वासनान्तत्वमनयोरिष्टयो प्रतीयते । विधिवाक्येन शंय्विडान्तत्वम् । तेन व्रीहियववद्विकल्प इति प्राप्ते ब्रूमः । विधिमात्रस्यात्र प्रवृत्तेः । शंय्वन्तत्वमिडान्तत्वं च तयोः प्रतिनियतम् । पत्नीसंयाजाद्यभावस्त्वर्थसिद्धः । ततो नञ्पदयुक्तमुपरितनं प्रतिषेधवाक्यं नित्यानुवादोऽन्यथा बहवो दोषाः प्रसज्येरन् । विकल्पे तावदष्टौ दोषाः प्रसिद्धाः । परिसंख्यायां च त्रयो दोषाः । विधिपरिसंख्याभ्यां वाक्यभेदोऽपरो दोषः । ततः शंय्विडान्तत्वं नियतम् । तत्रैवान्यच्चिन्तितम्-

" तत्रैव शंय्विडे पूर्वे परे वा स्वेच्छयाऽथवा ।
परे एवाथवा पूर्व एवाऽऽद्यो द्विविधश्रुतेः ॥
निषेधस्यार्थवत्त्वाय परे एवानुवादगीः ।
पूर्वैकवाक्यतां याति पूर्व एवाविरोधतः " ॥

प्रायणीयातिथ्ययोर्निर्णीते शंय्विडे पुनः संदिह्येते । प्रकृतौ द्विविधे शंय्विडे पत्नीसंयाजेभ्यः पुरस्तादुपरिष्टाच्च विहिते । ते चात्र चोदकप्राप्ते । तत्र द्विविधश्रुतेरर्थे चोदकेनातिदिष्टे सति विशेषनियामकाभावादिच्छया स्वीकार्ये इत्येकः पक्षः । यदि प्रायणीया पूर्वशंय्वन्ताऽऽतिथ्या च पूर्वेडान्ता स्यात्तदानीमन्तत्वविधिनैव ताभ्यां शंय्विडाभ्यामूर्ध्वं प्राप्तानां पत्नीसंयाजानामनुयाजानां च धारितत्वान्न निषेधो व्यर्थः स्यात् । परयोः शंय्विडयोरन्तत्वे तु

ताभ्यां शंग्विडाभ्यां पूर्वप्राप्तानां तेषामनिवारणात्तन्निवारणाय सार्थको निषेधस्तस्मात्परे एव शंग्विडे ग्राह्ये । इति द्वितीयः पक्षः । निषेधोऽयं नित्यानुवाद इत्युक्तम् । स च पूर्वयोः शंग्विडयोरन्तत्वेऽप्येकवाक्यतामापद्यानुवादकत्वेनोपपद्यते । असंजातविरोधिन्यौ हि पूर्वे शंग्विडे । तस्मात्ते एव ग्राह्ये इति सिद्धान्तः ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऐतरेयब्राह्मणभाष्ये तृतीयाध्याये षष्ठः खण्डः ॥ ६ ॥ (१७) ।

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकवीरबुक्कणसाम्राज्यधुरंधरसायणाचार्यकृतौ प्रथमपञ्चिकायां तृतीयोऽध्यायः ॥ १ ॥

अथ चतुर्थोऽध्यायः ।

सोमप्रवाहिका अग्निमन्थनीया ऋचस्तथा ।
आतिथ्यास्तद्विशेषाश्च तृतीयाध्याय ईरिताः ॥

अथ प्रवर्ग्यादयो वक्तव्यास्तदर्थमादावाख्यायिकामाह -

यज्ञो वै देवेभ्य उदक्रामन्न वोऽहमन्नं भविष्यामीति नेति देवा अब्रुवन्नन्नमेव नो भविष्यसीति तं देवा विमेथिरे सहैभ्यो विहतो न प्रबभूव ते होचुर्देवा न वै न इत्थं विहतोऽलं भविष्यति हन्तेमं यज्ञं संभरामेति तथेति तं संजभ्रुः, इति ।

यज्ञशब्देनात्र प्रवर्ग्यो विवक्षितः । तदभिमानी देवः केनापि निमित्तेनापरोक्षोऽन्येभ्यो देवेभ्य उत्क्रान्तवान् । हे देवा युष्माकमहमन्नं न भविष्यामीत्येवमुत्क्रमणकाले प्रोक्तवान् । ततो देवास्तदुत्क्रमणं नेति प्रतिषिध्य सर्वथा त्वमस्माकमन्नं भवेति प्रार्थितवन्तः । प्रवर्ग्याख्ये कर्मणि यद्धविस्तद्देवानामन्नं तदभिमानी च पुरुषो देवैः प्रार्थितं तदन्नत्वं नाङ्गीचकार । तमनङ्गीकुर्वाणं प्रवर्ग्यं पुरुषं देवा विमेथिरे ताडनभर्त्सनादिभिर्हिंसितवन्तः । स च प्रवर्ग्यो देवैर्विशेषेण बाधित एभ्यो देवेभ्यो न प्रबभूव प्रभूतो नाभूत् । अन्नत्वेनावस्थातुं न शक्त इत्यर्थः । ततो देवाः परस्परमेवं विचारितवन्तः--एवं विहतो विशेषेण बाधितः प्रवर्ग्यो नोऽस्माकमन्नं नैव भविष्यतीति संपूर्णमन्नं न भविष्यति । तस्मिं प्रव-

र्ग्याख्यं यज्ञं संभरामोचितैः साधनैः सम्यक्पोषयामेति । संपूर्तिहेतुदर्शननिमित्तज-न्यहर्षद्योतनार्थो हन्तशब्दः । तथेति परस्परमङ्गीकृत्य तं प्रवर्ग्यं संजभ्रुः साध नसंपादनेन सम्यक्पोषितवन्तः ।

अथ हविरादीनां साधनानां संपादनं विधत्ते—

तं संभृत्योचुरश्विनाविमं भिषज्यतामित्यश्विनौ वै देवानां भिषजावश्विनावध्वर्यू तस्मादध्वर्यू घर्मं संभरतः, इति ।

देवाः प्रवर्ग्यकर्मोपयुक्तं महावीरादिसंभारं संभृत्य स्वकीयावश्विनौ प्रत्येवमूचुः- हेऽश्विनाविमं प्रवर्ग्यपुरुषदेहमस्माभिर्हिंसितं युवां भिषज्यतमौषधैरेतस्य समाधान कुरुतमिति । देवानां मध्ये भिषजावेवाश्विनौ तस्मात्तत्प्रार्थनं युक्तम् । किंच । देवानां यज्ञकर्मण्यश्विनावध्वर्यू । अत एवान्यत्र कस्याचिन्मन्त्रस्य ब्राह्मणे पठ्यते- ' अश्विनोर्बाहुभ्यामित्याह । अश्विनौ हि देवानामध्वर्यू आस्ताम् ' इति । अतोऽपि कारणादश्विनोर्यज्ञसमाधानकारणं युक्तम् । तस्मात्कारणादध्वर्यू । उभाभ्यामाश्विभ्यां यज्ञशरीरं चिकित्सितं तस्मादिदानीमप्यध्वर्यू घर्मं संभरतः प्रवर्ग्यसाधनं संपादये-याताम् । तदेतत्तैत्तिरीया देवा वै सत्रमासतेत्यस्मिन्ननुवाके प्रवर्ग्यविषयमुपाख्यानं प्रपञ्चयन्ति । तस्मिन्नाख्याने यज्ञस्य प्रवर्ग्यरूपं शिरो धनुषः कोट्या च्छिन्नमि-त्युक्त्वा पश्चादेतदाम्नायते-' तेनाथ शीर्ष्णा यज्ञेन यजमानानाशिषोऽवारुन्धत । न सुवर्गं लोकमभ्यजयन् । ते देवा अश्विनावब्रुवन् । भिषजौ वै स्थः । इदं यज्ञस्य शिरः प्रतिधत्तमिति । तावब्रूतां वरं वृणावहै । ग्रह एव नावत्रापि गृह्यता-मिति । ताभ्यामेतमाश्विनमगृह्णन् । तावेतद्यज्ञस्य शिरः प्रत्यधत्ताम् । यत्प्रवर्ग्यस्तेन स शीर्ष्णा यज्ञेन यजमाना अवाऽऽशिषोऽरुन्धत । अभि सुवर्गं लोकमजयन् । यत्प्रवर्ग्यं प्रवृणक्ति । यज्ञस्यैव तच्छिरः प्रतिदधाति ' इति ।

प्रवर्ग्यसाधनानि संपादितवतोस्तयोरनुज्ञापनमन्त्रं प्रैषमन्त्रं च विधत्ते-

तं संभृत्याऽऽहतुर्ब्रह्मन्प्रवर्ग्येण प्रचरिष्यामो होतरभिष्टुहीति ॥ १८ ॥ इति ।

तं प्रवर्ग्यकर्मोपयुक्तं साधनसमूहं संभृत्य संपाद्य चतुर्णामध्वर्यूणां मध्येऽध्वर्युः प्रतिप्रस्थाता चेत्येतावुभावध्वर्यू ब्रह्माणं होतारं च प्रत्येवं ब्रूयाताम् । हे ब्रह्मन्व-यमृत्विजः सर्वे प्रवर्ग्याख्येन(ण) कर्मणा प्रचरिष्यामोऽनुष्ठास्यामः । स्तोऽय-

मनुज्ञापनमन्त्रः । हे होतस्त्वमभिष्टुहि प्रवर्ग्यस्तुतिरूपाः सर्वा ऋचः पठ । सोऽयं प्रैषमन्त्रः । इतिशब्दो मन्त्रद्वयसमाप्त्यर्थः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऐतरेयब्राह्मण-
भाष्ये चतुर्थाध्याये प्रथमः खण्डः ॥ १ ॥ (१८) ।

होतुरभिष्टवार्थास्वृक्षु प्रथमामृचं विधत्ते--

ब्रह्मजज्ञानं प्रथमं पुरस्तादिति प्रतिपद्यते ब्रह्म वै बृहस्पतिर्ब्रह्मणैवैनं तद्भिषज्यति, इति ।

प्रतिपद्यतेऽनेन मन्त्रेण होताऽभिष्टवं प्रारभत इत्यर्थः । अस्मिन्मन्त्रे ब्रह्मशब्देन देवानां मध्ये ब्राह्मणजातिरूपो बृहस्पतिरुच्यते । तस्मादनेन मन्त्रेणोपक्रमे सति ब्रह्मणैव ब्राह्मणजात्यैवैनं प्रवर्ग्यं तदा भिषज्यति चिकित्सते ।

द्वितीयामृचं विधत्ते--

इयं पित्रे राष्ट्र्येत्यग्र इति वाग्वै राष्ट्री वाचमेवास्मिंस्तद्दधाति, इति ।

अस्मिन्मन्त्रे तृतीयान्तो राष्ट्रीशब्दो वाचं ब्रूते । तत्तेन मन्त्रपाठेनास्मिन्प्रवर्ग्ये वाचमेव संपादयति ।

तृतीयामृचं विधत्ते--

महान्मही अस्तभायद्विजात इति ब्राह्मणस्पत्या ब्रह्म वै बृहस्पतिर्ब्रह्मणैवैनं तद्भिषज्यति, इति ।

अस्य मन्त्रस्य चतुर्थपादे बृहस्पतिर्देवतेति श्रूयमाणत्वाद्बृहस्पतेश्च ब्राह्मणस्वामित्वादियमृग्ब्राह्मणस्पत्या ।

चतुर्थीमृचं विधत्ते--

अभित्यं देवं सवितारमोण्योरिति सावित्री प्राणो वै सविता प्राणमेवास्मिंस्तद्दधाति, इति ।

सवितारमिति श्रुतत्वादियमृक्सावित्री । पठनीयेति शेषः । प्राणस्य देहेन्द्रियप्रेरकत्वात्सवितृत्वम् । तत्तेन मन्त्रेणास्मिन्प्रवर्ग्ये प्राणमेव संपादयति । वा एवाश्वलस्य ऋचः शाखान्तरगता आश्वलायनेन पठिता द्रष्टव्याः ।

पञ्चमीमृचं विधत्ते--

[1]संसदिस्व महाँ असीत्येवैनं समसादय- , इति ।

अनेन मन्त्रेणैनं प्रवर्ग्याख्यं महावीरं स्वरशब्दाभिधेये संतापनस्थाने समसादयन्स्थापयेयुरित्यर्थः ।

षष्ठीमृचं विधत्ते--

[2]अञ्जन्ति यं प्रथयन्तो न विप्रा इत्यञ्जना-
नायाभिरूपा यद्यज्ञेऽभिरूपं तत्समृद्ध्यै, इति ।

अस्मिन्मन्त्रेऽञ्जन्तीति पदस्य श्रुतत्वादाज्येनाज्यमानाय महावीराख्याय पात्राय धेयमृगभिरूपा भवति ।

सप्तमीमारभ्य द्वादशपर्यन्ताः षडृचो विधत्ते--

[3]पतङ्गमक्तमसुरस्य मायया [4]यो नः सनुत्यो
अभिदासदग्ने [5]भवा नो अग्ने सुमना उपेताविति
द्वे द्वे अभिरूपे यद्यज्ञेऽभिरूपं तत्समृद्ध्यै, इति ।

पतङ्गमिति संहितायामाम्नातयोर्द्वयोः प्रतीके । यो नः सनुत्य इति द्वयोः प्रतीके । भवा नो अग्न इति द्वयोः । एतासां सर्वासामभिष्ट्यमानार्थप्रतिपादकत्वादभिरूपत्वम् । तच्चात्रैतास्वृक्षु बुद्धिमता योजनीयम् ।

त्रयोदशीमारभ्य सप्तदशीपर्यन्ताः पञ्चर्चो विधत्ते--

[6]कृणुष्व पाजः प्रसितिं न पृथ्वीमिति
पञ्च राक्षोघ्न्यो रक्षसामपहत्यै, इति ।

अष्टादशीमारभ्यैकविंशयन्ताश्चतस्र ऋचो विधत्ते--

[7]परि त्वा गिर्वणो गिरोऽधि [8]द्वयोरदधा उक्थ्यं
वचः [9]शुक्रं ते अन्यद्यजतं ते अन्यदपश्यं [10]गोपा-

---

१ ऋ. १. ३६. ९ ॥ २ ऋ. ५. ४३. ७ ॥ ३ ऋ, १०. १७७. १ ॥ ४ ऋ. ६, ५, ४ ॥ ५ ऋ. ३. १७. १ ॥ ६ ऋ. ४, ४. १ ॥ ७ ऋ. १. १०. १२॥ ८ ऋ. १. ८३. ३॥९ऋ. ६. ५८. १॥१० ऋ. १. १६४. ३१॥

मानेपद्यमानमिति चतस्र एकपातिन्यः, इति ।

एकस्य मन्त्रस्य पादः प्रतीकमेकपादः । सोऽयं यास्वृक्षु ता एकपादिन्यः । परि त्वा गिर्वण इति यत्प्रतीकं तत्संहितायां क्रमेणाऽऽम्नातानां चतसृणां प्रतीकमित्याशङ्क्येत, चतस्र इति ब्राह्मणेऽभिधानात्, एवमधि द्वयोः शुक्रं तेऽपश्यं गोपामिति त्रिषु प्रतीकेषु शङ्केदियात्, तद्व्यावृत्त्यर्थमेकपादिन्य इत्युच्यते । एकैकस्या ऋचः प्रतीकान्येतानि मिलित्वा चतस्र इति तात्पर्यार्थः ।

संख्यान्तरभ्रमव्युदासायोक्तमन्त्रगतां संख्यां प्रशंसति--

ता एकविंशतिर्भवन्ति, इति ।

तां संख्यां प्रशंसति--

एकविंशोऽयं पुरुषो दश हस्त्या अङ्गु-
लयो दश पाद्या आत्मैकविंशस्तामिम-
मात्मानमेकविंशं संस्कुरुते ॥ १९ ॥ इति ।

अयं पुरुषो मनुष्यदेहो जीवनोपेत एकविंशतिसंख्यानामवयवानां समूहरूपत्वादेकविंश इत्युच्यते । दश हस्त्या इत्यादिना तदेव स्पष्टी क्रियते । आत्मशब्देन मनुष्यदेहो जीवात्मा वाऽभिधीयते । संख्यासामान्यात्तैर्मन्त्रैरात्मानमेव संस्करोति ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऐतरेयब्राह्मण-
भाष्ये चतुर्थाध्याये द्वितीयः खण्डः ॥ २ ॥ (१९) ।

अथैकसूक्तगताः काश्चिदृचो विधत्ते--

[1]सुक्के द्रप्सस्य धमतः समस्वरन्निति नव पावमा-
न्यो नव वै प्राणाः प्राणानेवास्मिंस्तद्दधाति, इति ।

अस्मिन्सूक्के द्रप्सस्येति सूक्ते पवमानदेवताका ऋचो नवसंख्याकाः । अतः संख्यासाम्यात्तत्पाठेनास्मिन्पवमानाभिमानिनि पुरुषे नवच्छिद्रवर्तिनः प्राणानवस्थापयति ।

---

१ ऋ. ९. ७३. १ ॥

अथैकामृचं विधत्ते--

[1]अयं वेनश्चोदयत्पृश्निगर्भा इति, इति ।

एतन्मन्त्रगतस्य वेनशब्दस्य नाभिपरत्वमभिप्रेत्य प्रशंसति--

वेनोऽस्माद्धा ऊर्ध्वा अन्ये प्राणा वेनन्त्यवाञ्चोऽन्ये तस्माद्वेनः प्राणो वा अयं सन्नाभेरिति तस्मान्नाभिस्तन्नाभेर्नाभित्वं प्राणमेवास्मिंस्तद्दधाति, इति ।

शरीरमध्येऽवस्थितं नाभिं हस्तेनाभिनीय प्रदर्शयन्नयं वै वेन इत्युच्यते। तस्य नाभेर्वेनत्वं कथमिति चेदुच्यते । अस्मान्नाभेरूर्ध्वा अन्ये प्राणाश्चक्षुरादयः केचित्प्राणविशेषा वेनन्ति चरन्ति । तथा नाभेरवाञ्चोऽपानवाय्वादयः केचिद्वेनन्ति चरन्ति । तस्माद्वेनन्त्यस्मादवधिभूतान्नाभेरिति व्युत्पत्त्या वेनशब्दवाच्यो नाभिः । नाभिशब्दवाच्यत्वं कथमिति चेत्तदुच्यते । अयं नाभिः प्राणाधारत्वेन स्वयं प्राणरूपः सन्नितरानूर्ध्ववर्तिनोऽधोवर्तिनश्च प्राणानुद्दिश्य प्रत्येकं नाभेर्नाभैषीरित्येवं वदन्निव मर्यादारूपत्वेनावस्थितस्तस्मादयं देहमध्यवर्ती नाभिर्भवति । नैव भीतिं कुर्वित्यभिप्रेत्य मर्यादात्वेनावस्थानमेव नाभेर्नाभिशब्दप्रवृत्तिनिमित्तम् । तस्मादयं वेन इति मन्त्रपाठेन प्राणमेवास्मिन्प्रवर्ग्ये स्थापयति ।

अथैकत्र समाम्नातमृग्द्वयमन्यत्र समाम्नाताभेकामृचं विधाय सह प्रशंसति -

[2]पवित्रं ते विततं ब्रह्मणस्पते तपोष्पवित्रं विततं[3] दिवस्पदे वियत्पवित्रं धिषणा अतन्वतेति पूतवन्तः प्राणास्त इमेऽवाञ्चो रेतस्यो मूत्र्यः पुरीष्या इत्येतानेवास्मिंस्तद्दधाति ॥ २० ॥ इति ।

अत्र वियत्पवित्रमित्येषा शाखान्तरगता सूत्रकारेण पठिता । त्रिष्वप्येतेषु मन्त्रेषु शुद्धिवाचिनः पवित्रशब्दस्य विद्यमानत्वादेते पूतवन्तः। यज्ञपुरुषस्य प्राणस्थानीयाः पूर्वमुदाहृता मन्त्रविशेषा यज्ञपुरुषस्य नाभेरूर्ध्वभाविप्राणस्थानीयाः पवित्रं ते विततमित्याद्यास्त्रयो मन्त्रा ये सन्ति त इमे नाभेरवाञ्चोऽधोदेशप्राणस्थानीयास्तेषु रेतसे हित एकः प्राणो मूत्राय हितोऽपरः प्राणस्तयोरुभयोर्गोलकद्वारस्यैकत्वेऽपि स्वरूपेणेन्द्रियभेदात्पृथङ्निर्देशः । द्वारान्तरसंचारी पुरीषाय हितस्तृतीयः प्राण इत्युक्तानेवानेव त्रीन्प्राणान्मन्त्रत्रयपाठेनास्मिन्प्रवर्ग्ये स्थापयति ।

---

१ ऋ. १०. १२३. १ ॥ २ ऋ. ९. ८३. १ ॥ ३ ऋ. ९. ८३. २ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे ऐतरेय-
ब्राह्मणभाष्ये चतुर्थाध्याये तृतीयः खण्डः ॥३॥ [२०)।

अथ सूक्तविशेषा विधातव्याः । तत्रैकोनविंशत्यृचं सूक्तं विधत्ते--

[1]गणानां त्वा गणपतिं हवामह इति ब्राह्मणस्पत्यं
ब्रह्म वै बृहस्पतिर्ब्रह्मणैवैनं तद्भिषज्यति, इति ।

तस्मिन्सूक्ते प्रथमाया ऋचस्तृतीयपादे ज्येष्ठराजं ब्रह्मणां ब्रह्मणस्पत इति श्रूयमाणत्वादिदं सूक्तं ब्रह्मणस्पतिदेवताकम् । ब्रह्म वा इत्यादिकं पूर्ववद्व्याख्येयम् ।

तृचात्मकं सूक्तान्तरं विधत्ते--

[2]प्रथश्च यस्य सप्रथश्च नामेति घर्मतन्वः
सतनुमेवैनं तत्सरूपं करोति, इति ।

अस्मिन्सूक्ते पठिताः प्रथश्चेत्यादयस्तिस्र ऋचो घर्मतन्वः प्रवर्ग्यस्य शरीरस्थानीयास्तन्मन्त्रपाठेनैनं प्रवर्ग्यं सतनुं शरीरोपेतं करोति । सतनुमित्यस्यैव व्याख्यानं सरूपामिति । यद्वा तस्मिञ्शरीरे शोभनरूपसहितं प्रवर्ग्यं करोति ।

अस्मिन्सूक्ते प्रथमाद्वितीययोर्ऋचोर्यौ चतुर्थौ पादौ तावनूद्य प्रशंसति--

रथंतरमाजभारा वासिष्ठः । भरद्वाजो बृहदाचक्रे
अग्नेरिति बृहद्रथंतरवन्तमेवैनं तत्करोति, इति ।

सामद्वयवाचिरथंतरशब्दबृहच्छब्दयोरत्र श्रूयमाणत्वात्तत्पाठेन प्रवर्ग्यं सामद्वयोपेतं करोति ।

तृचान्तरं सूक्तात्मकं विधत्ते-

[3]अपश्यं त्वा मनसा चेकितानामिति प्रजा-

---

१ ऋ. २. २३. १ ॥ २ ऋ. १०. १८०. १ ॥ ३ ऋ. १० १८४.१ ॥

वान्प्राजापत्यः प्रजामेवास्मिंस्तद्दधाति, इति ।

एतत्सूक्तगतानां तिसृणामृचां पृथग्विनियोगमाश्वलायन आह--अपश्यं त्वेत्ये तस्याऽऽद्यया यजमानमीक्षते द्वितीयया पत्नीं तृतीययाऽऽत्मानमिति । अस्य च सूक्तस्य ऋषिः प्रजावानित्येतन्नामकः । स च प्रजापतेः पुत्रस्तदीयपाठेन प्रजां संपादयति ।

सूक्तान्तरे नवसंख्या ऋचो विधत्ते-

का राधद्धोत्राऽऽश्विना वामिति नव विच्छन्दसस्तदेतद्यज्ञस्यान्तस्त्यं विक्षुद्रमिव वा अन्तस्त्यमणीय इव च स्थवीय इव च तस्मादेता ।वेच्छन्दसो भवन्ति, इति ।

का राधदित्यस्मिन्सूक्ते विद्यमाना ऋचो नवसंख्याकास्ताश्च विविधेन च्छन्दसा युक्ताः । तच्च विविधत्वमनुक्रमणिकायामुक्तम्--' आद्या गायत्री द्वितीया ककुप्तृतीयाचतुर्थ्यौ काविराण्नष्टरूप्यौ पञ्चमी तनुशिरा षष्ठ्यक्षरैरुष्णिग्विष्टारबृहती छनिर्विराट् तिस्रो गायत्र्यः ' इति । यद्यप्येतद्द्वादशर्चं सूक्तं तथाऽपि नवैवर्चोऽत्रापेक्षिता इति नवेत्युक्तम् । तदेतत्सूक्तं प्रवर्ग्याङ्गस्य यज्ञस्यान्तस्त्यमुदरगतावयवस्वरूपम् । लोकेऽप्यन्तस्त्यं शरीरमध्यस्थावयवजातम् । विक्षुद्रमिव वै विविधत्वेन तारतम्येन स्वल्पमेव भवति । तद्यथा--किंचिन्मांसनाड्यादिकमणीय इव च, अत्यन्तं सूक्ष्ममेव भवति । अन्यच्च मांसनाड्यादिकं स्थवीय इव च, अत्यन्तं स्थूलमेव भवति । यस्मादुदरगतमवयवजातमीदृशं तस्मात्तत्स्थानीया एता ऋचो विच्छन्दसो भवन्ति ।

उत्तमलोकप्राप्तिहेतुत्वेन ता ऋचः प्रशंसति--

एताभिर्हाश्विनोः कक्षीवान्प्रियं धामोपागच्छत्स परमं लोकमजयत्, इति ।

कक्षीवानित्येतन्नामकः कश्चिदृषिः । स च का राधदित्येताभिर्ऋग्भिर्जयं कृत्वाऽश्विनोर्यत्प्रियं धाम स्थानं तत्प्राप्तवान् । ततस्ताभ्यामनुगृहीतस्ततोऽप्युत्तमं लोकं जितवान् ।

एतद्वेदनं प्रशंसति--

---

१ क. १. १२०. १ ॥

उपाश्विनोः प्रियं धाम गच्छति
जयति परमं लोकं य एवं वेद, इति ।

पञ्चर्चं सूक्तान्तरं विधत्ते—

आभात्यग्निरुषसामनीकमिति सूक्तम्, इति ।

अभिष्टवार्थं पठेदिति सर्वत्र द्रष्टव्यम् ।

प्रथमाया ऋचश्चतुर्थपादं पठित्वा तन्मुखेन सूक्तं प्रशंसति—

पीपिवांसमश्विना घर्ममच्छेत्यभि-
रूपं यद्यज्ञेऽभिरूपं तत्समृद्धम्, इति ।

हेऽश्विनौ पीपिवांसमभिप्रवृद्धं घर्ममच्छ प्रवर्ग्यमभिलक्ष्येत्येवमस्मिन्पादेऽवगम्यते । एतत्सूक्तं प्रवर्ग्यस्यानुरूपम् ।

सूक्तगतं छन्दः प्रशंसति—

तदु त्रैष्टुभं वीर्यं वै त्रिष्टुब्वीर्यमेवास्मिंस्तद्दधाति, इति ।

तदु तच्च सूक्तम् ।

अष्टर्चं सूक्तान्तरं विधत्ते—

ग्रावाणेव तदिदर्थं जरेथे इति सूक्तमक्षी
इव कर्णाविव नासेवेत्यङ्गसमाख्याऽयमेवा-
स्मिंस्तदिन्द्रियाणि दधाति, इति ।

तस्य सूक्तस्य पञ्चम्यामृचि द्वितीयपाद एवमाम्नातः—'अक्षी इव चक्षुषा यातमर्वाक्' इति । षष्ठ्यामृच्युत्तरार्धमेवमाम्नातम्—'नासेव नस्तन्वो रक्षितारा कर्णाविव सुश्रुता भूतमस्मे' (म० २ सू० ३९ ऋ० ६) एवं च सत्यङ्ग-समाख्याऽयमेवाक्षिकर्णनासादिरूपाण्यङ्गानि पुनः पुनः कथयन्नेव तस्मिन्घर्म इन्द्रियाणि स्थापयति ।

सूक्तगतं छन्दः प्रशंसति—

तदु त्रैष्टुभं वीर्यं वै त्रिष्टुब्वीर्यमेवास्मिंस्तद्दधाति, इति ।

पञ्चविंशत्यृचं सूक्तान्तरं विधत्ते—

ईळे द्यावापृथिवीपूर्वचित्तय इति सूक्तम्, इति ।

१ ऋ० ५. ७६. १ ॥ २ ऋ० २ ३९. १ ॥ ३ ऋ० १. ११२. ३ ॥

प्रथमाया ऋचो द्वितीयपादमुदाहृत्य तद्द्वारा सूक्तं प्रशंसति-

अग्निं धर्मं सुरुचं यामन्निष्टय इत्यभि-
रूपं यद्यज्ञेऽभिरूपं तत्समृद्धम्, इति ।

अग्निमित्यादिके द्वितीयपादे सुरुचं धर्ममिति शोभनदीप्तियुक्तः प्रवर्ग्यः पठितस्तस्मादिदं सूक्तमनुरूपम् ।

तत्सूक्तगतं छन्दः प्रशंसति-

तद्धु जागतं जागता वै पशवः
पशूनेवास्मिंस्तद्दधाति इति ।

पुरा कदाचित्सोममाहर्तुं द्युलोके गता जगती तमाहर्तुमशक्ता सती पशून्दीक्षां चाऽऽहृतवती तस्मात्पशवो जागताः । एतच्च कद्रूश्चेत्यनुवाके तैत्तिरीयैः समाम्नातम्-' सा पशुभिश्च दीक्षया चाऽऽगच्छत्तस्माज्जगती छन्दसां पशव्यतमा ' इति । अतस्तदीयपाठेन पशून्संपादयति ।

सूक्तगतास्वृक्षु सर्वासु विद्यमानमर्थमुपजीव्य सूक्तं प्रशंसति-

याभिरमुमावतं याभिरमुमावतमित्येता-
वतो होत्राश्विनौ कामान्ददृशतुस्तानेवा-
स्मिंस्तद्दधाति तैरेवैनं तत्समर्धयति, इति ।

अस्य सूक्तस्य प्रथमायामृचि द्वितीयार्धमेवमाम्नातम्-' याभिर्भरे कारमंशाय जिन्वथस्ताभिरू षु ऊतिभिरश्विनाऽऽगतम् ' इति । तस्यायमर्थः । हेऽश्विनौ युवा मंशाय तन्नाम्नः पुरुषस्योपकाराय भरे युद्धे कारं विजयं कृत्वा याभिरूतिभिः पालनैरंशनामकं तं पुरुषं जिन्वथः प्रीणयथस्ताभिरू षु तादृशीभिरेवोतिभिः पालनैरागतमिह कर्मणि समागच्छतमिति । द्वितीयस्यामृचि द्वितीयार्धमेवमाम्नातम्-'याभिर्धियोऽवथः कर्मन्निष्टये ताभिरू षु ऊतिभिरश्विनाऽऽगतम् ' इति । तस्यायमर्थः । हेऽश्विनाविष्टयेऽभीष्टसिद्ध्यर्थं कर्मण्यनुष्ठीयमाने लौकिके वैदिके वा सर्वस्मिन्कर्मणि याभिरूतिभिर्धियः प्राणिनां बुद्धीरवथो रक्षथस्ताभिरेवोतिभिरागच्छतमिति । एवं सर्वास्वप्यृक्ष्वर्थोऽनुसंधेयः । तमर्थं सर्वं सामान्यवाचिना सर्वनामशब्देन परामृश्य श्रुत्यर्थाभिरित्येकेन वाक्येन संगृह्णाति-याभिरूतिभिरमुमीदृशमाकं युवां रक्षितवन्तावाविति । सर्वेषामृगर्थानां संग्राहिकां दीप्तामभिप्रेत्य याभि-

रमुमावतमिति द्विः पठ्यते । तास्वृक्षु यावन्तः कामाः श्रूयन्ते तावन्तः कामा इह कर्मण्याश्विनौ दृष्टशतुः कटाक्षेणानुगृहीतवन्तौ । तत्सूक्तपाठेन तानेव सर्वान्कामानस्मिन्पवर्ग्ये यजमाने वा संपादयति । ते च कामाः समृद्धाः संपद्यन्ते ।

अन्यां कांचिदृचं विधत्ते—

अरूरुचदुषसः पृश्निरग्रिय इति रुचितवती रुचमेवास्मिंस्तद्दधाति, इति ।

अस्यामृच्यरूरुचदिति श्रुतत्वाद्रुचितमभीष्टं कान्तिर्वाऽस्यामस्तीत्यसौ रुचितवती । सा पठनीया । तस्याः पूर्वोक्तसूक्ते स्थानविशेष आश्वलायनेन दर्शितः—'प्रागुत्तमाया अरूरुचदुषसः पृश्निरग्रिय इत्यावपेतोत्तरेणार्धर्चेन पत्नीमीक्षेत' इति । तन्मन्त्रपाठेन यजमाने कान्तिं संपादयति ।

सूक्तस्यान्तिमयर्चोऽभिष्टवे पूर्वभागस्य समापनं विधत्ते—

द्युभिरक्तुभिः परिपातमस्मानित्युत्तमया परिदधाति, इति ।

तस्या ऋचोऽवशिष्टं पादत्रयमनूद्य कृत्स्नं मन्त्रतात्पर्यं दर्शयति—

अरिष्टेभिरश्विना सौभगेभिः । तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौरित्येतैरेवैनं तत्कामैः समर्धयति, इति ।

तस्या ऋचोऽयमर्थः । हेऽश्विनौ द्युभिर्दीप्तिभिर्द्युलोकोचितभोगैर्वाऽक्तुभिरञ्जनसाधनद्रव्यैराज्यतैलादिभिररिष्टेभिर्हिंसापरिहारैः सौभगेभिः सर्वभोगसंपत्तिलक्षणैः सौभाग्यैश्चास्मान्पातं रक्षतम् । तत्तथा सत्यनन्तरं नोऽस्मान्मित्रावरुणादितिसमुद्रपृथिवीद्युदेवताः सर्वा अपि मामहन्तामतिशयेन पूजयन्त्विति । तन्मन्त्रपाठेनैनं यजमानमेतैरेव कामैर्द्युभिरक्तुभिरित्यादिशब्दोक्तैः फलैः समृद्धं करोति ।

अभिष्टवस्य पूर्वभागमुपसंहरति—

इति नु पूर्वं पटलम् ॥ २१ ॥ इति ।

---

१. ऋ. ९. ८३. ३ ॥ २ ऋ. १. ११३. २५ ॥

ब्रह्मज्ञानमित्यारभ्य पृथिवी उत द्यौरित्यन्तेनोक्तप्रकारेणाभिष्टवस्य पूर्वो भागो वर्णितः । अत्र भागद्वयकल्पनमेकैकस्मिन्भागे प्रथमोत्तमयोश्चोरावृत्त्यर्थम् ।

अत एवोक्तम्-

" आद्यान्त्यावृत्तिसिद्ध्यर्थं पटलद्वितयं कृतम् ।
अन्यथाऽभिष्टवस्यैक्यावृत्तिर्वं तत्रैव वै भवेत् " इति ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऐतरेय-ब्राह्मणभाष्ये चतुर्थाध्याये चतुर्थः खण्डः ॥ ४ ॥ (२१)

पटलान्तरं प्रतिजानीते—

अथोत्तरम्, इति ।

पटलमुच्यत इति शेषः । पटलशब्दः समूहवाची । समूहः पटलं न नेत्यभिधानकारैरुक्तत्वात् । उत्तरभागस्थो मन्त्रसमूहः कथ्यत इत्यर्थः ।

तत्रैकविंशतिसंख्याका ऋचस्तत्तत्प्रतीकग्रहणेन विधत्ते—

उ॒ द्व॒ये सुदुघां धेनुमेतां हिं कृण्वती वसुपत्नी वर्॒नाभिं त्वा देव सवितः समीवत्सं न मातृभिः संवत्स इव मातृभिर्यस्ते स्तनः शशयो यो मयोभूर्गौरमीमेदनुवत्सं मिषन्तं नमसेदुपसीदत संजानाना उपसीदन्नभिद्यादशोभिर्विवस्वतो दुहन्तिं सप्तैकां समिद्धो अग्निराश्विना सामे॒ो अग्निर्वृषणा रतिर्दिवस्तदु प्रयक्षतम-

---

१ ऋ. १. १६४. २६, २७ ॥ २ ऋ. १. २४, ३ ॥ ३ ऋ. ९. १०४. २ ॥ ४ ऋ. ९. १०५. २ ॥ ५ ऋ, १, १६४, ४९ ॥ ६ ऋ, १. १६४, २८ ॥ ७ ऋ. ९. ११, ६ ॥ ८ ऋ, १, ७२, ५ ॥ ९ ऋ. ८ ७२, ८ ॥ १० ऋ० ८, ७२, ७ ॥ ११ ऋ. १. ६२. ६ ॥

मस्य कर्माऽऽत्मन्वन्नभो दुह्यते घृतं पय उत्तिष्ठ ब्रह्मणस्पतेऽधुक्षत्पिप्युषीमिषमुपद्रव पयसा गोधुगोषमा सुते सिञ्चत श्रियमित्याज इति समुत्य महतीरप इत्येकविंशतिरभिरूपा यद्यज्ञेऽभिरूपं तत्समृद्धम्, इति ।

विहितास्वुक्षु, उपह्वय इति प्रथमा । हिं कृण्वतीति द्वितीया । अभि त्वेति तृतीया । समवित्सामिति चतुर्थी । संवत्स इवेति पञ्चमी । यस्ते स्तन इति षष्ठी । गौरमीमेदिति सप्तमी । नमसेदित्यष्टमी । संजानाना इति नवमी । आदशभिरिति दशमी । दुहन्ति सप्तैकामित्येकादशी । समिद्धो अग्निरश्विनेति द्वादशी । समिद्धो अग्निर्वृषणा रतिर्दिव इति त्रयोदशी । एतदुभयं शाखान्तरगतमाश्वलायनेन पठितम् । तदु प्रयक्षतमिति चतुर्दशी । आत्मन्वन्निति पञ्चदशी । उत्तिष्ठेति षोडशी । तस्या विनियोगमाश्वलायन आह—उत्तिष्ठ ब्रह्मणस्पत इत्येतामुक्त्वाऽवतिष्ठत इति । अधुक्षदिति सप्तदशी । तद्विनियोगमाह—दुग्धायामधुक्षदिति । उपद्रवेत्यष्टादशी । तद्विनियोगं चाऽऽह—आह्रियमाण उपद्रवेति । सेयं शाखान्तरगतत्वादाश्वलायनेन पठिता । आ सुत इत्येकोनविंशी । आनूनमिति विंशी । अनयोर्व्यत्ययेन प्रयोगमाह—आसिच्यमान आनूनमश्विनोर्ऋषिरिति गव्य आ सुते सिञ्चत श्रियमित्याज इति । समुत्य इत्येकविंशी । तद्विनियोगं चाऽऽह—आसिक्तयोः समुत्य इति । सेयमृचामेकविंशतिधर्मदुहो धेनोर्दोहनस्यानुरूपा । तास्वृक्षु दोहनोचितानां दृश्यमानत्वात् ।

अथ षण्णामृचां प्रतीकानि क्रमेणाऽऽदाय तद्विनियोगं दर्शयति—

उदुष्य देवः सविता हिरण्ययेत्यनूत्तिष्ठति प्रैतु ब्रह्मणस्पतिरित्यनुप्रैति गन्धर्व इत्था पदमस्य

१ ऋ. ९. ७४. ४ ॥ २ ऋ. १. ४०. १ ॥ ३ ऋ, ८. ७२. १६ ॥ ४ ऋ. ८, ७२, १३ ॥ ५ ऋ. ८. ९. ७ ॥ ६ ऋ. ८, ७. २२ ॥ ७ ऋ. ७. ६८ १ ॥ ८ ऋ. १. ४०. ३ ॥ ९ ऋ. ९. ८३. ४ ॥

रक्षतीति खरमवेक्षते नाके सुपर्णमुपयत्पतन्त-
मित्युपविशति तप्तो वां घर्मो न क्षतिः स्वहो-
तोभा पिबतमश्विनेति पूर्वाह्णे यजति, इति ।

महावीरमादायोत्तिष्ठत्स्वन्येषु होतोदुष्य देव इत्यनेन मन्त्रेण तानन्नूत्तिष्ठेत् । तेषु गच्छत्सु मन्त्रेणानुगच्छेत् । खरः प्रवृज्जनस्थानम् । तप्तो वामित्येषा शाखान्तरगतत्वात्सूत्रकारेण पठिता उभा पिबतमिति स्वशाखागता ताभ्यामुभाभ्यां पूर्वाह्णे यजति । तदुभयं याज्यारूपेण पाठेन पठेत् । प्रवर्ग्यस्य कालद्वयेऽप्यनुष्ठेयत्वापूर्वाह्ण इति विशेष्यते ।

विनियोगसहितं मन्त्रान्तरं विधत्ते—

अग्ने वीहीत्यनुवषट्करोति स्विष्टकृद्वाजनम्, इति ।

पूर्वोक्तयोर्याज्ययोः पाठान्ते वौषडिति यदुच्चारणं सोऽयं प्रथमो वषट्कारः । तत ऊर्ध्वमग्ने वीहीत्युच्चार्य वौषडिति यत्पठनं सोऽयमनुवषट्कारः । एतं मन्त्रं होता पठेत् । हेऽग्ने वीहि खाद भक्षयेत्यर्थः । घर्मस्य यजेत्यध्वर्युणा प्रेषितो होता पूर्वोक्तं याज्याद्वयं सवषट्कारं यदा पठति तदानीमध्वर्युरश्विना घर्मं पातामिति मन्त्रेण जुहोति । पुनरप्यग्ने वीहीति होत्रा पठिते सत्यध्वर्युः स्वाहेन्द्रावडिति जुहोति । तदेतत्सर्वमापस्तम्ब आह—' आश्राव्य प्रत्याश्रावितेसंप्रेष्यति घर्मस्य यजेत्यश्विना घर्मं पातामिति वषट्कृते जुहोति । स्वाहेन्द्रावडित्यनुवषट्कृते ' इति । यदेतदनुवषट्कारे यजनं तदेतत्स्विष्टकृद्वाजनं स्विष्टकृत्स्थानीयमित्यर्थः ।

यथा पूर्वाह्णे याज्यापाठस्तथाऽपराह्णकालानुष्ठानेऽपि विधत्ते—

यदुस्रियास्वाहुतं घृतं पयोऽस्य पिब-
तमाश्विनेत्यपराह्णे यजत्यग्ने वीहीत्य-
नुवषट्करोति स्विष्टकृद्वाजनम्, इति ।

यदुस्रियास्वाहुवमित्येषा शाखान्तरगतत्वादाश्वलायनेन पठिता । अस्य पिबतमिति स्वशाखागता । अन्यत्सर्वं पूर्ववत् ।

---

१ ऋ. १०. १२३. ६ ॥ २ ऋ. १. ४७. १५ ॥ ३ ऋ. ८. ५. १४ ॥

अत्र मुख्यस्विष्टकृद्रहितत्वात्तल्लोपमाशङ्क्य परिहरति—

त्रयाणां ह वै हविषां स्विष्टकृतेन समवद्यन्ति सोमस्य धर्मस्य वाजिनस्येति स यदनुव-षट्करोत्यग्नेरेव स्विष्टकृतोऽनन्तरित्यै, इति ।

सोमो वल्लीरसः । धर्मः प्रवर्ग्यहविः । वाजिनमाभिक्षानुनिष्पादि नीरम् । एतेषां स्विष्टकृदर्थमवदानं न कुर्युः । न चैतावता तल्लोपः । स होताऽनुवषट्करोतीति यदस्ति तदेतत्स्विष्टकृन्नामकस्याग्नेरनन्तरित्यै । अन्तरायो लोपस्तन्निवृत्त्यर्थं भवति ।

अथ ब्रह्मणः शाखान्तरप्रसिद्धेन मन्त्रेण जपं विधत्ते—

विश्वा आशा दक्षिणसादिति ब्रह्मा जपति, इति ।

इयमृगाश्वलायनेन पठिता ।

प्रासङ्गिकं ब्रह्मजपं विधाय होमादूर्ध्वं होत्रा पठनीया ऋचः सप्त विधत्ते—

स्वाहाकृतः शुचिर्देवेषु धर्मः समुद्रादूर्मुदियति वेनो द्रप्सः समुद्रमभि यज्जिगाति । सखे सखायमभ्याववृत्स्वोर्ध्व ऊ षु ण ऊतय ऊर्ध्वो नः पाह्यंहसस्तं धेमित्था नमस्विन इत्यभिरूपा यद्यज्ञेऽभिरूपं तत्समृद्धम्, इति ।

स्वाहाकृत इत्येषा प्रथमा । सा च शाखान्तरगतत्वादाश्वलायनेन पठिता । समुद्रादूर्मिमिति द्वितीया । द्रप्सः समुद्रमिति तृतीया । सखे सखायमिति चतुर्थी । ऊर्ध्व ऊ षु ण इति पञ्चमी । ऊर्ध्वो नः पाहीति षष्ठी । तं धेमित्थेति सप्तमी । धर्मप्रकाशकत्वादेता अभिरूपाः ।

होतुरेकयर्चां प्रवर्ग्यहविःशेषभक्षणप्रतीक्षां विधत्ते—

---

१ ऋ. १०. १२३. २ ॥ २ ऋ. १०, १२३, ८ ॥ ३ ऋ, ४।१. ३. ॥ ४ ऋ. १. ३६. १३ ॥ ५ ऋ, १, ३६, १४॥ ६ ऋ. १ ३६. ७॥

[1]पावकशोचे तव हि क्षयं परीति भक्षमाकाङ्क्षते, इति ।

समन्वकं भक्षणं विधत्ते—

॥

हुतं हविर्मधु हविरिन्द्रतमेऽग्नावश्याम ते देव घर्म ।
मधुमतः पितुमतो वाजवतोऽङ्गिरस्वतो नमस्ते
अस्तु मा मा हिंसीरिति घर्मस्य भक्षयति, इति ।

अतिशयेनायमैश्वर्यवानिन्द्रतमस्तादृशेऽग्नौ प्रवर्ग्याख्यं हविर्हुतं तच्च मधु माधुर्योपेतं हे घर्म प्रवर्ग्य देवरूप देव ते त्वदीयं हविःशेषमश्याम भक्षयेम । कीदृशस्य ते मधुमतो माधुर्योपेतस्य पितुमतोऽन्नवतोऽन्नसाधनस्य वाजवतो गतिमतः स्वर्गप्राप्तिसाधनस्य । अङ्गिरस्वतः, अङ्गिरोभिरनुष्ठानकाले भक्षितत्वेन तद्युक्तस्य । ईदृशाय ते तुभ्यं नमोऽस्तु । मां भक्षयन्तं मा हिंसीरित्यनेन मन्त्रेण घर्मस्य शेषं भक्षयेत् । अयं मन्त्रोऽन्येषामपि भक्षयितॄणां साधारणोऽत एव तैत्तिरीयैरप्यान्नातः ।

अथ होतुर्मन्त्रकृत्यं विधत्ते—

[2]श्येनो न योनिं सदनं धिया कृतमा यस्मिन्त्सत्ता वासवा इति संसाद्यमानायान्वाह, इति ।

श्येनो न योनिमिति पूर्वा । आ यस्मिन्सत्तेत्यपरा । सेयं शाखान्तरगतत्वादाश्वलायनेन पठिता । यदा प्रवर्ग्यपात्राणि संसाद्यन्ते तदा होता मन्त्रद्वयमिदमनुब्रूयात् ।

बहुषु दिनेषु पूर्वाह्णापराह्णयोः प्रवर्ग्याख्यं कर्मानुष्ठीयते । तत्रोत्तमदिनेऽपराह्णकालीने प्रवर्ग्याख्ये कांचिदृचमधिकां विधत्ते—

[3]हविर्हविष्मो महि सद्म दैव्यमिति
यदहरुत्सादयिष्यन्तो भवन्ति, इति ।

यदहर्यस्मिन्नहन्युत्सादयिष्यन्तः प्रवर्ग्यमुद्वासयितुमुद्युक्ता भवन्ति तस्मिन्नहनि हविर्हविष्म इत्येतामृचमधिकामुपोत्तमरूपामावपेत ।

अथ कयाचिदृचाऽभिष्टवस्य समाप्तिं विधत्ते—

---

१ ऋ. ३. २. ६ ॥ २ ऋ. १०. ७१. ६ ॥ ३ ऋ. १. ८३. ५ ॥

सूयवसाद्भगवती हि भूया इत्युत्तमया परिदध्यादि, इति ।

अन्तिमात्प्राचीनेषु प्रवर्ग्येषु पूर्वोक्तामधिकामप्यक्षिप्यैवानया परिदध्यात् । अन्तिमे तु तां प्रक्षिप्य पश्चादनया परिदध्यात् । तदाहाऽश्वलायनः—' सूयवसाद्भगवती हि भूया इति परिदध्यादुत्तमे प्रागुत्तमाया हविर्हविष्मो महि सत्रं दैव्यमित्यागपेत ' इति ।

अथ पूर्वोक्तस्य प्रवर्ग्यकर्मणः प्रशंसार्थं मिथुनव्यापाराकारेण रूपकं दर्शयति—

तदेतद्देवमिथुनं यद्घर्मः स यो ऽधर्मस्तच्छिश्नं यौ शफौ तौ शफौ योपयमनी ते श्रोणिकपाले यत्पयस्तद्रेतस्तदिदममौ देवयोन्यां प्रजनने रेतः सिच्यतेऽग्निर्वै देवयोनिः सोऽग्नेर्देवयोन्या आहुतिभ्यः संभवति, इति ।

यद्घर्मः प्रवर्ग्याख्यं यत्कर्मास्ति तदेतद्देवमिथुनं देवसंबन्धिमिथुनव्यापारः । तत्कथमिति चेदुच्यते । स यो धर्मः प्रवर्ग्यहविराश्रयभूतो महावीराख्यो मृन्मयपात्रविशेषो योऽस्तावस्ति तच्छिश्नं प्रजननेन्द्रियरूपम् । तस्य महावीरस्य हस्ताभ्यां ग्रहीतुमशक्यत्वात्तद्ग्रहणसमर्थोदुम्बरकाष्ठनिर्मितौ शफौ शफनामानौ विद्येते तौ प्रजननेन्द्रियस्य पार्श्ववर्तिनौ शफाविव संदृश्येते(?) चोदुम्बरकाष्ठाभ्यां शफनामकाभ्यां महावीरस्य मध्यमभागे धृतत्वात् । तस्याधस्तादाधारार्थमुदुम्बरकाष्ठनिर्मितोपयमनीयशब्दवाच्या दर्वी या विद्यते सेयं शरीरसंबन्धिनी ते श्रोणिकपाले श्रोणिद्वयमध्यगतमास्थिद्वयम् । उपयमन्या एकत्वेऽप्यधस्तान्महावीरस्य कदाचिद्दक्षिणभागे कदाचिद्वामभागे तद्धारणात्कपालद्वयरूपत्वम् । महावीरगते तप्त आज्ये प्रक्षेप्तव्यं यत्पयस्तद्रेतःस्वरूपम् । तदिदं रेतोरूपमाज्यमिश्रं पयोऽग्नौ देवयोनिरूपे प्रजनन उत्पत्तिस्थाने रेतः सिच्यते रेतोरूपेण प्रक्षिप्यते । अग्नेर्देवयोनित्वप्रसिद्ध्यर्थो वैशब्दः। अग्नेः कर्मण्यनुष्ठाय (?) देवरूपेण जायमानत्वात्सा प्रसिद्धिर्द्रष्टव्या । सैव प्रसिद्धिः सोऽग्नेरित्यादिना स्पष्टीक्रियते । स यजमानो देवयोनिरूपादग्नेरनुष्ठिताभ्य आहुतिभ्यश्च देवतारूपः संभवत्युत्पद्यते ।

उक्तार्थवेदनं तद्वेदनपूर्वकमनुष्ठानं च प्रशंसति—

ऋङ्मयो यजुर्मयः साममयो वेदमयो ब्रह्ममयोऽमृतमयः संभूय देवता अप्येति य एवं वेद यश्चैवं विद्वानेतेन यज्ञक्रतुना यजते ॥२२॥ इति ।

वेदशब्देनाथर्ववेदः सर्ववेदसमष्टियुक्तिर्वोच्यते । ब्रह्मशब्देन हिरण्यगर्भः । अमृतशब्देन परमात्मा । ता एकैकदेवताः सर्वाः संभूयैकीकृत्य समष्टिरूपमप्येति प्राप्नोति । वेदनमात्रेण शनैस्त्वप्राप्तिर्वेदनपूर्वकानुष्ठानेन तु सहसेति विशेषो द्रष्टव्यः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऐतरेयब्राह्मणभाष्ये चतुर्थाध्याये पञ्चमः खण्डः ॥ ॥ [२२] ।

प्रवर्ग्याख्यं कर्म परिसमाप्योपसदाख्यं कर्म वक्तुमाख्यायिकामाह-

देवासुरा वा एषु लोकेषु समयतन्त ते वा असुरा इम नेव लोकान्पुरोऽकुर्वत यथौजीयांसो बलीयांस एवं ते वा अयस्मयीमेवेमामकुर्त रजतामन्तरिक्षं हरिणीं दिवं ते तथेमाँल्लोकान्पुरोऽकुर्वत ते देवा अब्रुवन्पुरो वा इमेऽसुरा इमाँल्लोकानकृत पुर इमाल्लँोकान्प्रतिकरवामह इति तथेति ते सद एवास्याः प्रत्यकुर्वताऽऽग्नीध्रमन्तरिक्षाद्धविर्धाने दिवस्ते तथेमाल्लँोकान्पुरः प्रत्यकुर्वत, इति ।

देवाश्चासुराश्च लोकत्रयविषये समयतन्त परस्परं युद्धं कृतवन्तः । तदानीमसुरा इमानेव भूरादींस्त्रीँल्लोकान्पुरोऽकुर्वत प्राकारपरिवेष्टितानि नगराणि कृतवन्तः । यथा लोके महान्तो राजानोऽभ्यधिकेनौजसा शरीरशक्त्या संपन्ना अभ्यधिकेन सैन्यरूपेण बलेन च संपन्नाः प्रौढानि दुर्गाणि कुर्वन्ति, एवमेते कृतवन्तः । तत्रैमां भूमिमयस्मयीं लोहप्राकारयुक्तामकुर्वत । अन्तरिक्षं लोकं च रजतप्राकारवेष्टितां पुरीमकुर्वत । द्युलोकं हरिणीं हिरण्मयीं सुवर्णप्राकारवेष्टितां पुरीमकुर्वत । वयेत्युक्तनगरनिर्माणकृतस्योपसंहारः । तमिममर्थं सर्वं तैत्तिरीयाः

संक्षिप्याऽऽमनन्ति—' तेषामसुराणां तिस्रः पुर आसन्नयस्मय्यवमाऽथ रजताऽथ हरिणी ' इति । ततस्ते देवा विचारयन्तः परस्परमिदमब्रुवन् । असुरा इमे भूरादीनिमाल्लोकान्पुरो वै स्वकीयनगराण्येव कृतवन्तः । अतो वयमपीमान्भूरादीँल्लोकान्पुरोऽस्मदीयनगराणि प्रतिकरवामहै, असुराणां प्रतिकूलानि संपादयाम इत्येवं विचारं परस्परमङ्गीकृत्य त्रिषु लोकेष्वसुराः क्वचिद्देशविशेषे यथा स्वकीयानि नगराणि कृतवन्तस्तथा देवा अस्याः पृथिव्याः सकाशात्सद एव प्रत्यकुर्वत । लौकिकवेद्यां प्राचीनवंशात्पूर्वभाविसदोनामकमण्डपमेवासुरप्रतिकूलमकुर्वत । अन्तरिक्षलोकादाग्नीध्रनामकं विष्ण्यमकुर्वत । द्युलोकाद्धविर्धाननामके द्वे शकटे अकुर्वत । ते तथेत्यादिरुक्तार्थोपसंहारः । असुरनिर्मितपुरत्रयप्रतिकूलं सदआग्नीध्रहविर्धानरूपत्रयं कृतवन्तः । असुरैर्लोकत्रये मौढासु त्रिषु दुर्गरूपासु पुरीषु निर्मितासु देवाश्च स्वरक्षार्थं सदःप्रभृतीनि त्रीणि दुर्गाणि कृत्वा विजयं प्राप्ताः ।

तं विजयप्रकारं दर्शयति—

> ते देवा अब्रुवन्नुपसद उपायामोपसदा वै महापुरं जयन्तीति तथेति ते यामेव प्रथमामुपसदमुपायंस्तयैवैनानस्माल्लोकादनुदन्त यां द्वितीयां तयाऽन्तरिक्षाद्यां तृतीयां तया दिवस्तांस्तेभ्यो लोकेभ्योऽनुदन्त, इति ।

विजयार्थिनस्ते देवाः परस्परमिदमब्रुवन् । उपसदाख्यान्होमानुपायामानुतिष्ठाम । लोकेषूपसदो वै परकीयदुर्गसमीपावस्थानेन दुर्गावरोधरूपेणैव महत्या सेनया दुर्गवेष्टनेन सर्वे राजानो महतीं दुर्गरूपां पुरं जयन्ति । अतो वयमप्युपसदनहेतुभूतान्होमान्करवामेति विचार्य तिस्र उपसदो हुत्वा लोकत्रयनिर्मिताभ्यो दुर्गरूपाभ्यः पुरीभ्योऽसुरान्निःसारितवन्तः । तत्र या ते अग्ने याशया तनूरित्यनेन मन्त्रेण साध्योपसत्प्रथमदिनेऽनुष्ठितत्वात्प्रथमा । या ते अग्नेरजाशया तनूरित्यनेन मन्त्रेण साध्या द्वितीयदिनेऽनुष्ठेयत्वाद्द्वितीया । या ते अग्ने हराशयेति मन्त्रेण साध्या तृतीयदिनेऽनुष्ठेयत्वात्तृतीया । युद्धेन ताः पुरीर्जेतुमशक्ता देवा उपसद्भिर्जितवन्तः । तथा च शाखान्तरे श्रूयते—'ते देवा जेतुं नाशक्नुवन्तुपसदैवाजिगीषन्' इति । लोकत्रयान्निःसारिताश्चासुरा यदा वसन्ताद्यृतुदेवाञ्शरणं प्राप्तास्तदा तदानीमेवैकैकस्मिन्दिने द्विर्द्विरनुष्ठेयाभिः षड्भिस्तानसुरान्वसन्ताद्यृतुदेवताभ्यो निःसारितवन्तः ।

तस्मिन्नर्थे दर्शयति--

ते वा एभ्यो लोकेभ्यो नुत्ता असुरा ऋतूनश्रयन्त ते देवा अब्रुवन्नुपसद एवोपायामेति तथेति त इमास्तिस्रः सतीरुपसदो द्विर्द्विरेकैकामुपायंस्ताः षट् समपद्यन्त षड् वा ऋतवस्तान्वा ऋतवस्तान्वा ऋतुभ्योऽनुदन्त, इति ।

ततो मासाञ्शरजं प्राप्यावस्थितानासुराणां षड्दिनेष्वनुष्ठिताभिरावृत्ताभिर्द्वादशोपसद्भिर्निःसारणं कृतं तदिदं दर्शयति--

ते वा ऋतुभ्यो नुत्ता असुरा मासानश्रयन्त ते देवा अब्रुवन्नुपसद एवोपायामेति तथेति त इमाः षट् सतीरुपसदो द्विर्द्विरेकैकामुपायंस्ता द्वादश समपद्यन्त द्वादश वै मासास्तान्वै मासेभ्योऽनुदन्त, इति ।

मन्त्रत्रयेण दिनत्रयेऽनुष्ठेयास्तिस्रः पुनरप्यावृत्त्याऽन्यास्मिन्दिनत्रयेऽनुष्ठिताः षड् भवन्ति । एकैकस्मिन्दिने द्विरनुष्ठिता द्वादश संपद्यन्ते ।

अनेनैव न्यायेन द्वादशसु दिनेष्वनुष्ठिताभिश्चतुर्विंशतिभिरुपसद्भिरर्धमासदेवताभ्यो निःसारितवन्त इत्येतद्दर्शयति--

ते वै मासेभ्यो नुत्ता असुरा अर्धमासानश्रयन्त ते देवा अब्रुवन्नुपसद एवोपायामेति तथेति त इमा द्वादश सतीरुपसदो द्विर्द्विरेकैकामुपायंस्ताश्चतुर्विंशतिः समपद्यन्त चतुर्विंशतिः समपद्यन्त चतुर्विंशतिर्वा अर्धमासास्तान्वा अर्धमासेभ्योऽनुदन्त, इति ।

ततोऽहोरात्रदेवौ शरणं गतानामसुराणां कालविशेषद्वयानुष्ठानेन निःसारणं दर्शयति--

ते वा अर्धमासेभ्यो नुत्ता असुरा अहोरात्रेऽश्रयन्त ते देवा अब्रुवन्नुपसदावेवोपायामेति

**तथेति ते यामेव पूर्वाह्ण उपसदमुपायंस्तयै-
वैनानह्नोऽनुदन्त यामपराह्णे तया रात्रेस्तांस्त-
थोभाभ्यामहोरात्राभ्यामन्तरायन्, इति ।**

अन्तरायन्नन्तरितान्कृतवन्तो निःसारितवन्त इत्यर्थः ।

एकैकस्मिन्दिन एकैकस्या उपसदो द्विरनुष्ठानाय कालद्वयविशेषं विधत्ते—

**तस्मात्सुपूर्वाह्ण एव पूर्वयोपसदा प्रचरितव्यं
स्वपराह्णेऽपरया तावन्तमेव तद्द्विषते लोकं
परिशिनष्टि ॥ २३ ॥ इति ।**

यस्मात्पूर्वाह्णापराह्णौ कालविशेषावहोरात्राभ्यां शत्रूणां निःसारणे हेतू तस्मात्तस्मिन्नेव कालद्वयेऽनुष्ठातव्यम् । एवं सति यावानहोरात्रयोः संधिकालस्तावन्तमेव द्विषते द्वेषिणे लोकं स्थानविशेषं परिशिनष्टि । इतरस्मात्कालान्निःसारितत्वेन संध्याकाल एवासुराणां परिशिष्येत । अत्रैकैकस्मिन्दिने द्विर्द्विरनुष्ठेया उपसदो ज्योतिष्टोमे त्रिषु दिनेष्वनुष्ठेयाः । अग्निचयने षट्सु दिनेषु । अहीनसत्रयोर्द्वादशदिनेषु । तथा च तैत्तिरीयैराम्नातम्—' तिस्र एव साह्नस्योपसदो द्वादशाहीनस्य यज्ञस्य सवीर्याय त्वा ' इति । तथा ' षडुपसदोऽग्नेश्चित्यस्य भवन्ति ' इति श्रुत्यन्तरं द्रष्टव्यम् । आश्वलायनस्त्वेवमाह—' एकाहानां तिस्रः षड् वाऽहीनानां द्वादश चतुर्विंशतिः संवत्सर इति सत्राणाम् ' इति । गवामयनाख्ये संवत्सर इत्यर्थः ।

अथ मीमांसा । पञ्चमाध्यायस्य तृतीयपादे चिन्तितम्—

" आवृत्तिरुपसत्स्वेषा संघस्यैकैकशोऽथवा ।
त्रिरभ्यायं पठेत्यादाविव स्यात्समुदायगा ॥
प्रथमा मध्यमाऽन्त्येति प्राकृतक्रमसिद्धये ।
एकैकस्या द्विरभ्यासे षट्संख्याऽपि प्रसिध्यति " ॥

अग्नौ श्रूयते—षडुपसद इति । तत्र चोदकप्राप्तानां तिसृणामुपसदां पूर्वन्यायेनाऽऽवृत्त्या षट्संख्या संपादनीया । सा चाऽऽवृत्तिर्दण्डकलितवत्समुदायस्य युक्ता । यथा दण्डेन भूप्रदेशं संमिमानः पुरुष आमूलाग्रं कृत्स्नं दण्डं पुनः पुनः पातयति न तु दण्डस्य प्रत्यवयवं पृथगावृत्तिं करोति । यथा वा त्रिवारं रुद्राध्यायं जपतीत्यत्र कृत्स्न एवाध्याय आवर्त्यते न त्वध्यायैकदेशः । एकैकोऽनुवाकः पृथगेव त्रिः पठ्यते । तथा तिसृणामुपसदां समुदाय आवर्तनीय इति चेन्नैवम् ।

28725

प्राकृतक्रमबाधप्रसङ्गात् । प्रकृतौ हि दीक्षानन्तरभाविनि दिने होतव्या प्रथमोपसत् । तत ऊर्ध्वदिने द्वितीया । ततोऽप्यूर्ध्वदिने तृतीया । ता एताः सकृदनुष्ठाय पुनरुपरितनदिनेऽनुष्ठीयमानायां प्रथमात्वमयैति चतुर्थीत्वमायाति । तस्मात्प्राकृतक्रमसिद्धये प्रथमां दिनद्वयेऽभ्यस्य ततो द्वितीयां द्विरभ्यस्येदित्येवं स्वस्थानावृद्ध्या तासामावृत्तिः कार्या । न चाध्यायदृष्टान्तो युक्तः । अनुवाकसमुदायस्यैवाध्यायत्वादध्यायस्यैव चाऽऽवृत्तिविधानात् । न त्विह समुदायस्योपसत्त्वमस्ति । तस्मात्प्रत्येकमुपसदावर्तनीया ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऐतरेयब्राह्मणभाष्ये चतुर्थाध्याये षष्ठः खण्डः ॥ ६ ॥ (२३)।

अथोपसदः प्रशंसति—

जितयो वै नामैता यदुपसदोऽसपत्नां वा एताभिर्देवा विजितिं व्यजयन्त, इति ।

उपसदो याः सन्त्येता जितयो वै नाम । जयहेतुत्वाज्जितय इत्येवं नाम प्रतिपद्यन्ते । जयद्वेतुत्वमेवासपत्नामित्यादिना स्पष्टी क्रियते । देवा एताभिरुपसद्भिरसपत्नां वैरिरहितामेव विजितिं विशिष्टं जयं व्यजयन्त विशेषेण प्राप्तवन्तः ।

वेदनं प्रशंसति—

असपत्नां विजितिं विजयते य एवं वेद, इति ।

सामान्याकारेण वेदनं प्रशस्य पुनः पूर्वोक्तार्थवादानुक्रमेण विशेषाकारेण प्रशंसति—

यां देवा एषु लोकेषु यामृतुषु यां मासेषु यामर्धमासेषु यामहोरात्रयोर्विजितिं व्यजयन्त तां विजितिं विजयते य एवं वेद, इति ।

अथ तानूनपात्रस्य नाम निर्वक्तुमाख्यायिकामाह—

ते देवा अबिभयुरस्माकं विप्रेमाणमन्विदमसुरा आभविष्यन्तीति ते व्युत्क्रम्यामन्त्रयन्ताग्निर्वसुभिरुदक्रामदिन्द्रो रुद्रैर्वरुण आदित्यैर्बृहस्पतिर्विश्वैर्देवैः, इति ।

असुरैः सह युद्धार्थमुद्यता देवाः स्वसेनाया मध्ये परस्परमेकैकस्य सेनानीत्वलक्षणं ज्यैष्ठ्यमभ्युपगच्छन्तः परस्परविरोधिनो भूत्वाऽपसृत्याभिभयुर्मनसि भीतिं प्राप्ताः । केनाभिप्रायेणेति तदुच्यते । अस्माकं विप्रेमाणमनु परस्परप्रेमराहित्यमनुवीक्ष्यासुरा इदमस्मदीयं राज्यमाभविष्यन्ति सर्वतः प्राप्स्यन्तीति । ततस्ते देवा व्युत्क्रम्य परस्परविभागेन तस्मादेशादपसृत्य स्वसंबन्धिभिर्मन्त्रिभिः सहामन्त्रयन्त पर्यालोचनं कृतवन्तः । ततस्तत्राग्निर्देवो वसुभिरष्टमन्त्रिभिः सहितः पृथगुदक्रामत् । एवमिन्द्रो रुद्रैः सह वरुण आदित्यैः सह बृहस्पतिर्विश्वैर्देवैः सह पृथगुदक्रामत् । अत्र चतुर्विधैव विभाग उक्तः । शाखान्तरे तु पञ्चधा । तथा चाऽऽम्नायते—'देवासुराः संयत्ता आसंस्ते देवा मिथो विप्रिया आसंस्तेऽन्योन्यस्मै ज्यैष्ठ्यायाऽऽतिष्ठमानाः पञ्चधा व्युक्रामत् । अग्निर्वसुभिः सोमो रुद्रैरिन्द्रो मरुद्भिर्वरुण आदित्यैर्बृहस्पतिर्विश्वैर्देवैः ' इति ।

एवं परस्परं विभज्यावस्थितानां देवसमूहानां पर्यालोचनपूर्वकं कृत्यं दर्शयति—

> ते तथा व्युत्क्रम्यामन्त्रयन्त तेऽब्रुवन्हन्त याएव न इमाः प्रियतमास्तन्वस्ता अस्य वरुणस्य राज्ञो गृहे संनिदधामहै ताभिरेव नः स न संगच्छातै यो न एतदतिक्रामाद्य आलुलोभयिषादिति तथेति ते वरुणस्य राज्ञो गृहे तनूः संन्यदधत, इति ।

स्वकार्यहानिनिमित्तदुःखपरिहारोपायदर्शननिमित्तहर्षद्योतनार्थो हन्तशब्दः । अस्माकमत्यन्तं प्रिया याः पुत्रकलत्रादिरूपास्तन्वः सन्ति ताः सर्वा अस्य वरुणस्य राज्ञो गृहे संनिदधामहै बन्दीरूपेण स्थापयामः । तथा सति नोऽस्माकं मध्ये यः कोऽप्येतदतिक्रामादुल्लङ्घयेत्, उल्लङ्घ्य चाऽऽलुलोभयिषात्स्वपुत्रकलत्रादीनेव लोभयितुमिच्छेत्, गुप्तमनुष्यमुखेनाऽऽनेतुमिच्छेच्चोऽस्माकं मध्ये स तादृशः पुरुषस्ताभिरेव न संगच्छातै पुत्रकलत्रादिभिर्न संगच्छताम् । इत्येतं समयं सर्वेऽप्यङ्गीकृत्य वरुणगृहे स्वपुत्रादिशरीराणि स्थापितवन्तः । इत्येतं समयं सर्वेऽप्यङ्गीकृत्य वरुणगृहे स्वपुत्रादिशरीराणि स्थापितवन्तः । परस्परावीरोधे सति वयमेवासुराणामिदं लोकत्रयं साधयाम इति विचार्यैमं समयं कृतवन्तः । सोऽयं शाखान्तरे स्पष्टमाम्नायते—' तेऽमन्य-

न्तासुरेभ्यो वा इदं भ्रातृव्येभ्यो रध्यामो यन्मिथो विप्रियाः स्मो या न इमाः प्रियास्तनुवस्ताः समवद्यामहै ताभ्यः स निर्ऋच्छाद्यो नः प्रथमोऽन्योन्यस्मै द्रुह्यात् ' इति ।

इदानीं निर्वचनं दर्शयति—

ते यद्धरुणस्य राज्ञो गृहे तनूः संन्यदधत तत्तानू-
नप्त्रमभवत्तत्तानूनप्त्रस्य तानूनप्त्रत्वम्, इति ।

यस्माद्धरुणगृहे पुत्रादितनूरवस्थाप्य परस्परसख्यायाऽऽज्यस्पर्शनं शपथरूपं कृतवन्त इति शेषः । तस्मादिदमाज्यस्पर्शनाख्यं तानूनप्त्रं कर्माभवत् । इदं च कर्माऽऽपस्तम्बेन विस्पष्टमभिहितम्—" आतिथ्याया ध्रौवात्स्रुचि चमसे वा तानूनप्त्रं समवद्यति । चतुरवत्तं पञ्चावत्तं वा पतये त्वा गृह्णामीत्येतैः प्रतिमन्त्रमनाधृष्टमसीति यजमानस्तदृशा ऋत्विजस्तानूनप्त्रं समवमृशन्त्यनु मे दीक्षामिति यजमानः " इति । तनूनां पुत्रादिशरीराणां नप्त्रं न पतनमतिशयितं निमित्तीकृत्य क्रियमाणत्वादस्य कर्मणस्तानूनप्त्रं नाम संपन्नम् ।

प्रसङ्गाल्लोकव्यवहारे कंचिद्धर्मं दर्शयति—

तस्मादाहुर्न सतानूनप्त्रिणे द्रोग्धव्यमिति, इति ।

यस्मादेवाः परस्परद्रोहपरिहाराय शपथं कृतवन्तस्तस्माद्ब्रह्मवादिन एवमाहुः—सतानूनप्त्रिणे सह शपथकारिणे न द्रोग्धव्यम् । इतिशब्दस्तदुक्तिसमाप्त्यर्थः । देवसंबन्धिशपथविशेषवाचिना तानूनप्त्रशब्देन शपथमात्रमुपलक्ष्यते । बहुभिः सह क्रियमाणं तानूनप्त्रं यस्यास्ति सोऽयं सतानूनप्त्री ।

प्रासङ्गिकं परिसमाप्य प्रकृतमनुसरति—

तस्माद्वेतेऽसुरा नान्वाभवन्ति ॥ २४ ॥ इति ।

तस्माद्वै तस्मादेव कारणादेवानां परस्परसख्यरूपादसुरा इदं लोकत्रयं नान्वाभवन्ति नैव समन्तात्प्राप्नुवन्ति । यद्यप्येतत्तानूनप्त्री(प्त्रि)कर्मोपसद्भ्यः पूर्वमनुष्ठेयं तथाऽप्युपसत्पयुक्तविजयप्रसङ्गेन बुद्धिस्थत्वादत्राभिहितम् ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऐतरेय-
ब्राह्मणभाष्ये चतुर्थाध्याये सप्तमः खण्डः ॥ ७ ॥ (२४) ।

अथाऽऽतिथ्य(थ्या)कर्मण्यास्तीर्णस्यैव बर्हिष उपसत्स्वनुवृत्तिं विधत्ते—

शिरो वा एतद्यज्ञस्य यदातिथ्यं ग्रीवा उपसदः समानबर्हिषौ भवतः समानं हि शिरोग्रीवम्, इति ।

अथाऽऽतिथ्य(थ्या)कर्मणो यज्ञशिरोरूपत्वादुपसदां च ग्रीवारूपत्वात्तयोरवयवयोर्मध्ये लोके विच्छेददर्शनादत्राप्यविच्छेदायाऽऽतिथ्योपसत्कर्मणी समानबर्हिषी एकबर्हिषा युक्ते कर्तव्ये । आतिथ्याकर्मण्यास्तीर्णं बर्हिर्नाग्नौ प्रहृतम् । इडान्तत्वेन तत्र कर्मसमापनात् । तच्चाऽऽपस्तम्बेनोक्तम्—' इडान्ता संतिष्ठते धारयन्ति ध्रौवमाज्यम् ' इति । शाखान्तरे च बर्हिषोऽनुवृत्तिराम्नाता—' यदातिथ्यायां बार्हिस्तदुपसदां तदग्नीषोमीयस्य ' इति ।

अथोपसत्सु द्रव्यदेवताविधानार्थं प्रस्तौति—

इषुं वा एतां देवाः समस्कुर्वत यदुपसदस्तस्या अग्निरनीकमासीत्सोमः शल्यो विष्णुस्तेजनं वरुणः पर्णानि तामाज्यधन्वानो व्यसृजंस्तया पुरो भिन्दन्त आयन्, इति ।

यदुपसदो या उपसद्देवता अग्न्यादिकाः सन्ति एतामग्न्यादिरूपामिषुं वै बाणमेव देवाः समस्कुर्वत संस्कृतवन्तः । अग्न्यादीन्बाणावयवरूपेण संयोजितवन्त इत्यर्थः । योऽयमग्निः सोऽयं तस्या इषोरनीकं मुखमासीत् । पत्रयुक्तबाणमूलादूर्ध्ववर्ती भागो मुखं तस्योपरि वर्तमानो लोहविशेषः शल्यं तस्य लोहस्य तीक्ष्णमग्रं तेजनम् । पर्णानि बाणमूले स्थापितानि पक्षिणां पत्राणि शल्यादिरूपेणाग्निसोमविष्णुवरुणा योजिताः । वरुणोऽत्र प्रशंसार्थमेवोपादीयते न तु देवतात्वेन । तदीययोर्याज्यानुवाक्ययोरनभिधास्यमानत्वात् । अत एव शाखान्तरे वरुणं परित्यज्याग्न्यादय आम्नायन्ते—' त इषुं समस्कुर्वताग्निमनीकं सोमं शल्यं विष्णुं तेजनम् ' इति । तामेतामिषुं देवा आज्यधन्वानः सन्तो विसृष्टवन्तः । तया विसृष्टयेष्वा तेषामसुराणां पुरो भिन्दन्तो विदारयन्त आयन्नागच्छन् ।

इदानीं द्रव्यदेवता विधत्ते—

तस्मादेता आज्यहविषो भवन्ति, इति ।

यस्मादग्न्यादयो बाणरूपा आज्यं च धनुःस्वरूपं तस्मादाज्यहविष्का एता अग्न्यादिदेवता उपसत्सु भवेयुः ।

उपसदङ्गभूतं व्रतोपायनं विधत्ते-

चतुरोऽग्रे स्तनान्व्रतमुपैत्युपसत्सु चतुःसंधिर्हीषु-रनीकं शल्यस्तेजनं पर्णानि, इति ।

उपसत्स्वनुष्ठीयमानासु, अग्रे प्रथमदिने सायंकाले चतुरः स्तनान्व्रतमुपैति । व्रतशब्देनात्र पयःपानमुच्यते । गोश्चतुर्षु स्तनेषु यावत्पयस्तावत्पूर्वोक्तस्य बाणस्य चतुःसंधित्वादनीकाद्यवयवचतुष्टयोपेतत्वात्स्तनानां चतुःसंख्या युक्ता ।

अनेनैव प्रकारेण द्वितीयोपसद्दिने प्रातःसायंकालयोस्तृतीयादिनस्य प्रातःकाले चैकैकन्यूनाः स्तनसंख्या विधत्ते-

त्रीन्स्तनान्व्रतमुपैत्युपसत्सु त्रिसंधिर्हीषुरनीकं शल्यस्ते-जनं द्वौ स्तनौ व्रतमुपैत्युपसत्सु द्विसंधिर्हीषुः शल्यश्च ह्येव तेजनं चैकं स्तनं व्रतमुपैत्युपसत्स्वेका ह्येवेषुरि-त्याऽऽहुरेकया वीर्यं क्रियते, इति ।

एतासां स्तनसंख्यानामुक्ताः कालविशेषा आपस्तम्बेनोदाहृताः-' चतुरः सायं दुहात्रीन्प्रातर्द्वौ सायमेकमुत्तमः ' इति ।

यथोक्तं संख्याविशेषं प्रशंसति-

परोवरीयांसो वा इमे लोका अर्वाङ्हीयांसः परस्ता-दर्वाचीरुपसद उपैत्येषामेव लोकानामभिजित्यै, इति ।

इमे पृथिव्यन्तरिक्षद्युसंज्ञलोकाः परोवरीयांसः परस्ताद्ऊर्ध्वभागे निवसन्तोऽ-त्यन्तं विस्तृताः । अर्वाग्घोभागेऽहीयांसोऽतिशयेनाणुवत्संकुचिताः । सत्यलो-कादणुर्भूलोकस्तस्मादप्यणुरन्तरिक्षलोकस्तस्मादप्यणुर्भूलोकः । एवं सत्युप-सदोऽपि परस्ताद्ऊर्ध्वलोकस्थानीयात्प्रथमादिनादारभ्य तत्तदिनान्तरादिनेषु

स्तनसंख्याद्वासेनावाचिरुपैत्यनुतिष्ठतीति यदास्त्रि तदेषामेव लोकानामभिजयाय भवति ।

अथ पूर्वाह्णापराह्णयोर्व्यवस्थिताः सामिधेनीर्विधत्ते—

उपसद्याय मीढ्वुष इमां मे अग्ने समिधमिमामुपसदं वनेरिति तिस्रस्तिस्रः सामिधेन्यो रूपसमृद्धा एतद्वै यज्ञस्य समृद्धं यद्रूपसमृद्धं यत्कर्म क्रियमाणमृगभिवदति, इति ।

उपसद्यायेत्याद्या आम्नातास्तिस्र ऋचः पूर्वाह्णे सामिधेन्यः इमां मे अग्न इत्यादिका आम्नातास्तिस्र ऋचोऽपराह्णे सामिधेन्यः । मन्त्रान्तरशङ्कान्युदासेन वैशब्दार्थः क्रत्वर्थपाठः । उपसद्यायोपसदं वनेरित्युपशब्द्योगेन रूपसमृद्धिः ।

याज्यानुवाक्या विधत्ते—

जाग्निवतीर्याज्यानुवाक्याः कुर्यात्, इति ।

हन्तिधात्वर्थयुक्ता जाग्निवतीः ।

तथाविधा ऋच उदाहरति—

अग्निर्वृत्राणि जङ्घनद्य उग्र इव शर्यहा त्वं सोमासि सत्पतिर्गयस्फानो अमीवहेदं विष्णुर्विचक्रमे त्रीणि पदा विचक्रम इत्येताः, इति ।

अग्निर्वृत्राणीति पुरोनुवाक्या । य उग्र इवेति याज्या । त्वं सोमेति पुरोनुवाक्या । गयस्फान इति याज्या । इदं विष्णुरिति पुरोनुवाक्या । त्रीणि पदेति याज्या । एताश्चाग्न्यादिदेवानां क्रमेण द्रष्टव्याः ।

याः पूर्वाह्णे पुरोनुवाक्या उक्तास्तासामपराह्णे याज्यात्वं तथा तत्रत्यानां याज्यानामपराह्णे पुरोनुवाक्यात्वं च विधत्ते—

विपर्यस्ताभिरपराह्णे यजति, इति ।

---

१ ऋ. ७ १५-१. ॥ २ ऋ. २-६-१ ॥ ३ ऋ, ६।१६।३४. ४ ऋ ६. १६. ३९ ॥ ५ ऋ, १, ९१, ५ ॥ ६ ऋ. १ ९१. १२ ॥ ७ ऋ. १ । २२ । १७ । ८ ऋ. १ । २२ । १८ ।

यथोक्तयाज्यानुवाक्यायुक्ता उपसदः प्रशंसति—

घ्नन्तो वा एताभिर्देवाः पुरो भिन्दन्त आयन्यदुपसदः, इति ।

या उक्तमन्त्रोपेता उपसदः सन्ति, एताभिर्देवा असुराणां तिस्रः पुरो विदारयन्तोऽसुरांश्च हिंसन्त आगताः ।

उदाहृतासु याज्यानुवाक्यासु सर्वासु यदेकविधं छन्दो दृश्यते न तु विलक्षणं तदन्वयव्यतिरेकाभ्यां विशदयति—

सच्छन्दसः कर्तव्या न विच्छन्दसः, इति ।

समानं छन्दो यासां ताः सच्छन्दसः । विलक्षणं छन्दो यासां ता विच्छन्दसः ।

वैलक्षण्ये बाधमाह—

यद्विच्छन्दसः कुर्यादग्रीवासु तद्गण्ड दध्यादीश्वरो ग्लावो जनितोः, इति ।

विलक्षणच्छन्दसामनुष्ठाने ग्रीवास्थानीयासूपसत्सु गण्डमालाख्यरोगस्थानीयं दोषं दध्यादुत्पादयेत् । तथा सवि होता यजमानस्य ग्लानिविशेषाज्जनितोरुत्पादयितुमीश्वरः समर्थो भवेत् ।

अस्वपक्षे बाधमुक्त्वा स्वपक्षमुपसंहरति—

उपसदामाज्यहविष्कत्वं प्रशंसति—

तदु ह स्माऽऽहोपाविर्जानश्रुतेय उपसदां किल वै तद्ब्राह्मणे यस्मादप्यश्लीलस्य श्रोत्रियस्य मुखं व्येव ज्ञायते तृषमिव रेभतीवेत्याज्यहविषो ह्युपसदो ग्रीवासु मुखमध्याहितं तस्माद्ध स्म तदाह ॥ २५ ॥ इति ।

तदु ह तस्मिन्नेवोक्तार्थे कश्चिद्वृत्तान्त उच्यत इति शेषः । उपाविर्नामकः कश्चिदृषिः स तु जानश्रुतेयः, जनश्रुतायाः स्त्रिया अपत्यं स पुमानुपसदां किल वै, उपसन्नामकानां कर्मणामेव विधायके ब्राह्मणे तद्वाक्यमाह स्म ।

किमाहेति तदुच्यते । यस्मात्कारणादश्लीलस्यापि कुरूपस्य श्रोत्रियस्य वदशो-
स्त्रविदो मुखं तृप्तमिव दैन्यहीनतया तृप्तियुक्तमेव रेभतीव वेदशास्त्रपाठोपेत-
त्वाच्छंसन्निव व्येव ज्ञायते विशेषेणावश्यं प्रतीयत इत्येतदृष्टेर्वचनम् । तस्य वच-
नस्याभिप्राय उच्यते । ग्रीवास्थानीया उपसद आज्यहविष्का अत एव शोभ-
मानाः । लोकेऽपि शोभमानासु ग्रीवासु, अध्याहितमाश्रितं मुखं श्रोत्रियसंब-
न्धितृप्त्याद्युपेतं दृश्यते । तस्मात्कारणाच्छोभनग्रीवाहितमुखसाम्यमाज्यहविष्क-
त्वमित्यभिप्रेत्य स ऋषिस्तद्वाक्यमाह ।

अथ मीमांसा । चतुर्थाध्यायस्य द्वितीयपादे चिन्तितम्—

" यदातिथ्याबर्हिरेतदुपसत्स्वतिदेशनम् ।
साधारण्यविधिर्वाऽऽद्यस्तदीयस्योपसंहृतेः ॥
बर्हिःश्रुत्यैकताभानान्नातिदेशस्य लक्षणा ।
आतिथ्ययोपसद्भिश्च बर्हिरेतत्प्रयुज्यते "

ज्योतिष्टोमे श्रूयते—यदातिथ्यायां बर्हिस्तदुपसदां तदग्नीषोमीयस्य चेति । क्रीतं सोमं शकटेऽवस्थाप्य प्राचीनवंशं प्रत्यानयनैऽभिमुखो यामिष्टिं निर्वपति
सेयमातिथ्या । तत ऊर्ध्वं त्रिषु दिनेष्वनुष्ठीयमाना उपसदः । औपवसथ्ये दिनेऽ-
नुष्ठेयः सोऽग्नीषोमीयः । तत्राऽऽतिथ्येष्टौ विहितं यद्बर्हिस्तद्यदि तस्या इष्टेराच्छि-
द्योपसत्सु विधीयेत तदानीमातिथ्याविधानमनर्थकं स्यात् । यदि तत्रोपयुक्तमि-
तरत्र विधीयते विनियुक्तविनियोगरूपो विरोधः स्यात् । तस्मादातिथ्याबर्हिषो
ये धर्मा आश्वबालत्वादयस्ते धर्मा उपसत्सूपसंहियन्त इत्यतिदेशपरं वाक्यमिति
प्राप्ते ब्रूमः । बर्हिःशब्दस्य धर्मातिदेशपरत्वे लक्षणा प्रसज्येत । श्रुत्या तु बर्हिष
आतिथ्योपसदग्नीषोमीयेष्वेकत्वं प्रतिभात्यतः साधारण्यमत्र विधेयम् । आति-
थ्यार्थं यद्बर्हिरुपादीयते तन्न केवलमातिथ्यार्थं किंतूपसदर्थमग्नीषोमीयार्थं वोपा-
देयमिति विधिवाक्यस्यार्थः । तस्मादातिथ्योपसदग्नीषोमीयास्त्रयोऽप्यस्य बर्हिषः
प्रयोजकाः । द्वादशाध्यायस्य प्रथमपादे चिन्तितम्—

" आतिथ्यादिगते बर्हिष्युक्षणादि पृथङ् न वा ।
आद्योऽतन्त्रप्रसङ्गत्वान्न प्रसङ्गनिवारणात् " ॥

यदातिथ्यायां बर्हिस्तदुपसदां तदग्नीषोमीयस्येति श्रुतं तत्र बर्हिस्त्रयाणां साधारणमिति चतुर्थे निरूपितम् । तस्मिन्साधारणे बर्हिषि प्रोक्षणादिसंस्काराः प्रतिकर्म पृथगनुष्ठेयाः । कुतः । तन्त्रप्रसङ्गयोरत्रासंभवात् । न तावत्तन्त्रमस्ति । दर्शगतयागत्रयवदेककालीनत्वाभावात् । नापि प्रसङ्गः, एकस्य तन्त्रमन्येऽन्ययारे-

पठितत्वादिति प्राप्ते ब्रूमः । बर्हिष एकत्वात्सकृत्प्रोक्षणादिभिः संस्कारे पुनः-प्रोक्षणाद्यपेक्षा नास्ति । ते च प्रोक्षणादयः प्राथम्यादातिथ्यायां कार्याः । तत उपसत्स्वग्नीषोमीये च प्रसङ्गसिद्धिर्न वारयितुं शक्यते ॥

इति श्रीमत्सायणार्यविरचिते माधवीये वेदार्थप्रकाश ऐतरेय-ब्राह्मणभाष्ये चतुर्थाध्यायेऽष्टमः खण्डः ॥ ८ ॥ (२५)।

अथोपसत्सु प्रयाजाननुयाजांश्च निषेधति—

देववर्म वा एतद्यत्प्रयाजाश्चानुयाजाश्चाप्रयाजमननुयाजं भवतीष्वै संशित्या अप्रतिशराय, इति ।

ये प्रयाजा ये चानुयाजाः सन्ति तदुभयं देवानां वर्म वै कवचस्थानीयम् । अत एव शाखान्तरे समामनन्ति—' यत्प्रयाजा अनूयाजा इज्यन्ते वर्म वा एतद्यज्ञाय क्रियते वर्म यजमानाय भ्रातृव्याभिभूत्यै ' इति । एवं सत्युपसदाख्यं कर्म प्रयाजानुयाजरहितं कर्तव्यम् । कवचस्यानुपयुक्तत्वात् । परकीयप्रहाराद्रक्षार्थं हि कवचं संपाद्यते । नात्र परप्रहारः संभवति । पूर्वोक्तायाः इषोस्तीक्ष्णत्वेन सकृत्प्रयोगादेव मारितेषु शत्रुषु प्रहर्तृणामभावात् । एवं सति यदि कवचं संपाद्यते तदानीं स्वकीयाया इषोरतीक्ष्णत्वं शङ्क्येत स्वस्य च शत्रुभिः संपादिता प्रतिहिंसा शक्ये (ङ्क्ये) त । तच्चायुक्तम् । तस्मादिष्वै संशित्यै स्वकीयस्य बाणस्य सम्यक्तीक्ष्णत्वार्थमप्रतिशराय स्वेषु शत्रुकर्तृकप्रतिहिंसायाः शङ्कनपरिहारार्थं च प्रयाजानुयाजवर्जनं युक्तम् । तथा चाऽऽश्वलायन आह— ' स्विष्टकृदादि लुप्यते प्रयाजा आज्यभागौ च ' इति । स्विष्टकृदादिष्वन्तर्भावादनुयाजलोपो युक्त एव ।

अत्राग्नीषोमविष्णुरूपाणां देवानां बहुत्वेनाऽऽश्रावणार्थमुत्तरस्माद्देशादाहवनीयस्य दक्षिणदेशं प्रत्यसकृदतिक्रमणं प्राप्तं तद्वारयितुमाह—

सकृदतिक्रम्याऽऽश्रावयति यज्ञस्याभिक्रान्त्या अनपक्रमाय, इति ।

वेद्याहवनीययोर्मध्ये सकृदेवातिक्रम्य दक्षिणादिश्यवस्थितो बहुषु यागेषु प्रत्येकमाश्रावणं कुर्यात् । एवं सत्युपसद्यज्ञस्य सर्वत आक्रमणं भवति स्थैर्यं भवति । अन्यथा पुनः पुनरुत्तरस्यां दिशि गमने लब्धावसरः सन्यज्ञोऽप्यपक्रामेत् । तस्मात्सकृदेवातिक्रमणं युक्तम् । तदाहाऽऽस्तम्बः—' द्यौर्वा दृष्टौ

जुह्वां गृह्णाति चतुर उपभृति घृतवति शब्दे जुहूपभृतावादाय दक्षिणा सक्थ्यतिक्रान्त उपांशुयाजवत्प्रचरति ' इति ।

अथ समन्त्रकं सोमाप्यायनं विधातुं प्रस्तौति—

तदाहुः क्रूरमिव वा एतत्सोमस्य राज्ञोऽन्ते चरन्ति यदस्य घृतेनान्ते चरन्ति घृतेन हि वज्रेणेन्द्रो वृत्रमहन्, इति ।

तत्तत्र ब्रह्मवादिन एवमाहुः । सोमस्य राज्ञोऽन्त समीपे घृतेन द्रव्येण तानूनप्त्रसंज्ञकं कर्म चरन्त्यनुतिष्ठन्तीति यदस्ति तदेतत्सोमस्य राज्ञः समीपे क्रूरमिव वै, उग्रमेव कर्म चरन्ति । हि यस्मात्कारणाद्घृतरूपेण वज्रेणेन्द्रो वृत्रं हतवान्' तस्माद्घृतकर्म क्रूरम् । तच्छाखान्तरे विस्पष्टमाम्नातम्—' घृतं खलु वै देवा वज्रं कृत्वा सोममघ्नन्नन्तिकमिव खलु वा अस्यैतच्चरन्ति यत्तानूनप्त्रेण चरन्ति ' इति ।

तस्य क्रूरकर्मणः परिहाराय विधत्ते -

तद्यदंशुरंशुष्टे देव सोमाऽऽप्यायतामिन्द्रायैकधनविदे आतुभ्यामिन्द्रः प्यायतामा त्वमिन्द्राय प्यायस्वाऽऽप्याययास्मान्सखीन् । सन्या मेधया स्वस्ति ते देव सोम सुत्यामुदचमशीयेति राजानमाप्याययन्ति यदेवास्य तत्क्रूरमिवान्ते चरन्ति तदेवास्यैतेनाऽऽप्याययन्त्यथो एनं वर्धयन्त्येव, इति ।

यद्यस्मात्कारणात्सोमस्य राज्ञः समीपे घृतसाधनकं तानूनप्त्रं कर्म क्रूरं तत्तस्मात्कारणात्क्रौर्यपरिहारायांशुरंशुरिति मन्त्रेण सोमं राजानमाप्याययेयुः । जलेन प्रोक्षणमाप्यायनम् । एवं सति यत्क्रूरमाचरितं तत्सर्वमेतेन प्रोक्षणेनाऽऽप्याययन्ति शमयन्ति । अपि चैनं सोमं वर्धयन्त्येव । मन्त्रस्यायमर्थः । हे सोम देव, इन्द्रार्थं तत्त्वदीयोऽशुस्त्वदवयव आप्यायतां वर्धताम् । कीदृशायेन्द्राय । एकधनाविदे । सोमरूपं यदेकं धनं तद्वेत्ति विन्दते वेत्येकधनावित् । तस्मा एकधनविदे । तुभ्यं त(त्व)दर्थमिन्द्रो वर्धतामिन्द्रार्थं च त्वं वर्धस्व । सखीनस्मान्सन्या क्षेमेण मेधया यज्ञप्रतिपादकग्रन्थधारणाशक्त्या चाऽऽप्याययं वर्धय । हे सोम

देव ते स्वस्ति क्षेमोऽस्तु । यस्यां क्रियायां सोमः सूयतेऽभिषूयते सा सुत्या । उदुत्तमा समाप्तिविषयगर्यस्यां सुत्वायां सेयमुद्दक्तां सुत्यामुद्दचमशीय प्राप्नुयां विघ्न-मन्तरेण समाप्तिपर्यन्तमनुतिष्ठेयामिति । श्रौत इतिशब्दो मन्त्रसमाप्त्यर्थः ।

समन्त्रकं निह्नवं विधत्ते-

द्यावापृथिव्योर्वा एष गर्भो यत्सोमो राजा तद्य-देष्टा राय एष्टा वामानि प्रेषे भगाय । ऋतमृत-वादिभ्यो नमो दिवे नमः पृथिव्या इति प्रस्तरे निह्न(ह्नु)वते द्यावापृथिवीभ्यामेव तं नमस्कुर्व-न्त्यथो एने वर्धयन्त्येव वर्धयन्त्येव ॥२६॥ इति ।

इत्यैतरेयब्राह्मणे प्रथमपञ्चिकायां चतुर्थोऽध्यायः ॥ ४ ॥

यः सोमो राजा, एष द्यावापृथिव्योरेव गर्भः । यद्यस्मादेवं तत्तस्माद्गर्भरक्षार्थं प्रस्तर एतन्नामके दर्भमुष्टौ निह्न(ह्नु)व ते संमणयन्ति । नमस्कारोपचारं कुर्युरि-त्यर्थः तदेतद्द्यावापृथिवीभ्यामित्यादिना स्पष्टी क्रियते । अपि चैने द्यावापृथिव्यौ वर्धयन्त्येव । उत्साहयुक्ते कुर्वन्त्येव । निह्नवप्रकार आपस्तम्बेन दर्शितः-'अथ निह्नवते दक्षिणे वेद्यन्ते प्रस्तरं निधाय दक्षिणान्पाणीनुत्ताना-कृत्वा सव्यान्नीच एष्टा रायः' इति । अस्मादभ्युदयमिच्छतीत्येष्टा प्रस्तरः सोमो वा । देहीति पद-मध्याहर्तव्यम् । हे एष्टः, इषे अन्नार्थं भगाय सौभाग्यार्थं च रायो धनानि प्रदेहि । यद्वा । एष्टेति प्रथमान्तम् । तदानीं प्रददात्वित्यध्याहारः । किंच । एष्टा वामान्यन्यानपि कामान्प्रददातु ऋतवादिभ्यः सत्यवादिभ्यो देवेभ्य ऋत्विग्यज-मानेभ्यो वा । ऋतं सत्यं वदामीति शेषः । तदेव सत्यवचनं स्पष्टमुच्यते । दिवे द्युलोकदेवतायै नमोऽस्तु । पृथिव्यै भूलोकदेवतायै नमोऽस्त्विति । श्रौत इतिशब्दो मन्त्रसमाप्त्यर्थः । वर्धयन्त्येवेत्यभ्यासोऽध्यायसमाप्त्यर्थः ।

अत्र मीमांसाः-

"उपसत्सु निषिद्धेभ्यः शिष्टं सर्वं समाचरेत् ।
यावदुक्तमुताऽऽद्योऽस्तु चोदकस्यानिवारणात् ।
सौवाधारे पुनः श्रुत्या शिष्टस्य परिसंख्यया ।
अपूर्वार्थत्वतो वाऽन्त्योऽनुवादः प्रतिषेधगीः" ॥

ज्योतिष्टोमे विहितासूपसत्सु पठ्यते-'अप्रयाजास्त्वा अननुयाजाः' इति । तत्र निषिद्धान्प्रयाजानुयाजान्वर्जयित्वाऽवशिष्टं चोदकप्राप्तमङ्गजातं सर्वमाचरणी-

यामिति प्राप्ते ब्रूमः । प्रकृतौ विहित एव स्रौवाधारः पुनरिह विधीयते । स च चोदकप्राप्तमन्यत्सर्वमङ्गजातं परिसंचष्टे । अन्यथा पुनर्विधानवैयर्थ्यात् । ननु पुनर्विधानं प्रतिप्रसवार्थमत एव श्रुतिरत्र स्रौवाधारमभावशङ्कानिराकरणपूर्वकं विदधाति—'नान्यामाहुतिं पुरस्ताज्जुहुयाद्यदन्यामाहुतिं पुरस्ताज्जुहुयादन्यन्मुखं कुर्यात्स्रुवेणाऽऽघारमाघारयति' इति । अयमर्थः । स्रौवाधारः सर्वत्र यज्ञस्य मुखं तथा सति यदि काश्चन्मन्त्र उपसत्प्रयोगादौ स्रौवाधारमहुत्वा तस्य स्थाने कांचिदन्यामाहुतिं जुहुयात्तदा मुखव्यत्यासेन प्रत्यवायं प्राप्नुयात् । तस्मात्स्रौवाधार आदौ कर्तव्य इति । नैतद्युक्तम् । चोदकप्राप्तस्याऽऽघारस्याकस्मादभावशङ्काया अयुक्तत्वात् । तस्मात्परिसंख्यार्थ एव पुनर्विधिः । आहुत्यन्तरनिन्दा तु तच्छेषभूतोऽर्थवादः । यदि परिसंख्या साऽपि त्रिदोषेत्युच्येत तर्हि गृहमेधीयवदपूर्वं कर्मास्तु । प्रयाजादिनिषेधो नित्यानुवादः । सर्वथा यावदुक्तमत्रानुष्ठेयम् ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऐतरेयब्राह्मणभाष्ये चतुर्थाध्याये नवमः खण्डः ॥ ९ ॥ [२६] ।

इति श्रीमद्राजाधिराजपरवैदिकमार्गप्रवर्तकवीरबुक्कणसाम्राज्यधुरंधरसायणाचार्यकृतावैतरेयब्राह्मणभाष्ये प्रथमपञ्चिकायां चतुर्थोऽध्यायः । ४ ॥

अथ पञ्चमोऽध्यायः

अभिष्टवोपसत्तानूनप्त्रापायननिह्नवाः ।
कथिता धर्मसंभारा व्रतोपायनमेव च ॥

अथ सोमक्रयाद्या वक्तव्याः । तत्र क्रयं वक्तुमाख्यायिकामाह—

सोमो वै राजा गन्धर्वेष्वासीत्तं देवाश्च ऋषयश्चाभ्यध्यायन्कथं॒ग्॒ण॒स्मान्सोमो राजाऽऽगच्छेदिति सा वागब्रवीत्स्त्रीकामा वै गन्धर्वा मयैव स्त्रिया भूतया पणध्वमिति नेति देवा अब्रुवन्कथं वयं त्वद्दते स्यामेति साऽब्रवीत्क्रीणीतैव यर्हि वाव वो

मयाऽर्थो भविता तर्ह्येव वोऽहं पुनरागन्ताऽस्मीति तथेति तया महानग्न्या भूतया सोमं राजानमक्रीणन्, इति ।

स्वानभ्राजेत्यादिनामधारिणो गन्धर्वा द्युलोके सोमस्य रक्षकाः । तच्च शाखान्तरे मन्त्रव्याख्यानब्राह्मणे श्रूयते--'स्वानभ्राजेत्याह । एतेषाममुष्मिँल्लोके सोममरक्षन्' इति । अथवा विश्वावसुप्रभृतयः सोमस्यापहन्तारो गन्धर्वाः । तदपि तत्रैव श्रुतम्-'तं सोममाह्रियमाणं गन्धर्वो विश्वावसुः पर्यमुष्णात्स तिस्रो रात्रीः परिमुषितोऽसत्' इति । तेषु गन्धर्वेषु यः सोम आसीत्तं सोमं मित्रादयो देवा वसिष्ठादिऋषयश्च केन प्रकारेण सोमोऽस्मान्प्राप्नुयादिति विचारितवन्तः । तदानीं गन्धर्वहृदयाभिज्ञा । वाग्देवी देवानब्रवीत् । गन्धर्वाः सर्वेऽपि स्त्रीलम्पटा अहं च स्त्री भूत्वा तिष्ठाम्यतो मया पणध्वं सोममूल्यत्वेन मां गन्धर्वाणामग्रे कुरुतेति । ततो देवा अनङ्गीकृत्य त्वदृते त्वां वाचं विना वयं कथं स्याम मन्त्ररूपवाग्ग्राहित्ये सति कर्मणामप्रवृत्तेः केन प्रकारेण वयं जीवामेति वाचमब्रुवन् । ततो वाग्देवानब्रवीत् । संदेहं मा कुरुतावश्यं मया मूल्येन क्रीणीत । यदैव मया युष्माकं प्रयोजनं भविष्यति तदैवाहं पुनरपि युष्मान्प्राप्स्यामीति । ततो देवा अङ्गीकृत्य तया वाचा सोममक्रीणन् । कीदृश्या महानग्न्या । महती चासौ नग्नी च महानग्नी तया । रूपसंपत्तिविवक्षया महत्त्वमुच्यते । बाल्यविवक्षया नग्नत्वम् । भूतया तदानीमेव कुमारीरूपेण निष्पन्नया । तदेतच्छाखान्तरे स्पष्टमाम्नातम्-'ते देवा अब्रुवन्स्त्रीकामा वै गन्धर्वाः स्त्रिया निष्क्रीणामेति । ते वाचं स्त्रियमेकहायनीं कृत्वा तया निरक्रीणन्' इति ।

इदानीं सोमक्रयं विधत्ते—

तामनुक्रामेत्सन्नां वत्सतरीमाजन्ति सोमक्रयणीं तया सोमं राजानं क्रीणन्ति, इति ।

तामनुक्रामेत्तां स्त्रीरूपां वाचमनुक्रियमाणां निष्पन्नां तत्सदृशीमित्यर्थः । अस्कन्नां वीर्यस्कन्दनरहितामप्राप्तयौवनां वत्सतरीमतिशयेन बालां सोमक्रयसाधनभूतां कांचिद्ग्रामाजन्ति संपादयेयुरित्यर्थः । तया तादृश्या गवा सोमं राजानं क्रीणन्ति क्रीणीयुः । तां गां मूल्यरूपेण दत्त्वा सोमं स्वीकुर्युः ।

'मूल्यत्वेन सोमविक्रयणे दत्ता वा गौस्तस्याः पुनर्मूल्यान्तरदानेन स्वीकरणं विधत्ते—

तां पुनर्निष्क्रीणीयात्पुनर्हि सा तानागच्छत्, इति ।

यस्मादियं वाग्गन्धर्वेभ्यो निष्क्रम्य पुनस्तान्देवान्प्राप्तोत्तस्मात्सोमक्रयण्याः पुनरादानं युक्तम् । वाचो वृत्तान्तः शाखान्तरे स्पष्टमाम्नातः—' सा रोहिद्भूत्वा गन्धर्वेभ्योऽपक्रम्याऽऽतिष्ठत्तद्रोहितो जन्म ते देवा अब्रुवन्नयं युष्मदक्रमीन्नास्मादुपावर्तते विद्मयामहा इति ब्रह्मगन्धर्वा अवदन्नगायन्देवाः सा देवान्गायन्नुपावर्तत तस्माद्गायन्तं स्त्रियः कामयन्ते ' इति ।

मन्त्राणां मन्द्रध्वनिं विधत्ते—

तस्मादुपांशु वाचा चरितव्यं सोमे राजनि क्रीते गन्धर्वेषु हि तर्हि वाग्भवति साऽग्नावेव प्रणीयमाने पुनरागच्छति ॥ २७ ॥ इति ।

सोमक्रयादूर्ध्वकाले मूल्यरूपा वाग्देवी गन्धर्वेषु तिष्ठति पुनरप्यग्नौ प्रणीयमाने देवानागच्छति । यस्मादेवं तस्मात्सोमक्रयादूर्ध्वमग्निप्रणयनात्प्राग्वाचोपांशु चरितव्यम् । यथा परैर्ध्वनिर्न श्रूयते तथा मन्त्रपाठादिकं कर्तव्यमित्यर्थः ।

अत्र मीमांसा । द्वादशाध्यायस्य चतुर्थपादे चिन्तितम्—

" क्रैयणेषु विकल्पः स्यात्साहित्यं वाऽप्रिमो यतः ।
कार्यैक्यमानतेर्लोभाद्दशोक्तेश्च समुच्चयः ॥ "

अजया क्रीणाति हिरण्येन क्रीणाति वाससा क्रीणातीत्यादीनि बहूनि सोमक्रयसाधनानि द्रव्याण्याम्नातानि तेषां कार्यैक्याद्विकल्प इति चेन्नैवम् । बहुभिर्द्रव्यैर्विक्रेतुरानतेः सौलभ्याद्दशभिः क्रीणातीति संख्योक्तेश्च समुच्चयः ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऐतरेयब्राह्मणभाष्ये पञ्चमाध्याये प्रथमः खण्डः ॥ १ ॥ (२७) ।

सोमक्रयमभिधायाग्निप्रणयनीया ऋचो विधातुमादौ प्रैषमन्त्रं विधत्ते—

अग्नये प्रणीयमानायानुब्रूहीत्याहाध्वर्युः, इति ।

प्राचीनवंशगत आहवनीयेऽवस्थितस्याग्नेः सौमिक्यामुत्तरवेद्यां नयनं यदस्ति तदेतदत्राग्निप्रणयनम् । तत्कुर्वन्नध्वर्युरग्नये प्रणीयमानायानुब्रूहीति प्रैषमन्त्रं होतारमुद्दिश्य पठेत् ।

तत्र होताऽनुवक्तव्यास्वष्टास्वृक्षु प्रथमामृचं विधत्ते—

[1]प्र देवं देव्या धिया भरता जातवेदसम् । हव्या नो वक्षदानुषगिति गायत्रीं ब्राह्मणस्यानुब्रूयात्, इति ।

हे ऋत्विजो जातवेदसं देवं देव्या तद्रूपप्रकाशिकया तद्भावनायुक्तया धिया प्रभरत प्रकर्षेणोत्तरवेदिं प्रति हरत नयत । अयं च जातवेदा आनुषगुत्तरवेद्यामनुषक्तः सन्नो हव्या, अस्मदीयानि हवींषि वक्षद्देवान्प्रति वहतु । इत्यृगेषा गायत्रीछन्दस्का तां ब्राह्मणस्य यजमानस्य होताऽनुब्रूयात् ।

तदेतत्प्रशंसति-

गायत्रो वै ब्राह्मणस्तेजो वै ब्रह्मवर्चसं गायत्री तेजसैवैनं तद्ब्रह्मवर्चसेन समर्धयति, इति ।

ब्राह्मणस्य प्रजापतिमुखजन्यत्वसाम्येन गायत्रीसंबन्धः । तेजो वा इत्यादिकं पूर्ववद्व्याख्येयम् ।

क्षत्रियस्य यजमानस्य योगेऽन्यामृचं विधत्ते-

[2]इमं महे विदथ्याय शूषमिति त्रिष्टुभं राजन्यस्यानुब्रूयात्, इति ।

तदेतत्प्रशंसति-

त्रैष्टुभो वै राजन्य ओजो वा इन्द्रियं वीर्यं त्रिष्टुबोजसैवैनं तदिन्द्रियेण वीर्येण समर्धयति, इति ।

त्रिष्टुब्राजन्ययोः प्रजापतिबाहुजन्यत्वेन संबन्धः । एतदपि गायत्रीब्राह्मणयोरिव सप्तमकाण्डे तैत्तिरीयैराम्नातम्-' उत्तरतो बाहुभ्यां पञ्चदश निरमिमीत तदिन्द्रो देवताऽसृजत त्रिष्टुप्छन्दो बृहत्साम राजन्यो मनुष्याणाम् ' इति । ओजो वा इत्यादिकं पूर्ववद्व्याख्येयम् ।

तस्या ऋचो द्वितीयपादं पठति-

शश्वत्कृत्व ईड्याय प्रजभ्रिति, इति ।

उक्तस्य पादद्वयस्यायमर्थः । शूषं सुखहेतुमिममग्निं महे विदथ्याय महते वेदनाय लाभाय तत्सिद्ध्यर्थं शश्वत्कृत्वो बहुकृत्व ईड्याय प्रजाभिः स्तुत्याय

---

१. ऋ. १०-१७६-२ ॥ २. ऋ. ३-६४ १ ॥

राजन्याय राजन्यस्य यागसिद्ध्यर्थं प्रजभुः प्रकर्षेण हृतवन्त उत्तरवेद्यां नीतवन्त इति । श्रौत इतिशब्दो द्वितीयपादसमाप्त्यर्थः ।

तत्पादपठनेन ज्ञातीनां मध्ये यजमानस्य श्रैष्ठ्यं दर्शयति—

स्वानामेवैनं तच्छ्रैष्ठ्यं गमयति, इति ।

तस्या ऋच उत्तरार्धं पठति—

शृणोतु नो दम्येभिरनीकैः शृणोत्वग्निर्दिव्यैरजस्र इति, इति ।

दम्येभिः परकीयसेनां दमयितुमर्हैरनीकैः स्वकीयैः सैन्यैः सहायं प्रणीयमानोऽग्निर्नोऽस्माञ्शृणोतु । एते यजमानाः सम्यगनुतिष्ठन्तीत्येवं स्वकीयदूतमुखादवगच्छतु । यद्वा । दमे गृहे तद्योग्यैर्दम्यैर्गृहरक्षणार्थमवस्थापितैरित्यर्थः । किंचायमग्निर्दिव्यैर्देवलोकयोग्यैर्नागैः सहाजस्रो निरन्तरमस्मद्धिते वर्तमानोऽस्मदीयां स्तुतिं शृणोत्विति । श्रौत इतिशब्द उत्तरार्धसमाप्त्यर्थः ।

उक्तवेदनं प्रशंसति—

आजरसं हास्मिन्नजस्रो दीदाय य एवं वेद, इति ।

वेदितुर्जरासमाप्तिपर्यन्तमस्मिन्नेतदीये गृहेऽजस्रो नैरन्तर्येण वर्तमानोऽग्निर्दीदाय दीप्यते ।

वैश्यस्य यजमानस्यान्यामृचं विधत्ते—

अयमिह प्रथमो धायि धातृभिरिति जगतीं वैश्यस्यानुब्रूयात्, इति ।

तदेतत्प्रशंसति—

जागतो वै वैश्यो जागताः पशवः पशुभिरेवैनं तत्समर्धयति, इति ।

प्रजापतिमध्यदेशजन्यत्वसाम्येन जगतीसंबन्धः । एतदपि शाखान्तरे समाम्नातम् 'मध्यतः सप्तदशं निरमिमीत तं विश्वे देवा देवता अन्वसृजन्त जगतीं छन्दो वैरूपं साम वैश्यो वै मनुष्याणाम्' इति । जागता इत्यादिकं पूर्ववद्व्याख्येयम् ।

---

१ ऋ. ४-७-१ ।

चतुर्थपादमनूद्य प्रशंसति-

वनेषु चित्रं विभ्वं विशे विश इत्यभि-
रूपा यद्यज्ञेऽभिरूपं तत्समृद्धम्, इति ।

अत्र तत्तद्वैश्यवाचिनो वीप्सायुक्तस्य विट्शब्दस्य श्रूयमाणत्वाद्वैश्यं प्रत्यनुरूपत्वम् ।

इत्थं जातिभेदेन प्रथमाया ऋचो व्यवस्थामभिधाय जातित्रयसाधारणभूतां द्वितीयामृचं विधत्ते-

[1]अयमु ष्य प्र देवयुरिति, इति ।

सोमक्रयणकाले यद्वाच उपांशुत्वं विहितं तस्यास्मिन्काले विसर्गं विधत्ते-

अनुष्टुभि वाचं विसृजते, इति ।

अयमु ष्येत्येतस्यामृच्युपांशुरूपां वाचं विसृजेत् ।

तदेतत्प्रशंसति -

वाग्वा अनुष्टुब्वाच्येव तद्वाचं विसृजते, इति ।

अयमु ष्येत्यस्या अनुष्टुप्छन्दस्कत्वादनुष्टुभो वाग्रूपत्वस्य सर्वश्रुतिप्रसिद्धत्वादनुष्टुब्रूपायां वाच्येवोपांशुध्वनिरूपां वाचं तन्मन्त्रपाठेन विसृजते ।

एतन्मन्त्रगतप्रथमपादस्य पूर्वभागमनूद्य व्याचष्टे-

अयमु ष्य इति यदाहायमु स्याऽऽगमं या
पुरा गन्धर्वेष्ववात्सामित्येव तद्वाक्प्रब्रूते, इति ।

ब्राह्मणगतोऽयंशब्दोऽत्र स्त्रीलिङ्गत्वेन परिणेयः । तच्छब्दपर्यायस्य त्यच्छब्दस्य टाबन्तस्य स्येवि रूपं भवति । एवं सत्ययमु ष्य इति मन्त्रो यदाह तत्र वाग्देवतेत्थं ब्रूते । कथमिति तदुच्यते । पुरा गन्धर्वेषु वाऽहं वागवात्सं स्थिताऽस्मि स्याऽऽगमं सेयमेवाऽऽगमामिदानीमागताऽस्मीति । अतो वाग्देवतयैवमुच्यमानत्वात्तार्धर्चोऽभियुक्त इत्यर्थः ।

तृतीयामृचं विधत्ते-

[2]अयममिरुरुष्यतीति, इति ।

अनुब्रूयादित्यनुक्तस्थलेष्वनुवर्तते ।

---

१. ऋ. १०-१७६-३ । २. ऋ. १०-१७६-४ ।

एतत्पदार्थप्रसिद्धं वैशब्देन दर्शयति—

अयं वा अग्निरुरुष्यति, इति ।

अयं प्रणीयमानोऽग्निर्यजमानमुरुष्यति कर्मनिष्पादनेन रक्षतीत्येतत्प्रसिद्धम्। द्वितीयपादमनूद्य तात्पर्यं दर्शयति—

अमृतादिव जन्मन इत्यमृतत्वमेवास्मिन्दधाति, इति ।

अमृतान्मरणरहितादेवतारूपाज्जन्मनो यथा रक्षा संपद्यते । न हि मरणरहित्यादधिका रक्षा क्वचिदस्ति । तद्वदियमग्निकर्तृका रक्षेत्यर्थः । तत्तेन मन्त्रपाठेनामृतत्वमेव देवत्वमेवास्मिन्यजमाने संपादयति ।

द्वितीयार्धमनुवदति—

सहसश्चित्सहीयान्देवो जीवातवे कृत इति, इति ।

देवोऽग्निर्जीवातवेऽस्माकं जीवनौषधाय सहसश्चित्प्रबलादपि पुरुषात्सहीयानतिशयेन प्रबलीकृतो निष्पादित इत्युत्तरार्धस्यार्थः ।

तमिममर्थं विस्पष्टयति—

देवो ह्येष एतज्जीवातवे कृतो यदग्निः, इति ।

योऽग्निरस्त्येष देव एतेनोत्तरार्धपाठेन जीवनौषधाय संपादितो भवति ।

चतुर्थ्यां ऋचः पूर्वार्धं पठति—

इळायास्त्वा पदे वयं नाभा पृथिव्या अधीति, इति ।

पृथिव्या नाभा भूमिस्थानात्प्रागुत्तरवेद्यां नाभिस्थानीये धिष्ण्ये हेऽग्ने त्वा निधीमहीति वक्ष्यमाणपदेन संबन्धः । नाभिरेव विशेष्यते—इळायाः पद इति । इळाशब्दो गोवाची । इळाख्यां देवतां प्रकृत्य गौर्वा अस्यै शरीरमिति श्रुतत्वात्। इळेऽन्ने सरस्वतीति वाङ्नामसु श्रुतत्वात्। तस्याः पदं घृतनिष्पीडनेन प्रशस्तं सा यत्र यत्र न्यक्रामत्ततो घृतमपीडयत इति श्रुतेः । तत्पदरूपत्वविशेषणोत्तरवेदिनाभिः प्रशस्यते । यद्वा सोमक्रयण्या गोपदपांसुरस्यां नाभौ प्रक्षिप्यत इति तत्पदरूपत्वम् ।

नाभेः पदरूपत्वं विशदयति—

एतद्वा इळायास्पदं यदुत्तरवेदीनाभिः, इति ।

तृतीयं पादमनूद्य व्याचष्टे—

जातवेदो निधीमहीति निधास्यन्तो ह्येनं भवन्ति, इति ।

---

१ ऋ. ३-२९.४ ।

एनमग्निं वेदीनाभौ निधास्यन्तः स्थापयितुमुद्युक्ता भवन्त्यृत्विजस्तस्मान्निधीमहीत्युपपन्नम् ।

चतुर्थं पादमनूद्य व्याचष्टे-

अग्ने हव्याय वोढवऽव इति
हव्यं हि वक्ष्यन्भवति, इति ।

हेऽग्ने हविर्वोढुं त्वां निधीमहीति पूर्वत्रान्वयः । हव्यं वक्ष्यन्वोढुमुद्युक्तो भवन्नग्निस्तस्माद्वोढव इत्येतदुचितम् ।

पञ्चम्या ऋचः पूर्वार्धं पठति-

'अग्ने विश्वेभिः स्वनीक देवैरूर्णा-
वन्तं प्रथमः सीद योनिमिति, इति ।

स्वनीक शोभनसैन्योपेत हेऽग्ने विश्वेभिः सर्वैर्देवैः सह त्वं प्रथमो मुख्यः सन्नूर्णावन्तमूर्णायुक्तमुत्तरवेदिनाभिस्थानं सीद प्राप्नुहि ।

तत्पाठेनोक्तार्थसिद्धिं दर्शयति-

विश्वैरेवैनं तद्देवैः सहाऽऽसादयति, इति ।

तृतीयचतुर्थपादौ क्रमेणानूद्य व्याचष्टे-

कुलायिनं घृतवन्तं सवित्र इति कुलायमिव ह्येत-
द्यज्ञे क्रियते यत्पैतुदारवाः परिधयो गुग्गुलूर्णा-
स्तुकाः सुगन्धितेजनानीति यज्ञं नय यजमानाय
साध्विति यज्ञमेव तदृजुधा प्रतिष्ठापयति, इति ।

कुलायो नीडं पक्ष्यादिनिवासस्थानसदृशं तद्वानयं यज्ञो घृतवान् । तं घृतवन्तं यज्ञं सवित्रे प्रेरकायानुष्ठात्रे यजमानाय तदुपकारार्थं साधु नय सत्य निष्पादय । तत्कुलायित्वं तृतीयपादेऽभिहितम् । तत्कुलायमिवेत्यादिना स्पष्टी क्रियते । पितुदारुः खदिरवृक्ष इत्येके । देवदारुवृक्ष इत्यन्ये तत्संबन्धिनः पैतुदारवाः परिधयोऽस्यामुत्तरवेद्यां स्थाप्यन्ते । गुग्गुलु प्रसिद्धं धूपसाधनम् । ऊर्णास्तुका अविसंबन्धिरोमविशेषाः । सुगन्धितेजनं तृणविशेषः । यस्य मूलानि घर्मकाले पानीयमध्ये स्थाप्यन्ते । एत उत्तरवेद्यां स्थापिताः संभाराः । यथा कुलायः काष्ठतृणादिभिर्निष्पाद्यते तद्वदत्र यज्ञ परिधिकाष्ठादिसद्भावा

---

१ ऋ. ६-१५-१६ ।

त्कुलायित्वम् यज्ञं नयेति चतुर्थपादे यद्यदुक्तं तेन यज्ञमेव तदृजुधा, ऋजुप्रकारेण प्रतिष्ठितं करोति

षष्ठ्या ऋचः प्रथमं पादं पठित्वा व्याचष्टे—

'सीद होतः स्व उ लोके चिकित्वान्त्यग्निर्वै देवानां होता तस्यैष स्वो लोको यदुत्तरवेदीनाभिः, इति ।

हे होतर्होमनिष्पादकाग्ने चिकित्वान्विज्ञानवांस्त्वं स्व उ लोके स्वकीय एव स्थाने उत्तरवेदिनाभिरूपे सीदोपविश । अग्नेर्देवहोतृत्वादुत्तरवेदिनाभेस्तदीयस्थानत्वाच्च प्रथमपादार्थ उपपन्नः ।

द्वितीयपादमभूद्य तत्रत्यस्य यज्ञशब्दस्य यजमानपरत्वं दर्शयति—

सादया यज्ञं सुकृतस्य योनाविति यजमानो वै यज्ञो यजमानायैवैतामाशिषमाशास्ते, इति ।

यज्ञं यष्टारं सुकृतस्य योनौ पुण्यकर्मणां स्थाने सादय हेऽग्ने स्थापय । इज्यत इति व्युत्पत्त्या यज्ञशब्दः सर्वत्र यागवाची । इह तु यजतीति व्युत्पत्त्या यष्टारमाचष्टे । अतस्तदर्थमेवाऽऽशीः प्रार्थिता भवति ।

उत्तरार्धमनूद्य तत्रत्यस्य वयःशब्दस्य प्राणवाचित्वं दर्शयति—

देवावीर्देवान्हविषा यजास्यग्ने बृहद्यजमाने वयो धा इति प्राणो वै वयः प्राणमेव तद्यजमाने दधाति, इति ।

देवान्वेति कामयत इति देवावीर्देवप्रिय हेऽग्ने त्वं देवप्रियत्वाद्देवान्हविषा यजासि पूजयसि । यजमाने वयः प्राणं बृहदाधिक्यं यथा भवति तथा धाः, धेहि स्थापय । अत्र वयःशब्देन प्राण उपलक्ष्यते । बाल्यादिवयोविशेषहेतोरायुषो निमित्तत्वात् 'यावदस्मिञ्शरीरे प्राणो वसति तावदायुः' इति श्रुतेः । तस्मादुत्तरार्धपाठेन प्राणमेव यजमाने स्थापयतीति ।

सप्तम्या ऋचः प्रथमपादमनूद्य व्याचष्टे—

'नि होता होतृषदने विदान इत्यग्निर्वै देवानां होता तस्यैतद्धोतृषदनं यदुत्तरवेदीनाभिः, इति ।

होता होमनिष्पादकोऽग्निस्तादृशस्य तस्य होतुः सदने योग्यस्थान उत्तर-

---

१. ऋ. ३-२९-८ ॥ २ ऋ. २-९-१ ॥

वेदिनाभिरूपे विदान क्रियमाणं कर्म विचारयन् । असदादीति वक्ष्यमाणेनान्वयः । अग्निर्वा इत्यादिव्याख्यानं विस्पष्टम् ।

द्वितीयं पादमनूद्यासदादिति पदं व्याचष्टे-

त्वेषो दीदिवां असदत्सुदक्ष इत्या-
सन्नो हि स तर्हि भवति, इति ।

कीदृशोऽग्निः । त्वेषः स्वयं दीप्यमानः । दीदिवानन्येषामपि दीपकः । सुदक्षः सुष्ठु कुशलः । तादृशोऽग्निरासन्नो वेदिता भवति । स तर्हि तस्मिन्प्रणयनकाले सोऽग्निर्यस्मादुत्तरवेदिनाभेरासन्नस्तस्मादसददित्युचितम् ।

तृतीयपादमनूद्य वसिष्ठशब्दार्थं दर्शयति-

अदब्धव्रतप्रमतिर्वसिष्ठ इत्याग्निर्वै देवानां वसिष्ठः, इति ।

अदब्धे हिंसारहिते व्रते कर्मणि प्रकृष्टा मतिर्यस्याग्नेः सोऽयमदब्धव्रत प्रमतिः । वसिष्ठोऽतिशयेन निवासहेतुः । हविर्वहनेन देवानां स्वस्वस्थाने निवास हेतुत्वादग्नेर्वसिष्ठत्वम् ।

चतुर्थं पादमनूद्य व्याचष्टे-

सहस्रंभरः शुचिजिह्वो अग्निरित्येषा ह वा अस्य
सहस्रंभरता यदेनं सन्तं बहुधा विहरन्ति, इति ।

अयमग्निर्बहुषु धिष्ण्येषु विहृतः सन्नेकस्वरूपभरणात्सहस्रंभरः । मन्त्रपूत हविःस्वीकारेण शुचिजिह्वः शुद्धा जिह्वा यस्यासौ शुचिजिह्वः । स्वरूपेणैकमेव सन्तमग्निमृत्विजो बहुधिष्ण्येषु बहुधा विहरन्तीति यदस्ति, एषैवाग्ने सहस्रंभरता ।

वेदनं प्रशंसति-

प्र ह वै साहस्रं पोषमाप्नोति य एवं वेद, इति ।

अत्र सहस्रसंख्योपेतं पोषं गोसुवर्णादिपुष्टिं वेदिता प्राप्नोति ।

अष्टमीमृचं विधत्ते-

त्वं दूतस्त्वमु नः परस्पा इत्युत्तरया परिदधाति, इति ।

त्वं दूत इत्यनयाग्न्तिमयाग्निप्रणयनीया ऋचः समापयेत् । हेऽग्ने त्वं दूतोऽसि 'अग्निर्देवानां दूत आसीत्' इति श्रुतेः । त्वमेव नोऽस्माकं परस्पा अतिशयेन पालयिताऽसि ।

---

१ ऋ, २-९-२ ॥

अवशिष्टं पादत्रयं पठति -

त्वं वस्य आ वृषभ प्रणेता । अग्ने तोकस्य नस्तने तनूनामप्रयुच्छन्दीद्यद्बोधि गोपा इति, इति ।

हे वृषभ श्रेष्ठाग्ने त्वमास्मन्वाद्वस्यो निवासहेतुः प्रणेता बहुषु कर्मसु प्रेरको नोऽस्माकं तोकस्यापत्यस्य तनूनां शरीराणां च तने विस्तारेऽप्रयुच्छन्प्रमाद-मकुर्वन्दीद्यत्प्रकाशयन्गोपा रक्षकः सन्, बोधि बुध्यस्व सर्वदा चित्तेऽनुगृह्णा-णेत्यर्थः ।

उक्तार्थागृयं प्रशंसयति -

अग्निर्वै देवानां गोपा अग्निमेव तत्सर्वतो गोपारं परि-दत्त आत्मने च यजमानाय च यत्रैवं विद्वानेतया परिदधात्यथो संवत्सरीणामेवैतां स्वस्तिं कुरुते, इति ।

यत्र यस्मिन्कर्मणि एवमुक्तं मन्त्रमहिमानं विद्वानेतयाऽन्तिमया समापयति स होताऽग्नेर्देवरक्षकत्वमभिप्रेत्याऽऽत्मार्थं यजमानार्थं चाग्निमेव सर्वतो रक्षकं परिदत्ते स्पी करोति । किंच । संवत्सरीणामेमास्मिन्संवत्सरे निरन्तरमेवैतां स्वास्तिं क्षेमं कुरुते ।

न्यूनाधिकसंख्याभ्रमं व्युदसितुमाह-

ता एता अष्टावन्वाह रूपसमृद्ध्या एतद्वै यज्ञस्य सभृद्धं यद्रूपसमृद्धं यत्कर्म क्रियमाणमृगाभिवदति, इति ।

प्रणीयमानस्यमाग्नेः प्रकाशकत्वादेतासां रूपसमृद्धिः ।

आद्यन्तयोर्ऋचोरावृत्तिं विधाय प्रशंसति—

तासां त्रिः प्रथमामन्वाह त्रिरुत्तमां ता द्वादश संप-द्यन्ते द्वादश वै मासाः संवत्सरः संवत्सरः प्रजा-पतिः प्रजापत्यायतनाभिरेवाऽऽप्नोति य एवं वेद त्रिः प्रथमां त्रिरुत्तमामन्वाह यज्ञस्यैव तद्धृत्यै नह्यति स्थेम्ने बलायौजसे संसाय ॥ २८ ॥ इति ।

पूर्ववद्व्याख्येयम्-

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे ऐतरेय-ब्राह्मणभाष्ये पञ्चमाध्याये द्वितीयः खण्डः ॥ २ ॥ (२८)

अथ हविर्धानप्रवर्तनीया ऋचो विधातुमादौ प्रैषं विधत्ते-

हविर्धानाभ्यां प्रोह्यमाणाभ्यामनुब्रूहीत्याहाध्वर्युः, इति ।

हविः सोमरूपं धत्तो धारयत इति हविर्धाने द्वे शकटे । तयोः स्वरूपमापस्तम्बो दर्शयति-'प्रयुक्तः पूर्वे शकटे बद्धयुगे प्रकटितशम्ये प्रक्षाल्य तयोः प्रथममथितान्विस्रस्य नवान्प्रज्ञातान्कृत्वाऽग्रेण प्राग्वंशमभितः पृष्ठ्यामव्यपनयन्परिश्रिते सच्छिद्रिणी अवस्थापयति' इति । तयोर्हविर्धानयोः प्राचीनवंशस्य पुरोभागमुपक्रम्योत्तरदेशपर्यन्तं नयनं प्रवर्तनं तदपि स एवाऽऽह-'प्राची प्रेतमध्वरमित्युक्तं गृह्णन्तं प्रवर्तयन्ति, इति । तत्प्रवर्तनकालेऽध्वर्युर्होतारं प्रति हविर्धानाभ्यामित्यादिप्रैषमन्त्रं प्रब्रूयात् ।

होत्राऽनुवचनीयानामृचां मध्ये प्रथमामृचं विधत्ते-

युजे वां ब्रह्म पूर्व्यं नमोभिरित्यन्वाह ब्रह्मणा वा एते देवा अयुञ्जन यद्धविर्धाने ब्रह्मणैवैने एतद्युङ्क्ते न वै ब्रह्मण्वद्रिष्यति, इति ।

हे हविर्धाने वां युवां ब्रह्म युजे ब्रह्मणा युनक्तीत्येवं मन्त्रे यदुक्तमेतत्पाठेन ब्राह्मणमुखेनैव हविर्धाने युक्ते भवतः । पूर्वं देवैस्तथा कृतत्वात् । एतद्युक्तं ब्रह्मण्वद्ब्राह्मणोपेतं कर्म नैव विनश्यति तस्माद्युक्तोऽयं मन्त्रः

द्वितीयाद्यास्तिस्र ऋचो विधत्ते-

प्रेतां यज्ञस्य शंभुवेति तृचं द्यावापृथिवीयमन्वाह, इति ।

मध्यमायामृचि द्यावा नः पृथिवी इमामिति श्रूयमाणत्वाद्यं तृचो द्यावापृथिवीयः ।

अस्य तृचस्य हविर्धानयोर्विषादकत्वाभावाद्वैयधिकरण्यमित्याक्षिप्य समाधत्ते -

तदाहुर्यद्धविर्धानाभ्यां प्रोह्यमाणाभ्यामनुवाचाऽऽहाथ कस्मात्तृचं द्यावापृथिवीयमन्वाहेति द्यावापृथिवी वै देवानां हविर्धाने आस्तां ते उ एवाद्यापि हविर्धाने ते हीदमन्तरेण सर्वं हवि-

---

१ ऋ. १०-१३-१ ॥ २ ऋ. २-४१-१९ ॥

यदिदं किंच तस्मात्तृचं द्यावापृथिवीयमन्वाह, इति ।

यद्यप्यत्र हविर्धानयोरनुकूलया वाचा प्रैषमाह तथाऽपि द्यावापृथिवीयस्तृचो न व्यधिकरणः पुरो द्यावापृथिव्योरेव हविर्धानत्वात् । अद्यापि द्यावापृथिव्यावेव हविर्धाने । तत्कथमिति चेदुच्यते । यस्माल्लोके यत्किंचिद्धविरस्ति तदिदं सर्वं ते अन्तरेण द्यावापृथिव्योर्मध्ये वर्तते तस्माद्द्यावापृथिव्योर्हविर्धानत्वात्तदीयस्य तृचस्यानुवचनं युक्तम् ।

पञ्चमीमृचं विधत्ते–

यमे इव यतमाने यदैतामिति यमे इव ह्येते यतमाने प्रबाहुगितः, इति ।

यमशब्द इकस्या मातुरुदरे सहोत्पन्नस्य शरीरद्वयस्य वाचकः यमे इव यथा लोके तादृश्यौ हे कन्यके सह वर्तेते तथेते शकटे यतमाने जगदुपकारार्थं प्रयत्नं कुर्वती यस्मात्कारणादैवतमागतवती इत्येतस्व पादस्यार्थः प्रसिद्ध इति हिशब्दो द्योतयति । युगपदुत्पन्नकन्यकाद्वयवदेतेते प्रबाहुकपरस्परसादृश्येन सहैव वर्तमाने इतः प्रचरतः । तदेतल्लोके प्रसिद्धमेव दृश्यते ।

द्वितीयपादमनूद्य व्याचष्टे

प्र वां भरन्मानुषा देवयन्त इति देवयन्तो ह्येने मानुषाः प्रभरन्ति, इति ।

यच्छब्दस्व पूर्वपादेऽभिहितत्वात्तच्छब्दोऽस्मिन्पादेऽध्याहर्तव्यः । यस्मात्पाण्युपकारार्थं प्रयतमाने स्थिते तस्मात्कारणाद्धे यन्तो यष्टव्यत्वेन देवानिच्छतो मानुषा ऋत्विग्यजमाना हे हविर्धाने वां युवां प्रभरन्प्रकर्षेण संपादयन्ति । एतत्पदार्थस्य याज्ञिकप्रसिद्धिद्योतनार्थो हिशब्दः ।

द्वितीयार्धमनूद्य व्याचष्टे–

आसीदतं स्वमु लोकं विदाने स्वासस्थे भवतामिन्दवे न इति सोमो वै राजेन्दुः सोमायैवैने एतद्राज्ञ आसदेऽचीक्लृपत्, इति ।

हे हविर्धाने उभे युवां प्रवर्तमाने सती स्वमु लोकं स्वकीयमेव स्थानं

---

१ ऋ. १०-१३-२ ॥

विदाने ज्ञानवती आसीदतं तत्र स्थितिं प्राप्नुतं नोऽस्मदीयायेन्दवे सोमाय स्वासस्थे सुशोभन आसये स्थितिं प्राप्ते भवतम् । अत्रेन्दुशब्देन सोमो राजोच्यते । अत एव तत्पाठेन सोमराजार्थमासद आसा(स)दनायावस्थानायाचीकॢपत्कल्पितवान्भवति ।

षष्ठीमृचं विवृत्ते-

'अधि द्वयोरदधा उक्थ्यं वच इति, इति ।

हविर्धानाख्ययोः शकटयोरुपरि सोमस्यावस्थानाय गृहाकारेण परितो वेष्टनमुपर्याच्छादनं यत्क्रियते तदेतदाच्छादनं छदिःशब्दवाच्यम् । तादृशे द्वे छदिषी द्वयोर्हविर्धानयोरवस्थाप्य तयोश्छदिषोरुपरि तृतीयं छदिर्हविर्धानयोरुदाहृतयोरवस्थाप्यते । तदेतत्तैत्तिरीया आमनन्ति-'दण्डो वा औदुम्बरस्तृतीयस्य हविर्धानस्य वषट्कारेणाक्षमाच्छिनद्यत्तृतीयं छदिर्हविर्धानयोरुदाहियते तृतीयस्य हविर्धानस्यावरुद्ध्यै' इति । तदेतत्तृतीयच्छदिरवस्थापनम् । एतन्मन्त्रयथमपादे प्रस्तूयते । यद्द्वयोश्छदिषोरध्यदधा उपरि तृतीयं छदिर्निधीयते तदिदमुक्थ्यं वच उक्थ्यशस्त्रनामकं यज्ञाङ्गिकं कर्म तद्योग्यं वचो मन्त्रपाठस्तद्रूपमिदं छदिरिति च्छदिषः प्रशंसा ।

अस्मिन्पादे पूर्वभागस्यार्थो याज्ञिकप्रसिद्ध इत्यभिप्रेत्य हिशब्दयुक्तेन वाक्येन व्याचष्टे-

द्वयोर्ह्येतत्तृतीयं छदिरधि निधीयते, इति

उत्तरभागं व्याचष्टे-

उक्थ्यं वच इति यदाह यज्ञियं वै कर्मोक्थ्यं वचो यज्ञमेवैतेन समर्धयति, इति ।

उक्थ्यं वच इति यत्पदद्वयं मन्त्रो ब्रूते तेन पदद्वयेन शस्त्रपाठाख्यं यज्ञसंबन्धिकर्माच्यते । तस्मादेतेन मन्त्रपाठेन यज्ञमेव समृद्धं करोति ।

द्वितीयतृतीयपादौ पठति-

यतस्रुचा मिथुना या सपर्यतः । असंयत्तो व्रते ते क्षेति पुष्यतीति, इति ।

यदा तृतीयं छदिर्निधीयते तदानीं ये हविर्धाने स्तस्ते उभे यतस्रुचा नियतस्रुग्युक्ते हुतसोमे मिथुना मिथुनवत्परस्परयुक्ते सपर्यतः पूजिते

भवतः । अयमर्थः । द्वयोरुपरि तृतीये छदिषि व्यवस्थापिते सति विवाहहोमादूर्ध्वं परस्परसंयुक्तौ मिथुनरूपौ स्त्रीपुरुषौ यथा पूज्येते तथा हविर्धाने हविषा पूजिते भवत इति । संपूर्वो यतिधातुः संग्रामे वर्तते । तेन क्रौर्यगुणो लक्ष्यते । संयत्तः क्रूरः । असंयत्तः शान्तः । अत्रेन्द्रसंबोधनमध्याहर्तव्यम् । हे इन्द्र शान्तोऽध्वर्युस्ते व्रते त्वदीये कर्मणि क्षेति निवसति पुष्यति तच्च कर्म पुष्टं करोति ।

एतस्य तृतीयपादस्य तात्पर्यं दर्शयति—

यदेवादः पूर्वं यत्तवत्पदमाह तदेवैतेन शान्त्या शमयति, इति ।

यत्तवत्पदवाच्यस्तृतीयः पादः । अत्र व्रतपदात्पूर्वं यदेवादो यदिदं तत्तवत्पदं यत्तशब्दोपेतं संयत्त इति पदं तेन युद्धवाचिना यत्क्रौर्यं द्योतितं तदेव क्रौर्यमेतेनासंयत्तः पुष्यतीति पदद्वयेन प्रतीतया शान्त्या होता शमयति ।

चतुर्थपादमनूद्य व्याचष्टे—

भद्रा शक्तिर्यजमानाय सुन्वत इत्याशिषमाशास्ते, इति ।

सुन्वते सोमाभिषवं कुर्वते यजमानाय भद्रा कल्याणरूपा शक्तिर्भवत्विति शेषः । अनेन पादेन प्रार्थनीयं प्रार्थयते ।

सप्तमीमृचं विधत्ते—

'विश्वा रूपाणि प्रतिमुञ्चते कविरिति विश्वरूपामन्वाह, इति ।

कविर्मेधावी मन्त्रप्रतिपाद्यो देवः सविता विश्वा रूपाणि शुक्लकृष्णादीनि बहूनि रुपाण्याभरणत्वेन प्रतिमुञ्चते स्वशरीरे स्थापयति । अत्र रूपशब्दस्य विश्वशब्दस्य च विद्यमानत्वादियमृग्विश्वरूपशब्दाभिधेया ।

तस्या अनुवचने होतुः किंचिदितिकर्तव्यतामाह—

सरराट्यामीक्षमाणोऽनुब्रूयात्, इति ।

हविर्धानमण्डपस्य चिकीर्षितस्य प्राच्यां द्वारि बन्धनीया दर्भमाला रराटी । द्वितीयार्थे सप्तमी । तां दर्भमालां पश्यन्ननुब्रूयात् ।

अस्या ऋचो रराट्यनुरूपत्वं दर्शयति—

विश्वामिव हि रूपं रराट्याः शुक्लमिव च

---

१. ऋ. ५.८२.२ ॥

कृष्णमिव च, इति

दर्भमालाया अत्यन्तशुष्कास्तृणविशेषाः शुक्ला दृश्यन्ते । अशुष्कास्तु कृष्णा अतो विश्वमिव बहुविधमिव दर्भमालायाः स्वरूपं तेन विश्वा रूपाणीत्ययं मन्त्रोऽनुकूलः ।

होतुरेतद्वेदनं प्रशंसति-

विश्वं रूपमवरुन्ध आत्मने च यजमानाय च
यत्रैवं विद्वानेतां रराट्यामीक्षमाणोऽन्वाह, इति ।

विश्वं रूपं प्रजापश्वादिविधवस्तुस्वरूपम् ।

अष्टम्याऽनुवचनसमाप्तिं विधत्ते-

[1]परि त्वा गिर्वणो गिर इत्युत्तमया परिदधाति, इति ।

परिधानस्य कालं विधत्ते-

स यदैव हविर्धाने संपरिश्रिते
मन्येताथ परिदध्यात्, इति ।

यस्मिन्नेव काले प्रवर्तिते द्वे शकटे संपरिश्रिते स्वस्थानेऽवस्थाप्य सम्यगाच्छादिते इति स होता मन्येत तत्तदानीं समापयेत् ।

होतुरेतद्वेदनं प्रशंसति-

अनग्नंभावुका ह होतुश्च यजमानस्य च
भार्या भवन्ति यत्रैवं विद्वानेतया हविर्धानयोः संपरिश्रितयोः परिदधाति इति ।

अनग्नंभावुका आच्छादनबाहुल्यसंपत्त्या नग्नत्वरहिताः ।

हविर्धानयोः परिश्रयणकालं ज्ञात्वा परिदध्यादित्युक्तं स कालः कथं ज्ञायत इत्याशङ्क्याऽऽह-

यजुषा वा एते संपरिश्रियेते यद्धविर्धाने यजुषैवैने एतत्परिश्रयन्ति, इति ।

यद्धविर्धाने ये शकटे विद्येते एते यजुषा वै यजुर्मन्त्रेणैव संपरिश्रिते भवतः, तदेव कथमिति तदुच्यते । अध्वर्यव एते हविर्धाने यजुषैव परिश्रयन्तीत्येतत्प्र-

---

१. ऋ. १-१०-१२ ॥

सिद्धमिति शेषः । तदेतदापस्तम्बो दर्शयति ' विष्णोः पृष्ठमसीति । तेषु मध्यमं छदिरध्यूहति । अरत्निविस्तारं नवायामम् ' इति ।

परिधानस्य कालं विधत्ते -

तौ यदैवाध्वर्युश्च प्रतिप्रस्थाता चोभयतो मेथ्यौ निहन्यातामथ परिदध्यात्, इति ।

अध्वर्युर्दक्षिणस्य हविर्धानस्य मेथीमीषाग्रभागावस्थापनकाष्ठं स्थापयति । देतच्छाखान्तरे श्रूयते—' दिवो वा विष्ण उत वा पृथिव्या इत्याशीःपदयचां दक्षिणस्य हविर्धानस्य मेथीं निहन्ति ' इति । उत्तरस्य तु प्रतिप्रस्थाता करोति । तदेतदुभयमापस्तम्बो दर्शयति-' दिवो वा विष्ण इत्यध्वर्युर्दक्षिणस्य हविर्धानस्य मेथीं निहन्तीति । तस्यामीषां निहन्ति । एवमुत्तरस्य प्रतिप्रस्थाता विष्णोर्नु कमित्युक्त्वाऽस्य हविर्धानस्योत्तरं कर्णं तदात्सन्निति । तस्मिन्मेथीनिहननकाले परिदध्यात् ' इति ।

यद्यप्ययं कालः परिश्रयणकालात्प्राचीनस्तथाऽपि तत्समीपवर्तित्वात्पूर्वविधिना सह नात्यन्तं विरोध इत्येतद्दर्शयति—

अत्र हि ते संपरिश्रिते भवतः, इति ।

अत्र मेथीनिहननदेशे तत्समीपवर्तिनि काले परिश्रयणं क्रियते ।

ऋक्संख्यादिकं दर्शयति—

ता एता अष्टावन्वाह रूपसमृद्धा एतद्वै यज्ञस्य समृद्धं यद्रूपसमृद्धं यत्कर्म क्रियमाणमृगभिवदति तासां त्रिः प्रथमामन्वाह त्रिरुत्तमां ता द्वादश संपद्यन्ते द्वादश वै मासाः संवत्सरः संवत्सरः प्रजापतिः प्रजापत्यायतनाभिरेवाऽऽभी राप्नोति य एवं वेद त्रिः प्रथमां त्रिरुत्तमामन्वाह यज्ञस्यैव तद्धृत्यै नह्यति स्थेम्ने बलायाविस्रंसाय ॥ २९ ॥ इति ।

पूर्ववद्व्याख्येयम् ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऐतरेयब्राह्मणभाष्ये पञ्चमाध्याये तृतीयः खण्डः ॥ ३ ॥ (२९) ।

20725

अथाग्नीषोमप्रणयनीया ऋचो विधातुमादौ प्रैषमन्त्रं विधत्ते—

अग्नीषोमाभ्यां प्रणीयमाना-
भ्यामनुब्रूहीत्याहाध्वर्युः, इति।

योऽयमग्निः प्राचीनवंशाख्यायाः शालाया मुखे द्वारभागे पूर्वसिद्धाहवनीयरूपेणावतिष्ठते तस्माच्छालामुखीयादग्नेः सकाशात्कियानप्याग्नीध्रीये धिष्ण्ये नेतव्यः। सोमश्च पूर्वं शालामुखीयसमीपेऽवस्थितस्तेनाग्निना सहाऽऽनीतः सन्पुनरपि हविर्धानमण्डपे नेतव्यः। तदिदमग्नीषोमप्रणयनं तदर्थं होतारं प्रत्यध्वर्युः प्रैषमन्त्रं ब्रूयात्। तदेतत्सर्वमापस्तम्ब आह—'शालामुखीये प्रणयनीयमिध्ममादीप्य सिकताभिरुपयम्याग्नीषोमाभ्यां प्रणीयमानाभ्यामनुब्रूहीति संप्रेष्यति' इति। अग्निप्रथमाः सोमप्रथमा वा प्राचीमभिप्रव्रजत्याग्नीध्रीयेऽग्निं प्रतिष्ठाप्येति' स च सोमो जिगाति गातुविदित्यपरया द्वारा हविर्धानं राजानं प्रपादयतीति च।

अग्नीषोमप्रणयनीयास्वृक्षु प्रथमामृचं विधत्ते—

साऽवीर्हि देव प्रथमाय पित्र इति सावित्रीमन्वाह, इति।

सेयं शाखान्तरगतत्वात्सूत्रकारेण पठिता। तस्यास्तृतीयपादेऽस्मभ्यं सवितरिति श्रुतत्वादियं सावित्री।

अत्र वैयधिकरण्यमाशङ्क्य समाधत्ते—

तदाहुर्यदग्नीषोमाभ्यां प्रणीयमानाभ्यामनुवाचाऽऽहाथ कस्मात्सावित्रीमन्वाहेति सविता वै प्रसवानामीशे सवितृप्रसूता एवैनौ तत्प्रणयन्ति तस्मात्सावित्रीमन्वाह, इति।

पूर्ववद्व्याख्येयम्।

द्वितीयां विधत्ते—

'प्रैतु ब्रह्मणस्पतिरिति ब्राह्मणस्पत्यामन्वाह, इति।

अत्रापि वैयधिकरण्यमाशङ्क्य समाधत्ते—

तदाहुर्यदग्नीषोमाभ्यां प्रणीयमानाभ्यामनुवाचाऽऽहाथ

---

१ ऋ, १-४०-३ ॥

कस्माद्ब्राह्मणस्पत्यामन्वाहेति ब्रह्म वै बृहस्पतिर्ब्रह्मै-वाऽऽभ्यामेतत्पुरोगवमकर्ण वै ब्रह्मण्वाद्रिष्यति, इति ।

पुरोगवं ब्राह्मणमेव पुरोगन्तारमकः करोति ब्राह्मणोऽस्य कर्मणो विनाशभावात्तद्युक्तम् ।

द्वितीयपादमुपजीव्य तामृचं प्रशंसति—

प्र देव्येतु सूनृतोद्य ससूनृतमेव तद्यज्ञं करोति तस्माद्ब्राह्मणस्पत्यामन्वाह, इति ।

सूनृता प्रियवचनरूपा वाग्देवी मैतु ब्रह्मणा सह पुरो गच्छत्विति द्वितीयपादे श्रूयते तत्पाठेन यज्ञं ससूनृतमेव प्रियवचनयुक्तमेव करोति ।

तृतीयाद्यास्तिस्र ऋचो विधत्ते—

होता देवो अमर्त्य इति तृचमाग्नेयं गायत्रमन्वाह सोमे राजानि प्रणीयमाने, इति ।

जुहोत्यास्मिन्नन्नाविति होताऽग्निः । अतो होतृशब्दश्रवणादिदमाग्नेयम् । आग्नेयस्य सोमप्रणयनानुकूल्यं दर्शयति—

सोमं वै राजानं प्रणीयमानमन्तरेणैव सदो हविर्धाना-न्यसुरा रक्षांस्यजिघांसंस्तमग्निर्मायायाऽत्यनयत्, इति ।

यदिदं सदोनामकं मण्डपं यच्च हविर्धाननामकं मण्डपं शकटद्वयं च तान्यन्तरेण तेषां मध्येऽसुराश्च रक्षांसि च नीयमानं सोमं हन्तुमैच्छन् । तं भीतं सोममग्निः स्वकीयया मायया तानसुरांस्तानि रक्षांस्यतिक्रम्य नीतवान् । तस्मात्सोमप्रणयनेऽप्याग्नेयस्य योग्यत्वमस्ति । असुराणां रक्षसां चावान्तरजातिभेदो द्रष्टव्यः ।

प्रथमाया ऋचो द्वितीयपादमनूद्य व्याचष्टे—

पुरस्तादेति मायायेति मायया हि स तमत्यनयत्तस्माद्यस्याग्निं पुरस्ताद्धरन्ति, इति ।

मायया सहितोऽग्निः पुरस्ताद्गच्छतीति द्वितीयपादे श्रूयते । यस्मात्सोऽग्निर्मायया शक्त्या भीतिस्थानमतिलङ्घ्य तं सोममनयत्तस्मात्तु तस्मादेव कारणादस्य सोमस्य पुरस्तादाग्नीध्रपर्यन्तमग्निमृत्विजो हरन्ति ।

---

१ ऋ. ३ २७. ७ ॥

षष्ठमारभ्य चतस्र ऋचो विधत्ते—

[1]उप त्वाऽग्ने दिवे दिव उप प्रियं पनि-
प्रतामिति तिस्रश्चैकां चान्वाह, इति ।

उप त्वाऽग्न इत्यादिकाः क्रमेणाऽऽम्नाताास्तिस्र उप प्रियमित्येका ।

उक्तस्य तृचस्योक्तायाश्चैकस्या अनुवचनमुपपादयति—

[2]ईश्वरौ ह वा एतौ संयन्तौ यजमानं हिंसि-
तोर्यश्चासौ पूर्व उद्धृतो भवति यमु चैनमपरं
प्रणयन्ति तद्यत्तिस्रश्चैकां चान्वाह संजानाना-
वेवैनौ तत्संगमयति प्रतिष्ठायामेवैनौ तत्प्रति-
ष्ठापयत्यात्मनश्च यजमानस्य चाहिंसायै, इति ।

यश्चासावग्निः पूर्वमुद्धृतः पूर्वभावी सन्नुत्तरवेद्यामानीय स्थापितः । यमप्य-परमग्निमिदानीमाग्नीध्रीयं प्रति प्रणयन्ति । एतावुभावग्नी संयन्तौ ममै-वाऽऽहुतिरित्येवं संग्रामं कुर्वन्तौ यजमानं हिंसितोरीश्वरौ हिंसितुं समर्थौ । तथा सति यदि तिस्रश्चैकां चानुब्रूयात्तदानीमेतौ द्वावप्यग्नी संजानानावेव परस्परै-कमत्ययुक्तावेव कृत्वा संगमयत्यन्योन्यं संयोजयति । तिसृष्वृक्षु नमो भरन्त एमसीति पूर्वोद्धृतस्याग्नेर्नमस्कारः श्रूयते । एकस्यामृच्यगन्म निभ्रतो नम इति प्रणीयमानस्याग्नेर्नमस्कारः श्रुतस्तेन तुष्टौ परस्परद्वेषं परित्यजतः । तत्तथा सत्येतावुभावग्नी प्रतिष्ठायामेवोत्तरवेद्याग्नीध्रलक्षणस्वस्वोचितस्थान एव प्रतिष्ठा-पयति । तच्च होतुरात्मनश्च यजमानस्य च हिंसापरिहाराय भवति ।

दशमीमृचं विधत्ते—

[3]अग्ने जुषस्व प्रति हर्य तद्वच इत्या-
हुत्यां हूयमानायामन्वाह, इति ।

आहुतिस्तु यजुर्वेदविहिता । तयैवेत्यृचाऽऽग्नीध्रे जुहोति सुवर्गस्य लोक-

---

१. ऋ. १-२-७ ॥ २ ऋ. ९-६७-२९ ॥ ३. ऋ. १-१४५-७ ॥

स्याभिजित्या इति । सा चाऽऽपस्तम्बेन स्पष्टीकृता–' आग्नीध्रीयेऽग्निं प्रतिष्ठाप्याग्ने नयेत्यर्धमाज्यशेषस्य जुहोति ' इति । तदाहुतिकाले होताऽग्ने जुषस्वेत्येतामनुब्रूयात् ।

तामेतां प्रशंसति–

अग्नय एव तज्जुष्टिमाहुतिं गमयति, इति।

जुषस्वेति मन्त्रेऽभिधानादाहुतिमग्नेः प्रियं संपादयति ।

एकादशीमारभ्य तिस्र ऋचो विधत्ते–

[1]सोमो जिगाति गातुविदिति तृचं सौम्यं गायत्रमन्वाह सोमे राजनि प्रणीयमाने स्वयैवैनं तद्देवतया स्वेन च्छन्दसा समर्धयति, इति।

मन्त्रे सोमदेवताया एव प्रतिपाद्यत्वात्सोमात्मकस्वयं स्वकीयदेवता गायत्र्या सोमस्य द्युलोकादाहृतत्वाच्छन्दोऽपि स्वकीयम् ।

अस्य तृचस्यान्तिमं पादमादाय व्याचष्टे–

सोमः सधस्थमासदित्यास्तस्यन्हि स तर्हि भवति, इति ।

अयं सोमः सधस्थं हविर्धानाभ्यां सहावस्थानप्रदेशं प्राप्याऽऽसदद्दासत्रोऽभूत् । यत्मात्स सोमस्तर्हि तत्पादपाठकाल आसत्स्यन्भवति हविर्धानदेशस्याऽऽसन्नतां करिष्यन्वर्तते तस्मात्सधस्थमासददिति युक्तम् ।

अस्य तृचस्यानुवचनदेशं विधत्ते–

तदतिक्रम्यैवानुब्रूयात्पृष्ठत इ(ए)वाऽऽग्नीध्रं कृत्वा, इति ।

पूर्वोक्तायामाहुत्यामध्वर्युणा हूयमानायां होता ऋचमुपक्रम्यानुब्रुवाणो गच्छंस्तदाग्नीध्रस्थानमतिक्रम्यैवाऽऽग्नीध्रं पृष्ठत एव कृत्वा तं पादमनुब्रूयात् । अतिक्रम्येत्यस्यैव पृष्ठतः कृत्वेति व्याख्यानम् ।

चतुर्दशीमृचं विधत्ते–

[2]तमस्य राजा वरुणस्तमश्विनेति वैष्णवीमन्वाह, इति ।

व्रजं च विष्णुरिति चतुर्थपादे श्रुतत्वात् ।

१ ऋ. ३-६२-१३ ॥ २. ऋ. १-१५६-४ ॥

अवशिष्टं पादत्रयं पठति-

क्रतुं सचन्त मारुतस्य वेधसः । दाधार दक्षमुत्तमम-
हर्विदं व्रजं च विष्णुः सखिवाँ अपोर्णुत इति, इति ।

अस्या ऋचोऽयमर्थः । अस्य सौमस्योपनद्धस्य राजा स्वामी वरुणस्त्वं क्रतुं यागं सचत इत्यध्याहारः । अश्विना उभावश्विनौ देवौ मारुतो वायुर्वेधा ब्रह्मा च क्रतुं सचन्त समवयन्ति । मारुतस्य वेधस इति प्रथमार्थे षष्ठ्यौ । विष्णुर्देवो दक्षं देवानां तृप्तौ कुशलमत एवोत्तममहर्विदं श्रुत्या दिनाभिज्ञं सोमं दाधारं प्रणयनकाले धृतवान् । तथा विष्णुः सखिवान्सोमरूपेण सख्या युक्तवया तद्वान्व्रजं सोमस्थानं हविर्धानमपोर्णुतेऽपगताच्छादनं करोति सोमस्य प्रवेशाय द्वारं विवृणोतीत्यर्थः । विष्णुर्दाधारापोर्णुते चेति समुच्चयार्थचकारः ।

उक्तमन्त्रतात्पर्यं विस्पष्टयति-

विष्णुर्वै देवानां द्वारपः स ए-
वास्मा एतद्द्वारं विवृणोति, इति ।

पञ्चदशीमृचं विधत्ते-

[1]अन्तश्च प्रागा अदितिर्भवा-
सीति प्रपाद्यमानेऽन्वाह, इति ।

सोमे हविर्धानं प्राप्यमाणे सत्येतामृचमनुब्रूयात् ।

षोडशीमृचं विधत्ते-

[2]श्येनो न योनिं सदनं धिया कृतमित्यासन्ने, इति ।

आसन्ने हविर्धानं प्रति सोमे समीपवर्तिनि सत्येतामनुब्रूयात् । नकार उपमार्थः । यथा श्येनः पक्षी तत्र तत्र संचारं कृत्वा योनिं स्वस्थानं प्राप्नोति तथा धिया यजमानार्त्विग्बुद्ध्या कृतं संपादितं सदनं हविर्धानं प्रति सोम एषतीति वक्ष्यमाणेन संबन्धः ।

द्वितीयपादमनुवदति-

हिरण्यपावाः सदं देव एषतीति, इति ।

---

१. ऋ. ८-४८ २ ॥ २. ऋ. ९-७१ ६ ॥

'हिरण्ययं सुवर्णसदृशं कृष्णाजिनमासदमुपवेशनयोग्यं सोमो देव एषीति प्रामोति । इषु गताविति धातुः ।

हिरण्ययशब्दं व्याचष्टे—

हिरण्मयमिद ह वा एष एतद्देवेभ्य-
श्छदयति यत्कृष्णाजिनम्, इति ।

हविर्धानस्य शकटस्योपरि सोमस्थापनार्थं कृष्णाजिनमास्तृणन्ति । तथा चाऽऽपस्तम्ब आह 'दक्षिणस्य हविर्धानस्य नीडे पूर्ववत्कृष्णाजिनास्तरणं राज्ञः सादनम्' इति । यदेतत्कृष्णाजिनमस्ति तदेतद्धिरण्मयमिव ह वै सुवर्ण-निर्मितासनमिव देवार्थमेषोऽध्वर्युश्छदयत्यास्तृणाति । तस्मान्मन्त्रे हिरण्ययमित्युपपन्नम् ।

एतन्मन्त्रविधिमुपसंहरति—

तस्मादेतामन्वाह, इति ।

यस्मादासन्नदेशस्यानुकूलेयमृक्तस्मादेतामनुब्रूयात् ।

सप्तदश्या समापनं विधत्ते—

'अस्तभ्नाद्यामसुरो विश्ववेदा इति
वारुण्या परिदधाति, इति ।

चतुर्थपादे वरुणस्य व्रतानीति श्रवणादियं वारुणी ।

तस्याः सोमसंबन्धं दर्शयति—

वरुणदेवत्यो वा एष तावद्यावदु[illegible]
यावत्परिश्रितानि प्रषद्यते स्वयैवैनं तद्दे-
वतया स्वेन च्छन्दसा समर्धयति, इति ।

पूर्ववद्व्याख्येयम् ।

अथात्र नैमित्तिकमृगन्तरं विधत्ते—

तं यद्युप वा धावेयुरभयं [illegible]नेव। वन्दस्व
वरुणं बृहन्तमित्येतया परिदध्यात्, इति ।

---

१ क. ८-४२-१ ॥

तं यजमानमितरे बन्धवो जीवार्थिनो यद्युप वा धावेयुः प्र.प्नुयुः । अथवा वैरिभ्यो भीता अभयं यजमानसमीपे यदीच्छेरंस्तदानीमेवा वन्दस्वेत्येतया परिदध्यात् ।

होतुरेतद्वेदनप्रशंसापूर्वकमेतद्विधिमुपसंहरति—

यावद्भ्यो हाभयमिच्छति यावद्भ्यो हाभयं ध्यायति तावद्भ्यो हाभयं भवति यत्रैवं विद्वानेतया परिदधाति तस्मादेवं विद्वानेतयैव परिदध्यात्, इति ।

यत्र यागे यथोक्तार्थं विद्वान्होतैतया परिदध्यात्तत्र यजमानो यावद्भ्यो बन्धुभ्यो ह्रद्रोगपरिहाररूपमभयमिच्छत्यथवा वैरिभीतिपरिहाररूपमभयं ध्यायति तावः सर्वेभ्यस्तादृशमभयं भवति । तस्मादेवा वन्दस्वेत्यनयैव परिदध्यात् ।

मन्त्रगतसंख्यादिकं दर्शयति—

ता एताः सप्तदशान्वाह रूपसमृद्धा एतद्वै यज्ञस्य समृद्धं यद्रूपसमृद्धं यत्कर्म क्रियमाण-मृगभिवदति तासां त्रिः प्रथमामन्वाह त्रिरुत्तमां ता एकविंशतिः संपद्यन्त एकविंशो वै प्रजापतिर्द्वादश मासाः पञ्चर्तवस्त्रय इमे लोका असावादित्य एकविंशः इति ।

उक्तसंख्याप्रशंसार्थमेकविंशतिसंख्यापूरण आदित्ये बहून्गुणान्दर्शयति—

उत्तमा प्रतिष्ठा तद्वैवं क्षत्त्रं सा श्रीस्तदाधिपत्यं तद्ब्रह्मस्य विष्टपं तत्प्रजापतेरायतं तत्स्वाराज्यम्, इति ।

योऽयमादित्योऽस्मावुत्तमा प्रतिष्ठा । तल्लोकानां स्थैर्येणावस्थानात् । तदादित्यस्वरूपमेव दैवं क्षत्त्रं देवसंबन्धिनी क्षत्त्रजातिः । 'आदित्यो वै दैवं क्षत्त्रम्' इत्यन्यत्राभिधानात् । सा श्रीरादित्यप्राप्तिरेव भोग्यवस्तुसंपत्तिः । तदादित्यमण्डलमाधिपत्यं स्वामित्वप्रापकम् । 'आदित्य एषां भूतानामधिपतिः' इति श्रवणात् । तन्मण्डलं ब्रध्नस्याऽऽदित्यस्य विष्टपं स्थानभूतं तदेव मण्डलं प्रजापतेरप्यायतनं स्थानम् आदित्यमण्डले प्रजापत्युपासनस्याभिधानात् । तदेव मण्डलं स्वाराज्यं पारतन्त्र्याभावात् ।

उपसंहरति—

ऋध्नोत्येतमेवैताभिरेकविंशत्यैकविंशत्या ॥ ३० ॥ इति ।
इत्यैतरेयब्राह्मणे प्रथमपञ्चिकायां पञ्चमोऽध्यायः ॥ ५ ॥

एकविंशतिसंख्याभिरेताभिर्ऋग्भिरेतं यजमानं समृद्धं करोत्येव । अभ्यासोऽध्यायसमाप्त्यर्थः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऐतरेयब्राह्मणभाष्ये पञ्चमाध्याये चतुर्थः खण्डः ॥४॥ (३०) ।

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकवीरबुक्कणसाम्राज्यधुरंधरसायणाचार्यकृतौ प्रथमपञ्चिकायां
पञ्चमोऽध्यायः ॥ ५ ॥

इत्यैतरेयब्राह्मणे प्रथमपञ्चिका समाप्ता ॥ १ ॥
(पञ्चिकाङ्काः १ । अध्यायाङ्काः ५ । खण्डाङ्काः ३० ।)

अथ द्वितीयपञ्चिकाप्रारम्भः ।

षष्ठोऽध्यायः ।

राजसूयब्राह्मणमुक्तमादौ वह्नेः प्रणीतिप्रतिपादिकाश्च ।
तथा हविर्धानविवर्तनार्थाँ अग्नेश्च सोमस्य च यां ऋचः स्युः ॥

अथ षष्ठाध्यायेऽग्नीषोमीयपशुर्वक्तव्यः ।

तत्राऽऽदौ यूपं वक्तुमाख्यायिकामाह—

यज्ञेन वै देवा ऊर्ध्वाः स्वर्गं लोकमायंस्तेऽबिभयुरिमं नो दृष्ट्वा मनुष्याश्च ऋषयश्चानुप्रज्ञास्यन्तीति तं वै रूपेणैवायोपयंस्तं यद्यूपेनैवायोपयंस्तद्यूपस्य यूपत्वं तमवार्चीनाग्रं निमित्योर्ध्वा उदायंस्ततो वै मनुष्याश्च ऋषयश्च देवानां यज्ञवास्त्वभ्यायन्यज्ञस्य किंचिदेषिष्यामः प्रज्ञात्या इति ते वै यूपमेवाविन्दन्नवाचीनाग्रं निमितं ते विदुरनेन वै देवा यज्ञमयूयुपन्निति तमुत्खायोर्ध्वं न्यमिन्वंस्ततो वै ते प्र यज्ञमजानन्प्र स्वर्गं लोकम्, इति ।

पुरा कदाचिद्देवा ज्योतिष्टोमं यज्ञमनुष्ठाय तत्फलभूतं स्वर्गं प्राप्तास्तत्र चावस्थाय भीतिं प्राप्ताः । केनाभिप्रायेणेति स उच्यते । ये मनुष्या वर्णाश्रमधर्मप्रवृत्ता ये च ऋषयस्तपसि प्रवृत्तास्ते सर्वेऽप्यस्मदीयमिमं यज्ञं दृष्ट्वा स्वयमप्यनुष्ठाय स्वर्गं समागत्यास्मान्प्रज्ञास्यन्ति ततोऽस्मत्समा भविष्यन्ति । ततस्ते देवा भीता मनुष्याणामृषीणां च व्यामोहाय तमेव स्वकीयं यज्ञं यूपस्तम्भेनैवायापयन्मिश्रितवन्तः । अन्यथानुष्ठानरूपं भ्रममुत्पादितवन्त इत्यर्थः । यस्मात्कारणाद्यूपेनैव तं यज्ञमयोपयन्नन्यथा कृतवन्तस्तस्माद्योपनसाधनत्वाद्यूपनाम संपन्नम् । केन क्रमेण व्यामोहितवन्त इति । उच्यते । तं यूपं पूर्वमूर्ध्वाग्रं सन्तमि

दानीमवाचीनाग्रमधोमुखं निमित्य निखायोर्ध्वाभिमुखा उद्गावः । तदानीं मनुष्या ऋषयश्च देवानां यज्ञवास्तु यज्ञभूमिमागत्य यज्ञस्य संबन्धि चिह्नं यत्किंचिद्वगमिष्यामस्तच्च देवानुष्ठितस्य यज्ञस्यै संपद्यत इत्यधिपेत्य यज्ञभूमिं सर्वतः परीक्ष्य यज्ञचिह्नमिदमिति यूपमेवाविन्दन्नलभन्त । कीदृशं यूपम् । अवाचीनाग्रं निमितमधोमुखत्वेन निखातम् । ततो मनुष्या ऋषयश्चैवं विदुः । कथमिति तदुच्यते । अनेनैवाधोमुखेन यूपेन देवा अस्मद्भ्रमाय स्वकीयं यज्ञं मिश्रितवन्त इति । तदस्तमधोमुखं निखातं यूपमुत्खाय पुनरूर्ध्वाभिमुखं न्यमिन्वन्निखातवन्तः । ततो यथाशास्त्रमवस्थितेन यूपेन मनुष्या ऋषयश्च देवैरनुष्ठितं यज्ञं प्रज्ञाय स्वर्गं लोकं प्राजानन् । तं यज्ञमनुष्ठाय स्वर्गं गता इत्यर्थः । सोऽयमर्थः शास्त्रान्तरे संगृहीतः—' यज्ञेन वै देवाः सुवर्गं लोकमायंस्तेऽमन्यन्त मनुष्या नोऽन्वागमिष्यन्तीति ते यूपेन योपयित्वा सुवर्गं लोकमायंस्तमृषयो यूपेनैवानु प्राजानंस्तद्यूपस्य यूपत्वम् ' इति ।

इदानीं यूपनिखननं विधत्ते—

तद्यूप ऊर्ध्वो निमीयते यज्ञस्य प्रज्ञात्यै स्वर्गस्य लोकस्यानुख्यात्यै, इति ।

निमीयते निखातव्य इत्यर्थः ।

यूपस्य तक्षणेनाष्टाश्रित्वं विधीयते—

वज्रो वा एष यद्यूपः सोऽष्टाश्रि कर्तव्योऽष्टाश्रिर्वै वज्रस्तं तं प्रहरति द्विषते भ्रातृव्याय वधं योऽस्य स्तृत्यस्तस्मै स्तर्तवै, इति ।

यूपस्य वज्रांशत्वेन वज्रत्वम् । तच्च शास्त्रान्तरे श्रूयते—' इन्द्रो वृत्राय वज्रं प्राहरत्स त्रेधा व्यभवत्स्फ्यस्तृतीयं रथस्तृतीयं यूपस्तृतीयम् ' इति । लोके वज्रस्याष्टकोणत्वात्तद्रूपस्य यूपस्याप्यष्टाश्रित्वं कुर्यात् । द्विषते भ्रातृव्याय वधं द्वेषं कुर्वतः शत्रोर्वधहेतुं तं वज्रं तं यूपं च पुरुषः प्रहरति प्रहारार्थं प्रयुङ्क्ते । अतो वज्रवत्प्रहरणसामर्थ्याद्यूपस्याष्टाश्रित्वं युक्तम् । यः शत्रुरस्य यजमानस्य स्तृत्यो हिंस्यो भवति तस्मै स्तर्तवै तस्य शत्रोर्हिंसार्थमित्यष्टाश्रित्वम् ।

अष्टाश्रित्वसिद्धये यूपस्य यद्वज्रत्वमुक्तं तदेव शत्रोरपि यहेतुत्वेनोपपादयति—

वज्रो वै यूपः स एष द्विषतो वध उद्यतस्ति-

[illegible] [illegible] [illegible] [

लक्ष्मीस्वरूपत्वात्पूज्यत्वेन ज्योतिर्भवति । प्लुतिस्तु प्रशंसाद्योतकध्वन्यर्थेन-यर्थी । यदेव यस्मादेव कारणाद्ब्रह्मवादिन एवमाचक्षते तस्माद्बैल्वो यूपोऽति-प्रशस्त इत्यर्थः ।

एतद्वेदनं प्रशंसति—

ज्योतिः स्वेषु भवति श्रेष्ठः
स्वानां भवति य एवं वेद, इति ।

स्वेषु ज्ञातिषु ज्योतिस्तेजस्वी श्रेष्ठः श्रुतवृत्तसंपन्नः ।

पुनः फलद्वयाय वृक्षान्तरं विधत्ते—

पालाशं यूपं कुर्वीत तेजस्कामो ब्रह्मवर्चसकाम-
स्तेजो वै ब्रह्मवर्चसं वनस्पतीनां पलाशः, इति ।

तेजः शरीरकान्तिः । ब्रह्मवर्चसं श्रुताध्ययनसंपत्तिः । पुष्पाणामतिरिक्तत्वेन पलाशस्य तेजस्त्वं परब्रह्मत्वश्रवणाद्ब्रह्मवर्चसत्वम् । तथा च शाखान्तरे श्रूयते—'देवा वै ब्रह्मवदन्त तत्पर्ण उपाशृणोत्' इति ।

अध्वर्योरेतद्वेदनं प्रशंसति—

तेजस्वी ब्रह्मवर्चसी भवति य एवं
विद्वान्पालाशं यूपं कुरुते, इति ।

बिल्वात्पलाशं प्रशंसति—

यदेव पालाशां ३ सर्वेषां वा एष वनस्पतीनां
योनिर्यत्पलाशास्तस्मात्पलाशस्यैव पलाशेनाऽऽ-
चक्षतेऽमुष्य पलाशमसि ३ ष्य पलाशमसीति, इति ।

हेऽध्वर्यो किं पालाशं यूपं कृतवानसि, तत्सम्यक्कृतमिति प्रशंसार्था प्लुतिः । किंच पलाशः सर्ववनस्पतीनां कारणभूतस्तस्माद्योनित्वात्पलाशाख्यस्यैव वृक्षस्य संबन्धिना पलाशशब्देन सर्ववृक्षाणां पत्राण्याचक्षते व्यवहरन्ति । अमुष्य न्यग्रो-धस्य पलाशं पत्रममुष्य चूतवृक्षस्य पलाशं पत्रमेवं सर्ववृक्षसंग्रहार्था वीप्सा । पलाशशब्दः पुंलिङ्गो वृक्षविशेषवाची । नपुंसकलिङ्गः पत्रवाची । 'पलाशः किंशुकः पर्णः' 'पत्रं पलाशं छदनं दलं पर्ण छदः पुमान्' इत्यभिधान-कारैरुक्तत्वात् । यस्मात्प्लुतिप्रयोगो यस्माच्च सर्ववृक्षयोनित्वं तस्मात्पलाशयूपः प्रशस्त इत्यर्थः । वेदनं प्रशंसति—

सर्वेषां ह्यस्य वनस्पतीनां काम

उपाप्तो भवति य एवं वेद ॥ १ ॥ इति ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे ऐतरेय-ब्राह्मणभाष्ये षष्ठाध्याये प्रथमः खण्डः ॥ १ ॥ (१) [३१] ।

यूपं विधाय तस्याञ्जनादिमन्त्रान्विधातुमादौ प्रैषं विधत्ते -

अञ्ज्मो यूपमनूहीत्याह ध्वर्युः, इति ।

यूपमञ्ज्मो यूपस्य घृतेनाञ्जनं कुर्मो हे होतस्तदनुरूपामृचं ब्रूहीत्येवमध्वर्युः प्रैषं ब्रूयात् । स च प्रैषो विकल्पेनाऽपस्तम्बेन दर्शितः-' यूपायाज्यमानाया-नुब्रूहीति संप्रेष्यति, अज्यमानायानुब्रूहीति, अञ्ज्मो यूपमनुब्रूहीति वा ' इति । एवमध्वर्युणा प्रेषितो होताऽञ्जनकाले वक्ष्यमाणा ऋचोऽनुब्रूयात् । अञ्जनं त्वाप-स्तम्बेन दर्शितम् -' अथैनमसंस्कृतेनाऽऽज्येन यजमानोऽग्रतः शकलेनानक्त्यै-न्द्रमसीति चषालमङ्क्त्वा सुपिप्पलाभ्यस्त्वौषधीभ्य इति प्रतिमुच्य देवस्त्वा सविता मध्वाञ्जक्त्विति स्रुवेण संततमविच्छिन्दन्नग्निष्ठामभिमनाक्ति ' इति ।

एतस्मिन्नञ्जनकालेऽनुवचनीयामृचं विधत्ते--

अञ्जन्ति त्वामध्वरे देवयन्त इत्यन्वाह, इति ।

हे यूप त्वां देवयन्तो देवान्पूजयितुमिच्छन्त ऋत्विजोऽञ्जन्ति घृतेनाक्तं कुर्वन्ति ।

एतत्पादार्धस्य याज्ञिकप्रसिद्धिं दर्शयति--

अध्वरे ह्येनं देवयन्तोऽञ्जन्ति, इति ।

द्वितीयपादमनूद्य व्याचष्टे--

वनस्पते मधुना दैव्येनेत्येतद्वै
मधु दैव्यं यदाज्यम्, इति ।

हे वनस्पते यूप मधुरेण देवयोग्येनाऽऽज्येन त्वामञ्जन्तीति पूर्वत्रान्वयः । द्वितीयार्धमनूद्य व्याचष्टे--

यदूर्ध्वस्तिष्ठा द्रविणेह धत्तादधद्वा क्षयो मातु-

रस्या उपस्थ इति यदि च तिष्ठासि यदि च शयासै द्रविणेहास्मासु धत्तादित्येव तदाह, इति।

हे यूप त्वं यदूर्ध्वाग्रः संस्तिष्ठा अवटे स्थितोऽभवः । यद्वा जगन्मातुरस्याः पृथिव्या उपस्थ उपरि क्षयो निवासस्ते शयनं स्यात्सर्वथाऽपीह कर्माणि द्रविणा धनान्यस्मदपेक्षितानि धत्तात्संपादयतु । अयमुत्तरार्धस्यार्थो यदि चेत्यादिना स्पष्टीकृतः ।

द्वितीयामृचं विधत्ते—

उच्छ्रयस्व वनस्पत इच्युच्छ्रीयमाणाया-
भिरूपा यद्यज्ञेऽभिरूपं तत्समृद्धम्, इति ।

हे वनस्पते त्वमुच्छ्रयस्व शयनं परित्यज्योच्छ्रितो भव । उच्छ्रयस्वेत्युक्त्वा-दुच्छ्रीयमाणाय यूपायेयमृग्भिरूपा । तदेतदुच्छ्रयणमास्तम्बेन दर्शितम्—' यूपा-योच्छ्रीयमाणायानुब्रूहीति संप्रेष्यत्युच्छ्रीयमाणायानुब्रूहीति वोद्दिवꣳ स्तभानान्व-रिक्षं पृणेत्युच्छ्रयति ' इति ।

अस्या ऋचो द्वितीयं पादमनूद्य व्याचष्टे—

वर्ष्मन्पृथिव्या अधीत्येतद्वै वर्ष्म
पृथिव्यै यत्र यूपमुन्मिन्वन्ति, इति।

पृथिव्याः संबन्धिनि वर्ष्मन्शरीरवत्प्रधानभूतेऽस्मिन्देशेऽध्युपर्युच्छ्रयस्वेति पूर्व-त्रान्वयः । ऋत्विजो यत्र वेदितत्पूर्वदेशयोरन्तराले यूपमुन्मिन्वन्त्यूर्ध्वतया निख-नन्ति सोऽयं देशः पृथिव्या वर्ष्मेति ।

मन्त्रे तृतीयं पादमनूद्य व्याचष्टे—

सुमिति मीयमानो वर्चोधा यज्ञ-
वाहस इत्याशिषमेवैतामाशास्ते, इति ।

सुमीती सुमित्या शोभनेन प्रक्षेपेण स्थापनेन मीयमानः स्थाप्यमानो यज्ञवाहसे यज्ञनिर्वाहकाय यजमानाय वर्चोधा वर्चसां दीप्तीनां धाता संपादयिता तेन यूपो विशेष्यते । वर्चोधा वर्चधा इत्येतदाशीः प्रार्थना ।

तृतीयामृचं विधत्ते—

समिद्धस्य श्रयमाणः पुरस्तादिति, इति।

---

१ ऋ. ३ ८-३ ॥ २ ऋ. ३ ८-२ ॥

अन्वाहेत्यनुवर्तते । अयं यूपः समिद्धस्य प्रदीप्तस्याऽऽहवनीयस्य पुरस्तात्पूर्वस्यां दिशि श्रयमाण आश्रित्य वर्तमानः ।

एतत्पादार्थस्य याज्ञिकप्रसिद्धिं दर्शयति-

समिद्धस्य ह्येष एतत्पुरस्ताच्छ्रयते, इति ।

अर्धमन्तर्वेद्यर्धं बहिर्वेदि यूपस्थापनादाहवनीयपूर्वदिगाश्रयणम् ।

द्वितीयपादमनूद्य व्याचष्टे -

ब्रह्म वन्वानो अजरं सुवीरमि-
त्याशिषमेव ऽऽशास्ते, इति ।

अजरमविनाशं सुधीरं कल्याणपुत्रादिसमृद्धिकारणम् । ब्रह्म परिवृढमिदं कर्म वन्वानः संभजमानो यूपः । अजरादिशब्दैरेतस्मिन्पादे प्रार्थनं शंसते ।

तृतीयपादमनूद्य व्याचष्टे -

आरे अस्मदमतिं बाधमान इत्यश-
नाया वै पाप्माऽमतिस्तामेव तदा-
रान्नुदते यज्ञाच्च यजमानाच्च, इति ।

अमतिर्बुद्धिभ्रंशस्तामस्मद्यजमानार्त्विग्भ्य आरे दूरे यथा भवति तथा बाधमानो यूपः । एतत्पादगतेनामतिशब्देन क्षुधा वा पापं वाऽभिधीयते । तयोर्बुद्धिभ्रंशहेतुत्वात् । अस्मदित्यनेन यज्ञो यजमानश्च विवक्षितः । ताभ्यां दुर्बुद्धिर्दूरे निराक्रियते ।

चतुर्थपादमनूद्य व्याचष्टे-

ऊर्ध्वो नः पाह्यंहस इत्यूर्ध्वं महते सौभगायेत्याशिषमेवाऽऽशास्ते, इति ।

हे वनस्पते यजमानस्याधिकसौभाग्यसिद्ध्यर्थमुच्छ्रितो भव । अस्मिन्पाद आशीर्विस्पष्टा ।

तृतीयामृचं विधत्ते-

ऊर्ध्व ऊ षु ण ऊतये तिष्ठा देवो न सविता, इति ।

हे यूप नोऽस्माकममूतये रक्षणायोर्ध्वं ऊर्ध्वाकार एव सुतिष्ठ स्थिरो भव कुरु । तत्र दृष्टान्तः सविता देवो न सूर्यो देव इव स यथाऽस्मद्रक्षणायोर्ध्वस्तिष्ठति तद्वत्त्वमपीत्यर्थः ।

---

१ ऋ. १-३६-१३ ॥

एतत्पूर्वार्धगतस्य नशब्दस्य निषेधार्थत्वं परित्यज्याङ्गीकारवाचित्वात्तेनात्रोपमार्थो विवक्षित इत्येतद्दर्शयति—

यद्वै देवानां नेति तदेषामेतानि तिष्ठ
देव इव सवितेत्येव तदाह, इति ।

देवानां देवप्रतिपादकमन्त्राणां वर्णव्यत्ययेन वा वेदानां संबन्धि नेति यत्पदमस्ति तदेषां वेदानां संबन्धिनि प्रयोग ओमित्येतस्मिन्नर्थे वर्तते । तथा सत्यङ्गीकार्यस्यार्थस्य विवक्षितत्वादत्रोपमार्थे विवक्षिते सति तिष्ठ देव इवेत्यादिवाक्यार्थो लभ्यते ।

तृतीयपादमनूद्य व्याचष्टे—

ऊर्ध्वो वाजस्य सनितेति वाज-
सनिमेवैनं तद्धनसां सनोति, इति ।

अयं यूप ऊर्ध्वः सन्वाजस्यान्नस्य सनिता दाता तत्तेन पादपाठेनैनं यूपं वाजसनिमेवान्नदातारमेव सनोति करोतीत्यर्थः । एतस्योपलक्षणत्वाद्धनसां सर्वार्थादिदातारं च करोति ।

चतुर्थपादमनूद्य व्याचष्टे—

यदाङ्गिभिर्वाघद्भिर्विह्वयामह इति च्छन्दांसि वा
अङ्गयो वाघतस्तैरेतद्देवान्यजमाना विह्वयन्ते
मम यज्ञमागच्छत मम यज्ञामिति, इति ।

यद्यस्मात्कारणादङ्गिभिः ऋत्वभिव्यक्तिकारिभिर्वाग्भिर्वाघद्भिः ऋत्वनुष्ठानभारं वहद्भिर्ऋत्विग्भिः सहिता यजमाना वयं विह्वयामहे विशेषेण देवानाह्वयामस्तस्माद्यूप त्वमूर्ध्वस्तिष्ठेति योज्यम् । अत्राङ्गिरवाघच्छन्दाभ्यामृत्विग्रूपमापन्नाश्छन्दोभिमानिनो देवा उच्यन्ते । एतत्पादपाठे छन्दोभिर्नामभिर्ऋत्विग्भिः पठ्यमानैस्तैर्यजमाना देवान्विशेषेण ह्वयन्ति । भो देवा ममैव यज्ञमागच्छतेत्येक एवमन्येऽपि । सर्वसंग्रहार्थेयं वीप्सा ।

होतुरेतद्वेदनं प्रशंसति—

यदि ह वा अपि बहव इव यज-
न्तेऽथ हास्य देवा यज्ञमेव गच्छ-
न्ति यत्रैवं विद्वानेतामन्वाह, इति ।

यद्यप्येकस्मिन्काले बहवो यजमाना यजन्त एव यागं कुर्वन्त्येव तथाऽप्यस्यैव विदुषोऽन्ययुक्तस्यैव यजमानस्य यज्ञं प्रति देवा आगच्छन्ति ।

पञ्चमीमृचं विधत्ते—

ऊर्ध्वो न पाह्यंहसो नि केतुना
विश्वं समत्रिणं दहेति, इति ।

हे यूप त्वमूर्ध्वः सन्केतुना प्रज्ञया नोऽस्मानंहसः पापान्निपाहि नितरां पालय, यात्रिणं भक्षणशीलं राक्षसादि विश्वमपि संदह समूहीकृत्य भस्मी कुरु ।

तस्य पूर्वार्धस्य तात्पर्यं दर्शयति—

रक्षांसि वै पाप्माऽत्रिणो रक्षांसि
पाप्मानं दहेत्येव तदाह, इति ।

यानि रक्षांसि सन्ति यश्च पा-मा विद्यते तत्सर्वमत्रिशब्देन विवक्षितम् । अत उभयदहनं मन्त्रप्रार्थितं भवति ।

तृतीयपादमनूद्य व्याचष्टे—

कृधी न ऊर्ध्वां चरथाय जीवस
इति यदाह कृधी न ऊर्ध्वां चर-
णाय जीवस इत्येव तदाह, इति ।

चशब्दः पूर्ववाक्येन समुच्चयार्थः । अपि च हे यूप रथाय जीवसे रथारोहणपूर्वकाय जीवनाय । यद्वा चरथायेत्येकमेव पदम् । चरथं चरणमाचारस्तस्मै जीवनाय च नोऽस्मानूर्ध्वानुच्छ्रितान्कृधि कुरु, इत्यनेन पादेन मन्त्रो यदाह तत्तत्र चरणस्य विवक्षितत्वादस्मदुक्तमेवार्थं मन्त्र आह ।

चरथायेति शब्दमाश्रित्य तात्पर्यमभिधाय जीवस इति शब्दमाश्रित्य तद्दर्शयति—

यदि ह वा अपि नीत इव यजमानो भवति
परि हैवैनं तत्संवत्सराय ददाति, इति ।

यद्यपि यजमानो मृत्युना नीत एव भवति तथाऽपि तत्पादपाठेन मृत्युं परिहृत्यैनं संवत्सरायाऽऽयुष्यदाय कालात्मने ददाति ।

चतुर्थपादमनूद्य व्याचष्टे-

विदा देवेषु नो दुव इत्या-
शिषमेवाऽऽशास्ते, इति।

नोऽस्मदीयं दुव: परिचरणं देवेषु विदा वेदय कथयेत्यर्थ: । अनेन स्वकर्मणां सफलत्वं प्रार्थयते।

षष्ठीमृचं विधत्ते-

जातो जायते सुदिनत्वे अह्नामिति, इति।

अयं यूपो जातो नित्यमादुर्भूतोऽप्यह्नां दिवसानां मध्ये सुदिनत्वे यागयुक्त: स्याद्ह: सुदिनत्वाय जायते।

एतमेवार्थं दर्शयति -

जातो ह्येष एतज्जायते, इति।

एतदेतेन पादपाठेन।

द्वितीयपादमनूद्य व्याचष्टे-

समर्य आ विदथे वर्धमान
इति वर्धयन्त्येवैनं तत्, इति।

समर्ये मनुष्यैर्यजमानादिभिर्युक्ते विदथे यज्ञदेश आसमन्ताद्वर्धमानो यूप आस्ते तत्पादपाठेन यूपं वर्धयन्त्येव।

तृतीयपादमनूद्य व्याचष्टे-

पुनन्ति धीरा अपसो मनी-
षेति पुनन्त्येवैनं तत्, इति।

धीरा धीमन्तो यजमानादयोऽपस: कर्मणो निमित्तभूतान्मनीषा स्वकीयया मनीषया बुद्ध्या पुनन्ति तमिमं यूपं शोधयन्ति। तत्तेन तृतीयपादपाठेन।

चतुर्थपादमनूद्य व्याचष्टे-

देवया विप्र उदियर्ति वाचमिति
देवेभ्य एवैनं तन्निवेदयति, इति।

विप्रो ब्राह्मण ऋत्विक्संघो देवया देवगामिनीं वाचं यूपस्तुतिमुदियर्ति, उद्गमयत्युच्चारयतीत्यर्थ:। तत्तेन चतुर्थपादपाठेनैनं यूपं देवेभ्य: कथयति।

सप्तम्या समापनं विधत्ते—

युवा सुवासाः परिवीत आगा-
त्स उ श्रेयान्भवति जायमानः परिदधाति, इति।

उक्तास्वृक्षु येयमन्तिमा तयाऽनुवचनं समापयेद्यथा लोके सुवासाः शोभन-वस्त्रोपेतो युवा यौवनयुक्तः पुरुषोऽग्रत आगच्छति, एवमयं यूपः परितो रशनया वेष्टित आगादिह कर्मण्यायातः।

यद्वा युवशब्देन यूपस्य प्राणरूपत्वं विवक्ष्यते तामेतां विवक्षां दर्शयति—

प्राणो वै युवा सुवासाः सोऽयं शरीरैः परिवृतः, इति।

कदाचिदपि जरारहितत्वात्प्राणस्य युवत्वं प्राणवेष्टनरूपत्वाच्छरीरावयवानां वस्त्ररूपत्वमीदृशप्राणरूपत्वेन यूपः प्रशस्यते।

द्वितीयपादमनूद्य व्याचष्टे—

स उ श्रेयान्भवति जायमान इति श्रेया-
ञ्छ्रेयान्ह्येष एतद्भवति जायमानः, इति।

ततः स उ स एव यूपो जायमानः कर्मणि निष्पाद्यमानः श्रेयान्दिने दिने प्रशस्यतरो भवति। प्रथमतश्छेदनेन प्रशस्तत्वं ततस्तक्षणेन प्रशस्ततत्वमञ्जनेन ततोऽपीत्येवंविधविवक्षया श्रेयाञ्श्रेयानीति वीप्सा प्रयुक्ता।

उत्तरार्धं व्याचष्टे—

तं धीरासः कवय उन्नयन्ति स्वाध्यो
मनसा देवयन्त इति ये वा अनूचा
नास्ते कवयस्त एवैनं तदुन्नयन्ति, इति।

तं यूपं धीरा बुद्धिमन्तः कवयोऽनूचानादय उन्नयन्ति स्तूयमानैर्गुणैरुच्छ्रितं कुर्वन्ति। कीदृशाः कवयः स्वाध्यः सुष्ठ्वासमन्ताद्धयायतीति स्वाधीस्तस्य बहु-वचनं सुधिय इत्यर्थः। मनसा स्वकीयेन देवयन्तो देवानाप्तुमिच्छन्तः। उक्त एवार्थो ये वाऽनूचाना इत्यादिना स्पष्टीकृतः। अत्र प्रथममञ्ज्मो यूपमनुब्रूहीति प्रेषितो यथाऽञ्जाति(न्ति)त्वामिति प्रथमामन्वाह तथा यूपायोच्छ्रीयमाणायानुब्रू-हीति प्रेषित उच्छ्रयस्वेत्याद्या ऋचः पञ्चानुब्रूयात्। तथा यूपाय परिवीयमा-णायानुब्रूहीति प्रेषितो युवा सुवासा इत्येतामनुब्रूयात्।

---

१ ऋ. ३।८।४॥

उक्तमन्त्रसंख्यादिकं दर्शयति—

ता एताः सप्तान्वाह रूपसमृद्धा एतद्वै यज्ञस्य समृद्धं यद्रूपसमृद्धं यत्कर्म क्रियमाणमृगाभिवदति तासां त्रिः प्रथमामन्वाह त्रिरुत्तमां ता एकादश संपद्यन्त एकादशाक्षरा वै त्रिष्टुप्त्रिष्टुबिन्द्रस्य वज्र इन्द्रायतनाभिरेवाऽऽभी राध्नोति य एवं वेद त्रिः प्रथमां त्रिरुत्तमामन्वाह यज्ञस्यैव तद्दर्सौ नह्यति स्थेम्ने बलायाविस्रंसाय ॥२॥ इति ।

त्रिष्टुभ इन्द्रस्य वज्रत्वमर्थवादान्तरे द्रष्टव्यम् ।

अथ मीमांसा—द्वादशाध्यायस्य तृतीयपादे चिन्तितम् ।

"उद्दिवेत्युच्छ्रयस्वेति विकल्पो वा समुच्चयः ।
विकल्पः स्मारकत्वैक्यात्प्रकारान्यत्वतोऽन्तिमः" ॥

यूपस्योच्छ्रयणे करण एष मन्त्रोऽध्वर्युणा पठ्यते—' उद्दिवꣳ स्तभानान्तरिक्षं पृण पृथिवीमुपरेण दृꣳह ' इति । उच्छ्रीयमाणाय यूपाय प्रेषितेन होत्राऽयं मन्त्रः पठ्यते—' उच्छ्रयस्व वनस्पते वर्ष्मन्पृथिव्या अधि ' । (ऋ० सं० ३-८-३) इति । अनयोर्यूपोच्छ्रयणस्मारणमेकमेव कार्यं तस्माद्विकल्प इति चेत् । नैवम् । करणमन्त्र उच्छ्रयणं करोमीत्येवं स्मारयति होत्रस्तु क्रियमाणमुच्छ्रयणमनुवदन्नध्वर्यो यूपोच्छ्रयणं कर्तव्यमित्येवंविधां स्मृतिं जनयति । तत्र स्वार्थस्योच्छ्रयणस्यैकत्वेऽपि कर्तव्यामित्यस्य करोमीत्यस्य च स्मृतिप्रकारस्यान्यत्वान्न कार्यैक्यं तेन समुच्चयः ।

तत्रैवान्यच्चिन्तितम्—

" उच्छ्रयस्व समिद्धस्येत्यादीनां किं विकल्पना ।
समुच्चयो ता कार्यैक्यादाद्योऽनुस्मृतयेऽन्तिमः " ॥

उच्छ्रयस्वेत्येका समिद्धस्य श्रयमाण इति द्वितीया, ऊर्ध्व ऊ षु ण इति तृतीया, ऊर्ध्वो नः पाहीति चतुर्थी ता एताः क्रियमाणमनुवदन्त्यो होत्रा पठ्यन्ते तासां यूपोच्छ्रयणकर्तव्यतास्मरणस्य कार्यस्यैकत्वाद्विकल्प इति चेन्नैवम् । प्रथममन्त्रेणोत्पन्नायाः स्मृतेरुत्तरोत्तरमनुस्मृतेः पृथक्प्रयोजनत्वात्तस्मात्समुच्चयः ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऐतरेयब्राह्मणभाष्ये षष्ठाध्याये द्वितीयः खण्डः ॥ २ ॥ (२) [३२]

यूपाञ्जनादिसंबद्धा ऋचो विधाय यूपविषयं किंचिद्विचारमवतारयति—

तिष्ठेद्यूपाः३ अनुप्रहरे३त्, इत्याहुः, इति ।

कर्मणि समाप्ते सति पश्चादयं यूपः किं स्वस्थाने तिष्ठेत्किं वा तं यूपं वह्नौ प्रहरेदित्येवं विचारं ब्रह्मवादिन आहुः । विचारार्थं प्लुतिद्वयम् ।

तत्र कामनाविशेषेण स्थितिपक्षं स्वी करोति—

तिष्ठेत्पशुकामस्य, इति ।

तदेतदुपपादयितुमाख्यायिकामाह -

देवेभ्यो वै पशवोऽन्नाद्यायाऽऽलम्भाय नाति-
ष्ठन्त तेऽपक्रम्य प्रतिवावदतोऽतिष्ठन्नास्मा-
नालप्स्यध्वे नास्मानिति ततो वै देवा एतं
यूपं वज्रमपश्यंस्तमेभ्य उदश्रयंस्तस्माद्भिभ्यत
उपावर्तन्त तमेवाद्याप्युपावृत्तास्ततो वै देवेभ्यः
पशवोऽन्नाद्यायाऽऽलम्भायातिष्ठन्त, इति ।

पुरा कदाचिद्देवेभ्यो देवानामन्नाद्याय पयोदध्याद्यन्नभक्षणायाऽऽलम्भाया-ग्नीषोमीयवायव्यादिपश्वालम्भनकर्मणे च पशवो नातिष्ठन्त नाङ्गीकृतवन्तोऽनङ्गीकृत्य ते पशवो देवेभ्योऽपक्रम्य प्रतिवावदतः प्रत्युत्तरं पुनः पुनर्वदन्तो दूरेऽतिष्ठन् । किं तदुत्तरमिति तदुच्यते । हे देवा यूयं कदाचिदपि नास्मानालप्स्यध्वेऽस्मान्पशूनालब्धुं कर्मणि विशसितुं समर्था न भविष्यथ । पुनरपि नास्मानितिवाक्यावृत्तिरादरार्था । सर्वथैवास्मदालम्भो न घटिष्यते । तत्प्रत्युत्तरं श्रुत्वा देवाः पशुभीतिहेतुमेतं यूपं वज्ररूपमपश्यन् । यूपस्य वज्रत्वश्रुतिः पूर्वमेवोदाहृता । तं यूपमेभ्यः पश्वर्थमुदश्रयन्, ऊर्ध्वमवस्थापयन् । तस्माद्दुच्छुताद्यूपाद्भिभ्यतः पशवो देवानुपावर्तन्त । यस्मादेवं पूर्वं वृत्तं तस्मादिदानीमपि यागेषु तमेव यूपमुद्दिश्य पशव उपावृत्ता दृश्यन्ते । ततो देवानां दध्याद्यन्नाय कर्मस्वालम्भाय च पशवोऽङ्गीकृतवन्तः ।

एतद्देदनं यूपावस्थानं च प्रशंसति—

तिष्ठन्तेऽस्मै पशवोऽन्नाद्यायाऽऽलम्भाय य एवं
वेद यस्य चैवं विदुषो यूपस्तिष्ठति, इति ।

यस्य यजमानस्येत्यर्थः ।

अथ फलविशेषाय प्रहरणपक्षमुपादत्ते–

अनु प्रहरेत्स्वर्गकामस्य, इति ।

कर्मसमाप्तिमनु तं यूपमग्नौ प्रक्षिपेत् ।

तदेतदुपपादयति–

तमु ह स्मैतं पूर्वेऽन्वेव प्रहरन्ति, इति ।

पूर्वे यजमानाः स्वर्गकामाः कर्मसमाप्तिमनु तमेतं यूपं प्रहरन्त्येव ।

तत्रैव युक्त्यन्तरमाह–

**यजमानो वै यूपो यजमानः प्रस्तरोऽग्निर्वै देव-
योनिः सोऽग्नेर्देवयोन्या आहुतिभ्यः संभूय हिर-
ण्यशरीर ऊर्ध्वः स्वर्गं लोकमेष्यतीति, इति ।**

योऽयं यूपोऽस्ति यश्च प्रस्तराख्यो दर्भमुष्टिस्तयोर्यजमानवत्कर्मणि मुख्य-त्वाद्यजमानत्वोपचारः । अग्निश्च देवानां योनिः कारणमग्निसाध्यकर्मणो देव-जन्महेतुत्वात् । एवं सति स यजमानो देवयोन्या अग्नेस्तस्मिन्हुतावाद्यूपादाहुतिभिश्च संभूय देवजन्म प्राप्य सुवर्णमयशरीर ऊर्ध्वाभिमुखः स्वर्गं लोकं प्राप्स्यति । तस्मात्स्वर्गकामस्य यूपप्रहरणं युक्तम् ।

नन्विदानींतनैः स्वर्गकामैः क्रतोर्यूपो न ग्रहीयत इत्याशङ्क्य तेषां प्रति-निधिं दर्शयति–

**अथ ये तेभ्योऽवर आसंस्त एतं स्वरुम-
पश्यन्यूपशकलं तं तस्मिन्काले ऽनुप्रह-
रेत्तत्र स काम उपाप्तो योऽनुप्रहरणे
तत्र स काम उपाप्तो यः स्थाने, इति ।**

पूर्वसिद्धेभ्योऽनुष्ठातृभ्य ऋषिभ्योऽवरे ये केचिदर्वाचीना इदानींतना यज-माना आसंस्ते सर्वे यूपस्य प्रतिनिधित्वेन यूपशकलमेतं स्वरुनामकं स्वल्पं काष्ठ-खण्डमपश्यन् तस्मादिदानींतनो यजमानस्तस्मिन्यूपप्रहरणकाले तं स्वरुमनुप्रहरेत् । एतच्च शाखान्तरे श्रूयते–'देवा वै संस्थिते सोमे प्रस्रुचोऽहरन्यूपं तेऽम न्यन्त यज्ञवेशसं वा इदं कुर्म इति ते प्रस्तरस्रुचां निष्कयणमपश्यन्, स्वरुं यूपस्य संस्थिते सोमे प्रस्तरं प्रहरति जुहोति स्वरुमयज्ञवेशसाय' इति । तथा सति यूपप्रहरणे यः काम उक्तः स कामस्तत्र स्वरुप्रहरणे प्राप्तो भवतीति

यूपप्रतिनिधित्वेन स्वरोः प्रक्षिप्तत्वात् । यश्च यूपस्थाने पशुयागलक्षणः काम उक्तः सोऽपि तत्र प्रक्षेपणपक्षे प्राप्तो भवति यूपस्य स्वरूपेणावस्थितत्वात् . तदेवत्स्वरुग्रहरणमापस्तम्बेन दर्शितम्—'जुह्वां स्वरुमवदायानूयाजान्ते जुहोति द्यां ते धूमो गच्छतु' इति ।

अथाग्नीषोमीयपश्वालम्भं विधत्ते -

सर्वाभ्यो वा एष देवताभ्य आत्मान-
मालभते यो दीक्षतेऽग्निः सर्वा देवताः
सोमः सर्वा देवताः स यदाग्नीषोमीयं
पशुमालभते सर्वाभ्य एव तद्देवताभ्यो
यजमान आत्मानं निष्क्रीणीते, इति ।

यो यजमानो दीक्षते सोमयागे दीक्षां प्राप्नोति स यजमानः सर्वदेवतार्थमात्मानमेव पशुत्वेनाऽऽलब्धुमुपक्रमते । अत्र च योऽग्निर्यश्च सोमस्तावुभौ सर्वदेवतात्मकावग्नेराहुत्यधिकरणत्वेन सोमस्य च होमद्रव्यत्वेन च सर्वोपकारित्वात् । तथा सत्यग्नीषोमदेवताकपश्वालम्भनेन सर्वदेवतानां सकाशाद्यजमानः स्वात्मानं निष्क्रीणीतवान्भवति । तस्मादग्नीषोमीयः पशुरालब्धव्यः । सोऽयमर्थः श्रुत्यन्तरे संगृहीतः-'पुरा खलु वावैष मेधायाऽऽत्मानमारभ्य चरति यो दीक्षते यदग्नीषोमीयं पशुमालभत आत्मनिष्क्रयणमेवास्य' इति ।

अथ पूर्वोत्तरपक्षाभ्यां पशुशरीरस्य रूपविशेषं निश्चिनोति—

तदाहुर्द्विरूपोऽग्नीषोमीयः कर्तव्यो द्विदे-
वत्यो हीति तत्तन्नाऽऽद्दत्यं पीव इव
कर्तव्यः पीवोरूपा वै पशवः कृशित
इव खलु वै यजमानो भवति तद्य-
त्पीत्वा पशुर्भवति यजमानमेव
तत्स्वेन मेधेन समर्धयति, इति ।

तत्तन्नाग्नीषोमीयपशौ ब्रह्मवादिनः पूर्वपक्षमाहुः । यस्मादस्य पशोरग्निश्च सोमश्चेत्येते द्वे देवते तस्मात्तमनुसारेण यः पशुर्द्विरूपः शुक्लकृष्णादिवर्णद्वयोपेतः स कर्तव्य इति तदेतद्ब्रह्मवादिमतमनादरणीयम् । किं तु पीव इव शरीरपुष्ट्या

स्थूल एव पशुः कर्तव्यः । लोके हि पशव पीवोरूपाः वै मेदोवृद्ध्या वै प्रायेण स्थूलरूपा एव भवन्ति । यजमानस्तु पश्वनुष्ठानदिने कृशित इवोपसद्दिनेषु स्वल्पक्षीराहारेण तदानीं कृश एव भवति । तत्तथा सति यद्ययं पशुः स्थूलो भवेत्तत्तेन पशुस्थौल्येन कृशशरीरं यजमानमेव स्वेन मेधेन स्वकीययज्ञसाधनरूपेण समृद्धं करोति ।

पुनरपि पूर्वोत्तरपक्षाभ्यां पशुलक्षणस्य हविषः शेषभक्षणमुपपादयितुं पूर्वपक्षमाह—

तदाहुर्नाग्नीषोमीयस्य पशोरश्नीयात्पुरुषस्य वा एषोऽश्नाति योऽग्नीषोमीयस्य पशोरश्नाति यजमानो ह्येतेनाऽऽत्मानं निष्क्रीणीत इति, इति ।

तत्तत्र पशौ पूर्वपक्षिण आहुरग्नीषोमीयस्य पशोर्मांसं नाश्नीयाद्यस्तद्भक्षयत्यसौ पुरुषस्य मांसमेव भक्षयति । यस्माद्यजमान एनेम पशुना स्वात्मानं निष्क्रीणीते तस्मात्तत्स्वरूपोऽयं पशुः । इतिशब्दः पूर्वपक्षसमाप्त्यर्थः ।

तं निराकृत्य सिद्धान्तमाह—

तत्तन्नाऽऽदृत्यं वार्त्रघ्नं वा एतद्धविर्यन्नाग्नीषोमीयो योऽग्नीषोमाभ्यां वा इन्द्रो वृत्रमहंस्तावेनमब्रूतामावाभ्यां वै वृत्रमवधीर्वरं ते वृणावहा इति वृणाथामिति तावेतमेव वरमवृणातां श्वः सुत्यायां पशुं स एनयोरेषोऽच्युतो वरवृतो ह्येनयोस्तस्मात्तस्याशितव्यं चैव लिप्सितव्यं च ॥ ३ ॥ इति ।

तत्पूर्वपक्षिभिरुक्तमनादरणीयं योऽग्नीषोमीयः पशुरास्व एतद्वार्त्रघ्नं वृत्रहत्यानिमित्तं हविः । कथमेतदिति तदुच्यते । अग्नीषोमाभ्यां निमित्तभूताभ्यामिन्द्रो वृत्रं हतवान् । अस्यार्थस्य श्रुत्यन्तरद्योतनार्थो वैशब्दः । सोऽयमर्थः श्रुत्यन्तरे त्वष्टा हतपुत्र इत्यनुवाके प्रपञ्चितः । वृत्रे हते सतीन्द्रं प्रत्यग्नीषोमावेवमब्रूतां हे इन्द्र वां निमित्तं वृत्रं हतवानसि । अतो वृत्रवधस्य निमित्तभूतावावां तव सकाशाद्वरं प्रार्थयावहै । इत्युक्त्वा वरं प्रार्थितवन्तौ श्वः सुत्यायां परेद्युः सोमाभिषवे प्रसक्ते सति पूर्वदिने पशुरूपं वरं वृतवन्तौ । स एष पशुरेनयोरग्नीषोमयोरच्युतोऽवश्यं कर्तव्यः । वरेण वृतत्वात् । तस्मादेवं प्रशस्तत्वात्तस्य

पशोर्मांसमशितव्यं चैव सर्वदा भक्षितव्यमेव । न केवलं भक्षणं किंतु लीप्सितव्यं च भक्षणात्पूर्वमादरेण महता लब्धुमेष्टव्यमपि । तावेतौ पूर्वोत्तरपक्षौ शाखान्तरे संगृहीतौ—' तस्मान्नाऽऽयं पुरुषनिष्क्रयणमथो खल्वाहुरग्नीषोमाभ्यां वा इन्द्रो वृत्रमहन्निति यदग्नीषोमीयं पशुमालभते वार्त्रघ्न एवास्य स तस्माद्वाऽऽश्यम् ' इति ।

अत्र मीमांसा—प्रथमाध्याये चतुर्थपादे चिन्तितम्—

" यजमानः प्रस्तरोऽत्र गुणो वा नाम वा स्तुतिः ।
सामानाधिकरण्येन स्यादेकस्यान्यनामता ॥
गुणो वा यजमानोऽस्तु कार्ये प्रस्तरवर्ति (र्त्ति) ते ।
अंशांशित्वाद्यभावेन पूर्ववन्नात्र संस्तुतिः ॥
सर्व(अर्थ)भेदादनामत्वं गुणश्चेत्प्रह्वियेत सः " ।

यागसंबन्धद्वारा प्रधान(विधेय)प्रस्तरस्तुतिः । इदमाम्नायते-' यजमानः प्रस्तरः ' इति । तत्र यजमानस्य प्रस्तरशब्दो नामधेयं यागेनेत्यादाविव सामानाधिकरण्यादित्येकः पक्षः । गुणविधिरित्यपरस्तत्रापि यजमानकार्ये जपादौ प्रस्तरस्याचेतनस्य सामर्थ्याभावात् । प्रस्तरकार्ये स्रुग्धारणादौ यजमानस्य शक्तत्वाद्यजमानरूपो गुणो विधीयते । एवं सति पश्चाच्छ्रुतस्य प्रस्तरशब्दस्य कार्यलक्षकत्वेऽपि प्रथमश्रुतो यजमानशब्दो मुख्यवृत्तिर्भविष्यति । न चात्र पूर्वन्यायेन स्तुतिः संभवति । अष्टाकपालद्वादशकपालयोरिवांशांशित्वाभावात् । वायुर्वै क्षेपिष्ठा देवता, ऊर्जोऽश्वरुभ्या इतिवत्स्तुतिरिति चेत् । न, प्रस्तारादिधर्मवत्कस्यचिदुत्कर्षस्याप्रतीतेः । तस्मान्नामगुणयोरन्यतरत्वमिति प्राप्ते ब्रूमः । गोमहिषयोरिवा (र्थभेदस्या-) त्यन्तमसिद्धत्वान्न नामधेयत्वं युक्तम् । गुणपक्षेऽग्नौ प्रहरणस्य प्रस्तरविषयत्वाद्यजमाने प्रहते सति कर्मलोपः स्यात् । तस्मात्प्रस्तरशब्दो यजमानशब्देन स्तूयते । यथा सिंहो देवदत्तः इत्यत्र सिंहगुणेन शौर्यादिनोपेतो देवदत्तः सिंह इत्याख्यायते तथा यजमानगुणेन यागसाधनत्वेन युक्तः प्रस्तरो यजमानशब्देन स्तूयते । एवं यजमानो यूपो यजमानः प्रस्तर इत्यादिषु द्रष्टव्यम् ।

चतुर्थाध्यायस्य द्वितीयपादे चिन्तितम्—

" स्वरुं कुरुत इत्यत्र स्वरुर्यूपात्पृथक्क्रियाम् ।
प्रयोजयेच्च वाऽऽज्योऽस्तु विशिष्टस्य विधानतः ॥

आद्यस्य यूपखण्डस्य स्वरौ तस्य विशेषणे ।
विहिते लाघवं तस्मादनुनिष्पन्न एव सः" ॥

अग्नीषोमीयपशौ श्रूयते-'यूपस्य स्वरुं करोति' इति । तत्र यूपो यथा छेदनस्य प्रयोजकस्तथा स्वरुश्छेदनं प्रयोजयति । कुतः करोतिमनेन विशिष्टविधिप्रतीतेः । करोतिधातोर्भावना मुख्योऽर्थः । तत्र यूपशब्दोपलक्षितः खदिरादिवृक्षः करणं छेदनादिरितिकर्तव्यता छिन्नेन वृक्षेण स्वरुरुत्पादनीय इति विशिष्टविधिः । उत्पन्नस्य स्वरोर्विनियोग एवमाम्नातः—'स्वरुणा पशुमुपाक्रामति' इति । तस्मात्स्वरुश्छेदनस्य प्रयोजक इति प्राप्ते ब्रूमः । वक्ष्यमाण (छिद्यमानं) स्य यूपस्य यः प्रथम पतितः शकलः स स्वरुरिति स्वरुत्वनाममात्रविधेर्लाघवात्स्वरुर्न च्छेदनस्य प्रयोजकः किंतु यूपप्रयुक्ते छेदने स्वयमनुनिष्पद्यते ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऐतरेयब्राह्मणभाष्ये षष्ठाध्याये तृतीयः खण्डः ॥ ३ ॥ (३) [३३]

अग्नीषोमीयं पशुं विधाय तत्रैकादश प्रयाजान्विधत्ते—

आप्रीभिराप्रीणाति, इति ।

तेषां प्रयाजादीनां याज्याः प्रीतिहेतुत्वादाप्रीशब्देनोच्यन्ते । एतच्च शाखान्तरे श्रुतम्—'आप्रीभिराप्नुवन्, तदाप्रीणामाप्रीत्वम्' इति । ताभिराप्रीसंज्ञकाभिः प्रयाजादिभिराप्रीणाति देवताः सर्वत्र प्रीणयेत्तद्प्रीत्यर्थं याज्याः पठेदित्यर्थः ।

ताः प्रशंसति—

तेजो वै ब्रह्मवर्चसमाप्रियस्तेजसैवैनं तद्ब्रह्मवर्चसेन समर्धयति, इति ।

आज्यद्रव्यकत्वात्तेजस्त्वं शास्त्रीयसंस्कारसाधनत्वाद्ब्रह्मवर्चसत्वं तेन याज्यापाठेन यजमानस्य तदुभयं समृद्धं भवति ।

प्रथमं प्रयाजं विधत्ते—

समिधो यजति, इति ।

समिन्नामकदेवतात्वाद्यागोऽपि समिध इत्यनेन शब्देनोच्यते । समिन्नामक-

यागं कुर्यादित्यर्थः । यद्वा-हौत्रप्रकरणत्वात्सामिदेवताविषयां याज्यां पठेदित्यर्थः । तत्प्रकारं बौधायन आह—' यदा जानाति समिद्भ्यः प्रेष्येति तन्मैत्रावरुणः प्रेष्यति होता यक्षदग्निं समिधा सुषमिधा समिद्धमित्यथ होता यजति समिद्धो अद्य मनुषो दुरोणे तावेवमेव व्यतिषङ्गमुत्तरेण मैत्रावरुणः प्रेष्यति, उत्तरेणोत्तरेण होता यजति ' इति । अस्यायमर्थः समिद्भ्यः प्रेष्येति मन्त्रेणाध्वर्युर्मैत्रावरुणं प्रेष्यति तदानीमयं मैत्रावरुणः प्रैषसूक्तेन होता यक्षदग्निं समिधेत्यनेन प्रथममन्त्रेण होतारं प्रेष्यति होताऽप्यापीसूक्ते समिद्धो अद्येत्येतां प्रथमयाज्यां पठति । एवमुत्तरत्राध्वर्युर्मैत्रावरुणहोतारौ परस्परसंनिधौ स्वस्वमन्त्रयागं कुर्यातामिति तत्र प्रथमा याज्येति ।

अथ समिद्देवतां प्रशंसति—

प्राणा वै समिधः प्राणा हीदं सर्वं समिन्धते यदिदं किंच प्राणानेव तत्प्रीणाति प्राणान्यजमाने दधाति, इति ।

समिधः समिन्धनस्य सम्यक्प्रकाशहेतवः प्रथमप्रयाजदेवताः । प्राणस्वरूपदेवताया एकत्वेऽपि समिध इति बहुवचनं पूजार्थम् । जगति यत्किंचिदिदं शरीरजातमस्ति तत्सर्वं प्राणाः समिन्धते प्रकाशयन्त्यतस्तेषां समिद्रूपत्वं तत्तेन याज्यापाठेन प्राणानेव तोषयति तद्यजमानेऽपि प्राणान्संपादयति । अत्र प्रयाजानां क्रमेण समिधस्तनूनपान्नराशंस इळो बर्हिर्दुर उषासानक्ता दैव्या होतारा तिस्रो देव्यस्त्वष्टा वनस्पतिः स्वाहाकृतय इत्येता देवताः । वसिष्ठशुनकाविवध्यश्वराजन्यानां नराशंसो द्वितीयः । अन्येषां तनूनपाद्द्वितीया(यः) ।

तद्देवताविषयां द्वितीयां याज्यां विधत्ते—

तनूनपातं यजति प्राणो वै तनूनपात्स हि तन्वः पाति प्राणमेव तत्प्रीणाति प्राणं यजमाने दधाति, इति ।

अत्राध्वर्युप्रैषप्रकारमापस्तम्ब आह—' समिद्भ्यः प्रेष्येति प्रथमं संप्रेष्यति प्रेष्य प्रेष्येतीतरान् ' इति । अतोऽस्माद्द्वितीयपर्याये प्रेष्येति मन्त्रेणाध्वर्युर्मैत्रावरुणं प्रेष्यति । स च मैत्रावरुणः प्रैषसूक्तगतेन होता यक्षत्तनूनपातमित्यनेन

१ ऋ. १०-११०-१ ॥ २ ऋ. १० ११०-२ ॥

द्वितीयमन्त्रेण होतारं प्रेष्यति । स तु होताऽऽप्रीसूक्तगतां तनूनपादित्येतां द्वितीयां याज्यां पठेत् । तनूं शरीरं न पातयतीति तनूनपात् । शरीरे वसति प्राणे न पतति किंतु प्राणः शरीराणि चालयत्यतस्तनूनपाद्देवस्य प्राणरूपत्वम् ।

द्वितीयप्रयाजयाज्यान्तरं विधत्ते—

नराशंसं यजति प्रजा वै नरो वाक्शंसः प्रजां चैव तद्वाचं च प्रीणाति प्रजां च वाचं च यजमाने दधाति, इति ।

अध्वर्युप्रेषितो मैत्रावरुणो होता यक्षन्नराशंसमिति मन्त्रेण होतारं प्रेष्यति होता नराशंसस्येति याज्यां पठेत् । नरान्मनुष्यान्शंसति वाचा स्तौतीति नराशंसः । तथा सति प्रजाया नरशब्दवाच्यत्वाद्वाचश्च शंसनहेतुत्वादुभयप्राप्तिरुभयसंपत्तिः । अनयोरुभयोराधिकारिभेदेन व्यवस्थामापस्तम्ब आह 'नराशंसो द्वितीयः प्रयाजो वसिष्ठशुनकानां तनूनपादितरेषां गोत्राणाम्' इति ।

तृतीयां प्रयाजयाज्यां विधत्ते—

इळो यजत्यन्नं वा इळोऽन्नमेव तत्प्रीणात्यन्नं यजमाने दधाति, इति ।

होता यक्षत् [१-१३९-१०] अग्निमीळे [१-१-१] ईळित इति प्रेषितो होताऽऽज्जुह्वानं ईत्येतां याज्यां पठेत् । इष्यत इति व्युत्पत्त्याऽन्नमिट्शब्दवाच्यम् ।

चतुर्थीं विधत्ते—

बर्हिर्यजति पशवो वै बर्हिः पशूनेव तत्प्रीणाति पशून्यजमाने दधाति, इति ।

होता यक्षद्बर्हिः सुष्टरीमिति मन्त्रेण प्रेषितो होता प्राचीनं बर्हिरित्येतां याज्यां पठेत् । वृंहणस्य पोषणस्य हेतुर्बर्हिः पशवश्च क्षीरादिदानेन तादृशत्वाद्बर्हिःस्वरूपाः ।

अथ पञ्चमीं विधत्ते—

---

१ ऋ. १ १३-३ ॥ २ ऋ. १०-११०-३ ॥ ३ ऋ. १०-११०-४ ॥

दुरो यजति वृष्टिर्वै दुरो वृष्टिमेव तत्प्री-
णाति वृष्टिमन्नाद्यं यजमाने दधाति, इति ।

होता यक्षदुर ऋष्वा इत्यादिना मन्त्रेण प्रेषितो[3] व्यचस्वतीरुर्विया इत्येतां याज्यां पठेत् । दुरो द्वारदेवतां वृष्टिश्च जीवनद्वारा ।

षष्ठीं विधत्ते-

उषासानक्ता यजत्यहोरात्रे वा उषासानक्ताऽहो-
रात्रे एव तत्प्रीणात्यहोरात्रयोर्यजमानं दधाति, इति ।

होता यक्षदुषासानक्तेति मन्त्रेण प्रेषित आसुष्वयन्तीत्यादिकां याज्यां पठेत् । उषःशब्दस्य नक्तशब्दस्य चाहोरात्रविषयत्वं लोकप्रसिद्धम् ।

सप्तमीं विधत्ते-

दैव्या होतारा यजति प्राणापानौ वै
दैव्या होतारा प्राणापानावेव तत्प्री-
णाति प्राणापानौ इति ।

होता यक्षद्दैव्या होतारेति मन्त्रेण प्रेषितो[4] दैव्या होतारा प्रथमेति याज्यां पठेत् ।

अष्टमीं विधत्ते-

तिस्रो देवीर्यजति प्राणो वा अपानो
व्यानस्तिस्रो देव्यस्ता एव तत्प्री-
णाति ता यजमाने दधाति, इति ।

होता यक्षत्तिस्र इत्यादिमन्त्रेण प्रेषित[5] आ नो यज्ञमिति याज्यां पठेत् । इळा सरस्वती भारतीतिशब्दैराभिधेया देव्यो यथा तिस्र एवं प्राणापानव्यानाना अपि संख्यासाम्यात्तिस्रो देव्यः ।

नवमीं विधत्ते—

त्वष्टारं यजति वाग्वै त्वष्टा वाग्धीदं

---

१ क. १०-११०-५॥ २ क. १०-११०-६॥ ३ क. १० ११०-७॥
४ क. १०-११०-८॥

सर्वं ताष्टीव वाचमेव तत्प्रीणाति
वाचं यजमाने दधाति, इति ।

होता यक्षत्त्वष्टारमिति मन्त्रेण प्रेषितो होता[1] य इमे द्यावापृथिवी इति याज्यां पठेत् । तक्षू त्वक्षू तनूकरण इत्यत्र त्वक्षीत्यादिधातोरुत्पन्नः शब्दस्त्वष्टारं देवतामाचष्टे । वाचश्च तक्षणहेतुत्वात्त्वष्टृत्वं तदेव वाग्घीत्यनेन स्पष्टीक्रियते । यस्मादिदं सर्वं जगद्दारुकाष्टीव तक्षतीव यथा तक्षणेन काष्ठं पौढमपि सूक्ष्मं भवति । एवं महान्तोऽपि पर्वतादयोऽल्पेनैव शब्देन मृह्यन्ते । तदेतज्जगत्तष्टमिव भवति ।

दशमीं विधत्ते—

वनस्पतिं यजति प्राणो वै वनस्पतिः प्राणमेव
तत्प्रीणाति प्राणं यजमाने दधाति, इति ।

होता यक्षद्वनस्पतिमित्यादिमन्त्रेण प्रेषित[2] उपावसृजादिति याज्यां पठेत् । वनस्पतिजन्यफलानां प्राणावस्थितिहेतुत्वाद्वनस्पतेः प्राणत्वम् ।

एकादशीं विधत्ते—

स्वाहाकृतीर्यजति प्रतिष्ठा वै स्वाहाकृतयः
प्रतिष्ठायामेव तद्यज्ञमन्ततः प्रतिष्ठापयति, इति ।

होता यक्षदग्निं स्वाहेति मन्त्रेण प्रेषितः[3] सद्यो जात इति याज्यां पठेत् । स्वाहाकृतीनामाहुतिसमाप्तिहेतुत्वात्प्रविष्ठात्वं तन्मन्त्रपाठेनैनं यज्ञमन्ततः समाप्त्यवसरे प्रतिष्ठायामेव वैकल्यराहित्यरूपायां प्रतिष्ठापयति ।

दशतो बहुविधानामापीसूक्तानामाम्नातत्वाद्विकल्पः स्यादित्याशङ्क्याधिकारिभेदेन व्यवस्थां विधत्ते—

ताभिर्यथर्क्ष्याप्रीणीयाद्यद्यथर्क्ष्याप्रीणाति
यजमानमेव तदन्धुताया नोत्सृजति, इति ।

नोत्सृजति न निःसारयति ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे ऐतरेय
ब्राह्मणभाष्ये षष्ठाध्याये चतुर्थः खण्डः ॥ ४ ॥ (४) [३४] ।

---

१. ऋ. १०-११०-९ ॥ २. ऋ. १०-११०-१० ॥ ३. ऋ. १०-११०-११ ॥

आप्रियो विधाय पर्यग्निकरणा ऋचो विधातुमादौ प्रैषमन्त्रं विधत्ते -

पर्यग्नये क्रियमाणायानुब्रूहीत्याहाध्वर्युः, इति ।

पर्यग्निकरणस्य स्वरूपमापस्तम्बो दर्शयति-' आहवनीयादुल्मुकमादायाऽऽग्नीध्रः परि वाजपतिः' (४ १५-३ इति त्रिः प्रदक्षिणं पर्यग्निकरोति पशुम् ' इति । एवं परितः क्रियमाणायाग्नये योग्या ऋचो हे मैत्रावरुण त्वमनुब्रूहि । अनेनैव मन्त्रेणाध्वर्युः प्रेषयेत् ।

मैत्रावरुणेनानुवक्तव्यास्तिस्र ऋचो विधत्ते -

'अग्नेर्होत्रं नो अध्वरत इति तृचमाग्नेयं गायत्रमन्वाह पर्यग्निक्रियमाणे स्वयैवैनं तद्देवतया स्वेन च्छन्दसा समर्धयति, इति ।

पशोः परितोऽग्निरित्यस्मिन्नर्थे पर्यग्नीत्युच्यते । तस्मिन्क्रियमाणे तृचं मैत्रावरुणोऽनुब्रूयात् । तदाहाऽऽश्वलायनः-' प्रेषितो मैत्रावरुणोऽग्नेर्होत्रा न इति तृचं पर्यग्नयेऽन्वाह ' इति । तृचस्याऽऽदावग्निरित्युक्तत्वादाग्नेयत्वं छन्दश्च तृचस्य गायत्रं परितः क्रियमाणोऽग्निरेव मन्त्रप्रतिपाद्योऽपि । स एवातः स्वयैव देवतयेत्युच्यते । अग्निगायत्र्योर्मुखत्वसाम्याच्छन्दसः स्वत्वम् । नोऽस्माकमध्वरे यज्ञेऽयमग्निर्होता यज्ञनिष्पादक इति तस्य पादस्यार्थः ।

द्वितीयं पादमनूद्य व्याचष्टे-

वाजी सन्परिणीयत इति वाजिनमिव ह्येनं सन्तं परिणयन्ति, इति ।

अयमग्निर्वाज्यन्नपदानेनान्नवान्गतिमान्वा तादृशः सन्नृत्विग्भिः पशोः परितो नीयते । तत्पादपाठेनैनमग्निं वाजिनमेव सन्तमृत्विजः परितो नयन्ति ।

द्वितीयस्या ऋचः पूर्वार्धमनूद्य तात्पर्यं दर्शयति-

परि विश्वानि काव्याध्वरं याति रथीरिवेत्येष हि रथीरिवाध्वरं परियाति, इति ।

तृतीयस्या ऋचः प्रथमपादमनूद्य व्याचष्टे-

परि वाजपतिः कविरित्येष हि वाजानां पतिः, इति ।

---

१ ऋ. ४-१५-१ ॥

कविरनूचानः । ' ये वा अवूचानास्ते कवयः ' इति श्रुतेः । तादृशोऽग्निर्वाजपतिरन्नस्वामी । एष हीत्यादिना तदर्थप्रसिद्धिरुच्यते । अन्नभक्षकत्वाद्वाजपतिः ।

अथ होतारं प्रति मैत्रावरुणप्रैषार्थं मैत्रावरुणं प्रत्यध्वर्योः प्रैषमन्त्रं विधत्ते—

अत उपप्रेष्य होतर्हव्या देवेभ्य इत्याहाध्वर्युः, इति ।

अतः पर्याग्निकरणानुवचनादूर्ध्वमध्वर्युरुपप्रेत्यादिकं प्रैषमन्त्रं पठेत् । होतर्देवेभ्यो हविष्युपप्रेष्य प्रेरयेति तस्यार्थः । अत्र मैत्रावरुणस्य होतृसमीपे वरणीयत्वाद्धोतृशब्द उपलक्षकः । तथा सति मैत्रावरुणं प्रत्यध्वर्योर्मन्त्रो भविष्यति ।

अथ मैत्रावरुणेन पठनीयं मन्त्रं विधत्ते—

अजैदग्निरसनदाजामिति मैत्रावरुण उपप्रेषं प्रतीच्छते इति ।

अत्र शामित्रदेशं प्रति नीयमानस्य पशोः पुरतो य उल्मुकाकारोऽग्निर्गच्छति सोऽग्निरजैज्जयतु । पशोः पुरस्ताद्गमनं शाखान्तरे श्रूयते—' अग्निना पुरस्तादेति रक्षसामपहत्यै ' इति । तस्याग्नेर्जयो नाम हविःसंपादनसामर्थ्यं सोऽग्निर्वाजमन्नं हविर्लक्षणमसनत् । अस्य मन्त्रस्यान्तरुपप्रेष्य होतर्हव्या देवेभ्य इति श्रूयते । यतो होतारं प्रति मैत्रावरुणो मुख्यस्याध्वर्युप्रैष्यस्य समीपवर्तित्वादयमुपप्रेष्यः ।

अत्र ब्रह्मवादिनां चोद्यं वैयधिकरण्यरूपमुद्भावयति—

तदाहुर्यदध्वर्युर्होतारमुपप्रेष्यत्यथ कस्मान्मैत्रावरुण उपप्रैषं प्रतिपद्यत इति, इति ।

अध्वर्युप्रयुक्ते मन्त्रे होतुः संबोधितत्वान्मैत्रावरुणस्य मन्त्रपाठे वैयधिकरण्यम् । तस्य चोद्यस्य परिहारं दर्शयति—

मनो वै यज्ञस्य मैत्रावरुणो वाग्यज्ञस्य होता मनसा वा इषिता वाग्वदति यां ह्यन्यमना वाचं वदत्यसुर्या वै सा वागदेवजुष्टा तद्यन्मैत्रावरुण उपप्रैषं प्रतीच्छते मनसैव तद्वाचमीरयति तन्मनसेरितया वाचा

देवेभ्यो हव्यं संपादयति ॥ ५ ॥ इति ।

यज्ञपुरुषस्य मैत्रावरुणो मनःस्थानीयो होता तु वाक्स्थानीयः । लोके हि मनसैव प्रेरिता वाक्शब्दमुच्चारयति । यदा त्वन्यमनस्कः पुरुषो वाचं ब्रूते सा वागसुर्याऽसुराणां प्रिया न तु देवजुष्टा देवानां न प्रिया । तथा सति यदि मैत्रावरुणः प्रथममुपप्रैषं ब्रूते । मनसैव वाक्प्रेरिता भवति । ततो मनसा प्रेरितया वाचा देवेभ्यो हव्यं संपादितं भवति । अन्यथा तद्विरसुरेभ्यः संपादितं स्यात् । तस्मादध्वर्युणा होतरित्येवं संबोधितेऽपि मैत्रावरुणोक्तप्रैषपूर्वकमेव होतृवचनं युक्तम् ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऐतरेय-
ब्राह्मणभाष्ये षष्ठाध्याये पञ्चमः खण्डः ॥ ५ ॥ (५) [३५]

मैत्रावरुणोपप्रैषादूर्ध्वं होगुरध्रिगुप्रैषो बौधायनेन दर्शितः—' यदा जानात्युपप्रेष्य होर्वहव्या देवेभ्य इति तं मैत्रावरुणः प्रेष्यत्यजैदग्निरित्यथ होताऽध्रिगुमन्वाह दैव्याः शमितारः ' इति । अध्रिगुः कश्चिद्देवः पशुविशसनस्य कर्ता तं प्रति होता दैव्याः शमितार इत्यादिकं प्रैषमन्त्रमनुब्रूयादिति तस्य सूत्रवाक्यस्यार्थः ।

तमिमं सूत्रोक्तमर्थं विधत्ते—

दैव्याः शमितार आरभध्वमुत मनुष्या इत्याह, इति ।

हे दैव्या देवसंबन्धिनः शमितारः पशुविशसनकारिण आरभध्वं विशसनस्योपक्रमं कुरुतोत मनुष्या अपि मनुष्यरूपा अपि शमितार आरभध्वमित्यादिकमध्रिगुप्रैषमन्त्रं होता पठेत् ।

यथोक्तमन्त्रस्य प्रथमपादं व्याचष्टे—

ये चैव देवानां शमितारो ये च मनुष्याणां तानेव तत्संशास्ति, इति ।

तत्तेन प्रथमपादभागेन द्विविधजातीयाञ्शमितॄन्प्रेरयति ।

मन्त्रस्य द्वितीयभागमनुवदति—

उपनयत मेध्या दुर आशासाना मेधपतिभ्यां मेधमिति, इति ।

प्रारम्भे किं कर्तव्यमिति चेत् । तदुच्यते । मेध्या मेधार्हा दुरो द्वारो हविर्मार्गान्विशसनहेतीर्वोपनयत संनिधापयत मेधपतिभ्यां यज्ञस्वामिपत्नीयजमानार्थमग्नीषोमदेवतार्थं वा मेधं यज्ञमाशासानाः प्रार्थयमाना हे शमितारो यूयमुपनयत ।

अत्र मेधशब्दं मेधपतिशब्दं च व्याचष्टे—

पशुर्वै मेधो यजमानो मेधपतिर्यजमानमेव तत्स्वेन मेधेन समर्धयति, इति ।

मतान्तरानुसारेण मेधपतिशब्दस्यार्थं दर्शयति—

अथो खल्वाहुर्यस्यै वाव कस्यै च देवतायै पशुरालभ्यते सैव मेधपतिरिति, इति ।

अस्तु मेधपतिशब्दो देवतापरस्तावता च को लाभ इत्याशङ्क्याऽऽह—

स यद्येकदेवत्यः पशुः स्यान्मेधपतय इति ब्रूयाद्यदि द्विदेवत्यो मेधपतिभ्यामिति यदि बहुदेवत्यो मेधपतिभ्य इत्येतदेव स्थितम्, इति ।

तृतीयभागमनुवदति -

प्रास्मा अग्निं भरतेति, इति ।

अस्मै पश्वर्थं हे शमितारोऽग्निं प्रभरत प्रथमं नयत ।

अग्नेः प्रथमतो नयनमुपपादयितुमाख्यायिकामाह—

पशुर्वै नीयमानः स मृत्युं प्रापश्यत्स देवान्नान्वकामयतैतुं तं देवा अब्रुवन्नेहि स्वर्गं वै त्वा लोकं गमयिष्याम इति स तथेत्यब्रवीत्तस्य वै मे युष्माकमेकः पुरस्तादैत्विति तथेति तस्याग्निः पुरस्तादैत्सोऽग्निमनु प्राच्यवत, इति ।

शामित्रदेशं प्रति नीयमानः पशुः प्रत्यक्षेण मृत्युं दृष्टवान् । ततः स पशुर्देवानन्वेतुं नान्वकामयताऽऽगन्तुं नैच्छत् । ततो देवाः पशुं प्रत्येवमब्रुवन्हे पशो त्वमागच्छ त्वया सह वयं सर्वे स्वर्गं गच्छाम इति । पशुश्च तदङ्गीकृत्य देवान्प्रत्येवमब्रवीत्, युष्माकं मध्ये कश्चिद्देवो मम पुरस्ताद्गच्छात्विति । तद्वचनमङ्गी-

कृत्याग्निर्देवस्तस्य पशोः पुरस्तादगच्छत् । तत स पशुस्तमग्निमनु स्वयमपि तुष्टः सन्प्रकर्षेणागच्छत् । तस्मादग्निं प्रभरतेत्येतद्युक्तम् ।

उक्तमर्थं लोकप्रसिद्ध्या द्रढयति-

तस्मादाहुराग्नेयो वाव सर्वः पशुरग्निं हि सोऽनु प्राच्यवतेति, इति ।

यस्मादग्निमनु पशुः प्रागच्छत्तस्मादाग्नेयः सर्वः पशुरित्येवं याज्ञिकलोकप्रसिद्धिः । अत एव सर्वं पशुमग्नौ जुह्वति ।

यस्मादेवं प्रसिद्धिस्तस्मादेव कारणात्पशोः पुरस्तादग्निं नयेयुरित्येतमर्थं प्रसङ्गाद्विधत्ते-

तस्माद्वस्याग्निं पुरस्ताद्धरन्ति, इति ।

तस्माद् तस्मादेव ।

चतुर्थभागमनूद्य व्याचष्टे-

स्तृणीत बर्हिरित्योषध्यात्मा वै पशुः पशुमेव तत्सर्वात्मानं करोति, इति ।

संज्ञपनस्थानं नीतस्य पशोरधस्तादुपाकरणसाधनयोर्बर्हिषोरन्यतरद्बर्हिर्हे शमितार उपक्षिपत । पशुभक्षितानामोषधीनां पश्ववयवत्वेन परिणतत्वात्पशोरोषध्यात्मत्वमवस्तद्भागपाठेन पशुं सर्वौषध्यात्मानं करोति ।

पञ्चमभागमनूद्य व्याचष्टे -

अन्वेनं माता मन्यतामनु पिताऽनु भ्राता सगर्भ्योऽनु सखा सयूथ्य इति जनित्रैरेवैनं तत्समनुमतमालभन्ते, इति ।

संज्ञप्यमानमेनं पशुं मात्रादयोऽङ्गी कुर्वताम् । समाने गर्भे भवः सगर्भ्यः एकोदरो भ्रातृविशेषणमेवत्, समाने यूथे भवः सयूथ्यः पशुसमूहाध्यावर्तकविशेषणमेवत् । तद्भागपाठेनैनं पशुं जनित्रैस्तज्जन्मसंबन्धिभिः पश्वन्तरैरनुज्ञातं कृत्वा पश्चादालभन्ते ।

षष्ठं भागमनूद्य व्याचष्टे-

उदीचीनाँ अस्य पदो निधत्तात्सूर्यं चक्षुर्गमयता-

त्रातं प्राणमन्ववसृजतादन्तरिक्षमसुं दिशः श्रोत्रं पृथिवीं शरीरमित्येष्वेवैनं तल्लोकेष्वादधाति, इति ।

संज्ञप्यमानस्य पशोः पदः पादानुदीचीनानुत्तरदिग्गतान्निधत्तात्स्थापयत । चक्षुरिन्द्रियं सूर्यदेवतां प्रापयत । प्राणं वायुदेवतां पत्यन्ववसृजतात्प्रापयत । असुं जीवमन्तरिक्षं प्रापयत । श्रोत्रं दिग्देवतां प्रापयत । शरीरं पृथिवीं प्रापयत । तद्भागपाठेनैनं पशुमेष्वेव यथोक्तदेवतासंबन्धिषु लोकेषु स्थापयति ।

सप्तमभागमनूद्य व्याचष्टे—

एकधाऽस्य त्वचमाच्छ्यतात्पुरा नाभ्या अपि शसो वपामुत्खिदतादन्तरेवोष्माणं वारयध्वादिति पशुष्वेव तत्प्राणान्दधाति, इति ।

एकधैकविधया विच्छेदराहित्येनास्य त्वचमाच्छ्यतात्समन्ताच्छिन्नां कुरुत । नाभ्या अपि शसश्छेदात्पूर्वमेव वपामुत्खिदतादुद्धरत । ऊष्माणमुच्छ्वासमन्तरेव वारयध्वान्निवारयत पिहितास्यं संज्ञपयतेत्यर्थः । तद्भागपाठेन पशुष्वेव प्राणान्संपादयति ।

अष्टमभागमनूद्य व्याचष्टे—

श्येनमस्य वक्षः कृणुतात्प्रशसा बाहू शला दोषणी कश्यपेवांसाऽच्छिद्रे श्रोणी कवषोरू स्रेकपर्णाऽष्ठीवन्ता षड्विंशतिरस्य वङ्क्रयस्ता अनुष्ठ्योच्च्यावयताद्गात्रं गात्रमस्यानूनं कृणुतादित्यङ्गान्येवास्य तद्गात्राणि प्रीणाति, इति ।

श्येनं श्वेताकृतिकमस्य पशोर्वक्षः कुरुत । बाहू प्रशसा प्रकृष्टच्छेदनौ कुरुत । दोषणी प्रकोष्ठौ शला कृणुताच्छलाकाकारौ कुरुत । उभावप्यंसौ कश्यपाकारौ कुरुत । श्रोणी उभे अप्यच्छिद्रे अनूने कुरुत । कवषोरू कवषाकारावूरू स्रेकपर्णा करवीरपत्राकारावष्ठीवन्तावूरू मूलयुक्तौ कुरुत । अस्य पशोर्वङ्क्रयो वक्राणि पार्श्वास्थीनि षड्विंशतिर्भवन्ति । ताः सर्वा अनुष्ठ्यानुक्रमेण स्वस्थानगतान्युच्च्यावयतोद्धरत । गात्रं गात्रं सर्वमप्यनूनमङ्गमनूनं कृणुतादविकलं कुरुत । तद्भागपाठे तस्य पशोरङ्गान्येवावयवरूपाण्येव गात्राणि प्रीणाति ।

गात्रशब्दः शरीरे तदवयवे च वर्तते । अतोऽत्रावयवविवक्षां द्योतयितुमङ्गनामेति निर्देशः ।

नवमभागमनूद्य व्याचष्टे-

ऊवध्यगोहं पार्थिवं खनतादित्याहौषधं वा ऊवध्यमियं वा ओषधीनां प्रतिष्ठा तदेनत्स्वायामेव प्रतिष्ठायामन्तरः प्रतिष्ठापयति, इति ।

ऊवध्यगोहं पुरीषगूहनस्थानं पार्थिवं खनतात्पृथिवीसंबन्धमेव खनत । अत्रोवध्यशब्देनौषधमेवोच्यते पुरीषस्य पशुभक्षितस्यौषधिविकारत्वात् । ओषधीनां चेयमेव भूमिः प्रतिष्ठाऽऽश्रयः । तत्तथा सत्येनमूवध्यं स्वकीयायामेव प्रतिष्ठायां भूमिरूपायामन्ततः पशुविशसनान्ते प्रतिष्ठापयति ।

अत्र मीमांसा-नवमाध्याये चिन्तितम्-

"अधिकारो विकारो वा स्यान्मेधपतिशब्दयोः ।
यिकारे स्वामिदेवार्थौ एकार्थौ वाऽन्तिमेऽपि किम् ॥
स्वाम्यर्थौ देवतार्थौ वा स्यादन्याय्यत्वतोऽग्रिमः ।
अर्थसत्त्वा(भेदा)विकारोऽत्र द्वावर्थौ शब्दयोर्द्वयोः ॥
मन्त्रैक्यादर्थ एकोऽत्र स्वाम्यस्मिञ्जायया द्विता ।
देवार्थांशैर्देव एकोऽधिष्ठाने द्वे द्विधेरणम्" ॥

अध्वर्युप्रैषनिमदस्याऽऽदाविदमाम्नायते-'दैव्याः शमितार आरभध्वमुत मनुष्या उपनयत मेध्या दुर आशासाना मेधपतिभ्यां मेधम्' इति । शाखान्तरे तु मेधपतये मेधमिति । अयमर्थः । शमितारः पशुघातिनो द्विविधा दैव्या मानुषाश्च, तानुभयान्संबोध्य होता कर्तव्यविशेषान्निर्दिशति-'आरम्भः कर्तव्यो मेधो यज्ञस्तद्योगाद्दु(ग्धान्दु)रः पदार्थान्हिंसाहेतूनिहाऽऽनयत । किं कुर्वन्तः । यज्ञपतिभ्यां यज्ञमतये वा यज्ञमाशासाना इति । तत्रैकवचनान्तस्य द्विवचनान्तस्य च मेधपतिशब्दस्य बहुपशुयुक्तासु विकृतिष्वनूह ऊहो वेति संशयः । ऊहपक्षेऽपि किमेकवचनान्तस्य यजमानोऽर्थो द्विवचनान्तस्याग्नीषोमौ देवतार्थ इत्येवमर्थभेदः किं वा शब्दद्वयस्यैक एवार्थ इति संशयः । एकार्थत्वपक्षेऽपि यजमान एवार्थो देवतैव वेति संशयः । अत्राग्नीषोमीये पशौ यजमानोऽग्नीषोमौ चेति त्रयो मेधस्य पतयस्तेष्वेकवचनस्य द्विवचनस्य चान्यायनिगदत्वेन प्रकृतावविवक्षितस्य वचनस्य विकृतावनूह इत्याद्यः पक्षः । प्रकृतौ समवेतार्थे संपादयितुं शक्ये सत्यन्यायनिमदत्वाभावाद्विकृतावूहः कर्तव्य इति । द्वितीयः पक्षः ।

अस्मिन्द्वितीयपक्षेऽपि प्रकृतावुपन्यस्तप्रकारेणार्थभेदाद्विकृतिषु द्विबहुयजमानयुक्तास्वहीनादिषु यजमानानुसारेणैकवचनान्त ऊहनीयः । अनेकपशुयुक्तासु विकृतिषु देवतानुसारेण द्विवचनान्त ऊहनीयः । सोऽयं शाखाविकल्पे प्रथमः पक्षः । शाखाभेदेन पाठभेदेऽपि मन्त्रभेदाभावादर्थभेदो न युक्तः किं त्वेक एवार्थ इति पक्षान्तरः । तदाऽपि देवतायाः संप्रदानत्वेन स्वामित्वाभावान्मेधपतिशब्दयोग्यता नास्तीति यजमान एव तच्छब्दार्थः । तस्मिन्यजमान एकत्वं जायया सह द्वित्वमित्येकवचनाद्विवचने उभे आपे समवेतार्थे । ततो यजमानद्वयोपेतायां विकृतावेकवचनान्तो द्वित्वेनोहनीयो द्विवचनान्तो बहुत्वेनेति पूर्वः पक्षः । मेधस्य यजमानार्थत्वेनैवाऽऽशासनीयत्वस्य सिद्धत्वाद्देवतार्थत्वं त्वाशासनीयम् । ततो मेधमाशासाना इत्येतद्देवतायां समवेतार्थसंप्रदानस्याप्युद्देश्यत्वेन प्राधान्यान्मेधपतित्वमविरुद्धम् । देवत्वाकारेणैकत्वादाग्नित्वसोमत्वाकारेण द्वित्वाच्चैकवचनाद्विवचने उपपन्ने । तस्माद्देवतानुसारेण विकृतावूह इति सिद्धान्तः ।

तत्रैवान्यच्चिन्तितम् -

"आदित्येष्वेकवाच्येष ऊहो नो वोह्यतेऽन्यवत् ।
गणार्थत्वादनूहोऽतो विकल्पः प्रकृताविव" ॥

प्रजापशुसंपत्तिकामस्य बहुदेवत्यः पशुराम्नायत्–' यः कामयेत प्रथेयं पशुभिः प्र प्रजया जायेयेति स एतामेवं वशामादित्येभ्यः कामायाऽऽलभेत ' इति । वशा वन्ध्या कामाय कामुकेभ्य इत्यर्थः । अत्र चोदकप्राप्तो मेधपतय इत्येकवचनान्तः शब्द आदित्यानां बहुत्वाद्बहुवचनान्तत्वेनोहनीयः । यथा मेधपतिभ्यामिव द्विवचनान्त ऊह्यते । यथा वा प्रास्मा इत्येकवचनान्तः । ऊह्यते तद्वदिति चेत् । नैवम् । प्रकृतावग्नीषोमयोर्गणैकत्वमेकवचनान्तो ब्रूते । आदित्यानामपि गणैकत्वं समानमित्यनूहः । तस्मादविकृत एकवचनान्त इतरेण सह प्रकृताविवात्रापि विकल्प्यते ।

तत्रैवान्यच्चिन्तितम्–

" कृष्णग्रीवादिकेऽनूह ऊहो वा नास्य पूर्ववत् ।
देवत्वं न गणस्यात ऊहो बह्वभिधित्सया "॥

यूपैकादशिन्यामग्न्यादिदेवताकाः पशव आम्नाताः–' प्रैवाऽऽग्नेयेन मापयति मिथुनं सारस्वत्या करोति रेतः सौम्येन दधाति प्रजनयति पौष्णेन ' इत्यादिना । ते च स्वनामभिरन्यत्राऽऽम्नाताः–' आग्नेयः कृष्णग्रीवः सारस्वती

मेषी वस्रुः सौम्यः पौष्णः श्यामः ' इत्वादिना । तत्रास्यैकवचनान्तस्य मेषपति-शब्दस्याऽऽदित्येष्विव नोह इति चेत् । मैवं वैषम्यात् । आदित्यगणस्य तत्र देवत्वमिह त्वेकैकस्य पृथग्देवत्वमतो बहून्देवानभिधातुं बहुवचनान्तत्वमूहनीयम् ।

तत्रैवान्यच्चिन्तितम्--

' द्विपश्वोश्चक्षुराद्यूहो न वोहः पशुभेदतः ।
तेजोमात्रस्य सूर्यादावेकीभावादनूहनम् "

अग्नीषोमीयपशावधिगुपैषे पशुसंबन्धिचक्षुरादीनां सूर्यादिसंसर्ग आम्नायते—' सूर्यं चक्षुर्गमयताद्वातं प्राणमन्ववसृजतादन्तरिक्षमसुं दिशः श्रोत्रम् ' इत्यादि । मैत्रं श्वेतमालभेत वारुणं कृष्णमिति विहितयोर्द्व्योः पश्वोर्मन्त्रगताश्चक्षुरादिशब्दा द्विवचनान्तत्वेनोहनीयाः । कुतः, पशुभेदेन चक्षुरादीनां भेदादिति चेत् । मैवम् । न खल्वत्रेन्द्रियाधिष्ठानं शरीरगतगोलकं चक्षुःशब्देन विवक्षितम् । तद्विवक्षायामेकस्मिन्पशौ गोलकभेदादेकवचनान्तचक्षुःशब्दस्यानन्वयप्रसङ्गाद्गोलकस्य सूर्यादिप्राप्त्यसंभवाच्च । यत्तु रूपदर्शनादिसामर्थ्यं लक्षणं तेजोमात्रं तदत्र चक्षुरादिशब्दैर्विवक्षितम् । तच्च पश्वनेकत्वेऽपि । ततो निर्गत्य सूर्यादावेकीभूतत्वात्समुद्रप्रविष्टनदीवन्न भेदेनावतिष्ठते । तस्मान्नास्त्यूहः ।

तत्रैवान्यच्चिन्तितम्—

"एकधेत्यविकारः स्यादभ्यासो वा सहस्रवत् ।
आद्यो मैवं प्राकृतस्य सकृत्त्वस्योचितत्वतः" ॥

तस्मिन्नेवाधिगुपैषे श्रूयते—' एकधाऽस्य त्वचमाच्छयतात् ' इति । छिन्धीत्यर्थः । तत्र द्वयोः पश्वोरेकधेत्यस्य शब्दस्य नास्ति विकारः । कुतः तस्य शब्दस्य सहस्रवच्चित्वादेकधा गाः पाययतीत्यत्र यौगपद्ये प्रयोगदर्शनात् । पश्वनेकत्वेऽपि त्वगुत्पाटनस्यैककालीनत्वं बहुपुरुषकर्तृकत्वं च घटत इति प्राप्ते ब्रूमः । प्रकृतावेकस्मिन्पशौ यौगपद्यलक्षणोऽर्थो न संभवति ततः सकृत्त्वं तस्य शब्दस्यार्थः । त्वगियमवयवशो बहुकृत्वो न च्छेत्तव्या किंतु सर्वाऽपि सकृदेकप्रयत्नेनेत्युक्तं भवति । यत्प्रकृतौ सकृत्त्वं तदेव विकृतावुचितम् । ततः प्रतिपशु सकृत्त्वमभिधातुमेकधेत्ययं मन्त्रोऽभ्यसितव्यः ।

तत्रैवान्यच्चिन्तितम् —

"सादृश्यमुत साकल्यं श्येनाद्युक्तौ विवक्षितम् ।
प्रसिद्धसंनिधेराद्यस्तत्सत्त्वादखिलोद्धृतिः " ॥

अध्वर्युरेषे वचनमेतदाम्नायते—'श्येनमस्य वक्षः कृणुतात्' इति । तत्र यथाऽमी पिष्टपिण्डाः सिंहाः क्रियन्तामित्युक्ते प्रसिद्धसिंहसंनिधानात्पिष्टपिण्डेषु सिंहसादृश्यं कर्तव्यतया प्रतीयते तथैवास्य पशोर्वक्षः श्येनं कृणुतादित्यत्र श्येनसादृश्यं वक्षसि कर्तव्यतया प्रतीयते । ततो बहु(वक्ष) उद्धृत्य कर्तनाद्युपायेन पक्षचरणखुरादिकं संपाद्य श्येनसंस्थानं कर्तव्यमिति प्राप्ते ब्रूमः । वक्षसि श्येनसादृश्यं स्वत एव पूर्वमस्ति । ततो यथा तन्न नश्यति तथा साकल्येनोद्धरणीयमिति विवक्षया श्येनशब्दः प्रयुज्यते । तथा सति हविरविकलं भवति । अंसादिष्वनेनैव न्यायेन साकल्यविवक्षया तत्तद्रूपोक्तिर्द्रष्टव्या । एतदेवाभिप्रेत्य श्रूयते—'गात्रं गात्रमस्यानूनं कृणुतात्' इति ।

"प्रशसेत्यसिरर्थः स्यात्स्तुतिर्वा छेदनादसिः ।
स्तुतिः कात्स्न्र्याय बाह्वोः स्यात्स्वधितिश्छेदसाधनम्" ॥

अध्वर्युरेषे वाक्यन्तरमाम्नातम्—प्रशसा बाहू इति । शंसु हिंसायामित्यस्माद्धातोः सोपसर्गादुत्पन्नस्य सकारान्तप्रातिपदिकस्य तृतीयैकवचनान्तस्य प्रशसेति रूपं भवति । तच्चासिवाचकं तदेतत्केनचिद्ब्राह्मणवाक्येनानूद्यते—दश प्रयाजानिष्ट्वा शासमाहरेति । असिर्वै शास इत्याचक्षत इति । अयमसिर्बाह्वोश्छेदनहेतुस्तस्माद्दृष्टार्थलाभादसिः प्रशसेत्यस्य पदस्यार्थ इति चेत् । नैवम् । शंसु स्तुताविति स्माद्धातोरयमुत्पन्नः । प्रशस्ताविति स्य द्वितीयाद्विवचनान्तस्य शब्दस्य च्छान्दसे तकारलोप आकारादेशे च कृते प्रशसेति भवति । बाह्वोः प्रशस्तत्वं नाम कात्स्न्र्यं प्रशस्तौ बाहू कृणुतादित्युक्ते निःशेषेणोद्धर्तव्यौ बाहू इत्येतादृशो दृष्टोऽर्थो लभ्यते । नात्र च्छेदनसाधनत्वमसेः संभवति स्वधितेस्तत्साधनत्वेन विहितत्वात् । तस्मात्स्तुतिरेवास्य शब्दस्यार्थः । तथा सति बाहुवृद्धौ बहुवचनान्तत्वेन प्रशसेति पदमूहनीयम् ।

तत्रैवान्यच्चिन्तितम्—

"षड्विंशतिर्वङ्क्रयोऽस्येत्यनूहः स्यादुतोह्यते ।
ऊहेऽपि वचनान्यत्वमस्येत्यावर्त्यतेऽथ वा ॥
षड्विंशतेरुताभ्यासः समस्तोक्तिर्भवेदुत ।
अनूहोऽकरणत्वेन दृष्टलाभाच्चदूहनम् ॥
संख्यायाश्च पशोर्युक्तेर्वङ्क्रीणां मुख्यतावशात् ।
अमी पक्षा युज्यन्तेऽन्यस्ता अनुष्ठ्येति शेषतः" ॥

अधिगुपेषे वाक्यमिदमाम्नायते-'षड्विंशतिरस्य वङ्क्रयस्ता अनुष्ठ्योच्च्या वयतात्' इति। अयमर्थः। वङ्क्रयो वक्राणि पार्श्वास्थीनि तान्यस्य पशोः षड्विंशतिसंख्याकान्येकैकस्मिन्पार्श्वे त्रयोदशानामवस्थितत्वात्। वङ्क्रीरनुष्ठ्यानुष्ठायानुक्रमेण गणयियेत्वेति यावत्। उच्च्यावयतादुद्धरतादिति। सोऽयं मन्त्रो वङ्क्रीणामुद्धरणे करणतया न विनियुक्तः किं तु संज्ञपनात्प्राक्पशौ नीयमाने होत्रा प्रयुज्यते। ततोऽसमवेतार्थत्वादनूह इत्याद्यः पक्षः। अकरणत्वेऽपि नादृष्टार्थत्वं वक्ष्यमाणार्थस्मारकत्वेन दृष्टार्थलाभात्। तस्मात्प्रकृतौ समवेतार्थतया विकृतावूहः। तदाऽमि चत्वारः पक्षाः। तत्र संख्या मुख्यत्वेन प्रकाश्यते। तेन द्वयोः पश्वोर्द्विगुणितां षड्विंशतिसंख्यां प्रकाशयितुं द्विवचनान्ततया षड्विंशतिशब्द ऊहनीय इत्याद्यः पक्षः। पशोश्चोदितत्वेन मुख्यत्वात्तद्वाचकं षष्ठ्यन्तमस्येति पदं पश्वनुसारेणाऽऽवर्तनीयामिति द्वितीयः पक्षः। युक्तियोगः। षड्विंशतिसंख्यायाश्च पशुना सह संबन्धात्तस्य मुख्यात्वात्प्रतिपशु विभक्तसंख्यां प्रकाशयितुं षड्विंशतिपदस्याभ्यास इति तृतीयः पक्षः। अत्र सर्वत्र मुख्यानुसारेण पदान्तराण्यूहनीयानि। संख्येयानां वङ्क्रीणां मुख्यत्वात्तासामियत्ता समस्य वक्तव्या। ततो द्वात्रिंशदनयोर्वङ्क्रयोऽष्टसप्ततिरेषां वङ्क्रय इत्येवं यथायोगमूहनीयामिति चतुर्थन्तसः। अयमेव सिद्धान्तो वाक्यशेषानुगुण्यात्। ता अनुष्ठ्येत्ययं वाक्यशेषः। स च व्याख्यातः।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऐतरेय ब्राह्मणभाष्ये षष्ठाध्याये पञ्चमः खण्डः ॥ ६ ॥ (६) (३६)

यद्यप्यधिगुपैषमन्त्रो न समाप्तस्तथाऽप्यनन्तरभागे बहुवक्तव्यसद्भावात्खण्डान्तरं कृतम्।

दशमं भागमनूद्य व्याचष्टे—

अस्ना रक्षः संसृजतादित्याह तुषैर्वै फलीकरणैर्देवा हविर्यज्ञेभ्यो रक्षांसि निरभजन्नस्ना महायज्ञात्स यदस्ना रक्षः संसृजतादित्याह रक्षांस्येव तत्स्वेन भागधेयेन यज्ञान्निरवदयते, इति।

अस्राऽसृजा रुधिरेण रक्षः संसृजवान्मांसाभिलाषव्यावृत्त्यर्थं राक्षसान्रक्के-नैव संयोजयत । एनं मन्त्रभागं होता ब्रूयात् । किमर्थमेतदिति तदुच्यते । पुरा देवास्तुषैर्व्रीहिगतैर्हेयांशैः फलीकरणैस्तण्डुलछेदैश्च दर्शपूर्णमासादिहविर्यज्ञेषु समा-गतानि रक्षांसि तोषयित्वा तेभ्यो यज्ञेभ्यो निरभजन्हविर्भागरहितान्यकु-र्वन् । महायज्ञे ज्योतिष्टोमादिके समागतानि रक्षांसि पशुरक्तेन तोषयित्वा तस्माद्यज्ञान्निरभजन्निःसारितवन्तः । हविर्यज्ञेभ्यो निःसारणं शास्त्रान्तरे दर्श-पूर्णमासप्रकरणे मन्त्रव्याख्याने समाम्नातम्—' रक्षसां भागोऽसीत्याह तुषैरेव रक्षांसि निरवदयते ' इति । तदेतदापस्तम्बेनोक्तम्—' मध्यमे पुरोडाशकपाले तुषानोप्य रक्षसां भागोऽसीत्यधस्तात्कृष्णाजिनस्योपवपति ' इति । महायज्ञा-न्निःसरणमग्नीषोमीयपशुप्रकरणे तैत्तिरीयैराम्नातम्—' रक्षसां भागोऽसीति स्थवि-मतो बर्हिरङ्क्त्वाऽभास्यत्यस्यैव रक्षाꣳसि निरवदयतः ' इति । स्थविमतः स्थौल्ययुक्ते बर्हिर्मूलभाग इत्यर्थः । एवमपि सूत्रकारेण स्पष्टीकृतम्—'बर्हिषोऽग्रꣳ सव्येन पाणिनाऽऽदत्ते ' तं मध्यं यत आर्च्छति तदुभयतो लोहितेनाङ्क्त्वा रक्षसां भागोऽसीत्युत्तरमपरमवान्तरदेशं निरस्त ' इति । एवं सति यद्यस्रा रक्ष इति भागं पठेत्तदानीं रक्षांसि स्वकीयभागेन युक्तानि कृत्वा महायज्ञान्निरव-दयते निःसारयति ।

अथास्रेत्येतस्य मन्त्रभागस्य पाठं पूर्वपक्षत्वेनाऽऽक्षिपति—

तदाहुर्न यज्ञे रक्षसां कीर्तयेत्कानि रक्षांस्यूतेरक्षा वै यज्ञ इति, इति ।

तत्तत्र मन्त्रभागे चोद्यवादिन आहुः । कथमिति, उच्यते । यज्ञे प्रवर्तमाने सति कानिचिदपि रक्षांसि न कीर्तयेत् । जातिविशेषानपेक्ष्य बहुवचनानि-र्देशः । राक्षसावान्तरजातीनां मध्ये राक्षसमसुरं पिशाचं वा न कंचिदपि कीर्तयेत् । जातिविशेषाः श्रुत्यन्तरे सैन्यद्वयोपन्यासे श्रूयन्ते—' देवा मनुष्याः पितरस्तेऽन्यत आसन्नसुरा रक्षाꣳसि पिशाचास्तेऽन्यतः इति । अकीर्तने हेतुमूते-रक्षा इतिपदेनोपन्यस्यति । तदेतत्समस्तमेव पदम् । ऋतशब्दो वर्जनवाची । वर्जितं रक्षो यस्मिन्यज्ञे सोऽयमूतेरक्षाः । यज्ञो (ज्ञे) हि हविर्यागत्वादेवा एव नामग्रहणमर्हन्ति न तु रक्षःप्रभृतयः । तस्मादेवं मन्त्रभागं न कीर्तयेदित्या-क्षेपवादिनामभिप्रायः ।

समाधत्ते-

तदु वा आहुः कीर्तयेदेव, इति।

तदु वै तस्मिन्नेवास्ना रक्ष इति मन्त्रभागे संप्रदायविदः समाधानमाहुः। यद्यपि तत्र रक्षोनामास्ति तथाऽपि तं भागं कीर्तयेदेव।

तत्रोपपत्तिमाह-

यो वै भागिनं भागान्नुदते चयते
वैनं स यदि वैनं न चयतेऽथ पुत्र-
मथ पौत्रं चयते त्वेवैनामिति, इति।

यः पुमान्भागिनं भागार्हं सन्तमन्यं पुरुषं तदीयाद्भागान्नुदते नाशयत्येनं विनाशयितारं स नष्टभागः संश्चयते वैनं च्यावयत्येव। यदि वा यदा कदाचिद्विनाशयितुः प्राबल्ये सति तदानीमेनं न चयते न च्यावयति। अथापि कालान्तरे तदीयं पुत्रं पितृद्वेषेण विनाशयति तदाऽप्यशक्तौ पौत्रं वा विनाशयति। किं बहुना भागभ्रष्टो मनसि द्वेषं गृहीत्वा स्वविरोधिनमेनं भ्रंशयितारं यदा कदाचित्केनापि द्वारेण चयते त्वेव विनाशयत्येवेत्वनेनाभिप्रायेण मन्त्रभागं कीर्तयेदेवेत्यभिज्ञैरुक्तम्। यद्यपि रक्षसां हविर्भागो नास्ति तथाऽपि यज्ञतुषकणादिदेवान्हभागोऽस्त्येव तस्मात्कीर्तनपक्ष एव युक्तः।

तत्रैतस्य मन्त्रभागस्य कीर्तने कंचिद्विशेषं विधत्ते-

स यदि कीर्तयेदुपांशु कीर्तयेत्तिर इव वा एत-
द्वाचो यदुपांशु तिर इवैतद्यद्रक्षांसि, इति।

स याज्ञिको यज्ञे रक्षसां नामधेयं द्वेषपरिहाराय यदि कीर्तयेत्तदाऽप्युपांशु परैर्यथा न श्रूयेत तथा कीर्तयेत्। वाचः संबन्धि यदुपांशुकीर्तनमेतत्तिर इव तिरोहितमिव भवति। यथा कुड्यादिव्यवहितं स्तम्भादिकं चक्षुषा न दृश्यते तथैवोपांशुकथितं न श्रूयते। रक्षांसीति यदस्त्येतदपि तिर इव चोरवद्यज्ञे रक्षसां मूढचारित्वात्। तस्मात्तदीयकीर्तनस्योपांशुत्वं युक्तम्।

विपक्षे बाधं दर्शयति-

अथ यदुच्चैः कीर्तयेदीश्वरो हास्य
वाचो रक्षोभाषो जनितोः, इति।

अथोपांशुवैलक्षण्येन यद्युच्चैः कीर्तयेदस्य कीर्तयितुः संबन्धिनीर्वाचो रक्षोभाषो जनितोर्जनयितुमयमीश्वरो भवति । रक्षोभिर्भाष्यत इति रक्षोभाष्, इत्यस्य स्त्रीलिङ्गस्य द्वितीयाबहुवचनं रक्षोभाष इति । तदेतद्वाच इत्यस्य विशेषणम् । अस्योच्चैः कीर्तयितुर्या वाचः सन्ति ताः सर्वा रक्षःप्रोक्तवाग्रूपेणोत्पादयितुमयं संकीर्तयिता समर्थो भवतीति ।

कोऽयं समर्थ इत्याशङ्क्य तं विशेषाकारेण दर्शयति—

योऽयं राक्षसीं वाचं वदति सः, इति ।

लोके यः पुमान्रक्षसां वाचं परमर्तनरूपामुच्चध्वनित्वेन भीतिकरीं वाचं ब्रूते स पुमांस्तामप्युच्चैः कीर्तयन्रक्षसां वागुत्पादको भवति ।

काऽसौ राक्षसी वागित्याशङ्क्याऽऽह—

यां वै दृप्तो वदति यामुन्मत्तः सा वै राक्षसी वाक्, इति ।

धनविद्यादिना दृप्तो दर्पं प्राप्तः परतिरस्कारहेतुं यां वाचं वदत्युन्मत्तश्च बुद्धिराहित्यात्पूर्वापरसंबन्धरहितां यां वाचं वदति सेयमुभयविधाऽपि राक्षसी वाक् ।

एतद्वेदनं प्रशंसति—

नाऽऽत्मना दृप्यति नास्य प्रजायां
दृप्त आजायते य एवं वेद, इति ।

वेदिता स्वयमपि दर्पं गाऽऽप्नोति तदा स्वीयायां प्रजायां कश्चिदपि दृप्तो नोत्पद्यते ।

एकादशं भागमनूद्य व्याचष्टे—

वनिष्ठुमस्य मा राविष्टोरूकं मन्यमाः ।
नेस्तोके तनये रविता रवच्छमितार
इति ये चैव देवानां शमितारः ये च मनुष्याणां तेभ्य एवैनं तत्परिददाति, इति ।

हे शमितारो दैव्या मानुष्यश्च वनिष्ठुं वपायाः समीपवर्तिनं मांसखण्डमस्य पशोः संबन्धिनमुलूकमुलूकाख्यं पक्षिसदृशं मन्यमाना विशेषाकारेण विजानन्तो मा राविष्ट मैव लवनं कुरुत । उलूकसदृशो वनिष्ठुर्यथा वर्तते तथैवोद्धरत न तु मध्यतश्छिन्नं कुरुतेत्यर्थः । एवं कुर्वतां वो युष्माकं संबन्धिनि

तोके पुत्रे तनये तदीयापत्ये च रविता शब्दयिता नेन्नैव रवद्भूयात् । यथा-शास्त्रं छेदने क्रियमाणे भवतां गृहे पुत्रपौत्रादिकं निमित्तीकृत्य रोदिता न भविष्यतीत्यर्थः । तद्भागपाठेन देवानां मध्ये ये शमितारः सन्ति मनुष्याणां च मध्ये ये सन्ति तेभ्य एव सर्वेभ्य एनं वनिष्ठुं पारिदद्दात्यवैकल्याय समर्पयति ।

द्वादशं भागमनूद्य व्याचष्टे—

अध्रिगो शमीध्वं सुशमि शमीध्वं शमीध्वमध्रिगा३ उ इति त्रिर्ब्रूयादपापेति चाध्रिगुर्वै देवानां शमिताऽपापो निग्रभीता शमितृभ्यश्चैवैनं तन्निग्रभीतृभ्यश्च संप्रयच्छति, इति ।

हेऽध्रिगो, एतन्नामकदेवेषु शमितृषु मुख्यदेवा यूयं सर्वे शमीध्वं विशसनादिना पशुं संस्कुरुध्वम् । पुनरपि विशेषाकारेणोच्यते सुशमि सुष्ठु शमनं शास्त्रीयं विशसनं यथा भवति तथा शमीध्वं शमयत संज्ञपयत । अध्रिगादौ प्लुतिर्दूरादाह्वानार्था । ओकारस्य प्लुतिवेलायामाकार उकारश्चेति वर्णद्वयं संपद्यते । तथाविधा यूयमितरैः सह यूयं सुशमीध्वं सर्वथा शमयत न तूपचरितं शमनं कुरुत । क्रूरकर्मेति कृत्वा तदुपेक्षणं मा भूदिति पुनः पुनर्वचनम् । अध्रिगो शमीध्वमित्यादिकं वाक्यत्रयसमुदायं त्रिवारमावर्तयेत् । अपापेत्यपि तत्संबन्धिनं त्रिवारमावर्तयेत् । तदेतदाश्वलायन आह—'अध्रिग्वादि त्रिरुक्त्वा' इति । अध्रिगो (?) अपापदेवः । सोऽयमपापवाची शाखान्तरे पठ्यते—'अध्रिगुश्चापापश्चोभौ देवानां शमितारौ' इति । अत्र तु तदवान्तरविशेषोऽभिधीयते । देवानां मध्ये यः शमिता हन्ता सोऽध्रिगुर्यश्च ध्यानादिना निग्रभीता निग्रहस्य कर्ता सोऽयमपापस्तद्भागपाठेनाध्रिगुप्रभृतिभ्यः शमितृभ्यश्चापापप्रभृतिभ्यो निग्रहीतृभ्यश्चैनं पशुं संज्ञपनाय प्रयच्छति ।

अध्रिगुमन्त्रपाठानन्तरं जपं विधत्ते—

शमितारो यदत्र सुकृतं कृणवथास्मासु तद्यद्दुष्कृतमस्मत् तदित्याहाग्निर्वै देवानां होताऽऽसीत्स एनं वाचा व्यर्द्धयद्वा वा एनं होता विरर्द्धयति तद्यदर्वाग्यत्परः कृन्तन्ति यदुल्बणं

यद्विथुरं क्रियते शमितृभ्यश्चैवैनत्त-
न्निग्रभीतृभ्यश्च समनुदिशति स्वस्त्येव
होतोन्मुच्यते सर्वायुः सर्वायुत्वाय, इति ।

हे शमितारो यदत्र पशुविशसनकर्मणि यत्सुकृतं कृणवथास्मासु तत् तत्र यद्दुष्कृतमन्यत्र तदिति जपित्वा दक्षिणावृदावर्तत इति । एतन्मन्त्रार्थमाग्नेर्वे त्यादिनोच्यते । यदा देवा यज्ञं कुर्वन्ति तदानीं तेषां मध्येऽग्निरेव होताऽभूत् । स एनं पशुं वाचाऽध्रिगुप्रैषरूपया व्यशाद्विशसनं कृतवान् । अध्रिगुप्रैष आरभध्वं शमीध्वमित्यादिप्रेरणवाचकानां पदानां बहूनां विद्यमानत्वादस्त्येव होतुर्वाचिकं विशसनम् । तथा सति पशोरर्वाग्भागे यत्कृन्तन्ति यच्च परः परभाग उत्तमाङ्गे कृन्तन्ति तस्मिन्नुभयस्मिन्नपि च्छेदने यदुल्बणं शास्त्रार्थादतिरिक्तं क्रियते यच्च विथुरं न्यूनं क्रियते तत्सर्वमेनत्पशुशमितृभ्यो निग्रभीतृभ्यश्च समनुदिशति तेन मन्त्रजपेन सम्यक्कथयतीति वाचा होता स्वस्त्येव क्षेमेणैव पापान्मुच्यते सर्वायुर्मृत्युरहितश्च भवति यजमानस्याप्यपमृत्युराहित्याय ।

एतदेतं प्रशंसति—

सर्वमायुरेति य एवं वेद ॥ ७ ॥ इति ।

अत्र मीमांसा । नवमाध्यायस्य तृतीयपादे चिन्तितम्—

"पक्षी वपा वाऽथोरूको रलयोरविशेषतः ।
पक्षी वपा संनिधानाद्भ्रान्तिच्छेदनिषेधतः" ॥

अध्रिगुप्रैषवचन आम्नायते—'वनिष्ठुमस्य मा राविष्टोरूकं मन्यमानाः' इति । वनिष्ठुर्वपासमीपवर्ती कश्चित्पश्वङ्गविशेषः । तं मा राविष्ट तस्य लवनं मा कुरुतेति व्यत्ययेन लकारस्य रेफः । किं कुर्वन्त उलूकं मन्यमानाः । वनिष्ठावुरूकशब्दः सादृश्यलक्षकः । विशेषेण मन्यमाना मा लाविष्टेति वाक्यार्थः । तस्मादुरूकशब्दः पक्षीति प्राप्ते ब्रूमः । उरूकशब्देनात्र वपा लक्ष्यते वनिष्ठुसंनिधानात् । साहित्यसंनिधानादुरूकत्वभ्रान्तिर्वनिष्ठौ संभवति । भ्रान्तिप्राप्तं लवनमत्र निषिध्यते । उरूकं मन्यमाना वनिष्ठुं मा 'राविष्टेत्युक्तत्वात् । वपालवनकाले भ्रान्त्या वनिष्ठौ यल्लवनं तस्य निषेधे सति दृष्टार्थो लभ्यते भ्रान्तिनिवारणस्य दृष्टत्वात् । त्वत्पक्षे वनिष्ठोर्लवनमेव नास्ति तच्चायुक्तं हृदयाद्यङ्गवद्वनिष्ठोर्लवितव्यत्वात् । वनिष्ठुमग्नीधे षडवत्तः संपादयतीत्याद्यनुष्ठानात् । तस्मा लवननिषेधस्यासमवेतार्थत्वेनादृष्टार्थो मन्त्रपाठः । तस्माद्वावचन उरूकशब्दः ।

यद्यपि वपायामप्रसिद्धस्तथाऽप्युरु विस्तीर्णमुको मेदो यत्रेत्यवयवार्थद्वारा मेदस्विन्यां वपायां युक्त उरूकशब्दः । एवं सत्यनेकवपासु विकृतिष्वेकवचनान्त उरूकशब्द ऊहनीय ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऐतरेय ब्राह्मणभाष्ये षष्ठाध्याये सप्तमः खण्डः ॥७॥ (७) [३७]

अधिगुपैषं समाप्य पुरोडाशं विधातुं बहुभिः पर्यायैरुपेता काचिदाख्यायिकोच्यते । तत्र प्रथमं पर्यायं दर्शयति -

पुरुषं वै देवाः पशुमालभन्त तस्मादालब्धान्मेध उदक्रामत्सोऽश्वं प्राविशत्तस्मादश्वो मेध्योऽभवदथैनमुत्क्रान्तमेधमत्यार्जन्त स किंपुरुषोऽभवत्, इति ।

पुरा कदाचिद्देवाः स्वकीये यज्ञे पुरुषं मनुष्यं पशुमालभन्त पशुं कृत्वा तेन पशुना यष्टुमुद्युक्ताः । तस्मादालब्धाद्यष्टुमुद्युक्तान्मनुष्यपशोर्मेधो मेध्यो यज्ञयोग्यो हविर्भाग उदक्रामन्मनुष्यं परित्यज्यान्यत्रागच्छत् । गत्वा च स भागोऽश्वं प्राविशत् । यस्मादेवं तस्मादश्वो यज्ञयोग्योऽभवत् । अथ तदानीमुत्क्रान्तमेधं परित्यक्तहविर्भागमेनं मनुष्यं देवा अत्यार्जन्तातिशयेन वर्जितवन्तस्तस्मिन्पशुत्वमपि नाकुर्वन् । देवैः स्वीकृत्य परित्यक्तः स मनुष्यः किंपुरुषः किंनरावान्तरजातीयः ।

द्वितीयं पर्यायं दर्शयति -

तेऽश्वमालभन्त सोऽश्वदालब्धादुदक्रामत्स गां प्राविशत्तस्माद्गौर्मेध्योऽभवदथैनमुत्क्रान्तमेधमत्यार्जन्त स गौरमृगोऽभवत्, इति ।

आलब्धादश्वान्मेधो यज्ञयोग्यभाग उत्क्रम्य गां प्राविशत्स गौर्यज्ञयोग्य आसीत् । तदानीमयोग्यत्वेन त्यक्तः सोऽश्वो गौरमृगोऽभवद्यस्य शृङ्गावपि ह्रोमशौ भवतः ।

तृतीयपर्यायं दर्शयति -

ते गामालभन्त स गोरालब्धादुदक्रामत्सोऽविं प्राविशत्तस्मादविर्मेध्योऽभवदथैनमुत्क्रान्तमेध-

मत्यार्जन्त स गवयोऽभवत्तेऽविमालभन्त सोऽवेरा-
लब्धादुदक्रामत्सोऽजं प्राविश[illegible] मेध्योऽभ-
वदथैन[illegible]त्क्रान्तमेधमत्यार्जन्त स उष्ट्रोऽभवत्, इति ।

अजादयः प्रसिद्धाः । उष्ट्रो दीर्घग्रीवः ।

अजं पुनरपि प्रशंसति—

सोऽजे ज्योक्कमामिवार[illegible] [illegible]
एतेषां पशूनां प्रयुक्ततमो यदजः, इति ।

स मेधाख्यो यज्ञयोग्यभागस्तस्मिन्नजे ज्योक्कमामिवातिशयेन चिरकालमे-
वारमत क्रीडितवांस्तस्माच्चिरकालमेव सद्भावाद्योऽयमजोऽस्ति स एष एतेषां
पूर्वोक्तानां पशूनां मध्ये प्रयुक्ततमः शिष्टैरतिशयेन प्रयुक्तः ।

पञ्चमं पर्यायं दर्शयति—

तेऽजमालभन्त सोऽजादलब्धादुदक्रामत्
इमां प्राविशत्तस्मादियं मेध्याऽभवदथैनमु-
त्क्रान्तमेधमत्यार्जन्त स शरभोऽभवत्, इति ।

इमां पृथिवीम् । शरभोऽष्टभिः पादैरुपेतः सिंहघाती मृगविशेषः ।

अत्र प्रसङ्गात्कांचिद्धर्मविशेषं दर्शयति—

त एत उत्क्रान्तमेधा अमेध्याः पश-
वस्तस्मादेतेषां नाश्नीयात्, इति ।

मनुष्याश्वगोव्यजेभ्यो मेधस्योत्क्रमणक्रमेण निष्पन्नास्त एते किंपुरुषा-
दयो मेधराहित्याद्यज्ञयोग्याः पशवो नाऽऽसन् । अत एतेषां पशूनां संबन्धि
मांसं नाश्नीयात् ।

अत्र पुरोडाशं विधत्ते—

तमस्यामन्वगच्छन्सोऽनुगतो व्रीहिरभवत्तद्व-
त्पशौ पुरो[illegible]नुनिर्वपन्ति समेधेन नः पशु-
नेष्टमसत्केवलेन नः पशुनेष्टमसदिति, इति ।

तं मेधाख्यं हविर्भागमस्यां पृथिव्यां प्रविष्टं ग्रहीतुं देवा अन्वगच्छन् । स
च मेधो देवैरनुगत उत्क्रान्तुमशक्तः सन्सहसा व्रीहिरभवत् । तथा सति यदि

पशौ पुरोडाशमनुनिर्वपन्ति पशुमालम्भानन्तरमेव निर्वपेयुस्तदानीं नोऽस्माकं समेधेन यज्ञयोग्यहविर्भागयुक्तेन पशुनेष्टमसदिष्टं भवति । पुरोडाशनिर्वापकर्तृणां कोऽभिप्राय इति सोऽभिधीयते । नोऽस्माकं केवलेन साधनान्तरनिरपेक्षेण मेध-पूर्णेन पशुनेष्टमास्त्विति तदभिप्रायः ।

वेदनं प्रशंसति-

समेधेन हास्य पशुनेष्टं भवति केवलेन हास्य पशुनेष्टं भवति य एवं वेद ॥ ८ ॥ इति ।

समेधेनेत्यस्यैव वाक्यस्य व्याख्यानं केवलेनेत्यादि । तदेतत्सर्वं श्रुत्यन्तर-संगृहीतम्-' पशुमालभ्य पुरोडाशं निर्वपति समेधमेवैनमालभते ' इति ।

अत्र मीमांसा -

" उपकारी संस्कृतिर्वा पुरोडाशः पशूदितः ।
तद्धितोक्त्या द्वयोर्देवभेदादुपकृतिर्मता ॥
संदंशान्निनिश्चितेऽङ्गत्वे दृष्टोऽर्थः स्मृतिसंस्कृतिः ।
देवान्तरं चेद्विकृतम् तावदाग्नीषोमनिवर्तनम् " ॥

ज्योतिष्टोमाङ्गभूताग्नीषोमीयपशौ श्रूयते-' अग्नीषोमीयस्य वपां प्रचर्याग्नीषोमीयमेकादशकपालं निर्वपति ' इति । तत्र पशावुक्तः पुरोडाशः स किं पशोरारादुपकारक उत पशुदेवतासंस्कार इति संदेहः । तत्राग्नीषोमीयं पशुमालभेतेति पशुविधौ तद्धितोक्त्याऽग्नीषोमदेवता यथा गुणत्वेन पशौ विधीयते तथा पशुपुरोडाशेऽपि । तथा सति विधिभेदेन विधेयदेवताभेदात्संस्कारो न युक्तः । गुणत्वं च संस्कार्यविरोधीति पूर्वोक्तं तस्मात्पशोरारादुपकारक इति प्राप्ते ब्रूमः । देवताभेदवादिना तावदिदं वक्तव्यं पशुः पुरोडाशश्चेत्युभौ किं स्वतन्त्रौ यागौ किं वाऽङ्गाङ्गिरूपौ तत्रापि किमङ्गं किं वाऽङ्गीति । तत्र पशुधर्मैरुभयतः संदृष्टस्य पुरोडाशस्य स्वतन्त्राङ्गित्वे तयोः पशुप्रकरणपाठबाध्यत्वादभिमतमुपकारकत्वं न सिध्येत् । अङ्गत्वेऽपि दृष्टसंभवादृष्टकल्पनमन्याय्यम् । भवति चात्र दृष्टं पुरोडाशवाक्येन तद्धितान्तपदेन पशुवाक्यगताया देवताया अनुवादे सति तदीयस्मरणपूर्वकनिर्वापे पशुदेवतायाः संस्क्रियमाणत्वात् । एवं च सति पशुवाक्ये गुणत्वेन प्रतीतायाः पुरोडाशवाक्ये प्राधान्यावगमात्तत्संस्कार्यत्वमविरुद्धम् । तस्मात्पशुदेवतासंस्कारः पुरोडाशः । एवं च सत्यग्नीषोमीयपशुविकृतौ वायव्यपशावग्नीषोमदेवतायां निवृतायां तदीयपुरोडाशेऽपि सा निवर्तते इति बाधः फलिष्यति ।

द्वादशाध्यायस्य प्रथमपादे चिन्तितम्—

"पश्वर्थानुष्ठितैर्नास्ति पुरोडाश उपक्रिया ।
अस्ति वा विघ्नभावान्नो ह्यर्थवत्त्वस्तु लोकवत्" ॥

अग्नीषोमीये पशौ यानि चोदकप्राप्तानि प्रयाजादीन्यङ्गान्यनुष्ठितानि तैः पशुपुरोडाश उपकारो नास्ति । कुतः, तदुपकारबोधकस्य विधेरभावात् । चोदकस्तु दर्शपूर्णमासवत्पशुस्तुष्टेय इत्येवंरूपत्वात्पशावेवोपकारं बोधयति । ननु पुरोडाशस्यापीष्टिविकृतित्वात्तत्रापि चोदकोऽस्तीति चेत् । बाढम् । अत एव भिन्नचोदकदलात्पुरोडाशोपकाराय प्रयाजाद्यङ्गानि पृथगनुष्ठेयानीति प्राप्ते ब्रूमः । यद्यपि पश्वर्थैः पुरोडाशस्योपकार इत्येतादृशं शास्त्रं नास्ति तथाऽप्ययमुपकारोऽर्थप्राप्तो न निवारयितुं शक्यते । यथा प्रदीपस्य वेदिकार्ये निर्मितस्यार्थसिद्धं मार्गप्रकाशकत्वमनिवार्यं तथा पशुतन्त्रमध्येऽनुष्ठीयमानस्य पुरोडाशस्य पश्वर्थैरङ्गैरुपकारः केन वार्येत । तस्मादन्यार्थैरप्यस्तूपकारः ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे ऐतरेयब्राह्मणभाष्ये षष्ठाध्यायेऽष्टमः खण्डः ॥ ८ ॥ (८) [३८] ।

विहितं पशुपुरोडाशं प्रशस्य पश्चाद्वपादियाज्या विवक्षुरादौ तं प्रशंसति—

स वा एष पशुरेवाऽऽलभ्यते यत्पुरोळाशः, इति ।

पशुशरीरसादृश्यादयं पुरोडाशोऽनुष्ठितः पश्वालम्भ एव भवति ।

तदेतत्सादृश्यं विशदयति—

तस्य यानि किंशारूणि तानि रोमाणि ये तुषाः सा त्वग्ये फलीकरणास्तदसृग्यत्पिष्टं किक्नसास्तन्मांसं यत्किंचित्कं सारं तदस्थि, इति ।

तस्य व्रीहिबीजस्य संबन्धीनि यानि किंशारूणि बुसपलालादीनि तानि पशुरोमस्थानीयानि ये तुषास्तण्डुलवेष्टनरूपाः प्रथमावघातेन परित्याज्याः सा तुषसमष्टिः पशुत्वेवस्थानीया ये फलीकरणास्तण्डुलश्चेत्यर्थेनावघातेन हेया अंशास्तत्सर्वमसृक्शुरक्तस्थानीयम् । यत्पिष्टं तण्डुलपेषणेन निष्पन्नं पिण्डयोग्यं रूपं ये च किक्नसाः सूक्ष्माः पिष्टावयवास्तत्सर्वं पशुमांसस्थानीयम् । यत्किंचित्कं सारं स्वार्थे कप्रत्ययः किंचिदन्यद्व्रीहिसंबन्धिकाठिन्यरूपं सारं तदस्थि तत्पशोरास्थिस्थानीयम् । एवं पशुसाम्यात्पुरोडाशस्य पशुत्वम् ।

एवं सति यत्फलितं तद्दर्शयति—

सर्वेषां वा एष पशूनां मेधेन यजते यः पुरोळाशेन यजते, इति ।

पुरोडाशयाग एव सर्वपशुसंबन्धियज्ञयोग्यहविर्यागः । सर्वपशुसंबन्धश्च पुरुषं वै देवा इत्यादिना प्रपञ्चितः ।

लौकिकोक्त्या प्राशस्त्यं दृढयति—

तस्मादाहुः पुरोळाशसत्रं लोक्यमिति, इति ।

यस्मात्पुरोळाशयागः सर्वपशुसारभूतस्तस्मात्पुरोडाशानुष्ठानं लोक्यं प्रेक्षणीयमिति याज्ञिका आहुः । अत एव प्रैषमन्त्रे पुरोडाशाः अलंकुर्वित्येवमाम्नातम् ।

अथ वपादीनां क्रमेण याज्या विवक्षुरादौ वपायाज्यां विधत्ते—

युवमेतानि दिवि रोचनान्यग्निश्च सोम सक्रतू अधत्तम् । युवं सिन्धूँरभिशस्तेरवद्यादग्नीषोमावमुञ्चतं गृभीतानिति वपायै यजति, इति ।

हे सोम त्वं चाग्निश्च युवमेतावुभौ युवामेतानि सर्वैर्दृश्यमानानि रोचनानि प्रकाशरूपाणि नक्षत्रादीनि दिवि द्युलोकेऽधत्तम् । कीदृशौ युवां सक्रतू समानकर्माणौ हेऽग्नीषोमौ युवां स्वकीयत्वेन स्वीकृतान्सिन्धून्समुद्रवत्प्रौढान्राजामात्यादीन्पुरुषान्यजमानादीन्वाऽभिशस्तेः सङ्ग्रामादिषु ब्राह्मणवधादिरूपादपवादादवद्यात्तन्निमित्तदुरिताच्चामुञ्चतं मुक्तानकुरुतम् । एतत्पश्वादिकर्मानुष्ठानेन जनापवादो दुरितं च नश्यतीत्यर्थः । वपायै यजतीति वपाहोमार्थमृचं याज्यात्वेन पठेदित्यर्थः ।

पूर्वोत्तरपक्षाभ्यामेतां याज्यां प्रशंसति—

सर्वाभिर्वा एष देवताभिरालब्धो भवति यो दीक्षितो भवति तस्मादाहुर्न दीक्षितस्याश्नीयादिति स यदग्नीषोमावमुञ्चतं गृभीतानिति वपायै यजति सर्वाभ्य एव तद्देवताभ्यो यज-

---

१ ऋ. १०.९३-५॥

मानं प्रमुञ्चति तस्मादाहुराशितव्यं वपायां
हुतायां यजमानो हि त तर्हि भवतीति, इति ।

यः पुमान्यज्ञार्थो दीक्षितो भवत्येष सर्वाभिरपि देवताभिः स्वकीयहविर्दानार्थमारब्धः स्वीकृतो भवति । तस्मादेतदीयस्य द्रव्यस्य देवताभिरवरुद्धत्वादीक्षितस्य गृहे नाश्नीयादित्येवं पूर्वर्षिक्षण आहुः । तत्र होता यद्यग्नीषोमावमुञ्चतं गृभीतानित्येतं याज्यायाश्चतुर्थपादं पठेत्तदा तेन पाठेन सर्वाभ्यो देवताभ्यो यजमानं होता मोचयति। तस्मात्कारणाद्वपाहोमे निष्पन्ने सति तद्गृहे भोक्तव्यम् । तर्हि तस्मिन्वपाहोमोत्तरकाले स दीक्षितो यजमानो भवति । पूर्वं तु दीक्षित एव न तु यजमानः । इदानीं यागस्य निष्पन्नत्वादयं यजमानः । तथा सति देवतावरोधान्मुक्तस्य गृहे भोक्तुं शक्यमिति सिद्धान्तिन आहुः ।

अथ पुरोडाशस्य याज्यां विधत्ते–

[1]आऽन्यं दिवो मातरिश्वा जभा-
रेति पुरोळाशस्य यजति, इति ।

द्वितीयपादमनूद्य पादद्वयस्य सहैव तात्पर्यं दर्शयति–

अमथ्नादन्यं परि श्येनो अद्रेरितीत इव च
त्येष इत इव च मेधः समाहृतो भवति, इति ।

मातरिश्वा वायुरन्यमग्नीषोमयोरन्यतरं सोमाख्यदेवं दिवो द्युलोकादाजभाराऽऽहृतवान् । गायत्रीरूपं कृत्वा वायुः सोममानीतवान् । इति प्रथमपादस्यार्थः । श्येनो बलवत्पक्षी तादृशोऽध्वर्युरन्यमुभयोर्देवयोरन्यतरमग्निमद्रेः पर्वतजन्यात्काष्ठादरणिरूपात्पर्यमथ्नात्परितो मथनं कृतवानिति द्वितीयपादार्थः । एष मेधो यज्ञयोग्यः पुरोडाशोऽपीत ए (इ)व चेत इव चास्मान्मनुष्यादस्मादश्वाद्गोरेरजाच्च भूम्याः समाहृतः । एवं सतीतस्तत आनयनसाम्यात्पुरोडाशस्येयमग्नीषोमप्रतिपादिका याज्या योग्येत्यर्थः ।

पुरोडाशसंबन्धिस्विष्टकृतो याज्यां विधत्ते–

[2]स्वदस्व हव्या समिषो दिदीहीति
पुरोळाशस्विष्टकृतो यजति, इति ।

---

१. ऋ. १-९३-६ ॥ २. ऋ. ३-५४-२२ ॥

हे स्विष्टकृदग्ने हव्या हवींषि स्वदस्व स्वादूनि कुर्विषोऽन्नानि संदिदीहि सम्यक्प्रयच्छेति त्ये) तस्य पादस्यार्थः ।

तामेवां याज्यां प्रशंसति–

हविरेवास्मा एतत्स्वदयतीषमूर्जमात्मन्धत्ते, इति ।

एतेन याज्यापाठेनास्मै कर्मसिद्ध्यर्थं यजमानार्थं वा हविरेव स्वादु करोति य इषमोदनमूर्जं क्षीरादिरसं चाऽऽत्मन्धत्ते होता स्वात्मनि संपादयति ।

पुरोडाशीयस्विष्टकृद्यागादूर्ध्वं पशुपुरोडाशसंबन्धीळोपाह्वानं विधत्ते–

इळोपह्वयते पशवो वा इळा पशूनेव तदुप-
ह्वयते पशून्यजमाने दधाति ॥ ९ ॥ इति ।

इळोपहूता सह दिवेत्यादिना सूत्रगतेन, उपहूतं रथंतरं सह पृथिव्येत्यादिना शाखान्तराम्नातेन मन्त्रेण वेळाख्यां देवतामुपह्वयते । गौर्वा अस्यै शरीरमिति श्रुत्यन्तरादिष्टदेवतायाः पशुरूपत्वम् । तत्तेनोपह्वानेन पशूनेवाऽऽह्वयति । यजमाने च पशून्संपादयति ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऐतरेय-
ब्राह्मणभाष्ये षष्ठाध्याये नवमः खण्डः ॥ ९ ॥ (९) [३९]

अथ हृदयाद्यङ्गरूपस्य प्रधानहविषोऽवदानकाले किंचित्सूक्तं विधातुं प्रैष-मन्त्रं विधत्ते–

मनोतायै हविषोऽवदीयमा-
नस्याऽऽग्रहीत्याहाध्वर्युः, इति ।

देवानां मनांस्योतानि दृढं प्रविष्टानि यस्यां देवतायां सा मनोता तदर्थं हृदयाद्येकादशाङ्गरूपं हविरवदीयते तस्य हविषोऽनुकूला ऋचोऽनुब्रूहीत्यध्वर्युः प्रैषमन्त्रं पठेत् ।

सूक्तं विधत्ते–

त्वं ह्यग्ने प्रथमो मनोतेति सूक्तमन्वाह, इति ।

त्वं ह्यग्न इत्यादिकं त्रयोदशर्चं सूक्तं तन्मैत्रावरुणो ब्रूयात् । तदाह बौधा

---

१ ऋ. ६-१-१ ॥

यनः—'यदा जानाति मनोतायै हविषोऽवदीयमानस्यानुब्रूहीति तदा मैत्रावरुणो मनोतामन्वाह त्वं ह्यग्ने प्रथम इति ।

अत्र वैयधिकरण्यलक्षणं चोद्यमवतारयति—

तदाहुर्यदन्यदेवत्य उत पशुर्भवत्यथ कस्मादाग्नेयीरेव मनोतायै हविषोऽवदीयमानस्यान्वाहेति, इति ।

अत्र हविरग्नीषोमदेवत्यं सूक्तगता ऋचः केवलाग्निदेवताकास्तत्र यस्मात्कारणात्पशुरन्यदेवत्य उत देवतान्तरयुक्तः खलु भवति तस्मात्कारणाद्वैयधिकरण्यमिदं तच्चायुक्तमिति ब्रह्मवादिनश्चोद्यमाहुः ।

तस्य समाधानं दर्शयति—

तिस्रो वै देवानां मनोतास्तासु हि तेषां मनांस्योतानि वाग्वै देवानां मनोता तस्यां हि तेषां मनांस्योतानि गौर्वै देवानां मनोता तस्यां हि तेषां मनांस्योतान्यग्निर्वै देवानां मनोता तस्मिन्हि तेषां मनांस्योतान्यग्निः सर्वा मनोता अग्नौ मनोताः संगच्छन्ते तस्मादाग्नेयीरेव मनोतायै हविषोऽवदीयमानस्यान्वाह, इति ।

वाग्गौरग्निरित्येतासु देवतासु देवमनःसमासक्तत्वात्तिस्रोऽपि देवता मनोतेत्युच्यन्ते । ताश्च तिस्रः सर्वा मनोता अग्निस्वरूपा एवाग्नौ तासां संगतत्वात् । संगतिश्च तदीयहविषोऽग्न्याधारकत्वात् । तस्मादग्नेर्मुख्यत्वादग्निदेवताका ऋचोऽनुब्रूयात् ।

अथ हृदयाद्यङ्गरूपस्य प्रधानहविषो याज्यां विधत्ते—

'अग्नीषोमा हविषः प्रस्थितस्येति ते हविषो यजति, इति ।

अग्नीषोमेत्यादिकां याज्यां पठेदित्यर्थः ।

अस्या याज्याया हविषानुकूल्यं दर्शयति—

हविष इति रूपसमृद्ध्या प्रस्थितस्येति रूपसमृद्ध्यै, इति ।

---

१ क, १-९३-७ ॥

इदं हृदयादिकं हविः प्रस्थितं वेद्यामासादितं याज्यायां हविषः प्रस्थितस्येति पदद्वयं श्रुतं तस्मादियमनुकूला ।

वेदनं प्रशंसति -

सर्वाभिर्हास्य समृद्धिभिः समृद्धं
हव्यं देवानप्येति य एवं वेद, इति ।

हविषो यथाशास्त्रमवदानपाकविशेषः परस्परं हृदयादीनामसंकीर्णत्वमित्यादयो याः समृद्धयोऽपेक्षितास्ताभिः संपूर्णं भूत्वा तद्धविर्देवान्प्रामोति ।

अथ वनस्पतियागं विधत्ते -

वनस्पतिं यजति प्राणो वै वनस्पतिः, इति ।

वनस्पतिर्वृक्षस्तथाविधशरीरयुक्तां देवतां यजेत् । तत्प्रकार आपस्तम्बेन दर्शितः-' जुह्वामुपस्तीर्य सकृत्पृषदाज्यस्योपहत्य द्विरभिघार्य वनस्पतयेऽनुब्रूहि वनस्पतये प्रेष्येति संप्रैषौ वषट्कृते जुहोति ' इति । अत्र वनस्पतेर्वृक्षशरीरस्य जीवाविष्टत्वात्प्राणरूपत्वम् ।

यष्टुर्वेदनं प्रशंसति-

जीवं हास्य हव्यं देवप्येति
यत्रैवं विदुषो वनस्पतिं यजति, इति ।

विदुषो यष्टुर्हविरेवं प्राणोपेतं चेतनं भूत्वा तद्धविर्देवानामोति ।

अथ स्विष्टकृद्यागं विधत्ते -

स्विष्टकृतं यजति प्रतिष्ठा वै स्विष्टकृत्प्रतिष्ठायामेव तद्यज्ञमन्ततः प्रतिष्ठापयति, इति ।

वैकल्यपरिहारेण स्विष्टकृत्त्वापादनात्स्विष्टकृतः प्रतिष्ठात्वम् । तद्यागानुष्ठानेनेमं यज्ञमन्वतः समाप्त्यवसरे प्रतिष्ठायां स्थापयति ।

इळोपह्वानं विधत्ते -

इळामुपह्वयते पशवो वा इळा पशूनेव तदुपह्वयते पशून्यजमाने दधाति दधाति, ॥१०॥ इति ।

पूर्ववव्याख्येयम् । पुरोडाशेडा पूर्वखण्डेऽभिहितेह तु पश्विडेति विशेषः । अत्र सर्वत्र यद्यच्चोदकतः प्राप्तं तस्य सर्वस्य विधिमनूद्य प्रशंसा कृतेति द्रष्टव्यम् । दधातीतिपदाभ्यासोऽध्यायसमाप्त्यर्थः ।

अत्र मीमांसा । दशमाध्यायस्य तृतीयपादे चिन्तितम्-

" मनोतामन्त्र ऊहोऽस्ति वायव्ये नास्ति वाऽस्त्यसौ ।
आग्नेय्येवेति वचनं प्रकृतौ सार्थकं यतः ॥
अग्नीषोमावग्निनैव लक्ष्येतां वचनं विना ।
अनर्थकात्तत्र वाक्याद्विकृतावूहवारणम् " ॥

त्वं ह्यग्ने प्रथमो मनोता (६-१-१) इत्ययं मनोतामन्त्रोऽग्नीषोमीयपशौ पठितः । वायव्यपशावयं चोदकप्राप्तः । तत्र त्वं हि वायो प्रथम इत्येवमूहोऽस्ति । यदु वचनं यद्यप्यन्यदेवत्यः पशुराग्नेय्येव मनोता कार्यमिति तत्प्रकृतौ पठितं तत्रैव वचनं सार्थकम् । द्विदेवत्यपशावेकवचनमन्त्रस्य प्रकरणपठितस्याप्ययोग्यत्वशङ्क्या पुनर्विधानार्थत्वात् । नैवम् । छत्रिणो गच्छन्तीत्यादिवन्मन्त्रगतस्याग्निशब्दस्याग्नीषोमलक्षकत्वेनायोग्यत्वशङ्कया अनुदयात् । अतः प्रकृतावनर्थकं तद्वाक्यं विकृतावूहनिवारणेन चरितार्थं भवति । तस्मादूहो नास्ति ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऐतरेयब्राह्मणभाष्ये षष्ठाध्याये दशमः खण्डः ॥१०॥ (१०) [४०]

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकवीरबुक्कणसाम्राज्यधुरंधरसायणाचार्यकृतावैतरेयब्राह्मणभाष्ये
षष्ठोऽध्यायः समाप्तः ॥ ६ ॥

अथ सप्तमोऽध्यायः ।

यूपाञ्जनमाप्रियश्च पर्यग्न्युपैषमथाधिगुश्च ॥
पशौ पुरोडाशविधिर्मनोता वनस्पतिस्विष्टकृदिडास्तुतिश्च ॥१॥

अथ सप्तमाध्याये पशुपैषप्रातरनुवाकौ वक्तव्यौ तत्र पर्यग्निकरणस्तुत्यर्थामाख्यायिकामाह -

देवा वै यज्ञमतन्वत तांस्तन्वानानसुरा अभ्यायन्यज्ञवेशसमेषां करिष्याम इति तानाप्रीते पशौ पुर इव पर्यग्नेर्यूपं प्रति पुरस्तादुपायंस्ते देवाः प्रतिबुध्याग्निमयीः पुरस्त्रिपुरं पर्यास्यन्त यज्ञस्य चाऽऽत्मनश्च गुप्त्यै ता एषामिमा

अग्निमय्यः पुरो दीप्यमाना भ्राजमाना अतिष्ठंस्ता असुरा अनपधृष्यैवापाद्रवंस्तेऽग्निनैव पुरस्तादसुररक्षांस्यपाहताग्निना पश्चात्, इति ।

पुरा कदाचिदेवा यज्ञमतन्वत विस्तारितवन्तः । यद्यपि पूर्वमीमांसाकर्तृभिर्नवमाध्याये देवानामशरीरत्वात्कर्माधिकारो नास्तीत्युक्तं तथाऽपि प्रशंसार्थत्वेन स्वार्थतात्पर्याभावादविरोधः । यद्वोत्तरमीमांसाकर्तृभिः शरीरमङ्गीकृत्य विद्याधिकारोपपादनादितरेषां शरीरराहित्यमृत्विगादिवत्कर्मकाले प्रत्यक्षशरीरं नास्तीति(त्ये) तदभिप्रायम् । कर्माधिकारनिराकरणस्य (णं च) कर्मसाध्यस्य स्वर्गस्य प्राप्तत्वात्तत्प्रयोजनाभावाभिप्रायम् । जगदनुग्रहार्थं तु तेषां शरीरिणामस्त्येवाधिकार इत्यभिप्रेत्य यज्ञमतन्वतेत्यत्रोच्यते । तान्देवान्यज्ञविस्तारिणोऽभिलक्ष्यासुरा आगच्छन् । केनाभिप्रायेणेति तदुच्यते । एषां देवानां यज्ञवेशसं यज्ञविघातं करिष्याम इति तदभिप्रायः । कदा कुत्र समागता इति तदुच्यते । पशावाप्रीते प्रयाजैस्तर्पिते सति पर्यग्नेः पुर इव पर्यग्निकरणात्पूर्वस्मिन्काले यूपं प्रति पुरस्तात्पूर्वदेशे तान्देवानसुरा उपागच्छन् । ते देवास्तदागमनं निश्चित्याग्निमयीः पुरोऽग्निप्राकारास्त्रिपुरं वेष्टनत्रयं यथा भवति तथा पर्यास्यन्त पशोः पुरतः प्रक्षिप्तवन्तः । तच्च प्रक्षेपणं यज्ञस्य देवानां स्वरूपस्य च रक्षणाय भवति । एषां देवानां संबन्धिन्यस्ताः पुरः पशोः परितो ज्वलन्त्योऽन्धकारं निवार्य तं देशं प्रकाशयन्त्योऽतिष्ठन् । ता अग्निमयीः पुरोऽनपधृष्यैव तिरस्कारमकृत्वैवापाद्रवन्नपगताः । तत्र देवास्तेन च प्राकाररूपेणाग्निना पूर्वस्यां दिश्यसुरान्रक्षांसि च हतवन्तः पश्चादप्यग्निनैव हतवन्तः ।

अथ पर्यग्निकरणं विधत्ते—

तथैवैतद्यजमाना यत्पर्याग्निं कुर्वन्त्यग्निमयीरेव तत्पुरस्त्रिपुरं पर्यस्यन्ते यज्ञस्य चाऽऽत्मनश्च गुप्त्यै तस्मात्पर्यग्निं कुर्वन्ति तस्मात्पर्यग्नयेऽन्वाह, इति ।

यथा देवैरग्निप्राकाराः कृतास्तथैवैतद्यजमानानां पर्यग्निकरणम् । अतो यद्येतत्कुर्युस्तदानीमग्निप्राकारवेष्टनं पशोः परितः प्रक्षिपन्ति । तच्च यज्ञस्य चाऽऽत्मनश्च रक्षणाय भवति । तस्मादवश्यं पर्यग्निकरणमपेक्षितं तदर्थमनुवचनं चापेक्षितम् । तत्र पर्यग्निकरणमापस्तम्बो विस्पष्टयति—' आहवनीयादुल्मुकमादा-

याऽऽग्नीध्रः परि वाजपतिः कविः (४-१५-३) इति त्रिः प्रदक्षिणं पर्याग्नि करोति पशुम् ' इति । अनुवचनं पूर्वमेवाग्निर्होता नः (४-१५-१) इत्यादिना दर्शितम् ।

पर्यग्निकरणादूर्ध्वं पशोः शामित्रदेशं प्रत्यानयनं विधत्ते—

तं वा एतं पशुमाप्रीतं सन्तं
पर्यग्निकृतमुदञ्चं नयन्ति, इति ।

प्रयाजैस्तोषितं पर्यग्निकरणेन रक्षितं पशुमुदङ्मुखं कृत्वा नयेयुः ।

नीयमानस्य पशोः पुरतो नेतव्यं विधत्ते—

तस्योल्मुकं पुरस्ताद्धरन्ति, इति ।

तदेतदुभयमापस्तम्बेन स्पष्टीकृतम्—' आहवनीयादुल्मुकमादायाऽऽग्नीध्रः पूर्वः प्रतिपद्यते शमिताः पशुं नयति उरोरन्तरिक्षेत्यन्तरा चात्वालोत्करावुदञ्चं पशुं नयन्ति ' इति ।

पशोः पुरतो वह्निनयनं प्रशंसति—

[1]यजमानो वा एष निदानेन यत्पशुरनेन
ज्योतिषा यजमानः पुरोज्योतिः स्वर्गं
लोकमेष्यतीति तेन ज्योतिषा यजमानः
पुरोज्योतिः स्वर्गं लोकमेति, इति ।

यः पशुरस्त्येष निदानेन सूक्ष्मदृष्टिनिरूपणेन यजमान एव भवति । पशुना स्वात्मनो निष्क्रीतत्वात्पशोर्यजमानत्वम् । (निष्क्रयणं च पूर्वमेवाऽऽत्मनिष्क्रयणमेवास्य स द्रढयति । श्रुत्यन्तरोदाहरणेन दर्शितम्) पशोः पुरतो नीयमानज्योतिषा यजमानः पुरोवर्तिदीपयुक्तो भूत्वा स्वर्गं लोकं प्रयास्यति यथा राजामात्यादिः पर्यटने रात्रौ पुरोवर्तिदीपयुक्तो गच्छति तद्वदित्यभिप्रेत्योल्मुकं पुरस्ताद्धरन्ति । तदभिप्रायानुसारेणैव यजमानोऽपि तथा स्वर्गं लोकं प्राप्नोति । तदेतदग्नेः पुरतो नयनं शाखान्तरेऽप्याम्नातम्—' यर्हि पशुमाप्रीतमुदञ्चं पशुं नयन्ति तर्हि तस्य पशुश्रपणमाहरेत्तेनैवैनं भागिनं करोति ' इति ।

शामित्रदेशं नीतस्य पशोर्हननस्थले बर्हिष्प्रक्षेपं विधत्ते—

---

[1] धनुश्चिह्नान्तर्गतं वाक्यमसंबद्धम् ।

तं यत्र निहनिष्यन्तो भवन्ति तद-
ध्वर्युर्बर्हिरधस्तादुपास्यन्ति, इति ।

तं पशुं यस्मिन्देशे हनिष्याम इत्येवं मन्यन्ते तस्मिन्देशेऽध्वर्युर्भूमौ बर्हिः प्रक्षिपेत् । तदेतच्छाखान्तरे समन्त्रकमाम्नातम्-' पृथिव्याः संपृचः पाहीति बर्हिरुपास्यत्यस्कन्दायास्कन्नं हि तद्यद्बर्हिषि स्कन्दत्यथो बर्हिषदमेवैनं करोति ' इति । तदेतदापस्तम्बेन स्पष्टीकृतम्-' अथ पर्यग्निकृत उल्मुकं निदधाति स शामित्रस्तं दक्षिणेन प्रत्यञ्चं पशुमवस्थाप्य पृथिव्याः संपृचः पाहीति तस्याधस्ताद्बर्हिरुपास्यत्युपाकरणयोरन्यतरत्तस्मिन्संज्ञपयन्ति प्रत्यक्शिरसमुदीचीनपादम् ' इति ।

पशोरधो बर्हिष्प्रक्षेपं प्रशंसति-

यदेवैनमद आप्रीतं सन्तं पर्यग्निकृतं बहि-
र्वेदि नयन्ति बर्हिषदमेवैनं तत्कुर्वन्ति, इति ।

प्रयाजैस्तोषितं पर्यग्निकरणेन रक्षितं पशुं सौमिकवेदेर्बहिर्भागे संज्ञपनाय नयन्तीत्यदो यदस्ति तदानीमेनं पशुं बर्हिषदमेव दर्भेष्वास्थितमेव कुर्वन्ति । यद्वा बर्हिषदं यज्ञेऽवस्थितं वेद्यामवस्थितं कुर्वन्ति बाह्यदेशे नयनदोषः (षं) परिहरन्तीत्यर्थः ।

पशोः पुरीषस्थापनार्थमवटखननं विधत्ते-

तस्योवध्यगोहं खनन्ति, इति ।

ऊवध्यं पुरीषं तस्य गोहं गोपनस्थानं तत्कुर्युः । अस्य खननस्य काल आपस्तम्बेन दर्शितः-' ऊवध्यगोहं पार्थिवं खनतादित्यभिज्ञागोवध्यगोहं खनति ' इति । होता त्वाध्रिगुप्रैषमन्त्रे यदोवध्यगोहमिति वाक्यं पठति तदा खनेदित्यर्थः ।

तदेतदूवध्यगोहखननं प्रशंसति—

औषधं वा ऊवध्यमियं वा ओषधीनां प्रतिष्ठा तदे-
नत्स्वायामेव प्रतिष्ठायामन्ततः प्रतिष्ठापयन्ति, इति ।

तदेतदर्थवादवाक्यं पूर्वाध्यायमन्त्रप्रसङ्गे व्याख्यातम् ।

अथ पशुपुरोडाशं प्रशंसितुं प्रश्नमुत्थापयति-

तदाहुर्यदेष हविरेव यत्पशुरथास्य बह्वपैति

लोमानि त्वग्लोहितकुष्ठिकाः शफा विषाणे स्कन्दति पिशितं केनास्य तदापूर्यत इति, इति ।

तत्तत्र पशौ चोद्यवादिन आहुः । यद्यदा यः पशुरस्त्येष सर्वोऽपि हविरेव कृत्स्नस्य पशोरुपाक्तत्वात् । अद्य तदानीं कस्याप्यवयवस्यापनयो न युक्तः । इह तु बह्ववयवजातमपैति । तद्यथा लोमानि रोमाणि त्वक्चर्मासृग्रक्तं कुष्ठिका उदरवार्तिनो भक्षितास्तृणादयः शफाः खुरा विषाणे शृङ्गद्वयमेतत्सर्वमपैत्यग्नौ होमाभावात् । किंच पिशितं मांसं यत्किंचित्स्कन्दति भूमौ पतति तदप्यपैति । एवं सति केन प्रकारेणास्य पशोः संबन्धि तत्सर्वमवयवजातं समन्तात्पूर्यत इति प्रश्नः ।

तस्योत्तरमाह—

यदेवैतत्पशौ पुरोळाशमनु निर्वपन्ति तेनैवास्य तदापूर्यते, इति ।

पश्वालम्भनमनुस्तृत्य पुरोळाशं निर्वपन्तीति यदिदमस्ति तेनैवास्य पशोः संबन्धि तत्सर्वमवयवजातं पूरितं भवति ।

तदेतदुपपादयति—

पशुभ्यो वै मेधा उदक्रामंस्तौ व्रीहिश्चैव यवश्च भूतावजायेतां तद्यत्पशौ पुरोळाशमनुनिर्वपन्ति समेधेन नः पशुनेष्टमसत्केवलेन नः पशुनेष्टमसदिति, इति ।

मनुष्याश्वादिभ्यः सकाशान्मेधा यज्ञयोग्या भागा उदक्रामन् । तदेतत्पुरुषं वै देवा इत्यस्मिन्खण्डे प्रपञ्चितम् । उत्क्रान्तमेधा भूमौ प्रविश्य व्रीहिर्यवश्चेति यौ धान्यविशेषौ विद्येते तावुभौ ब्रूमौ(तौ) तद्रूपतां प्राप्तावजायेतां भूमेः सकाशादुत्पन्नौ । तद्यत्पशाविति यादिकं तस्मिन्नेव खण्डे व्याख्यातम् ।

तदेतद्वेदमं प्रशंसति—

समेधेन हास्य पशुनेष्टं भवति केवलेन हास्य पशुनेष्टं भवति य एवं वेद ॥ ११ ॥ इति ।

एतदपि तत्रैव व्याख्यातम् । पुनरप्यनूक्तिरर्थवत्प्रशंसार्था । पूर्वत्र व्रीहिमात्रे प्राशस्त्यम् । इह तु व्रीहियवावुभावपि प्रशस्यौ इत्य(वि) विशेषः ।

अत्र यदेष हविरेव यत्पशुरित्युक्तं तत्र कश्चिद्विशेषो दशमाध्यायस्य सप्तम पादे चिन्तितः-

" पशुः कृत्स्नो हविः किं वा प्रत्यङ्गं हविरन्यता ।
आद्यश्चोदनया नैवमवदानपृथक्त्वतः " इति ।

अग्नीषोमीयं पशुमालभेतेत्यत्र कृत्स्नस्य पशोरेकहविष्ट्वं युक्तम् । कुतः । अग्नीषोमदेवतां प्रति द्रव्यत्वेन पशोश्चोदितत्वात् । न हि हृदयाद्यङ्गं साक्षात्पशुर्भवतीति प्राप्ते ब्रूमः । हृदयस्याग्रेऽवद्यत्यथ जिह्वाया अवद्यति वक्षसोऽवद्यति दोष्णोरवद्यति पार्श्वयोरवद्यतीत्यादिना हृदयाद्यङ्गनामवदानानि पृथगाम्नायन्ते । अवदानं च हविष्ट्वप्रयोजकः संस्कारः पुरोडाशादौ होतुमवदीयमानत्वदर्शनात् । हविःशब्दः स्वकर्मव्युत्पत्त्या होमयोग्यं द्रव्यं ब्रूते । पश्वाकृतिचोदना तु हृदयाद्यङ्गद्वारेण । तस्मात्प्रत्यङ्गं हविर्भेदः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऐतरेय ब्राह्मणभाष्ये सप्तमाध्याये प्रथमः खण्डः ॥ १ ॥ (११) [४१]

अथ स्तोकानुवचनीया विधातुमादौ प्रैषमन्त्रं विधत्ते--

तस्य वपामुत्खिद्याऽऽहरन्ति तामध्वर्युः स्रुवेणाभिधारयन्नाह स्तोकेभ्योऽनुब्रूहीति, इति ।

तस्य पशोर्वपामुदरगतां वस्त्रसदृशीमुत्खिद्योद्धृत्य होमार्थमाहरन्ति । तां च वपामध्वर्युरभिधारयन्प्रैषमन्त्रं ब्रूयात् । तदेतदापस्तम्बो विशदयति -' त्वामु ते दधिरे हव्यवाहमिति स्रुवेण वपामभिजुहोति प्रादुर्भूतेषु स्तोकेषु स्तोकेभ्योऽनुब्रूहीति संप्रेष्यति ' इति ।

तस्य प्रैषिकस्य तात्पर्यं दर्शयति--

तद्यत्स्तोका श्रोतन्ति सर्वदेवत्या वै स्तोका नेन्म इमेऽनभिप्रीता देवान्गच्छानिति, इति ।

तत्तस्यां वपायां तदानीमेव क्लिन्नायामार्द्रायां श्रप्यमाणायां यदा स्तोका नीरबिन्दवः श्रोतन्ति निर्गत्याधः पतन्ति तदानीं सर्वदेवानां प्रियत्वादिमे स्तोकाः स्वयमनाभिप्रीता अस्मासु प्रीतिरहिता देवान्गच्छान्गमिष्यन्ति । तथा सति महदेतदस्माकं भयकारणं तन्मा भूदित्यभिप्रेत्य स्तोकप्रीणनार्थमिदं प्रैषानुवचनम् । अत्र नेदित्ययं शब्दः परिभयार्थः ।

अथानुवचनं विधत्ते -

[1]जुषस्व सप्रथस्तममित्यन्व ह, इति ।

तस्यानुवचनस्य काल आश्वलायनेन दर्शितः--' वपायां श्रप्यमाणायां प्रेषितः स्तोकेभ्योऽन्वाह जुषस्व ' इति । अत्रानुवचनवक्ता मैत्रावरुणः । तदाह बौधायनः--' यदा जानाति स्तोकेभ्योऽनुब्रूहीति तदा मैत्रावरुणः स्तोकीया अन्वाह जुषस्व सप्रथस्तमम् ' इति ।

तस्या ऋचो द्वितीयतृतीयपादमनुवदति--

वचो देवप्सरस्तमम् । हव्या जुह्वान आसनीति, इति ।

सर्वस्या ऋचोऽयमर्थः । हेऽग्ने हव्या हवींष्यस्मदीयानि आसन्यास्ये मुखे जुह्वानः प्रक्षिपन्वचोऽस्मदीयं स्तोत्रं जुषस्व सेवस्व । कीदृशं वचः सप्रथस्तममतिशयेन प्रथसा विस्तरेण सहितं देवप्सरस्तमं देवानामतिशयेन प्रीणयितृ ।

अत्राऽऽसनीतिपदस्याभिप्रायं दर्शयति--

अग्नेरेवैनांस्तदास्ये जुहोति, इति ।

तत्तेन मन्त्रपाठेन स्तोकानग्नेरेव मुखे जुहोति ।

अनुवचनीयामेकामृचं विधाय पुनरप्यनुवचनीयं पञ्चर्चं सूक्तं विधत्ते--

[2]इमं नो यज्ञममृतेषु धेहीति सूक्तमन्वाह, इति ।

जातवेद इति संबोधनं वक्ष्यते । नोऽस्मदीयमिमं यज्ञममृतेषु देवेषु धेहि स्थापय ।

द्वितीयपादमनूद्य व्याचष्टे--

इमा हव्या जातवेदो जुषस्वेति हव्यजुष्टिमाशास्ते, इति ।

जुषस्वेत्यभिधानाद्धविःसेवायाः प्रार्थनम् ।

तृतीपादमनूद्य व्याचष्टे -

स्तोकानामग्ने मेदसो घृतस्येति मेदसश्च हि घृतस्य च भवन्ति, इति ।

---

१. ऋ. १-१५-१ ॥ २. ऋ. ३-२१-१ ॥

हेऽग्ने मेदसो वपाया हूयमानस्य च घृतस्य ये स्तोका बिन्दवः सन्ति तेषां मध्ये स्वादून्बिन्दूनित्यध्याहारः । प्राशानेति वक्ष्यमाणेनान्वयः । अत्र ये स्तोकाः पतन्ति यस्मान्मेदसश्च घृतस्य च संबन्धिनो भवन्ति तस्माद्यु-क्तोऽयं वादः ।

चतुर्थं पादमनूद्य व्याचष्टे—

होतः प्राशान प्रथमो निषद्येत्यग्निर्वै देवानां
होताऽग्ने प्राशान प्रथमो निषद्येत्येव तदाह, इति ।

हे होतर्होमनिष्पादकाग्ने त्वं प्रथमो मुख्यः सन्निषद्योपविश्य स्तोकान्प्रा शान भक्षय । यद्यपि होतृशब्दोऽत्र प्रयुक्तस्तथाऽप्यग्नेरेव देवहोतृत्वादग्निमेव संबोध्य चतुर्थपादो ब्रूते ।

अस्मिन्सूक्ते द्वितीयस्या ऋचः पूर्वार्धमनूद्य व्याचष्टे—

घृतवन्तः पावक ते स्तोका श्चोतन्ति मेदस
इति मेदसश्च ह्येव हि घृतस्य च भवन्ति, इति ।

हे पावक शोधकाग्ने ते तदर्थं मेदसो वपायाः संबन्धि घृतवन्तो घृतस-हिताः स्तोका बिन्दवः श्चोतन्ति । अत्र मेदःसंबन्धे घृतसंबन्धे च पृथक्प्रसिद्धिं वक्तुं मेदसश्च ह्येव हि घृतस्य चेति हिशब्दद्वयम् ।

उत्तरार्धमनूद्य व्याचष्टे

स्वधर्मं देववीतये श्रेष्ठं नो धेहि
वार्यमित्याशिषमाशास्ते, इति ।

देववीतये देवानां भक्षणाय नोऽस्माकं स्वधर्मं कुलोचितयागादावनुष्ठानरूपं धर्मं धेहि संपादय । कीदृशं धर्मं श्रेष्ठमतिप्रशस्तम् । अत एव वार्यं सर्ववरणीयम् । अत्र स्वधर्मं धेहीत्यनेनाऽऽशीः प्रतीयते ।

तृतीयस्या ऋचः पूर्वार्धमनूद्य व्याचष्टे

तुभ्यं स्तोका घृतश्चुतोऽग्ने विप्राय
सन्त्येति घृतश्चुतो हि भवन्ति, इति ।

सन्तिर्दानं वामर्हतीति सन्त्यो हे सन्त्य फलप्रदानकुशलाग्ने विप्राय मेधा-

---

१ ऋ. ३.२१.२ ॥ २ ऋ. ३.२१.३ ॥

क्षिणे तुभ्यं त्वदर्थं स्तोका बिन्दवो घृतश्चुतो घृतस्राविणो वर्तन्ते । अत्र घृतस्रावित्वप्रसिद्धिं हिशब्देन दर्शयति ।

उत्तरार्धमनूद्य व्याचष्टे—

ऋषिः श्रेष्ठः समिध्यसे यज्ञस्य प्राविता भवेति यज्ञसमृद्धिमाशास्ते, इति ।

हेऽग्ने ऋषिर्द्रष्टा श्रेष्ठः प्रशस्ततमश्च समिध्यसेऽस्माभिः प्रज्वाल्यसे । अतो यज्ञस्यास्मदीयस्य प्राविता प्रकर्षेण रक्षिता भव । अत्र यज्ञरक्षणवचनेन यज्ञसमृद्धिप्रार्थनम् ।

चतुर्थ्या ऋचः पूर्वार्धमनूद्य व्याचष्टे—

[1]तुभ्यं श्रोतन्त्यध्रिगो शचीव स्तोकासो अग्ने मेदसो घृतस्येति मेदसश्च ह्येव हि घृतस्य च भवन्ति, इति ।

हेऽध्रिगो घृतरश्मे हे शचीवः शक्तिमन्नग्ने मेदसो वपायाः संबन्धिनो घृतस्य स्तोकासो बिन्दवस्तुभ्यं त्वदर्थं श्रोतन्ति क्षरन्ति । अत्रापि हिशब्दद्वयं पूर्ववत् ।

उत्तरार्धमनूद्य व्याचष्टे—

कविशस्तो बृहता भानुनाऽऽगा हव्या जुषस्व मेधिरेति हव्यजुष्टिमेवाऽऽशास्ते, इति ।

हेऽग्ने त्वं कविशस्तो विद्वद्भिर्ऋत्विग्भिः स्तुतः सन्बृहता भानुना महता तेजसा युक्त आगा आगच्छ । हे मेधिर यज्ञयोग्यास्मदीयानि हव्यानि जुषस्व । तदेतद्धविःसेवायाः प्रार्थनम् ।

पञ्चम्या ऋचश्चतुरोऽपि पादाननुवदति—

[2]ओजिष्ठं ते मध्यतो मेद उद्भृतं प्र ते वयं ददामहे । श्रोतन्ति ते वसो स्तोका अधित्वचि प्रति तान्देवशो विहीति, इति ।

हेऽग्ने त्वदर्थमोजिष्ठं बलवत्तमं मेदो वपारूपं मध्यतः पशोर्मध्यभागादुद्धृतमुत्कृष्य संपादितं वयं यजमानास्ते तुभ्यं प्रददामहे प्रकर्षेण दद्मः । हे वसो

---

१ ऋ ३·२१·४ ॥ २ ऋ. ३ २१·५ ॥

सर्वेषां निवासहेतोऽधित्वाच्चि वपायामधिश्रिताः स्तोका बिन्दवस्ते त्वदर्थं श्चोतन्ति क्षरन्ति । देवशस्तत्तद्देवतुष्ट्यर्थं तान्स्तोकान्प्रति विहि प्रत्येकं पिब ।

एतन्मन्त्रतात्पर्यं दर्शयति-

अभ्येवैनांस्तद्वषट्करोति यथा सोमस्याग्ने वीहीति, इति ।

तत्तेन मन्त्रपाठेनैतान्स्तोकानभिवषट्कारमन्त्रं पठति । यथा सोमस्येत्यादिमन्त्रस्तद्वत् ।

इदानीं स्तोकान्प्रशंसति-

तद्यत्स्तोका श्चोतन्ति सर्वदेवत्या वै स्तोकास्तस्मादियं स्तोकशो वृष्टिर्विभक्तोपाचरति ॥ १२ ॥ इति ।

तत्तस्यां वपायां यद्यस्मात्कारणात्स्तोका श्चोतन्ति ते च स्तोकाः सर्वासां देवतानां प्रिया एव तस्मादेवानुग्रहादियं वृष्टिर्लोके स्तोकशः प्रतिबिन्दुभिर्विभक्ता सती भूमीपमागच्छति ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऐतरेयब्राह्मणभाष्ये सप्तमाध्याये द्वितीयः खण्डः ॥ २ ॥ (१२) [४२]

अथ वपाप्रशंसां हृदि निधाय तदुपयोगिनं कंचित्प्रश्नमुत्थापयति-

तदाहुः काः स्वाहाकृतीनां पुरोनुवाक्याः कः प्रैषः का याज्येति, इति ।

स्वाहाकृतिशब्देनान्तिमपयाजदेवता उच्यन्ते । तासां देवतानां पुरोनुवाक्या प्रैषयाज्यासु ज्ञानरहिता ब्रह्मवादिनः पृच्छन्ति ।

तस्य प्रश्नस्योत्तरमाह-

या एवैता अन्वाहैताः पुरोनुवाक्या यः प्रैषः स प्रैषो या याज्या सा याज्या, इति ।

वपासंबन्धिस्तोकार्थं प्रेषितो मैत्रावरुणो जुषस्वेत्यादयो (द्या) या एवैता अन्वाह, एता एव स्वाहाकृतीनां पुरोनुवाक्या भवन्ति । न त्वन्याः सन्ति । अनेन वपाप्रशंसा सूचिता । प्रैषसूक्ते होता यक्षदग्निं स्वाहाऽऽज्यस्येति प्रयाजान्तिमो यः प्रैष आम्नातः स एष प्रैषः । आप्रीसूक्ते येयमुत्तमा याज्यारूपे ऋाऽऽम्नाता सैव स्वाहाकृतिदेवतानां याज्या । तदेतत्सर्वमज्ञानप्रश्नस्योत्तरम् ।

पुनरपि तथाविधं प्रश्नान्तरमुत्थापयति—

तदाहुः का देवताः स्वाहाकृतय इति, इति ।

अग्निवाय्वादिवत्स्वाहाकृत्याख्या अपि प्रसिद्धा काश्चिन्न सन्ति तस्मादेवाः का इत्यज्ञात्वा प्रश्नः ।

तस्योत्तरं दर्शयति—

विश्वे देवा इति ब्रूयात्, इति ।

प्रसिद्धा ये देवाः सन्ति ते सर्वे स्वाहाकृत्याख्या इत्यभिज्ञात उत्तरं ब्रूयात् ।

तदेतदुपपादयति—

तस्मात्स्वाहाकृतं हविरदन्तु
देवा इति यजन्तीति, इति ।

अस्या अन्तिमप्रयाजयाज्यायाश्चतुर्थपाद एवमाम्नातः स्वाहाकृतं हविरदन्तु देवा इति । तस्य पादस्यायमर्थः । स्वाहाकारेण संस्कृतं हविः सर्वे देवा भक्षयन्त्विति । एवं सति स्वाहाकृतिनामकाः सर्वे देवास्तस्मात्स्वाहाकृतमित्यादिपादसहितेन मन्त्रेणान्तिमं प्रयाजं यजति । मन्त्रलिङ्गमेवं स्वाहाकृतिशब्देन सर्वदेवताभिधाने प्रमाणमित्यर्थः । पशोः पर्यग्निकरणात्पूर्वं प्रयाजकाले दर्शेव प्रयाजा इष्टा अन्तिमप्रयाजस्त्ववस्थापितः । तदुक्तमापस्तम्बेन—'दर्शेष्टेकादशायाऽऽज्यमवशिनष्टि' इति । सोऽयमवशिष्टोऽन्तिमप्रयाजो जुषस्व सप्रथस्तमम् (१-७५-१) इत्यादिः स्तोकानुवचनादूर्ध्वं वपाहोमात्प्रागिज्यते । अतो व्यवहितत्वादन्तिमप्रयाजविषयः पुरोनुवाक्यैषयाज्यापक्षो युक्तः । वपासपीपवर्तित्वादेव स्तोकानुवचनमन्त्राणामेतदीयपुरोनुवाक्यात्वं चोपपन्नम् । अनुष्ठानस्य व्यवधानेऽपि प्रैषयाज्ये तत्तदनुवाक्योक्ते एवेति स्मर्यते ।

अथ वपाहोमं प्रशंसितुमाख्यायिकामाह—

देवा वै यज्ञेन श्रमेण तपसाऽऽहुतिभिः स्वर्गं लोकमजयंस्तेषां वपायामेव हुतायां स्वर्गो लोकः प्राख्यायत ते वपामेव हुत्वाऽनादृत्येतराणि कर्माण्यूर्ध्वाः स्वर्गं लोकमायंस्ततो वै

मनुष्याश्च ऋषयश्च देवानां यज्ञवास्त्वभ्याय-
न्यज्ञस्य किंचिदेषिष्यामः प्रज्ञात्या इति तेऽ-
भितः परिचरन्त ऐत्पशुमेव निरान्त्रं शयानं ते
विदुरेयान्वाव किल पशुर्यावती वपेति, इति ।

पुरा कदाचिदेवा ज्योतिष्टोमादियागेन तीर्थयात्रादिश्रमेण कृच्छ्रचान्द्राय-णादितपसा कूष्माण्डगणहोमादिगताभिराहुतिभिश्च स्वर्गं लोकमजयन्वशीकृ-तवन्तः । तेषां देवानां यज्ञमध्ये वपायामेव हुतायां स्वर्गः प्रख्यातोऽभूत् । ततस्ते देवा वपामेव हुत्वोत्तरकालीनानि सर्वाणि कर्माण्यनादृत्योर्ध्वाभिमुखाः स्वर्गं लोकं प्राप्ताः । अनन्तरं मनुष्याश्च ऋषयश्च यज्ञसंबन्धि किंचिदुत्तममङ्ग-मन्विष्य निश्चेष्याम इति विचार्य तत्प्रज्ञानाय यज्ञानां ज्ञानाय देवानां यज्ञ भूमिं प्रत्यागच्छन् । आगत्य च ते मनुष्वादयस्तदन्वेषणार्थं तस्यां यज्ञभूमौ परितश्चरन्तः । निरान्त्रं निरङ्गं शयानं भूमौ पतितं पशुमेवैत्प्राप्तवन्तः । वपाया देवैरुत्कृत्य हुतत्वादयं पशुर्निरान्त्रो दृष्टः । यद्यप्यान्त्रशब्दः पुरीतद्वाची तथाऽ-प्यत्र तेन वपोपलक्ष्यते । मनुष्यादयः स्वमनस्येवं विदुर्निश्चितवन्तः--वपा यावती विद्यते एतावानेव किल पशुरन्यथा कथं देवा वपामेव हुत्वा शिष्टान्य-ङ्गान्युपेक्षितवन्तः । तथा पशौ सारभूतमङ्गं वपेति ।

आख्यायिकामुखेन वपां प्रशस्य श्रुतिः स्वयमपि साक्षात्प्रशंसति-

स एतावानेव पशुर्यावती वपा, इति ।

पशुशरीरमध्ये वपा यावती विद्यत एतावानेव मुख्यः पशुः, हविरदन्तु देवा इति मन्त्रे वपायाः सर्वदेवहविष्ट्वाभिधानात् ।

ननु सुत्यादिने सवनीयपशोर्वपां प्रातःसवने हुत्वा शिष्टानि हृदयाद्यङ्गानि तृतीयसवने पक्त्वा यजमाना जुह्वति वपामात्रस्य पशुस्वरूपत्वे तृतीयसवने पशुशेषं जुह्वतां कोऽभिप्राय इत्याशङ्क्याऽऽह-

अथ यदेनं तृतीयसवने श्रपयित्वा
जुह्वति भूयसीभिर्न आहुतिभिरिष्टमस-
दित्येव नः पशुनेष्टमसादिति, इति ।

अथ वपायाः पशुसारत्वे सत्येनमवशिष्टं पशुं तृतीयसवने श्रपयित्वा जुह्व-

तीति यदस्ति तत्र जुह्वतामयमभिप्रायः यद्यपि वपायाग एव स्वर्गाय पर्याप्तस्तथाऽपि नोऽस्माकं भूयसीभिर्बहुलाभिराहुतिभिरिष्टमस्तु केवलेन द्रव्यान्तरनिरपेक्षेण निरवशेषेण नोऽस्मदीयेन पशुनेष्टमस्त्विति । अत्राधिकं नैव दोषायेति लौकिकन्यायेन तृतीयसवने पश्वङ्गहोमो न तु वपायां न्यूनत्वबुद्ध्येत्यर्थः ।

वेदनं प्रशंसति—

भूयसीभिर्हास्याऽऽहुतिभिरिष्टं भवति केवलेहास्य पशुनेष्टं भवति य एवं वेद ॥ १३ ॥ इति ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऐतरेयब्राह्मणभाष्ये सप्तमाध्याये तृतीय खण्डः ॥३॥ (१३) [४३]

आज्याद्याहुतीनां प्राशस्त्यप्रसिद्धेस्तद्वद्वपाहुतिरपि प्रशस्तेति विवक्षया ताभिः सहैतामाहुतिं प्रशंसति—

सा वा एषाऽमृताहुतिरेव यद्वपाहुतिरमृताहुतिरग्न्याहुतिरमृताहुतिराज्याहुतिरमृताहुतिः सोमाहुतिरेता वा अशरीरा आहुतयो या वै काश्चाशरीरा आहुतयोऽमृतत्वमेव ताभिर्यजमानो जयति, इति ।

या वपाहुतिरस्ति सैषा स्वयममृताहुतिर्देवानाममृते यावती प्रीतिस्तावत्प्रीतेर्वपाहुतौ विद्यमानत्वात् । आतिथ्यकर्मसु मथितस्याग्नेराहवनीयाग्नौ प्रक्षेपरूपा येयमाहुतिः साऽप्यमृताहुतिः । अमृतत्वाख्यस्य देवत्वस्य प्राप्तिहेतुत्वात् । याऽप्यन्या काचिदाज्याहुतिः साऽप्यमृताहुतिरमृतं वा आज्यमिति श्रुतेः । याऽप्यन्या सोमाहुतिः साऽपि । अपाम सोममृता अभूम (८-४८-३) इति सोमस्यामृतत्वप्राप्तिसाधनत्वश्रवणात् । या एताश्चतस्र आहुतयस्ताः सर्वा अशरीराः शीघ्रमरणयुक्तशरीरप्राप्तिसाधनत्वाभावात् । अत एव याः काश्चिदशरीरा आहुतयः सन्ति ताभिर्यजमानश्चिरजीविनो रूपममृतत्वं देवत्वमेव प्राप्नोति ।

पुनः प्रकारान्तरेण वपां प्रशंसति—

सा वा एषा रेत एवं यद्वपा प्रेव वै रेतो लीयते

प्रेव वपा लीयते शुक्लं वै रेतः शुक्ला वपाऽशरीरं वै रेतोऽशरीरा वपा यद्वै लोहितं यन्मांसं तच्छरीरं तस्माद्ब्रूयाद्यावदलोहितं तावत्परिवासयेति, इति ।

येयं वपाऽस्ति सेयं रेत एव तत्सादृश्यात् । कथं सादृश्यमिति तदुच्यते । रेतो योन्मां निषिक्तं सत्प्रलीयत एव वपाऽप्यग्नौ हुता: प्रलीयत एव । इदमेकं सादृश्यं शुक्लवर्णत्वं द्वितीयमशरीरत्वं तृतीयम् । तस्मात्प्रजोत्पादकरेतोवद्वपा प्रशस्ता । न च वपायाः शरीरमध्येऽस्थानाच्छरीरत्वं शङ्कनीयम् । यदेव लोहितं रक्तमस्ति यच्च मांसम् । अनेन मुग्धबालादिप्रसिद्धास्त्वगस्थ्यवयवा उपलक्ष्यन्ते । अतो बालादिप्रसिद्धं रक्तमांसादिकमेव मुख्यं शरीरम् । न तु वपायां रेतसि वा बालप्रसिद्धिरस्ति । ततस्तयोरशरीरत्वम् । यस्माद्वपाशरीरयोर्विभाग उक्तस्तस्माद्याज्ञिको वपोद्धरणकर्तारं प्रत्येवं ब्रूयात् वपायाः स्वरूपं यावदलोहितं रक्तरहितं श्वेतं भवति तावत्सर्वं परिवासय च्छिन्धीति । तदेवं वपा प्रशस्ता ।

तस्या अवदाने विशेषं विवक्षते-

सा पञ्चावत्ता भवति यद्यपि चतुरवत्ती यजमानः स्यादथ पञ्चावत्तैव वपा, इति ।

द्विविधा यजमानाश्चतुरवत्तिनः पञ्चावत्तिनश्चेति । चतुर्भिरवदानैर्युक्तश्चतुरवत्ती पञ्चभिर्युक्ताः पञ्चावत्तिनः एवं स्थिते वपा पञ्चभिरवदानैर्युक्ता कर्तव्या । तत्र पञ्चावत्तिनो यजमानस्य स्वत एव पञ्चावदानानि प्राप्तानि । यस्तु चतुरवत्ती तस्यापि पञ्चावदानानि वपायां कुर्यात् ।

तान्येतानि पञ्चापि विभज्य दर्शयति-

आज्यस्योपस्तृणाति हिरण्यशल्को वपा हिरण्यशल्क आज्यस्योपरिष्टादभिधारयति, इति ।

आज्यस्याऽऽज्येनेत्यर्थः । तदेतदापस्तम्बेन स्पष्टमुक्तम्-जुह्वामुपस्तीर्य हिरण्यशकलमवधाय कृत्स्नां वपामवदाय हिरण्यशकलमुपरिष्टात्कृत्वाऽभिधारयत्येवं पञ्चावत्ता भवति चतुरवत्तिनोऽपि पञ्चावत्तैव स्यादिति ।

हिरण्यरहितस्य प्रकारान्तरेण पञ्चावदानानि प्रश्नोत्तराभ्यां दर्शयति-

तदाहुर्यद्धिरण्यं न विद्येत कथं स्यादिति द्विराज्यस्यो-

पंस्तीर्यं वपामवदाय द्विरुपरिष्टादभिघारयति, इति ।

आज्यस्य हिरण्यप्रतिनिधित्वमुपपादयति–

अमृतं वा आज्यममृतं हिरण्यं तत्र स
काम उपाप्तो य आज्ये तत्र स काम
उपाप्तो यो हिरण्ये तत्पञ्च संपद्यन्ते, इति ।

आज्यस्य स्वादुत्वेन हिरण्यस्य च दर्शनीयत्वेन प्रियत्वादमृतत्वमेवं सति यत्र हिरण्यं प्रक्षिप्यते तत्राऽऽज्यप्रयुक्तो यः कामः स प्राप्तो भवति । यत्र त्वाज्यं प्रक्षिप्यते तत्र हिरण्यप्रयुक्तो यः कामः स प्राप्तो भवति । तस्मादाज्येन हिरण्येन पञ्चावदानानि संपद्यन्ते ।

अवदानगतां पञ्चसंख्यां प्रशंसति–

पाङ्क्तोऽयं पुरुषः पञ्चधा विहितो लोमानि
त्वङ्मांसमस्थि मज्जा स यावानेव पुरुषस्तावन्तं
यजमानं संस्कृत्याग्नौ देवयोन्यां जुहोत्यग्निर्वै
देवयोनिः सोऽग्नेर्देवयोन्या आहुतिभ्यः संभूय
हिरण्यशरीर ऊर्ध्वः स्वर्गं लोकमेति ॥१४॥ इति ।

पञ्चसंख्यायोगात्पुरुषस्य पाङ्क्तत्वं तद्योगाच्च लोमादिभिः पञ्चभिर्निष्पादितत्वात् । तस्मात्पञ्चभिरवदानैः पुरुषो यावल्लोमादिपञ्चावयवोपेतोऽस्ति तावन्तं सर्वमपि यजमानं संस्कृत्याग्नौ देवत्वप्राप्तिकारणे हुतवान्भवति । अग्नेश्च यागद्वारा देवजन्मकारणत्वम् । एवं सति स यजमानो देवत्वकारणादग्नेः स्वेनानुष्ठिताभ्य आहुतिभ्यः समष्टिरूपेणोत्पद्य सुवर्णवर्णशरीरयुक्त ऊर्ध्वगामी स्वर्गं प्राप्नोति ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऐतरेयब्राह्मणभाष्ये सप्तमाध्याये चतुर्थः खण्डः ॥ १ ॥ (४) [१४] (४४)

अथ प्रातरनुवाको वक्तव्यः । तदर्थमादौ प्रैषं विधत्ते–

देवेभ्यः प्रातर्यावभ्यो होतरनुब्रूहीत्याहाध्वर्युः, इति ।

सुत्यादिने प्रातःकाले यान्ति यज्ञभूमिं गच्छन्तीति प्रातर्यावाणस्तादृशेभ्यो

देवेभ्यस्तत्प्रीत्यर्थं हे होतरनुकूला ऋचो ब्रूहि तमेतं प्रैषमन्त्रमध्वर्युः पठेत् ।

तं मन्त्रं व्याचष्टे-

एते वाव देवाः प्रातर्यावाणो यदग्निरुषा अश्विनौ त एते सप्तभिः सप्तभिश्छन्दोभिरागच्छन्ति, इति ।

योऽयमग्निर्या चोषःकालाभिमानिनी देवता यौ चाश्विनावेत एव देवाः प्रषमन्त्रे प्रातर्यावाण इति विशेष्यन्ते । तत्कथमिति तदुच्यते । त एते देवाः प्रत्येकं सप्तच्छन्दोयुक्ताभिर्ऋग्भिर्यज्ञभूमिमागच्छन्ति तस्मात्प्रातर्यावाणः । सप्तभिः सप्तभिरिति वीप्सा प्रत्येकं संख्यान्वयार्था । ताश्च ऋचः सर्वा आश्वलायनेनाऽऽपो रेवतीः क्षयथ (१०-६०-१२) इत्यादिग्रन्थेनोदाहृताः । तत्रोप प्रयन्तः १-७४-१) इत्यादिषु च्छन्दो गायत्रम् । त्वमग्ने वसून् (१-४५-१) इत्यादिष्वनुष्टुप्छन्दः । अबोध्यग्निः (५-१-१) इत्यादिषु त्रिष्टुप्छन्दः । एना वो अग्निम् (७-१६-१) इत्यादिषु बृहती छन्दः । अग्ने वाजस्य (१-७९-४) इत्यादिषूष्णिक्छन्दः । जनस्य गोपा (५-११-१) इत्यादिषु जगती छन्दः । अग्निं तं मन्ये (५-६-१) इत्यादिषु पङ्क्तिश्छन्दः । तान्येतानि सप्त च्छन्दांस्याग्नेये क्रतौ प्रातरनुवाके द्रष्टव्यानि । प्रति ष्या सूनरी (४-५२-१) इत्यादिषु गायत्री छन्दः । उषां भद्रेभिः (१-४९-१) इत्यादिष्वनुष्टुप् । इदं श्रेष्ठम् (१-११३-१) इत्यादिषु त्रिष्टुप् । प्रत्यु अदर्शि (७-८२-१) इत्यादिषु बृहती । उपस्तच्चित्रमाभर (१-९२-१३) इत्यादिषूष्णिक् । एता उ त्या (१-९२-१) इत्यादिषु जगती । महे नो अद्य (५-७९-१) इत्यादिषु पङ्क्तिः । तान्येतान्युषस्य प्रातरनुवाके सप्त च्छन्दांसि । एषो उषा (१-४६-१) इत्यादिषु गायत्री । यदद्य (५-७३-१) इत्यादिष्वनुष्टुप् । आभात्यग्निः (५-७६-१) इत्यादिषु त्रिष्टुप् । इमा उ वाम् (७-७४-१) इत्यादिषु बृहती । अश्विना वर्तिः (१-९२-१६) इत्यादिषूष्णिक् । अबोध्यग्निर्जं (१-१५७-१) इत्यादिषु जगती । प्रति प्रियतमम् (५-७५-१) इत्यादिषु पङ्क्तिः । तान्येतान्याश्विने प्रातरनुवाके सप्त च्छन्दांसि । तैरेतैः सप्तभिः सप्तभिः प्रत्येकं छन्दोभिर्देवानामागमनं द्रष्टव्यम् ।

एतद्वेदनं प्रशंसति-

आऽस्य देवाः प्रातर्यावाणो हवं गच्छन्ति य एवं वेद, इति ।

हूयतेऽत्रेति हवो यज्ञोऽस्य वदितुर्हवमुक्ता देवाः प्राप्नुवन्ति ।

प्रैषमन्त्रे देवेभ्योऽनुब्रूहीति यदुक्तं तदुपपादयितुं प्रातरनुवाकस्य देवसंबन्धं विशदयति—

प्रजापतौ वै स्वयं होतरि प्रातरनुवाकमनुवक्ष्यन्नुभये देवासुरा यज्ञमुपावसन्नस्मभ्यमनुवक्ष्यन्नस्मभ्यमिति स वै देवेभ्य एवान्वब्रवीत्, इति ।

पुरा कदाचित्कस्मिंश्चिद्यज्ञे प्रजापतिः स्वयं होता भूत्वा प्रातरनुवाकमनुवक्तुमुद्यतस्तास्मिन्ननुवक्ष्यति देवाश्चासुराश्चास्मभ्यमस्मदर्थमेवानुवक्ष्यतीति प्रत्येकमभिप्रेत्य तं यज्ञमुपेत्य तत्राऽऽसन्निति । अस्मभ्यमिति वीप्सा वर्गद्वयस्य प्रत्येकमन्वयार्थम् । तदानीं प्रजापतिरसुरानुपेक्ष्य देवार्थमेवान्वब्रवीत् । ततः प्रातरनुवाकस्य पूर्वोक्तैरग्न्यादिभिर्देवसंबन्धः ।

प्रातरनुवाकस्य देवोत्कर्षहेतुत्वं तदभावस्यासुरपराभवहेतुत्वं [च] दर्शयति—

ततो वै देवा अभवन्पराऽसुराः, इति ।

अभवन्भूतिमुत्कर्षं प्राप्ताः । असुरास्तु पराभवन्नपकर्षं प्राप्ताः ।

वेदनं प्रशंसति—

भवत्यात्मना पराऽस्य द्विषन्पाप्मा भ्रातृव्यो भवति य एवं वेद, इति ।

आत्मना भवति स्वयमुत्कृष्टो भवति । तदीयस्तु भ्रातृव्यः पराभवति ।

प्रातरनुवाकशब्दस्य निर्वचनं दर्शयति—

प्रातर्वै स तं देवेभ्योऽन्वब्रवीत्प्रातरन्वब्रवीत्तत्प्रातरनुवाकस्य प्रातरनुवाकत्वम्, इति ।

प्रातःकाल एव स प्रजापतिस्तमनुवाकमृक्समूहं देवार्थमनुक्रमेणाब्रवीत् । यस्मादेवं तस्मात्प्रातरनुवाक इति नाम संपन्नम् ।

तस्य प्रातरनुवाकस्य कालविशेषं विधत्ते -

महति रात्र्या अनूच्यः सर्वस्यै वाचः सर्वस्य ब्रह्मणः परिगृहीत्यै यो वै भवति यः श्रेष्ठतामश्नुते तस्य वाचं प्रोदितामनुप्रवदन्ति

तस्मान्महति रात्र्या अनूच्यः, इति ।

रात्र्याः पूर्वस्यौपवसथ्याख्यस्य दिनस्याग्नीषोमीयपश्वनुष्ठानयुक्तस्य या रात्रिस्तस्या रात्रेः संबन्धिनि शेषे महत्यवतिष्ठमाने सति प्रातरनुवाकाख्य ऋक्समूहो वक्तव्यः । एतदुक्तं भवति--यस्मिन्काले प्रारब्धव्य इति । तथाविधमनुवचनं लौकिक्याः सर्वस्या वाचो ब्रह्मणो वेदस्य सर्वस्यापि परिग्रहाय भवति । यो वा इत्यादिना लौकिको न्याय उच्यते । लोके यः पुमान्भवत्यैश्वर्यं प्राप्नोति, यश्च विद्यावृत्तादिभिः श्रेष्ठत्वं प्राप्नोति तस्योभयविधस्य पुरुषस्य संबंधिनीं वाचं प्रोदितां प्रथमत उक्तामनु पश्चात्सर्वे भृत्याः शिष्याश्च प्रवदन्ति । तस्मात्तत्रापि राजाचार्यादिवाक्स्थानीयः प्रातरनुवाकः स्वेतरवैदिकलौकिकसर्ववाक्प्रवृत्तेः पूर्वं रात्र्याः संबन्धिनि महत्यवशिष्टे काले पाश्चात्ययामेऽनुवक्तव्यः । यद्यप्ययमुषःकालो न तु प्रातःकालस्तथाऽपि प्रातःकालसमीपवर्तित्वात्प्रातरनुवाकत्वं द्रष्टव्यम् ।

पाश्चात्ययामेऽपि कंचिद्विशेषं विधत्ते--

पुरा वाचः प्रवदितोरनूच्यः, इति ।

रात्रौ निद्रां कुर्वन्तः प्राणिन उषःकाले प्रबुध्य वाचं प्रवदन्ति तस्मात्प्रवदितोः प्रवचनात्पूर्वमेवायमनुवक्तव्यः ।

विपक्षे वाचकमाह--

यद्वाचि प्रोदितायामनुब्रूयादन्यस्यै-
वैनमुदितानुवादिनं कुर्यात्, इति ।

निद्रां परित्यज्य प्रबुद्धैः पुरुषैर्वाचि प्रोदितायां यदि पश्चाद्ब्रूयात्तदानीमेतं प्रातरनुवाकमुदितानुवादिनं कुर्यादन्यैरुदिता या वाक्तदनुवादित्वे सति भृत्यादिशिष्यादिरूपत्वं स्यान्न तु राजाचार्यादिरूपत्वम् ।

स्वपक्षं निगमयति--

तस्मान्महति रात्र्या अनूच्यः, इति ।

अपरं विशेषं विधत्ते -

पुरा शकुनिवादादनुब्रूयात्, इति ।

शकुनयः पक्षिण उषःकाले प्रबुध्य वदन्ति ध्वनिं कुर्वन्ति तस्माद्वादात्पूर्वमेवानुब्रूयात् ।

तदेतदुपपादयति—

निर्ऋतेर्वा एतन्मुखं यद्वयांसि [illegible]नयस्तद्यत्पुरा शकुनिवादादनुब्रूयान्मा यज्ञियां वाचं प्रोदितामनु प्रवदिष्मेति तस्मान्महति रात्र्या अनूच्यः, इति ।

निर्ऋतिः काचिद्राक्षसरूपा मृत्युदेवता । यानि वयांसि ये च शकुनय एतत्सर्वं मृत्युदेवताया मुखम् । अत्र वयःशब्देन पक्षिसामान्यमुच्यते शकुनिशब्देन पक्षिविशेषः । येषां संचारादध्वनीष्टानिष्टसूचकतया मनुष्या व्यवहरन्ति ते शकुनयः । यस्मादुभयं मृत्युमुखं तद्यदि तदुभयध्वनेः पुराऽनुब्रूयात्तदानीं प्रोदितां प्रथमत उक्तामयज्ञियां यज्ञसंबन्धरहितां वाचमनु मा प्रवदिष्म प्रातरनुवाकं पश्चादुक्तवन्तो मा भवामेति होतुरभिप्रायो भवति । अतो महति रात्रिशेषेऽवस्थिते सति शकुनिवादशङ्कानुदयात्तदानीमेवानूच्यः ।

पक्षान्तरं विधत्ते—

अथो खलु यदैवाध्वर्युरुपाकुर्यादथानुब्रूयात्, इति ।

अध्वर्योरुपाकरणं प्रैषमन्त्रपाठः । स एव प्रातरनुवाकस्य कालः ।

तदेतदुपपादयति—

यदा वा अध्वर्युरुपाकरोति वाचैवोपाकरोति वाचा होताऽन्वाह वाग्धि ब्रह्म तत्र स काम उपाप्तो यो वाचि च ब्रह्मणि च ॥ १५ ॥ इति ।

अध्वर्योरुपाकरणं प्रैषमन्त्ररूपया वैदिकवाचैव संपद्यते । होतुरनुवचनमपि वैदिकवाचा भवति । यस्मादुभयविधा वाग्ब्रह्म वेदरूपं तस्मादुपकरणानन्तरमविनाऽनुवचनेन लौकिकवाचि वैदिकवाचि यत्फलं भाविनं तत्प्राप्नोति । अत्र कालविशेषः शाखान्तरेऽप्यान्नातः—' पुरा वाचः प्रवदितोः प्रातरनुवाकमुपाकरोति यावत्येव वाक्कामयते ' इति । उपाकरणं चाऽऽप्तस्तम्बेन स्पष्टीकृतम्—' पुरा वाचः पुरा वा वयोभ्यः प्रवदितोः प्रातरनुवाकमुपाकरोति प्रातर्यावभ्यो देवेभ्योऽनुब्रूहि ब्रह्मन्वाचं यच्छ प्रतिप्रस्थावः सवनीयाश्चिर्वप सुब्रह्मण्य सुब्रह्मण्यामाह्वयेति संप्रेष्यति ' इति ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऐतरेयब्राह्मणभाष्ये सप्तमाध्याये पञ्चमः खण्डः ॥५॥ (१५) [४५]

अथ प्रातरनुवाके प्रथमामृचं विधातुमाख्यायिकामाह—

प्रजापतौ वै स्वयं होतरि प्रातरनुवाकमनुवक्ष्यति सर्वा देवता आशंसन्तमामभि प्रतिपत्स्यति मामभीति स प्रजापतिरैक्षत यद्येकां देवतामादिष्टामभि प्रतिपत्स्यामीतरामेकेन देवता उपाप्ता भविष्यन्तीति स एतामृचमपश्यदापो रेवतीरित्यापो वै सर्वा देवता रेवत्यः सर्वा देवताः स एतयर्चा प्रातरनुवाकं प्रत्यपद्यत ताः सर्वा देवताः प्रामोदन्त मामभि प्रत्यपादि मामभीति, इति ।

प्रजापतौ वै स्वयमेव होतृत्वं प्राप्य कस्मिंश्चिद्यज्ञे प्रातरनुवाकमनुवक्तुमुद्युक्ते सति सर्वा अपि देवताः प्रत्येकं मामभिलक्ष्य प्रतिपत्स्यति प्रारम्भं करिष्यतीत्येवमाशंसन्तापेक्षां कृतवन्तः । मामभीति वीप्सा सर्वसंग्रहार्था । सदेवत्ययैवर्चा प्रारम्भ इति सर्वासां देवतानां प्रत्येकमाशामवलोक्य स प्रजापतिः स्वमनसि विचारितवान् । स एव विचारो यदीत्यादिना स्पष्टी क्रियते । आदिष्टां केनचिन्मन्त्रेण प्रतिपादितामेकां देवतामभिलक्ष्य यद्यहं प्रतिपत्स्यामि प्रारम्भं करिष्यामि तदानीमितरा देवताः कुप्येयुरिति शेषः । तस्मात्कारणान्मे मम केन प्रकारेण देवताः सर्वा अप्युपाप्ता उपक्रमे प्राप्ता भविष्यन्ति । एवं विचार्य स प्रजापतिः सर्वदेवतासिद्ध्यर्थमापो रेवतीः क्षयथा हि वस्व इत्येतामृचमपश्यत् । तत्राप्शब्देन रेवतीशब्देन च सर्वा देवता उक्ता भवन्ति । आप्नुवन्तीत्यापः । रायो धनानि यासां सन्तीति रेवत्यः । यज्ञभूमिप्राप्तिर्धनवत्त्वं च सर्वासु देवतासु विद्यते तस्मात्सर्वदेवताप्रतिपादिकेयमृक् । स प्रजापतौ रेवत्यैवोपक्रान्तवान् । तेन सर्वा देवताः प्रत्येकं मामभिलक्ष्य प्रारम्भः कृत इति प्रहृष्टवत्यः । वीप्सा पूर्ववत् ।

अथार्थवादेन विधिमुन्नयति—

सर्वा हास्मिन्देवताः प्रातरनुवाकमनुब्रुवति प्रमोदन्ते, इति ।

१ ऋ. १०-३०-१२ ॥

स एतयर्चा प्रातरनुवाकं प्रतिपद्यत इति शेषः । य पुमानापो रेवतीरित्येतया प्रातरनुवाकं प्रारभतेऽस्मिन्प्रारभ्यानुब्रुवति सर्वा देवताः प्रहृष्यन्ति तस्मादनयैवर्चा प्रारभेतेति विधिरुन्नेयः ।

वेदनं प्रशंसति—

सर्वाभिर्हास्य देवताभिः प्रातरनुवाकः प्रतिपन्नो भवति य एवं वेद, इति ।

तदेतदाश्वलायनेनाभिहितम् ' अन्तरेण युगधुरावुपविश्य प्रयतः प्रातरनुवाकमनुब्रूयान्मन्द्रेणाऽऽपो रेवतीः क्षयथा हि वस्व उप प्रयन्त इति सूक्ते ' इति ।

आपो रेवतीरित्येतामृचमाख्यायिकया प्रशंसति—

ते देवा अबिभयुरादातारो वै न इमं प्रातर्यज्ञमसुरा यथौजीयांसो बलीयांस एवमिति तानब्रवीदिन्द्रो मा बिभीत त्रिषमृद्धमेभ्योऽहं प्रातर्वज्रं प्रहर्ताऽस्मीत्येतां वाव तदृचमब्रवीद्वज्रस्तेन यदपोनप्त्रीया वज्रस्तेन यत्त्रिष्टुब्वज्रस्तेन यद्वाक्तमेभ्यः प्राहरत्तेनैनानहंस्ततो वै देवा अभवन्पराऽसुराः, इति ।

पुरा कदाचित्प्रजापतौ प्रातरनुवाकमनुब्रुवति सति तत्समीप आगता देवा अबिभयुर्भीतिं प्राप्ताः । केनाभिप्रायेणेति तदुच्यते । यथा लोके केचिच्छत्रव ओजसोऽतिशयेनौजस्वि सत्त्ववातुना युक्तत्वात्पुष्टशरीरा बलीयांसो महता सैन्येन युक्तत्वादतिशयेन प्राबल्यादागत्य धनमपहरन्ति, एवमसुरा नोऽस्मदीयमिमं प्रातर्यज्ञं प्रातरनुवाकरूपमादातारो वा आदास्यन्त्येवापहरिष्यन्त्येवेति । तदानीमिन्द्रो मा बिभीत भीतिं मा कुरुतेति तान्देवानब्रवीत् । कथं भीत्या अभाव इति तदुच्यते । अहमिन्द्र एवैभ्योऽसुरेभ्योऽसुरविनाशार्थं प्रातःकाले त्रिषमृद्धं त्रिभिः प्रकारैः समृद्धं प्रबलं वज्रं प्रहर्ताऽस्मि तेषामुपरि प्रक्षेप्स्यामि । ततो हे देवा अस्माकं भीतिर्मा भूत् । इत्युक्त्वा तत्तदानीमेतां वावाऽऽपो रेवतीरिति याऽस्ति तामृचमेवाब्रवीत् । तस्मा ऋचस्त्रिप्रकारवज्रत्वं कथमिति तदुच्यते । यद्यस्मात्कारणादपोनप्त्रीया सा, ऋगपोनप्त्रदेवताका । तथा चानुक्रमणिकाकारः—' यस्मिन्सूक्ते साऽस्ति तस्य सूक्तस्य देवतां ब्रूते प्रदेवत्रा पञ्चोना कवष

ऐलूष आपमपोनप्त्रीयं वा ' इति । तेनापोनप्तृदेवताकत्वेन कारणेनायं वज्रः संपन्नः । सोऽयमेकः प्रकारः । अपोनप्ता देवोऽतिक्रूरस्तत्तदीयाया ऋचो वज्रत्वं युक्तम् । यस्मादियं त्रिष्टुप्छन्दस्का तेनापि प्रकारेण वज्रत्वम् । इन्द्रियं वै वीर्यं त्रिष्टुबिति श्रुत्यन्तरे वीर्यरूपत्वश्रवणाद्वज्रत्वम् । सोऽयं द्वितीयः प्रकारः । यस्मादियं वाग्रूपा तेनापि प्रकारेण वज्रत्वम् । स वाग्वज्रो यजमानं हिनस्तीत्यत्र शब्दरूपाया वाचो वज्रत्वश्रवणात् । सोऽयं तृतीयः प्रकारः । तमेवं त्रिषप्तृद्धमृग्रूपं वज्रमेभ्योऽसुरेभ्यः प्राहरत्तेनैनानसुरानहनद्धतवान् । तत एवासुरवधादेवा विजयिनोऽभवन्नसुराश्च पराभवन् ।

वेदनं प्रशंसति—

भवत्यात्मना पराऽस्य द्विषन्पाप्मा भ्रातृव्यो भवति य एवं वेद, इति ।

पूर्ववद्व्याख्येयम् ।

अस्या ऋचस्त्रिरावृत्तिं विधत्ते-

तदाहुः स वै होता स्याद्य एतस्यामृचि सर्वाणि च्छन्दांसि प्रजनयेदित्येषा वाव त्रिरनूक्ता सर्वाणि च्छन्दांसि भवत्येषा छन्दसां प्रजातिः ॥१६॥ इति ।

तत्तस्यामापो रेवतीरित्यृचि ब्रह्मवादिन एवमाहुः—यः पुमानेतस्यामृचि सर्वाणि च्छन्दांस्युत्पादयेत्स एव मुख्यो होता स्यान्न त्वन्य इति । एतद्ब्रह्मवादिनां वचनं श्रुत्वा कश्चिदभिज्ञः सर्वच्छन्दसामुत्पादनप्रकारं ब्रूते । येयमृमनूक्ता सेयमेव त्रिः पठिता सती सर्वच्छन्दसां स्वरूपं भवति । इयं त्रिष्टुब्रूपत्वाच्चतुश्चत्वारिंशदक्षरा । तस्यां त्रिरावृत्तायां द्वात्रिंशदधिकशताक्षराणि संपद्यन्ते ॥ तेषु जगत्यादीन्यधिकाक्षराणि गायत्र्यादीनि न्यूनाक्षराणि सर्वच्छन्दांसि संपादयितुं शक्यते । तस्मादेषा सर्वेषां छन्दसां प्रजातिरुत्पत्तिस्थानम् । यद्येषा त्रिरावृत्तिः सूत्रकारेण नोक्ता तर्हि सर्वच्छन्दोन्तर्भावेनेयमृचः प्रशंसास्तु ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऐतरेयब्राह्मणभाष्ये सप्तमाध्याये षष्ठः खण्डः ॥ ६ ॥ [१६] (४६)

अथ प्रातरनुवाकगतानामृचां काम्या विशेषा वक्तव्याः । तत्राऽऽयुरर्थं शतसंख्यां विधत्ते -

शतमनूच्यमायुष्कामस्य शतायुर्वै पुरुषः शतवीर्यः
शतेन्द्रिय आयुष्येवैनं तद्वीर्य इन्द्रिये दधाति, इति ।

अपमृत्युरहितमायुर्यः कामयते तस्यर्चां शतमनूच्यम् । ऋग्विशेषास्तु सूत्रान्तरे द्रष्टव्याः । शतसंख्याका वत्सरा आयुर्यस्य मनुष्यस्य सोऽयं शतायुः । धर्मसंपादितस्यापमृत्योरभावे संवत्सरशतं मनुष्या जीवन्ति । दशसंख्याकानीन्द्रियाणि प्रत्येकं दशसु नाडीषु वर्तमानत्वात्तन्मिलित्वा शतेन्द्रियाणि भवन्ति । ततस्तव्यापाराणामपि शतत्वेन शतवीर्यत्वम् । तस्माच्छतानुवचनेन तत्संख्याक आयुषि वीर्यं इन्द्रिये चैनं यजमानं स्थापयति ।

अहीनरात्रादुत्तरक्रतुकामस्य संख्यान्तरं विधत्ते—

त्रीणि च शतानि षष्टिश्चाद्ध्यायानूच्यानि
यज्ञकामस्य त्रीणि च वै शतानि षष्टिश्च
संवत्सरस्याहानि तावान्संवत्सरः संव-
त्सरः प्रजापतिः प्रजापतेर्यज्ञः, इति ।

षष्ट्युत्तरशतत्रयदिवसपरिमितो यः संवत्सरः कालात्मा स एव प्रजापतिः । संवत्सरादि कालविशेषणम् । प्रजापतिसृष्टत्वेन तदभेदोपचारः । तथा यज्ञस्यापि तेन सृष्टत्वात्तद्रूपत्वम् । एवं सति षष्ट्युत्तरशतत्रयसंख्यायाः संवत्सरप्रजापतिद्वारा यज्ञसंबन्धादुत्तरक्रतुप्राप्तिहेतुत्वं भवति ।

होतुर्वेदनं प्रशंसति—

उपैनं यज्ञो नमति यस्यैवं विद्वां-
स्त्रीणि च शतानि षष्टिं चान्वाह, इति ।

अथ प्रजां पशूंश्च कामयमानस्य पूर्वसंख्याया द्विगुणां संख्यां विधत्ते -

सप्त च शतानि विंशतिश्चानूच्यानि
प्रजापशुकामस्य सप्त च वै शतानि
विंशतिश्च संवत्सरस्याहोरात्रास्तावान्सं-

वत्सरः संवत्सरः प्रजापतिर्यं प्रजायमानं विश्वं रूपमिदमनु प्रजायते प्रजापतिमेव तत्प्रजायमानं प्रजया पशुभिरनु प्रजायते प्रजात्यै, इति ।

संवत्सरगतानामह्नां रात्रीणां च पृथग्गणनायां मिलित्वा विंशत्यधिकसप्तशतसंख्या संवत्सरे संपद्यते । संवत्सरस्य च प्रजापतित्वमुक्तम् । एतावता विंशत्युत्तरसप्तशतसंख्यायाः प्रजापतिसंबन्धो दर्शितः । यं प्रजायमानमित्यादिना काम्यमानानां प्रजानां पशूनां च प्रजापतिसंबन्धः प्रदर्श्यते । लोके कस्मिंश्चिद्गृहे प्रजायमानं यं पुरुषमनु विश्वरूपमिदमोषधिवनस्पत्यादिस्थावरं भ्रातृभगिनीगोमहिष्यादिकं जङ्गमं च सर्वं प्रजायते तत्तद्गृहे प्रजायमानं प्रजापतिमेवानु प्रजापशुरूपेण सर्वमुत्पद्यते । एतदुक्तं भवति । कस्यचिद्धनिकस्य पुत्र उत्पद्यमाने सति कुटुम्बाभिवृद्ध्या तज्जीवनार्थं सस्यादिनिष्पत्तिं गोमहिष्यादिसंपत्तिं च स धनिकः प्रभूतां करोति । तस्य पुत्रस्य भ्रातृभगिन्याद्योऽपि पुनर्जायन्ते । तत्र च स्थावरजङ्गमरूपाणां प्रजानां पालनहेतुत्वादयं जायमानः पुत्र एव च प्रजापतिः । अतः प्रजापतिद्वारा प्रजापशुसंबन्धोऽपि भवतीति । तस्मादियं संख्या यजमानस्य प्रजात्यै प्रजापशूत्पादनाय संपद्यते ।

वेदनं प्रशंसति-

प्रजायते प्रजया पशुभिर्य एवं वेद, इति ।

अथ दुर्ब्राह्मणत्वपरिहारकामस्य संख्यान्तरं विधत्ते-

अष्टौ शतान्यनूब्रूयादब्राह्मणोक्तस्य यो वा दुरुक्तोक्तः शमलगृहीतो यजेताष्टाक्षरा वै गायत्री गायत्र्या वै देवाः पाप्मानं शमलमपान्नत गायत्रैवास्य तत्पाप्मानं शमलमपहन्ति, इति ।

अब्राह्मणत्वेन स्मृतिषु योऽभिहितः सोऽयमब्राह्मणोक्तो राजसेवाधिकारी । स्मृतिवाक्यं चात्र पूर्वमेवोदाहृतम् । तादृशस्याष्टौ शतान्यनुब्रूयात् । अथवा यो वा दुरुक्तोक्तो दुरुक्तेनापवादेन जनैर्व्यवहृतः स शमलगृहीतो मलिनेन लोकविरुद्धेन स्वीकृतस्तादृशो यदा यजेत तदाऽप्यष्टौ शतान्यनुब्रूयात् । गायत्र्या अष्टाक्षरत्वात्तया च मलिनस्य पापस्य देवैर्विनाशितत्वात् । अष्टसंख्यामनुतिष्ठन्गायत्र्यैव मलिनं पापं विनाशयति ।

वेदनं प्रशंसति—

अप पाप्मानं हते य एवं वेद, इति ।

अपहन्तीत्यर्थः ।

संख्यान्तरं विधत्ते

सहस्रमनूच्यं स्वर्गकामस्य सहस्रा-
श्वीने वा इतः स्वर्गो लोकः स्वर्गस्य
लोकस्य समष्ट्यै संपत्त्यै संगत्यै, इति ।

प्रबलोऽश्व एकेनाह्ना यावन्ति योजनानि गच्छति तावद्योजनपरिमितो देशो आश्वीनः । स च सहस्रसंख्यया गुणितः सहस्राश्वीनः । 'अश्वस्यैकाहगमः' इति पाणिनीयसूत्रादाश्वीनशब्दनिष्पत्तिः । इतो भूलोकादारभ्य सहस्राश्वीन ऊर्ध्व-देशे स्वर्गो लोको वर्तते । अतः सहस्रसंख्या स्वर्गस्य लोकस्य समष्ट्यै प्राप्त्यै भवति । प्राप्तस्य संपत्त्यै स्वापेक्षितसर्वभोग्यवस्तुसंपादनाय भवति । संपन्नस्य च संगत्यै महतामिन्द्रादिदेवानां प्रीतिपूर्वकसंबन्धाय भवति ।

सर्वकामसिद्ध्यर्थमियत्तापरिच्छेदराहित्यसंख्यां विधत्ते—

अपरिमितमनूच्यमपरिमितो वै प्रजापतिः
प्रजापतेर्वा एतदुक्थं यत्प्रातरनुवाकस्तस्मि-
न्सर्वे कामा अवरुध्यन्ते स यदपरिमितम-
न्वाह सर्वेषां कामा-ामवरुद्ध्यै, इति ।

शतं सहस्रमित्यादिसंख्यापरिमाणं परित्यज्य मध्यरात्रादूर्ध्वमुपक्रम्य सूर्यो-दयात्प्राचीनकाले यावतीरनुवक्तुं शक्तिरस्ति तावतीरनुब्रूयात् । जगत्कारण भूतः प्रजापतिश्चापरिमितः । न ह्येतावदस्य स्वरूपमिति प्रजापतिः परिमातुं शक्यते । यः प्रातरनुवाकोऽस्ति तदेतत्तादृशस्य प्रजापतेरुक्थं प्रियं शस्त्रमतस्त-स्मिन्प्रातरनुवाके सर्वे कामा अन्तर्भवन्ति । एवं सति स होता यद्यपरिमितम-नुब्रूयात्तदानीं तदनुवचनं सर्वकामप्राप्त्यै भवति ।

वेदनं प्रशंसति—

सर्वान्कामानवरुन्धे य एवं वेद, इति ।

बहुफलहेतुत्वादपरिमितपक्षमादरेण निगमयति—

तस्मादपरिमितमेवानूच्यम्, इति ।

मातरनुवाकगतास्वृक्षु च्छन्दोविशेषान्विधत्ते-

सप्ताऽऽग्नेयानि च्छन्दांस्यन्वाह
सप्त वै देवलोकाः, इति ।

मातरनुवाके त्रयो भागाः । तत्र प्रथमो भाग आग्नेयः । तस्मिंश्च गायत्र्यनुष्टुप्त्रिष्टुब्बृहत्युष्णिग्जगती पङ्क्तिरिति सप्तभिश्छन्दोभिर्युक्ता ऋचोऽनुब्रूयात् । देवानां संबन्धिनो बहुलोकयुक्ता लोकविशेषाः सप्त । तस्माच्छन्दसां सप्तसंख्या प्रशस्ता ।

वेदनं प्रशंसति-

सर्वेषु देवलोकेषु राध्नोति य एवं वेद, इति ।

भूलोकादयः सत्यलोकान्ताः सप्त वै देवलोका द्रष्टव्याः

मातरनुवाकस्य द्वितीयभागे छन्दांसि विधत्ते-

सप्तोषस्यानि च्छन्दांस्यन्वाह
सप्तवैग्राम्याः पशवः इति।

यथा प्रथमभागस्याग्निर्देवता तथा द्वितीयभागस्योषा देवता तस्मादुषःपतिपादिकास्वृक्षु पूर्ववद्गायत्र्यादीनि सप्त च्छन्दांसि द्रष्टव्यानि । ग्रामे भवा ग्राम्याः पशवस्ते च सप्त । तथा च बौधायनः-' सप्त ग्राम्याः पशवोऽजाऽश्वो गौर्महिषी वराहो हस्त्यश्वतरी च ' इति ।

आपस्तम्बमतानुसारिणस्त्वेवं वर्णयन्ति-

"अजाविकं गवाश्वं च गर्दभोष्ट्रनरस्तथा ।
सप्त वै ग्राम्यपशवो गीयन्ते कविसत्तमैः" इति ।

तस्मादत्र सप्तसंख्या युक्ता ।

वेदनं प्रशंसति-

अव ग्राम्यान्पशून्रुन्धे य एवं वेद, इति ।

तृतीयभागच्छन्दांसि विधत्ते-

सप्ताऽऽश्विनानि च्छन्दांस्यन्वाह सप्तधा
वै शीर्षण्यावै वागवदत्सर्वस्यै वाचः
सर्वस्य ब्रह्मणः परिगृहीत्यै, इति ।

तृतीयभागस्याश्विनौ देवता तत्संबन्धिनीः सप्त च्छन्दोयुक्ता ऋचोऽनूच्यात् । लोके गानरूपा या वागस्ति सा सप्तधाऽवदत्षड्जऋषभादिस्वरोपेता प्रवृत्ता तावदेव वैदिकवागप्यवदत्सान्नि कृष्टप्रथमद्वितीयादीनां सप्तस्वराणामधीयमानत्वात् । अतोऽत्र सप्तसंख्या लौकिक्याः सर्वस्या वाचो वेदस्य च सर्वस्य परिग्रहाय भवति । त्रिष्वप्येष्वाग्नेयौषस्याश्विनभागेषु च्छन्दांस्यस्माभिः पूर्वमेवोदाहृत्य प्रदर्शितानि ।

भागत्रये देवतात्रयं विधत्ते–

तिस्रो देवता अन्वाह त्रयो वा इमे त्रिवृतो लोका एषामेव लोकानामभिजित्यै ॥१७॥ इति ।

अग्निरुषाऽश्विनाविति देवतात्रयम् । यथा गुणत्रयमेलनरूपा रज्जुस्त्रिवृदेवमेते पृथिव्यन्तरिक्षद्युलोकाः परस्परमिलितास्त्रिवृतः । यदैकैकस्मिँल्लोके सत्त्वरजस्तमोगुणभेदेनास्थोत्तममध्यमाधमरूपत्वात्प्रत्येकं त्रिवृत्त्वमतो देवतात्रिसंख्या लोकत्रयजयाय भवति ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऐतरेयब्राह्मणभाष्ये सप्तमाध्याये सप्तमः खण्डः ॥ ७ ॥ (१७) [४७]

अथ तस्य प्रातरनुवाकस्यानुवचनप्रकारविशेषं निर्णेतुं प्रश्नमवतारयति–

तदाहुः कथमनूच्यः प्रातरनुवाक इति, इति ।

किमेकैकस्मिन्भागे गायत्र्यादीनि च्छन्दांस्यनुक्रमेणैवानुवक्तव्यानि, आहोस्विदन्यथेत्येकः संशयः । अनुक्रमपक्षेऽपि किं पादे पादेऽवसानं कृत्वाऽनुवचनीयम्, आहोस्वित्तत्तदर्धेऽवसानं कृत्वेति द्वितीयः संशयः ।

तत्र प्रश्नोत्तरमाह–

यथाछन्दसमनूच्यः प्रातरनुवाकः प्रजापतेर्वा एतान्यङ्गानि यच्छन्दांस्येष उ एव प्रजापतिर्यो यजते तद्यजमानाय हितम्, इति ।

अनुक्रमेणावस्थितानि गायत्र्यादीनि च्छन्दांस्यनतिक्रम्येति यथाछन्दसं छन्दःक्रमेणैवायमनुवचनीयश्छन्दसां प्रजापतिसृष्टत्वेन तदवयवत्वात् । यजमानस्य च प्रजापतिपदप्राप्तियोग्यत्वेन प्रजापतिरूपत्वात्तदङ्गरूपच्छन्दसां

क्रमेणानुवचनं यजमानायावयवविपर्यासराहित्येन हितं भवति । तस्माच्छन्दः क्रमेणैवानुवक्तव्यम् ।

द्वितीयविचारे पूर्वपक्षमाह-

पच्छोऽनूच्यः प्रातरनुवाकश्चतुष्पादा वै पशवः पशूनामवरुद्ध्यै, इति ।

पच्छ एकैकस्मिन्पादेऽवसायेत्यर्थः ।

सिद्धान्तमाह-

अर्धर्चश एवानूच्यो यथैवैनमेतदन्वाह प्रतिष्ठाया एव द्विप्रतिष्ठे वै पुरुषश्चतुष्पादाः पशवो यजमानमेव तद्द्विप्रतिष्ठं चतुष्पात्सु पशुषु प्रतिष्ठापयति तस्मादर्धर्चश एवानूच्यः, इति ।

अर्धर्चश एकैकस्मिन्नृचोऽर्धेऽवसायावसाय प्रातरनुवाकोऽनूच्यः । एवकारः पूर्वपक्षव्यावृत्त्यर्थः । यथैवेत्यादिनाऽर्धर्चश इत्येतदेव स्पष्टी क्रियते । एनमर्धं यथैव येनैव प्रकारेणैतदन्वध्ययनकालीनं गुरूच्चारणमनु यथाऽध्ययनकाले मन्त्रार्थमवसायाऽऽह पठति तथैव प्रातरनुवाकानुष्ठानकालेऽपि । न त्वत्र ऋगन्ते प्रणवप्रक्षेपादिवार्त्किचिन्नूतनं कर्तव्यमस्ति । तदेतदर्धर्चशोऽनुवचनं प्रतिष्ठाया एव यजमानस्य प्रतिष्ठार्थमेव भवति । तत्कथमिति तदेवोच्यते । यथैकस्या ऋचो द्वे अर्धर्चे एवं पुरुषो द्विप्रतिष्ठः प्रतितिष्ठति स्थैर्येणावस्थितो भवत्याभ्यां पादाभ्यामिति प्रतिष्ठे द्वे पादौ प्रतिष्ठे यस्यासौ द्विप्रतिष्ठः । पशूनां चत्वारः पादाः । तथा सति पादचतुष्टयोपेतास्वृक्षु द्वाभ्यामर्धाभ्यामवसानयुक्ताभ्यामनुवचने कृते सति द्विप्रतिष्ठं द्विपादं यजमानं चतुष्पात्सु पशुषु प्रतिष्ठापयति । तस्मादर्धर्चश एवानुवचनं युक्तम् ।

तत्र प्रातरनुवाकक्रममाक्षिप्य समाधत्ते-

तदार्धदव्यूढळः कथमव्यूढळो भवतीति यदेवास्य बृहती मध्यान्नैतीति ब्रूयात्तेनेति, इति ।

छन्दसां योऽयमनुक्रमः सोऽयमनुक्रमणिकाकारेण दर्शितः-'अथ च्छन्दांसि गायत्र्युष्णिगनुष्टुब्बृहतीपङ्क्तित्रिष्टुब्जगत्यतिजगतीशक्वर्यतिशक्वर्यष्टयत्यष्टीधृत्यतिधृतयश्चतुर्विंशत्यक्षरादीनि चतुरुत्तराणि' इति । चतुर्विंशत्यक्षरोपेतां गायत्रीमारभ्यो-

त्तरोत्तरं छन्दश्चतुर्भिश्चतुर्भिरक्षरैराधिक्यमित्यर्थः । तमेतं छन्दसां क्रमं विपर्यस्य प्रातरनुवाके क्रमान्तरमूहितं गायत्र्यनुष्टुप्त्रिष्टुब्बृहत्युष्णिग्जगती पङ्क्तिरिति । सोऽयं क्रमोऽस्माभिराश्वलायनोक्तक्रमेण पूर्वमेवोदाहृतः । तस्मात्प्रातरनुवाकोक्तक्रमस्य विपर्ययेणोहनादयं व्यूढः संपन्नः । सोऽयमनुचितः । तस्मात्कथमव्यूढळो भवतीति प्रश्न आक्षेपे वा यदेवेत्यादिकमुत्तरं यस्मादेव कारणाच्छन्दःक्रमेऽनुष्ठानक्रमे वाऽस्य प्रातरनुवाकस्य मध्याद्बृहतीछन्दो नैति नापगच्छतीत्युत्तरमभिज्ञो ब्रूयात्तेन कारणेनायमव्यूढळः संपन्न इत्यवगन्तव्यम् ।

अथ प्रातरनुवाकं प्रशंसति—

आहुतिभागा वा अन्या देवता अन्याः स्तोमभागाश्छन्दोभागास्ता या अग्नावाहुतयो हूयन्ते ताभिराहुतिभागाः प्रीणात्यथ यत्स्तुवन्ति च शंसन्ति च तेन स्तोमभागाश्छन्दोभागाः, इति ।

अन्याः काश्चिद्देवता अग्नौ हूयमानामाहुतिं भजन्त इत्यपराः काश्चिद्देवताः साम्न आवृत्तिप्रकारभेदेन निष्पन्नत्रिवृत्पञ्चदशादिस्तोमं भजन्ते । अपराः काश्चिद्देवता ऋग्गतगायत्र्यादि च्छन्दो भजन्ते । एवं सति ता विधिवाक्येषु प्रसिद्धा आहुतयो याः सन्ति ताभिराहुतिभागानां देवतानां प्रीतिः । उद्गातारः स्तोमयुक्तैः सामभिः स्तुवन्तीति यत्तेन स्तोमभागानां प्रीतिः । होतारश्छन्दोयुक्ताभिर्ऋग्भिः शंसन्तीति यत्तेन च्छन्दोभागानां प्रीतिः ।

वेदनं प्रशंसति—

उभय्यो हास्यैता देवताः प्रीता अभीष्टा भवन्ति य एवं वेद, इति ।

आहुतिभागा एको राशिः स्तोमभागाश्छन्दोभागाश्च द्वितीयो राशिः । एवमुभयविधा अपि देवता वेदनेन प्रीताः सत्यो वेदितुरभीष्टप्रदा भवन्ति । शंसनेन च्छन्दोभागानां प्रीत्यभिधानात्प्रातरनुवाकस्य प्रशंसा संपन्ना ।

विभिन्ने प्रीतिनिमित्ते दृष्टान्तमभिप्रेत्य सोमं पशुं प्रशंसति—

त्रयस्त्रिंशदै देवाः सोमपास्त्रयस्त्रिंशदसोमपा अष्टौ वसव एकादश रुद्रा द्वाद-

शाऽऽदित्याः प्रजापतिश्च वषट्कारश्चैते देवाः सोमपा एकादश प्रयाजा एकादशानुयाजा एकादशोपयाजा एतेऽसोमपाः पशुभाजनाः सोमेन सोमपान्प्रीणाति पशुनाऽसोमपान्, इति ।

वस्वादीनां वषट्कारान्तानां देवानां सोमयागेन प्रीतिः । होता यक्षदग्निमित्यादिमैत्रावरुणपैषमन्त्रेषु समिद्धो अद्येत्यादियाज्यासु चाभिहिताः समिदाद्या एकादश प्रयाजदेवताः । देवं बर्हिः सुदेवमित्यादिमैत्रावरुणपैषमन्त्रेषु देवं बर्हिर्वसुवन इत्यादियाज्यासु चाभिहिता बर्हिराद्या एकादशानुयाजदेवताः । समुद्रं गच्छ स्वाहेत्यादिमन्त्रोक्ताः समुद्रादय एकादशोपयाजदेवताः । सर्वा अपि सोमपानवर्जिताः पशुमेव भजन्ते । तासां पशुना तृप्तिः ।

वेदनं प्रशंसति-

उभय्यो हास्यैता देवताः प्रीता अभीष्टा भवन्ति य एवं वेद, इति ।

अत्र सोमपानामसोमपानां च भिन्नप्रीतिनिमित्ततया छन्दोभागानां देवतानामपि तद्देवताविलक्षणं प्रीतिनिमित्तं प्रातरनुवाक इत्यभिप्रायः ।

तस्य प्रातरनुवाकस्य समाप्तिमृचं विधत्ते-

अभूदुषा रुशत्पशुरित्युत्तमया परिदधाति, इति ।

अत्र कंचिदाक्षेपमुत्थापयति-

तदाहुर्यत्त्रीन्क्रतून्वाहाऽऽग्नेयमुषस्यमाश्विनं कथमस्यैकयर्चा परिदधतः सर्वे त्रयः क्रतवः परिहिता भवन्तीति, इति ।

क्रतुशब्दः सोमयागसंबन्धिनः प्रातरनुवाकभागानुपलक्षयति । ते च भागास्त्रय आग्नेय उषस्य आश्विनश्चेति । तत्र सर्वानसौ होता ब्रूते तदानीमेकयर्चा

परिधानं कुर्वतोऽस्य होतुस्त्रयो भागाः सर्वेऽपि कथं समापिता भवन्तीत्याक्षेपमाहुः ।

तत्र समाधानं दर्शयति—

अभूदुषा रुशत्पशुरित्युषसो रूपमाऽग्निरधाय्यृत्विय इत्यग्नेरयोजि वां वृषण्वसू रथो दस्रावमर्त्यो माध्वी मम श्रुतं हवमित्यश्विनोरेवमु हास्मैतस्यर्चा परिदधतः सर्वे त्रयः क्रतवः परिहिता भवन्ति भवन्ति ॥ १८ ॥ इति ।

येयमुषाः सूर्योदयात्पूर्वभाविनी सेयं रुशत्पशुरभूत् । रुशन्तः परस्परध्वनिं कुर्वन्तः पशवो यस्यामुषसि सेयं रुशत्पशुः । रात्रौ निद्रां कुर्वन्तः पशव उषःकाले प्राप्ते ध्वनिं कुर्वन्तीति प्रसिद्धमेतत् । उषोदेवताया अस्मिन्नादेऽभिहितत्वादयं प्रथमः पाद उषसो रूपमनुकूल इत्यर्थः । ऋत्वियोऽरणिमथनरूप क्रतुकाले भवस्तादृशोऽग्निरा समन्तादधाय्याधानेन संपादितः । अत्राग्नेरभिधानादृद्वितीयपादोऽग्ने रूपम् । वृषण्वसू वर्धमानधनौ दस्रौ हेऽश्विनौ देवौ वां युवयोरमर्त्यो रथो मनुष्याणामयोग्यः समीचीनो रथोऽयोज्यश्वाभ्यां योजितः । अतो माध्वी मधुरया वाचा मम हवं मदीयमाह्वानं श्रुतं युवां शृणुतम् । अस्मिन्नुत्तरार्धेऽश्विनोरभिधानादयमर्धोऽश्विनो रूपम् । तस्मादेकयर्चा देवत्रयप्रतिपादिकयैतमेव प्रातरनुवाकं परिदधतः समापयतोऽस्य होतुस्त्रयः क्रतवः प्रातरनुवाकभागाः सर्वे परिहिताः समापिता भवन्ति । पदाभ्यासोऽध्यायसमाप्त्यर्थः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऐतरेय ब्राह्मणभाष्ये सप्तमाध्याये षष्ठः खण्डः ॥ ८ ॥ [१८] (४८)

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकवीरबुक्कमहीपत्रा ज्यधुरंधरसायणाचार्यकृतावैतरेयब्राह्मणभाष्ये सप्तमोऽध्यायः ॥ ७ ॥

अथाष्टमोऽध्यायः ।

पर्यग्न्यादेर्विशेषांश्च स्तोकाः स्वाहाकृतीरपि ॥
वपां चाधीयते प्रातरनुवाकविधिः परम् ॥ १ ॥

अथापोनप्त्रीयादयो वक्तव्याः । तदर्थमादावाख्यायिकामाह-

ऋषयो वै सरस्वत्यां सत्रमासत ते कवषमै-लूषं सोमादनयन्दास्याः पुत्रः कितवोऽब्राह्मणः कथं नो मध्येऽदीक्षिष्टेति तं बहिर्धन्वोदवहन्नत्रैनं पिपासा हन्तु सरस्वत्या उदकं मा पादिति स बहिर्धन्वोदूहळः पिपासया वित्त एतदपो-नप्त्रीयमपश्यत्प्र देवत्रा ब्रह्मणे गातुरेत्विति तेनापां प्रियं धामोपागच्छत्तमापोऽनूदा-यंस्तं सरस्वती समन्तं पर्यधावत्, इति ।

भृग्वङ्गिरःप्रभृतय ऋषयः कदाचित्सरस्वत्यामेतन्नामकनदीतीरे सत्रमासत । द्वादशाहमारभ्योपरितनं त्रयोदशरात्रादिकं बहुयजमानकं कर्म सत्रमित्युच्यते । तदुद्दिश्य तत्र स्थितवन्तः सत्रमन्वतिष्ठन्नित्यर्थः । तदानीं तेषां मध्ये कश्चिदि-लूषाख्यास्य पुरुषस्य पुत्रः कवषनामकोऽवस्थितोऽभूत् । ते च ऋषयस्तं कवषं सोमयागाच्चिःसारितवन्तः । तेषामाभिप्राय उच्यते । दास्याः पुत्र इत्युक्ति-रधिक्षेपार्था । कितवो द्यूतकारस्तस्मादब्राह्मणोऽयम् । ईदृशो नोऽस्माकं शिष्टानां मध्ये स्थित्वा कथं दीक्षां कृतवानिति तेषामभिप्रायः । तं कवषं सर-स्वतीतीराद्बहिर्दूरे धन्व जलरहितां भूमिं प्रत्युदवहन्नुद्धृतवन्तो बलादपसारित-वन्तः । धन्वदेशे बलात्प्रेरयितॄणामयमभिप्रायः-अत्र जलवर्जितदेश एनं कवषं पिपासा मारयतु सरस्वत्या नद्याः पवित्रमुदकमयं पापिष्ठो मा पिबत्विति । स च कवषोऽत्र सरस्वत्या बहिर्दूरं धन्व निर्जलं देशं प्रत्युदूहळ उत्कर्षेणापसा-रितः पिपासया वित्तो लब्ध आक्रान्तस्तत्परिहारार्थमेतत्प्र देवत्रेत्यादिकमपो-नप्तृदेवताकं सूक्तं वेदमध्ये विचार्यापश्यत् । तेन सूक्तेन जपितेनापां जला-

---

१ ऋ. १०-३०-१ ॥

भिमानिनीनां देवतानां प्रियं स्थानमुपागच्छत् । तं चाऽऽगतमापो देवता अनूदायन्ननुग्रहेणोत्कर्षो यथा भवति तथा प्राप्तवत्यः । ततः सरस्वती नदी तं कवषं पर्यधावत्परितः प्रवाहवेगेन प्रवृत्ताऽऽसीत् ।

उक्तमर्थं लोकप्रसिद्ध्या द्रढयति—

तस्माद्धाप्येतर्हि परिसारकामित्याचक्षते
यदेनं सरस्वती समन्तं पर्यसरत्, इति ।

यद्यस्मिन्स्थाने सरस्वती नद्येनं कवषं समन्तं सर्वासु दिक्षु परिससार तत्स्थानमेतर्ह्यप्येतस्मिन्नपि काले तीर्थविशेषाभिज्ञाः पुराणकर्तारः परिसारकमित्येवनाम्ना व्यवहरन्ति ।

अथ सत्रानुष्ठायिनां तेषामृषीणां कृत्यं दर्शयति—

ते वा ऋषयोऽब्रुवन्विदुर्वा इमं देवा उपेमं ह्वयामहा इति तथेति तमुपाह्वयन्त तमुपह्वयैतदपोनप्त्रीयमकुर्वत प्र देवत्रा ब्रह्मणे गातुरित्येति तेनापां प्रियं धामोपागच्छन्नुपदेवानाम्, इति ।

ते भृग्वादयः परस्परमिदमब्रुवन्निमं कवषं देवाः सर्वेऽपि विदुर्वै जानन्त्येवातोऽस्य कितवत्वादिदोषो नास्ति तस्मादिमस्मत्समीपं प्रत्याह्वयाम इति विचार्य तमुपहूय तेन दृष्टमेतदपोनप्तृदेवताकं प्र देवत्रेत्यादि सूक्तमकुर्वत प्रयुक्तवन्तः । तेन सूक्तेन जलदेवतानामन्यदेवतानां च प्रियं स्थानमुपागच्छन् ।

एतद्देवनपूर्वकमनुष्ठानं च प्रशंसति—

उपापां प्रियं धाम गच्छत्युप देवानां
जयति परमं लोकं य एवं वेद
यश्चैवं विद्वानेतदपोनप्त्रीयं कुरुते, इति ।

यस्मादेवं प्रशस्तं तस्मादपोनप्त्रीयं कुर्यादिति विधिरुन्नेयः ।

तस्मिन्नपोनप्त्रीयसूक्ते प्रातरनुवाकतत्प्रसक्तमर्धर्चेऽवसानं निवारयितुं नैरन्तर्यं विधत्ते—

तत्संततमनुब्रूयात्, इति ।

होतुर्वेदनं प्रशंसति—

संततवर्षी ह प्रजाभ्यः पर्जन्यो भवति यत्रैवं विद्वानेतत्संततमन्वाह, इति ।

पर्जन्यो मेघः संततवर्षी निरन्तर्येण वृष्टिमान्यावती वृष्टिरपेक्षिता सा संपूर्णा भवतीत्यर्थः ।

विपक्षे बाधकपूर्वकं स्वपक्षमुपसंहरति —

यदवग्राहमनुब्रूयाज्जीमूतवर्षी ह प्रजाभ्यः पर्जन्यः स्यात्तस्मात्तत्संततमेवानूच्यम्, इति ।

अवग्राहं तस्मिंस्तस्मिन्नर्धर्चे पादे वाऽवगृह्यावगृह्य पुनः पुनरवसानं कृत्वा यद्यनुब्रूयात्तदा प्रजोपकारार्थं प्रवृत्तः पर्जन्यो जीमूतवर्षी स्यात् । जीमूतः पर्वतः । जीमूतौ मेघपर्वतावित्युक्तत्वात् । अनुपयुक्ते पर्वत एव वर्षति न तूपयुक्तेषु सस्येष्वित्यर्थः । यस्मादेवं तस्मादवग्रहो न कार्यः किं तु संततमेवानूच्यम् ।

तस्मिन्सूक्ते प्रथमाया ऋच आवृत्तिसहितं सांतत्यं विधीयते –

तस्य त्रिः प्रथमां संततमन्वाह तेनैव तत्सर्वं संततमुक्तं भवति ॥१९॥ इति ।

अस्य सूक्तस्य प्रथमायास्त्रिरावृत्तिः सांतत्येन सर्वस्यापि सूक्तस्य सांतत्यं सिध्यति । प्रथमायां सांतत्यमाश्वलायनो दर्शयति–'अध्यर्धकारं प्रथममृगावानमुत्तराः' इति । त्रिरावृत्तायाः प्रथमाया अर्धत्रयेणावसानं कृत्वा षष्ठ्युत्तरासामृचामवसानं कृत्वा पाठः कर्तव्य इत्यर्थः ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे ऐतरेयब्राह्मणभाष्ये सप्तमाध्याये पञ्चमः खण्डः ॥१॥ (१९) [४९]

तत्सूक्तवचने प्रकारविशेषं विधत्ते -

तां एता नवानन्तरायमन्वाह, इति ।

प्र देवत्येत्यारभ्य नवसंख्याका ऋचो याः सन्ति तासां द्वयोर्ऋचोर्मध्येऽन्तरायो विच्छेदो न भवति तथाऽनुब्रूयात्

अपरं विशेषं विधत्ते –

हे होतर्नो अध्वरं देवयज्येति दशमीम्, इति ।

---

१ ऋ. १०-३० ११ ॥

अध्ययनक्रमेणाऽऽवर्तत इति दशमीं तां परित्यज्य तदुत्तरभाविनीं (नीं) हिनोता न इति दशमीं कृत्वाऽनुब्रूयात् ।

परित्यक्तायास्तस्या अनुवचने कालविशेषं विधत्ते—

'आवर्ततीरथ नु द्विधारा
इत्यावृत्तास्वेकधनासु, इति ।

अत्रायं प्रयोगक्रमः । सुत्यादिनात्पूर्वस्मिन्दिनेऽग्नीषोमीयं पशुमनुष्ठाय वसतीवरीसंज्ञिताः सोमाभिषवकाले सवनीया अपः स्थानीय वेद्यामवस्थाप्य मध्यरात्रादूर्ध्वं निद्रां परित्यज्याऽऽग्नीध्रधिष्ण्यादींस्तत्तन्मन्त्रैरभिमृश्य सोमादीनां गात्राण्यासाद्य प्रातरनुवाकार्थं होतारं संप्रेष्य प्रातरनुवाकान्ते शृणोत्वग्निरिति मन्त्रेण हुत्वा तत एकधना अप आनेतुं गच्छन्नपोनप्त्रीयसूक्तार्थं होतारं संप्रेष्यैकधना अप आनयेदिति । सोऽयं प्रयोगक्रम आध्वर्यवसूत्रेषु द्रष्टव्यः । तत्र होतारं प्रत्यपोनप्त्रीयविषये प्रैषमापस्तम्बो दर्शयति—' यत्राग्निर्जानात्यभूदुषा रुशत्पशुरिति तत्प्रचरण्या जुहोति शृणोत्वग्निः समिधा हवं म इत्यपरं चतुर्गृहीतं गृहीत्वा संप्रेष्यत्यप इष्य होतर्मैत्रावरुणस्य चमसाध्वर्यवाद्रवैकधनिन आद्रवत नेष्टः पत्नीमुदानयोन्नेतर्होतृचमसेन वसतीवरीभिश्च चात्वालं प्रत्यास्स्व ' इति । अस्मात्प्रैषादूर्ध्वं होता सूक्तमनुब्रूयात् । तदाहाऽऽश्वलायनः— ' परिहितेऽप इष्य होतरित्युक्तेऽनभिर्हिङ्कृत्यापोनप्त्रीया अन्वाह ' इति । तत्र पूर्वोक्तदशमीसहिता ऋचोऽनूच्यैकधनिनः पुरुषाः प्रेषिताः सन्त एकधनाख्या अपो घटैर्गृहीत्वा यदा जलसमीपादावर्तन्ते तदानीं तास्वेकधनास्वप्स्वावृत्तासु सतीषु तदावृत्तिं प्रतीक्षमाणो होता पूर्वं परित्यक्तामावर्ततीरित्येतामृचं तस्मिन्काले ऽनुब्रूयादित्यर्थः ।

ऋगन्तरकालं विधत्ते—

'प्रति यदापो अदृश्रमायती-
रिति प्रतिदृश्यमानासु, इति ।

ता एकधनाख्या आपो ग्रहणस्थानात्प्रतिनिवृत्य तैः पुरुषैरानीयमाना यदा होत्रा दृश्यन्ते तदानीं प्रति यदाप इत्येतामृचमनुब्रूयात् ।

पुनरप्यृगन्तरकालं विधत्ते—

---

१ ऋ १०-३०-१० ॥ २ ऋ. १० ३-१३ ॥

'आ धेनवः पयसा तूर्ण्यर्था इत्युपायतीषु, इति ।

होत्रा दृष्टास्ता एकधनाख्या आपो यदा चात्वालसमीपं प्रत्यागच्छन्ति तदा-मीमुपायतीषु समीपमागच्छन्तीषु तासु आ धेनव इत्येतामृचं ब्रूयात् ।

पुनरप्यृगन्तरकालं विधत्ते–

'समन्या यन्त्युप यन्त्यन्या इति समायतीषु, इति ।

पूर्वत्रोन्नेवहोतृचमसेन वसतीवरीभिश्च चात्वालं प्रत्यास्वेत्यापस्तम्बसू-त्रोक्तः शैष उदाहृतस्तत उन्नेता होतृसंबन्धिनं चमसं वसतीवर्याख्याः पूर्वादि-नानीता अपश्चात्वालसमीपे समानयति । मैत्रावरुणस्य चमसाध्वर्यवाद्रवेति प्रेषितत्वान्मैत्रावरुणस्य परिचारकश्चमसाध्वर्युरपि तदीयं चमसं चात्वालसमीपे समानयति । तेन होतृचमसेन वसतीवर्यो गृह्यन्ते । मैत्रावरुणचमसेनैकधनाश्च गृह्यन्ते । ततो वसतीवरीसहिते होतृचमसे मैत्रावरुणचमसगतास्त्वेकधनास्त्वध्व-र्युणा समीपनीतासु संयोजयितुं समागतासु समन्या यन्तीत्यादिकामृचमनुब्रूयात् । एवंतमनुवचनकालमापस्तम्बो विशदयति–' होतृचमसेन वसतीवरीभ्यो निषिच्यो-परि चात्वाले होतृचमसं मैत्रावरुणचमसं च सꣳस्पर्श्य वसतीवरीभ्यानयति समन्या यन्तीत्यभिज्ञाय होतृचमसान्मैत्रावरुणचमस आनयति मैत्रावरुणचमसाद्धोतृचमस एतद्वा विपरीतम् ' इति ।

एतस्या ऋचः प्रशंसार्थमाख्यायिकामाह–

आपो वा अस्पर्धन्त वयं पूर्वं यज्ञं वक्ष्यामो वयमिति याश्चेमाः पूर्वेद्युर्वसतीवर्यो गृह्यन्ते याश्च प्रातरेकधनास्ता भृगुरपश्यदापो वै स्पर्धन्त इति ता एतयर्चा समज्ञपयत्समन्या यन्त्युप यन्त्यन्या इति ताः समजानत, इति ।

पूर्वेद्युः संपादिता वसतीवर्याख्या या आपो याश्च परेद्युः संपादिता एकध-नाख्यास्ता उभयविधा अपि यज्ञनिर्वहणे पूर्वभावित्वार्थमन्योन्यं स्पर्धां कृत-वत्यः । तदानीं भृगुनामक ऋषिराप एव परस्परं स्पर्धन्त्य इत्यपश्यत् । अर्थवादत्वादचेतनानां स्पर्धायां न चोद्यनीयम् । यद्वा तत्तदभिमानिनी दे-

१. ऋ. ५-४३-१ ॥ २. ऋ. २-३५ ३ ॥

ताऽस्पर्धेतेत्यवगन्तव्यम् । ततो भृगुः स्पर्धां दृष्ट्वा समन्या यन्तीत्येतयर्चा ता उभयीरपः समज्ञपयत्संज्ञानं परस्परमैकमत्यं प्रापयत् । ततो मन्त्रसामर्थ्यात्ता उभयविधा आपः समजानतैकमत्यं प्राप्ताः ।

वेदनं प्रशंसति—

संजानाना हास्याऽऽपो यज्ञं वहन्ति य एवं वेद, इति ।

या वसतीवर्यो याश्चैकधनास्ता द्विविधा अपि संजानानाः परस्परमैकमत्यं प्राप्ता अस्य विदुषो यज्ञं निर्वहन्ति ।

ऋगन्तरकालं विधत्ते--

आपो न देवीरुपयन्ति होत्रियमिति होतृचमसे समवनीयमानास्वन्वाह तासांवसतीवरीष्वेकधनासु च, इति ।

एतासु द्विविधास्वप्सु होतृचमसे सिच्यमानासु तस्मिन्काल आपो न देवीरित्येतामृचमनुब्रूयात् ।

अथ होतुः कंचिद्यजुरात्मकं मन्त्रं विधत्ते--

अवेरपोऽध्वर्या३उ इति होताऽध्वर्युं पृच्छति, इति ।

हेऽध्वर्यो द्विविधा अपः किमवेर्लब्धवानसि । अस्मिन्मन्त्रे प्लुतिः प्रश्नार्थां तमेतं मन्त्रं व्याचष्टे--

आपो वै यज्ञोऽविदो यज्ञा३म्, इत्येव तदाह, इति ।

एतद्विविधा अप्याः सोमाभिषवसाधनत्वेन यज्ञनिर्वाहकत्वाद्यज्ञस्वरूपा एव । तथा सति यज्ञमब्रूपमविदः किं लब्धवानसीत्यनेन प्रकारेण तदाह तन्मन्त्रवाक्यं ब्रूते । यज्ञा३मिति प्लुतिः पूर्ववत् ।

अध्वर्योः प्रत्युत्तरमन्त्रं विधत्ते-

उतमनन्नमुरित्यध्वर्युः प्रत्याह, इति ।

उतशब्दोऽपिशब्दार्थः । ईमिति वाक्यपूरणार्थो निपातः इमा इत्यस्मिन्नर्थे वर्तते । इमा द्विविधा अप्यापोऽनन्नमुरातिशयेनोपनताः प्राप्ता इति ।

---

१ ऋ. १ ८३-२ ॥

एतमध्वर्योरुत्तरमन्त्रं व्याचष्टे—

उत्तेमाः पश्येत्येव तदाह, इति ।

इमा द्विविधा अप्यपो हे होतः पश्येत्यनेन प्रकारेण तन्मन्त्रवाक्यं ब्रूते । शाखान्तरेऽप्येवत्सर्वं श्रुतम्-अध्वर्योऽवेरपा इत्याहोतेमनन्नमुरुतेमाः पश्येति वावैतदाहेति ।

अथ किंचिन्निगदरूपेण मन्त्रेण होतुः प्रत्युत्थानं विधत्ते-

तास्वध्वर्यो इन्द्राय सोमं सोता मधुमन्तं वृष्टिवानिं तीव्रान्तं बहुरमध्यं वसुमते रुद्रवत आदित्यवत ऋभुमते विभुमते वाजवते बृहस्पतिवते विश्वदेव्यावते । यस्येन्द्रः पीत्वा वृत्राणि जङ्घनत्प्र स जन्यानि तारिषोऽमिति प्रत्युत्तिष्ठति, इति ।

तास्वित्यादिरोमित्यन्तो निगदस्तेन मन्त्रेण होता द्विविधानामप्यपां प्रत्युत्थानं कुर्यात् । हेऽध्वर्यो द्विविधास्वप्सु सोमं होता सोमस्याभिषवकर्ता भव । कीदृशं सोमं मधुमन्तं माधुर्यरसोपेतं वृष्टिवानिं वृष्टेः संभजनकारिं वृष्टिप्रदमित्यर्थः । तीव्रान्तं तीव्रफलावश्यंभावि फलमन्ते यस्य सोमस्य सोऽयं तीव्रान्तः । अविघ्नेन सोमयागे समाप्ते सति सर्वथा फलत्येवेत्यर्थः । बहुरमध्यं बहुलमङ्गादिकमनुष्ठानं मध्ये प्रारम्भसमाप्त्योरन्तराले यस्यासौ बहुरमध्यः । ऋत्विग्वरणमारभ्योदवसानीयेष्टेः पूर्वं दीक्षणीयाद्यङ्गकर्मभिरुपांशुयाजग्रहादिभिश्च मध्यैरनुष्ठानबाहुल्यं प्रसिद्धम् । कीदृशायेन्द्राय । वसुरुद्रादित्यैर्ऋभुभिर्विभुभिः समर्थैर्भृत्यैर्वाजेनान्नेन बृहस्पतिना सुरगुरुणा सर्वदेवहितैर्भा (र्गो)ग्यैश्च युक्तत्वेन वस्वादिमते । अयमिन्द्रो यस्य सोमस्य वल्लीरूपस्य रसं पीत्वा वृत्राणि यजमानस्य शत्रूनपापानि च जङ्घनद्विनाशितवांस्तादृशं सोममिति पूर्ववान्वयः । अथवा यस्य यजमानस्य संबन्धिनं सोमं पीत्वेति व्याख्येयम् । स यजमानो जन्यानि जने संभावितानि पापानि प्रतारिषत्प्रकर्षेण तीर्णवान्भवति । ओमित्यङ्गीकारार्थः । अयं युक्तार्थ एवमेवेत्यङ्गीकारार्थः ।

एतन्मन्त्रसाध्यं प्रत्युत्थानमुपपादयति-

प्रत्युत्थेया वा आपः प्रति वै श्रेयांसम् यन्तमुत्तिष्ठन्ति [illegible]त्प्रत्युत्थेयाः, इति ।

यैश्च द्विविधा आपस्ताः प्रत्युत्येया एव । दर्शनान्तरमेव प्रत्युत्थानं कर्तव्यम् । लोकेऽपि श्रेयांसमतिप्रशस्तमाचार्यपित्रादिकमायान्तं स्वयंमुख्यत्वेन समागच्छन्तं प्रति शिष्यपुत्रादय उत्तिष्ठन्त्येव । तस्मादतिप्रशस्ता आपः प्रत्युत्थानयोग्याः ।

न केवलं प्रत्युत्थानं किं त्वनुवर्तनमपि कर्तव्यमिति विधत्ते–

अनुपर्यावृत्याः, इति ।

अनु पृष्ठतः पर्यावृत्याः परितः संचरणयोग्या द्विविधा आपः ।

तदेतदुपपादयति–

अनु वै श्रेयांसं पर्यावर्तन्ते तस्मादनुपर्यावृत्या अनुब्रुवतैवानुप्रपत्तव्यम्, इति ।

श्रेयांसमाचार्यादिकमनुगम्य शिष्यादयः परितः संचरन्ति तस्मादत्रापि शिष्यस्थानीयेन होत्रा पूर्वोक्तमपोनप्त्रीयं निगदमनुब्रुवतैव तासामपां पृष्ठतोऽनुगन्तव्यम् ।

ननु यागकर्तृत्वाद्यजमानस्यैवानुव्रजनं युक्तं न तु होतुरित्याशङ्क्याऽऽह–

ईश्वरो ह यद्यप्यन्यो यजेताथ होतारं यशोऽर्तोस्तस्मादनुब्रुवतैवानुप्रपत्तव्यम्, इति ।

यद्यपि होता यागकर्ता न भवत्यथाप्यनुव्रजन्तं होतारं यशः कीर्तिरर्तोरीश्वरो ह प्राप्तुं समर्थैव । तस्मात्कीर्तिहेतुत्वादनुब्रुवतैव होत्रा तासामपामनुगमनं कर्तव्यम् ।

ननु प्र देवत्रेत्यादीनामृचां तास्वध्वर्यवित्यादिनिगदस्य च पूर्वमेवानूक्तत्वादितः परमनुगमनकाले किमनुवक्तव्यामित्याशङ्क्यानुवक्तव्यामवशिष्टामृचं विधत्ते–

अम्बयो यन्त्यध्वभिरित्येतामनुब्रुवन्ननु प्रपद्येत, इति ।

अस्या ऋचो द्वितीयतृतीयपादावनुवदति–

जामयो अध्वरीयताम् । पृञ्चतीर्मधुना पय इति, इति ।

तस्यायमर्थः । अम्बेत्यव्ययं मातृवाचकं तद्रूपत्वं यातीत्यम्बयाः । छान्द-

---

सो ह्स्वः। मातृसमाना एता द्विविधा आपोऽध्वभिर्नानाविधैर्मार्गैर्यन्ति गच्छन्ति। कीदृश्यः। अध्वरीयतामध्वरं यज्ञमात्मन इच्छतां यजमानानां जामयः सनाभयो भ्रातृस्थानीया इत्यर्थः। तथा स्वकीयं पय उदकं मधुना मधुरेण सोमरसेन पृश्नवीः संयोजयन्त्यः।

अस्यामृचि मधुशब्दतात्पर्यं दर्शयति-

योऽमधव्यो यशोऽर्तोर्बुभूषेत्, इति।

यः पुमान्पूर्वंममधव्यो मधुररसं सोमं नार्हति स यदि यशोऽर्तोः सोमयाग निमित्तां कीर्तिं प्राप्तुं समर्थो भवितुमिच्छेत्स पुमान्पूर्वोक्तामनुब्रुवन्ननुपपद्येतेत्यन्वयः।

ऋगन्तरं फलविशेषाय विधत्ते--

अमूर्या उपसूर्ये याभिर्वा सूर्यः सहेति तेजस्कामो ब्रह्मवर्चसकामः, इति।

शरीरकान्तिं श्रुताध्ययनसंपत्तिं च कामयमानः पुमानमुर्या इत्येतामृचमनुब्रूयात्

फलान्तरार्थमृगन्तरं विधत्ते -

अपो देवीरुपह्वये यत्र गावः पिबन्ति न इति पशुकामः, इति।

पशुप्राप्त्यर्थमपो देवीरित्येतामृचमनुब्रूयात्।

अम्बयो यन्त्यमूर्या अपो देवीरित्येतासां तिसृणां विधिमुपसंहरति

ता एताः सर्वा एवानुब्रुवन्ननुप्रपद्येतैतेषां कामानामवरुद्ध्यै, इति।

अथवा नित्यानुष्ठानार्थोऽयं पुनर्विधिः। एतेषामित्यादिस्तत्प्रशंसार्थः।

वेदनं प्रशंसति--

एतान्कामानवरुन्धे य एवं वेद, इति।

ऋमन्तरस्य कालं विधत्ते--

---

१. क. १-२३-१३ ॥ २. क. ११-२३-१८ ॥

**एमा अग्मन्त्रेवतीर्जीवधन्या इति साद्यमाना-
स्वन्वाह वसतीवरीष्वेकधनासु च, इति ।**

उक्ता द्विविधा आपो यदा वेद्यां साद्यन्ते तदानीमेमा अग्मन्निति[1]येतामनुब्रूयात् । ऋगन्तरेण समाप्तिं विधत्ते—

**[2]आऽग्मन्नाप उशतीर्बर्हिरेदामिति सन्नासु
स एतया परिदधाति ॥ २० ॥ इति ।**

द्विविधास्वप्सु वेद्यां स्थापितास्वाऽग्मन्नाप इत्येतामृचमनुब्रूयात् । सोऽनुवक्ता होतैतयैवर्चाऽनुवचनं समापयेत् ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऐतरेय-
ब्राह्मणभाष्ये षष्ठाध्याये पञ्चमः खण्डः ॥ २ ॥ (२०) [५०]

पूर्वस्मिन्खण्डे द्विविधास्वप्सु वेद्यां सादितास्वपोनप्त्रीयानुवचनस्य समापनमुक्तम् । तत्र सादनप्रकार आपस्तम्बेन दर्शितः—'अपरया द्वारा हविर्धानमपः प्रपादयति पूर्वया गतश्रियः पूर्वया यजमानः प्रपद्यते दक्षिणस्य हविर्धानस्य प्रधुरे प्रचरणीयꣳ सादयति यं कामयेत पण्डकः स्यादिति तं प्रचरण्योप-स्पृशेदेतस्यैव हविर्धानस्याधस्तात्पुरोक्षं मैत्रावरुणचमसमुत्तरस्यां वर्तन्यां पुरश्चक्रꣳ होतृचमसमुत्तरस्य हविर्धानस्याधस्तात्पुरोक्षं वसतीवरीः पश्चादक्षमेकधना एवद्वा विपरीतमदो यजमानोऽनुप्रपद्यते' इति । एवं सादितास्वप्स्वपोनप्त्रीया ऋचः समाप्य होताऽवतिष्ठते । ततोऽध्वर्युर्दधिग्रहेणांशुग्रहेणाद्राभ्यग्रहेणोपांशुग्रहेणान्तर्या-मग्रहेण क्रमात्प्रचरति तावदयं होता वाचं नियम्यैवाऽऽस्ते ।

तदिदं विधत्ते—

**शिरो वा एतद्यज्ञस्य यत्प्रातरनुवाकः प्राणा-
पाना उपांश्वन्तर्यामौ वज्र एव वाङ्नाहुतयो-
रुपांश्वन्तर्यामयोर्होता वाचं विसृजेत, इति ।**

योऽयं प्रातरनुवाकः पूर्वमुक्तः सोऽयं यज्ञस्य शिरस्थानीय उपांश्वन्तर्याम-

---

१ ऋ. १०-३०-१४ ॥ २ ऋ. १० ३० १५ ॥

ग्रहौ प्राणापानस्थानीयौ, एष ते योनिः प्राणाय त्वा, एष ते योनिरपानाय त्वेति तदीयमन्त्रयोः श्रवणात्। होतुर्या वाक्सा वज्रस्थानीया । अत एवान्यत्र श्रूयते–'यद्वै होताऽध्वर्युमभ्याह्वयते वज्रमेवमभिप्रवर्तयति' इति । एवं सत्यध्वर्युणोपांश्वन्तर्यामग्रहयोर्हुतयोः सतोः पश्चाद्धोता वाचं विसृजेत । तावत्पर्यन्तं वाचं नियच्छेत् ।

विपक्षबाधकपूर्वकं स्वपक्षमुपसंहरति–

यदहुतयोरुपांश्वन्तर्यामयोर्होता वाचं विसृजेत वाचा वज्रेण यजमानस्य प्राणान्वीयाद्य एनं तत्र ब्रूयाद्वाचा वज्रेण यजमानस्य प्राणान्व्यगात्प्राण एनं हास्यतीति शश्वत्तथा स्यात्तस्मान्नाहुतयोरुपांश्वन्तर्यामयोर्होता वाचं विसृजेत, इति ।

उपांश्वन्तर्यामहोमात्पूर्वं वाचं विसृजन्होता वाग्वज्रेण यजमानस्य प्राणान्वीयाद्विगतान्कुर्यात् । कथं प्राणविगम इति तदुच्यते । तत्र तस्मिन्होतुर्वाग्विसर्गे सति यः कश्चिदागत्यायं होता वाग्वज्रेण यजमानस्य प्राणान्व्यगाद्विगतानकरोत्तस्मात्प्राण एनं यजमानं हास्यति परित्यजतीत्येनं होतारं प्रति ब्रूयात् । तदानीं तेन पुरुषेण होतरि शप्ते सति तदीयशापो (पे) न शश्वत्तथा स्यादवश्यं यजमानप्राणविगमो होतुस्तद्वधप्रत्यवायश्च भवेत् । तस्मान्नाहुतयोरुपांश्वन्तर्यामयोर्होता वाचं विसृजेत ।

उपांश्वन्तर्यामहोमादूर्ध्वं वाग्विसर्गप्रकारं विधत्ते–

प्राणं यच्छ स्वाहा त्वा सुहव सूर्यायेत्युपांशुमनुमन्त्रयेत तमभि प्राणेत्प्राण प्राणं मे यच्छेत्यपानं यच्छ स्वाहा त्वा सुहव सूर्यायेत्यन्तर्यामम्मनुमन्त्रयेत तमभ्यपानेदपानं मे यच्छेति व्यानाय त्वेत्युपांशुसवनं ग्रावाणमभिमृश्य वाचं विसृजते, इति ।

शोभनो हवो यस्येत्युपांशुग्रहस्य सोऽयं सुहवो हे सुहव सूर्याय त्वद-

भिमानिसूर्यदेवतामीत्यर्थं त्वोपांशुग्रहरूपं स्वाहा सुष्ठु हुतं करोमि । अतो यजमानसंबन्धिनं प्राणं यच्छ देहीत्यनेन मन्त्रेणोपांशुग्रहस्यानुमन्त्रणं कुर्यादिति । अन्वीक्ष्य मन्त्रणमनुमन्त्रणम् । ततस्तमभि प्राणेत्तमुपांशुग्रह मे मह्यं प्राणं यच्छ देहि । हे सुहवान्तर्यामग्रहेत्येतावान्विशेषः । अन्यत्पूर्ववत् । अ नेनिधासं कुर्यात् । उपांशुग्रहार्थं सोमाभिषवहेतुर्यः पाषाणस्तं व्यानाय त्वेति मन्त्रेणाभिमृशेत् । हे पाषाणोपांशुसवनाख्य त्वां प्राणापानयोर्मध्यवर्तिव्यानवायुसिद्ध्यर्थमभिमृशामीति शेषः । अभिमर्शनादूर्ध्वं मौनं परित्यज्य वाग्व्यवहारं कुर्यात् ।

उपांशुसवनम ना)भिमर्शनमुपपादयति—

आत्मा वा उप [illegible] आत्मन्ये तद्धोता प्राणान्प्रतिधाय वाचं विसृजते सर्वायुः सर्वायुत्वाय, इति ।

योऽयमुपांशुसवनो ग्रावा सोऽयमात्मा वै शरीरमेतत्तदीयाभिमर्शनेनायं होता शरीर एव प्राणानवस्थाप्य स्वयं शतसंवत्सरपरिमितेन सर्वेणाऽऽयुषा युक्तो वाचं विसृजते । तच्च यजमानस्य संपूर्णायुःप्राप्तये भवति ।

वेदनं प्रशंसति -

सर्वमायुरेति य एवं वेद ॥ २१ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऐतरेय ब्राह्मणभाष्येऽष्टमाध्याये तृतीय खण्डः ॥ ३ ॥ (२१) [५१]

अन्तर्यामग्रहहोमादूर्ध्वं महाभिषवं कृत्वैन्द्रवायवमारभ्य यवमत्यन्तर्यं (ग्र)हार्थं तत्तत्पात्रेषु सोमं गृहीत्वा सादितेषु वैषुवान्होमान्हुत्वा बहिष्पवमानार्थं प्रसर्पयेयुः । प्रसर्पणप्रकारमापस्तम्ब आह—' सप्तहोतारं मनसाऽनुद्रुत्याऽऽहवनीये सग्रहं हुत्वोदञ्चः प्रह्वा बहिष्पवमानार्थं पञ्चर्त्विजः समन्वारब्धाः सर्पन्त्यध्वर्युं प्रस्तोताऽन्वारभते प्रस्तोतारं प्रतिहर्ता प्रतिहर्तारमुद्गातारं ब्रह्मा ब्रह्माणं यजमानः ' इति । आश्वलायनोऽप्याह—' अध्वर्युमुखाः समन्वारब्धाः सर्पन्त्यातीर्थदेशात्तत्स्तोत्रायोपविशन्त्युद्गातारमभिमुखास्तान्होताऽनुमन्त्रयतेऽत्रैवाऽऽसीनो यो देवानामिह ' इति ।

ततो होतुः सर्पणं निवारयितुं पूर्वपक्षमुपन्यस्यति—

तदाहुः सर्पेऽत्, न सर्पेऽत्, इति सर्पेदिति हैक आहुरुभयेषां वा एष देवमनुष्याणां भक्षो यद्बहिष्पवमानस्तस्मादेनमभिसंगच्छन्त इति वदन्तः, इति ।

तत्तत्रैन्द्रवायवादिग्रहणादूर्ध्वकालेऽध्वर्युप्रभृतीनां सर्पणे केचिदाहुर्विचारयन्ति । किमयं होता तैः सह सर्पेन्न वेति । विचारार्थं प्लुतिः । अयं होताऽपि सर्पेदिति केचित्पूर्वपक्षिण आहुः । तत्रोपपत्तिं च कथयन्ति । उद्गातृभिर्गेयमुपास्मै गायता नरः (९-११-१) इत्यादिकं स्तोत्रं बहिष्पवमानशब्देनोच्यते । यो बहिष्पवमान एष एव देवानां मनुष्याणां चोभयेषां भक्षः । तेन हि ते सर्वे तृप्यन्ति । अत एव पूर्वत्र स्तोमभागानां स्तोत्रेण प्रीतिः श्रुता । तस्मात्कारणादेनं बहिष्पवमानं देवमनुष्याः सर्वेऽभिसंगच्छन्त इत्येतामुपपत्तिं वदन्तः ।

पूर्वपक्षिणो यदाहुस्तन्निराकरोति –

तत्तन्नाऽऽदृत्यम्, इति ।

तस्मिन्सर्पणे तत्पूर्वपक्षिमतं नाऽऽदरणीयम् ।

विपक्षे बाधं दर्शयति—

यत्सर्पेदृचमेव तत्साम्नोऽनुवर्त्मानं कुर्याद्य एनं तत्र ब्रूयादनुवर्त्मा न्वा अयं होता सामगस्याभूदुदगातरि यशोऽधाद्च्योष्टाऽऽयतनाच्च्योष्यत आयतनादिति शश्वत्तथा स्यात्, इति ।

यद्ययं होता तैः सह सर्पेत्तदानीं स्वकीयामृचमेव साम्नोऽनुवर्त्मानं पृष्ठगामिनीं कुर्यात् । तच्चायुक्तम् । ऋच आधारत्वात् । साम्न आधेयत्वात्पश्चाद्भावि । अत एव च्छन्दोगा आमनन्ति–'तदेतस्यामृच्यध्यूहळं साम तस्मादृच्यध्यूहळं साम गीयते' इति । ततः पुरोगामिन्या ऋचः पश्चादुगामित्वमयुक्तम् । तत्र होतुः सर्पणे यः कश्चिदागत्यैनं होतारं ब्रूयादयं होता सामगस्योद्गातुरनुवर्त्मा न्वै पृष्ठगाम्येवाभूत । अतो होता स्वकीयां यशः कीर्तिमुद्गातर्यधात्स्थापितवान् । स्वयमायतनात्स्वकीयपदाद्च्योष्ट च्युतवान् । इतः परमपि च्योष्यते स्वकीयस्थानात्प्रच्युतो भविष्यतीत्येवं पुरुषान्तरेण शप्तस्य होतुरवश्यं तथा भवेत् ।

सर्पणं निवार्यानुमन्त्रणं विधत्ते–

तस्मात्तत्रैवाऽऽसीनोऽनुमन्त्रयेत, इति ।

यस्मात्प्रसर्पणे दोषाः सन्ति तस्माद्यत्र पूर्वमवस्थितस्तत्रैवाऽऽसनि इतरेषां सर्पणमन्वीक्ष्यानुमन्त्रयेत ।

तस्मिन्नुन्नमन्त्रणे मन्त्रं दर्शयति –

यो देवानामिह सोमपीथो यज्ञे बर्हिषि वेद्या·
३म् , । तस्यापि भक्षयामसीति, इति ।

इह देशे क्रियमाणो य सोमयागस्तस्मिन्या वेदिर्बर्हिश्च तत्रत्यं बर्हिस्तत्र सर्वदेवानां संबन्धी सोमपीथः सोमयागरूपो बर्हिष्पवमानाख्यो यो भक्षोऽस्ति तस्याप्यंशं वयं भक्षयाम इत्येषोऽनुमन्त्रणमन्त्रः ।

तं प्रशंसति—

एवमु हास्याऽऽत्मा सोमपीथा·
दनन्तरितो भवति, इति

एतमेवानुमन्त्रणे सत्यस्य होतुरात्मा जीवः सोमपानात्कदाचिदप्यन्तरितो न भवति ।

मन्त्रान्तरं च विधत्ते–

अथो ब्रूयान्मुखमास मुखं भूयासमिति, इति ।

पूर्वोक्तान्मन्त्रादनन्तरं मुखमित्यादिकमिति मन्त्रं ब्रूयात् । हे बर्हिष्पवमान यज्ञस्य त्वं मुखमसि यज्ञमध्ये मुख्योऽसि । अतस्त्वत्प्रसादादहमपि मुखं मुख्यो भूयासम् ।

एतं मन्त्रं प्रशंसति–

मुखं वा एतद्यज्ञस्य यद्बर्हिष्पवमानः, इति ।

स्तोत्रेषु सर्वेष्वाद्यत्वाद्बर्हिष्पवमानस्य मुखत्वम् ।

वेदनं प्रशंसति–

मुखं स्वेषु भवति श्रेष्ठः स्वानां
भवति य एवं वेद, इति ।

मुखत्वं लोकव्यवहारप्रवर्तकत्वं श्रेष्ठत्वं विद्यावित्तादिसंपत्तिः । अथ सवनीयपुरोडाशेषु येयं मैत्रावरुणी पयस्याऽस्ति तत्सद्भाव आपस्तम्बेन दर्शितः– ‘ प्राग्वंशे प्रतिप्रस्थाता सवनीयान्निर्वपति सर्वे यवा भवन्ति लाजार्थान्परिहा-

व्येन्द्राय हरिवते धाना इन्द्राय पूषण्वते करम्भं सरस्वत्यै भारत्यै पारिवापमिन्द्राय पुरोडाशं मित्रावरुणाभ्यां पयस्याम् ' इति ।

तामेतां पयस्यां प्रशंसितुमाख्यायिकामाह-

आसुरी वै दीर्घजिह्वी देवानां प्रातःसवनमवालेट् तद्व्यमाद्यत्ते देवाः प्राजिज्ञासन्त ते मित्रावरुणावब्रुवन्युवमिदं निष्कुरुतामिति तौ तथेत्यब्रूतां तौ वै वो वरं वृणावहा इति वृणाथामिति तावेतमेव वरमवृणातां प्रातःसवने पयस्यां सैनयोरेषाऽच्युता वरवृता ह्येनयोस्तद्यस्यै विमत्तमिव तदस्यै समृद्धं विमत्तमिव हि तौ तया निरकुरुताम् ॥ २२ ॥ इति ।

दीर्घा जिह्वा यस्याः सा दीर्घजिह्वी । असुरजातावुत्पन्नत्वादासुरी । तथा च तलवकारा आमनन्ति-' दीर्घजिह्वी वा असुर्या सा ' इति । सा च देवानां संबन्धि प्रातःसवनमवालेट् स्वकीयया जिह्वया तस्यावलेहं कृतवती तत्र (च) प्रातःसवनं विषजिह्वावलेहनेन व्यमाद्यद्विविधं मत्तमभूत् । सर्वस्यापि सवनप्रयोगस्य विपर्यासो जातः । ते देवास्तत्परिहारोपायं प्राजिज्ञासन्त प्रकर्षेण विचारितवन्तः । विचार्य च तत्परिहारसमर्थौ मित्रावरुणावब्रुवन्हे मित्रावरुणौ युवं युवामुभाविदं प्रातःसवनं निष्कुरुतं निर्गतदोषं कुरुतम् । तत्तावदङ्गीकृत्य देवेभ्यो वरं याचित्वा प्रातःसवनगं पयस्यामेव स्वकीयपरत्वेन वृतवन्तौ । पयसि भवाऽऽमिक्षा पयस्या । सैषा वरवृतत्वादेनयोः कदाचिदप्यविच्युता । तत्र प्रातःसवने यदङ्गमस्या अनया दीर्घजिह्वया विमत्तमिव कृतमासीत् । तत्सर्वमस्या अनया पयस्यया समृद्धमासीत् । यस्माद्विमत्तमिव स्थितं प्रातःसवनं तौ मित्रावरुणौ तया पयस्यया निरकुरुतां निवारितवन्तौ तस्मात्समृद्धिर्युक्ता ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऐतरेयब्राह्मणभाष्ये सप्तमाध्याये चतुर्थः खण्डः ॥ ४ ॥ (२२) [५२]

अथ सवनीयपुरोडाशान्विधातुमादौ कथामाह-

देवानां वै [illegible] नाध्रियन्त त एतात्पुरो-

ळाशानपश्यंताननुसवनं निरवपन्सवनानां धृत्यै ततो वै तानि तेषामध्रियन्त, इति ।

यानि प्रातःसवनमाध्यंदिनसवनतृतीयसवनानि सन्ति तानि त्रीणि देवानामर्थे नाध्रियन्त नैव धृतानि देवैरवरोद्धुमशक्यान्यासन् । ते देवास्तद्धारणहेतून्पश्च पुरोडाशान्दृष्ट्वा तान्प्रतिसवनं निरवपंस्तैः पुरोडाशैस्तुष्टानि सवनानि देवानामर्थे धृतान्यासन् ।

आख्यायिकया प्रशस्य पुरोडाशान्विधत्ते—

तद्यदनुसवनं पुरोळाशा निरुप्यन्ते सवनानामेव धृत्यै तथा हि तानि तेषामध्रियन्त, इति ।

तत्तस्माद्देवैर्निरुप्तत्वाद्यदि यजमानाः (नैः) प्रतिसवनं पुरोळाशा निरुप्येरंस्तेदा स निर्वापः सवनानां धारणाय भवति । तथा तेनैव हि प्रकारेण तानि सवनानि तेषां देवानामर्थे ध्रियन्तेऽतो मनुष्याणामपि निर्वाप एव धारणोपायः ।

इदानीं पुरोडाशशब्दं निर्वक्ति –

पुरो वा एतान्देवा अकृत यत्पुरोळाशास्तत्पुरोळाशानां पुरोळाशत्वम्, इति ।

यत्पुरोळाशाः सन्त्येतान्देवाः पुरो वै सोमाहुतिभ्यः पुरस्तादेवाकृत कृतवन्तस्तस्मापुरोडाशेति नाम संपन्नम् (दाशृ दान इति धातुः, पुरतो दीयमानं हविरित्यर्थः । यद्यप्यत्र धानादिषु हविष्षु चतुर्थ एव पुरोडाशस्तथाऽपि च्छत्रिन्यायेन धानादीनां सर्वेषां पुरोडाशत्वोपचारः । यद्वा पुरःशब्द एवं व्याख्येयः । सवनानां धारणार्थं देवा एतानि हवींषि दुर्गमाणि पुराण्यकुर्वतेति । यदि पुरस्ताद्यदि वा पुराणि सर्वथाऽपि पुरोडाशशब्दो निष्पद्यते ।

अथ पुरोडाशस्वरूपविशेषं निर्धारयितुं पूर्वपक्षमाह –

तदाहुरनुसवनं पुरोळाशान्निर्वपेदष्टाकपालं प्रातःसवन एकादशकपालं माध्यंदिने सवने द्वादशकपालं तृतीयसवने तथाहि

सवनानां रूपं तथा छन्दसामिति, इति ।

तत्तेषु पुरोडाशेषु पूर्वपक्षिण आहुः । प्रतिसवनं निर्वपणीयेषु पुरोडाशेषु क्रमेण कपालसंख्याऽष्टत्वादिरूपा द्रष्टव्या सवनानां रूपस्य तथाविधत्वात् । तच्च च्छन्दोद्वारेण द्रष्टव्यम । गायत्री त्रिष्टुब्जगती चेति च्छन्दांसि सवनानि ष्पादकानि गायत्रं प्रातःसवनं त्रैष्टुभं माध्यंदिन सवनं जागतं तृतीयसवनमिति श्रुत्यन्तरात् । तथा सति तत्तच्छन्दोगताक्षरसंख्यानुसारेण कपालसंख्या युक्तेति पूर्वपक्षः ।

तं निराकृत्य सिद्धान्तं दर्शयति -

तत्तन्नाऽऽहृत्यमैन्द्रा वा एते सर्वे निरु-प्यन्ते यदनुसवनं पुरोळाशास्तस्मा-त्तानेकादशकपालानेव निर्वपेत्, इति ।

पञ्चसु हविष्षु धानादिषु मध्ये चतुर्थस्य पुरोडाशस्यैन्द्रदेवताकत्वादैन्द्रश्चा न्यत्रैकादशकपाल एव प्रायेण विधीयत इति तत्प्रयत्नावगमादत्रापि त्रिष्वपि सवनेष्वैन्द्रान्पुरोडाशानेकादशकपालेनैव निर्वपेत् । शाखान्तरेऽपि विलोमत्व-दोषेण पूर्वपक्षं निराकृत्य सिद्धान्तोऽभिहितः -एकादशकपालानेव प्रातःसवने कुर्यादेकादशकपालान्माध्यंदिने सवन इत्यादि । आपस्तम्बस्तवन्यशाखाभेदमनुसृत्य पक्षद्वयमप्युदाहरति-' अष्टौ पुरोडाशकपालान्येकादश माध्यंदिने द्वादश तृतीय-सवने सर्वानैन्द्रानेकादशकपालाननुसवनमेके समामनन्ति ' इति ।

अथ तत्पुरोडाशशेषभक्षणे कंचित्पूर्वपक्षमुपन्यस्यति-

तदाहुर्यतो घृतेनानक्तं स्यात्ततः पुरो-ळाशस्य प्राश्नीयात्सोमपीथस्य गुप्त्यै घृतेन हि वज्रेणेन्द्रो वृत्रमहन्निति, इति ।

तत्सोमपानस्य रक्षणाय भवति । यस्मादिन्द्रो घृतमेव वज्रं कृत्वा तेन वृत्रं हतवांस्तस्मात्तस्य क्रूरत्वाद्घृतरहितं सकलं भक्ष्यमिति पूर्वपक्षिण आहुः ।

तं निराकृत्य सिद्धान्तं दर्शयति-

तत्तन्नाऽऽहृत्यं हविर्वा एतद्यदुत्पूतं सोमपीथो वा एष यदुत्पूतं तस्मात्तस्य यत एव कुतश्च प्राश्नीयात्स तो वा एताः स्वधा यजमा-

नमुपक्षरन्ति यदेतानि हवींष्याज्यं धानाः करम्भः परिवापः पुरोळाशः पयस्येति, इति ।

घृतरहितभाग एव भक्षणीय इति मतं नाऽऽदरणीयम् । उत्पवनसंस्कार रहितस्य घृतस्य वज्रत्वेऽपि यदुत्पूतं घृतं तद्धविरेव । किं च यदुत्पूतं तत्सोमपीथसदृशमेव । तस्मात्तस्य पुरोडाशस्य यतः कुतश्च घृतयुक्ताद्घृतरहिताद्वा यस्मात्कस्मादपि भागात्प्राश्नीयात् । आज्यं (ज्य) धानादीनि यानि हवींषि सन्ति ता एताः सर्वतः स्वधाऽऽज्यं तद्रूपा एव भूत्वा यजमानमुपक्षरन्ति स्रवन्ति । तस्मात्सर्वतः प्राशनमुपपन्नम् ।

वेदनं प्रशंसति-

सर्वत एवैनं स्वधा उपक्षरन्ति य एवं वेद ॥ २३ ॥ इति ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऐतरेयब्राह्मणभाष्येऽष्टमाध्याये पञ्चमः खण्डः ॥ ५ ॥ [२३] (५३)

विहितान्सवनीयपुरोडाशान्धानादिरूपान्प्रशंसति-

यो वै यज्ञं हविष्पङ्क्तिं वेद हविष्पङ्क्तिना यज्ञेन राध्नोति धानाः करम्भः परिवापः पुरोळाशः पयस्येत्येष वै यज्ञो हविष्पङ्क्तिर्हविष्पङ्क्तिना यज्ञेन राध्नोति य एवं वेद, इति ।

हविषां धानादिद्रव्यरूपाणां पङ्क्तिः समूहो यस्मिन्सोमयागे सोऽयं हविष्पङ्क्तिस्तादृशं यज्ञं यो वेद स तथैव तादृशेन यज्ञेन समृद्धो भवति । भृष्टा यवतण्डुला धानाः । तदाहाऽऽपस्तम्बः-' कपालानामुपधानकाले प्रथमकपालमन्त्रेण धानार्थं लाजार्थं कपाले अधिश्रित्य तण्डुलानोप्य धानाः करोति व्रीहीनोप्य लाजान्करोति पुरोडाशमधिश्रित्याऽऽमिक्षावत्पयस्यां करोत्युद्वासनकाले धाना उद्वास्य विभागमन्त्रेण विभज्यार्धा आज्येन संयौत्यर्धाः पिष्टानात्मावृता (?) सक्तून्करोति । मन्थं संयुतं करम्भ इत्याचक्षते लाजान्परिवाप इति न वै लाजेभ्यः स्तुवा(षा) न्संहरति ' इति । पुरोडाशः प्रसिद्धः । अन्ये धानाकरम्भपरिवापपयस्याशब्दा आपस्तम्बेन व्याख्याताः । एतैर्हविर्भिर्युक्तो यज्ञो हविष्पङ्क्तिः । हवि-

ष्पङ्क्तिनेत्यादिपुनर्वचनमुपसंहारार्थम् । यद्वा पूर्वं वेदनपूर्वकानुष्ठानप्रशंसेह तु वेदनमात्रप्रशंसा द्रष्टव्या । हविषां पञ्चसंख्यानां समूहरूपा या पङ्क्तिः सा शाखान्तरेऽप्यान्नाता—'ब्रह्मवादिनो वदन्ति नर्चा न यजुषा पङ्क्तिराप्यतेऽथ किं यज्ञस्य पाङ्क्तत्वमिति । धानाः करम्भः परिवापः पुरोळाशः पयस्या तेन पङ्क्तिराप्यते तद्यज्ञस्य पङ्क्ति (पाङ्क्त)त्वम् ' इति । अत्रार्थवादेन धानादीनां पुरोडाशद्रव्याणां विधिरुन्नेतव्यः ।

अनेनैव न्यायेनाक्षराणां पञ्चानां विध्युन्नयनं दर्शयति -

यो वै यज्ञमक्षरपङ्क्तिं वेदाक्षरपङ्क्तिना यज्ञेन राध्नोति सुमत्पद्गद् इत्येष वै यज्ञोऽक्षरपङ्क्तिरक्षरपङ्क्तिना यज्ञेन राध्नोति य एवं वेद, इति ।

पञ्चसंख्याकानामक्षराणां समूहोऽक्षरपङ्क्तिः सु, इत्येकमक्षरं मदिति द्वितीयमक्षरं पदिति तृतीयमक्षरं वगिति चतुर्थमक्षरं दे, इति पञ्चमक्षरं तान्येतान्यक्षराणि होतृजपादौ प्रयोक्तव्यानि । तथाच संप्रदायविद आहुः--

"एतद्धोतृजपाख्यस्य चाऽऽदितोऽक्षरपञ्चकम् ।
एकैकमक्षरं चात्र परस्य ब्रह्मणो वपुः ॥
सुपूजितं मत्प्रहृष्टं पत्सर्वव्यापि तच्च वक् ।
सर्वस्य वक्तृ ब्रह्मैव दे फलानां प्रदातृ तत्", इति ।

अन्यत्पूर्ववद्व्याख्येयम् ।

तथा पञ्चविधनाराशंसविध्युन्नयनं दर्शयति—

यो वै यज्ञं नराशंसपङ्क्तिं वेद नराशंसपङ्क्तिना यज्ञेन राध्नोति । ऐन्द्रं नराशंसं प्रातःसवनं ऐन्द्रानराशंसं माध्यंदिनं सवनं सकृन्नाराशंसं तृतीयसवनमेष वै यज्ञो नराशंसपङ्क्तिर्नराशंसपङ्क्तिना यज्ञेन राध्नोति य एवं वेद, इति ।

भक्षिताप्यायितानां सादितानां चमसानां नाराशंसशब्दः संज्ञा । अत्र उक्तमाचार्येणाऽऽप्यायितांश्चमसान्सादयन्ति ते नाराशंसा भवन्तीति । भक्षितेषु चमसेषु पुनः पूरणमाप्यायनम् । तथाविधाश्चमसाः प्रातःसवने द्विः प्रयुज्यन्ते

तथा माध्यंदिनसवनेऽपि तृतीयसवने तु सकृदेव । एवं पञ्चसंख्योपेतत्वान्नराशंसानां पङ्क्तिर्यज्ञे विद्यते ।

तथैव सवनपङ्क्तिं दर्शयति—

यो वै यज्ञं सवनपङ्क्तिं वेद सवनपङ्क्तिना यज्ञेन राध्नोति पशुरुपवसथे त्रीणि सवनानि पशुरनूबन्ध्य इत्येष वै यज्ञः सवनपङ्क्तिः सवनपङ्क्त्या यज्ञेन राध्नोति य एवं वेद, इति ।

परेद्युर्यक्ष्यमाणस्य यजमानस्य समीपे पूर्वेद्युर्देवतास्तदीयं यज्ञं प्रतीक्षमाणा वसन्ति तस्मादुप समीपे वसन्त्यस्मिन्दिवस इति पूर्वदिवसमुपवसथाख्ये पूर्वदिवसे यः पशुरग्नीषोमीयः सोऽप्यत्र सवनसमीपवर्तित्वात्सवनत्वेन गण्यते । प्रातःसवनादीनि तु त्रीणि प्रसिद्धान्येव सवनानि । सवनेभ्य ऊर्ध्वमनुष्ठेयोऽनूबन्ध्याख्यः पशुरपि पूर्ववत्सवनत्वेन गण्यते । अतः पञ्चानां सवनानां पङ्क्त्या समूहेन युक्तो यो यज्ञ एष एव सवनपङ्क्तिः । एवं हविष्पङ्क्तिप्रसङ्गेनाक्षरपङ्क्तिर्नराशंसपङ्क्तिः सवनपङ्क्तिश्चेत्येतावदभिहितम् । एतदेवाभिप्रेत्य तत्र तत्र पाङ्क्तो यज्ञ इति श्रूयते ।

अथ प्रकृतानां सवनीयपुरोडाशानां क्रमेण याज्या विधत्ते—

हरिवाँ इन्द्रो धाना अत्तु पूषण्वान्करम्भं सरस्वतीवान्भारतीवान्परिवाप इन्द्रस्यापूप इति हविष्पङ्क्त्या यजति, इति ।

हरिनामानौ द्वावश्वावस्य स्त इति हरिवानिन्द्रः । सोऽयं धाना अत्तु भक्षयतु । सेयं प्रथमहविषो याज्या । पोषकत्वात्पशवः पूषञ्छब्देनोच्यन्ते । तत्स्वामी देवः पूषण्वान्स्त्र तु करम्भमत्वित्यनुवर्तते । सेयं द्वितीयहविषो याज्या । सरस्वती वाक्सास्यास्तीति देवविशेषः सरस्वतीवान् । स एव भारतीवाञ्शरीरभरणाद्भरणः प्राणस्तस्य संबन्धिनी देहेऽवस्थितिर्भारती तद्युक्तो देवो भारतीवान् । अयं विशेषणद्वयोपेतो देवः परिवापः परिवापाख्यं हविरत्तु । इयं तृतीयस्य याज्या । इन्द्रस्यापूपः पुरोडाशः प्रिय इति शेषः । तथा सतीन्द्रोऽपूपमत्वित्यर्थादवगम्यते । सेयं चतुर्थहविषो याज्या । पञ्चमहविःस्वरूपायाः पयस्यायाश्चाखान्तरादत्रोपसंहर्तव्या । एवं हविष्पङ्क्त्या यजति हविष्पङ्क्तिविषयां याज्यां पठेदित्यर्थः ।

प्रथमयाज्यां व्याचष्टे-

ऋक्सामे वा इन्द्रस्य हरी, इति ।

ऋग्देवता सामदेवता चेत्युभयदेवतारूपाविन्द्रस्याश्वावतो हरिवानिति मन्त्रो-क्तिरित्यर्थः ।

द्वितीययाज्यां व्याचष्टे-

पशवः पूषाऽन्नं करम्भः, इति ।

पोषकत्वात्पशूनां पूषत्वं स्वादुपोषकत्वात्करम्भस्यान्नत्वमतः पशुस्वामिनः करम्भो योग्य इत्यर्थः ।

तृतीययाज्यां व्याख्यापूर्वं व्याचष्टे-

सरस्वतीवान्भारतीवानिति वागेव सरस्वती प्राणो भरतः, इति ।

अत्र सरस्वतीवान्भारतीवानिति व्याख्येयमनूद्य वागित्यादिना तद्व्याख्यानं क्रियते । वागेव सरस्वतीत्येतल्लोकप्रसिद्धं न त्वत्र किंचिदुक्तव्यमस्तीत्येवशब्द-स्यार्थः । शरीरभरणहेतुत्वात्प्राणो भरतशब्दवाच्यः । तदीयवृत्तिर्भारती तदुभयोपेतं मत्पत्ययस्यार्थ इति द्रष्टव्यम् ।

तृतीययाज्याया उत्तरार्धं चतुर्थयाज्यां चानूद्य व्याचष्टे-

परिवाप इन्द्रस्यापूप इत्यन्नमेव परिवाप इन्द्रियमपूपः, इति ।

परिवापशब्दवाच्यानां लाजानां मृदुत्वेनात्तुं सुकरत्वादन्नत्वम् । इन्द्रियवृद्धि हेतुत्वादपूपस्येन्द्रियत्वम् । अत्र हरिपूषादिविशेषणरूपदेवताभेदाद्याज्याभेदेऽपि यजनीयस्य विशेषस्येन्द्रस्यैकत्वादेकयाज्यात्वमभिप्रेत्य हविष्पङ्क्त्या यजतीत्येक-वचनमिति द्रष्टव्यम् ।

होतुरुक्तयाज्यावेदनं प्रशंसति-

एतासामेव तद्देवतानां यजमानं सायुज्यं सरू-पतां सलोकतां गमयति गच्छति श्रेयसः सायुज्यं गच्छति श्रेष्ठतां य एवं वेद, इति ।

य एवं वेदिता होता यजमानमिन्द्रादिदेवतानां सायुज्यं सहवासं सरूपतां समानशरीरत्वं सलोकतामेकलोकावस्थानं च प्रापयति । स्वयं च होता श्रेय-

सोऽतिप्रशस्तस्येन्द्रादेः सायुज्यं सहवासं प्राप्नोति भागाधिक्येन श्रेष्ठतां च प्राप्नोति ।

सवनीयपुरोडाशसंबन्धिनः स्विष्टकृतो याज्यां विधत्ते—

इन्द्रेऽग्ने वीहीत्यनुसवनं पुरो-
डाशः स्विष्टकृतो यजति, इति ।

हेऽग्न इदमस्माभिर्दत्तं हविर्वीहि भक्षय । एतामेव त्रिष्वपि सवनेषु याज्यां पठेत् ।

एतामेव प्रशंसति—

अवत्सारो वा एतेनाग्नेः प्रियं धामोपा-
गच्छत्स परमं लोकमजयत्, इति ।

अवत्सारनामकः कश्चिदृषिर्ह्यविरित्येतेन मन्त्रेणाग्निदेवतायाः प्रियं स्थानं प्राप्य तत ऊर्ध्वं ततोऽप्युत्कृष्टं लोकं जितवान् । अत्र सर्वत्र यजुःस्वरूपैव याज्या ।

तदेतन्मन्त्रवेदनं तत्पूर्वकमनुष्ठानं च प्रशंसति—

उपाग्नेः प्रियं धाम गच्छति जयति परमं लोकं
य एवं वेद यश्चैवं विद्वानेतया हविष्पङ्क्त्या
यजते यजतीति च यजतीति च, ॥२४ इति ।

यस्य विदुषः फलतया (? हविष्पङ्क्तिं स्वार्थमनुतिष्ठतो यजमानस्य परार्थं याज्यां पठतो होतुश्च फलं भवति । उभयविवक्षयाऽऽत्मनेपदपरस्मैपदप्रयोगः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऐतरेय-
ब्राह्मणऽभाष्येऽष्टमाध्याये षष्ठः खण्डः ॥ ६ ॥ (२४) [५४]

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकवीरबुक्कणसाम्रा-
ज्यधुरंधरसायणाचार्यकृतावैतरेयब्राह्मणभाष्ये
अष्टमोऽध्यायः ॥ ८ ॥

अथ नवमोऽध्यायः ।

अपोनप्त्रीयतच्छेष उपांश्वादिग्रहा अपि ।
सवनीयः पुरोडाशाः पवमानाय सर्पणम् ॥ १ ॥

इदानीमैन्द्रवायवादीन्द्विदेवत्यान्ग्रहान्विधातुमाख्यायिकामाह —

देवा वै सोमस्य राज्ञोऽग्रपेये न समपादयन्नहं प्रथमः पिबेयमहं प्रथमः पिबेयमित्येवाकामयन्त ते संपादयन्तोऽब्रुवन्हन्ताऽऽजिमयाम स यो न उज्जेष्यति स प्रथमः सोमस्य पास्यतीति तथेति त आजिमयुस्तेषामाजिं यतामभिसृष्टानां वायुर्मुखं प्रथमः प्रत्यपद्यताथेन्द्रोऽथ मित्रावरुणावथाश्विनौ, इति ।

पुरा कदाचिद्देवाः सोमस्याग्रपेये प्रथमपाने निमित्तभूते सति न समपादयन्संपादनं संपत्तिं न प्राप्ताः किंत्वहमेव प्रथमः पिबेयमिति सर्वेऽप्यकामयन्त सर्वे समयबन्धपुरःसरमाजिं धावनावधिं कंचिद्वृक्षं पाषाणमन्यद्वा किंचिदयाम प्रापयाम। स यो यः कश्चिदपि नोऽस्माकं मध्य उज्जेष्यति तस्मिन्धावन उत्कर्षेण जयं प्राप्स्यति स एक एव प्रथमो भूत्वा सोमस्य सोमं पास्यति । ते देवास्तथेत्यङ्गीकृत्याऽऽजिं धावनमर्यादामयुः प्राप्तवन्तः । आजिं यतां प्राप्नुवतामभिसृष्टानामभितः प्रवृत्तानां तेषां मध्ये वायुः प्रथमो भूत्वा मुखमवधेः संमुखं तं प्रत्यपद्यत । वायोः पृष्ठत इन्द्रस्तस्य पृष्ठतो मित्रावरुणौ तयोः पृष्ठतोऽश्विनावेवं क्रमेण सर्वे धावनं प्रारब्धवन्तः ।

तस्मिन्धावने वायोरिन्द्रस्य च परस्परं संवादं दर्शयति—

सोऽवेदिन्द्रो वायुमुद्यै जयतीति तमनु परापतत्सह नावथोज्जयावेति स नेत्यब्रवीदहमेवोज्जेष्यामीति तृतीयं मेऽथोज्जयावेति नेति हैवाब्रवीदहमेवोज्जेष्यामीति तुरीयं मेऽथोज्जयावेति तथेति तं तुरीयेऽत्या-

जैत तत्तुरीयभागिन्द्रेऽभवत्त्रिभाग्वायुः, इति ।

अयं वायुरुत्कर्षेण जयत्येवेति स इन्द्रोऽवेत्स्वमनसि ज्ञातवान्ज्ञात्वा च तं वायुमनु पृष्ठतः परापतत्सहसैवाधावत् । आगत्य चेदमुक्तवान्हे वायो नावावयोरुभयोः सह सोमपानमस्तु तवार्धं ममार्धम् । अथ तस्मात्कारणादावामुभौ सहैवोत्कर्षेण जयं प्रापवावेति । स वायुर्नेति निराकृत्याहमेक एवोज्जेष्यामीत्यब्रवीत् । ततः स इन्द्र एवमुवाच ममार्धं मा भूत्किं तु तृतीयं त्रिषु भागेषु भागोऽस्तु तव द्वौ भागौ । अथैवं सति सहैवाऽऽवामुज्जयावेति । पुनरपि नेत्येव निराकृत्य स वायुरहमेवोज्जेष्यामीत्यब्रवीत् ततः स इन्द्रः पुनरप्यूवाच तृतीयो मा भूत्किं तु मे तुरीयमस्तु चतुर्थभागोऽस्तु तव त्रयो भागा अथैवं सत्यावामुभावुज्जयावेति । ततो वायुरङ्गीकृत्य तमिन्द्रं तुरीये चतुर्थभागेऽत्यार्जतातिशयेन स्थापितवान् । तस्मात्कारणादिन्द्रश्चतुर्थांशभागभूत् । वायुरंशत्रयभागवान् ।

अथ विजयक्रमेण सोमपानक्रमं दर्शयति—

तौ सहैवेन्द्रवायू उदजयतां सह प्रियावस्तां सहाश्विनौ त एषामेते यथोज्जितं भक्षा इन्द्रवाय्वोः प्रथमोऽथ मित्रावरुणयोरथाश्विनोः, इति ।

इन्द्रवायू उभौ सहैवोदजयतां धावतामवधिदेशं प्राप्नुताम् । तयोः पृष्ठतो मित्रावरुणौ परस्परं सह प्राप्नुतः । तयोः पृष्ठतोऽश्विनौ सह प्राप्नुतः । एषां देवानां यथोज्जितं तत्तज्जयमनतिक्रम्य त एते भक्षाः सोमपानरूपा अभवन्निन्द्रवाय्वोः प्रथमं सोमपानं ततो मित्रावरुणयोः सोमपानं ततोऽश्विनोः सोमपानमित्येवं द्विदेवत्यग्रहाणां क्रमो व्यवस्थितः ।

इदानीमैन्द्रवायवग्रहं विधत्ते

स एष इन्द्रतुरीयो ग्रहो गृह्यते यदैन्द्रवायवः, इति ।

योऽयमिन्द्रवायुदेवताको ग्रहः स एष इन्द्रतुरीय इन्द्रस्य तुरीयभागो यस्मिन्ग्रहे सोऽयमिन्द्रतुरीयस्तादृशं ग्रहं गृह्णीयात् ।

उक्तं भागविशेषं मन्त्रसंवादेन दृढयति- No28725

तदेतदृषिः पश्यन्नभ्यनूवाच निरत्वाँ

इन्द्रसारथिरिति, इति ।

तवेतच्चतुर्थभागत्वं दिव्यदृष्ट्या पश्यन्कश्चिन्मन्त्रात्मक ऋषिस्तेन मन्त्रेणाभ्यनूवाच साकल्येन तदुक्तवान् । नियुत्वानित्यादिको मन्त्रः । नियुत्वच्छब्दो वायुसंबन्धिनां मन्त्राणां वाचकः । अध वायुं नियुतः सश्चतस्वा इत्यादिमन्त्रेष्वभिधानात् । नियुतो यस्य वायोः सन्ति सोऽयं नियुत्वानिन्द्रः सारथिर्यस्य वायोः सोऽयमिन्द्रसारथिः । अत्र सारथित्वाभिधानादिन्द्रस्य चतुर्थभागमात्रिर्दर्शिता ।

उक्तमर्थं लोकव्यवहारेण द्रढयति--

तस्माद्धाप्येतर्हि भरताः सत्वनां वित्तिं प्रयन्ति तुरीये हैव संग्रहीतारे वदन्तेऽमुनैवानूकाशेन यदद इन्द्रः सारथिरिव भूत्वोदजयत् ॥२५॥ इति ।

यस्मात्सारथिरूपस्येन्द्रस्य चतुर्थभागः पूर्वं प्राप्तस्तस्माद्ध तत एव कारणादेतर्ह्यपीदानीमपि भरता भरः सङ्ग्रामस्तं तन्वन्ति विस्तारयन्तीति भरता योद्धारः सत्वनां सारथीनां वित्तिं वेतनां जीवितरूपां प्रयन्ति प्रकर्षेण संपादयन्ति । ते च संग्रहीतारः सारथयस्तुरीये हैव युद्धलब्धस्य द्रव्यस्य चतुर्थभाग एव वदन्तेऽस्माकमेतावदुचितमिति कथयन्ति । तदौचित्ये युक्तिमाह । अमुनैव पूर्वोक्तेनैवानूकाशेन दृष्टान्तेन । स एव दृष्टान्तो यदद इत्यादिना स्पष्टीक्रियते । यस्मात्कारणादिन्द्रो वायोः सारथिरिव भूत्वाऽश्वतुर्थांशरूपं सोमात्मकं धनमुदजयत्तस्माल्लोकेऽपि तथैव प्रवृत्तमित्यर्थः ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऐतरेयब्राह्मणभाष्ये नवमाध्याये प्रथमः खण्डः ॥ १ ॥ २५) [५५]

अथैन्द्रवायवमैत्रावरुणाश्विनाख्यान्दिदेवत्यग्रहान्प्राणरूपत्वेन प्रशंसति--

ते वा एते प्राणा एव यद्दिदेवत्याः, इति ।

तेषां त्रयाणां प्राणरूपत्वं विभज्य दर्शयति--

वाक्च प्राणश्चेन्द्रवायवश्चक्षुश्च मनश्च मैत्रावरुणः श्रोत्रं चाऽऽत्मा चाऽऽश्विनः, इति ।

उच्छ्वासादिवृत्तिभेदवर्ती वायुः प्राणः । वागादिनिन्द्रियाणि । तेषां प्राणरूपत्वाभावेऽपि प्राणाधीनवृत्तिलाभत्वेन पूर्वत्र प्राणा इति निर्देशः कृतः ।

इममर्थं वाजसनेयिन आमनन्ति–' त एतस्यैव सर्वे रूपमभवंस्तस्मादेत एतेनाऽऽख्यायन्ते प्राणाः ' इति ।

तत्र वायुरूपे त्वमुख्यः प्राणो वाक्नेत्येतदुभयमैन्द्रवायवग्रहस्वरूपं चक्षुर्मनश्चातीन्द्रियद्वयो मैत्रावरुणग्रहस्वरूपं श्रोत्रं जीवात्मा चेत्युभयमाश्विनग्रहस्वरूपं वक्ष्यमाणयाज्यानुवाक्योपयोगित्वेन प्राणरूपतया प्रशस्यैन्द्रवायवग्रहस्य याज्यानुवाक्ये विधातुं पूर्वपक्षमाह–

तस्य हैतस्यैन्द्रवायवस्याप्येकेऽनुष्टुभौ पुरोनुवाक्ये कुर्वन्ति गायत्र्यौ याज्ये, इति ।

योऽयमैन्द्रवायवग्रहः पूर्वमुक्तस्तस्यैके ह याज्ञिका अनुष्टुप्छन्दस्के ऋचौ पुरोनुवाक्ये कृत्वा गायत्रीछन्दस्के ऋचौ याज्ये इति कुर्वन्ति । अपिशब्दोऽनर्थकः यदाऽपि कुर्वन्तीत्येवं पूर्वपक्षानुवादार्थो वा ।

तेषां पूर्वपक्षिणामभिप्रायं दर्शयति–

वाक्च वा एष प्राणश्च ग्रहो यदैन्द्रवायवस्तदपि च्छन्दोभ्यां यथायथं क्लृप्स्ये(कल्प्स्ये)ते इति, इति ।

योऽयमैन्द्रवायवग्रहः स एष प्राणात्मकस्त्वेन्द्रो वाचो व्याकरणरूपायाः कर्ता तामिन्द्रो मध्यतोऽवक्रम्य व्याकरोदिति श्रुत्यन्तरादत इन्द्रद्वारा वाग्रूपत्वम् । यः प्राणः स वायुरिति श्रुत्यन्तरात्प्राणरूपत्वम् । तावुभावपि यथोक्ताभ्यामनुष्टुब्गायत्रीछन्दोभ्यां यथायथं स्वस्वसंबन्धमनतिक्रम्य क्लृप्स्ये (कल्प्स्ये) ते कल्पितौ भविष्यतः । वाग्वा अनुष्टुविति श्रुत्यन्तरादनुष्टुप्छन्दसो वाग्रूपत्वम् । प्राणो वा गायत्रीति श्रुत्यन्तराद्गायत्र्याः प्राणरूपत्वम् । अत्र मन्त्रविशेषाः शाखान्तरे द्रष्टव्याः । सोऽयं पूर्वपक्षिणामभिप्रायः ।

पूर्वपक्षनिराकरणपूर्वकसिद्धान्तं दर्शयति–

तत्तन्नाऽऽदृत्यं व्यृद्धं वा एतद्यज्ञे क्रियते यत्र पुरोनुवाक्या ज्यायसी याज्यायै यत्र वै याज्या ज्यायसी तत्समृद्धं यो यत्र समे यस्यो तत्कामाय तथा कुर्यात्प्राणस्य च

वाचश्चात्रैव तदुपाप्तम्, इति ।

तत्पूर्वपक्षमतं नाऽऽदरणीयम् । तत्र हेतुरुच्यते । यास्मिन्कर्मणि याज्यायाः सकाशात्पुरोनुवाक्याऽक्षरैरभ्यधिका तत्कर्म व्यृद्धं समृद्धिरहितम । पूर्वपक्षिण श्चात्र न्यूनां याज्यां पुरोनुवाक्यामाधिकां कुर्वन्ति । तस्मादेतन्मतमयुक्तम् । यत्र वै यस्मिंस्तु कर्मणि पुरोनुवाक्यायाः सकाशादभ्यधिका याज्या भवति तत्कर्म समृद्धम् । अपि च यत्र कर्मणि याज्यानुवाक्ये समे भवतस्तदपि कर्म समृद्धम् । साम्यपक्षेऽन्योऽपि गुणोऽस्ति तत्कथमिति तदुच्यते । प्राणस्य च वाचश्च प्राण-वाचोर्मध्ये यस्य यस्य वस्तुनः कामायापेक्षितफलसिद्धये तत्तथा कुर्यात्तेन पूर्वोक्त प्रकारेणानुष्टुब्गायत्रीजन्यमनुष्ठानं पूर्वपक्षी कुर्वीत तत्सर्वं विफलम् । त (अ) त्रैव याज्यानुवाक्ययोः साम्यानुष्ठानं एवोपाप्तं शीघ्रं प्राप्तं भवति । तस्मात्साम्यपक्ष एवाऽऽदरणीय इत्यर्थः ।

साम्यपक्षे पूर्वपक्ष्यभिप्रेतं प्रयोजनं कथं सिध्येदित्याशङ्क्याऽऽह –

वायव्या पूर्वा पुरोनुवाक्यैन्द्रवायव्युत्तरैवं याज्ययोः सा या वायव्या तया प्राणं कल्पयति वायुर्हि प्राणोऽथ यैन्द्रवायवी तस्यै यदैन्द्रं पदं तेन वाचं कल्पयति वाग्घ्यन्द्रश्चुपो तं काममाप्नोति यः प्राणे च वाचि च न यज्ञे विषमं करोति ॥ २६ ॥ इति ।

द्वयोः पुरोनुवाक्ययोर्मध्ये या पूर्वा पुरोनुवाक्या सा वायव्या वायुदेवताका वायवा याहि दर्शत (१-१ २) इत्यस्यामृचि वायोः श्रवणात् । या तूत्तरा पुरोनुवाक्या सेयमैन्द्रवायवीन्द्रवायू इमे सुताः (४-१ ४) इत्यस्यामृचीन्द्रवाय्योः श्रवणात् । एवं याज्ययोरपि द्रष्टव्यम । उभयोर्याज्ययोर्मध्ये या पूर्वा सा वायव्या । अग्मं पिबा मधूनाम् (४ ४६-१) इत्यस्यामृचि सुतं वायो दिविष्टिष्विति वायोः श्रवणात् । योत्तरा याज्या सेन्द्रवायवी । शतेना नो अभिष्टिभिः (४ ४६ २) इत्यस्यामृचि नियुत्वाँ इन्द्रसारथिरितीन्द्रः श्रूयते वायो सुतस्येति वायुरपि श्रूयते । तस्मादियमैन्द्रवायवी । एवं सति या वायव्या पुरोनुवाक्या याज्या च तया प्राणः कल्पितः स्वव्यापारसमर्थो भवति यः प्राणः स वायुरिति श्रुत्यन्तरेण वायुप्राणयोरैक्यस्य पूर्वपक्षिणाऽप्यङ्गीकर्तव्यत्वात् । अथ यैन्द्रवायवी पुरोनुवाक्या या याज्या वा

तस्यै तस्यामुभयविधायां यदैन्द्रमिन्द्रसंबन्धिषदं विद्यते तेन पदेन वाचं कल्पयति समर्थां करोति । हि यस्मात्कारणाद्वागैन्द्रीन्द्रस्य व्याकरणकर्तृत्वात् । तस्माद्वाचासामर्थ्यं भवति । एवमनुतिष्ठन्पुरुषो वाक्पाणयोर्यः कामोऽस्ति तं प्राप्नोति यज्ञे च च्छन्दःसाम्यं विषममनुष्ठानं न करोति ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऐतरेय ब्राह्मणभाष्येऽष्टमाध्याये द्वितीय खण्डः ॥ २ ॥ (२६ [५६]

अथ द्विदेवत्यानामैन्द्रवायवमैत्रावरुणाश्विनग्रहाणां त्रयाणां ग्रहणहोमयोः पात्रवैषम्यं विधत्ते—

प्राणा वै द्विदेवत्या एकपात्रा गृह्यन्ते तस्मात्प्राणा एकनामानो द्विपात्रा हूयन्ते तस्मात्प्राणा द्वंद्वम्, इति ।

द्वे देवते युग्मरूपे येषां ग्रहाणां ते द्विदेवत्याः । इन्द्रश्च वायुश्चेत्येकं युग्मं मित्रश्च वरुणश्चेति द्वितीयं युग्मं यावश्विनौ तौ तृतीयं युग्मम् । त एते द्विदेवत्यग्रहाः प्राणा वै, इन्द्रियरूपा एव, वाग्वा ऐन्द्रवायवश्चक्षुर्मैत्रावरुणः श्रोत्रमाश्विन इति श्रुत्यन्तरात् । ते च ग्रहा एकपात्रा ग्रहीतव्या इन्द्रवाय्वोरेकस्मिन्पात्रे ग्रहणं मित्रावरुणयोरेकस्मिन्नश्विनोरेकस्मिन्निति । यस्मात्प्राणरूपाणां ग्रहाणामेकपात्रत्वं तस्माद्वाक्चक्षुःश्रोत्ररूपाः प्राणा एकनामानः प्राणा इत्येवमेतेषां नाम । ते च ग्रहा होमकाले द्विपात्रा होतव्यास्तत्तद्ग्रहणपात्रेणाध्वर्युर्जुहोति प्रतिप्रस्थाता पात्रान्तरेण जुहोतीति । यस्माद्धोमकाले पात्रद्वयं तस्माच्चक्षुरादयः प्राणाः स्वस्वगोलकेषु द्वंद्वं द्वौ द्वौ भूत्वा वर्तन्ते । अयमर्थः श्रुत्यन्तरेण प्रश्नोत्तराभ्यामाम्नातः—' ब्रह्मवादिनो वदन्ति, कस्मात्सत्यादेकपात्रा द्विदेवत्या गृह्यन्ते द्विपात्रा हूयन्त इति, यदेकपात्रा गृह्यन्ते तस्मादेकोऽन्तरतः प्राणो द्विपात्रा हूयन्ते तस्माद्द्वौ द्वौ बहिष्ठाः प्राणाः ' इति । होमकाले द्विपात्रत्वमापस्तम्बेन स्पष्टीकृतम्—' हविर्धानं गच्छन्संप्रेष्यति वायव इन्द्रवायुभ्यामनुब्रूहीत्युपयामगृहीतोऽसि वाऽक्षसदसीत्यादित्यपात्रेण प्रतिप्रस्थाता द्रोणकलशादैन्द्रवायवस्य प्रतिनिग्राह्यं गृहीत्वा न सादयत्यैन्द्रवायवमादायाध्वर्युर्द्रोणकलशाच्च

परिप्लवया(य)राजानमुभौ निष्क्रम्य दक्षिणतोऽवस्थाय दक्षिणं परिधिसंधिमन्ववहृत्याध्वरो यज्ञोऽयमस्तु देवा इति परिप्लवयाऽऽघारमाघारयत्याश्राव्य प्रत्याश्राविते संप्रेष्यति वायव इन्द्रवायुभ्यां प्रेष्य वषट्कृते जुहोत्येवमुत्तराभ्यां ग्रहाभ्यां प्रचरते' इति ।

अथ होतुर्ग्रहशेषभक्षप्रतिग्रहमन्त्रं विधत्ते-

येनैवाध्वर्युर्यजुषा प्रयच्छति
तेन होता प्रतिगृह्णाति, इति ।

अध्वर्योः प्रदानमन्त्र आपस्तम्बेन दर्शितः-'ग्रहमध्वर्युरादाय क्षिप्रꣳ होतारमनुद्रुत्य मयि वसुः पुरो वसुरिति ग्रहꣳ होत्रे प्रयच्छत्येतेनैव होता प्रतिगृह्य दक्षिण ऊरावासाद्य हस्ताभ्यां निगृह्याऽऽस्ते' इति ।

अथ होतुः समन्त्रकं भक्षणं विधत्ते-

एष वसुः पुरुवसुरिह वसुः पुरुवसु-
र्मयि वसुः पुरूवसुर्वाक्या वाचं मे
पाहीत्यैन्द्रवायव भक्षयतीति, इति ।

एष ऐन्द्रवायवग्रहो वसुर्निवासहेतुः पुरूवसुः प्रभूतनिवासहेतुः । कस्मिँल्लोके निवासहेतुरित्याकाङ्क्षानिवृत्त्यर्थमिह वसुरित्यादिकमुच्यते । अस्मिन्नेव मनुष्यलोके निवासं करोति । तत्रापि प्रभूतनिवासं करोति । कस्मिन्पुरुषे ग्रहस्य निवास इत्याकाङ्क्षानिवृत्त्यर्थं मयि वसुरित्यादिकमुच्यते । मयि होतरि निवसति । तदाऽपि प्रभूतनिवासं करोति । स तादृशो ग्रहो वाक्या वाचं पालयति । हे ग्रह मे वाचं पालयेत्यनेन मन्त्रेणैन्द्रवायवशेषं भक्षयेत् ।

तस्य मन्त्रस्यावशिष्टभागं पठति-

उपहूता वाक्सह प्राणेनोप मां वाक्सह प्रा-
णेन ह्वयतामुपहूता ऋषयो दैव्यासस्तनूपा-
वानस्तन्वस्तपोजा उप मामृषयो दैव्यासो
ह्वयन्तां तनूपावानस्तन्वस्तपोजा इति, इति ।

प्राणेन सह वाग्देवता मयोपहूताऽनुज्ञाता तस्मात्प्राणसहिता सा वाग्देवता मामुपह्वयतामनुजानातु तथर्षय उपहूता मयाऽनुज्ञाताः । कीदृशा ऋषयो दैव्यासो देवेषु भवास्तनूपावानोऽस्मच्छरीरपालकास्तन्वः शरीरस्यास्मदीयस्य

संबन्धिन इति शेषः । तपोजाः पूर्वजन्मानुष्ठिततपसो जाताः । यस्मादीदृशा ऋषयो मयाऽनुज्ञातास्तस्मात्तेऽपि यथोक्तविशेषणा मामुपह्वयन्तामनुजानन्तु इत्येष मन्त्रशेषः ।

अस्य शेषस्य तात्पर्यं दर्शयति –

प्राणा वा ऋषयो दैव्यासस्तनूपावानस्तन्व-
न्वस्तपोजास्तानेव तदुपह्वयते, इति ।

यथोक्तविशेषणाविशिष्टा ऋषयः प्राणस्वरूपा एव । तस्मात्तेन मन्त्रशेषपाठेन तानेव प्राणाननुजानाति ।

मैत्रावरुणग्रहस्य समन्त्रकं शेषभक्षणं मन्त्रशेषव्याख्यानं च दर्शयति –

एष वसुर्विदद्वसुरिह वसुर्विदद्वसुर्मयि वसुर्विदद्व-
सुश्चक्षुष्पाश्चक्षुर्मे पाहीति मैत्रावरुणं भक्षयत्युप-
हूतं चक्षुः सह मनसोप मां चक्षुः सह मनसा ह्वय-
तामुपहूता ऋषयो दैव्यासस्तनूपावानस्तन्वस्त-
पोजा उप मामृषयो दैव्यासो ह्वयन्ता तनूपावान-
स्तन्वस्तपोजा इति प्राणा वा ऋषयो दैव्यासस्त-
नूपावानस्तन्वस्तपोजास्तानेव तदुपह्वयते, इति ।

एष मैत्रावरुणग्रहो विदद्वसुर्ज्ञानपूर्वकनिवासहेतुरन्यत्सर्वं पूर्ववत् ।

आश्विनग्रहशेषस्य समन्त्रकं भक्षणं मन्त्रशेषव्याख्यानं च दर्शयति–

एष वसुः संयद्वसुरिह वसुः संयद्वसुर्मयि वसुः
संयद्वसुः श्रोत्रपाः श्रोत्रं मे पाहीत्याश्विनं भक्ष-
यत्युपहूतं श्रोत्रं सहाऽऽत्मनोप मां श्रोत्रं
सहाऽऽत्मना ह्वयतामुपहूता ऋषयो दैव्यास-
स्तनूपावानस्तन्वस्तपोजा उपमामृषयो दैव्या-
सो ह्वयन्तां तनूपावानस्तन्वस्तपोजा इति
प्राणा वा ऋषयो दैव्यासस्तनूपावानस्तन्वस्त-

पोजास्तानेव तदुपह्वयते, इति ।

एष आश्विनग्रहः संयद्वसुर्नियतनिवासः । अथवा वसुशब्दः सर्वत्र धनपरत्वेन व्याख्येयः । मन्त्रशेषस्य पृथक्पाठो व्याख्येयत्वप्रदर्शनार्थः ।

भक्षणे कंचिद्विशेषं विधत्ते-

पुरस्तात्प्रत्यञ्चमैन्द्रवायवं भक्षयति तस्मात्पुरस्तात्प्राणापानौ पुरस्तात्प्रत्यञ्चं मैत्रावरुणं भक्षयति तस्मात्पुरस्ताच्चक्षुषी सर्वतःपरिहारमाश्विनं भक्षयति तस्मान्मनुष्याश्च पशवश्च सर्वतो वाचं वदन्तीं शृण्वन्ति ॥ २७ ॥ इति ।

प्राङ्मुखो होता स्वस्य पुरस्तात्सन्तमैन्द्रवायवं प्रत्यञ्चं स्ववक्त्रसमीपवर्तिनं कृत्वा भक्षयेत् । अत एव पुरुषस्य प्राणापानवायू पुरोभागे संपन्नौ । मैत्रावरुणेऽपि समानन्यायः । आश्विनं तु सर्वतःपरिहारं सर्वासु दिक्षु परितो हरणं कृत्वा शिरः प्रदक्षिणीकृत्येत्यर्थः । यस्माच्छ्रोत्ररूपस्याऽऽश्विनस्य परितो हरणं तस्माच्छ्रोत्रेण सर्वतः शृण्वन्ति पुरतः पृष्ठतः पार्श्वयोर्वाचं वदन्तीं स्वार्थमभिदधानां वाचं शृण्वन्ति । यथा होतुरीदृशं भक्षणं तथाऽध्वर्योरपि शाखान्तरे श्रुतम्- ' वाग्वा ऐन्द्रवायवश्चक्षुर्मैत्रावरुणः श्रोत्रमाश्विनः पुरस्तादैन्द्रवायवं भक्षयति तस्मात्पुरस्ताद्वाचा वदति पुरस्तान्मैत्रावरुणं तस्मात्पुरस्ताच्चक्षुषा पश्यति सर्वतःपरिहारमाश्विनं तस्मात्सर्वतः श्रोत्रेण शृणोति ' इति ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऐतरेयब्राह्मणभाष्ये नवमाध्याये तृतीयः खण्डः ॥ ३ ॥ (२७) [५७]

अथ द्विदेवत्यग्रहेषु होत्रा प्रयोक्तव्यानां मन्त्राणां मध्येऽनुच्छ्वासं विधत्ते-

प्राणा वै व्विदेवत्या अनवानं व्विदेवत्यान्यजेत्प्राणानां संतत्यै प्राणानामव्यवच्छेदाय, इति ।

द्विदेवत्यग्रहेषु याज्यां पठन्होताऽनवानं यजेन्मन्त्रमध्य उच्छ्वासमकृत्वा यजेत् । द्विदेवत्यानां प्राणरूपत्वादयं नैरन्तर्यपाठः प्राणानां संततावस्थापनाय भवति । ततस्तेषां व्यवच्छेदो न भवति । संततिरव्यवच्छेदश्चेत्येक एवार्थोऽ-

न्वयव्यतिरेकाभ्यामुच्यते । इतरेषु ग्रहेषु याज्यान्ते वषट्कारेण सकृद्धुत्वा सोम स्याग्ने वीहीत्यनुवषट्कारेण पुनर्यजन्ति ।

अतः प्रसक्तमनुवषट्कारमन्त्रं निषेधति —

प्राणा वै द्विदेवत्या न द्विदेव-
त्यानामनुवषट्कुर्यात्, इति ।

विपक्षे बाधपुरःसरं स्वपक्षं निगमयति –

यदाद्विदेवत्यानामनुवषट्कुर्यादसंस्थितान्प्राणा-
न्संस्थापयेत्संस्था वा एषा यदनुवषट्कारो
य एनं तत्र ब्रूयादसंस्थितान्प्राणान्समति-
ष्ठिपत्प्राण एनं हास्यतीति शश्वत्तथा स्यात्त-
स्मान्न द्विदेवत्यानामनुवषट्कुर्यात्, इति ।

यदि होता द्विदेवत्येष्वनुवषट्कारमन्त्रं पठेत्तदानीमसंस्थितानसमाप्तानुपर-तान्प्राणान्संस्थापयेदुपरतान्कुर्यात् । योऽयमनुवषट्कार एषैव संस्था ग्रहस्य समाप्तिः । अतो ग्रहरूपाणां प्राणानामप्युपरतिः स्यात् । तत्रानुवषट्कारकाले यः कोऽप्येनं होतारं ब्रूयाच्छपेत् । कथमिति तदुच्यते । अनुपरतान्प्राणानुपर-तानकरोत्तस्मादेनं होतारं प्राणः परित्यजतीति । ततोऽपरावितो होतुरवश्यं तथा भवेत् । तस्मादेतेष्वनुषट्कारमन्त्रं न पठेत् ।

अथैन्द्रवायवे कंचिद्विशेषं वक्तुं प्रश्नमुत्थापयति–

तदाहुर्द्विरागूर्य मैत्रावरुणो दविः प्रेष्यति सकृदा-
गूर्य होता दविर्वषट्करोति का होतुरागूरिति, इति ।

आगूःशब्देन प्रतिज्ञाऽभिधीयते । मैत्रावरुणो द्विरागूर्य द्विः प्रतिज्ञाय द्विः प्रेष्यति । द्वावस्य प्रैषमन्त्रौ होता यक्षद्वायुमग्ने गामित्येको होता यक्षदिन्द्रवायू अर्हन्तेति द्वितीयः । तयोरुभयोरप्यादावयं होता यक्षदिति द्विः प्रतिजानाति । द्वयोर्मन्त्रयोरन्ते होतर्यज होतर्यजेति द्विः प्रेष्यति । होता स्वग्नं पिबा मधुनामित्यादिके द्वे याज्ये पठितुमादौ ये यजामह इति सकृदेव प्रतिजानीते । द्वयोर्याज्ययोरन्ते वौषड्वौषडिति द्विर्वषट्करोति । तच्च न्यायेन द्वितीयमन्त्रादावपि ये यजामह इत्यागूःकरणमपेक्षितम् । तच्च न क्रियते तस्माद्धोतुर्द्वितीययाज्यादावागूः का नाम स्यादिति प्रश्नः ।

द्वितीययाज्यादौ मा भूदेवाऽऽगूरित्येतदुत्तरं विपक्षबाधपूर्वकं दर्शयति

प्राणा वै द्विदेवत्या आगूर्वज्रस्तद्यदत्र होताऽन्तरेणाऽऽगुरेताऽऽगुरा वज्रेण यजमानस्य प्राणान्वीयाद्य एनं तत्र ब्रूयादागुरा वज्रेण यजमानस्य प्राणान्व्यगात्प्राण एनं हास्यतीति शश्वत्तथा स्यात्तस्मात्तत्र होताऽन्तरेण नाऽऽगुरेत, इति ।

द्विदेवत्यग्रहाः प्राणरूपा येयमागूर्ये यजामह इति प्रतिज्ञा सा वज्ररूपा । तथा सत्यत्र कर्मण्यन्तरेण याज्ययोर्मध्ये यदि होताऽऽगुरेत प्रतिजानीयात्तदानीमागूःस्वरूपेण याज्ययोर्मध्ये यदि होताऽऽगुरेत प्रतिजानीयात्तदानीमागू.स्वरूपेण वज्रेण यजमानस्य प्राणान्वीयाद्विगतान्कुर्यात् । तत्र तस्यामागुरि क्रियमाणायां यः कोऽप्येनं होतारं शपेत् । कथमिति तदुच्यते । आगुरा वज्रेण होता यजमानस्य प्राणान्व्यगाद्विगतानकरोत् । तस्मात्प्राण एनं यजमानं होतारं वा परित्यजतीति । तेन कृतः शापोऽवश्यं तथैव स्यात्तस्मात्तत्र तयोर्याज्ययोरन्तरेण मध्ये होता नाऽऽगुरेत ।

तत्रैव युक्त्यन्तरमाह-

अथो मनो वै यज्ञस्य मैत्रावरुणो वाग्यज्ञस्य होता मनसा वा इषिता वाग्वदति यां ह्यन्यमना वाचं वदत्यसुर्या वै सा वागदेवजुष्टा तद्यदेवात्र मैत्रावरुणो द्विरागुरते सैव होतुरागूः ॥२८॥ इति ।

अपि च मैत्रावरुणो यज्ञस्य मनस्थानीयो होता तु वाक्स्थानीयः । लोके हि मनसा प्रेरिता वाग्वक्तव्यं ब्रूते । यस्त्वन्यमनस्को यां वाचं वदति तत्र सा वागसुरेभ्यस्तामसेभ्यो हिता तेषामसंबद्धप्रलापप्रियत्वात् । न त्वसौ वाक्सात्त्विकानां देवानां प्रिया तस्मान्मनःपूर्विकैव वाग्वक्तव्या । तथा सत्यत्र मनोरूपो मैत्रावरुणो द्विरागुरत इति यदस्ति सैव तत्प्रेषितस्य वाग्रूपस्य होतुरागूर्द्वितीया भविष्यति । तस्माद्याज्ययोर्मध्ये होता नाऽऽगुरेत ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऐतरेय-ब्राह्मणभाष्ये नवमाध्याये चतुर्थः खण्डः ॥ ४ ॥ (२८) [५८]

ऋतुग्रहयागान्विधत्ते—

प्राणा वा ऋतुयाजास्तद्ऋतुयाजैष्टयति
प्राणानेव तद्यजमाने दधति, इति ।

मधुमाधवादय ऋतुदेवा यत्रेज्यन्ते त एव ऋतुयाजास्ते च प्राणस्वरूपाः । प्राणशब्देन प्राणापानव्यानास्त्रयोऽपि विवक्षिताः । तैर्ऋतुयाजैरनुतिष्ठेयुस्तेन प्राणानेवं यजमाने स्थापयन्ति ।

ऋतुग्रहाश्च द्वादशसंख्याकास्तत्राऽऽद्येषु षट्सु कंचिद्विशेषं विधत्ते—

षड्ऋतुनेति यजन्ति प्राण-
मेव तद्यजमाने दधति, इति ।

अध्वर्युणा प्रेषितो मैत्रावरुणः प्रैषसूक्तगतैर्मन्त्रैः क्रमेण होत्रादीन्प्रेष्यति तेन प्रेषिता होत्रादय ऋतुना सोममित्येवं यजेयुः । एतेषां षण्णामृतुयाजानां प्राण-स्वरूपत्वाद्धोत्रादयः षडपि यजमाने प्राणं स्थापयन्ति ।

सप्तममारभ्य दशमान्ते विशेषं विधत्ते—

चत्वार ऋतुभिरिति यजन्त्यपा-
नमेव तद्यजमाने दधति, इति ।

अध्वर्युणा प्रेषितो मैत्रावरुणः प्रैषसूक्तगतैः सप्तमादिभिश्चतुर्भिर्मन्त्रैर्होत्रादी-न्क्रमेण चतुरः प्रेष्यति । त ऋतुभिः सोममिति बहुवचनान्तप्रयोगेण चत्वा-रोऽपि यजेयुस्तेषां चतुर्णामृतुयाजानामपानवायुस्वरूपत्वात्तद्यागेनापानमेव यजमाने स्थापयन्ति ।

एकादशद्वादशयोर्विशेषं विधत्ते—

द्विर्ऋतुनेत्युपरिष्टाद्व्यानमेव
तद्यजमाने दधति, इति ।

अध्वर्युप्रेषितो मैत्रावरुणः प्रैषसूक्तगताभ्यामेकादशद्वादशाभ्यां मन्त्राभ्यां प्रेष्यति । तेन प्रेषितौ द्वावध्वर्युयजमानावृतुना सोममित्येवमेकवचनान्तप्रयोगेण यजेतामन्त्ययोर्द्वयोर्यागयोर्व्यानस्वरूपत्वात्तद्यागेन व्यानमेव यजमाने सर्वेऽप्यृत्विजः स्थापयन्ति । अनेनैव क्रमेण मैत्रावरुणं प्रत्यध्वर्योः प्रैष आपस्तम्बेन दर्शितः—'ऋतुना प्रेष्यति त्रिष्वाद्येष्वध्वर्युः संप्रेष्यत्येवं प्रतिप्रस्थाता पात्रयोर्मुखे पर्यावृ-त्यर्तुभिः प्रेष्यति द्वयोरध्वर्युरेवं प्रतिप्रस्थाता पुनः पर्यावृत्यर्तुना प्रेष्येति सकृद्-

ध्वर्युरेवं प्रतिप्रस्थाता ' इति । तदेकवचनान्तबहुवचनान्तैकवचनान्तैर्ऋतुशब्दैरुदाहृतः प्रैषस्तैत्तिरीयब्राह्मणे संगृह्याऽऽम्नातः—' ऋतुना प्रेष्यति षट्कृत्व आह षड्वा ऋतव ऋतूनेव प्रीणाति ' इति ।

तानेतानृतुयाजान्प्रशंसति—

स वा अयं प्राणस्त्रेधा विहितः प्राणोऽपानो व्यान इति तद्यदृतुन ऋतुभिर्ऋतुनेति यजन्ति प्राणानां संतत्यै प्राणा। [illegible] य, इति।

शरीरमध्ये स्थितस्य प्राणवायोः प्राणापानव्यानाख्यास्त्रिभिर्वृत्तिभिस्त्रिविधत्वाद्दृतुशब्दप्रयोगेण त्रिविधेन यजमानस्य प्राणाः संतता भवन्ति न तु व्यवच्छिद्यन्ते ।

तेष्वृतुयाजेष्वनुवषट्कारं निषेधति—

प्राणा वा ऋतुयाजा नर्तुयाजानामनु वषट्कुर्यादसंस्थिता वा ऋतव एकैक एव, इति ।

लोके वसन्ताद्यृतवोऽसंस्थिता असमाप्ता अनुपरता एकस्यैकस्यानन्तरमेव द्वितीय इत्येवमेकैकक्रमेण वसन्तग्रीष्मवर्षाशरद्धेमन्तशिशिराख्याः प्रत्येकं मासद्वयेन द्वादशमासात्मका घटीयन्त्रवत्पुनः पुनरावर्तन्ते । अतो न कदाचिदप्यृतूनामुपरतिरस्ति ।

विपक्षबाधकपूर्वकं स्वपक्षमुपसंहरति—

यदृतुयाजानामनु वषट्कुर्यादसंस्थितानृतून्संस्थापयेत्संस्था वा एषा यदनुवषट्कारो य एनं तत्र ब्रूयादसंस्थितानृतून्समतिष्ठिपदद्दुःषमं भावेष्यतीति शश्वत्तथा स्यात्तस्मान्नर्तुयाजानामनु वषट्कुर्यात् ॥२९॥इति ।

दुःषमं रोगदारिद्र्यादिरूपं विषमं किंचिदस्वास्थ्यम् । अन्यत्पूर्ववद्व्याख्येयम् ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऐतरेय ब्राह्मणभाष्ये नवमाध्याये पञ्चमः खण्डः ॥ ५ ॥ [२९] (५९)

सवनीयपशुपुरोडाशप्रचारादूर्ध्वं तदङ्गमिडोपह्वानमवस्थाप्य द्विदेवत्यग्रहप्रचारः कृतः । तत ऊर्ध्वं तद्ग्रहशेषभक्षणमपि प्राप्तम् ।

तत्रेळोपह्वानग्रहशेषभक्षणयोः किं पूर्वं किमपरमिति क्रमस्य ज्ञातुमशक्यत्वाच्च क्रमं विधत्ते—

> प्राणा वै द्विदेवत्याः पशव इळा द्विदेवत्यान्भक्षयित्वेळामुपह्वयते पशवो वा इळा पशूनेव तदुपह्वयते पशून्यजमाने दधाति, इति ।

द्विदेवत्यानां वागादिप्राणरूपत्वं पूर्वमेवोक्तमिडादेवता च गौर्वा अस्यै शरीरमिति श्रुतेः पशुरूपा । तत्रैवं स्थिते प्रथमतो द्विदेवत्यग्रहशेषान्भक्षयित्वा पश्चादिळोपह्वानं कुर्यात् । तथा सतीडायाः पशुरूपत्वेन पशुनेवोपहूतवान्भवति । तांश्च पशून्स्वकीयैः प्राणैः सुस्थिते यजमाने स्थापयति । अयमेवार्थो व्यतिरेकमुखेन(ण) श्रुत्यन्तरे प्रविष्ठापितः—'प्राणा वा एते यद्द्विदेवत्याः पशव इळा यदिडां पूर्वां द्विदेवत्येभ्य उपह्वयेत पशुभिः प्राणान्वर्दधीत प्रमायुकः स्याद्द्विदेवत्यान्भक्षयित्वेडामुपह्वयते प्राणानेवाऽऽत्मन्धित्वा पशूनुपह्वयते' इति । इत्थं द्विदेवत्यभक्षणस्य पूर्वभावित्वमिळोपह्वानस्य पश्चाद्भावित्वं च व्यवस्थापितम् । तदेतदिडापात्रे भागमवदाय क्रियमाणमुपह्वानम् ।

या तु होतुर्हस्ते संपादिताऽवान्तरेडा तत्प्राशनस्य होतृचमसभक्षणस्य च पौर्वापर्यं विचार्य निश्चिनोति—

> तदाहुरवान्तरेळां पूर्वां प्राश्नीया३त्, होतृचमसं भक्षये३त्, इति । अवान्तरेळामेव पूर्वां प्राश्नीयादथ होतृचमसं भक्षयेत्, इति ।

विचारार्थं प्लुतिद्वयम् । अवान्तरेळाप्राशनं पूर्वभावि चमसभक्षणं पश्चाद्भावीति निर्णयः ।

> यद्वाव द्विदेवत्यान्पूर्वान्भक्षयति तेनास्य सोमपीथः पूर्वो भक्षितो भवति तस्मादवान्तरेळामेव पूर्वां प्राश्नीयादथ होतृचमसं भक्षयेत्तदुभयतोऽन्नाद्यं परिगृह्णाति

सोमपीथाभ्यामन्नाद्यस्य परिगृहीत्यै, इति ।

द्विदेवत्यानां भक्षणं पूर्वभावीति यदस्ति तेन सोमपानरूपस्य भक्षस्येडाप्राश-नात्पूर्वत्वं सिध्यति । तत इळां प्राश्य होतृचमसभक्षणे सत्युपरिष्टादपि सोमभक्षण-सिद्धेरिडाया उभयतः पार्श्वद्वयेऽपि सोमपानाभ्यामयं होताऽन्नाद्यं परिगृह्णाति । तच्च यजमानस्यान्नाद्यपरिग्रहाय भवति ।

द्विदेवत्यग्रहशेषस्य बिन्दोर्होतृचमसे प्रक्षेपं विधत्ते-

प्राणा वै द्विदेवत्या आत्मा होतृचमसो द्विदेवत्यानां संस्रवान्होतृचमसे सम्भवनयत्यात्मन्येव तद्धोता प्राणान्समवनयते सर्वायुः सर्वायुत्वाय, इति ।

संस्रवा बिन्दवस्तत्प्रक्षेपेण द्विदेवत्यरूपान्प्राणानात्मन्येव शरीरे होतृचमसरूपे होता प्रक्षिपति । प्राणानामवस्थापनात्स्वयं सर्वायुरपमृत्युरहितो भवति । तद्यज-मानस्य सर्वायुत्वाय संपद्यते ।

वेदनं प्रशंसति-

सर्वमायुरेति य एवं वेद ॥ ३० ॥ इति ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऐतरेयब्राह्मण-भाष्ये नवमाध्याये षष्ठः खण्डः ॥ ६ ॥ ३०) [६०]

अथ तूष्णींशंसविधानार्थमितिहासमाह -

देवा वै यदेव यज्ञेऽकुर्वंस्तदसुरा अकुर्वंस्ते समावद्वीर्या एवाऽऽसन्न व्यावर्तन्त ततो वै देवा एतं तूष्णींशंसमपश्यंस्तमेषामसुरा नान्व-वायंस्तूष्णींसारो वा एष यत्तूष्णींशंसः, इति ।

देवाः पुरा स्वकीये यज्ञे यदेवाङ्गमन्वतिष्ठन्नसुरा अप्येवेक्ष्य तदेवान्वतिष्ठन् । तदा ते देवाश्चासुराश्च परस्परं समावद्वीर्यास्तुल्यसामर्थ्या एवाभवन्नेकस्य वर्गस्य सामर्थ्याधिक्यमितरस्य तु न्यूनमित्येवं व्यावृत्तिं न प्राप्ताः । ततो देवाः सामर्थ्याधिक्यलक्षणव्यावृत्तिहेतुं वेदेष्वन्विच्छन्त एवं वक्ष्यमाणं तूष्णींशंसं तदुपायत्वेन दृष्टवन्तः । सर्वेष्वपि शस्त्रेष्वृच्यृचः पठ्यन्ते । अस्मिंस्तु शस्त्रे न पठ्यन्त इति तूष्णींशंसत्वम् । ऋक्पाठराहित्येन गूढमेषां देवानां तं तूष्णींशं-

समसुरा नान्ववायन्नानुगतवन्तः । एतदनुष्ठानमविज्ञाय न कृतवन्त इत्यर्थः । योऽयं तूष्णींशंस एष तूष्णींसारो वा ऋक्पाठराहित्यलक्षणात्तूष्णींभाव एवास्मिञ्शस्त्रे शस्तः । असुराणां तु निष्फलं तूष्णींमवस्थानमिति निश्चयः ।

अस्य तूष्णींशंसस्यासुरविनाशहेतुत्वं दर्शयति—

देवा वै यं यमेव वज्रमसुरेभ्य उदयच्छंस्तं तमेषामसुराः प्रत्यबुध्यन्त ततो वै देवा एतं तूष्णींशंसं वज्रमपश्यंस्तमेभ्य उदयच्छंस्तमेषामसुरा न प्रत्यबुध्यन्त तमेभ्यः प्राहरंस्तेनैनानप्रतिद्वेनाघ्नंस्ततो वै देवा अभवन्पराऽसुराः, इति ।

देवा असुरविनाशार्थमायुधरूपं मन्त्ररूपमाभिचाररूपं वा यं यं वज्रं प्रत्युक्तवन्त एषां देवानां तं तं वज्रमसुराः प्रत्यबुध्यन्त तदा तदा प्रतीकारं कुर्वन्ति । ततो देवा एतं तूष्णींशंसं वज्रत्वेन दृष्ट्वा तदसुरविनाशार्थं प्रयुक्तवन्तः । असुरास्तु देवानां तं तूष्णींशंसमज्ञात्वा प्रतीकारं न कृतवन्तः । ततो निर्विघ्नेन देवास्तं तूष्णींशंसं वज्रमसुराणामुपरि प्राहरंस्तद्विनाशार्थं प्रयुक्तवन्तः । असुरैरविज्ञातेन तेनैवासुरान्हतवन्तः । ततो वै देवा विजयिनोऽभवन्मुख्येष्वसुरेषु हतेष्ववशिष्टा असुराः पराभूताः ।

एतदेदनं प्रशंसति—

भवत्यात्मना पराऽस्य द्विषन्भ्रातृव्यो भवति य एवं वेद, इति ।

अथोपाख्यानमुखनैव तूष्णींशंसस्य स्वरूपं दर्शयति—

ते वै देवा विजितिनो मन्यमाना यज्ञमतन्वत तमेषामसुरा अभ्यन्यज्ञवेशसमेषां करिष्याम इति तान्समन्तमेवोदारान्परियत्ताऽदपश्यंस्तेऽब्रुवन्संस्थापयामेमं यज्ञं यज्ञं नोऽसुरा मा वधिषुरिति तथेति तं तूष्णींशंसे संस्थापयन्भूरग्निर्ज्योतिर्ज्योतिरग्निरित्याज्यपरउगे संस्थापयन्निन्द्रो ज्योतिर्भुवो ज्योतिरिन्द्र इति

निष्केवल्यमरुत्वतीये संस्थापयन्त्सूर्यो ज्योतिर्ज्योतिः स्वः सूर्य इति वैश्वदेवाग्निमारुते संस्थापयंस्तमेवं तूष्णींशंसे संस्थापयंस्तमेवं तूष्णींशंसे संस्थाप्य तेनारिष्टेनोद्दचमाश्नुवत, इति ।

मुख्यानामसुराणां हतत्वात्ते देवा विजितिनो विजयवन्तो वयमिति मन्यमाना यज्ञं विस्तारितवन्तः । एषां देवानां यज्ञमभिलक्ष्यासुरास्तत्र गताः । केनाभिप्रायेणेति तदुच्यते । एषां देवानां यज्ञवेशसं यज्ञविघातं करिष्याम इति तदभिप्रायः । ततो देवाः समन्तमेव पुरतः पृष्ठतः पार्श्वयोश्च समागतानुदारानुद्धतान्परियत्तानत्यन्तसंनिधानुदपश्यन्नुदङ्मुखाः सन्तो दृष्टवन्तः । दृष्ट्वा च परस्परमिदमब्रुवन्निमं यज्ञं संस्थापयामः शीघ्रं समापयामस्तथा सति नोऽस्मदीयं यज्ञमसुरा गा वधिषुर्मा विनाशयन्तु विलम्बे सति विनाशयिष्यन्ति तन्मा भूदिति । तद्वचनं परस्परमङ्गीकृत्य स्वकीयं तं यज्ञं तूष्णींशंसे संस्थापयञ्शीघ्रं समापितवन्तः । यद्वा तूष्णींशंसस्य वज्ररूपेण रक्षकत्वाद्रक्षार्थं तस्मिन्स्थापितवन्तः । कोऽयं तूष्णींशंस इति स उच्यते । भूरग्निर्ज्योतिर्ज्योतिरग्निरित्येष नवाक्षरात्मको मन्त्र एकस्तूष्णींशंसभागः । आज्यं प्रउगं चेत्युभे प्रातःसवनकालीने शस्त्रे तदुभयमप्युक्ते तूष्णींशंसभागे स्थापितवन्तः । इन्द्रो ज्योतिर्भुवो ज्योतिरिन्द्र इत्येष दशाक्षरात्मको मन्त्रो द्वितीयस्तूष्णींशंसभागः । निष्केवल्यं मरुत्वतीयं चेत्युभे माध्यंदिनसवकालीने शस्त्रे तदुभयमिन्द्रो ज्योतिरित्यस्मिंस्तूष्णींशंसभागे स्थापितवन्तः । सूर्यो ज्योतिर्ज्योतिः स्वः सूर्य इत्येष नवाक्षरात्मको मन्त्रस्तृतीयस्तूष्णींशंसभागः । वैश्वदेवमाग्निमारुतं चेत्युभे तृतीयसवनकालीने शस्त्रे तदुभयं सूर्यो ज्योतिरित्यादिके तूष्णींशंसभागे स्थापितवन्तः । तं सवनत्रयेगतैः षड्भिः शस्त्रैरुपेतं यज्ञेवमुक्तेन प्रकारेण तूष्णींशंसे स्थापितवन्त इत्येवमुक्तार्थस्योपसंहारः पुनस्तमेवमित्यादिः । उक्तार्थानुवादषड्विधशस्त्रसंस्थापनादूर्ध्वमरिष्टेन हिंसारहितेन तेन यज्ञेनोद्दचमुत्तमामूर्ध्वं यज्ञसमाप्तिमाश्नुवत प्राप्तवन्तः ।

इत्थमाख्यायिकामुखेन तूष्णींशंसस्वरूपमभिधाय तदनुष्ठानं विधत्ते-

स तदा वाव यज्ञः संतिष्ठते यदा होता तूष्णींशंसं शंसति, इति ।

यस्मिन्काले होता तमिमं मंत्रं शंसेत्तदैव स यज्ञो निर्विघ्नः समाप्यते । तस्माद्धोत्रा तच्छस्त्रं शंसनीयम् । तत्प्रकार आश्वलायनेन दर्शितः—' सुमत्पद्गन्दे पिता मातरिश्वाऽच्छिद्रा पदाऽधादच्छिद्रोक्था कवयः शंसन्सोमो विश्वविन्नीथा निनेषद्बृहस्पतिरुक्थामदानि शंसिषद्वागायुर्विश्वायुर्विश्वमायुः कः इदं शंसिष्यति स इदं शंसिष्यतीति जपित्वाऽनभिहिंकृत्य शौंसावोमित्युच्चैराहूय तूष्णींशंसं शंसदुपांशु समणवमसंतन्वन्नेष आहावः प्रातःसवने शस्त्रादिषु ' इति । अस्यायमर्थः । ऋतुपात्रभक्षणानन्तरं होतुर्मुखत आसीनोऽध्वर्युः पराङ्मुखः सन्नावर्तते तदानीं होता सुमदित्यादि स इदं शंसिष्यतीन्तं मन्त्रं जपित्वाऽभिहिंकारमकृत्वा शौंसावोमित्यनेव मन्त्रेणाध्वर्युमुच्चैराहूय मूरश्चिरित्यादिकं प्रणवसहितमुपांशु पठेत्प्रणवेन सहासंततमविच्छेदनं कुर्यात् । एष शौंसावोमितिमन्त्रोऽध्वर्योराह्वानरूपत्वादाहाव इत्युच्यते । स च प्रातःसवने शस्त्रादिषु प्रवर्तत इति ।

उक्तं तूष्णींशंसनं प्रशंसति—

स य एनं शस्ते तूष्णींशंस उप वा वदेदनु वा व्याहरेत्तं ब्रूयादेष एवैतामार्तिमारिष्यति प्रातर्वाव वयमद्येमं शस्ते तूष्णींशंसं संस्थापयामस्तं यथा गृहानितं कर्मणाऽनुसमियादेवमेवैनमिदमनुसमिम इति स ह वाव [illegible] य एवं विद्वान्संशस्ते तूष्णींशंस उप वा वदत्यनु वा व्याहरति तस्मादेवं विद्वान्संशस्ते तूष्णींशंसे नोपवदेन्नानुव्याहरेत् , ॥३१॥ इति ।

होत्रा तूष्णींशंसे शस्ते सत्येनं होतारं स उपवदेद्वाऽनुव्याहरेद्वा यः कोऽप्यन्यः पुरुषो निन्देच्छपेद्वा । उपवादो निन्दाऽनुव्याहारः शापः । तदानीमयं होता निन्दितारं शप्तारं वा ब्रूयात् । कथं ब्रूयादिति तदुच्यते । यो निन्दिता शप्ता वाऽस्त्येष एव निन्दारूपां शापरूपां वाऽऽर्तिं विनाशमारिष्यति प्राप्स्यति न त्वहं प्राप्स्यामि । तत्र हेतुरुच्यते । प्रातर्वाव प्रातःसवन एव वयं होतारोऽद्यास्मिन्दिवसेऽस्माभिः शस्ते तूष्णींशंसे तमिमं यज्ञं संस्थापयामः

समाप्नयामो यथा लोके गृहानितं स्वकीयान्गृहान्प्राप्तमविधिं कर्मणाऽऽविध्यस-त्कारस्वरूपेणानुसमियादानुकूल्येन सम्यक्प्राप्नुयादुपचरेदित्यर्थः । एवमेवमपीदं तूष्णीं शंसानुष्ठानं कृत्वैनं यज्ञमनुसमिम आनुकूल्येन सम्यक्प्राप्नुम उपचराम इत्यर्थः । एष एवेत्यादिकोऽनुसमिम इत्यन्तो निन्दाशापपरिहारार्थो मन्त्रः । तं होता ब्रूयात् । तस्मिन्नुक्ते सति यः पुमान्स्वयं विद्वानेव संस्तूष्णींशंसस्य शंसनादूर्ध्वं निन्दति शपति वा स एव तामार्तिं प्राप्नोति । तस्मात्कारणादेवमुक्तार्थं विद्वान्पुरुषस्तूष्णींशंसपाठादूर्ध्वं होतारं न निन्देन्नापि शपेत् ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऐतरेय-ब्राह्मणऽभाष्ये नवमाध्याये सप्तमः खण्डः ॥ ७ ॥ (३१) [६१]

अथ प्रकारान्तरेण तूष्णींशंसं प्रशंसति—

चक्षूंषि वा एतानि सवनानां यत्तूष्णींशंसो भूरग्निर्ज्योतिर्ज्योतिरग्निरिति प्रातःसवनस्य चक्षुषी इन्द्रो ज्योतिर्भुवो ज्योतिरिन्द्र इति माध्यंदिनस्य सवनस्य चक्षुषी सूर्यो ज्योतिर्ज्योतिः स्वः सूर्य इति तृतीयसवनस्य चक्षुषी, इति ।

यत्तूष्णींशंसोऽस्त्येतान्येव तद्भवानि पदानि त्रयाणां सवनानां चक्षुःस्थानीयानि । कथमेतदिति तदेव स्पष्टी क्रियते भूरग्निर्ज्योतिरिति प्रथमस्य तूष्णींशंसपादस्य पूर्वो भागः । स च प्रातःसवनस्य दक्षिणचक्षुःस्थानीयः । ज्योतिरग्निरित्ययमुत्तरो भागो वामचक्षुःस्थानीयो भूलोकवर्ती योऽग्निः स एव गोलकद्वये प्रकाशक इत्यर्थः । इन्द्रो ज्योतिरित्ययं द्वितीयस्य पूर्वो भागो माध्यंदिनस्य सवनस्य दक्षिणं चक्षुः । भुवो ज्योतिरित्ययमुत्तरो भागो वामचक्षुरन्तरिक्षलोकवर्ती परमैश्वर्ययुक्तो वायुर्गोलकद्वये भासक इत्यर्थः । सूर्यो ज्योतिरित्येष तृतीयस्य पूर्वभागस्तृतीय-सवनस्य दक्षिणं चक्षुः । ज्योतिः स्वः सूर्य इत्ययमुत्तरो भागो वामचक्षुः स्वर्लोकवर्ती सूर्यो गोलकद्वये भासक इत्यर्थः ।

फलं प्रशंसति—

चक्षुष्मद्भिः सवनै राध्नोति चक्षुष्मद्भिः सवनैः स्वर्गं लोकमेति य एवं वेद, इति ।

राधिरिह लोके समृद्धिः ।

तूष्णींशंसस्य चक्षुःस्वरूपत्वमुपपादयति—

चक्षुर्वा एतद्यज्ञस्य यत्तूष्णींशंस एका सती व्याहृतिर्द्वेधोच्यते तस्मादेकं सच्चक्षुर्द्वेधा, इति ।

यद्यपि भूरित्येषैव व्याहृतिस्तथाऽपि तद्योगादग्निर्ज्योतिरित्यपि पदद्वयं व्याहृतित्वेनोच्यते । सेयं व्याहृतिरेकैव सत्यारोहावरोहाभ्यां द्वेधोच्यते । यस्मादेवं तस्माच्चक्षुरिन्द्रियमप्येकमेव सद्गोलकद्वये द्वेधा वर्तते । तस्माच्चक्षुष्ट्वं युक्तम् ।

पुनरपि प्रकारान्तरेण प्रशंसति—

मूलं वा एतद्यज्ञस्य यत्तूष्णींशंसो यं कामयेताना-यतनवान्स्यादिति नास्य यज्ञे तूष्णींशंसं शंसेदु-न्मूलमेव तद्यज्ञं पराभवन्तमनु पराभवति, इति ।

यं यजमानमुद्दिश्य होता द्वेष्यमेवं कामयेतानायतनवान्स्वर्गसाधनरूपेणाऽऽयतनेनाऽऽश्रयेण रहितोऽयं यजमानः स्यादिति तदानीमस्य द्विषस्य यजमानस्य यज्ञे तूष्णींशंसं होता न शंसेत् । तथा सति वृक्षमूलवद्यज्ञमूलत्वेनावस्थितस्य तूष्णींशंसस्य पाठाभावादयं यज्ञो मूलरहितः पराभवति विनश्यति । तमनु यजमानोऽपि विनश्यति । तदेवं द्वेष्यस्य विनाशहेतुत्वेन प्रशंसा कृता ।

पुनरप्यृत्विजो होतुरनुकूलत्वेन प्रशंसति—

तदु वा आहुः शंसेदेवापि वैतदृत्विजेऽ-हितं यद्धोता तूष्णींशंसं न शंसत्यृत्विजि हि सर्वो यज्ञः प्रतिष्ठितो यज्ञे यजमानस्त-स्माच्छंस्तव्यः शंस्तव्यः ॥३२॥ इति ।

तदु वै तत्रैव तूष्णींशंसविषये ब्रह्मवादिन आहुः । किमिति तदुच्यते । यद्यपि यजमाने प्रीतिरहितो होता तथाऽपि शंसेदेव । अपि वेति पूर्वोक्तापेक्षया पक्षान्तरोपन्यासार्थः । होता न शंसतीति यदस्ति तदेतदृत्विजे होत्रेऽप्यहितं भ्रष्टे यज्ञे दक्षिणाया अलाभात् । यस्मादृत्विजि सर्वो यज्ञः प्रतिष्ठित-

स्तस्माद्यज्ञयजमानयोः प्रतिष्ठाद्वारा होतुर्हितत्वेनायं तूष्णींशंसः शंस्तव्यः । अभ्यासोऽध्यायसमाप्त्यर्थः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऐतरेय-ब्राह्मणभाष्ये नवमाध्यायेऽष्टमः खण्डः ॥ ८ ॥ (३२) [६२]

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकवीरबुक्कभूपालसाम्रा ज्यधुरंधरसायणाचार्यकृतावैतरेयब्राह्मणभाष्ये नवमोऽध्यायः ॥ ९ ॥

अथ दशमोऽध्यायः ।

ऋतुयाजा द्विदेवत्यास्तद्विशेषफला स्तुतिः ॥
तूष्णींशंसप्रशंसा च नवमाध्यायचोदना ॥ १ ॥

अथाऽऽहावादयो वक्तव्यास्तिहावं निविदं सूक्तं च विधत्ते—

ब्रह्म वा आहावः क्षत्त्रं निविद्धिदसूक्तमाह्वय-तेऽथ निविदं दधाति ब्रह्मण्येव तत्क्षत्त्रमनुनियु-नक्ति निविदं शस्त्वा सूक्तं शंसति क्षत्त्रं वै निवि-द्धिदसूक्तं क्षत्त्र एव तद्विशमनुनियुनक्ति, इति ।

शोंसावोमित्यनेन मन्त्रेण शंसनकाले होताऽध्वर्युमाह्वयति सोऽयमाहावः । अग्निर्देवेद्ध इत्यादिभिर्द्वादशभिर्वक्ष्यमाणैः पदैर्युक्ता तत्समूहरूपा निवित् । प्र वो देवायाग्नय (३-१३-१) इत्यादिकं सप्तर्चं सूक्तम् । तदेतत्त्रयं क्रमेण ब्राह्मण-क्षत्त्रियवैश्यरूपं तत्र ब्राह्मणरूपत्वेन प्रथममाह्वयते मन्त्रेणाध्वर्योराह्वानं कुर्यात् । अथानन्तरं क्षत्त्रियरूपत्वेन निविदं दधात्यग्निर्देवेद्ध इत्यादिपदसमूहं दद्यात्तथा सति ब्रह्मण्येव ब्राह्मणजातावेव क्षत्त्रं क्षत्त्रियजातिमनुनियुनक्ति । प्रथमतो ब्राह्मणजातिः पश्चात्क्षत्त्रियजातिरित्येवं नियोगः कृतो भवेत् । तां निविदं शस्त्वा पश्चात्प्र वो देवायेतिसूक्तं शंसेत् । तथा सति क्षत्त्रियजातिरूपायां निविदि वैश्य-जातिरूपं सूक्तमनुनियुनक्त्यानुकूल्येन पश्चादवस्थापयति । यः पूर्वमुक्तस्तूष्णींशंसो ये च निवित्सूक्ते तदेतत्त्रयमाज्यनामकशस्त्रस्य रूपम् । तदुक्तं संप्रदायविद्भिः— " तूष्णींशंसनिवित्सूक्तैराज्यशस्त्रं त्रिपर्वकम् " इति ।

अथ कंचिदभिचारप्रयोगं विधत्ते–

यं कामयेत क्षत्त्रेणैनं व्यर्धयानीति मध्य
एतस्यै निविदः सूक्तं शंसेत्क्षत्त्रं वै निवि-
द्धिदसूक्तं क्षत्त्रेणैवैनं तद्व्यर्धयति, इति ।

येयं द्वादशपदात्मिका निविदस्ति तस्या मध्ये सूक्तं शंसने सति क्षत्त्रियजातिरूपाया निविदः खण्डितत्वादेनं यजमानं क्षत्त्रियजात्या व्यर्द्धं वियुक्तं विरोधिनं करोति । अतो यजमानमुद्दिश्य होत्रा यत्कामिनं तत्सिध्यतीत्युक्तं भवति ।

अभिचारान्तरं विधत्ते–

यं कामयेत विशैनं व्यर्धयानीति मध्य
एतस्य सूक्तस्य निविदं शंसेत्क्षत्त्रं वै
निविद्धिदसूक्तं विशैवैनं तद्व्यर्धयति, इति ।

प्र वो देवायेत्यस्य सूक्तस्य वैश्यस्थानीयस्य मध्ये निविदः शंसने सति वैश्यजातेः खण्डितत्वात्तद्विरोधो यजमानस्य भवति ।

प्रतिकूलं प्रयोगद्वयं विधायानुकूलं प्रयोगं विधत्ते–

यमु कामयेत सर्वमेवास्य यथापूर्वमृजु-
क्लृप्तं स्यादित्याह्वयेताथ निविदं दध्या-
दथ सूक्तं शंसेत्सो सर्वस्य क्लृप्तिः, इति ।

यमु यं तु यजमानं प्रति । पूर्वोक्तस्य द्वेष्यस्य यजमानस्य व्यावृत्त्यर्थं उशब्दः । अस्य यजमानस्य सर्वमेव ब्राह्मणक्षत्त्रियवैश्यजातिरूपं यथापूर्वमुक्तमजातेः पूर्वमनतिक्रम्य ऋजुक्लृप्तं सम्यक्संपादितं स्यादिति कामनायां शौंसावोमित्याह्वः प्रथमस्ततोऽग्निर्देवेद्ध इति निवित्तः प्र वो देवायेति सूक्तं शंसेत् । सो सैवोक्तानुष्ठितिरेव सर्वस्य जातित्रयस्य क्लृप्तिः समीचीनकल्पना भवति ।

अथ निविदः प्रशंसितुमाह–

प्रजापतिर्वा इदमेक एवाग्र आस सोऽकामयत
प्रजायेय भूयान्स्यामिति स तपोऽतप्यत स

वाचमयच्छत्स संवत्सरस्य परस्ताद्याहरद्द्वादश-कृत्वो व्दादशपदा वा एषा निविदेतां वाव तां निविदं व्याहरत्तां सर्वाणि भूतान्यन्वसृज्यन्त, इति ।

इदमिदानीं दृश्यमानं जगदग्रे स्वोत्पत्तेः पुरा प्रजापतिरीश्वर एक एवाऽऽस वै । स चाकामयताहमेव प्रजायेय प्रजारूपेणोत्पद्येय । तथा सति पूर्वस्माद्-द्वितीयरूपाद्भूयानतिप्रभूतः स्यामिति कामयित्वा स प्रजापतिः सृष्टिसाधनं तपः कृतवान् । तस्मिंस्तपसि वाचमयच्छन्मौनव्रतं कृतवान् । तथा कृत्वा संवत्स-रादूर्ध्वं द्वादशकृत्वो वाचमुच्चारितवान् । सेयमुच्चारिता वागेषा द्वादशपदोपेता निवित्संपन्ना । तामेतामेव निविदं प्रजापतिर्व्याहृतवान् । तां निविदमनु तत्सा-मर्थ्यात्सर्वाणि भूतान्यन्वसृज्यन्त ।

उक्तार्थं दृढयितुं कंचिन्मन्त्रमुदाहरति—

तदेतदृषिः पश्यन्नभ्यनूवाच सं पूर्वया निविदा कव्य-ताऽऽयोरिमाः प्रजा अजनयन्मनूनामिति, इति ।

तदेतत्प्रजापतेः सर्जनं दिव्यदृष्ट्या पश्यन्कुत्सनामको महर्षिर्मन्त्रेणाभ्यनू-वाच । स पूर्वयेत्यादिर्मन्त्रः । स प्रजापतिः पूर्वया प्रथमं प्रादुर्भूतया निविदा द्वादशपदरूपया कव्यता कवित्वं शब्दस्रष्टृत्वमायोरागतवान्प्राप्तवानित्यर्थः । तत ऊर्ध्वं मनूनां वैवस्वतादीनां संबन्धिनीरिमा ब्राह्मणक्षत्रियादिरूपाः प्रजा अजनय-दित्ययं मन्त्रः पूर्वोक्तमेवार्थं ब्रूते ।

निविदं प्रशस्य तदनुष्ठानं प्रशंसति—

तद्यदेतां पुरस्तात्सूक्तस्य निविदं दधाति प्रजात्यै, इति ।

यस्मात्प्रजापतिनैवं कृतं तस्माद्यदि होता सूक्तस्य पुरस्तादेतां निविदं दध्या-त्तदा सा निविद्यजमानस्य प्रजात्यै प्रजोत्पादनाय संपद्यते ।

वेदनं प्रशंसति ।

प्रजायते प्रजया पशुभिर्य एवं वेद ॥३३॥ इति ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऐतरेय-ब्राह्मणभाष्येऽष्टमाध्याये द्वितीय खण्डः ॥ १ ॥ (३३) [६]

द्वादशपदोपेताया निविदः प्रथमं पदं विधत्ते

अग्निर्देवेद्ध इति शंसत्यसौ वा अग्निर्देवेद्ध एतं हि देवा इन्धत एतमेव तदेतस्मिँल्लोक आयातयति, इति ।

देवैरिद्धः प्रज्वलितोऽग्निरित्येष निविदि प्रथमभागस्यार्थः । तं भागं होता शंसेदसौ वा आदित्यमण्डलेऽवस्थित एव प्रकाशो देवैरिद्धोऽग्निः । यस्मादेतं द्युलोकवर्तिनं प्रकाशं देवा इन्धत इद्धं दीपितं समृद्धं कुर्वन्ति तत्तेन प्रथमभाग-पाठेनैतमेवाऽऽदित्यरूपं प्रकाशमतस्मिन्द्युलोक आयातयति प्रसारयति ।

द्वितीयं पदं विधत्ते–

अग्निर्मन्विद्ध इति शंसत्ययं वा अग्निर्मन्विद्ध इमं हि मनुष्या इन्धतेऽग्निमेव तदस्मिँल्लोक आयातयति, इति ।

अङ्गाररूपोऽग्निर्भूलोकवर्ती मनुष्यैः प्रज्वाल्यते । अन्यत्पूर्ववत् ।

तृतीयं पदं विधत्ते—

अग्निः सुषमिदिति शंसति वायुर्वा अग्निः सुषमिन्दा-युर्हि स्वयमात्मानं समिन्धे स्वयामिदं सर्वं यदिदं किंच वायुमेव तदन्तरिक्षलोक आयातयति, इति ।

शोभना समित्प्रकाशनं संचरणरूपं यस्य वायोः सोऽयं सुषमित् । तस्याग्नित्वं गतिहेतुत्वाद्यौगिकम् । आगि गताविति यस्माद्धातोरुत्पन्नोऽयं शब्दः । पथमपर्यायेऽप्यादित्यपरत्वमेवं योजनीयम् । वायुर्हि स्वात्मानं सर्वं जगच्च समिन्धे सम्यक्प्रकाशयति व्यापारक्षमं करोतीत्यर्थः ।

चतुर्थपदं विधत्ते–

होता देववृत इति शंसत्यसौ वै होता देववृत एष हि सर्वतो देवैर्वृत एतमेव तदेतस्मिँल्लोक आयातयति, इति

असावादित्यः स्वोदयास्तमयाभ्यां सायंप्रातर्होमनिमित्तत्वेन होता स वै द्युलोके वर्तमानत्वाद्देवैर्वृतः ।

पञ्चमं पदं विधत्ते—

होता मनुवृत इति शंसत्ययं वा अग्नि-
र्होता मनुवृतोऽयं हि सर्वतो मनुष्यैर्वृतोऽ-
ग्निमेव तदस्मिल्लोक आयातयति, इति।

भूलोकेऽवस्थितोऽग्निर्होमाधिकरणत्वाद्धोता यजमानर्त्विग्भिश्चेष्टितत्वान्मनु-
वृतः।

षष्ठं पदं विधत्ते—

प्रणीर्यज्ञानामिति शंसति वायुर्वै प्रणीर्यज्ञानां
यदा हि प्राणित्यथ यज्ञोऽथाग्निहोत्रं वायु-
मेव तदन्तरिक्षलोक आयातयति, इति।

यज्ञान्प्रकर्षेण नयति वायुस्तस्मादेव यज्ञानां प्रणीर्यस्मिन्काले पुरुषः प्राणिति
प्राणवायुना चेष्टते तदा यज्ञो भवति। तस्यैव व्याख्यानमुदाहरणरूपमथाग्निहोत्र
मिति प्राणवायुचेष्टयाऽग्निहोत्रकरणादिव्यापारा निष्पद्यन्ते।

सप्तमं पदं विधत्ते—

रथीरध्वराणामिति शंसत्यसौ वै रथी-
रध्वराणामेष हि यथैतच्चरति रथीरिवैत-
मेव तदेतस्मिल्लोक आयातयति, इति।

असावादित्योऽध्वराणां प्रकाशनाय रथीर्भवति रथवान्भूत्वा संचरति। अयमेवार्थ एष हीत्यादिनोच्यते। यथा लोके रथीरिव कश्चन रथवानेवैतद्गन्त-
व्यस्थानं प्रति चरति तथैष आदित्योऽपि रथयुक्त एव चरति। शाखान्तरे तु तदीयरथप्रदर्शनपूर्वकमेव मन्त्रो व्याख्यातः—'रथीरध्वराणामित्याह, एष हि देवरथः' इति।

अष्टमं पदं विधत्ते—

अतूर्तो होतेति शंसत्ययं वा अग्निरतूर्तो
होतेमं ह न कश्चन तिर्यञ्चं तरत्यग्नि-
मेव तदस्मिल्लोक आयातयति, इति।

भूलोकवर्ती वह्निरतूर्तः केनाप्यतीर्णः . मार्गमध्ये तिर्यञ्चं मार्गस्यावरोधकत्वेनावस्थितं प्रौढं दावाग्निं कश्चिदपि तरितुं न समर्थः ।

नवमं पदं विधत्ते—

तूर्णिर्हव्यवाळिति शंसति वायुर्वै तूर्णिर्हव्यवाड्वायुर्हीदं सर्वं सद्यस्तरति यदिदं किंच वायुर्देवेभ्यो हव्यं वहति वायुमेव तदन्तरिक्षलोक आयातयति, इति ।

तरतीति तूर्णिः । वायोः सर्वतरणसामर्थ्यं प्रसिद्धम् । हव्यं वहतीति हव्यवाड्ढाविर्वहनस्य क्रियारूपस्य वायुनिष्पाद्यत्वादसौ हव्यं वहति ।

दशमं पदं विधत्ते—

आ देवो देवान्वक्षदिति शंसत्यसौ वै देवो देवानावहत्येतमेव तदेतस्मिँल्लोक आयातयति, इति ।

असावादित्यो देवः स्वोदयास्तमयाभ्यां होमकालसूचनेन * देवानावक्षदा वहति ।

एकादशं पदं विधत्ते—

यक्षदग्निर्देवो देवानिति शंसत्ययं वा अग्निर्देवो देवान्यजत्यग्निमेव तदस्मिँल्लोक आयातयति, इति ।

अयं भूमौ दृश्यमानोऽग्निर्देवो देवान्यजतीति प्रसिद्धम् ।

द्वादशं पदं विधत्ते—

सो अध्वरा करति जातवेदा इति शंसति वायुर्वै जातवेदा वायुर्हीदं सर्वं करोति यदिदं किंच वायुमेव तदन्तरिक्षलोक आयातयति ॥ ३४ ॥ इति ।

उच्छ्वासनिःश्वासप्रदानेन जातं प्राणिनं वेदयति जीवनयुक्तत्वेन ज्ञापयतीति वायुर्जातवेदाः । स चाध्वरा सर्वयज्ञान्करोति निष्पादयति व्यापाररूपस्यानुष्ठानस्य वाय्वधीनत्वात् । एष द्वादशसु पदेषु सूर्याग्निवायवश्चतुरावृत्तिः ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऐतरेय ब्राह्मणभाष्ये दशमाध्याये द्वितीयः खण्डः ॥ २ ॥ (३४) [६१]

---

* अत्र पुस्तकेषु देवानामावक्षदिति वर्तते तल्लेखकप्रमादादिति ज्ञेयम् ।

निविदो यानि द्वादश पदानि भागरूपाणि तान्युक्तानि । अथ तदनन्तरभाविसूक्तं विधत्ते-

प्र वो देवायाग्नय इत्यनुष्टुभः, इति ।

प्र व इत्यादि सूक्तस्य प्रतीकं तस्मिन्सूक्ते याः सप्तसंख्याका अनुष्टुप्छन्दस्का ऋचः सन्ति ताः शंसेदिति शेषः ।

पैथमायामृचि यौ प्रथमद्वितीयपादौ तयोर्विहरणं विधत्ते-

प्रथमे पदे विहरति तस्मात्स्त्र्युरू विहरति इति

विहरणं पृथक्करणम् । द्वयोः पादयोर्मध्ये विहारं विच्छेदं कृत्वा पठेत् । यस्मादत्र पादयोः परस्परवियोगस्तस्माल्लोकेऽपि स्त्री संभोगकाले स्वकीये ऊरू विहरति वियोजयति ।

तस्यामृचि तृतीयचतुर्थपादयोरविच्छेदं विधत्ते-

समस्यत्युत्तरे पदे तस्मात्पुमानूरू समस्यति तन्मिथुनं मिथुनमेव तदुक्थमुखे करोति प्रजात्यै, इति ।

यस्मात्तृतीयचतुर्थपादयोरुत्तरार्धगतयोः संयोजनं तस्माल्लोकेऽप्युपरिवर्ती पुमान्भोगकाले स्वकीये ऊरू समस्यति संयोजयति तदुभयं मिलित्वा मिथुनं भवति तस्मादुक्थमुखे शस्त्रस्योपक्रमे मिथुनमेव करोति । तच्च यजमानस्य प्रजननाय संपद्यते ।

वेदनं प्रशंसति -

प्रजायते प्रजया पशुभिर्य एवं वेद, इति ।

पुनरप्युक्तमेवानूद्य प्रकारान्तरेण प्रशंसति -

प्र वो देवायाग्नय इत्येवानुष्टुभः प्रथमे पदे विहरति वज्रमेव तत्परोवरीयांसं करोति समस्यत्येवोत्तरे पदे आरम्भणतो वै वज्रस्याणिमाऽथो दण्डस्याथो परशोर्वज्रमेव तत्प्रहरति द्विषते भ्रातृव्याय वधं योऽस्य स्तृत्यस्तरस्मै स्तर्तवै ॥ ३५ ॥ इति ।

इत्येवानुष्टुभ इति योऽयमेवकारः स पूर्वस्यैवानुवादो न तु नूतनविधिरिति-

---

१ ऋ०-३·१३-१ ।

ज्ञापनार्थः । परोवरीयांसं परस्युत्तरभागेऽतिशयेन स्थूलमीदृशं वज्रं सूक्तपठनेन संपादयति । प्रथमायाश्च उत्तरार्धे पदे तत्पादयोः समसनं तदपि वज्रसादृश्यार्थं वज्रस्य ह्यारम्भणतोऽणिमा मूले सौक्ष्म्यमित्यर्थः । वज्रशब्देन खड्गादिरूपमायुधमभिधीयते । तस्य हि मूले मुष्टिबन्धनस्थाने सूक्ष्मता भवत्युपरि तु विस्तारः । दण्डशब्देन गदा विवक्षिता । सोऽपि हस्तग्रहणस्थाने मूले सूक्ष्मा प्रहारस्थानेऽग्रे स्थूला । परशुरपि तथाविधः । यथाऽयं त्रिविधो वज्र एवमिदमपि सूक्तं प्रथमार्धचपादविहरणेन सूक्ष्ममुत्तरार्धचपादसमासेन स्थूलम् । अत ईदृशं सूक्तरूपं वज्रमेव द्वेषं कुर्वतो भ्रातृव्यस्य वधमुद्दिश्य प्रहरति । यः शत्रुरस्य स्तुत्यो हन्तव्यस्तस्मै स्तवनवै तस्य हिंसायै भवति ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऐतरेयब्राह्मणऽभाष्ये दशमाध्याये तृतीयः खण्डः ॥ ३ ॥ (३५) [६५]

अथाऽऽग्नीध्रीयवासादिसिद्ध्यर्थमाख्यायिकामाह –

देवासुरा वा एषु लोकेषु समयतन्त ते वै देवाः सद एवाऽऽयतनमकुर्वत तान्ह्यसोऽजयंस्त आग्नीध्रं संप्रापद्यन्त ते ततो न पराजयन्त तस्मादाग्नीध्र उपवसन्ति न सदस्याग्नीध्रे ह्यधारयन्त यदाग्नीध्रेऽधारयन्त तदाग्नीध्रस्याऽऽग्नीध्रत्वम्, इति ।

पुरा कदाचिद्देवाश्चासुराश्च लोकविषये समयतन्त सङ्ग्रामं कृतवन्तः । वयमेवैषु लोकेषु निवसामो न तु यूयमित्येवं परस्परस्पर्धा । तदानीं देवाः सौमिकवेद्यां प्राग्वंशस्य पूर्वस्यां दिशि येयं सदोभिधाना शाला तामेव स्वस्य निवासस्थानं कृतवन्तः । तत्रावस्थितांस्तान्देवानसुराः सदसोऽजयञ्जित्वा सदसो निःसारितवन्त इत्यर्थः । ततो देवा निर्गताः सन्त आग्नीध्राभिधां शालां प्राप्तवन्तः । ते देवाः प्राप्य तत आग्नीध्रीयं न पराजयन्त तत्रासुराणामेव पराजयो न तु देवानाम् । यस्मादेवं तस्मादाग्नीध्रशालायामुपवसथे दिने यजमाना उपवसन्ति । अग्निसमीपे निवसेयुर्न तु सदसि निवासः कर्तव्यः । आग्नीध्रे हि देवाः पलायनं परित्यज्य स्वात्मानं धारितवन्तस्तस्मात्तत्र निवासो युक्तः । यस्मादाग्नीध्रे धारितवन्तस्तस्मादाग्नीध्रनाम संपन्नम् । अग्निसमीपे स्वात्मधारणस्य प्रवृत्तिनिमित्तत्वात् ।

अथ सदस्यवस्थितेषु धिष्ण्येष्वाग्नीध्रादग्निविहरणं विधत्ते-

तेषां वै देवानामसुराः सदस्याग्नीन्निर्वापयांचक्रुस्ते देवा आग्नीध्रादेव सदस्यानग्नीन्विहरन्त तैरसुररक्षांस्यपान्नत तथैवैतद्यजमाना आग्नीध्रादेव सदस्यानग्नीन्विहरन्त्यसुररक्षांस्येवतदपन्नते, इति ।

पुरा देवानां संबन्धिनो येऽग्नयः सदस्यवस्थितेषु धिष्ण्येष्वासंस्तान्सर्वान्देवपलायनेन सदःप्रविष्टा असुरा निर्वापयांचक्रुर्जलप्रक्षेपेणाग्नीञ्शान्तानकुर्वन् । तदानीं ते देवा आग्नीध्रे स्थित्वा तत्रत्यान्सदस्याग्नीन्विहरन्त सदस्यवस्थितेषु धिष्ण्येषु पृथक्पृथगग्नीन्विहृतवन्तः स्थापितवन्तः । तैः प्रबलैरग्निभिरसुरान्रक्षांसि च सदसि हतवन्तः । यथा देवैर्विहरणं कृतं तथैवतीस्मन्नीषत्काले यजमाना आग्नीध्रादेव वह्नेः सदस्यानग्नीन्विहरेयुः । तेन विहरणेनासुरान्रक्षांसि च तदपन्नते तत्तदानीं नाशयन्ति । सोऽयमर्थः सर्वोऽपि शाखान्तरे संगृह्याऽऽम्नात.-' देवा वै यज्ञं पराजयन्त तमाग्नीध्रात्पुनरयाजयन्नै (न्ने) तद्वै यज्ञस्यापराजितं यदाग्नीध्रं यदाग्नीध्राद्धिष्ण्यान्विहरन्ति यदेव यज्ञस्यापराजितं तत एवैनं पुनस्तनुते ' इति ।

इत्थं शंसनस्थानगतेषु धिष्ण्येष्वग्निविहरणं विधाय तत्र शंसनीयानां शस्त्राणां यदेतदाज्यनामकत्वं तदेतच्छब्दनिर्वचनेन विस्पष्टयति-

ते वै प्रातराज्यैरेवाऽऽजयन्त आयन्यदाज्यैरेवाऽऽजयन्त आयंस्तदाज्यानामाज्यत्वं, इति ।

त एव देवाः प्रातःसवने यान्याज्यनामकानि शस्त्राणि तैरेवाऽऽसमन्ताज्जयं प्राप्नुवन्त आगच्छन् । यस्मादेवं तस्मादा समन्ताज्जयन्त्येभिरिति व्युत्पत्त्या शस्त्राणामाज्यनाम संपन्नम । अनेनैव न्यायेन सामवेदे पञ्चदशान्याज्यानीति वाक्येन विहितानां पञ्चदशस्तोमयुक्तानां स्तोत्राणामाज्यनामत्वं द्रष्टव्यम् ।

अथाच्छावाकस्य शस्त्रं विधत्ते-

तासां वै होत्राणामायतीनामाजयन्तीनामच्छावाक्यांऽहीयत तस्यामेन्द्राग्नी अध्यास्तामिन्द्राग्नी वै देवानामोजिष्ठौ बलिष्ठौ सहिष्ठौ सत्तमौ

पारयिष्णुतमौ तस्मादैन्द्राग्नमच्छावाकः प्रातःसवने शंसतीन्द्राग्नी हि तस्यामध्यास्ताम् इति।

प्रशास्ता ब्राह्मणाच्छंस्यच्छावाक इत्येते शस्त्रिणो होत्रका यद्यपि पुरुषास्तथाऽपि तदीयतनुविवक्षया तासामित्यादिस्त्रीलिङ्गनिर्देशः। यास्तनवः पूर्वमसुरानपाघ्नत तासामेव होत्राणां होत्रकतनूनामायतीनां सदः प्रवेष्टुमागच्छन्तीनामाजयन्तीनां सर्वतो जयं प्राप्नुवतीनां मध्येऽच्छावाकीयाऽच्छावाकसंबन्धिनी तनूरहीयत हीनाऽभूत्सदसमागन्तुं नाशक्नोदित्यर्थः। तदनुग्रहार्थं तस्यां तन्वामिन्द्राग्नी अध्यास्तामधिष्ठाय निवासं कृतवन्तौ। युज्यते हीन्द्राग्न्योरनुग्रहीतृत्वं यस्मादेवानां मध्य इन्द्राग्नी ओजिष्ठावोजसा बलहेतुनाऽष्टमधातुनाऽत्यन्तमुपेतावत एव बलिष्ठावतिशयेन शरीरशक्तियुक्तौ तत एव सहिष्ठावतिशयेन शत्रूनभिभवितारौ स्वभक्तविषये तु सत्त्वभावतिशयेन सन्तौ सन्मार्गवर्तिनावनुग्रहीतारावित्यर्थः। अत एव पारयिष्णुतमौ स्वभक्तैरनुष्ठीयमानं कर्मातिशयेन पारं नेतुं सदोद्युक्तौ। तस्मादयमच्छावाक इन्द्राग्नीदेवताकं शस्त्रं प्रातःसवने शंसेत्। [1]इन्द्राग्नी आ गतमित्यादिकं तच्छस्त्रं यस्मादिन्द्राग्नी तस्यामच्छावाकतन्वामध्यास्तां तस्मादैन्द्राग्नशस्त्रं तस्य युक्तम्।

इदानीमच्छावाकस्य सदःप्रवेशे विशेषं विधत्ते—

तस्मादु पुरस्तादन्ये होत्रकाः सदः प्रसर्पन्ति पश्चाऽच्छावाकः पश्चेव हि हीनोऽनुसंजिगमिषति, इति।

यस्मादच्छावाकव्यतिरिक्ताः प्रशास्त्रादयो होत्रकाः सहसा गन्तुं शक्नुवन्ति न त्वच्छावाकस्तस्मात्प्रशास्त्रादयः पुरस्तात्सदः प्रसर्पेयुः। अच्छावाकस्तु पश्चात्प्रसर्पेत्। लोकेऽपि हि हीनोऽशक्तः पश्चेव हि पश्चादेव हि जिगमिषतीति प्रसिद्धम्। अत्र पुरस्तात्पश्चाच्छ(श)ब्दौ देशतः कालतश्चेति वेदितव्यौ।

अच्छावाकीयशस्त्रं प्रशंसति—

तस्माद्यो ब्राह्मणो बह्वृचो वीर्यवान्स्यात्सोऽस्याच्छावाकीयां कुर्यात्तेनैव साऽहीना भवति ॥ ३६ ॥ इति।

---

[1] ऋ. ३-१२-१ ॥

यस्मादिन्द्राग्नी तस्यां तन्वामधिष्ठाय निवसतस्तस्मालोके यः कोऽपि ब्राह्मणो बहवृच ऋग्वेदाध्यायी वीर्यवान्वेदपाठसामर्थ्यातिशयोपेतः स्यात्सोऽस्य यजमानस्याच्छावाकीयां कुर्यादच्छावाकसंबन्धमैन्द्राग्नशस्त्रं पठेत् । तेनैव पाठेन सा तदीयतनुरहीना व्यवहर्तुं समर्था भवति ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऐतरेय ब्राह्मणभाष्ये दशमाध्याये चतुर्थः खण्डः ॥ ४ ॥ [३६] (६६)

अथाऽऽज्यशस्त्रस्य बहिष्पवमानस्तोत्रोत्तरत्वं प्रउगशस्त्रस्याऽऽज्यस्तोत्रोत्तरत्वं विधत्ते-

देवरथो वा एष यद्यज्ञस्तस्यैतावन्तरौ रश्मी यदाज्यप्रउगे तद्यदाज्येन पवमानमनुशंसति प्रउगेणाऽऽज्यं देवरथस्यैव तदन्तरौ रश्मी विहरत्यलोभाय, इति ।

यो यज्ञोऽस्त्येष देवानां रथ एव तस्य रथरूपस्य रथस्याऽऽज्यं प्रउगं च यच्छस्त्रद्वयं तदन्तरौ रश्मी अश्वबन्धनरज्जू रथस्योपर्यवस्थितेन सारथिना ध्रियमाणत्वात्तयोरभ्यन्तरत्वम् । यस्मादेवं तस्माद्यद्याज्यशस्त्रेण बहिष्पवमानमनु पश्चाच्छंसेत्प्रउगशस्त्रेण चाऽऽज्यस्तोत्रमनुशंसेत्तदानीं देवरथस्यैव संबन्धिनावभ्यन्तरौ रश्मी प्रग्रहौ विहरति विशेषेण संपादयति । तच्चालोभाय व्यामोहराहित्याय संपद्यते । रश्मिराहित्ये दुष्टाभ्यामश्वाभ्यां यत्र कापि दुर्गमे देशे रथनयने सति रथभङ्गरूपो व्यामोहः स्यात्तन्मा भूदिति शस्त्रद्वयं क्रमेण प्रयोक्तव्यम् ।

लौकिकफलप्रदर्शनेऽत्रैव रश्मिस्थानीयं शस्त्रद्वयं प्रशंसति-

तामनु कृतिं मनुष्यरथस्यैवान्तरौ रश्मी विहरन्त्यलोभाय, इति ।

तां कृतिं देवरथे शस्त्रद्वयरूपरश्मिकरणमनु पश्चान्मनुष्यरथस्यैवान्तरौ सारथिना ग्रहणयोग्यौ रश्मी प्रग्रहौ विहरन्ति संपादयन्ति । तच्च मनुष्यरथस्यालोभाय संपद्यते । अभग्नो मनुष्यरथो यजमानस्य संभवतीत्यर्थः ।

वेदनं प्रशंसति-

नास्य देवरथो लुभ्यति न मनुष्यरथो य एवं वेद, इति ।

इदानीं स्तोत्रशस्त्रयोर्वैयधिकरण्यरूपं चोद्यमुद्भावयति—

तदाहुर्यथा वाव स्तोत्रमेवं शस्त्रं पावमानीषु सामगाः स्तुवत आग्नेयं होताऽऽज्यं शंसति कथमस्य पावमान्योऽनुशस्ता भवन्तीति, इति ।

तत्तास्मिन्नाज्यशस्त्रे ब्रह्मवादिन आहुश्चोदयन्ति । यथैव स्तोत्रं सामगैरुक्तं तथैव बह्वृचैः शस्त्रं वक्तव्यं स्तुतमनुशंसतीति विधानात् । अत्र तु सामगा उपास्मै गायता नरः पवमानाय (९-११-१) इत्यादिषु पावमानीषु पवमानदेवताकास्वृक्षु बहिष्पवमानाख्येन स्तोत्रेण स्तुवते । बह्वृचस्तु होता प्र वो देवायाग्नय इत्यादिकमाज्यशस्त्रं शंसति । तथा सति कथमस्य होतुः पावमान्य ऋचोऽनुशस्ता भवेयुः । न हि पवमानः शस्त्रस्य देवता किं त्वग्निरिति चोद्यम् ।

तस्य परिहारमाह—

यो वा अग्निः स पवमानः, इति ।

अग्निपवमानदेवतयोः परस्परप्रीत्याऽभेदादाग्नेयमपि सूक्तं पावमानमिति वक्तुं शक्यते । तेन पावमान्योऽनुशस्ताः संपद्यन्ते ।

अग्निपवमानयोरैक्ये कंचिन्मन्त्रमुदाहरति —

तदप्येतदृषिणोक्तमग्निर्ऋषिः पवमान इति, इति ।

ऋषिरतीन्द्रियद्रष्टा । योऽयमग्निः स एव पवमानो वायुः प्रीत्यतिशयेनैक्यमतिभासात् । यद्वा शोधकत्वादग्निरेव पवमान इति मन्त्रार्थः ।

परिहारमुपपाद्य निगमयति—

एवमु हास्याऽऽग्नेयीभिरेव प्रतिपद्यमानस्य पावमान्योऽनुशस्ता भवन्ति, इति ।

अग्निदेवताकाभिः सूक्तगताभिर्ऋग्भिः शस्त्रं प्रारभमाणस्य होतुर्बहिष्पवमानस्तोत्रगताः पवमानदेवताका ऋचोऽनुशस्ता भवन्ति ।

देवतायुक्तं वैयधिकरण्यं परिहृत्य च्छन्दःप्रयुक्तं वैयधिकरण्यरूपं चोद्यं पूर्ववदुद्भावयति—

तदाहुर्यथा वाव स्तोत्रमेवं शस्त्रं गायत्रीषु

---

१ ऋ. ९-६६-२० ॥

सामगाः स्तुवत आनुष्टुभं होताऽऽज्यं शंसति कथमस्य गायत्र्योऽनुशस्ता भवन्तीति, इति।

बहिष्पवमानस्तोत्रगता उपास्मै गायता (९-११-१) इत्याद्या ऋचो गायत्रछिन्दस्काः प्र वो देवाय (३-१३-१) इत्यादिकमाज्यशस्त्रमनुष्टुप्छन्दस्कमिति वैयधिकरण्यं चोद्यम्।

तस्य परिहारमाह-

संपदेति ब्रूयात्, इति।

अनुष्टुप्सु गायत्रीत्वे संपादिते सति तया संपदा वैयधिकरण्यपरिहारादनुकूलशंसनं भवतीति परिहारं ब्रूयात्।

संपादनप्रकारं दर्शयति-

सप्तैता अनुष्टुभस्तास्रिः प्रथमया त्रिरुत्तमयैकादश भवन्ति विराज्यक्षरा द्वादशी न वा एकेनाक्षरेण च्छन्दांसि वियन्ति न द्वाभ्यां ताः षोळश गायत्र्यो भवन्ति, इति।

आद्यन्तयोर्ऋचोस्त्रिरावृत्तौ सत्यां स्वभावतः सप्तानामनुष्टुभामेकादशत्वं संपद्यते। अग्न इन्द्रश्चेति याज्या विराट्छन्दस्का। सा द्वादश्यनुष्टुबिति गणनीया। यद्यपि तस्या विराजस्त्रयस्त्रिंशदक्षरत्वादेकमक्षरमनुष्टुप्त्वाद्धातीरिच्यते तथाऽप्यल्पेन वैकल्येन च्छन्दस्त्वं नापैतीतिन्यायः पूर्वमप्युदाहृतः। एवं सति द्वादशस्वनुष्टुप्सु द्वादश पादानपनीयावशिष्टैः पादैस्त्रिपदा गायत्र्यो द्वादश संपादनीयाः। अपनीतैश्च पादैश्चतस्रो गायत्र्य इत्यनेन प्रकारेण षोडशसंख्याका गायत्र्य एव संपद्यन्ते।

परिहारं निगमयति-

एवमु हास्यानुष्टुब्भिरेव प्रतिपद्यमानस्य गायत्र्योऽनुशस्ता भवन्ति, इति।

इदानीमैन्द्राग्नग्रहस्य याज्यां विधत्ते-

अग्न इन्द्रश्च दाशुषो दुरोण इत्याग्नेन्द्रया यजाति, इति।

नन्वैन्द्राग्नग्रहे पूर्वभावित्वमिन्द्रस्य प्रतीयतेऽग्नेस्तु पश्चाद्भावित्वम्

१ क. ३-२५-४ ॥

याज्यायां तु तद्विपर्ययः कस्मात्क्रियत इत्याशङ्क्याऽऽह—

न वा एतावैन्द्राग्नौ सन्तौ व्यजयेतामाग्नेन्द्रौ वा एतौ सन्तौ व्यजयेतां तद्यदाग्नेन्द्रया यजति विजित्या एव, इति ।

असुरैः सह देवानां विजययुद्धे सति विजयार्थमिन्द्रस्य पुरोगमनमग्नेः पश्चाद्गमनमित्येवं न संपन्नम् । किं त्वग्निः पुरोगत इन्द्रस्तु पश्चाद्गतः । अतो विजयकालीनक्रमेणैवाग्निपूर्वकत्वमतिपादिकया यजने सति यजमानस्य विजयाय संपद्यत एव ।

याज्यागतान्यक्षराणि प्रशंसति—

सा विराट् त्रयस्त्रिंशदक्षरा भवति त्रयस्त्रिंशद्वै देवा अष्टौ वसव एकादश रुद्रा द्वादशाऽऽदित्याः प्रजापतिश्च वषट्कारश्च तत्प्रथम उक्थमुखे देवता अक्षरभाजः करोत्यक्षरमक्षरमेव तद्देवता अनुगच्छन्ति देवपात्रेणैव तद्देवतातृप्यन्ति, इति ।

अक्षराणां देवतानां च संख्यासाम्यम् । उक्थमुखे शस्त्राणां मध्ये मुखे प्रथम आज्यशस्त्रे देवताः प्रत्येकमक्षरभाजः करोति तास्तत्तदक्षरमेवानुसृत्य ता देवताः सोमं प्रकर्षेण पिनन्ति । तथा सति स्वयोग्येनाक्षररूपेण देवपात्रेणैव देवतास्तृप्ता भवन्तीति ।

शस्त्रयाज्ययोर्देवतायुक्तं वैयधिकरण्यचोद्यमुद्भावयति—

तदाहुर्यथा वाव शस्त्रमेवं याज्याऽऽग्नेयं होताऽऽज्यं शंसत्यथ कस्मादैन्द्राग्ना यजतीति, इति ।

शस्त्रस्याग्निरेक एव देवता याज्यायास्त्वग्निश्चेति द्वयोर्मिलितयोर्देवतात्वमिति वैयधिरण्यम् ।

अस्य चोद्यस्य परिहारमाह -

या वा आग्नेन्द्र्यैन्द्राग्नो वै सा सेन्द्राग्नमेतदुक्थं ग्रहेण च तूष्णींशंसेन च, इति ।

येयमाग्नेन्द्री याज्या सेयमैन्द्राग्न्यपि भवति । द्वयोः पौर्वापर्यमविसंवादेऽपि तस्या ऋचो द्विदेवत्यावसद्भावाद्देवतयोः क्रमविपर्यासमात्रेऽङ्गीकृते सति याज्याया ऐन्द्राग्नत्वमुचरितं यथा संपद्यते तथैवैतदुक्थमाज्यशस्त्रमपि ग्रहद्वारा तूष्णींशंसद्वारा चेन्द्राग्निदेवतासहितं संपद्यते तथा सत्यैन्द्राग्नत्वस्योपचरितस्य याज्याशस्त्रयोः सद्भावान्नास्ति वैयधिकरण्यम् ।

आज्यशस्त्रस्य ग्रहद्वारकं तूष्णींशंसद्वारकं चैन्द्राग्नत्वं दर्शयति--

इन्द्राग्नी आगतं सुतं गीर्भिर्नभो वरेण्यम् ।
अस्य पातं धियेषितेत्यैन्द्राग्नमध्वर्युर्ग्रहं
गृह्णाति भूरग्निर्ज्योतिरग्निरिन्द्रो ज्योतिः
भुवो ज्योतिरिन्द्रः सूर्यो ज्योतिर्ज्योतिः
स्वः सूर्य इति होता तूष्णींशंसं शंसति
तद्यथैव शस्त्रमेवं याज्या ॥ ३७ ॥ इति ॥

हे, इन्द्राग्नी सुतमभिषुतं सोमं प्रत्यागतमागच्छतम् । कीदृशं सुतं गीर्भिः स्तुतिभिर्युक्तमिति शेषः । नभ आकाशस्वरूपमाकाशवन्महादि (हान्तमि) त्यर्थः । वरेण्यं वरणीयम् । आगत्य च युवां धियेषिता स्वबुद्ध्या प्रेषितौ सन्तावस्य सोमस्य सारं पातं पिबतम् । इत्यनेनैन्द्राग्नदेवताकमन्त्रेणाध्वर्युरैन्द्राग्नं ग्रहं गृह्णाति । तूष्णींशंसे भूरग्निरित्यग्निरान्नात इन्द्रो ज्योतिरितीन्द्रोऽप्यान्नातस्तत उभयसद्भावात्तूष्णींशंसोऽप्यैन्द्राग्न ईदृशस्य ग्रहस्य तूष्णींशंसस्य संबन्धादाज्य शस्त्रमप्यैन्द्राग्नं भवति । तस्माच्छस्त्रयाज्ययोरैन्द्राग्नत्वसंपादनान्नास्ति वैयधिकरण्यम् ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऐतरेयब्राह्मण-
भाष्ये दशमाध्याये पञ्चमः खण्डः ॥ ५ ॥ (३७) [६७]

पूर्वत्र पराङ्ध्वर्यावित्याद्याश्वलायनसूत्रोदाहरणेन होतुर्यो जपो दर्शितस्तमिमं जपं विधत्ते—

होऽयं जपति रेतस्तत्सिञ्चति, इति ।

---

१ ऋ. ३-१२-१ ॥

होतुः कर्तव्यो यो जपस्तमनुतिष्ठेत् । तेन प्रजोत्पादनार्थमादौ रेतः सिक्तं भवति ।

तत्रोच्चारणप्रकारविशेषं विधत्ते–

उपांशु जपत्युपांश्विव वै रेतसः सिक्तिः, इति ।

ओष्ठस्पन्दनमेव परैर्दृश्यते न तु शब्दः श्रूयते तादृशमुपांशुत्वम् लौकिके रेतःसेचनेऽपि ध्वनेरश्रवणाद्युक्तं तथाविधत्वम् ।

तस्य जपस्य शौंसावोमित्येतस्मादाहावात्पूर्वभावित्वं विधत्ते–

पुराऽऽहावाज्जपति यद्वै किंचो-
र्ध्वमाहावाच्छस्त्रस्यैव तत्, इति ।

अध्वर्युराह्वयते येन शौंसावोमिति मन्त्रेण तस्मात्पूर्वभावी होतृजपः । तथा चाऽऽश्वलायनेनोदाहृतम्–'जपित्वाऽनभिहिंकृत्य शौंसावोमित्युच्चैराहूय' इति । आहावादूर्ध्वं यत्किंचित्पठ्यते तत्सर्वं शस्त्रस्यैव संबन्धि भवेत् । आहावमन्त्रेण शस्त्रानुज्ञानस्य पृष्टत्वात् । अतो होतृजपस्य शस्त्रान्तर्भावं निवारयितुं पूर्वकालीनत्वम् ।

अथाऽऽह्वावे प्रकारविशेषं विधत्ते–

पराञ्चं चतुष्पाद्यासीनमभ्याह्वयते तस्मात्प-
राञ्चो भूत्वा चतुष्पादो रेतः सिञ्चन्ति, इति ।

अस्मिन्काले ऽध्वर्युः पराङ्भवति होतुर्विमुखो भवति । तथा चतुष्पदी गौरिव हस्तौ भूमाववस्थाप्याऽऽसीनो भवति । तादृशमध्वर्युं संबोध्याभिमुखो यथा भवति तथा होता शौंसावोमिति मन्त्रेणाऽऽह्वयते । यस्मादाह्वानकाल ईदृशोऽध्वर्युस्तस्माल्लोकेऽपि चतुष्पादो गवादयः पराञ्चः संभोगावस्थायां परस्पराभिमुखरहिता भूत्वा रेतः सिञ्चन्ति ।

आहावादूर्ध्वमध्वर्योश्चतुष्पात्त्वं परित्यज्य सम्यगुत्थानं विधत्ते–

सम्यङ्द्विपाद्भवति तस्मात्सम्यञ्चो
भूत्वा द्विपादो रेतः सिञ्चन्ति, इति ।

ऊर्ध्वत्वेनोत्थानं सम्यक्त्वं तथाविधा भूत्वा रेतः सिञ्चन्ति । जपितव्यो यो मन्त्रस्तस्याऽऽदौ सुमत्पद्वग्द इति पञ्चाक्षराणि पठितव्यानि । तानि च पूर्वमेवाक्षरपङ्क्तिप्रशंसायां विहितानि ।

तेभ्य ऊर्ध्वं यो जपितव्यो मन्त्रस्तस्य प्रथमभागमनूद्य व्याचष्टे--

पिता मातरिश्वेत्याह प्राणो वै पिता प्राणो मातरिश्वा प्राणो रेतो रेतस्तत्सिञ्चति, इति ।

तस्मिन्मन्त्रे यजमानस्य नूतनं जन्म संपाद्यते । अतोऽत्र मातरिश्वा वायुः पितृत्वेन वर्ण्यते । तमिमं पितेत्यादिकं मन्त्रं होता ब्रूयात् । प्राण एव लोके पिता मृतात्पितृदेहाज्जन्मासंभवात् । वायुश्च प्राणः प्राणस्य वायुकार्यत्वात् । रेतश्च प्राणः प्राणयुक्तस्यैव रेतसो जननहेतुत्वात् । अत एवाऽऽरण्यके समाम्नास्यते— 'यद्वा ऋते प्राणाद्रेतः सिच्येत पूयेन्न संभवेत्' इति । तत्तेन प्रथमभागपाठेन यजमानपुनर्जन्मार्थं रेतः सिक्तं भवति ।

द्वितीयभागमनूद्य व्याचष्टे—

अच्छिद्रा पदाऽधा इ(दि)ति रेतो वा अछिद्रमतो त्यच्छिद्रः संभवति, इति ।

स वायुरूपः पिता छिद्ररहितं पदं प्रापणीयं रेतोऽधा ग (ङ) भांशये स्थापितवान् । अत्रोक्तमाच्छिद्रं वस्तु रेत एव । अतो हि रेतसः पुमानच्छिद्र उत्पद्यते ।

तृतीयभागमनूद्य व्याचष्टे—

अच्छिद्रेत्था कवयः शंसन्निति ये वा अनूचानास्ते कवयस्त इदमच्छिद्रं रेतः प्रजनयन्नित्येव तदाह, इति ।

कवयः पुरुषा अच्छिद्रोक्था शंसंश्छिद्ररहितमुक्थं शस्त्रं शंसन्ति । अत्र कविशब्देनानूचानाः षडङ्गसहितवेदाध्यायिन उच्यन्ते । ते चेदमच्छिद्रं रेतः प्रजनयन्नुत्पादयन्तीत्यनेनैव प्रकारेण तदच्छिद्रोक्थेति वाक्यमाह ब्रूते ।

चतुर्थभागमनूद्य व्याचष्टे--

सोमो विश्वविन्नीथा निनेषद्बृहस्पतिरुक्थामदानि शंसिषदिति ब्रह्म वै बृहस्पतिः क्षत्रं सोम स्तुतशस्त्राणि नीथानि चोक्थामदानि च दैवेन चैवैतद्ब्रह्म-

ह्मणा प्रसूतो दैवेन च क्षत्त्रेणोक्थानि शंसति, इति ।

विश्ववित्सर्वज्ञः सोमो नीथानि नेतव्यान्यनुष्ठेयानि स्तोत्रशस्त्राणि निनेषन्नेतुमिच्छां कृतवान्प्रयुक्तवानित्यर्थः । तथा बृहस्पतिरुक्थामदानि शस्त्ररूपाणि संतोषकारणानि शंसिषच्छंसितुमिच्छति शस्तवानित्यर्थः । अस्मिन्भागे बृहस्पतिसोमशब्दाभ्यां ब्राह्मणक्षत्त्रियजातिद्वयं दैवं विवक्षितम् । नीथशब्देनोक्थामदशब्देन च स्तोत्रशस्त्राणि विवक्षितानि । अत एवैतद्भागपाठे सति दर्शंवाग्निना ब्राह्मणेन क्षत्त्रियेण च प्रेरितः शस्त्राणि शंसति ।

सोमबृहस्पत्योः सर्वकर्मप्रेरकत्वप्रसिद्धिं दर्शयति–

एतौ ह वा अस्य सर्वस्य प्रसवस्येशाते यदिदं किंच, इति ।

यज्ञेऽनुष्ठेयं यत्किंचिदस्त्यस्य सर्वस्य प्रसवो यत्प्रेरणं तस्य सोमबृहस्पती एव स्वामिनौ ।

व्यतिरेकमुखेनै(णै)तदेव द्रढयति–

तद्यदेताभ्यामप्रसूतः करोत्यकृतं तदकृतमकरिति वै निन्दन्ति, इति ।

तत्तथा द्वयोः प्रेरणस्वामित्वे सति यदङ्गमेताभ्यामप्रेरितः करोति तदङ्गमकृतमेव भवति । लोकेऽपि स्वाम्यनुज्ञामन्तरेण यत्क्रियते तत्त्वत्कृतमकरकर्तव्यं कृतवानिति जना निन्दन्ति ।

वेदनं प्रशंसति–

कृतमस्य कृतं भवति नास्याकृतं कृतं भवति य एवं वेद, इति ।

अस्य वेदितुः कृतं कर्तव्यमेव कृतं भवति न त्वकृतमकर्तव्यं कृतं भवति ।

पञ्चमभागमनूद्य व्याचष्टे–

वागायुर्विश्वायुर्विश्वमायुरित्याह प्राणो वा आयुः प्राणो रेतो वाग्योनिर्योनिं तदुपसंधाय रेतः सिञ्चति, इति ।

येयं वागिन्द्रियरूपा यदप्यायुर्जीवनं तदुभयमस्त्विति शेषः । न चात्राऽऽयुरल्पं विवक्षितं किंतु विश्वायुर्विश्वं समस्तं शतसंवत्सरपरिमितमायुर्विवक्षितं

तस्माद्विधमायुर्यजमानः प्रामोत्वित्यध्याहारः । तमिमं भागं पठेत् । अत्राऽऽयुःशब्देन प्राण एव विवक्ष्यते । यावद्धयस्मिञ्शरीरे प्राणो वसति तावदायुरिति श्रुतेः । रेतसः प्राणत्वं पूर्वमेवोदाहृतम् । वाक्शब्देन योनिरुपलक्ष्यते । तथा सति तद्भागपाठेन योनिमुपसंधाय गर्भस्थानमभिलक्ष्य रेतः सिञ्चति ।

षष्ठं भागमनूद्य व्याचष्टे-

**क इदं शंसिष्यति स इदं शंसिष्यती-
त्याह प्रजापतिर्वै कः प्रजापतिः प्रजन-
यिष्यतीत्येव तदाह ॥ ३८ ॥** इति ।

कः प्रजापतिरिदं शस्त्रं शंसिष्यति शंसितुमिच्छत्यतः स एवेदं शंसिष्यति तमिममन्तिमभागं ब्रूयात् । अत्र कशब्देन प्रजापति (ते) रुक्तत्वात्स एव यजमानमुत्पादयिष्यतीत्यनेनैव प्रकारेण तन्मन्त्रवाक्यं ब्रूते ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऐतरेय-
ब्राह्मणभाष्ये दशमाध्याये षष्ठः खण्डः ॥ ६ ॥ (३८) [६८]

आहावात्पूर्वकालीनं जपमुक्त्वोत्तरकालीनं तूष्णींशंसं विधत्ते-

**आहूय तूष्णींशंसं शंसति रेतस्तत्सिक्तं विक-
रोति सिक्तिर्वा अग्रेऽथ विकृतिः,** इति ।

शोंसावोमिति मन्त्रेणाध्वर्युमुपहूय पश्चात्तूष्णींशंसं पठेत् । तथा सति होतृजपेन सिक्तं रेतोऽनेन विकरोति पिण्डाद्याकारविकारं रेतसि जनयति । सेकः पूर्वभावी विकारः पश्चाद्भावीति युक्तोऽयं क्रमः ।

शंसनकाले ध्वनिराहित्यं विधत्ते-

**उपांशु तूष्णींशंसं शंसत्युपां-
शिव वै रेतसः सिक्तिः,** इति ।

परैर्ध्वनेरश्रवणादपठितसदृशं भवतीत्यस्य तूष्णींशंस इति नामधेयम् । तस्माच्चदनुसारेणोपांशूच्चारयेत् । रेतःसेकोऽप्युपांशुसदृशो रहसि क्रियमाणत्वात् ।

उपांशुत्वेन होतृजपसाम्यप्रसक्तौ वैषम्यं विधत्ते-

**तिर इव तूष्णींशंसं शंसति तिर
इव वै रेतांसि विक्रियन्ते,** इति ।

यथा कुड्यगृहादिव्यवहितमन्यैरधीयमानं वाक्यमीषत्प्रतीयते न तु स्पष्टं तद्वत्तूष्णींशंसोऽप्यस्पष्टो यथा भवति तथा शंसेत् । तदिदं विर इवेत्युच्यते । होतृजपादीषदुच्चैरित्यर्थः ।

तूष्णींशंसस्येयत्तां विधत्ते—

षट्पदं तूष्णींशंसं शंसति षड्विधो वै पुरुषः षळङ्ग आत्मानमेव तत्षड्विधं षळङ्गं विकरोति, इति ।

षट्पदं षड्भागम् । भूरग्निर्ज्योतिरित्येको भागो ज्योतिराग्निरिति द्वितीयो भागः । एवमुत्तरत्रापि द्रष्टव्यम् । तथाविधशंसने पुरुषसाम्यं भवति । पुरुषस्य षड्विधत्वमेव षळङ्ग इत्यनेन स्पष्टी क्रियते । पुरुषावयवषट्कं शाखान्तरे दर्शितम्—'षोढा विहितो वै पुरुष आत्मा च शिरश्चत्वार्यङ्गानि' इति । द्वौ हस्तौ द्वौ पादावित्यङ्गचतुष्टयम । आत्मशब्दो मध्यदेहवाची । भागत्रयोपेते तूष्णींशंसे तत्तद्भागमध्येष्ववसाने षड्भागत्वं भवति । आश्वलायन आह—'भूरग्निर्ज्योतिर्ज्योतिरग्नौ इ (ग्नोमि) न्द्रो ज्योतिर्भुवो ज्योतिरिन्द्रो सूर्यो ज्योतिर्ज्योतिः स्वः सूर्योभिति त्रिपदस्तूष्णींशंसो यद्यु वै षट्पदः पूर्वैर्ज्योतिः शब्दैरग्रेऽवस्येत्' इति । अतः षट्पदे तूष्णींशंसेन यजमानस्य शरीरमेव षड्ङ्गोपेतं कृत्वा विकरोति ।

एतदनन्तरं निविदो विधत्ते—

तूष्णींशंसं शस्त्वा पुरोरुचं शंसति रेतस्तद्धि-कृतं प्रजनयति विकृतिर्वा अग्रेऽथ जातिः, इति ।

प्र वो देवायेत्यादिसूक्तात्पुरतो दीप्यते रोचत इति पुरोरुक्शब्देन निविदुच्यते । तां तूष्णींशंसादूर्ध्वं पठेत् । तेनोर्ध्वपाठेन षडङ्गत्वया विकृतं रेतः शरीररूपेणोत्पादितं भवति । विकारः पूर्वभावी जन्म पश्चाज्जाति । तस्मात्तदानन्तर्यं निविदो युक्तम् ।

होतृजपगतं यदुपांशुत्वं तूष्णींशंसगतं च यदीषदुच्चध्वनित्वं तस्मादुभयस्मादैलक्षण्यं निविदो विधत्ते—

उच्चैः पुरोरुचं शंसत्युच्चैरेवैनं तत्प्रजनयति, इति ।

उत्पादनकाले प्रसववेदनया तन्मातोच्चैर्ध्वनिं करोति । तदिदमुच्चैः प्रजनयतीत्युच्यते ।

निविदां न्यूनाधिकभागशङ्कान्युदासाय संख्यां विधत्ते—

द्वादशपदां पुरोरुचं शंसति द्वादश वै मासाः संवत्सरः संवत्सरः प्रजापतिः सोऽस्य सर्वस्य प्रजनयिता स योऽस्य सर्वस्य प्रजनयिता स एवैनं तत्प्रजया पशुभिः प्रजनयति प्रजात्यै, इति ।

निविदो द्वादश भागाः पूर्वमेव तव्याख्याने विवेचिताः । अतो मासंख्यासाम्यान्मासंसंवत्सरद्वारा सर्वस्य जगत उत्पादकत्वेन प्रसिद्धः प्रजापतिरेवेयं पुरोरुग्भवति । तादृश्याः पठे सति प्रसिद्धः सर्वस्योत्पादको यः प्रजापतिरस्ति स एवैनं यजमानं प्रजापशुसहितं प्रजनयति । तस्मादेतच्छंसनं प्रजात्यै संपद्यते ।

वेदनं प्रशंसति—

प्रजायते प्रजया पशुभिर्य एवं वेद, इति ।

देवताद्वारा पुरोरुचं प्रशंसति—

जातवेदस्यां पुरोरुचं शंसति जातवेदोन्यङ्गाम्, इति ।

जातवेदा देवता यस्याः पुरोरुचः सा जातवेदस्या . जातवेदःशब्दरूपं न्यङ्गं नितरामङ्गं चिह्नं यस्याः पुरोरुचः सा जातवेदोन्यङ्गा तस्याः पुरोरुचोऽन्तिमे भागे सो अध्वरा करति जातवेदा इति जातवेदःशब्दः पठ्यते ।

उक्तमर्थमाक्षिपति—

तदाहुर्यत्तृतीयसवनमेव जातवेदस आयतनमथ कस्मात्प्रातःसवने जातवेदस्यां पुरोरुचं शंसतीति, इति ।

तृतीयसवनस्य जातवेदसं प्रत्यायतनत्वमाग्निमारुतशस्त्रे देवत्वादवगन्तव्यम् । तथा च संप्रदायविद आहुः—"जातवेदास्तु देवोऽयं वर्तते आग्निमारुते" इति । यस्मादेवं तस्मात्प्रातःसवने जातवेदस्यायाः शंसने कारणं नास्तीत्याक्षेपं तद्वादिन आहुः ।

तस्य परिहारं दर्शयति—

प्राणो वै जातवेदाः स हि जातानां वेद यावतां वै स जातानां वेद ते भवन्ति येषामु

न वेद किमु ते स्युर्यो वा आज्य आत्म-संस्कृतिं वेद तत्सुविदितम् ॥ ३९ ॥ इति ।

अत्र जातवेदःशब्देन प्राण एवाभिधीयते न त्वग्निः । अत एवान्तिमभाग-व्याख्याने वायुर्वै जातवेदा इत्याम्नातम् । यस्मात्स प्राणो जातानामुत्पन्नानां शरीराणां स्वरूपं वेद जानाति लभत इत्यर्थः । तस्मात्प्राणस्य जातवेदा इति नामधेयम् । एवं सति प्राणो यावतामुत्पन्नानां शरीराणां स्वरूपं वेद लभते ते देहा भवन्ति सत्तां भजन्ते । येषां तु देहानां स्वरूपं प्राणो न वेद न लभते ते देहाः किमु स्युः किमु विद्यमानतां भजेयुर्न भजेयुरित्यर्थः । एवं सति जातवे-दोनायकस्य प्राणस्य प्रतिपादिकायाः पुरोरुचोऽन्वःपाठे यजमानो लब्धप्राणः सन्विद्यमानो भवति । अन्यथाऽयमसत्कल्पः स्यात् । एवमुक्तप्रकारेण यो यजमान आज्यशस्त्रे पुनर्जन्मस्वरूपां संस्कृतिं वेद तत्तस्य यजमानस्य सुविदितं सम्यग्ज्ञा-नमुत्पन्नम् । अनेन होतृजपमित्यारभ्य प्रोक्ते प्रघट्टकेऽवस्थितस्यार्थवादस्य सर्व-स्याप्युपसंहारो जातः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऐतरेय-ब्राह्मणभाष्ये दशमाध्याये सप्तमः खण्डः ॥ ७ ॥ (३९) [६९]

अथ सूक्तगतां प्रथमामृचं विवक्षते-

प्र वो देवायाग्नय इति शंसति प्राणो वै प्र प्राणं हीमानि सर्वाणि भूतान्यनु प्रयन्ति प्राणमेव तत्संभावयति प्राणं संस्कुरुते, इति ।

अस्याः प्रथमाया ऋच आदौ प्रेतिशब्दः श्रूयते स प्राणस्वरूपः । नाम्न आद्याक्षरसाम्यात् । हि यस्मात्कारणात्सर्वाणीमानि भूतानि विजातानि प्राणमनु प्रयन्ति । प्राणः प्रथमो गच्छति तमनु पश्चाद्देहाः प्रयन्ति प्राणप्रेरणादूर्ध्वं देहानां चलनात् । तत्तथा सति प्रशब्दप्रयुक्तायाः ऋचः शंसनेन प्राणं संभावयति संभावयति संभावितं पूजितं करोति । अनया पूजया प्राणः संस्कृतः सन्स्व-व्यापारसमर्थो भवति । तस्मात्प्र वो देवायेत्येषा शंसनीया ।

---

१ ऋ. ३ १३-१ ॥

द्वितीयामृचं विधत्ते-

दीदिवांसमपूर्व्यमिति शंसति मनो वै
दीदाय मनसो हि न किंचन पूर्वमस्ति मन
एव तत्संभावयति मनः संस्कुरुते, इति ।

यद्यप्यध्ययनक्रमेणेयमृक्पञ्चमी तथाऽपि द्वितीयात्वेन प्रयोक्तव्या । ब्राह्मणक्रमस्यानुष्ठानार्थत्वात् । दीदिवांसं दीप्तियुक्तमपूर्व्यमस्मादन्येन पूर्वेण रहितमित्येताभ्यां मन्त्रपदाभ्यां मनोऽभिधीयते । तच्च मनः सर्वार्थप्रकाशकत्वाद्दीदाय दीप्तियुक्तं भवति । तथा मनसोऽपि न किंचिदपीन्द्रियं व्यापारवन्नास्ति मनसां संकल्पितेष्वर्थेषु पश्चाद्वागादीन्द्रियाणां व्याप्रियमाणत्वात् । अत एवारण्यकाण्डे वक्ष्यति-' मनसा वाऽग्रे संकल्पयत्यथ वाचा व्याहरति ' इति । अतो दीदिवांसमपूर्व्यमिति पदद्वयार्थस्य मनसि विद्यमानत्वात्तच्छंसनेन मनसः संभावनासंस्कारौ संपद्येते । अत्राध्ययनक्रमादन्यमनुष्ठानक्रममभिप्रेत्याऽऽश्वलायन आह- ' अनुब्राह्मणं वाऽऽनुपूर्व्यम् ' इति ।

अध्ययनक्रमेण चतुर्थीमनुष्ठानाय तृतीयात्वेन विधत्ते-

स नः शर्माणि वीतय इति शंसति वाग्वै शर्म
तस्माद्वाचाऽनुवदन्तमाह शर्मवदास्मा आयांसीति
वाचमेव तत्संभावयति वाचं संस्कुरुते, इति ।

सोऽग्निर्नोऽस्माकं वीतये कामाय शर्माणि सुखानि यच्छत्विति मन्त्रपदस्यार्थः । अत्र शर्मशब्देन वागेव विवक्षिता । यस्मादेवं तस्माल्लोके स्वगुरूक्तमर्थं स्ववाचा सम्यगनुवदन्तं पुरुषमितरः प्रामाणिक एवमाह । अस्मै गुरूक्तार्थस्य सम्यगनुवादिने शिष्याय शर्मवत्सुखयुक्तं जीवनं संपन्नं यस्मात्तस्माद्धे शिष्याऽऽयांसि समन्ततो नियतोऽस्मि । आङ्पूर्वस्य ' यम उपरमे ' इत्यस्य धातोश्छान्दसं रूपम् । आत्मा इत्याकारश्च च्छान्दसः । इत्येवं वाङ्नियमितस्य सुखस्य लौकिकेनोच्यमानत्वान्मन्त्रोक्तशर्मशब्देन वाग्विवक्षोपपन्ना । तन्मन्त्रपाठेन वाचः संभावनासंस्कारौ भवतः ।

अध्ययनक्रमेण षष्ठीमृचमनुष्ठानाय चतुर्थीत्वेन विधत्ते—

---

१ क. ६-१३-५ ॥ २ क. ३-१३-४ ॥

[1]उत नो ब्रह्मन्नप इति शंसति श्रोत्रं वै ब्रह्म श्रोत्रेण हि ब्रह्म शृणोति श्रोत्रे ब्रह्म प्रतिष्ठितं श्रोत्रमेव तत्संभावयति श्रोत्रं संस्कुरुते, इति ।

उतापि च हे ब्रह्मन्देवेषु ब्राह्मणरूपाग्ने नोऽस्मानविषो रक्षसि । अस्मिन्मन्त्रे ब्रह्मशब्देन श्रोत्रमुपलक्ष्य श्रोत्रेण हि ब्रह्म वेदं पुरुषः शृणोति । श्रोत्रेऽवगतं ब्रह्म वेदवाक्यं प्रतिष्ठितं कदाचिदप्यविस्मृतं भवति । तस्मात्तन्मन्त्रपाठेन श्रोत्रस्य संभावनासंस्कारौ भवतः ।

अध्ययनक्रमेण तृतीयामृचमनुष्ठानाय पञ्चमीत्वेन विधत्ते–

[2]स यन्ता विप्र एषामिति शंसत्यपानो वै यन्ताऽपानेन ह्ययं यतः प्राणो न पराङ्भवत्यपानमेव तत्संभावयत्यपानं संस्कुरुते, इति ।

सोऽग्निर्विप्रो देवेषु ब्राह्मणः सन्नेषां मनुष्यविशाणां यन्ता नियमनकर्ता । अस्मिन्मन्त्रे यन्तृशब्देनापानवायुरुपलक्ष्यते । निःश्वासरूपेणापानेन यतो नियमितः प्राणवायुः पराङ्भवति परं बाह्यं दूरदेशमञ्चति गच्छतीति पराङ् । यद्ययं बहिर्मुख उच्छ्वासरूपः प्राणवायुरपानवायुना न नियम्येत तदा बहिरेव गच्छेन्न पुनर्निवर्तेत । ततः पुरुषो म्रियेतातोऽपानस्य नियन्तृत्वं युक्तम् । एतन्मन्त्रपाठेनापानवायोः संभावनासंस्कारौ भवतः ।

अध्ययनक्रमेण द्वितीयामृचं षष्ठीत्वेनानुष्ठानाय विधत्ते–

[3]ऋतावा यस्य रोदसी इति शंसति चक्षुर्वा ऋतं तस्माद्यतरो विवदमानयोराहाहमनुष्ठ्या चक्षुषाऽदर्शमिति तस्य श्रद्दधति चक्षुरेव तत्संभावयति चक्षुः संस्कुरुते, इति ।

रोदसी द्यावापृथिव्यौ यस्याग्नेर्ऋतावा सत्यवत्यौ । अस्मिन्मन्त्रगतऋतशब्देन चक्षुरुपलक्ष्यते । यस्मादेवं तस्माल्लोके विवदमानयोः पुरुषयोर्मध्ये यतरः पुमानेवमाह । कथमिति तदुच्यते । अहमनुष्ठ्याऽनुष्ठित्या प्रयत्नेन चक्षु-

---

१. ऋ. ३-१३ ६ ॥ २. ऋ. ३-१३ ३ ॥ ३. ३-१३-२ ॥

षाऽदर्शं दृष्टवानस्मीति । तस्य श्रद्दधति तदीयवचनं सर्वे विश्वसन्ति । दूरस्थे चूतवृक्षे फलमस्ति न वेति निश्चेतुं राजा द्वौ पुरुषौ प्रेषयति तयोरलसः कश्चिदापाततो दृष्ट्वा नास्तीति ब्रूते । अपरस्तु तत्र प्रयत्नेन दृष्ट्वा यत्र क्वापि पर्णे नाऽऽच्छन्नं फलं सम्यग्दृष्टवानस्मीति ब्रूते । तस्य वचने सर्वेषां विश्वासो जायते । तस्मात्सम्यग्दर्शिनश्चक्षुष ऋतत्वं युक्तम् । एतन्मन्त्रपाठेन चक्षुषः संभावनासंस्कारौ भवतः ।

अध्ययनक्रमेणानुष्ठानक्रमेण च सप्तम्या शास्त्रसमाप्तिं विधत्ते-

नू नो रास्व सहस्रवत्तोकवत्पुष्टिमद्रास्वित्युत्तमया परिदधात्यात्मा वै समस्तः सहस्रवांस्तोकवान्पुष्टिमानात्मानमेव तत्समस्तं संभावयत्यात्मानं समस्तं संस्कुरुते, इति ।

यद्वसु धनं सहस्रवत्सहस्रसंख्योपेतं तोकवदपत्योपेतं पुष्टिमत्समृद्धियुक्तमस्ति तादृशं धनं नोऽस्मभ्यं नु क्षिप्रमेव रास्व हेऽग्ने देहि । अनयाऽन्तिमयाऽऽज्यशस्त्रं समापयेत् । अत्र समस्तः पूर्वोक्तः प्राणमनोवागादिभिः सर्वैरिन्द्रियैः संपूर्ण आत्मा वै पुरुष एव सहस्रसंख्योपेतधनयुक्तो बहुभिरपत्यैरुपेतः समृद्धियुक्तश्च विवक्षितः । अतस्तत्पाठेन तादृशस्य पुरुषस्येव संभावनासंस्कारौ भवतः ।

शास्त्रस्यान्ते याज्यां विधत्ते-

याज्यय यजति प्रत्तिर्वै याज्या पुण्यैव लक्ष्मीः पुण्यामेव तल्लक्ष्मीं संभावयति पुण्यां लक्ष्मीं संस्कुरुते, इति ।

अग्न इन्द्रश्चेति येयं याज्या पूर्वमुक्ता तथा यजति यागार्थं याज्यां पठेत् । याज्या च प्रत्तिर्वै प्रदानरूपैव । तथाच हविष आदानप्रदाने क्रमेण पुरोनुवाक्यायाज्याधीने श्रुत्यन्तरे श्रूयेते--' पुरोनुवाक्ययाऽऽदत्ते प्रयच्छति याज्यया ' इति । अतः प्रदानरुपत्वादियं पुण्यैव लक्ष्मीः । शास्त्रीयत्वात्पुण्य-

---

१ ऋ. ३·१३-७ ॥

त्वम् । फलस्य लब्धिहेतुत्वाल्लक्षणस्य दर्शनहेतुत्वाद्वा लक्ष्मीत्वम् । अतो याज्या-पाठेन पुण्याया एव लक्ष्म्याः संभावनासंस्कारौ भवतः ।

उक्तक्रमेणानुष्टातृवेदित्रोः फलं दर्शयति—

स एवं विद्वांश्छन्दोमयो देवतामयो ब्रह्ममयोऽमृतमयः संभूय देवता अप्येति य एवं वेद, इति ।

एवं विद्वानित्यत्रानुतिष्ठन्नित्यध्याहार्यम् । वेदनपूर्वकोऽनुष्ठाता गायत्र्यादि-च्छन्दःस्वरूपो वह्न्यादिदेवतास्वरूप ऋगादिवेदस्वरूपो मरणरहितो मोक्ष-स्वरूपः सन्संभूय सर्वं जगदेकीकृत्य सर्वा देवताः प्राप्नोति । तदेवदनुष्टातुः फलम् । य एवं वेदेत्यत्रापि विदुषः फलत्वेन च्छन्दोमयत्वादिकमावर्तनीयम् । अथवा य एवं वेदेत्युक्तस्यैव स एवं विद्वानित्यनूद्यमानत्वान्नेदं वाक्यमाव-र्तनीयम् ।

वेदनमात्रस्य कथमीदृशं फलमित्याशङ्क्य सुवेदनत्वाद्युक्तं फलमित्येतद्दर्शयति—

यो वै तद्वेद यथा छन्दोमयो देवतामयो ब्रह्ममयोऽमृतमयः संभूय देवता अप्येति तत्सुविदितम्, इति ।

येन प्रकारेण च्छन्दःप्राप्त्यादिपूर्वकं सर्वदेवताप्राप्तिर्भवति तत्तादृशं प्रकारं यो वेद तद्वेदनं सुविदितं शोभनज्ञानं तस्माद्युक्तं फलमित्यर्थः ।

उक्तवक्ष्यमाणयोः शङ्कापरिहाराय विभागं दर्शयति—

इत्यध्यात्ममथाधिदैवतम् ॥ ४० ॥ इति ।

आत्मानं शरीरमधिकृत्य वर्तत इत्यध्यात्मम् । अस्मिन्खण्डे शरीररूपत्वेन प्रशंसनमाज्यशस्त्रस्योक्तम् । उत्तरखण्डे त्वधिदैवतं देवताविषयमाज्यशस्त्रप्रशं-सनमुच्यते ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऐतरेय-ब्राह्मणभाष्ये दशमाध्यायेऽष्टमः खण्डः ॥ ८ ॥ (४०) [७०]

पूर्वोक्तक्रमेणैव देवताविषयशस्त्रप्रशंसनं विवक्षित्वा प्रथमं भूरग्निरित्यस्य प्रशंसां दर्शयति—

षट्पदं तूष्णींशंसं शंसति षड्वा ऋतव ऋतू-

नेव तत्कल्पयत्यृ॒ नप्येति, इति ।

भूरग्निरित्यादीनां भागानां षट्संख्यासाम्याद्दतुत्वे सति तत्पाठेन ऋतून्स्वभोग-प्रदानसमर्थान्करोति । तत ऋतून्देवान्प्रामोति ।

निविदः प्रशंसां दर्शयति-

व्दादशपदां पुरोरुचं शंसति व्दादश वै मासा मासाने तत्कल्पयति मासानप्येति, इति ।

निविदां पाठेन मधुमाधवादीन्मासान्स्वात्मभोगाय संपादयति प्रामोति च ।

सूक्तप्रथममृचं प्रशंसति-

[1] प्र वो देवायाग्नय इति शंसत्यन्तरिक्षं वै प्रान्तरिक्षं हीमानि सर्वाणि भूतान्यनुप्रयन्त्यन्तरिक्षमेव तत्कल्पयत्यन्तरिक्षमप्येति, इति ।

सर्वे प्राणिनोऽन्तरिक्षमनुसृत्य तिष्ठन्ति तस्मिन्नवकाशे प्रकृष्टगमनादन्तरिक्षस्य प्रशब्दवाच्यत्वम् ।

अनुष्ठानक्रमेण द्वितीयामृचं प्रशंसति—

[2] दीदिवांसमपूर्व्यमिति शंसत्यसौ वै दीदाय योऽसौ तपत्येतस्माद्धि न किंचन पूर्वमस्त्येतमेव तत्कल्पयत्येतमप्येति, इति ।

योऽसावादित्यस्तपति जगति संतापं करोत्यसौ वै दीदाय दीप्यते । तस्योदयात्पूर्वमन्धकारे किमपि प्राणिजातं स्वव्यापारकर्तृ नास्ति । तस्मादादित्यस्य दीदिवांसमपूर्व्यमितिपददृयाभिधेयत्वम् ।

तृतीयामृचं दर्शयति-

[3] स नः शर्माणि वीतय इति शंसत्यग्निर्वै शर्माण्यन्नाद्यानि यच्छत्यग्निमेव तत्कल्पयत्यग्निमप्येति, इति ।

सुखकराण्यत्तुं योग्यान्यन्नानि पाकेन प्रयच्छतीत्यग्नेः शर्मशब्दवाच्यत्वम् ।

---

१ ऋ. ३-१३-१ ॥ २ ऋ. ३-१३-५ ॥ ३ ऋ. ३-१३-४ ॥

चतुर्थीमृचं दर्शयति -

[1]उत नो ब्रह्मन्विष इति शंसति चन्द्रमा वै ब्रह्म चन्द्रमसमेव तत्कल्पयति चन्द्रमसमप्येति, इति ।

नक्षत्रादिप्रकाशेषु बृहत्त्वाच्चन्द्रमसो ब्रह्मत्वम् ।

पञ्चमीमृचं दर्शयति–

[2]स यन्ता विप्र एषामिति शंसति वायुर्वै यन्ता वायुना हीदं यतमन्तरिक्षं न समृच्छति वायुमेव तत्कल्पयति वायुमप्येति, इति ।

इदं दृश्यमानं सूर्यचन्द्रनक्षत्रादिमण्डलं सर्वं वायुना यतं नियमितं सदन्तरिक्षं न समृच्छति सम्यङ्न प्राप्नोति । वायुनियमाभावे सम्यक्प्राप्नुयादन्तरिक्षस्य निरवधिकत्वेन तस्मिन्यत्र क्वापि गच्छेदित्यर्थः । तस्माद्वायुरेव नियन्ता ।

षष्ठीमृचं दर्शयति–

[3]ऋतावा यस्य रोदसी इति शंसति द्यावापृथिवी वै रोदसी द्यावापृथिवी एव तत्कल्पयति द्यावापृथिवी अप्येति, इति ।

रोदःशब्दवाच्यत्वं द्यावापृथिव्योर्लोकेऽपि प्रसिद्धम् ।

सप्तमीमृचं दर्शयति -

[4]नू नो रास्व सहस्रवत्तोकवत्पुष्टिमद्रास्वित्युत्तमया परिदधाति संवत्सरो वै समस्तः सहस्रवांस्तोकवान्पुष्टिमान्संवत्सरमेव तत्समस्तं कल्पयति संवत्सरं समस्तमप्येति, इति ।

चैत्रादिफाल्गुनान्तः समस्तः संवत्सरः सहस्रादिविशेषणयुक्तः । संवत्सरेण हि धनिकानां वृद्धिः सहस्रसंख्याका संपद्यते । तोकान्यपत्यानि गर्भधा-

---

१ ऋ. ३-१३-६ ॥ २ ऋ. ३ १३-३ ॥ ३ ऋ. ३-१३-३ ॥ ४ ऋ. ३-१३-७ ॥

रणमारभ्य संवत्सरमध्य एवोत्पद्यन्ते । रोगैः क्रुशानां शरीराणामारोग्ये सति संवत्सरमध्ये पुष्टिर्भवति ।

शस्त्रयाज्यां दर्शयति-

याज्यया यजति वृष्टिर्वै याज्या विद्युदेव विद्युद्धीदं वृष्टिमन्नाद्यं संप्रयच्छति विद्युतमेव तत्कल्पयति विद्युतमप्येति, इति ।

याज्यया प्रक्षिप्तं हविर्वृष्टिपर्यवसितं भवति ।

तथाच स्मर्यते-

"अग्नौ प्रास्ताऽऽहुतिः सम्यगादित्यमुपतिष्ठते ।
आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः" इति ॥

वृष्टिश्च विद्युत्पुरःसरत्वाद्विद्युदेव । यस्मान्मेघेषूत्पन्ना विद्युद्वृष्टिं संपाद्य तद्द्वारेणान्नं प्रयच्छति तस्माद्वृष्टिर्विद्युदेव ।

वेदनं प्रशंसति

स एवं विद्वानेतन्मयो देवतामयो भवति भवति ॥ ४१ ॥ इति ।

एतन्मयो वसन्तग्रीष्मादिविद्युदन्तवस्तुमयो भूत्वा तदभिमानिदेवतानां भोगं प्राप्नोति । अभ्यासोऽध्यायसमाप्त्यर्थः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऐतरेयब्राह्मण-भाष्ये दशमाध्याये नवमः खण्डः ॥ ९ ॥ (४१) [७]

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकवीरबुक्कणसाम्रा ज्यधुरंधरसायणाचार्यकृतावैतरेयब्राह्मणभाष्ये दशमोऽध्यायः ॥ १० ॥

इत्यैतरेयब्राह्मणे द्वितीयपञ्चिका समाप्ता ॥ २ ॥

(पञ्चिकाङ्कः-२ । अध्यायाङ्कः-१० । खण्डाङ्कः-७१)

अथ तृतीयपञ्चिकाप्रारम्भः ।

एकादशोऽध्यायः ।

आहावं निविदः सूक्तपच्छावाकस्य चोदनम् ।
यजमानपुनर्जन्म ब्रुवते साधिदैवतम् ॥ १ ॥

इत्थमाज्यशस्त्रं निरूप्य प्रउगशस्त्रं निरूपयितुं प्रस्तौति—

ग्रहोक्थं वा एतद्यत्प्रउगं नव प्रातर्ग्रहा गृह्यन्ते नवाभिर्बहिष्पवमाने स्तुवते स्तुते स्तोमे दशमं गृह्णाति हिंकार इतरासां दशमः सो सा सम्मा, इति ।

प्रउगाख्यं यच्छस्त्रमस्ति तद्ग्रहोक्थं वै । ऐन्द्रवायवादिग्रहाणामुक्थं ग्रहोक्थं तदीयदेवताप्रशंसारूपमित्यर्थः । नवेत्यादिना ग्रहसंबन्ध एव स्पष्टी क्रियते । प्रातःसवन ऐन्द्रवायवमैत्रावरुणादयो धाराग्रहा नवसंख्याका गृह्यन्ते । ग्रहीता चाध्वर्युः । तथा बहिष्पवमानाख्ये स्तोत्र उद्गातारो नवभिर्नवसंख्याभिर्ऋग्भिः स्तुवते । उपास्मै गायतेत्येकस्तृ (स्तृ) चः । दविद्युतत्येति द्वितीयः । पवस्वेति तृतीयः । एतेषु त्रिषु तृचेषु नवसंख्याका ऋचो विद्यन्ते । ता आवृत्तिरहिता गीयन्ते । एवं स्तोमे बहिष्पवमानस्तोत्र उद्गातृभिः स्तुते सति अध्वर्युर्दशमं ग्रहमाश्विनाख्यं गृह्णाति । यद्यप्याध्वर्यवयोर्मन्त्रब्राह्मणकाण्डयोराश्विनग्रहो धाराग्रहेषु तृतीयत्वेनाऽऽम्नातस्तथाप्यसौ दशमत्वेन ग्रहीतव्यः । आश्विनो दशमो गृह्यते तं तृतीयं जुहुत इति श्रुत्यन्तरवचनात् । तथा च ग्रहेषु दशमः संपन्नः । तथैवेतरासां बहिष्पवमानस्तोत्रगतानामृचां हिंकारो दशमत्वेन गणनीयः । तथा सति ग्रहाणां स्तोत्रियाणां च संख्यासाम्यं भवति । तदिदं सो सा सम्मेति वाक्येनोच्यते । उकारो निपातः समुच्चयार्थः सन्स्त्रीलिङ्गाभ्यां तच्छब्दाभ्यां संबध्यते । तथा सति सात्र (च) ग्रहसंख्या सा च स्तोत्रियसंख्येत्युक्तं भवति । सम्मेत्यत्र द्वितीयो मकारश्छान्दसः । तस्मिन्नपगते सति समा तुल्येत्युक्तं भवति । एवं यथा सान्तबहिष्पवमानस्तोत्रस्य ग्रहसंबन्धस्तथा प्रउगशस्त्रस्यापि ग्रहसंबन्धो द्रष्टव्य इत्यभिप्रायः ।

अथ प्रउगशस्त्रे विद्यमानानां तृ(च्यृ)चानां मध्ये प्रथमं *च्यृचं विधत्ते-

वायव्यं शंसति तेन वायव्य उक्थवान्, इति।

वायुर्देवता यस्य च्यृचस्य सोऽयं वायव्यो वायवायाहि दर्शतेत्यादिकस्तं शंसेत्। तेन शंसनेन वायव्यो ग्रह उक्थवाञ्शस्त्रवान्भवति। यद्यपि वायव्यः पृथग्ग्रहो नास्ति तथाऽप्यैन्द्रवायवस्य ग्रहस्य पूर्वो भागो वायव्य इत्युच्यते। स च प्रथममावायो भूष (७-९२ १) इत्यनेन केवलवायुदेवताकेन मन्त्रेण गृह्यते। तेन वायव्यो भवति। पश्चादिन्द्रवायू इमे सुताः (१-२-४) इत्यनेनेन्द्र-सहितवायुदेवताकेन मन्त्रेण गृह्यते। तेनैन्द्रवायवोऽपि भवति। अत एव वायवे द्विर्ग्रहणं तैत्तिरीया अधीयते-'सकृदिन्द्राय मध्यतो गृह्यते द्विर्वायवे' इति। तत्र प्रथमभागरूपो वायव्यो ग्रहः केवलेन वायव्यच्यृचेन शस्त्रवान्संपद्यते।

द्वितीयं च्यृचं विधत्ते-

ऐन्द्रवायवं शंसति तेनैन्द्रवायव उक्थवान्, इति।

इन्द्रश्च वायुश्च मिलित्वा देवता यस्य च्यृचस्य सोऽयमैन्द्रवायव इन्द्रवायू इमे सुताः (१-२-४) इत्यादिकस्तं शंसेत्। तच्छंसनेनैन्द्रवायवग्रहस्योत्तरभागः शस्त्रवान्भवति।

तृतीयं च्यृचं विधत्ते-

मैत्रावरुणं शंसति तेन मैत्रावरुण उक्थवान्, इति।

मित्रो वरुणश्च मिलित्वा देवता यस्य च्यृचस्य सोऽयं मैत्रावरुणो मित्रं हुवे पूतदक्षम् (१ २-७ इत्यादिकं पूर्ववद्योज्यम्।

चतुर्थं च्यृचं विधत्ते-

आश्विनं शंसति तेनाऽऽश्विन उक्थवान्। इति।

अश्विनौ मिलित्वा देवता यस्य च्यृचस्य सोऽयमाश्विनोऽश्विना यज्वरीरिषः (१-३-१) इत्यादिकः।

पञ्चमं च्यृचं विधत्ते-

ऐन्द्रं शंसति तेन शुक्रामन्थिना उक्थवन्तौ, इति।

इन्द्रो देवता यस्य च्यृचस्य सोऽयमैन्द्र इन्द्राऽऽ याहि चित्रभानो, (१ ३ ४) इत्यादिनैन्द्रस्च्यृचः। तेन शुक्रग्रहमन्थिग्रहयोरुभयोः शस्त्रवत्त्वम्।

---

* इत आरभ्य च्यृचशब्दस्थाने तृचशब्दो विद्यते पुस्तकेषु तथाऽपि तस्य च्छान्दसत्वाच्च स्थापितः।

षष्ठं ऋचं विधत्ते—

वैश्वदेवं शंसति तेनाऽऽग्रयण उक्थवान् इति ।

ओमासश्चर्षणीधृतः (१-३-१) इत्येष वैश्वदेवस्ऋचः । तेनाऽऽग्रयणग्रह-स्य शस्त्रवत्त्वं तथाऽपि विश्वदेवदेवताकत्वाद्वैश्वदेवम् । एवं सर्वत्र ग्रहशस्त्रयोरेक-देवताकत्वं द्रष्टव्यम् ।

सप्तमं ऋचं विधत्ते—

सारस्वतं शंसति, इति ।

पावका नः सरस्वती (१-३-१०) इत्यादिकः सारस्वतस्ऋचः ।

ननु पूर्ववदत्रापि ग्रहस्य शस्त्रवत्त्वं कुतो नोपन्यस्यत इत्याशङ्क्याऽऽह—

न सारस्वतो ग्रहोऽस्ति, इति ।

आध्वर्यवमन्त्रकाण्डे सारस्वतमन्त्रस्यापठितत्वाद्ब्राह्मणे विध्यभावाच्च ग्रहा-भावः ।

तर्हि ग्रहोक्थेऽस्मिन्नस्य सारस्वतस्य ऋचस्य किमर्थं शंसनमाम्नातमित्या-शङ्क्याऽऽह—

वाक्तु सरस्वती ये तु के च वाचा ग्रहा
गृह्यन्ते तेऽस्य सर्वे शस्तोक्थाः, इति ।

सरस्वती हि वाग्देवता । ग्रहाणां च वाचा गृह्यमाणत्वात्सारस्वतत्वम् । तेन सर्वेऽपि ग्रहाः शस्तोक्थाः पठितशस्त्रा भवन्ति ।

वेदनं प्रशंसति—

उक्थिनो भवन्ति य एवं वेद ॥ १ ॥ इति ।

तस्य वेदितुः सर्वे ग्रहाः शस्त्रवन्तो भवन्ति ग्रहदेवतास्तुष्यन्तीत्यर्थः ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऐतरेय-ब्राह्मणभाष्ये एकादशाध्याये प्रथमः खण्डः ॥ १ ॥ [७२]

विहितं प्रउगशस्त्रं प्रशंसति—

अन्नाद्यं वा एतेनावरुन्धे यत्प्रउगमन्याऽन्या देवता
प्रउगे शस्यतेऽन्यदन्यदुक्थं प्रउगे क्रियते, इति ।

यदेतत्प्रउगाख्यं शस्त्रमस्ति तदतदर्तुं योग्यस्यान्नस्य साधनमतस्तेनान्नं

प्राप्नोति । यस्मादस्मिञ्शस्त्रे पृथगेव देवता शस्यते । प्रथमस्यृचे केवलो वायुर्द्वितीयस्मिन्निन्द्रवायू तृतीयस्मिन्मित्रावरुणावित्यादिर्देवताभेदः । यथैव देवता भिद्यते तथैतस्मिञ्शस्त्रेऽन्यदन्यदुक्थं वायवायाहीन्द्रवायू इत्यादिकं पररपरविलक्षणं शस्त्राङ्गं क्रियते । तस्मादोदनशाकसूपादिविलक्षणभक्ष्यभोज्यलेह्यपेयचोष्यसाम्यादन्नाद्यहेतुत्वं युक्तम् ।

वेदनं प्रशंसति—

अन्यदन्यदस्यान्नाद्यं गृहेषु भ्रियते य एवं वेद, इति ।

अन्यदन्यत्परस्परविलक्षणं मधुराम्लादिरूपम् ।

प्रकारान्तरेण प्रउगं प्रशंसति—

एतद्ध वै यजमानस्याध्यात्मतममिवोक्थं यत्प्रउगं तस्मादेनेनैतदुपेक्षतमिवेत्याहुरेतेन ह्येनं होता संस्करोतीति, इति ।

प्रउगाख्यं यच्छस्त्रमस्ति एतदेव यजमानस्याध्यात्मतममिव । आत्मानं शरीरमधिकृत्य वर्तत इत्यध्यात्मं शरीरसंबन्धीत्यर्थः । पूर्वत्राऽऽज्यशस्त्रस्य यजमानशरीरनिष्पत्तिहेतुत्वाभिधानात्तदप्यध्यात्मम् । इदं तूत्पन्नस्य शरीरस्य संस्कारत्वादतिशयेनैवाध्यात्मम् । यस्मादेवं तस्मादेनेनेन यजमानेनैतत्प्रउगशस्त्रमुपेक्ष्यतममिवातिशयेनोप समीप ईक्षणीयमादरणीयमित्यर्थः। इत्येवमभिज्ञा आहुः । तेषामयमभिप्रायः । एतेन प्रउगशस्त्रेणैनं यजमानमाज्यशस्त्रादुत्पन्नं होता संस्करोति तस्मादादरणं युक्तम् ।

अथ प्रथमं स्यृचं विहितमनूद्य स्तौति—

वायव्यं शंसति तस्मादाहुर्वायुः प्राणः प्राणो रेतो रेतः पुरुषस्य प्रथमं संभवतः संभवतीति यद्वायव्यं शंसति प्राणमेवास्य तत्संस्करोति, इति ।

पूर्वोक्तो विधिर्वायव्यं शंसतीति वाक्येनानूद्यते । यस्माद्वायव्यं शंसनीयं तस्मादभिज्ञा एवमाहुः प्राणस्य वायुकार्यत्वेन वायुरेव प्राणः । रेतसः प्राणधारकशरीरनिष्पादकत्वाद्रेतः प्राणः प्राणस्वरूपम् । तत्सदृशं रेतः संभवत उत्पाद्यमानस्य पुरुषस्य देहस्य कारणत्वेन पितृदेहे प्रथमं संभवति । एवमभि

ऽनैरुक्तत्वादायभ्यस्तृचः समीचीनः । तच्छंसनेन होता यजमानस्य प्राणमेव संस्करोति ।

द्वितीयं विधिमनूद्य स्तौति–

ऐन्द्रवायवं शंसति यत्र वाव प्राणस्तदपानो यदैन्द्रवायवं शंसति प्राणापानावेवास्य तत्संस्करोति, इति ।

उच्छ्वासरूपः प्राणो यत्रास्ति तत्र निश्वासरूपोऽपानोऽप्यस्ति । इन्द्रवायू च प्राणापानस्वरूपौ । तस्मात्तेन सूक्तेन प्राणापानयोः संस्कारः ।

तृतीयं विधिमनूद्य स्तौति–

मैत्रावरुणं शंसति तस्मादाहुश्चक्षुः पुरुषस्य प्रथमं संभवतः संभवतीति यन्मैत्रावरुणं शंसति चक्षुरेवास्य तत्संस्करोति, इति ।

श्रुत्यन्तरे चक्षुर्मित्रावरुण इति मित्रावरुणसंबद्धस्य ग्रहस्य चक्षुष्ट्वाभिधानात्तृचोऽपि चक्षुःस्वरूप एव । तच्चक्षुरन्यस्माच्छ्रोत्रादीन्द्रियात्पथममुत्पद्यते । अस्यार्थस्याऽऽगमागम्यत्वादाहुरभिज्ञा इत्युक्तम् । एवंविधचक्षुःस्वरूपेण मैत्रावरुणतृचेन यजमानचक्षुषः संस्कारः ।

चतुर्थं विधिमनूद्य स्तौति–

आश्विनं शंसति तस्मात्कुमारं जातं संवदन्त उप वै शुश्रूषते नि वै ध्यायतीति यदाश्विनं शंसति श्रोत्रमेवास्य तत्संस्करोति, इति ।

उत्पन्नं बालं मुग्धमवेक्षमाणा मातापित्रादयः परस्परमेवमाहुः–नानाविधैरुपलालनैराहूतो बालकोऽस्मन्मुखमवलोकयति यस्मादयमस्मदीयां वाचं श्रोतुमिच्छति नैरन्तर्येणावलोकनेन मामेव ध्यायतीति । तदेतन्मित्रावरुणानुग्रहरूपम् । तस्मात्तच्छंसनेन श्रोत्रस्य संस्कारः ।

पञ्चमं विधिमनूद्य स्तौति–

ऐन्द्रं शंसति तस्मात्कुमारं जातं संवदन्ते प्रतिधारयति वै ग्रीवा अथो शिर इति

यदैन्द्रं शंसति वीर्यमेवास्य तत्संस्करोति, इति ।

दोलायां शयानं बालमवेक्ष्य परस्परमेवमाहुः—अयमिदानीं ग्रीवाः प्रतिधारयति, उत्थातुमादौ गलमुन्नयति ततः शिर उन्नमतीति । एतस्य व्यापारस्य वीर्यनिमित्तत्वादिन्द्रस्य च वीर्यप्रदत्वात्तदीयर्चेन शक्तेः संस्कारः ।

षष्ठं विधिमनूद्य स्तौति—

वैश्वदेवं शंसति तस्मात्कुमारो जातः पश्चेव प्रचरति वैश्वदेवानि ह्यङ्गानि यद्वैश्वदेवं शंसत्यङ्गान्येवास्य तत्संस्करोति, इति ।

उत्पन्नो बालः पश्चेव दर्शनश्रवणग्रीवोन्नमनादिक्रियाभ्यः पश्वादेव समर्थः सन्हस्ताभ्यां पादाभ्यां चेतस्ततः प्रचरति । हस्तादीन्यङ्गानि च बहुदेवताकानि । तस्माद्वैश्वदेवर्चेनाङ्गसंस्कारः ।

सप्तमं विधिमनूद्य स्तौति—

सारस्वतं शंसति तस्मात्कुमारं जातं जघन्या वागाविशति वाग्घि सरस्वती यत्सारस्वतं शंसति वाचमेवास्य तत्संस्करोति, इति ।

हस्तपादप्रचारावस्थाया ऊर्ध्वं वक्कुमारभते । अतो जघन्या वागित्युच्यते । वाचः सरस्वतीरूपत्वात्तदीयर्चेन तस्याः संस्कारः ।

वेदितारमनुष्ठातारं च प्रशंसति—

एष वै जातो जायते सर्वाभ्य एताभ्यो देवताभ्यः सर्वेभ्य उक्थेभ्यः सर्वेभ्यश्छन्दोभ्यः सर्वेभ्यः प्रउगेभ्यः सर्वेभ्यः सवनेभ्यो य एवं वेद यस्य चैवं विदुष एतच्छंसन्ति ॥ २ ॥ इति ।

यो होता यथोक्तप्रकारेण वेदैष एव पूर्वं स्वमातु (तां) पितृभ्यां जातोऽपि पुनर्देवतादिभ्यो जातो भवति । यथोक्तार्थं विदुषो यस्य यजमानस्य होतार एतत्प्रउगं शंसन्ति सोऽपि यजमानो देवतादिभ्यः पुनर्जायते । देवता वाग्वा-

दयः। उक्थान्याज्यप्रउगादीनि। छन्दांसि गायत्र्यादीनि। प्रउगाणि तदवयवास्त्र्यृचाः। सवनानि त्रीणि प्रसिद्धानि। एतेभ्यः सर्वेभ्यः पुनरुत्पत्तिः।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऐतरेयब्राह्मणभाष्ये एकादशाध्याये द्वितीयः खण्डः॥ २॥ (७३)

प्रकारान्तरेण प्रउगशस्त्रं प्रशंसति -

प्राणानां वा एतदुक्थं यत्प्रउगं सप्त देवताः शंसति सप्त वै शीर्षन्प्राणाः शीर्षन्नेव तत्प्राणान्दधाति, इति।

शिरोगतसप्तच्छिद्रवर्तिप्राणानां पूर्वोक्तसप्तत्र्यृचगतवाय्वादिदेवतानां च संख्यासाम्याच्छस्त्रस्य प्राणरूपत्वं तेन यजमानस्य शिरसि प्राणधारणं भवति। अथ प्रश्नोत्तराभ्यां प्रउगशस्त्रस्य सामर्थ्यं दर्शयति -

किं स यजमानस्य पापभद्रमाद्रियेतेति ह स्माऽऽह योऽस्य होता स्यादित्यत्रैवैनं यथा कामयेत तथा कुर्यात्, इति।

अस्य यजमानस्य यो होता स्यात्स तस्य पापभद्रं किमाद्रियेत। पापमनिष्टफलं भद्रमिष्टफलम्। तादृशं किं फलं संपादयितुं समर्थ इति प्रश्नः। अत्रैव जन्मन्येनं यजमानं प्रति यथा होता कामयेत तथा कर्तुं शक्नोतीत्युत्तरम्।

तत्र प्रथमत्र्यृचप्रयुक्तमनिष्टं दर्शयति—

यं कामयेत प्राणेनैनं व्यर्धयानीति वायव्यमस्य लुब्धं शंसेदृचं वा पदं वाऽतीयात्तेनैव तल्लुब्धं प्राणेनैवैनं तद्व्यर्धयति, इति।

यं यजमानमुद्दिश्य होता कामयेत। कथमिति तदुच्यते। एनं यजमानं प्राणेन व्यर्धयानि व्यृद्धं वियुक्तं करवाणीति। एवं कामयमानो होताऽस्य यजमानस्य संबन्धिनं वायव्यं त्र्यृचं लुब्धं व्यामूढं यथा भवति तथा शंसेत्। लुभ विमोहन इति धातुः। व्यामोहप्रकार उच्यते। एकामृचं वा तदीयमेकं पदं वाऽतीयात्तस्मभयेन्न पठेदित्यर्थः। तावता तत्त्र्यृचस्वरूपं लुब्धं व्यामूढं

भवति । तथा सति प्राणरूपत्वेन पूर्वं निरूपितस्य वायोः क्रोधादेनं यजमानं प्राणेन वियोजयति ।

द्वितीयऽनूचनिमित्तमनिष्टं दर्शयति—

यं कामयेत प्राणापानाभ्यामेनं व्यर्धयानीत्यैन्द्रवायवमस्य लुब्धं शंसेदृचं वा पदं वाऽतीयात्तेनैव तल्लुब्धं प्राणापानाभ्यामेवैनं तद्व्यर्धयति, इति ।

पूर्ववद्व्याख्येयम् ।

तृतीयऽनूचनिमित्तमनिष्टं दर्शयति—

यं कामयेत चक्षुषैनं व्यर्धयानीति मैत्रावरुणमस्य लुब्धं शंसेदृचं वा पदं वाऽतीयात्तेनैव तल्लुब्धं चक्षुषैवैनं तद्व्यर्धयति, इति ।

पूर्ववद्व्याख्येयम् ।

चतुर्थऽनूचप्रयुक्तमनिष्टं दर्शयति—

यं कामयेत श्रोत्रेणैनं व्यर्धयानीत्याश्विनमस्य लुब्धं शंसेदृचं वा पदं वाऽतीयात्तेनैव तल्लुब्धं श्रोत्रेणैवैनं तद्व्यर्धयति, इति ।

पूर्ववद्व्याख्येयम् ।

पञ्चमऽनूचप्रयुक्तमनिष्टं दर्शयति—

यं कामयेत वीर्येणैनं व्यर्धयानीत्यैन्द्रमस्य लुब्धं शंसेदृचं वा पदं वाऽतीयात्तेनैव तल्लुब्धं वीर्येणैवैनं तद्व्यर्धयति, इति ।

पूर्ववद्व्याख्येयम् ।

षष्ठऽनूचप्रयुक्तमनिष्टं दर्शयति—

यं कामयेताङ्गैरेनं व्यर्धयानीति वैश्वदेवमस्य लुब्धं शंसेदृचं वा पदं वाऽतीया-

तेनैव तल्लुब्धमङ्गैरेवैनं तद्यर्धयति, इति ।

पूर्ववद्व्याख्येयम् ।

सप्तमऋचप्रयुक्तमनिष्टं दर्शयति—

यं कामयेत वाचैनं व्यर्धयानीति सारस्वत-
मस्य लुब्धं शंसेदृचं वा पदं वाऽतीयात्ते-
नैव तल्लुब्धं वाचैवैनं तद्व्यर्धयाते, इति ।

पूर्ववद्व्याख्येयम् ।

अथास्य शस्त्रस्येष्टफलसामर्थ्यं दर्शयति—

यमु कामयेत सर्वैरेनमङ्गैः सर्वेणाऽऽत्मना सम-
र्धयानीत्येतदेवास्य यथापूर्वमृजुकृतं शंसेत्सर्वै-
रेवैनं तदङ्गैः सर्वेणाऽऽत्मना समर्धयति, इति ।

पूर्वोक्तानि प्राणादीनि सर्वाण्यङ्गानि । संपूर्णो देह. सर्व आत्मा । तत्स-मृद्धिकामो होताऽस्य यजमानस्य संबन्धि तदेव प्रउगशस्त्रं यथापूर्वं गुरोः समीपे पुरा येन क्रमेण पठितं तथैव ऋजुकृतं कस्यचिद्वयवस्यान्यथात्वा-भावादृजुत्वं तथा कृतं संपादितं कृत्वा शंसेत् । ततः काम्यमानसमृद्धिः सिध्यति ।

वेदनं प्रशंसति—

सर्वैरङ्गैः सर्वेणाऽऽत्मना समृ-
ध्यते य एवं वेद ॥ ३ ॥ इति ।

स्पष्टोऽर्थः ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऐतरेय
ब्राह्मणभाष्ये एकादशाध्याये तृतीयः खण्डः ॥ ३ ॥ [७४]

अथ स्तोत्रशस्त्रयोर्देवतावैलक्षण्यरूपमाक्षेपमुत्थापयति—

तदाहुर्यथा वाव स्तोत्रमेवं शस्त्रमाग्नेयेषु साम-
गा स्तुवते वायव्यया होता प्रतिपद्यते कथ-
मस्याऽऽग्नेय्योऽनुशस्ता भवन्तीति, इति ।

सामगानां यान्याज्यस्तोत्राणि तद्दच आग्नेय्य आम्नाताः । अग्न आयाहि (६ १६-१०) इत्यादिषु सामगैराज्यस्तोत्रपाठात् । होता तु वायवायाहि (५ ५१-५) इत्यनया वायव्यया प्रउगशस्त्रं प्रारभते । अतोऽनेन विलक्षण देवताकेन शस्त्रेणाऽऽग्नेय्य ऋचः कथमनुशस्ता भवन्ति । अनुकूलशंसनाभावे स्तुतमनुशंसतीति शास्त्रान्तरं विरुध्येतेत्याक्षेपः ।

तस्योत्तरं दर्शयति -

अग्नेर्वा एताः सर्वास्तन्वो यदेता देवताः, इति ।

सप्तसु ऋचेषु या एता वाय्यादयो देवताः प्रतीयन्ते ताः सर्वा अग्नेरेव शरीरभूताः । अतोऽग्निविषयमेव कृत्स्नं शस्त्रं संपद्यत इति स्तोत्रगता आग्नेय्य ऋचोऽनुशस्ता भवन्ति ।

अग्नेः प्रथमऋचप्रतिपादितायाः वायुदेवतायाः स्वरूपं दर्शयति-

स यदग्निः प्रवानिव दहति तदस्य वायव्यं रूपं तदस्य तेनानुशंसति, इति ।

प्रवानिव प्रकर्षवानेव सन्नधिकज्वालया दहत्यग्निरिति यदस्ति तत्प्रकर्षात्मकं वायुसंबन्धिना वायुरूपेणायं होता तदग्निरूपमनुशंसति ।

द्वितीयऋचप्रतिपादितायाः इन्द्रवायुदेवतायाः सारूप्यं दर्शयति-

अथ यद्द्वैधमिव कृत्वा दहति द्यौ वा इन्द्रवायू तदस्यैन्द्रवायवं रूपं तदस्य तेनानुशंसति, इति ।

ज्वालाद्वयमिव कृत्वा यदा दहति तदा द्वित्वसाम्यात्तज्ज्वालाद्वयमिन्द्रवायुसंबन्धि रूपं भवति । अन्यत्पूर्ववत् ।

तृतीयऋचे सारूप्यं दर्शयति-

अथ यदुच्च हृष्यति नि च हृष्यति तदस्य मैत्रावरुणं रूपं तदस्य तेनानुशंसति, इति ।

ज्वलतोऽग्नेरौन्नत्यमुद्धर्षः । ज्वालाशान्त्या नीचत्वं निहर्षः । तदुभयं मित्रावरुणसंबन्धि रूपम् । मित्रं दृष्टवतो हर्षेणोन्नतत्वात्तन्मित्ररूपम् । वरुणसंबन्धिनीनामपां नीचगामित्वादितरद्वरुणस्य रूपम् । तदीयऋचेनाग्निरनुशस्तो भवति ।

तत्रैव युक्त्यन्तरमाह—

स यदग्निर्घोरसंस्पर्शस्तदस्य वारुणं रूपं
तं यद्घोरसंस्पर्शं सन्तं मित्रकृत्येवोपासते
तदस्य मैत्रं रूपं तदस्य तेनानुशंसति, इति ।

सोऽग्निर्घोरसंस्पर्श उष्णसंस्पर्श इति यदस्ति तदस्याग्नेर्वरुणसंबन्धि रूपं वरुणस्योग्रत्वात् । घोरसंस्पर्शं सन्तं स्पष्टुमशक्यमपि तमाग्निं शीतार्ताः प्राणिनो मित्रकृत्या मित्रस्य कृतिः कार्यं समीपेऽवस्थानं तेनैवैनमुपासते शीतपरिहाराय हस्तावुदरं पृष्ठं च वह्निसमीपे प्रतापयन्तो वह्निं सेवन्ते । तदेवत्सेवनमस्याग्नेर्मैत्रसंबन्धि रूपम् । ततोऽस्याग्नेः संबन्धिना तेन मैत्रावरुणरूपेणायं होता वह्निमनुशंसति ।

चतुर्थर्चे सारूप्यं दर्शयति—

अथ यदेनं द्वाभ्यां बाहुभ्यां द्वाभ्यामर-
णीभ्यां मन्थन्ति द्वौ वा अश्विनौ तदस्याऽऽ-
श्विनं रूपं तदस्य तेनानुशंसति, इति ।

अश्विनोर्द्वित्वाद्धस्तद्वयेनारणिद्वयेन च मन्थनमस्याग्नेराश्विनं रूपम् ।

पञ्चमर्चे सारूप्यं दर्शयति—

अथ यदुच्चैर्घोष स्तनयन्बबबा कुर्वन्निव
दहति यस्माद्भूतानि विजन्ते तद-
स्यैन्द्रं रूपं तदस्य तेनानुशंसति, इति ।

स्तनयन्ध्वनिं कुर्वन् । स एव ध्वनिस्त्रिभिर्बकारैरनुक्रियते । यत ईदृशाद्ध्वनिसाहितादग्ने रूपाद्भूतानि प्राणिनो विजन्ते बिभ्यति । तद्भयकारणध्वनिसाहितमिन्द्रस्य सङ्ग्रामार्थमास्फोटनं कुर्वतः शत्रुभयकारिणो रूपम् ।

षष्ठर्चे सारूप्यं दर्शयति—

अथ यदेनमेकं सन्तं बहुधा विहरन्ति तदस्य
वैश्वदेवं रूपं तदस्य तेनानुशंसति, इति ।

अग्नेराहवनीयादिस्थानेष्वाग्नीध्रादिधिष्ण्येषु च बहुधा विहरणं यदस्ति तद्विशेषां देवानां रूपं तेषामपि बहुत्वात् ।

सप्तमऋचे सारूप्यं दर्शयति—

अथ यत्स्फूर्जयन्वाचामिव वदन्दहति तदस्य सारस्वतं रूपं तदस्य तेनानुशंसति, इति ।

यथा जनो वाचं वदति तथैवाग्निः स्फूर्जयति, ईषद्विच्छिद्य विलक्षणोच्चारणमिव शब्दं करोति । तदेतद्वागुच्चारणसदृशं ध्वनिकरणं सरस्वतीसंबद्धं रूपम् ।

इत्थमग्नेर्वाय्वादिदेवतानां च सारूप्यद्वाराऽनुशंसनमुपपाद्योपसंहरति—

एवमु हास्य वायव्ययैव प्रतिपद्यमानस्य तृचेन तृचेनैवैताभिर्देवताभिः स्तोत्रियोऽनुशस्तो भवति, इति

एवमु हानेनैवोक्तप्रकारेण वायवायाहीत्येतया वायुदेवताकयैवर्चा शस्त्रं प्रारभमाणस्य होतुस्तेन तेनोक्तऋचैव प्रतिपादिताभिर्वाय्वादिदेवताभिराग्निसदृशीभिः स्तोत्रियः स्तोत्रसंबन्धी तृचोऽग्न आयाहीत्यादिक आग्नेयोऽप्यनुशस्तो भवति । तस्यानुष्ठानं यथा भवति तथा प्रउगशस्त्रमनुष्ठितं भवतीत्यर्थः ।

अथ शस्त्रयाज्यां विधत्ते—

विश्वेभिः सोम्यं मध्वग्न इन्द्रेण वायुना ।
पिबा मित्रस्य धामभिरिति वैश्वदेवमुक्थं शस्त्वा वैश्वदेव्या यजति यथाभागं तद्देवताः प्रीणाति ॥ ४ ॥ इति ।

हेऽग्ने विश्वेभिः सर्वैर्देवैः सह विशेषत इन्द्रेण वायुना च सह तथा मित्रस्य धामभिः स्थानैर्युक्तः सन्सोम्यं मधु सोमसंबन्धिनं मधुरं रसं पिब । विश्वेभिरित्यादिका सेयमृग्वैश्वदेवी तया यजति तां याज्यां पठेत् । कदा पठेदिति वदुच्यते । वैश्वदेवं बहुदेवताकमुक्थं शस्त्रं प्रउगनामकं शस्त्वा पश्चात्पठेत् । तथा सति स्वस्वभागमनतिक्रम्य सर्वा देवतास्तर्पयति ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऐतरेयब्राह्मणभाष्ये एकादशाध्याये चतुर्थः खण्डः ॥ ४ ॥ [७९]

---

१ क. १-१४-१० ॥

अथ शस्त्रयाज्यान्ते पठनीयं वषट्कारं विधत्ते—

देवपात्रं वा एतद्यद्वषट्कारो वषट्करोति
देवपात्रेणैव तद्देवतास्तर्पयति, इति ।

वौषडिति मन्त्रो वषट्कारः । स च देवपात्रं देवानां पानसाधनं तस्माद्वषट्कुर्याद्वौषडित्येव पठेत् । तथा सति देवानामुचितेनैव पानसाधनेन सर्वा देवतास्तर्पयतीति ।

तत ऊर्ध्वं पठनीयमनुवषट्कारमन्त्रं विधत्ते—

अनुवषट्करोति तद्यथाऽदोऽश्वान्वा गा वा
पुनरभ्याकारं तर्पयन्त्येवमेवैतद्देवताः पुनर-
भ्याकारं तर्पयन्ति यदनुवषट्करोति, इति ।

सोमस्याग्ने वीहीत्ययं मन्त्रोऽनुवषट्कारस्तं पठेत् । तत्र लोकेऽदः किंचिदिदं निदर्शनमस्ति । कथमिति तदुच्यते । यथा मनुष्याः स्वकीयानश्वान्वा स्वकीया गा वा पुनरभ्याकारं पौनःपुन्येन तृणोदकादिभिरभिमुखीकृत्याभिमुखीकृत्य तर्पयन्ति कण्डूयनेन प्रियशब्देन वा लालयित्वा यथेष्टघासं प्रयच्छन्ति, एवमेवैतेनानुवषट्कारेण पुनःपुनर्देवता अभिमुखीकृत्य यजमानो हविषा तर्पयति ।

अनुवषट्कारप्रशंसार्थं चोद्यमुद्भावयति—

इमानेवाग्नीनुपासत इत्याहुर्धिष्ण्यानथ कस्मात्पू-
र्वस्मिन्नेव जुह्वति पूर्वस्मिन्वषट्कुर्वन्तीति, इति ।

सोमसध्यवार्तिषु धिष्ण्येष्वाग्नीध्राद्यग्नयो ये विहितास्तानग्नीनृत्विजः समीपे स्थित्वोपासत एव सेवन्त एव केवलं नतु तेषु जुह्वति नापि वषट्कुर्वन्ति । पूर्वस्मिन्नेवोत्तरवेदिस्थितेऽग्नावृत्विजो जुह्वति च तत्रैव वषट्कुर्वन्ति च । अथैवं सति धिष्ण्यगतानामग्नीनां प्रीतिर्नास्ति । कस्मादेवं वैषम्यं क्रियत इति चोद्यवादिन आहुः ।

तत्रोत्तरं दर्शयति—

यदेव सोमस्याग्ने वीहीत्यनुवषट्क-
रोति तेन धिष्ण्यान्प्रीणाति, इति ।

हेऽग्न इति जात्याकारेणाग्निं संबोध्य सोमस्य सोमरसं वीहि पिबेत्येवं

मन्त्रेण होताऽनुवषट्करोति यदस्ति तेन विष्ण्यानग्नीन्होता तर्पयति । तस्मान्न वैषम्यम् ।

प्रकारान्तरेण प्रशंसितुं पुनश्चोद्यद्वमुद्भावयति-

असंस्थितान्सोमान्भक्षयन्तीत्याहुर्येषां नानुवषट्करोति को नु सोमस्य स्विष्टकृद्भाग इति, इति ।

येषां द्विदेवत्यग्रहाणामर्थे होता नानुवषट्करोति ते द्विदेवत्याः सोमा असंस्थिता असमाप्ता देवतार्थहोमस्यासमाप्तेः कथमृत्विजस्तान्द्विदेवत्यान्भक्षयन्तीत्येके चोद्यमाहुः । दर्शपूर्णमासादिषु स्विष्टकृद्भागेन ततः पूर्वेषां हविषां संस्कारो भवति । ततः सोमस्यापि संस्काराय को नाम स्विष्टकृद्भाग इति द्वितीयं चोद्यम् ।

तत्रोत्तरमाह -

यद्वाव सोमस्याग्ने वीहीत्यनुवषट्करोति तेनैव संस्थितान्सोमान्भक्षयन्ति स उ एव सोमस्य स्विष्टकृद्भागो वषट्करोति ॥ ५ ॥ इति ।

मन्त्रे सोमस्येति जातिमात्रमुद्दिश्यानुवषट्करोतीति यदेवास्ति तेनैवानुवषट्काररहिता द्विदेवत्यादयः सर्वे सोमाः संस्थिताः समाप्तास्तस्मात्संस्थितानेव द्विदेवत्यानृत्विजो भक्षयन्ति । स उ एव यथोक्तोऽनुवषट्कार एव सोमस्य स्विष्टकृद्भागोऽतो वषट्करोति । उक्तस्य सर्वस्य प्रयोजनस्य सिद्ध्यर्थमनुवषट्कुर्यादित्यर्थः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऐतरेयब्राह्मणभाष्ये एकादशाध्याये पञ्चमः खण्डः ॥ ५ ॥ [७३]

अथ वषट्कारमाश्रित्यैवाभिचारप्रयोग उच्यते-

वज्रो वा एष यद्वषट्कारो यं द्विष्यात्तं ध्यायेद्वषट्करिष्यंस्तस्मिन्नेव तं वज्रमास्थापयति, इति ।

वषट्कारस्य वज्ररूपत्वात्तत्कालध्याने च द्वेष्ये वज्रप्रहारो भवति ।

अथ वौषडित्यस्य वषट्कारस्योत्तरभागं यशंसति-

षळिति वषट्करोति षड्वा ऋतव ऋतूनेव

तत्कल्पयत्यृतून्प्रतिष्ठापयत्यृतून्वै प्रतितिष्ठत
इदं सर्वमनु प्रतितिष्ठति यदिदं किंच, इति ।

षडित्यनेन मन्त्रभागेण वसन्तादिषड्ऋतुसंख्याया बुद्धिस्थत्वाद्ऋतून्कल्पयति स्वस्वप्रयोजनसमर्थान्करोति । तावतैवो व्याकुलतामन्तरेण प्रतितिष्ठति ।

तत्प्रतिष्ठार्थं प्रामाणिकपुरुषवचनोदाहरणेन द्रढयति—

प्रतितिष्ठति य एवं वेद तदु ह स्माऽऽह हिरण्य-
दन्वैद एतानि वा एतेन षट्प्रतिष्ठापयति द्यौर-
न्तरिक्षे प्रतिष्ठिताऽन्तरिक्षं पृथिव्यां पृथिव्यप्स्वापः
सत्ये सत्यं ब्रह्मणि ब्रह्म तपसीत्येता एव
तत्प्रतिष्ठाः प्रतितिष्ठन्तीरिदं सर्वमनु प्रतितिष्ठति
यदिदं किंच प्रतितिष्ठति य एवं वेद, इति ।

हिरण्मयी दन्ता यस्यासौ हिरण्यदन् । बिदस्य पुत्रो बैदस्तादृशो मुनिः स्तदु ह तदेव वचनमाह स्म । किं वचनमिति तदुच्यते । एतान्येव द्युलोकादीनि ब्रह्मान्तानि षट्स्थानानि यानि सन्त्येतान्येवैतेन वषट्कारेण होता प्रतिष्ठापयति । तत्र द्युलोकस्याधस्तादन्तरिक्षं तस्मादन्तरिक्षे द्युलोक आश्रितः । तच्चान्तरिक्षं पृथिव्यामाश्रितम् । पृथिवी चाधोवर्तिनीष्वप्स्वाश्रिता । आपश्च सत्ये समाश्रिताः । जनेषु सत्यवादिषु सत्सु यथाकालं वृष्टिसंभवात् । सत्यं ब्रह्मणि वेदे प्रतिष्ठितम् । ईदृशमाचरणं सत्यमिति वेदेनैवावगमात् । वेदस्वपसि वषट्कारमन्त्रानुष्ठानरूपे प्रतिष्ठितः । वेदस्यानुष्ठानप्रतिपादनार्थत्वात् । इत्यनेन प्रकारेणैता द्युलोकादय एव यथावत्तेन वषट्कारेण यदा परस्परप्रतिष्ठिता भवन्ति तदानीं प्रतिष्ठारूपास्ताः पृथिव्याद्या एकैकत्र प्रतिष्ठिताः सन्ति । ता अनु पश्चाद्यदिदं किंच जगदस्ति तत्सर्वं प्रतितिष्ठति । य एवं वेदिता स च प्रतितिष्ठति ।

अथ वषट्कारमन्त्रस्य पूर्वोत्तरभागावुभौ प्रशंसति—

वौषळिति वषट्करोत्यसौ वाव वावृतवः षळे-
तमेव तदृतुष्वादधात्यृतुषु प्रतिष्ठापयति याद्-

गिव वै देवेभ्यः करोति तादृगि-
वास्मै देवाः कुर्वन्ति ॥ ६ ॥ इति ।

मन्त्रे पूर्वभागो वौशब्दो निपातत्वाद्वा गतिप्रजनेत्यादिधातुजत्वाद्वा गमनस्वभावमादित्यमभिधत्ते । तदेतदभिप्रेत्यासौ वाव वावित्युक्तम् । वसन्ताद्या ऋतवः संख्यावशात्षडित्यभिधीयन्ते । तन्मन्त्रपाठेनैतमेव वौशब्दाभिधेयमादित्यं षट्शब्दाभिधेयेष्वृतुष्वादधाति । न केवलमाधानमात्रं किंतु तेष्वृतुषु प्रतिष्ठापयति स्थैर्येणावस्थापयति । एवं सत्यसौ होता देवेभ्यो यादृशमेव प्रयोजनं करोति तादृशमेव प्रतिष्ठारूपं प्रयोजनमस्मै होत्रे तद्द्वारेण यजमानाय देवाः कुर्वन्ति ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऐतरेय-

ब्राह्मणभाष्ये एकादशाध्याये षष्ठः खण्डः ॥ ६ ॥ [७७]

अथ फलविशेषार्थं वषट्कारस्यावान्तरभेदानाह—

त्रयो वै वषट्कारा वज्रो धामच्छद्रिक्तः इति ।

वज्र इति प्रथमस्य वषट्कारभेदस्य नाम । धामच्छादिति द्वितीयस्य । रिक्त-इति तृतीयस्य ।

तेषां मध्ये वज्रस्य स्वरूपं दर्शयति—

स यमेवोच्चैर्बलि वषट्करोति स वज्रः, इति ।

स होता यमेव मन्त्रमुच्चैर्यथा भवति बलि च यथा भवति तथा वषट्करोति स मन्त्ररूपो वषट्कारो वज्र इत्युच्यते । अत्रोच्चैःशब्देन ध्वनेराधिक्यमुच्यते बलिशब्देनाक्षरपारुष्यं तदुभययुक्तो वज्रः ।

तस्य प्रयोगं विधत्ते—

तं तं प्रहरति द्विषते भ्रातृव्याय वधं
योऽस्य स्तृत्यस्तस्मै स्तर्तवै तस्मात्स
भ्रातृव्यवता वषट्कृत्यः , इति ।

यो द्वेष्यो यजमानस्य स्तृत्यो हन्तव्यो भवति तस्मै स्तर्तवै तं हन्तुं द्विषते द्वेषं कुर्वते भ्रातृव्याय शत्रवे तं तं वधं प्रहरति । वधशब्दो हननसाधनं वज्रं ब्रूते । यदा यदाऽपेक्षितस्तदा तदेति विवक्षया तं तमिति वीप्सा । यस्मात्प्रह-

रणहेतुर्वज्रस्तस्मात्स वज्रो भ्रातृव्यवता यजमानेन वषट्कृत्यो वषट्कारूपेण प्रयोक्तव्यः । होतृप्रयोग एव यजमानप्रयोगः । दक्षिणया होतुः क्रीतत्वात् ।

धामच्छदः स्वरूपं दर्शयति -

अथ यः समः संततोऽनिर्हाणर्चः स धामच्छत्, इति ।

यो वषट्कारः पूर्वोक्तबोलत्वादिदोषरहितो यथाऽधीतस्तथैवोच्चारितः संतनो याज्यया सह विच्छेदरहितो निःशेषेण हानं परित्यागो यस्या ऋचः सा निर्हाणा । तथाविधा काचिद्याज्यारूपा यस्य वषट्कारस्य सोऽयं निर्हाणर्चः । याज्यापाठहीन इत्यर्थः । तद्वैलक्षण्यादनिर्हाणर्चः संपूर्णयाज्यापाठोपेत इत्यर्थः । कीदृशो वषट्कारो धामच्छदिति धाम यज्ञस्थानं तत्र यथा रक्षांसि न प्रविशन्ति तथा छादयति स धामच्छत् ।

तस्य प्रयोगं विधत्ते -

तं तं प्रजाश्च पशवश्चानूपतिष्ठन्ते तस्मात्स प्रजाकामेन पशुकामेन वषट्कृत्यः, इति ।

प्रजाभिः पशुभिश्चान्वयार्थं तं तंप्रति वीप्सा तं वषट्कारं धामच्छदं प्रजाश्च पशवश्च सेवन्ते । तस्मात्तादृक्कामेन धामच्छद्वषट्कारः प्रयोक्तव्यः ।

रिक्तस्य स्वरूपं दर्शयति -

अथ येनैव षळवराध्नोति स रिक्तः, इति ।

षट्शब्दो वषट्कारमभिधत्ते भीमसेनो भीम इतिवदेकदेशेन व्यवहारात् । येनैवोच्चारणेन षळवराध्नोति वषट्कारोऽवरार्धं समृद्ध्यभावं प्रामोति । नीचोच्चारणेन वषट्कारस्य समृद्ध्यभावः । स तथोच्चारितो वषट्कारो रिक्त इत्युच्यते । उच्चध्वनियोग्ये तदभावे रिक्तभायत्वात् ।

तमेतं रिक्तं निन्दति -

रिणक्त्यात्मानं रिणक्ति यजमानं पापीयान्वषट्कर्ता भवति पापीयान्यस्मै वषट्करोति तस्मात्तस्याऽऽशां नेयात्, इति ।

रिक्ताख्यो वषट्कारः प्रयुज्यमानः सन्होतुरात्मानं रिणक्ति रिक्तीकरोति समृद्धिहीनं दरिद्रं करोतीत्यर्थः । तथा यजमानमपि रिणक्ति । अतस्तेन वषट्कर्ता होता पापीयान्भवति । अत्यन्तनरकसाधनपापेन युक्तो भवति ।

व(य)स्मै यजमानाय वषट्करोति सोऽपि पापीयान्भवति । तस्मात्तस्य वषट्कार-स्याऽऽशां नेयान्न प्राप्नुयादिच्छामपि न कुर्यात्किमुत प्रयोगमित्यर्थः ।

प्रश्नोत्तराभ्यां वषट्कारस्येष्टानिष्टफलप्राप्तिसामर्थ्यं दर्शयति-

किं स यजमानस्य पापभद्रमाद्रियेतेति ह स्माऽऽह योऽस्य होता स्यादित्यत्रैवैनं यथा कामयेत तथा कुर्यात्, इति ।

तदेतद्वाक्यं प्राणानां वा एतदुक्थमित्यस्मिन्खण्डे प्रउगविषयं यथा व्याख्यानं तथैवात्र वषट्कारविषयं व्याख्यातव्यमिति ।

अनिष्टफलसाधनत्वं दर्शयति-

यं कामयेत यथैवानीजानोऽभूत्तथैवेजानः स्यादिति यथैवास्य ऋचं ब्रूयात्तथैवास्य वषट्कुर्यात्सदृशमेवैनं तत्करोति, इति ।

अनीजानोऽकृतयज्ञः पुरुषो यथैव फलरहितोऽभूत्तथैवेजानः कृतयज्ञोऽपि फलरहितः स्यादिति यं यजमानं होता कामयेतास्य यजमानस्य येन स्वरेण याज्यां ब्रूयात्तेनैव स्वरेण वषट्कारमपि ब्रूयात् । तथा सत्येनं कृतयज्ञं यज्ञर-हितेन सदृशं फलरहितं करोति ।

अनिष्टफलान्तरसाधनत्वं दर्शयति-

यं कामयेत पापीयान्स्यादित्युच्चैस्त-रामस्य ऋचमुक्त्वा शनैस्तरां वषट्-कुर्यात्पापीयांसमेवैनं तत्करोति, इति ।

पापीयान्दरिद्रो नरकयोग्यो वा यजमानः स्यादिति कामयमानो होतर्च-मतिशयेनोच्चैरुच्चार्य वषट्कारमतिशयेन नीचैर्ब्रूयात् । तथा सत्येनं यजमानं पापीयांसमेव करोति ।

अथेष्टफलसाधनत्वं दर्शयति-

यं कामयेत श्रेयान्स्यादिति शनैस्त-रामस्य ऋचमुक्त्वोच्चैस्तरां वषट्कुर्या-च्छ्रिय एवैनं तच्छ्रियामादधाति, इति ।

श्रेयान्दारिद्र्यरहितः पापरहितश्च यजमानः स्यादिति कामयमानो होतर्चं याज्यां शनैरुच्चार्य वषट्कारमतिशयेनोच्चैरुच्चारयेत् । तच्च श्रिये संपदर्थमेव भवति । तेन प्रयोगेणैनं यजमानं श्रियामैहिकामुष्मिकसंपदि स्थापयति ।

याज्यावषट्कारयोर्नैरन्तर्यं विधत्ते -

संतत्या वषट्कृत्यं संतत्यै, इति ।

ऋचा याज्यया सह संततं निरन्तरं यथा भवति तथा वषट्कृत्यं वषट्कार उच्चारणीयः । तच्च यजमानस्य श्रेयःसंतत्यै संपद्यते ।

वेदनं प्रशंसति–

संधीयते प्रजया पशुभिर्य एवं वेद ॥ ७ ॥ इति ।

संधीयते संयुज्यते ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऐतरेय ब्राह्मणभाष्ये एकादशाध्याये सप्तमः खण्डः ॥ ७ ॥ [७८]

अथ होतुर्वषट्कारकाले देवताध्यानं विधत्ते–

यस्यै देवतायै हविर्गृहीतं स्यात्तां ध्यायेद्वषट्करिष्यन्साक्षादेव तद्देवतां प्रीणाति प्रत्यक्षाद्देवतां यजति, इति ।

अध्वर्युर्यां देवतामुद्दिश्य हविर्गृह्णाति तां देवतामयं होता वषट्करिष्यन्वषट्कारायोद्युक्तः सन्ध्यायेन्मनसा शास्त्रीयां देवतामूर्तिं सम्यगनुसंधाय पश्चाद्वषट्कुर्यादित्यर्थः । एवं सति साक्षादेव प्रत्यक्षेणैव देवतां तर्पयति । न केवलं तृप्त्यर्थमेव देवतायाः साक्षात्कारः किंतु प्रत्यक्षात्प्रत्यक्षेणैव देवतां यजति यागकाले प्रत्यक्षेण पश्यतीत्यर्थः । ननु देवता चक्षुषा न दृश्यते कथमस्याः प्रत्यक्षत्वमिति चेत् । नायं दोषः । मानसप्रत्यक्षस्य विवक्षितत्वात् । यथा पुरोवर्तिनी देवता चक्षुषा दृश्यते तथैव चिन्त्यमानाऽपि मनसा दृश्यत एव ।

होतुर्वषट्कारादूर्ध्वमनुमन्त्रणं विधत्ते—

वज्रो वै वषट्कारः स एष प्रहृतोऽशान्तो दीदाय तस्य हैतस्य न सर्व इव शान्तिं वेद न प्रतिष्ठां तस्माद्धाप्येतर्हि भूयानिव

मृत्युस्तस्य हैषैव शान्तिरेषा प्रतिष्ठा वागि-
त्येव तस्माद्वषट्कृत्य वषट्कृत्य वागित्यनुम
न्त्रयेत स एनं शान्तो न हिनस्ति, इति ।

वषट्कारस्य वज्रत्वमसकृदुक्तम् । स एष वषट्कारात्मको वज्रः परस्योपरि प्रहृतः सन्नशान्त उग्रो दीदाय दीप्यते । तस्य वज्रस्य शान्तिमुपशमप्रकारं सर्व इव सर्वोऽपि पुरुषो न वेद । उपद्रवशान्तेरूर्ध्वं वषट्कारस्योग्रत्वपरिहारेण क्वचिदवस्थानं प्रतिष्ठा तामपि सर्वो न वेद । तस्माच्छान्तिप्रतिष्ठाज्ञानाभावादे-तर्ह्यपीदानीमपि लोके मृत्युर्भूयानिव बहुभूत एव प्रवर्तते । तस्य तादृश्य (श) व-षट्कारवज्रस्यैषैव वक्ष्यमाणा शान्तिः शमनोपायः । तथैषा वक्ष्यमाणैव प्रतिष्ठा परोपद्रवरहिताऽवस्थितिः वागित्येवेत्यनेन साऽभिधीयते । उपरिष्टाद्वक्ष्यमाणस्य मन्त्रस्य स्मरणमिदम् । वागोज इत्यादिको यो मन्त्रः स एव शमनोपायो न त्वन्यः कश्चिदस्ति । तस्माद्वषट्कृत्य वषट्कृत्य यदा यदा वषट्करोति तदा तदा वागिति मन्त्रेणानुमन्त्रयेत । स वज्रस्तावता शान्त एनं न हिनस्ति । अय मेकः पक्षः ।

पक्षान्तरमभिप्रेत्यान्येन मन्त्रेणानुमन्त्रणं विधत्ते-

वषट्कार मा मां प्रमृक्षो माऽहं त्वां
प्रमृक्षं बृहता मन उपह्वये व्यानेन शरीरं
प्रतिष्ठाऽसि प्रतिष्ठां गच्छ प्रतिष्ठां मा
गमयेति वषट्कारमनुमन्त्रयेत, इति ।

हे वषट्कार वज्ररूप मां यजमानं मा प्रमृक्षः प्रमृष्टं विनष्टं मा कार्षीः । अहमपि त्वां मा प्रमृक्षं विनष्टं मा कार्षम् । बृहता प्रौढेन यज्ञेन मनस्त्वदीयमु-पह्वयेऽनुजानामि । यथा व्यानेन व्यानादिवायुना सह त्वदीयं शरीरमनुजा-नामि । अतस्त्वं सर्वस्य प्राणसंघस्य प्रतिष्ठाऽऽश्रयोऽसि । तदर्थं त्वमपि प्रतिष्ठां स्थैर्येणावस्थितिं गच्छ । ततो मामपि प्रतिष्ठां स्थैर्येणावस्थितिं प्रापयेत्यनेनानु-मन्त्रेणानुमन्त्रयेत ।

तमिमं द्वितीयपक्षं निन्दित्वा मन्त्रान्तरं दर्शयति-

तदु ह स्माऽऽह दीर्घमेतत्स-
दप्रभ्वोजः सह ओजः, इति ।

तदु ह तत्रैवानुमन्त्रणे ब्रह्मवादी कश्चिदाह स्म । किमाहेति तदुच्यते । एत त्पूर्वोक्तं मन्त्रवाक्यं दीर्घं सदपि वज्रं शमयितुमप्रभु न क्षमम् । कोऽसौ क्षमो मन्त्र इति स उच्यते । ओजः सह ओज इति पदत्रयात्मको मन्त्रः । मन्त्रार्थं तु श्रुतिरेव व्याख्यास्यति ।

तेन मन्त्रेणानुमन्त्रणं विधत्ते –

इत्येव वषट्कारमनुमन्त्रयेत, इति ।

एवकारः पूर्वमन्त्रव्यावृत्त्यर्थः ।

मन्त्रपदयोरर्थं दर्शयति–

ओजश्च ह वै सहश्च वषट्-
कारस्य प्रियतमे तन्वौ, इति ।

स्पष्टोऽर्थः ।

अनेन मन्त्रेणोग्रत्वशान्तिं दर्शयति–

प्रियेणैवैनं तद्धाम्ना समर्धयति, इति ।

प्रियतमयोः शरीरयोर्नामग्रहणे सति वषट्कारस्योग्रत्वरूपः कोपो गच्छति । तत एनं वषट्कारः प्रियेण धाम्ना सर्वभूतानामनुपद्रवकारिणा प्रियेण स्वरूपेण समृद्धं करोति । अत्र मन्त्रगतो द्वितीय ओजःशब्द आदरार्थ इत्यभिप्रायः ।

वेदनं प्रशंसति –

प्रियेण धाम्ना समृध्यते य एवं वेद, इति ।

अथ प्रियशरीरद्वयवाचकाभ्यां पदाभ्यां सहितमादौ विहितं मन्त्रमेव सिद्धान्तयति–

वाक्च वै प्राणापानौ च वषट्कारस्य एते
वषट्कृते वषट्कृते व्युत्क्रामन्ति ताननुमन्त्र-
येत वागोजः सह ओजो मयि प्राणापानावि-
त्यात्मन्येव तद्धोता वाचं च प्राणापानौ च
प्रतिष्ठापयति सर्वायुः सर्वायुत्वाय, इति ।

येयं वागस्ति यौ च प्राणापानौ स्तस्ते त्रयो वषट्कारस्वरूपम् । यदा यदा होता वषट्करोति तदा तदा वषट्काररूपा होतुर्वाक्प्राणापानाः शरीरादुत्क्रामन्त्यतस्तन्मा भूदिति तांस्त्रीन्वागित्यादिना प्राणापानावित्यन्तेन मन्त्रेणानुमन्त्रयेत । मन्त्रस्यायमर्थः । ओजः सह इत्याभ्यां प्रियशरीराभ्यामुपेत हे वषट्कार त्वत्प्रसादान्मय्योजो बलमस्तु । तथा वाक्प्राणापानाः सुखेन तिष्ठन्त्विति । अनेन मन्त्रेण होता स्वात्मन्येव वाचं च प्राणापानौ च स्थापयति । तावता स्वयं सर्वायुः शतसंवत्सरपरिमितेनाऽऽयुषा युक्तो भवति । एतच्च यजमानस्य सर्वायुष्ट्वाय संपद्यते । पूर्वत्र वषट्कृत्य वागित्यनुमन्त्रयेतेति वषट्कारानुमन्त्रणयोरेककर्तृकत्वमुक्तम् । अत्राप्यात्मन्येव तद्धोतेति ब्राह्मणे होतृकर्तृकत्वं प्रतीयते । ततोऽनुमन्त्रणस्य यजमानकर्तृकत्वमन्यैरुक्तं बाधित्वा होतृकर्तृकत्वमेव द्रष्टव्यम् ।

वेदनं प्रशंसति-

सर्वमायुरेति य एवं वेद ॥ ८ ॥ इति ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऐतरेय-
ब्राह्मणभाष्ये एकादशाध्यायेऽष्टमः खण्डः ॥ ८ ॥ (७९)

अथ प्रैषादीनां प्रशंसां विवक्षुरादौ प्रैषान्प्रशंसति-

**यज्ञो वै देवेभ्य उदक्रामत्तं प्रैषैः प्रैषमैच्छन्य-
त्प्रैषैः प्रैषमैच्छंस्तत्प्रैषाणां प्रैषत्वम् , इति ।**

ज्योतिष्टोमाख्यो यज्ञो यदा केनचिन्निमित्तेन देवेभ्य उदक्रामत्तदानीमुत्क्रान्तं यज्ञं प्रैषैर्होता यक्षदग्निं समिधेत्येवमाद्यैः प्रैषमन्त्रैस्तस्य यज्ञस्य प्रैषमाह्वानमैच्छन् । यस्मादेवं तस्मात्प्रैषन्त्याह्वानं कुर्वन्त्येभिरिति व्युत्पत्त्या मन्त्राणां प्रैषनाम संपन्नम् ।

अथ पुरोरुचः प्रशंसति-

**तं पुरोरुग्भिः प्रारोचयन्यपुरोरुग्भिः
प्रारोचयंस्तत्पुरोरुचां पुरोरुक्त्वम् इति ।**

वायुरग्रेगा इत्याद्याः सप्त पुरोरुचः । प्रउगग्यृचानां सप्तानां प्ररोचनहेतुत्वात् । तथाविधाभिः पुरोरुग्भिस्तं पूर्वमाहूतं यज्ञं देवाः प्रारोचयंस्तस्य यज्ञस्य रुचिमुत्पादितवन्तः । अतः पुरोरोचनाहेतुत्वात्पुरोरुगिति नाम संपन्नम् ।

वेदेः प्रशंसामाह–

तं वेद्यामन्वविन्दन्यद्वेद्यामन्वविन्दंस्तद्वेर्वेदित्वम्, इति ।

तं परोक्षितं यज्ञं सौमिक्यां वेद्यामन्वविन्दन्ननुकूलत्वेनोपलब्धवन्तः । अतो वेदनस्य लाभस्य स्थानत्वाद्वेदिरिति नाम संपन्नम् ।

ग्रहप्रशंसामाह -

तं वित्तं ग्रहैर्व्यगृह्णत यद्वित्तं ग्रहै-
र्व्यगृह्णत तद्ग्रहाणां ग्रहत्वम्, इति ।

वित्तं लब्धं तं यज्ञं ग्रहैरुपांशुयामादिभिर्विशेषेण स्वीकृतवन्तः । तस्माद्ग्रहणस्य स्वीकारस्य हेतुत्वाद्ग्रहनाम संपन्नम् ।

निविदां प्रशंसामाह–

तं वित्त्वा निविद्भिर्न्यवेदयन्यद्वित्त्वा निवि-
द्भिर्न्यवेदयंस्तन्निविदां निवित्त्वम्, इति ।

तं यज्ञं वित्त्वा लब्ध्वा ते देवाः परेभ्यो देवेभ्यो निविद्भिः पूर्वोक्तद्वादशपदादिरूपाभिर्न्यवेदयन्कथितवन्तः । तस्मान्निवेदनस्य परबोधनार्थकथनस्य हेतुत्वान्निविन्नाम संपन्नम् ।

अथ प्रैषकर्तुः प्रहृत्वगुणविधानार्थं प्रस्तौति–

महद्वाव नष्टैष्यभ्यल्पं वेच्छति यतरो
वाव तयोर्ज्याय इवाभीच्छति स
एव तयोः साधीय इच्छति, इति ।

नष्टं वस्तु प्रयत्नेन तत्र तत्रान्विष्यतीति नष्टैषी । तादृशः पुरुषो द्विविधः । तत्र कश्चिन्महद्वाव नष्टाद्वस्तुनोऽधिकमेवाभीच्छति । नष्टादल्पं वाऽन्यः कश्चिदिच्छति । तयोर्मध्ये यतरो वाव य एव पुरुषो ज्याय इव महदेवेच्छति स एव पुरुषस्तयोर्मध्ये साधीयोऽत्यन्तं साधु वस्त्विच्छति । अल्पं कामयमानस्तु न तथेत्यर्थः ।

अस्त्वेवं लौकिकन्यायः किं प्रकृत इत्याशङ्क्याऽऽह–

य उ एव पैतान्वर्तीयसो वर्षीयसो वेद स उ

एव तान्साधीयो वेद नष्टैष्यं ह्येतद्यत्प्रैषाः, इति ।

य उ एव यस्तु प्रैषवक्ता प्रैषप्रैन्त्रान्वर्षीयसो वर्षीयसोऽतिप्रवृद्धान्वेद । सर्वेषु प्रैषमन्त्रेषु प्रवृद्धत्वार्थं वीप्सा प्रयुक्ता । प्रैषमन्त्राः कस्मात्प्रवृद्धा इति चेत्, पुरोनुवाक्यानां संनिहितत्वात्ताभ्योऽधिकान्वर्षीयस इत्यवगन्तव्यम् । स उ एव दीर्घत्वाभिज्ञ एव तान्प्रैषमन्त्रान्साधीयो वेदातिशयेन सम्यग्वेद । ननु लौकिक न्यायोदाहरणे नष्टवस्तुनोऽन्वेषणमुदाहृतम् । इह तु प्रैषमन्त्राणामभिवृद्धिरुक्तेत्यतो लौकिकेनासंगतमिति चेत् । संगतमेवैतद्धि यस्माद्ये प्रैषाः सन्ति ते नष्टैष्यं नष्टस्य यज्ञस्यान्वेषणहेतवः ।

पुरोनुवाक्याभ्यो दीर्घत्वेन प्रैषान्प्रशस्य तदुच्चारणकाले प्रहृत्वं विधत्ते-

तस्मात्प्रह्वस्तिष्ठन्प्रेष्यति ॥ ९ ॥ इति ।

यस्मादतिशयेन वृद्धाः प्रैषास्तस्मात्तत्पाठकाले मैत्रावरुणः प्रह्वो विनयेन किंचिदवनतशिरास्तिष्ठन्ननुपविष्टो मन्त्रान्पठेत् । यथा लोके पितृगुर्वादीन्दृष्ट्वा प्रह्वस्तिष्ठति तद्वत् । यथा वा नष्टवस्त्वन्विच्छन्प्रह्वतादिना गुप्तश्चरति ।

अथ निविदां सवनभेदेन स्थानभेदं विवक्षुः प्रातःसवने स्थानविशेषं विधत्ते-

गर्भा वा एत उक्थानां यन्निविदस्तद्यत्पुरस्ता-
दुक्थानां प्रातःसवने धीयन्ते तस्मात्पराञ्चो
गर्भा धीयन्ते पराञ्चः संभवन्ति, इति ।

अग्निर्देवेद्ध इत्यादयो निविदः सन्ति । एते निविद्विशेषा उक्थानां शस्त्राणां गर्भा वै गर्भस्थानीया एव । तथा सति प्रातःसवनप्रयोगे शस्त्राणां पुरस्तान्नि-विदो धीयन्ते स्थाप्यन्ते स्थापयेयुरित्यर्थः । यस्माद्गर्भस्थानीयानां पुरस्थापनं तस्माल्लोकेऽपि गर्भाः पराञ्चः शरीरे परमुत्कृष्टं पुरोभागमञ्चन्तो गच्छन्तो धीयन्ते धार्यन्ते प्रसवकालेऽपि पराञ्चः पुरोभागं गच्छन्त उत्पद्यन्ते प्रयुक्ताः ।

माध्यंदिनसवने स्थानविशेषं विधत्ते-

यन्मध्यतो मध्यंदिने धीयन्ते तस्मान्मध्ये

गर्भा धृताः, इति ।

यस्माच्छस्त्राणां मध्ये निविदस्तस्माद्गर्भा उदरमध्ये धीयन्ते ।

तृतीयसवनविशेषं विधत्ते–

यदन्ततस्तृतीयसवने धीयन्ते तस्मादमुतोऽर्वाञ्चो गर्भाः प्रजायन्ते प्रजात्यै, इति ।

अन्ततः शस्त्रस्यान्तिमे देश एकामृचं शिष्ट्वा निविदः पठितव्याः । यस्मादेता अन्तिमदेशभागिन्यस्तस्माल्लोकेऽपि गर्भा अमुतो निवासस्थानान्मातुरुदरमध्यादर्वाञ्चोऽधोभागगताः प्रजायन्ते । तच्च यजमानस्य प्रजननार्थं भवति ।

वेदनं प्रशंसति–

प्रजायते प्रजया पशुभिर्य एवं वेद, इति ।

सवनत्रये विहितं निविदां स्थानत्रयं प्रशंसति–

पेशा वा एत उक्थानां यन्निविदस्तद्यत्पुरस्तादुक्थानां प्रातःसवने धीयन्ते यथैव प्रवयणतः पेशः कुर्यात्तादृक्तद्यन्मध्यतो मध्यंदिने धीयन्ते यथैव मध्यतः पेशः कुर्यात्तादृक्तद्यदन्ततस्तृतीयसवने धीयन्ते यथैवावपरज्जनतः पेशः कुर्यात्तादृक्तत्, इति ।

पेशा अलंकाराः । वेञ् तन्तुसंतान इति धातोर्वयनशब्दात्पत्तिः । कुविन्दस्य यत्प्रारम्भे वयनं तत्प्रवयणम् । लोके यथैव वाससः प्रवयणतो वयनप्रारम्भे पेशोऽलंकारं कुर्यात् । वर्णान्तरोपेतैस्तन्तुभिरलंकारः । तथैव प्रातःसवने शस्त्राणां पुरतो निवित्पठनं भवति । तच्च वस्त्रस्थानीयानामुक्थानां प्रथमभागेऽलंकाराय संपद्यते । शस्त्रमध्ये तत्पठनं वस्त्रमध्ये वर्णान्तरेणालंकारसमम् । अवपज्जनो वस्त्रस्यान्तभागस्तत्र यथा वर्णान्तरेणालंकारस्तादृगुक्थानामन्ते निवित्पठनम् ।

वेदनं प्रशंसति–

सर्वतो यज्ञस्य पेशसा शोभते य एवं वेद ॥१०॥ इति ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऐतरेयब्राह्मणभाष्ये एकादशाध्याये दशमः खण्डः ॥ १० ॥ [८१]

अथ निविद्विषयं बहुवक्तव्यं विवक्षुरादौ सूर्यसादृश्येन निविदः प्रशंसति-

सौर्या वा एता देवता यन्निविदस्तद्य-
त्पुरस्तादुक्थानां प्रातःसवने धीयन्ते
मध्यतो मध्यंदिने ततस्तृतीयसवन आदि-
त्यस्यैव तद्व्रतमनु पर्यावर्तन्ते, इति ।

या निविदः सन्ति ता एताः सूर्यसंबन्धिन्य एव देवताः । यथा सूर्यः पुरस्ताद्उदेत्यथ मध्ये स्थित्वा पश्चादन्तेऽस्तमेति एवं निविदोऽपि पुरस्तान्मध्येऽन्ते च स्थाप्यन्ते । तस्मादादित्यस्येव व्रतमाचरणमनु निविदः पर्यावर्तन्ते ।

तासां निविदां द्वादशपदरूपाणामेकैकस्मिन्पादेऽवसानं विधत्ते-

पच्छो वै देवा यज्ञं समभरंस्त-
स्मात्पच्छो निविदः शस्यन्ते, इति ।

देवाः पुरा यज्ञं पच्छः पादशः समभरन्नेकैकं भागं क्रमेण संपादितवन्त इत्यर्थः । तस्मादेता निविदोऽपि पादशः शंसनीयाः ।

निविदां शंसकाय होत्रेऽवदानं विधत्ते -

यद्वै तद्देवा यज्ञं समभरंस्तस्मादश्वः सम-
भवत्तस्मादाहुरश्वं निविदां शंस्त्रे दद्या-
दिति तदु खलु वरमेव ददाति, इति ।

यद्वै यस्मिन्नेव देशे तत्तदा देवा यज्ञं संपादितवन्तस्तस्माद्देशादश्व उत्पन्नः । अत एवाभिज्ञा इत्याहुः । किमाहुरिति तदुच्यते । निविदां शंसकायाश्वं दद्यादिति । तदु खलु तेनैवाश्वदानेन वरमेव श्रेष्ठमेव वस्तु ददाति प्रयच्छन्ति ।

द्वादशसु निवित्पदेषु कस्यापि पदस्यातिक्रमं निषेधति-

न निविदः पदमतीयात्, इति ।

एकमपि पदं न परित्यजेदित्यर्थः ।

विपक्षबाधकपूर्वं पूर्वपक्षं निगमयति -

यन्निविदः पदमतीयाद्यस्य तच्छिद्रं कुर्या-
द्यज्ञस्य वै छिद्रं स्रवद्यजमानोऽनु पापीयान्भ-
वति तस्मान्न निविदः पदमतीयात्, इति ।

पदस्य परित्यागे यज्ञस्य च्छिद्रं भवति तच्च स्रवति ततो यजमानो निन्द्यो भवति तस्मान्निवित्पदं न परित्यजेत् ।

पदानां वियर्यासं निषेधति—

न निविदः पदे विपरिहरेद्यन्निविदः पदे विपरिहरेन्मोहयेद्यज्ञं मुग्धो यजमानः स्यात्तस्मान्न निविदः पदे विपरिहरेत्, इति ।

विपरिहारो विपर्यासः । निविदः संबन्धि यत्पदद्वयं तन्न विपरिहरेद्विपरीतक्रमया न पठेत् । तथा सत्ययं होता यज्ञं मोहयेद्यज्ञे भ्रान्तिं जनयेत्ततो यजमानोऽपि मुग्धो भ्रान्तः स्यात्तस्माद्विपर्यासो न कर्तव्यः ।

निवित्पदसंश्लेषणे(णं) निषेधति—

न निविदः पदे समस्येद्यन्निविदः पदे समस्येद्यज्ञस्य तदायुः संहरेत्प्रमायुको यजमानः स्यात्तस्मान्न निविदः पदे समस्येत्, इति ।

पदयोः संश्लेषणे यज्ञस्याऽऽयुः संहृतं भवेद्यज्ञो विनश्येदित्यर्थः । ततो यजमानो म्रियेत तस्मात्पदद्वयं न संश्लेषयेत् ।

अनेन निषेधेन सर्वेषां पदानां परस्परविश्लेषणप्राप्तौ मध्यमयोर्द्वयोः पदयोः संश्लेषं विधत्ते—

प्रेदं ब्रह्म प्रेदं क्षत्त्रमित्येते एव समस्येद्ब्रह्मक्षत्त्रयोः संश्रित्यै तस्माद्ब्रह्म च क्षत्त्रं च संश्रिते, इति ।

निवित्पदानां मध्ये प्रेदं ब्रह्मेत्येकं पदं प्रेदं क्षत्त्रमित्यपरं पदम् । उभे एव संश्लेषयेत् । एवकार इतरसंश्लेषव्यावृत्त्यर्थः । तदेतन्मेलनं ब्राह्मणक्षात्त्रियजात्योः परस्पराश्रयणाय भवति । तस्मादेव लोके जातिद्वयं परस्परमाश्रित्य तिष्ठति । ब्राह्मणो धर्मं प्रवर्तयति । क्षत्त्रियस्तस्य रक्षां करोति ।

निवित्पदानां प्रक्षेपस्याऽऽश्रयसूक्ते कंचिन्नियमं विधत्ते—

न तृचं न चतुर्ऋचमतिमन्येत निविद्धानमेकैकं वै निविदः पदमृचं सूक्तं प्रति तस्मान्न तृचं न चतुर्ऋचमतिमन्येत निविद्धानं

निविदा ह्येव स्तोत्रमतिशस्तं भवति, इति ।

त्रिऋचो यस्मिन्सूक्ते तत्त्रिचम् । चतस्र ऋचो यस्मिन्सूक्ते तच्चतुर्ऋचम् । तादृशमुभयविधं सूक्तमतिक्रम्य निविद्धानं निवित्पदानां प्रक्षेपं न मन्येत न चिन्तयेत् । एतदुक्तं भवति । त्रिचतुरमात्रचोत्सूक्तादर्वाचीने सूक्ते निविदं न दध्यात्किंतूभयस्मिन्नेव दध्यादिति । निविदः संबन्धि यदेकैकमेव पदं तदेव प्रत्यृचं प्रतिसूक्तं च समर्थं भवति । यस्मादीदृशं सामर्थ्यं तस्मादित्युक्तार्थोपसंहारः । अधिके सूक्ते निवित्पदेषु प्रक्षिप्तेषु निविदैव स्तोत्राविशंसनं कृतं भवति । ऋचं नापेक्षेत तदित्यर्थः ।

तृतीयसवने विशेषं विधत्ते-

एकां परिशिष्य तृतीयस-
वने निविदं दध्यात्, इति ।

सूक्ते येयमृगन्त्या तामवस्थाप्य ततः पूर्वमेव तृतीयसवने निविदं प्रक्षिपेत् ।

विपक्षबाधपुरःसरं स्वपक्षमुपसंहरति-

यदहे परिशिष्य दध्यात्प्रजननं तदुपहन्या-
द्गर्भैस्तत्प्रजा व्यर्धयेत्तस्मादेकामेव परि-
शिष्य तृतीयसवने निविदं दध्यात्, इति ।

यदि द्वे ऋचौ परिशिष्य ततः पुरा निविदं दध्यात्तदानीं प्रजोत्पादनसाधनं विनाशयेत् । पुत्रादयः प्रजा गर्भैर्व्यर्धयेद्वियुक्ताः कुर्यात् । प्रजननमुपहन्यादित्यनेन यजमानस्य प्रजोत्पादनराहित्यम् । प्रजा व्यर्धयेदित्यनेन पूर्वमुत्पन्नानां पुत्रादीनामपत्यराहित्यम् । तस्मादित्युपसंहारः ।

अथ निविद्धानीयेन सूक्तेन निविदतिक्रमं निषेधति-

न सूक्तेन निविदमतिपद्येत, इति ।

यत्सूक्तं निविद्धानार्हं निविदमतिक्रम्य तेन सूक्तेन न पद्येत निवित्प्रक्षेपं परित्यज्य केवलं तत्सूक्तं न पठेदित्यर्थः ।

प्रमादान्निवित्प्रक्षेपविस्मृतौ पुनस्तत्सूक्ते निविदं प्रक्षिप्य पाठो भ्रान्त्या प्रसक्तस्तं निषेधति-

येन सूक्तेन निविदमतिपद्येत न तत्पु-
नरुपनिवर्तेत वास्तुहमेव तत्, इति ।

निविदमतिक्रम्य परित्यज्य निवित्प्रक्षेपयोग्येन (ण) येन सूक्तेन पद्येतानुष्ठानं प्राप्नुयात्तद्विस्मृतनिवित्कं सूक्तं पुनर्नोपनिवर्तेत भूयो निविदं प्रक्षि-य न पठेत् । तत्र हेतुरुच्यते । तद्विस्मृतनिवित्कं सूक्तं वास्तुहमेव । वास्तुशब्देन निविदः स्थानमुच्यते । तस्य स्थानस्य घातकं तत्सूक्तं ततः पुनः पाठस्य न योग्यम् ।

का तर्हि तदानीं निविदो गतिरित्याशङ्क्याऽऽह–

अन्यत्तद्दैवं तच्छन्दसं सूक्तमाहृत्य तस्मिन्निविदं दध्यात्, इति ।

पूर्वस्य निविद्धानीयस्य सूक्तस्य देवता यादृशी छन्दश्च यादृशं तथाविधाभ्यां देवताछन्दोभ्यां युक्तमन्यत्किंचित्सूक्तमाहृत्य तस्मिन्सूक्ते निविदं प्रक्षिपेत् ।

तत्र कंचिद्विशेषं विधत्ते–

मा प्र गाम पथो वयमिति पुरस्तात्सूक्तस्य शंसति, इति ।

यस्मिन्नाहृते नूतने सूक्ते निवित्प्रक्षिप्यते तस्य पुरस्तात्तत्पाठात्पूर्वं मा प्र गामेति सूक्तं शंसेत् । वयं होतारः पथः शंसनमार्गात्प्रभ्रष्टाः सन्तो मा गाम प्रभ्रंशं मा प्रापवामेति तस्य पादस्यार्थः । मार्गभ्रंशदोषोऽस्माकं मा भूदित्यभिप्रायः ।

द्वितीयपादस्य तात्पर्यं दर्शयति–

पथो वा एष प्रैति यो यज्ञे मुह्यति मा यज्ञादिन्द्र सोमिन इति यज्ञादेव तन्न प्रच्यवते, इति ।

मा यज्ञादित्यादिर्द्वितीयः पादस्तस्यायमर्थः । हे इन्द्र सोमिनः सोमयुक्ताद्यज्ञान्मा प्र गामेत्यनुवर्तते प्रभ्रंशं मा प्रापवामेति । यः पुमान्यज्ञे मुह्यति भ्रान्तिं प्राप्नोति एष पुमानवश्यं पथः प्रैत्येव मार्गाद्भ्रश्यत्येव । अतो मा प्र गाम पथ इत्येतावता न पर्याप्तं किंतु मार्गभ्रंशपरिहारदाढर्यार्थं मा यज्ञादित्यपि पठनीयम् । तत्पादपाठेनायं यज्ञान्न प्रच्यवते । अथवा पथो वा एष इत्यर्थवादः पूर्वपादशेषत्वेन व्याख्येयः ।

तृतीयपादमनूद्य व्याचष्टे–

---

१ ऋ. १०-५७-१ ॥

माऽन्तः स्थुर्नो अरातय इत्य-
रातीयत एव तदपहन्ति, इति ।

नोऽस्माकमन्तर्मध्येऽरातयः शत्रवो मा स्थुर्मा तिष्ठन्तु । तत्पादपाठेनारातीयतः शत्रुत्वमिच्छत एव पुरुषानपहन्ति ।

तस्मिन्सूक्ते द्वितीयामृचमनुवदति -

यो यज्ञस्य प्रसाधनस्तन्तुर्देवेष्वा-
ततः । तमाहुतं नशीमहीति, इति ।

यः पुत्रो यज्ञस्य प्रसाधनः कुलपारम्पर्येण यज्ञस्य प्रकर्षेण साधकोऽत एव तन्तुर्देवेष्वाततो दीर्घतन्तुरिव देवेषु विस्तारितस्तं तथाविधं पुत्रमाहुतमाह्वानेन संपादितदेवतं नशीमहि । अत्र निषेधार्थः कश्चिन्नकारोऽध्याहर्तव्यः । नैव नाशयाम इत्यर्थः । अस्माभिः प्रमादे कृतेऽप्यस्मत्पुत्रस्य देवेषु प्रचारात्स प्रमादः समाधीयत इत्यर्थः ।

अत्र तन्तुशब्दस्य तात्पर्यं दर्शयति—

प्रजा वै तन्तुः प्रजामेवास्मा एतत्संतनोति, इति ।

कुलाचारादेरविच्छेदहेतुत्वात्पुत्ररूपा प्रजा तन्तुशब्देनोच्यते । तया सत्येतत्पाठेन प्रजामेव पुत्रादिरूपामस्मै यजमानाय संतनोत्यविच्छिन्नां करोति ।

तृतीयस्या ऋचः पूर्वार्धमनुवदति—

मनो न्वाहुवामहे नाराशंसेन सोमेनेति, इति ।

आप्यायिताश्वमसा नाराशंसास्तत्संबन्धिना सोमेन नु क्षिप्रमेव मनोऽस्मदीयमाहुवामह आह्वयामि ।

अस्यार्धस्य तात्पर्यं दर्शयति—

मनसा वै यज्ञस्तायते मनसा क्रियते, इति ।

सर्वो यज्ञो मनसैव तायते विस्तार्यते मनःपूर्वकत्वादितरेन्द्रियप्रवृत्तेस्तास्वँश्च प्रसारिते यज्ञे यो यः कर्तव्यविशेषोऽस्ति स सर्वोऽपि मनसा क्रियते तस्मान्मनस आह्वानं यागे ज्ञाने वा युक्तम् ।

अस्य सूक्तस्य प्रथमतः पाठे प्रयोजनं दर्शयति—

सैव तत्र प्रायश्चित्तिः प्रायश्चित्तिः ॥११॥ इति ।

---

१. ऋ. १०-५७ २ ॥ २. ऋ. १०-५७ ३ ॥

मा प्र गामेत्यादिसूक्तस्योक्तिरेव निविद्रतिक्रमरूपप्रत्यवायस्य प्रायश्चित्तिः । अभ्यासोऽध्यायसमाप्त्यर्थः ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऐतरेयब्राह्मण-
भाष्ये एकादशाध्याय एकादशः खण्डः ॥ ११ ॥ [८२]

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकवीरबुक्कणसाम्रा
ज्यधुरंधरसायणाचार्यकृतावैतरेयब्राह्मणभाष्ये
एकादशोऽध्यायः ॥ ११ ॥

अथ द्वादशोऽध्यायः ।

एकादशेऽथ प्रउगप्रशंसा ततो वषट्कारमनुस्तुतिं च ॥
तत्कर्तुरात्मन्यनुमन्त्रणं च ततो निवित्प्रैषविशेषमाहुः ॥ १ ॥

अथाऽऽह्वप्रतिगरादयो वक्तव्यास्तत्र प्रातःसवने होतुराह्ववचनमध्वर्योः प्रतिगरं च विधत्ते—

देवविशः कल्पयितव्या इत्याहुश्छन्दश्छ-
न्दसि प्रतिष्ठाप्यमिति शोंसावोमित्याह्वयते
प्रातःसवने त्र्यक्षरेण शंसाऽऽमोदैवोमि-
त्यध्वर्युः प्रतिगृणाति पञ्चाक्षरेण तदष्टाक्षरं
संपद्यतेऽष्टाक्षरा वै गायत्री गायत्रीमेव
तत्पुरस्तात्प्रातःसवनेऽचीक्लृपताम्, इति ।

देवविशो देवानां संबन्धिन्यः प्रजाः सैन्यरूपाः कल्पयितव्याः संपादनीया इति ब्रह्मवादिन आहुः । तत्कथं संपादनमिति तदुच्यते । एकं छन्दोऽन्यस्मिं श्छन्दसि प्रतिष्ठापनीयम् । तथा सति देवविशः संपद्यन्त इति ब्रह्मवादिनामभिप्रायः । तस्मात्तत्संपादनार्थं होता प्रातःसवने शोंसावोमिति मन्त्रेणाध्वर्युमाह्वयते । तस्यायमर्थः । हेऽध्वर्यो शोंसावः शंसनं कुर्वतः । ओमित्यनुज्ञार्थम् । त्वयाऽनुज्ञा देयेत्युक्तं भवति । सोऽयं त्र्यक्षरो मन्त्रः । ततोऽध्वर्युः शंसाऽऽमोदैवोमिति पञ्चाक्षरेण प्रतिगृणाति प्रत्युत्तरं ब्रूयात् । तस्यायमर्थः । हे होतस्त्वं शंस तत्राऽऽमोदैव हर्ष एवास्माकमतोऽनुज्ञा दत्तेति । तदेतन्मन्त्रद्वयं मिलित्वाऽ-

ष्टाक्षरं संपद्यते गायत्री चाष्टाक्षरा तेन प्रातःसवने पुरस्तादादौ द्वावपि मिलित्वा गायत्रीमेवाचीक्लृपतां कल्पितवन्तौ ।

शस्त्रादुत्तरकालीनौ द्वाभ्यां पठनीयौ मन्त्रौ विधत्ते—

उक्थं वाचीत्याह शस्त्वा चतुरक्षरमोमु-
क्थशा इत्यध्वर्युश्चतुरक्षरं तदष्टाक्षरं संप-
द्यतेऽष्टाक्षरा वै गायत्री गायत्रीमेव तदु-
भयतः प्रातःसवनेऽचीक्लृपताम्, इति ।

होता शस्त्रं पठित्वोक्थं वाचीति चतुरक्षरं मन्त्रं ब्रूयात् । मदीयायां वाच्युक्थं शस्त्रं संपन्नमिति तस्यार्थः । ततोऽध्वर्युरोमुक्थशा इति चतुरक्षरं मन्त्रं ब्रूयात् । ओमित्यङ्गीकार उक्थशास्त्वं शस्त्रशंसी भवसीत्यर्थः । तदेतन्मन्त्रद्वयं मिलित्वाऽष्टाक्षरं संपद्यते । उभयतः शंसनात्पुरस्तात्पश्चाच्च । शेषं पूर्ववत् ।

माध्यंदिनसवने तद्वन्मन्त्रचतुष्टयं विधत्ते—

अध्वर्यो शोंसावोमित्याह्वयते मध्यंदिने षळ-
क्षरेण शंसाऽऽमोदैवोमित्यध्वर्युः प्रतिगृणाति
पञ्चाक्षरेण तदेकादशाक्षरं संपद्यत एकादशा-
क्षरा वै त्रिष्टुप्त्रिष्टुभमेव तत्पुरस्तान्मध्यंदिनेऽ-
चीक्लृपतामुक्थं वाचीन्द्रायेत्याह शस्त्वा
सप्ताक्षरमोमुक्थशा इत्यध्वर्युश्चतुरक्षरं तदेका-
दशाक्षरं संपद्यत एकादशाक्षरा वै त्रिष्टुप्त्रिष्टु-
भमेव तदुभयतो मध्यंदिनेऽचीक्लृपताम्, इति ।

पूर्ववद्व्याख्येयम् ।

तृतीयसवने मन्त्रचतुष्टयं विधत्ते—

अध्वर्यो शोशोंसावोमित्याह्वयते तृतीयसवने
सप्ताक्षरेण शंसाऽऽमोदैवोमित्यध्वर्युः प्रतिगृ-
णाति पञ्चाक्षरेण तद्द्वादशाक्षरं संपद्यते द्वाद-
शाक्षरा वै जगती जगतीमेव तत्पुरस्तात्तृतीयस-

वनऽचीक्लृपतामुक्थं वाचीन्द्राय देवेभ्य इत्याह शस्त्वैकादशाक्षरमोमित्यध्वर्युरेकाक्षरं तद्द्वाद-शाक्षरं संपद्यते द्वादशाक्षरा वै जगती जगती-मेव तदुभयतस्तृतीयसवनेऽचीक्लृपताम्, इति ।

शोशोमिति द्विर्भावश्छान्दसः । माध्यंदिनसवने केवलमिन्द्रार्थमेव वाच्युक्थं संपन्नमित्युक्तम् । अत्र त्विन्द्रार्थमितरदेवार्थं चेति विशेषः । अन्यत्सर्वं पूर्ववद्व्याख्येयम् ।

उक्तमर्थं मन्त्रसंवादेन द्रढयति—

तदेतदृषिः पश्यन्नभ्यनूवाच, इति ।

तदेतद्ब्राह्मणोक्तं सर्वमृषिर्मन्त्रद्रष्टा दिव्यज्ञानेन पश्यन्मन्त्रवाक्येना(णा)भितोऽनुवचनं कृतवान् ।

तमेवं मन्त्रं दर्शयति—

[1]द्वयेऽधि गायत्रमाहितं त्रैष्टुभाद्वा त्रैष्टुभं निरतक्षत । यद्वा जगज्जगत्याहितं पदं य इत्तद्विदुस्ते अमृतत्वमानशुरिति, इति ।

शंसनात्पूर्वकालीने मन्त्रद्वयात्मके गायत्रे छन्दसि तदुत्तरकालीनं मन्त्रद्वयात्मकं गायत्रं छन्दोऽध्याहितं संपादितमिति यदस्ति । अथ च पूर्वकालीनान्मन्त्रद्वयात्मकात्त्रैष्टुभादुत्तरकालीनमन्त्रद्वयात्मकं त्रैष्टुभं निरतक्षत निष्पन्नमिति यदस्ति । अथ जगज्जागतं छन्दः पूर्वकालीनं जगत्युत्तरकालीने जागते छन्दस्याहितं संपादितमित्येतत्त्रिविधं पदं यदस्ति तत्पदं य इत्, य एवानुष्ठातारो विदुर्जानन्ति तेऽनुष्ठातारोऽमृतत्वमानशुर्देवत्वं प्राप्तवन्तः ।

अस्य मन्त्रस्य तात्पर्यं दर्शयति—

एतद्वै तच्छन्दश्छन्दांसि प्रतिष्ठापयति, इति ।

एतदृषिणोक्तं मन्त्रवाक्यमुत्तरकालीने छन्दसि तत्पूर्वकालीनं छन्दः प्रतिष्ठापयतीति तत्राऽऽश्रितमित्येवं प्रतिपादयति ।

उक्तार्थवेदनं प्रशंसति—

[1] ऋ. १-१६४-२३ ।

कल्पयति देवविशो य एवं वेद ॥ १२ ॥ इति ।

वेदिता देवविशो देवसंबन्धिनीः प्रजाः सैन्यरूपाः संपादयति ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऐतरेय-ब्राह्मणभाष्ये द्वादशाध्याये पथमः खण्डः ॥ १ ॥ (१२) [८२]

अथानुष्टुभो मुख्यत्वेन प्रशंसां कर्तुमाख्यायिकामाह-

प्रजापतिर्वै यज्ञं छन्दांसि देवेभ्यो भागधेयानि व्यभजत्स गायत्रीमेवाग्नये वसुभ्यः प्रातःसवनेऽभजत्त्रिष्टुभमिन्द्राय रुद्रेभ्यो मध्यंदिने जगतीं विश्वेभ्यो देवेभ्य आदित्येभ्यस्तृतीयसवने, इति ।

पुरा प्रजापतिः सर्वं जगत्सृष्ट्वा सवनत्रयात्मकं यज्ञं गायत्र्यादीनि च्छन्दांसि च देवतार्थं भागधेयानि भागविशेषरूपाणि कृत्वा व्यभजद्विभक्तवान् । केन प्रकारेणेति स उच्यते । यज्ञे यत्प्रातःसवनमस्ति तस्मिन्गायत्रीमेवाग्न्यर्थंपष्टवसु-देवार्थं च विभक्तवान् । माध्यंदिनसवने त्रिष्टुभमिन्द्रार्थमेकादशरुद्रार्थं च विभक्तवान् । तृतीयसवने जगतीं विश्वेभ्यो देवेभ्य आदित्येभ्यश्च विभक्तवान् ।

एवं सत्यनुष्टुबेका परिशिष्टा तस्या वृत्तान्तमाह-

अथास्य यत्स्वं छन्द आसीदनुष्टुप्तामुदन्तम-भ्युदौहदच्छावाकीयामभि सैनमब्रवीदनुष्टुप्त्वं न्वेव देवानां पापिष्ठोऽसि यस्य तेऽहं स्वं छन्दोऽस्मि यां मोदन्तमभ्युदौहीरच्छावाकी-यामभीति तदजानात्स त्वं सोममाहरत्स स्वे सोमेऽग्रं मुखमभि पर्याहरदनुष्टुभं तस्मादनुष्टु-बग्रिया मुख्या युज्यते सर्वेषां सवनानाम्, इति ।

अथाग्न्यादीनां वस्वादीनां च च्छन्दोविभागानन्तरमस्य प्रजापतेः स्वभूत-मनुष्टुबाख्यं यच्छन्द आसीत्तामनुष्टुभमुदन्तमभि यज्ञस्य कंचित्प्रान्तदेशमभिल-क्ष्योदौहदपसारितवान् । कुत्र देश इति तदुच्यते--अच्छावाकीयामभीति ।

अच्छावाक वदस्वेत्येवमध्वर्युणोक्तोऽच्छावाको यां ब्रूते सेयमृगैच्छावाकीया वामभिलक्ष्योदूढवाननुष्टुभमच्छावाकीयां कृतवानित्यर्थः । तेन कुपिता साऽनुष्टुबेवैनं प्रजापतिमब्रवीन्नु हे प्रजापते देवानां मध्ये त्वमेव पापिष्ठोऽसि । यस्य पापिष्ठस्य प्रजापतेस्तवाहं छन्दोऽस्मि । अग्निवस्वादयः पूर्वं छन्दोरहितास्तादृशेभ्योऽपि च्छन्दांसि दत्तवानसि । अहं तु पूर्वमेव त्वदीया तादृशी मां त्वत्तोऽपसार्याच्छावाकीयामभिलक्ष्योदूढवानसि । अतो मदुपेक्षया भवतः पापिष्ठत्वमित्यनुष्टुभोऽभिप्रायः । तत्सवमनुष्टुभा प्रोक्तमुपालम्भरूपं प्रजापतिर्ज्ञातवान् । ज्ञात्वा च तदुपालम्भपरिहारार्थं स्वकीयं सोमयागमाहरत् । स तु तस्मिन्सोमयागेऽग्रं श्रेष्ठं प्रारम्भरूपं यन्मुखमस्ति तदभिलक्ष्यानुष्टुभं पर्याहरत्तत्र नीतवानित्यर्थः । तस्माद्ध तस्मादेव कारणादियमनुष्टुबग्न्या श्रेष्ठा सती सर्वेषां सवनानां मुख्या मुखे भवा प्रारम्भाकालीना प्रयुज्यते ।

एतद्वेदनं प्रशंसति—

अग्रियो मुख्यो भवति श्रेष्ठता-
मश्नुते य एवं वेद, इति ।

वेदिता स्वकीयज्ञातीनां मध्येऽग्रे भवोऽग्र्यो ज्येष्ठो मुख्यो व्यवहारनिर्वाहकः । स श्रेष्ठतां विद्यावृत्तादिगुणैः श्रेष्ठत्वं प्राप्नोति । प्रजापतिन्यायेन यजमानस्यापि सवनीययागादावनुष्टुप्प्रयोगं दर्शयति—

स्वे वै स तत्सोमेऽकल्पयत्तस्माद्यत्र क्व च यज-
मानवशो भवति कल्पत एव यज्ञोऽपि, इति ।

यस्मात्स प्रजापतिः स्वकर्तृक एव सोमयागे तत्सवनेष्वनुष्टुभो मुख्यतामकल्पयत्तस्मादिदानीमपि यत्र क्वापि यागे यज्ञो यजमानवशो भवति । स कल्पत एव । अवैकल्येनानुष्ठास्यामीत्यभिप्रेत्यानुष्टुभः सवनानामादौ प्रयोगे सति यज्ञस्य यजमानवशत्वं तत्र यज्ञो वैकल्यरहितो भवतीत्यर्थः ।

उक्तवाक्यार्थमेव वाक्यान्तरेण स्पष्टी करोति—

तस्यै जनतायै कल्पते यत्रैवं विद्वा-
न्यजमानो वशी यजते ॥ १३ ॥ इति ।

यत्र यस्यां जनसभायामेवमनुष्टुभो महिमानं विद्वान्यजमानो वशी स्ववशो भूत्वा तस्मिन्ननुष्टुभः प्रयोगे सावधानो भूत्वा यजते तस्यै जनतायै तस्यां जनसभायां कल्पते यज्ञः प्रयोजनसमर्थो भवति ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऐतरेयब्राह्मणभाष्ये द्वादशाध्याये द्वितीयः खण्डः ॥ २ ॥ (१३) [८४]

पुनरपि प्रकारान्तरेणानुष्टुभो महिमानं दर्शयितुमाख्यायिकामाह -

अग्निर्वै देवानां होताऽऽसीत्तं मृत्युर्बहिष्पवमानेऽसीदत्सोऽनुष्टुभाऽऽज्यं प्रत्यपद्यत मृत्युमेव तत्पर्यक्रामत्तमाज्येऽसीदत्स प्रउगेण प्रत्यपद्यत मृत्युमेव तत्पर्यक्रामत्, इति ।

पुरा कदाचिद्देवानां यागेऽग्निरेव होताऽभूत्तमग्निं होतारं मृत्युरसीदद्धन्तुं प्राप्तवान् । कस्मिन्काल इति तदुच्यते । बहिष्पवमानाख्ये स्तोत्रे प्रातःसवनसंबन्धिनि उपास्मै गायता नर इत्याद्यृगाश्रयणेन सामगैः स्तूयमाने सति सोऽयमग्नेर्मृत्युप्राप्तिकालस्तदानीमग्निर्मृत्युं परिहर्तुमनुष्टुप्छन्दस्कया प्र वो देवायाग्नय इत्येतयर्चाऽऽज्यशस्त्रं प्रारब्धवान् । तत्तेनानुष्टुप्प्रयोगेण सोऽग्निस्तदानीमेव मृत्युं पर्यक्रामदतिक्रान्तवान् । ततोऽग्निना होत्राऽऽज्यशस्त्रे शस्यमाने सति तमग्निं मृत्युरसीदत्प्राप्तवान् । तदा सोऽग्निर्मृत्युं परिहर्तुं वायवायाहीत्यादिकेन सप्तऋचात्मकेन प्रउगशस्त्रेणानुष्ठानं प्रत्यपद्यत प्रारब्धवान् । तत्तेन प्रउगप्रयोगेण तदानीमेव मृत्युमतिक्रान्तवान् ।

इत्थं प्रातःसवनेऽनुष्टुभं मृत्युपरिहारहेतुत्वेन प्रशस्य माध्यंदिनसवनेऽपि तथा प्रशंसति-

तं माध्यंदिने पवमानेऽसीदत्सोऽनुष्टुभा मरुत्वतीयं प्रत्यपद्यत मृत्युमेव तत्पर्यक्रामत्तं माध्यंदिने बृहतीषु नाशक्नोत्सत्तुं प्राणा वै बृहत्यः प्राणानेव तन्नाशक्नोद्यवैतुं तस्मान्मध्यंदिने होता बृहतीषु स्तोत्रियेणैव प्रतिपद्यते प्राणा वै

बृहत्यः प्राणानेव तदभिप्रतिपद्यते, इति ।

प्रातःसवनान्निराक्रुतो मृत्युरुच्चा ते जातमन्धस इत्यादिके माध्यंदिनपवमानस्तोत्रे गीयमाने सति तस्मिन्काले तमाग्निं होतारमसीदत्प्राप्तवान् । तदानीं सोऽग्निर्होता मृत्युपरिहारायानुष्टुप्छन्दस्कयाऽऽ त्वा रथमित्येतयर्चा मरुत्वतीयशस्त्रं प्रारब्धवान् । तत्तेनानुष्टुप्प्रयोगेण तदानीमेव मृत्युमतिक्रान्तवान् । माध्यंदिनपवमानान्निराक्रुतो मृत्युर्माध्यंदिनसवनसंबन्धिमरुत्वतीयशस्त्रे शस्यमाने सति शंसितारमाग्निं होतारं प्राप्स्यामीति विचार्य तत्र बृहतीछन्दस्कास्वृक्षु गीयमानासु तमाग्निं सत्तुं प्राप्तुं नाशक्नोत् । तत्र हेतुरुच्यते । बृहतीछन्दस्का ऋचः प्राणस्वरूपा एव । तत्तेन कारणेन प्राणानां रक्षितत्वात् । बृहत्यो मृत्युप्रवेशं निवारयितुं समर्थास्तस्मान्माध्यंदिनप्रयोगे होता बृहतीछन्दस्कास्वृक्षु स्तोत्रियेणैव त्र्यृचेन शस्त्रं प्रारभते । यस्मिंस्त्र्यृचे सामगैः स्तोत्रं गीतं सोऽयं त्र्यृचः स्तोत्रियस्तेन त्र्यृचेन प्रारम्भे सति तत्रत्यानां बृहतीनां प्राणरूपत्वात्प्राणानेवाभिलक्ष्य शस्त्रप्रारम्भं कृतवान्भवति ।

अथ तृतीयसवने मृत्युपरिहारेणानुष्टुभं प्रशंसति—

तं तृतीयपवमानेऽसीदत्सोऽनुष्टुभा वैश्वदेवं प्रत्यपद्यत मृत्युमेव तत्पर्यक्रामत्, इति ।

त्रिषु पवमानेषु बहिष्पवमानः प्रथमः । माध्यंदिनपवमानो द्वितीयः । आर्भवपवमानस्तृतीयः । माध्यंदिनसवने प्रवेष्टुमशको मृत्युः स्वादिष्ठयेत्येतस्मिन्नार्भवाख्ये तृतीयपवमानस्तोत्रे तृतीयसवनगवे सामगैर्गीयमाने सति तमाग्निं होतारं मृत्युरसीदत् । सोऽप्यग्निस्तं वारयितुमनुष्टुच्छन्दस्कया तत्सवितुर्वृणीमह इत्येतयर्चा वैश्वदेवाख्यं प्रारभत । तेनानुष्टुप्प्रयोगेण तदानीमेव मृत्युमतिक्रान्तवानित्यनुष्टुप्स्तवनत्वये शस्ता ।

अथ यज्ञायज्ञीयाख्यं साम वैश्वानरीयसूक्तं च प्रशंसति—

तं यज्ञायज्ञीयेऽसीदत्स वैश्वानरीयेणाऽऽग्निमारुतं प्रत्यपद्यत मृत्युमेव तत्पर्यक्रामद्ब्रो वै वैश्वा-

नरीयं प्रतिष्ठा यज्ञायज्ञीयं वज्रेणैव तत्प्रतिष्ठाया मृत्युं नुदते स सर्वान्पाशान्सर्वान्स्थाणून्मृत्योरतिमुच्य स्वस्त्येवोदमुच्यत स्वस्त्येव होतोन्मुच्यते सर्वायुः सर्वायुः सर्वायुत्वाय, इति ।

यज्ञायज्ञा वो अग्नय इत्यस्मामृच्युत्पन्नं साम यज्ञायज्ञीयं तत्सामसाध्ये तन्नामके स्तोत्रे सामगैर्गीयमाने सति तृतीयपवमानान्निराकृतो मृत्युस्तमग्निं होतारं प्राप्तवान् । ततोऽग्निर्होता मृत्युपरिहाराय वैश्वानराय पृथुपाजसे विप इत्यादिना वैश्वानरीयेण सूक्तेन मरुत्वतीयशस्त्रप्रारम्भं कृतवान् । तेन सूक्तप्रयोगेण तदानीमेव मृत्युमतिक्रान्तवान् । तत्र वैश्वानरीयं सूक्तं वज्रस्वरूपम् । यज्ञायज्ञीयस्तोत्रं तु प्रतिष्ठा समाप्तेर्हेतुः । तस्मात्सूक्तरूपेण वज्रेणैव प्रतिष्ठाया यज्ञसमाप्तेर्मृत्युमग्निर्निराकुरुते । स तादृशोऽग्निः सर्वान्पाशान्मृत्युसंबन्धिबन्धनरज्जुरूपांस्तथा मृत्योः संबन्धिनः सर्वान्स्थाणून्काष्ठोपलक्षितगदाद्यायुधानि मृत्योः सकाशादतिमुच्य निवार्य स्वस्त्येव क्षेमेणैव स्वयं मृत्युसकाशादुन्मुक्तोऽभूत् । अग्निवन्मानुषोऽपि होता तेनैव प्रकारेणानुविष्टन्सर्वेणाऽऽयुषा युक्तः क्षेमेणैव मृत्योरुन्मुच्यते । अत्र सर्वत्र यो योऽपूर्वोऽर्थस्तस्य सर्वस्यार्थवादादेव विधिरुन्नेयः । सोऽयं होत्रप्रयोगो यजमानस्य सर्वायुत्वाय संपद्यते ।

वेदनं प्रशंसति-

सर्वायुरेति य एवं वेद ॥ १४ ॥ इति ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऐतरेय ब्राह्मणभाष्ये द्वादशाध्याये तृतीयः खण्डः ॥ ३ ॥ (१४) [८५]

अथ मरुत्वतीयशस्त्रमारभ्यते । तत्रायं संग्रहश्लोकः-

"प्रतिपदनुचरावनुप्रगाथो हरिनिहवोऽथ बृहस्पतेर्ध्रुवश्च ।
ध्रुवविधिविहितास्तथाऽथ धाय्या वितननमत्र मरुत्वतीयसूक्ते" ॥

तत्राऽऽ त्वा रथमिति मरुत्वतीयस्य प्रतिपदनुष्टुभां प्रशंसितुमाह-

इन्द्रो वै वृत्रं हत्वा नास्तृषीति मन्यमानः पराः परावतोऽगच्छत्स परमामेव परावतमगच्छदनुष्टुब्वै परमा परावद्वाग्वा अनुष्टुप्स वाचं प्रवि-

श्याशयत्तं सर्वाणि भूतानि विभज्यान्वैच्छंस्तं पूर्वेद्युः पितरोऽविन्दन्नुत्तरमहर्देवास्तस्मात्पूर्वेद्युः पितृभ्यः क्रियत उत्तरमहर्देवान्यजन्ते, इति ।

इन्द्रः पुरा वृत्रनामकं दैत्यं हत्वा नास्तृषि अहं न हिंसितवानस्मीति मन्यमानस्तदीयजीवनमाशङ्क्य तस्माद्भीतः पराः परावतोऽभ्यधिका दूरभूमीरगच्छत् । सोऽयं तावताऽप्यसंतुष्टः परमामेवाभ्यधिकामेव परावतं दूरभूमिं पुनरप्यगच्छत् । अधिकाभ्यो दूरभूमिभ्योऽप्यत्यन्तमधिका दूरभूमिः केति चेत्सेयमुच्यते । अनुष्टुब्वै परमा परावद्भ्यधिका दूरभूमिः । तस्यामनुष्टुभि प्रविष्टस्य चक्षुषा द्रष्टुमशक्यत्वात् । अनुष्टुप्च वाक्स्वरूपा ततः स इन्द्रो वाचं प्रविश्य तत्र शयनं कृतवान् । तमिन्द्रं सर्वाणि भूतानि सर्वेषु देशेषु विभज्यान्वैच्छन् । तमन्वेष्टुमेक एकस्मिन्देशे गतोऽन्यो देशान्तरमित्येतादृशो विभाग इत्यर्थः । तमन्विष्यमाणमिन्द्रं पितरो यागदिनात्पूर्वेद्युरविन्दन्लब्धवन्त । देवास्तूत्तरमहरुत्तरस्मिन्नहन्यविन्दन् । यस्मादेवं तस्माल्लोकेऽपि पूर्वेद्युरमावास्यायां पितृभ्यः क्रियते । उत्तरमहरुत्तरस्मिन्नहनि प्रतिपदिने दर्शपूर्णमासयागदिने देवान्यजन्ते । इन्द्रस्य रक्षकत्वात्प्रशस्ताऽनुष्टुबिति तात्पर्यार्थः ।

अथ मरुत्वतीयशस्त्रस्य प्रतिपत्त्यृचं दर्शयति—

तेऽब्रुवन्नभिषुणवामैव तथा वाव न आशिष्ठमागमिष्यतीति तथेति तेऽभ्यषुण्वंस्त आ त्वा रथं यथोतय इत्येवैनमावर्तयन्निदं वसो सुतमन्ध इत्येवैभ्यः सुतकीर्त्यामाविरभवदिन्द्र नेदीय एदिहीत्येवैनं मध्यं प्रापादयन्त, इति ।

इन्द्रं लब्ध्वाऽवस्थितास्ते देवाः परस्परमिदमब्रुवन्नभिषुणवामैव वयं सर्वथा सोमस्याभिषवं करवाम । तथा वाव तेनैव प्रकारेणाऽऽशिष्ठमाशुतममतिशीघ्रं यथा भवति तथा नोऽस्मानिन्द्र आगमिष्यतीति तद्वचनमङ्गीकृत्य ते सर्वेऽभ्यषुण्वन्नभिषवं कृतवन्तः । तादृशास्ते देवा आ त्वा रथं यथोतय इत्यनेनैव मन्त्रेण तमिन्द्रमनुष्टुभः सकाशादभिषवदेशं प्रत्यावर्तयन् । अत्र किंचिदावृत्ति-

---

१ ऋ. ८-६८ १ ॥ २ ऋ. ८-२-१ ॥ ३ ऋ. ८-५३-५ ।

वाचकमावर्तयामसीति पदद्वयं श्रूयते तत्सामर्थ्यादिन्द्रस्याऽऽवृत्तिरभूत् । इदं वसो सुतमन्ध इत्यस्मिन्मन्त्रपादे सुतकीर्त्यामिषववाचिना सुतशब्देनैभ्यो देवेभ्य इन्द्र आविरभवत्प्रकटोऽभूत् । इन्द्र नेदीय एदिहीति मन्त्रगतेन समीपागमनवाचिना नेदीय एदिहीति पदद्वयेनैनमिन्द्रं यागदेशमध्यं प्रापितवन्तः । अनेनार्थवादेन तत्तन्मन्त्रविधिरुन्नेयः । एतदेवाभिप्रेत्याऽऽश्वलायन आह-- 'मरुत्वतीयशस्त्रं शंसेदध्वर्यो शोंसावोमिति माध्यंदिने शस्त्रादिष्वाहाव आ त्वा रथं यथोतय इदं वसो सुतमन्ध इति मरुत्वतीयस्य प्रतिपदनुचराविन्द्र नेदीय एदिहीतीन्द्रनिहवः प्रगाथः' इति । येन ऋचेन शस्त्रं प्रारभते सोऽयं ऋचः प्रतिपदुच्यते । तदनन्तरभावी ऋचोऽनुचरः । अत्राऽऽ त्वा रथमिदं वसो, इत्येतौ ऋचौ प्रतिपदनुचरौ द्रष्टव्यौ । तत ऊर्ध्वमिन्द्रनिहवाख्य इन्द्र नेदीय इति प्रगाथः ऋग्द्वयात्मको द्रष्टव्य इत्यर्थः ।

वेदनं प्रशंसति-

आगतेन्द्रेण यज्ञेन यजते सेन्द्रेण यज्ञेन राध्नोति य एवं वेद ॥ १५ ॥ इति ॥

आगत इन्द्रो यस्मिन्यज्ञे सोऽयमागतेन्द्रो वेदितृतादृशेन यज्ञेन यजते तथेन्द्रसहितेन यज्ञेन समृद्धो भवति ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऐतरेय ब्राह्मणभाष्ये द्वादशाध्याये चतुर्थः खण्डः ॥ ४ ॥ (१५) [८६]

पूर्वोक्तमिन्द्र नेदीय इत्यादिकं प्रगाथं शंसितुमाख्यायिकामाह-

इन्द्रं वै वृत्रं जघ्निवांसं नास्तृतेति मन्यमानाः सर्वा देवता अजहुस्तं मरुत एव स्वापयो नाजहुः प्राणा वै मरुतः स्वापयः प्राणा हैवैनं तं नाजहुस्तस्मादेषोऽच्युतः स्वापिमान्प्रगाथः शस्यत आस्वापे स्वापिभिरिति, इति ।

इन्द्रो यदा वृत्रं हतवांस्तदा तमिन्द्रं सर्वा देवता अजहुः परित्यक्तवत्यः । कीदृश्यो देवताः नास्तृतेति न हिंसितवानिन्द्र इति मन्यमानाः । वृत्रस्यातिप्रौढशरीरत्वात्प्रहारमात्रेणासौ न मृत इति देवानां भ्रान्तिः । इतरदेवताभिः

परित्यक्तं तमिन्द्रं मरुत एव नाजहुर्न परित्यक्तवन्तः । तद्विशेषणं स्वापय इति । सुषुप्तिकालेऽपि वर्तमाना इत्यर्थः । स्वापिशब्दार्थः श्रुत्यैव प्रदर्श्यते । प्राणा वै देहमध्ये वर्तमानाः प्राणा एव स्वापयो मरुतः स्वापकालानुवर्तिनो वायवः । प्राणानां तत्कालानुवृत्तिमाथर्वणिकाः प्रश्नोत्तराभ्यामामनन्ति--भगवन्नेतस्मिन्पुरुषे कानि स्वपन्ति कान्यस्मिञ्जाग्रतीति प्रश्नः । प्राणाग्नय एवैतस्मिन्पुरे जाग्रतीत्युत्तरम् । एवंविधा यस्मात्प्राणरूपा मरुत एवैनमिन्द्रं तदानीं न परित्यक्तवन्तः । तस्मात्कारणादेष इन्द्र नेदीय इत्यादिकः स्वापिमान्प्रगाथोऽच्युतो मरुत्वतीयशस्त्रे सर्वथाऽप्यपरित्यक्तः शस्यते । स्वापिशब्दो यस्मिन्प्रगाथेऽस्ति सोऽयं स्वापिमान् । आस्वापे स्वापिभिरित्ययं पादस्तस्मिन्प्रगाथ आम्नायते तस्मादयं स्वापिमान् ।

इत्थमिन्द्रनिहवाख्यं प्रगाथं प्रशस्य पुनरपि प्रकारान्तरेण तमेव प्रशंसति-

अपि ह यद्यैन्द्रमेवात ऊर्ध्वं छन्दः शस्यते तद्धसर्वं मरुत्वतीयं भवत्येष चेदच्युतः स्वापिमान्प्रगाथः शस्यत आस्वापे स्वापिभिरिति ॥ १६ ॥ इति ।

अपि हापि चात एतत्प्रगाथशंसनादूर्ध्वमस्मिन्मरुत्वतीयशस्त्रे यद्यैन्द्रमेव च्छन्द इन्द्रसंबन्ध्येव च्छन्द.शब्दोपलक्षितो मन्त्रः शस्यते तद्ध सर्वं तदपि मन्त्रजातं मरुत्वतीयशस्त्रं भवति । एष चेदित्यादिना तत्र युक्तिरुच्यते । आस्वापे स्वापिभिरितिपदोपेतत्वेन स्वापिमानेष प्रगाथोऽच्युतश्चेदपरित्यक्तश्चेत्तदा मरुत्वतीयं भवति स्वापिशब्दवाच्यानां मरुतां प्रतिपादकत्वादित्यर्थः । सोऽयं प्रगाथः शाखान्तरे द्रष्टव्यः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऐतरेयब्राह्मणभाष्ये द्वादशाध्याये पञ्चमः खण्डः ॥५॥ (१६) [८७]

अथास्मिन्मरुत्वतीयशस्त्रे प्रनूनं ब्रह्मणस्पतिरित्यादिकं प्रगाथं विधत्ते-

ब्राह्मणस्पत्यं प्रगाथं शंसति, इति ।

द्वयोर्ऋचोः समूहः प्रगाथः । तथा चाऽऽश्वलायन आह-' तृचाः प्रतिपदनुचरा द्व्यृचाः प्रगाथाः ' इति । ऋग्द्वयमेवानुष्ठानकाले त्र्यृचरूपेण प्रथ्यते । तस्मादयं प्रगाथ इत्युच्यते ।

विहितं ब्राह्मणस्पत्यं प्रशंसति -

बृहस्पतिपुरोहिता वै देवा अजयन्स्वर्गं लोकं व्यस्मिँल्लोकेऽजयन्त तथैवैतद्यजमानो बृहस्पतिपुरोहित एव जयति स्वर्गं लोकं व्यस्मिँल्लोके जयते, इति ।

योऽयं प्रगाथे ब्रह्मणस्पतिरान्नातः सोऽयं बृहस्पतिस्तस्य ब्राह्मणजातिस्वामित्वात् । स च बृहस्पतिः पुरोहितो येषां देवानां ते बृहस्पतिपुरोहिताः । तथा च श्रुत्यन्तरे समाम्नातम्-' बृहस्पतिर्देवानां पुरोहित आसीत् ' इति । पौरोहित्यसिद्ध्यर्थमेव चतुर्विंशतिरात्रनामकं सत्रमन्वातिष्ठत् । तदपि श्रुत्यन्तर एवाऽऽम्नातम्-' बृहस्पतिरकामयत यन्मे देवा दधीरन्गच्छेयं पुरोधामिति स एतं चतुर्विंशतिरात्रमपश्यत् ' इति । तादृशा बृहस्पतिपुरोहिता देवा अनेन प्रगाथेन स्वर्गं लोकं जित्वा भूलोकेऽपि विजयं प्राप्तास्तथैव तत्पाठेनेदानींतनोऽपि यजमानोऽपि यजमानो बृहस्पतिपुरोहित एव बृहस्पत्यनुग्रहयुक्त एव सँल्लोकद्वयं जयति ।

अत्र किंचिद्योद्यमुद्भावयति -

तौ वा एतौ प्रगाथावस्तुतौ सन्तौ पुनरादायं शस्येते तदाहुर्न किंचनास्तुतं सत्पुनरादायं शस्यतेऽथ कस्मादेतौ प्रगाथावस्तुतौ सन्तौ पुनरादायं शस्येते इति, इति ।

समाम्नाते द्वे एव ऋचौ प्रग्रथनेन त्र्यृचरूपतया संपाद्येते । प्रग्रथनप्रकार उच्यते । प्र नूनमित्येषा बृहतीछन्दस्का । द्वादशाक्षरेण तृतीयपादेनाष्टाक्षरैश्चान्त्यैर्युक्ततया षट्त्रिंशदक्षरसंपत्तेः । सेयमृक्सक्तपठनीया । पुनरपि तत्रत्यमष्टाक्षरं चतुर्थपादं द्विराम्नाय षोडशाक्षरोऽर्धर्चः संपादनीयः । इतरस्यामृचि प्रथमपादो द्वादशाक्षरः । द्वितीयपादोऽष्टाक्षरः । एतत्सर्वं मिलित्वा द्वितीया बृहती संपद्यते । तत्रत्यमन्तिममष्टाक्षरपादं द्विरभ्यस्य समाम्नाय उत्तरार्धे द्वादशाक्षरं प्रथमपादमष्टाक्षरमुत्तरपादं च पठित्वा तृतीया बृहती संपादनीया । अयमेव प्रग्रथनप्रकार इन्द्र नेदीय एदिहीत्यत्रापि प्रगाथे योजनीयः । तावेतौ प्रगाथौ पुनरादायं पुनः पुनः पठितमेव पादमादायाऽऽदाय शस्येते । स्तोमैस्तु माध्यंदिनपवमाने प्रगाथावेतावस्तुतौ तैरस्तुतयोर्होत्रा शंसनमयुक्तम् । न ह्यत्र कश्चि

दपि सामगैरस्तुतं मन्त्रजातं पुनः पुनरादाय शस्यमानं दृष्टम् । एवं सति कस्मात्कारणादस्तु तयोरत्र शंसनमिति चोद्यवादिन आहुः ।

एताच्चोद्यमनास्थाय परिहारमनुक्त्वैव चोद्यान्तरमुद्भावयति—

पवमानोक्थं वा एतद्यन्मरुत्वतीयं षट्सु वा अत्र गायत्रीषु स्तुवते षट्सु बृहतीषु तिसृषु त्रिष्टुप्सु स वा एष त्रिच्छन्दाः पञ्चदशो माध्यंदिनः पवमानस्तदाहुः कथं त एष त्रिच्छन्दाः पञ्चदशो माध्यंदिनः पवमानोऽनुशस्तो भवतीति, इति ।

मरुत्वतीयशस्त्रं यदस्ति तदेतत्पवमानोक्थं माध्यंदिनपवमानसंबन्धिशस्त्रम् । अत्र माध्यंदिनपवमानस्तोत्र उच्चा ते जातमित्यादिषु षट्सु गायत्रीषु प्रथमं स्तुवते । ततः पुनानः सोमेत्यादिषु षट्सु बृहतीषु स्तुवते । यद्यपि व्युचात्मकः प्रगाथस्तथाऽपि पूर्वोक्तन्यायेन प्रग्रथ्य तिस्रो बृहत्यः संपादनीयाः । तासु च रौरवसाम प्रागुद्गातव्यं तत उपरि यौधाजयसाम गातव्यम् । एवं सति तिस्रो बृहत्यः सामद्वयार्थं द्विरावर्त्यमानाः षट्संपद्यन्ते । तथा प्र वो देवीत्यादिषु तिसृषु त्रिष्टुप्सु स्तुवते । एवं सति स एष माध्यंदिनपवमानस्त्रिच्छन्दा भवति । गायत्रीबृहतीत्रिष्टुब्रूपाणां त्रयाणां छन्दसां सद्भावात् । तथा स पवमानः पञ्चदशस्तोमोपेतः । तस्य च स्तोमस्य प्रकारश्छन्दोगब्राह्मण एवमाम्नायते—'पञ्चभ्यो हिं करोति स तिसृभिः स एकया स एकया पञ्चभ्यो हिं करोति स एकया स तिसृभिः स एकया पञ्चभ्यो हिं करोति स एकया स एकया स तिसृभिः' इति । अस्यायमर्थः । व्युचात्मकमेकं सूक्तं त्रिरावर्तनीयम् । तत्र प्रथमावृत्तौ प्रथमाया ऋचस्त्रिरभ्यासो विधेयः । द्वितीयावृत्तौ मध्यमायाः । तृतीयावृत्तौ चरमायाः । एवं प्रतिसाम सावृत्ताभिः पञ्चदशभिर्ऋग्भिरुपेतत्वात्पञ्चदश स्तोमा इति । एवं सत्यत्र चोद्यवादिन आहुः । हे होतस्त्व एष यथोक्तलक्षणः पवमानः कथं मरुत्वतीयशस्त्रेणानुशस्तो भवति । अनुशंसनं च न्याय्यम् । यथा वाव स्तोत्रमेवं शस्त्रमिति न्यायात् । अतोऽत्र स्तोत्रशस्त्रयोर्वैलक्षण्यमयुक्तमिति चोद्यान्तरम् ।

तत्र द्वितीयस्य चोद्यस्य तावदुत्तरं दर्शयति—

ये एव गायत्र्या उत्तरे प्रतिपदो यो गायत्रोऽनुचर-

**स्ताभिरेवास्य गायत्र्योऽनुशस्ता भवन्त्येताभ्यामे-
वास्य प्रगाथाभ्यां बृहत्योऽनुशस्ता भवन्ति, इति ।**

आ त्वा रथमित्यस्मिन्मरुत्वतीयशस्त्रस्य प्रतिपद्रूपे ऋचे प्रथमा ऋगनुष्टुब्धे एवोत्तरे प्रतिपदः प्रतिपद्रूपे द्वे ऋचौ गायत्र्यौ विद्येते यश्चान्य इदं वसो सुतमन्ध इत्यनुचराख्यस्तृचो गायत्र एताभिरेव पञ्चभिर्गायत्रीभिरस्य होतुः पवमानस्तोत्रगता गायत्र्योऽनुशस्ता भवन्ति । इन्द्र नेदीय इति योऽयमिन्द्रनिहवः प्रगाथो यश्च प्रनूनं ब्रह्मणस्पतिरिति ब्राह्मणस्पत्यः प्रगाथ एताभ्यामुत्तराभ्यां पवमानस्तोत्रगता बृहत्योऽनुशस्ता भवन्ति प्रग्रथनेन बृहतीसंपादनस्योभयत्र समानत्वात् । यत्तु त्रिष्टुभामनुशंसनं तदुपरिष्टादभिधास्यते ।

अथ प्रसङ्गात्प्रथमचोद्यस्यापि परिहारं दर्शयन्पुनः पुनरादानस्यानुशंसनं दर्शयति-

**तासु वा एतासु बृहतीषु सामगा रौरवयौधाजयाभ्यां
पुनरादायं स्तुवते तस्मादेतौ प्रगाथावस्तुतौ सन्तौ
पुनरादायं शस्येते तच्छस्त्रेण स्तोत्रमन्वैति, इति ।**

पुनानः सोमेत्यस्मिन्प्रगाथे या बृहत्यः प्रग्रथनेन संपादितास्तास्वेवैतासु बृहतीषु रौरवाख्येन (ण) यौधाजयाख्येन च साम्ना पुनः पुनः पठितमेव पादमादाय स्तुवते । तस्मादेताविन्द्रनिहवब्राह्मणस्पत्यप्रगाथौ सामगैरस्तुतावपि सन्तौ होत्रा पुनः पुनः पठितमेव पादमादाय शस्येते । तथाच सत्ययं होता स्वकीयेन शस्त्रेण स्तोत्रमनुगच्छति ।

इदानीं त्रिष्टुभामनुशंसनं दर्शयति-

**ये एव त्रिष्टुभौ धाय्ये यत्त्रैष्टुभं निविद्धानं
ताभिरेवास्य त्रिष्टुभोऽनुशस्ता भवन्ति, इति ।**

यथा सामिधेनीषु प्रक्षिप्यमाणानामृचां धाय्येति संज्ञा, एवमत्रापि । तथा सत्यग्निर्नेता भग इव क्षितीनामित्येका धाय्या त्वं सोम क्रतुभिरित्यपरा । ये एव त्रिष्टुप्छन्दस्के धाय्ये विद्येते यच्च त्रिष्टुप्छन्दस्कं जनिष्ठा उग्र इत्यादिकं निविद्धानं सूक्तम् । निविदां पदानि धीयन्ते प्रक्षिप्यन्ते यस्मिन्सूक्ते तन्निविद्धानम् । ताभिरेव सूक्तगताभिर्धाय्यासहिताभिस्त्रिष्टुब्भिरस्य होतुः स्तोत्रगतास्त्रिष्टुभोऽनुशस्ता भवन्ति ।

उक्तार्थवेदनं प्रशंसति—

एवमु हास्यैष त्रिच्छन्दाः पञ्चदशो माध्यंदिनः पवमानोऽनुशस्तो भवति य एवं वेद ॥ १७ ॥ इति ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऐतरेयब्राह्मणभाष्ये द्वादशाध्याये षष्ठः खण्डः ॥ ६ ॥ (१७) [८८]

मरुत्वतीयशस्त्रे प्रक्षेपणीया ऋचो विधत्ते—

धाय्याः शंसति, इति ।

अग्निर्नेतेत्येका । त्वं सोम क्रतुभिरिति द्वितीया । पिन्वन्त्यप इति तृतीया । ताः शंसेत् ।

तासां प्रशंसामाह—

धाय्याभिर्वै प्रजापतिरिमाँल्लोकानधयद्यं यं काममकामयत, इति ।

पुरा प्रजापतिर्यं यं लोकं कामितवांस्तानिमाँल्लोकानुक्ताभिर्धाय्याभिरेवाधयदपिबत् । लोकशब्देन जलम् । पापवेदनायां सति धमतो यजमानस्य (?) तत्प्राप्तवान् ।

वेदनं प्रशंसति—

तथैवैतद्यजमानो धाय्याभिरेवेमाल्लोकान्धयति यं यं कामं कामयते य एवं वेद यदेव धाय्याः, इति ।

या एवोक्ता धाय्याः सन्ति ताभिर्वेदिता यजमानः कामितं लोकं धयति । अत्र धयत्याभिरिति धाय्याशब्दनिर्वचनमर्थाद्दर्शितम् ।

प्रकारान्तरेण प्रशंसामाह—

यत्र यत्र वै देवा यज्ञस्य च्छिद्रं निरजानंस्तद्धाय्याभिरपिदधुस्तद्धाय्यानां धाय्यात्वम्, इति ।

देवा यदा यज्ञस्य च्छिद्रमङ्गवैगुण्यं ज्ञातवन्तस्तदा धाय्याभिरपिदधुराच्छादितवन्तस्तस्माद्धात्याभिरिति व्युत्पत्त्या धाय्यात्वं संपन्नम् ।

वेदनं प्रशंसति—

अच्छिद्रेण हास्य यज्ञेनेष्टं भवति य
एवं वेद यद्देव धाय्या३:, इति।

तद्देवेत्यत्र योऽयमुकारः सोऽयं पूर्वेण फलेन समुच्चयार्थः । न केवलं पूर्वं फलं किंत्विदमपीत्यर्थः । अत्र पूर्वप्लुतिः प्रशंसाद्योतनार्था ।

पुनरपि प्रकारान्तरेण प्रशंसति—

स्यूमहैतद्यज्ञस्य यद्धाय्यास्तद्यथा सूच्या वासः
संदधदियादेवमेवैताभिर्यज्ञस्य च्छिद्रं संदध-
देति य एवं वेद यद्देव धाय्या३:, इति।

पुनरपि प्रकारान्तरेण प्रशंसति—

तान्यु वा एतान्युपसदामेवोक्थानि यद्धाय्या
अग्निर्नेतेत्याग्नेयी प्रथमोपसत्तस्या एतदुक्थं
त्वं सोम क्रतुभिरिति सौम्या द्वितीयोपस-
त्तस्या एतदुक्थं पिन्वन्त्यप इति वैष्णवी
तृतीयोपसत्तस्या एतदुक्थम्, इति।

उपसदामर्थवादेऽग्निरनीकं सोमः शल्यो विष्णुस्तेजनमिति प्रस्तुत्याग्न्यादिदेवताकास्तिस्र उपसदः समाम्नावाः । अत्राप्यग्निर्नेतेत्यादयस्तत्तद्देवताका एव धाय्याः श्रुवाः । एकैका धाय्यैकैकस्या उपसदः शस्त्रम् ।

उक्तार्थवेदनं तत्पूर्वकं शंसनं च प्रशंसति—

यावन्तं ह वै सौम्येनाध्वरेणेष्ट्वा लोकं
जयति तमत एकैकयोपसदा जयति य
एवं वेद यश्चैवं विद्वान्धाय्याः शंसति, इति।

वेदित्वा शंसिता चैकैकधाय्यारूपयोपसदा कृत्स्नं सोमयागफलं प्राप्नोति । उपसत्संबन्धिशस्त्रत्वेनाभिहितत्वादुपसत्त्वोपचारः।

---

१. ऋ. ३-२०-४ ॥ २. ऋ. १-९१ २ ॥ ३ ऋ. १-६४-६ ॥

अत्र कंचित्पूर्वपक्षमुपन्यस्यति –

तद्धैक आहुस्तान्वो मह इति शंसेदेतां वाव वयं भरतेषु शस्यमानामभिव्यजानीम इति वदन्तः, इति ।

तद्ध तत्रैव तृतीयधाय्याविषये केचिदेवमाहुः । तान्वो महो मरुत इत्येतां वैष्णवीं तृतीयां धाय्यां शंसेत् । न तु पिन्वन्त्यप इत्येताम् । तत्रोपपत्तिं चैवमाहुः। बिभर्ति फलमिति भरो यज्ञस्तं धरं तन्वन्तीति भरता ऋत्विजस्तेषु पूर्वकालीनेषु तान्वो मह इत्येतामेवर्चं शस्यमाना वयमभिजानीम इति स्वानुभवमिवरेषाग्रे वदन्तस्तं पूर्वपक्षमाहुः ।

तं निराचष्टे–

तत्तन्नाऽऽदृत्यम्, इति ।

तद्विषयं तन्मतं नाऽऽदरणीयम् ।

विपक्षे बाधकं दर्शयति–

यदेतां शंसेदीश्वरः पर्जन्योऽवर्ष्टोः, इति ।

यदि होता तान्वो मह इत्येतामृचं शंसेत्तदानीं पर्जन्यो मेघः स्वस्वकालेष्ववर्ष्टोरीश्वरो वृष्टिराहित्यं कर्तुं समर्थो भवति । वृष्टिर्न भवेत् । वृष्ट्यनुरूपाणां पदानां तस्यामृच्यभावादित्यर्थः ।

सिद्धान्तं दर्शयति–

पिन्वन्त्यप इत्येव शंसेत्, इति ।

इयमेव धाय्या न तु तान्वो मह इत्यादिकाऽपि ।

विहितायामृचि वृष्ट्यनुकूलसद्भावं दर्शयति–

वृष्टिवनि पदं मरुत इति मारुतमत्यं न मिहे दिनयन्तीति विनीतवद्यद्विनीतवत्तद्विक्रान्तवद्यद्विक्रान्तवत्तद्वैष्णवं वाजिनमितीन्द्रो वै वाजी तस्यां वा एतस्यां चत्वारि पदानि

---

१ ऋ. २-३४-११ ॥ ऋ. १-६४ ६ ॥

वृष्टिवनि मारुतं वैष्णवमैन्द्रम्, इति।

अत्र पिन्वन्त्यप इति पदं श्रूयते तत्सेचनार्थम्। पिवि सेचन इत्यस्माद्धातोरुत्पन्नत्वात्। अत इदं पदं वृष्टिवनि वृष्टिसंभजनकारीत्यर्थः। पिन्वन्त्ययो मरुत इत्यत्र मरुत इति पदं मारुतं मरुतां वाचकं पदं तदपि दृष्टचनुकूलं पुरोवातस्य वृष्टयङ्गत्वात्। अत्यं न मिहे विनयन्ति वाजिनमिति तृतीयपादे विनीतवत्पदमस्ति विनयन्तीत्यस्य नयतिधातुजन्यत्वात्। तेन च विनयेन वृष्टिपातनं लक्ष्यते। किं च यद्विनीतवत्पदं तद्विक्रान्तवदित्यमुमर्थमाचष्टे धातूनामनेकार्थत्वात्। तथा सति यद्विक्रान्तवत्पदं तद्वैष्णवं विष्णुसंबन्धि। इदं विष्णुर्विचक्रम इति श्रुत्यन्तरात्। तथा सति वैष्णव्यास्तृतीयस्या उपसदः संबद्धमपि भवतीत्यर्थः। तस्मिन्नेव तृतीयपादे वाजिन मिति पदं विद्यते तत्रेन्द्रो वाजिशब्दार्थः। वृष्टिद्वाराऽन्नप्रदत्वेन वाजोऽन्नमस्यास्तीति वक्तुं शक्यत्वात्। उक्तेन प्रकारेण तस्यामेवैतस्यां पिन्वन्त्यप इत्यृचि चत्वारि पदानि वृष्टेरनुकूलानि वृष्टिवनि मारुतं वैष्णवमैन्द्रं चेति। तस्मादत्र पूर्वोक्तदोषो नास्तीत्यर्थः।

पुनरप्येतामृचं प्रकारान्तरेण प्रशंसति—

सा वा एषा तृतीयसवनभाजना सती मध्यंदिने शस्यते तस्माद्धेदं भरतानां पशवः सायंगोष्ठाः सन्तो मध्यंदिने संगविनीमायन्ति सो जगती जागता हि पशव आत्मा यजमानस्य मध्यंदिनस्तद्यजमाने पशून्दधाति ॥ १८ ॥ इति।

सेयं पिन्वन्त्यप इत्यृगस्ति सैषैव तृतीयसवनभाजना जगतीछन्दस्कत्वाज्जागतस्य तृतीयसवनस्य योग्या। तादृशी सती होत्रा मध्यंदिने शस्यते। तस्मादेव कारणादिदं लोके दृश्यते। सायंकाले गोष्ठे व्रजे ये पशवस्तिष्ठन्ति ते सायंगोष्ठाः। भरतानामृत्विजां पशवस्तादृशाः सन्तो मध्यंदिने संगविनीं संगवकालयोग्यां शालामायन्ति प्राप्नुवन्ति। ये पशवः क्षीरं दुहन्ति ते सायं गृहे समागच्छन्ति। ये तु न दुहन्ति ते सायं व्रज एव निवसन्ति। उभयविधा अपि ते मध्याह्नकाले घर्मकालीनसंतापनिवारणाय निर्मितां संगवकालयोग्यां शालामागच्छन्ति। तदेतन्मध्याह्नपाठनिमित्तमिति। किंच सो पूर्वोक्ताऽप्यृग्जगतीछन्दस्का। पशवश्च जगतीछन्दसा सह प्रजायन्ते मध्यंदिन उत्पन्नत्वात्।

जागतो मध्यंदिनकालश्च यजमानस्याऽऽत्मा । तथा सति तस्मिन्काले जगतीपाठेन यजमाने पशून्संपादयति ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऐतरेयब्राह्मण-भाष्ये द्वादशाध्याये सप्तमः खण्डः ॥ ७ ॥ (१८) [८९]

अथ प्रगाथान्तरं विधत्ते–

मरुत्वतीयं प्रगाथं शंसति पशवो वै मरुतः पशवः प्रगाथः पशूनामवरुद्ध्यै , इति ।

यस्मिन्प्रगाथे मरुतः श्रूयन्ते सोऽयं मरुत्वतीयः प्र व इन्द्राय बृहते मरुतो ब्रह्मार्चतेत्यस्मिन्प्रगाथे मरुतः श्रूयन्ते तमिमं शंसेत् । पशूनां प्रावरणराहित्येऽप्यरण्ये संचारकाले वायवोऽनुगृह्य न तान्बाधन्ते । ततस्तंबन्धान्मरुतां पशुत्वं प्रागाथस्य च पशुप्राप्तिहेतुत्वात्पशुत्वमतः स प्रगाथः पशुप्राप्त्यै भवति ।

अथ निविद्धानीयं सूक्तं विधत्ते–

जनिष्ठा उग्रः सहसे तुराय ते सूक्तं शंसति तद्धा एतद्यजमानजननमेव सूक्तं यजमानं ह वा एतेन यज्ञाद्देवयोन्यै प्रजनयति , इति ।

होता जनिष्ठा इत्यादिसूक्तं शंसेत्तदेतत्सूक्तं यजमानजननमेव । कथमिति तदुच्यते । एतेन सूक्तेन होता यज्ञादनुष्ठीयमानाद्देवयोन्यै देवलोकस्थानार्थं यजमानं प्रजनयति । तस्माद्यजमानजननत्वम् ।

तेन रूपेण प्रशंस्य पुनः प्रकारान्तरेण प्रशंसति–

तत्संजयं भवति सं च जयति वि च जयते, इति ।

यस्मादेतेन सूक्तेन संयुज्यापि शत्रून्यजमानो जयति वियुज्यापि जयते तस्मात्सूक्तं संजयं समीचीनो जयो येन सूक्तेनेति समासः ।

पुनरपि प्रकारान्तरेण प्रशंसति–

एतद्गौरिवीतं गौरिवीतिर्ह वै शाक्त्यो नेदिष्ठं स्वर्गस्य लोकस्यागच्छत्स एतत्सूक्तमपश्यत्तेन स्वर्गं लोकमजयत्तथैवैतद्यज-

---

१ क्र. १० ७३-१ ॥

मान एतेन सूक्तेन स्वर्गं लोकं जयति, इति ।

शक्तिनामकस्य महर्षेः कुले जातः शाक्त्यो गौरिवीतिर्नाम महर्षिः । स तु स्वर्गस्य समीपं गत्वा प्रवेष्टुमशक्तः संस्तत्साधनत्वेनैतत्सूक्तं दृष्ट्वा तेन स्वर्गं प्राविशत् । तस्मादेतत्सूक्तं महर्षिनाम्ना गौरिवीतमित्युच्यते । यथा महर्षिस्तथा यजमानोऽप्येतेन सूक्तेन स्वर्गं प्राप्नोति ।

तस्मिन्सूक्ते निवित्प्रक्षेपस्य स्थानं विधत्ते–

तस्यार्धाः शस्त्वाऽर्धाः परिशिष्य
मध्ये निविदं दधाति, इति ।

तस्य सूक्तस्य संबन्धिनीष्वृक्षु भागद्वयं कृत्वा द्वयोर्भागयोर्मध्य इन्द्रो मरुत्वानित्येतां निविदं शंसेत् । नन्वस्मिन्नेकादशर्चे सूक्ते समभागो न संभवतीति चेत्तर्हि प्रथमभागे कांचिदधिकां शस्त्वा तत ऊर्ध्वं प्रक्षिपेत् । एकां भूयसीषु शस्त्वेत्युक्तत्वात् ।

निविदं प्रशंसति–

स्वर्गस्य हैष लोकस्य रोहो यन्निवित्, इति ।

रोह आरोहणहेतुरित्यर्थः ।

तत्र स्वरविशेषं विधत्ते–

स्वर्गस्य हैतल्लोकस्याऽऽक्रमणं यन्निवित्तामा-
क्रममाण इव शंसेदुपैव यजमानं निगृह्णीत
योऽस्य प्रियः स्यादिति नु स्वर्गकामस्य, इति ।

येयं निविदस्ति तदेतत स्वर्गस्याऽऽक्रमणं सोपानस्थानीयं तस्माद्यथा लोके सोपानारोहणे श्रमेण पुनः पुनः श्वासं करोति तदनुकारिणं स्वरं कृत्वा तथैव पठेत् । एवं पाठे सत्यस्य यजमानस्य यः पुमान्प्रियः स्यात्स पुमानेतं यजमानमुपैव समीप एव निगृह्णीत स्वीकुर्यात् । इति त्वेष एव प्रयोगः स्वर्गकामस्यावगन्तव्यः । वक्ष्यमाणप्रयोगेण सांकर्यपरिहाराय स्वर्गकामस्येत्युक्तिः ।

अभिचारप्रयोगं विधत्ते–

अथाभिचरतो यः कामयेत क्षत्त्रेण विशं हन्या-
मिति त्रिस्तर्हि निविदा सूक्तं विशंसेत्क्षत्त्रं वै
निविद्विद्सूक्तं क्षत्त्रेणैव तद्विशं हन्ति, इति ।

क्षत्रियजात्या वैश्यजातेर्वधं कामयमानो यजमानो निविदा सूक्तं विर्विशंसेत् । एतदुक्तं भवति–सूक्तस्याऽऽदौ मध्ये चान्ते च निविदं दध्यात् । तदुक्तं सूक्तविच्छेदकं शंसनमिति । निविदः क्षत्रियजातित्वं सूक्तस्य वैश्यजातित्वं पूर्वमेवाऽऽम्नातम् । अत उक्तशंसनेन क्षत्रियजात्या वैश्यजातिं हन्ति सोऽयमेकोऽभिचारप्रकारः ।

अथैतद्विपर्ययेणाभिचारं विधत्ते

यः कामयेत विशा क्षत्त्रं हन्यामिति त्रिस्तर्हि सूक्तेन निविदं विशंसेत्क्षत्त्रं वै निविद्विद्सूक्तं विशैव तत्क्षत्त्रं हन्ति, इति ।

निवित्पदानामादौ मध्ये चान्ते च सूक्तं पठेत्तदेतन्निविद्विच्छेदरूपं शंसनम् ।

प्रकारान्तरेणाभिचारं विधत्ते–

य उ कामयेतोभयत एनं विशः पर्यवच्छिनदानीत्युभयतस्तर्हि निविदं व्याहृयीतोभयत एवैनं तद्विशः पर्यवच्छिनत्ति, इति ।

यस्तु होतैनं यजमानमुभयतः पूर्वोत्तरभागयोः संबन्धिनीर्विशः प्रजाः पर्यवच्छिनदानि परितो विच्छिन्नाः करवाणीति कामयेत । स्वस्मात्पूर्वभाविन्यः पितृपितृव्यमातुलादयो याः प्रजाः स्वस्मादुत्तरभाविन्यः पुत्रजामात्रादयो याः प्रजास्तासां सर्वासामवच्छेदं करवाणीत्यर्थः । यद्वा उभयतो मातृपक्षे पितृपक्षे च विद्यमानानां प्रजानामवच्छेदं विरोधं करवाणीत्येवं यो होता यजमानं द्वेष्टि स होता निविदमुभयतो निविद आदावन्ते च व्याहृयीत विविधमाह्वानं कुर्यात् । आदावपि शौंसावोमित्येतमाह्वानमन्त्रं पठेत् । अन्तेऽपि तथा पठेदित्यर्थः । तथा सत्येनं यजमानं पूर्वापरभागयोर्मातृपक्षपितृपक्षयोश्च प्रजाभिः सहावच्छिनत्ति ।

उक्तविधीनामसांकर्याय व्यवस्थया निगमयति–

इति न्वभिचरत इतरथा त्वेव स्वर्गकामस्य, इति ।

इति नु यः कामयेत क्षत्त्रेणेत्यायुक्त एव प्रकारोऽभिचरतो द्रष्टव्यः । इतरथात्वेव प्रकारान्तरं तु पूर्वोक्तं सूक्तमध्ये निवित्प्रक्षेपरूपं सोपानारोहणसदृशस्वरोपेतं स्वर्गकामस्य द्रष्टव्यम् ।

अन्तिमया सूक्तगतयर्चा समाप्तिं विधत्ते—

वयः सुपर्णा उपसेदुरिन्द्रमि-
त्युत्तमया परिदधाति, इति ।

वेरेर्धातोर्गत्यर्थस्य वय इति रूपं गमनकुशला इत्यर्थः । अत एव सुपर्णाः पक्षिसदृशाः केचिदिन्द्रं स्वर्गवासिन उपसेदुः प्राप्तवन्तः । इति तस्य पादस्यार्थः ।

द्वितीयपादं सुबोधत्वाभिप्रायेण पठति—

प्रियमेधा ऋषयो नाधमानाः, इति ।

ग्रन्थतदर्थावधारणशक्तिर्मेधा सा प्रिया येषामृषीणां ते प्रियमेधा ऋषयोऽतीन्द्रियार्थद्रष्टारो नाधमानाः किंचित्स्वकार्यं याचमाना इन्द्रमुपसेदुरिति पूर्वेणान्वयः ।

तृतीयपादस्य पूर्वभागमनूद्य व्याचष्टे—

अप ध्वान्तमुर्णहीति येन तमसा प्रावृतो मन्येत
तन्मनसा गच्छेदप हैवास्मात्तल्लुप्यते, इति ।

हे इन्द्र ध्वान्तं तमोऽपोर्णुहि, अपसारय । एतस्मिन्भागे पठिते सति तमो लुप्यते । होता येन तमसा प्रावृतश्छादितोऽहमिति मन्येत तत्तमो मनसा गच्छेत्, ध्यायेत् । तमो हि बहुविधं दृष्टिनिरोधकं मोहरूपं द्वितीयं पापरूपं तृतीयम् । तेषां मध्ये येन स्वस्य बाधात्तत्तम एतद्भागपाठकाले विनष्टमिति ध्यायेत् । तथा सति तत्तमोऽस्मात्पुरुषाद्विनश्यत्येव ।

तस्य पादस्योत्तरभागे किंचिदनुष्ठानं विधत्ते—

पूर्धि चक्षुरिति चक्षुषी मरीमृज्येत, इति ।

हे इन्द्र चक्षुः पूर्धि दृष्टिं पूरय । एतं भागं पठन्स्वेन हस्तेन चक्षुषी मरीमृज्येत पुनः पुनः शोधयेत् ।

वेदनं प्रशंसति—

आजरसं ह चक्षुष्मान्भवति य एवं वेद, इति ।

आजरसं जरासमाप्तिपर्यन्तम् ।

चतुर्थपादमनूद्य व्याचष्टे—

मुमुग्ध्यस्मान्निधयेव बद्धानिति पाशा
वै निधा मुमुग्ध्यस्मान्पाशादिव बद्धा-
नित्येव तदाह ॥ १९ ॥ इति ।

हे इन्द्र निधयेव पाशेनेव तमसा बद्धानस्मान्मुमुग्धि मोचय । अस्मिन्पादे निधाशब्देन पाशा बन्धनहेतवो रज्जवो विवक्षिताः । अतो निधयेव बद्धानित्युक्ते पाशादिव बद्धानित्युक्तं भवति ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऐतरेय-
ब्राह्मणभाष्ये द्वादशाध्यायेऽष्टमः खण्डः ॥ ८ ॥ (१९) [९०]

अथ मरुत्वतीयं शस्त्रं तदन्तपठनीयां याज्यां च प्रशंसितुमुपाख्यानमाह—

इन्द्रो वै वृत्रं हनिष्यन्सर्वा देवता अब्रवीदनु
मोपतिष्ठध्वमुप मा ह्वयध्वमिति तथेति तं हनि-
ष्यन्त आद्रवन्सोऽवेन्मां वै हनिष्यन्त आद्र-
वन्ति हन्तेमान्भीषया इति तानभिप्राश्वसी-
त्तस्य श्वसथादीषमाणा विश्वे देवा अद्रवन्म-
रुतो हैनं नाजहुः प्रहर भगवो जहि वीरयस्वे-
त्येवैनमेतां वाचं वदन्त उपातिष्ठन्त, इति ।

पुरा कदाचिदिन्द्रो वृत्रं हन्तुमुद्यतः सर्वा अपि देवताः प्रत्येवमब्रवीत् । अनु मोपतिष्ठध्वमानुकूल्येन मां सेवध्वम् । उप मा ह्वयध्वं वृत्रवधाय प्रवृत्तं मामुपह्वयध्वमनुजानीध्वमिति । ततोऽङ्गीकृत्य सर्वे देवास्तं वृत्रं हन्तुमुद्यता आगच्छन् । तदा स वृत्रो मां हन्तुमुद्यता आद्रवन्तीत्यवेत्स्वमनसा ज्ञातवान् । तत इदं विचारयामास । हन्त सम्यग्जातं देवनिवारणोपायस्य प्रतिभातत्वात् । इमान्देवान्भीषयै, अहं भीतान्करवाणीति विचार्य तान्देवानभिलक्ष्य प्राश्वसीत्प्रश्वासमकरोत् । तस्य वृत्रस्य श्वसथात्प्रश्वासादीषमाणा विधूताः सर्वे देवाः पलायनमकुर्वन् । वृत्रो हि स्वजन्मानन्तरं सर्वासु दिक्षु शरपातमात्रदेशं प्राप्य वृद्धिं गतवान् । तथा चान्यत्र श्रुतिः—' स रेषुमात्रमिषुमात्रं विष्वङ्ङवर्धत स इमाल्लोकानवृणोद्यदिमाँल्लोकानवृणोत्तद्वृत्रस्य वृत्रत्वम् ' इति । तादृशस्य प्रौढशरीरस्य प्रश्वासः प्रलयकालीनवायुसमानोऽवस्वदीयश्वासेन देवाः परमाणव

इव दूरेऽपसारिता. । तदानीं मरुत एवैनमिन्द्रं नाजहुर्न परित्यक्तवन्तः । हे इन्द्र भगवन्वृत्रं वज्रेण प्रहर तेन प्रहारेण जहि मारय ततो वरियस्व स्वकीयं वीरत्वं प्रकटय । इत्यनेनैव प्रकारेणैनमिन्द्रं प्रत्येतां वाचं वदन्तो मरुतस्त मिन्द्रमसेवन्त ।

उक्तमर्थं मन्त्रसंवादेन द्रढयति—

तदेतदृषिः पश्यन्नभ्यनूवाच वृत्रस्य त्वा श्वसथादीषमाणा विश्वे देवा अजहुर्ये सखायः । मरुद्भिरिन्द्र सख्यं ते अस्त्वथेमा विश्वाः पृतना जयासीति, इति ।

कश्चिदृषिर्दिव्यज्ञानेन तदेतदवपलायनं पश्यन्वृत्रस्येत्यादिमन्त्रेण प्रकटी चकार । हे इन्द्र तव सखायो विश्वे देवा ये सन्ति ते सर्वे वृत्रस्य श्वसथात्पलायमानास्त्वां परित्यक्तवन्तस्तस्मादिदानीं ते तव मरुद्भिः सह सख्यमस्तु । अथानन्तरमिमाः सर्वा वृत्रसंबन्धिनीं ते सेना जेष्यसीति ।

अथ मरुतामिन्द्रकृतमुपकारं दर्शयति—

सोऽवेदिमे वै लिक मे सचिवा इमे माऽकामयन्त हन्तेमानस्मिन्नुक्थ आभजा इति तानेतस्मिन्नुक्थ आभजदथहैते तर्ह्युभे एव निष्केवल्ये उक्थे आसतुः, इति ।

स इन्द्रः स्वमनस्येवेदिचारितवान् । कथमिति तदुच्यते । इमे वै किल पुरतः स्थिता मरुत एव मे सचिवाः सखायः । यस्मादिमे मरुतो माऽकामयन्त मामपेक्षितवन्तो न तु परित्यज्य मां गतास्तस्मादस्मत्सख्यं हन्त सम्यगेभिः कृतमित्यहं दृष्टवानस्मि तत इमान्मरुतोऽस्मिन्नुक्थे माध्यंदिनगतशस्त्र आभजे भागिनः करवाणीति मनस्येवं विचार्य तथैवाकरोत् । अथानन्तरं तर्हि तदाप्रभृति, एते ह एव शस्त्रभागिनोऽभूवन्निति शेषः । ततः पूर्वं तु माध्यंदिनसवने निष्केवल्यनामके शस्त्रे केवलेन्द्रदेवताके उभे आसतुः । न तु तत्र मरुतां प्रवेश आसीत् । तस्मादिदानीं प्रवेश इन्द्रकृत उपकारः ।

इन्द्रेण दत्तान्मरुतां भागान्प्रदर्शयति—

मरुत्वतीयं ग्रहं गृह्णाति मरुत्वतीयं प्रगाथं
शंसति मरुत्वतीयं सूक्तं शंसति मरुत्वतीयां
निविदं दधाति मरुतां सा भक्तिः, इति ।

मरुतोऽस्य सन्तीति तैः सहितो मरुत्वांस्तदीयं ग्रहमध्वर्युर्गृह्णाति । होता प्र व इन्द्राय बृहत इत्येतं मरुत्वतीयं प्रगाथं शंसति जनिष्ठा उग्र इत्यादिकं मरुत्वतीयं शंसतीन्द्रो मरुत्वानित्यादिकां मरुत्वतीयां निविदं सूक्ते प्रक्षिपति । ग्रह-ग्रहणादिसूक्तशंसनान्ते मरुत्संबद्धा सा मरुतां भक्तिर्भागः ।

अथ शस्त्रयाज्यां विधत्ते—

मरुत्वतीयमुक्थं शस्त्वा मरुत्वतीयय
यजति यथाभागं तद्देवताः प्रीणाति, इति ।

उक्थं शस्त्रं तच्छंसनादूर्ध्वं मरुत्वद्देवताकां शस्त्रयाज्यां पठेत् । तेन स्वरव भागमनतिक्रम्य देवतास्तर्पयति ।

तां मरुत्वतीयां याज्यां दर्शयति—

[1]ये त्वाऽहिहत्ये मघवन्नवर्धन्ये शाम्बरे हरिवो
ये गविष्टौ । ये त्वा नूनमनुमदन्ति विप्राः
पिबेन्द्र सोमं सगणो मरुद्भिरिति, इति ।

हे इन्द्र, अहिहत्ये वृत्रवधे ये मरुतस्त्वामवर्धन्वर्धितवन्तः । अहिशब्दो वृत्र-वाची । अहिमाचक्षते वृत्रमिति वररुचिवचनात् । शम्बरः कश्चिदसुरस्तत्संबन्धी वधः शाम्बरः । तस्मिन्ये मरुतस्त्वामवर्धन्वर्धितवन्त इत्यन्वयः । गवामिष्टिरन्वेषणं गविष्टिः । वलोनाम कश्चिदसुरो गुहायामासीत् । इन्द्रश्च तस्य बिलमपोर्णोदिति श्रुत्यन्तरात् । तेन वलेन गावोऽपहृतास्तासां गवामन्वेषणमिन्द्रसहिता मरुतः कृतवन्तः । देवा वै वले गाः पर्यपश्यन्निति श्रुत्यन्तरात् । तासां गवामन्वेषणे ये मरुतस्त्वामवर्धयन् । तथा ये मरुतो नूनमद्यापि विप्रा ऋत्विग्रूपा भूत्वा त्वामनुमदन्ति स्तोत्रैरनुदिनं हर्षयन्ति हे इन्द्र तैर्मरुद्भिः सहितस्त्वं सगणो भूत्वा सोमं पिबेति याज्यामन्त्रार्थः ।

एतां याज्यां प्रशंसति—

[1] ऋ. ३·४७·४ ।

यत्र यत्रैवैभिर्व्यजयत यत्र वीर्यमकरोत्तदैवैतत्सम-नुवेद्येन्द्रेणैनान्ससोमपीथान्करोति ॥ २० ॥ इति ।

यत्र यत्रैव यस्मिन्यस्मिन्वृत्रवधादिके स इन्द्र एभिर्मरुद्भिर्विजयं प्राप्तः । प्राप्य च यत्र यत्र यस्मिन्नपि युद्धादौ वीर्यं शौर्यमकरोत्तदैवैतदखिलमिन्द्राय समनुवेद्य सम्यगनुक्रमेण विज्ञाप्येन्द्रेण सहैनान्मरुतः सोमपानसहितान्करोति ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऐतरेयब्रा-ह्मणभाष्ये द्वादशाध्याये नवमः खण्डः ॥९॥ (२०) [९१]

अथ निष्केवल्याख्यं शस्त्रं विधातव्यं तस्य चायं संग्रहश्लोकः-

" स्तोत्रे यो योऽनुरूपश्च धाय्या प्रागाथिकं तथा ।
निविद्धानीयसूक्तं च निष्केवल्ये प्रकीर्तितम् " इति ॥

तदर्थमादावुपाख्यानमाह--

इन्द्रो वै वृत्रं हत्वा सर्वा विजितीर्विजित्याब्र-वीत्प्रजापतिमहमेतदसानि यत्त्वमहं महान-सानीति स प्रजापतिरब्रवीदिथ कोऽहमिति यदेवैतदवोच इत्यब्रवीत्ततो वै को नाम प्रजापतिरभवत्को वै नाम प्रजापतिर्यन्म-हानिन्द्रोऽभवत्तन्महेन्द्रस्य महेन्द्रत्वम्, इति ।

इन्द्रः पुरा वृत्रं हत्वा सर्वा विजितीर्जेतव्या भूमीर्विजित्य प्रजापतिमिदम-ब्रवीत् । हे प्रजापते त्वमिदानीं यदसि, एतदहमितः परमसानि भवानि । किं तदिति वीक्षायां विशेषाकारेणोच्यते । अहं महानसानि सर्वेभ्यो भूतेभ्योऽ-धिकः पूज्यो भवानीति । ततः स प्रजापतिरिदमब्रवीत् । मदीये महत्त्वे त्वया स्वीकृते सत्यनन्तरमहं को नाम भविष्यामीति । तत इन्द्र इदमब्रवीत् । हे प्र-जापते स्वात्मानमुद्दिश्य निवेदनेन क इति यदेवैतदवोचस्तदेव त्वं भवेति । तत आरभ्य क इत्येतन्नामवान्प्रजापतिरभूत् । एतत्कशब्दवाच्यत्वं सर्वत्र प्रसिद्धम् । अत एव श्रुत्यन्तरेषु प्रतिग्रहमन्त्रब्राह्मण एवमाम्नायते—क इदं कस्मा अदादित्याह प्रजापतिर्वै कः प्रजापतय एव तद्ददातीति । कशब्दस्य सुखवाचित्वाच्चेन प्रजापतेर्व्यवहारे सति सुखी प्रजापतिरित्युक्तं भवति ।

प्रजापतिगतं महत्त्वं स्वीकृत्येन्द्रो यस्मान्महानभवत्तस्मान्महेन्द्रनाम संपन्नम् । श्रुत्यन्तरेऽप्येतदाम्नातम्-' इन्द्रो वृत्रमहन्तं देवा अब्रुवन्महान्वा अयमभूद्यो वृत्रमवधीदिति तन्महेन्द्रस्य महेन्द्रत्वम् इति ।

अथेन्द्रस्य महत्त्वप्रसक्तं सत्काराविशेषं दर्शयति-

स महान्भूत्वा देवता अब्रवीदुद्धारं म उद्धरतेति यथाऽप्येतर्हीच्छाति यो वै भवति यः श्रेष्ठतामश्नुते स महान्भवाति तं देवा अब्रुवन्स्वयमेव ब्रूष्व यत्ते भविष्यतीति स एतं माहेन्द्रं ग्रहमब्रूत माध्यंदिनं सवनानां निष्केवल्यमुक्थानां त्रिष्टुभं छन्दसां पृष्ठं साम्नां तमस्मा उद्धारमुदहरन्, इति ।

स इन्द्र उक्तप्रकारेण महत्त्वं प्राप्य देवताः प्रत्येतदब्रवीत् । हे देवा उद्धारमुत्कर्षं निमित्तीकृत्य यः पुंसा पूजाविशेषो ह्रियते संपाद्यते सोऽयं सत्कार उद्धारस्तं सत्कारभागं मे मदर्थमुद्धरत पृथक्कुरुतेति । यथेत्यादिना लौकिकदृष्टान्त उच्यते । यो वै भवति यः पुमान्भवत्यैश्वर्यं प्राप्नोति । यश्च श्रेष्ठतां विद्याचारादिप्रयुक्तवैशिष्ट्यमश्नुते । स प्राप्तैश्वर्यो विशिष्टश्च सर्वेषां मध्ये महान्भवति । स तादृशः पुरुष एतर्ह्यपीदानीमपि यथा विशिष्टपूजारूपं भागमिच्छति तथाऽयमिन्द्रोऽपीत्यध्याहारः । तमुद्धारेच्छावन्तमिन्द्रं देवा इदमब्रुवन् । हे इन्द्र यत्ते प्रियं भविष्यति तत्स्वयमेव ब्रूष्वेति । ततः स इन्द्रो ग्रहाणां मध्य एतं माहेन्द्रं ग्रहमब्रूत तथा सवनानां मध्ये माध्यंदिनं सवनं शस्त्राणां मध्ये निष्केवल्यं शस्त्रं छन्दसां मध्ये त्रिष्टुभं साम्नां मध्ये पृष्ठस्तोत्रनिष्पादकं बृहद्रथंतरवैरूपादिकम् । ततो देवा अस्मा इन्द्राय तमुद्धारं माहेन्द्रग्रहादिकं यज्ञावुदहरन् तदेतच्छाखान्तरेऽप्याम्नातम्--' स एतं माहेन्द्रमुद्धारमुदहरत वृत्रं हत्वाऽन्यासु देवतास्वधीति यन्माहेन्द्रो गृह्यत उद्धारमेव तं यजमान उद्धरते न प्रजास्वधि ' इति ।

वेदनं प्रशंसति -

उदस्मा उद्धारं हरन्ति य एवं वेद, इति ।

उद्धारभागं दत्तवतां देवानां तस्मिन्नुद्धारे स्वापेक्षितभागप्रार्थनां दर्शयति-

तं देवा अब्रुवन्सर्वं या अवोचथा आपि नोऽत्रास्त्विति स नेत्यब्रवीत्कथं वोऽपि स्यादिति तमब्रुवन्नप्येव नोऽस्तु मघवान्निति तानीक्षतैव ॥ २१ ॥ इति ।

उद्धारयुक्तं तमिन्द्रमितरे देवा इदमब्रुवन् । हे मघवन्निन्द्र सर्वमेव यज्ञं त्वत्संबन्धित्वेनोक्तवानसि, अस्माकमप्यत्र सारो भागोऽस्त्विति । ततः स इन्द्र एवमब्रवीत् । अयं सारः सर्वोऽपि ममैवापेक्षितो युष्माकमप्यत्र भागः कथं स्यान्नास्त्येव युष्माकं भाग इति । निराकृतवन्तं तमिन्द्रं देवाः प्रार्थयमाना इदमब्रुवन् । हे मघवन्नोऽस्माकमप्यस्त्वेव सर्वथा भागोऽपेक्षित एवेति । ततः स इन्द्रस्तान्देवानीक्षतैवानुग्रहदृष्ट्याऽवलोकितवानेव ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश, ऐतरेय ब्राह्मणभाष्ये द्वादशाध्याये दशम खण्डः ॥ १० ॥ (२१) [९२]

अथ निष्केवल्यशस्त्रे याज्यां विधातुं पूर्वोपाख्यानशेषं प्रस्तौति

ते देवा अब्रुवन्नियं वा इन्द्रस्य प्रिया जाया वावाता प्रासहा नामास्यामेवेच्छामहा इति तथेति तस्यामैच्छन्त सैनानब्रवीत्प्रातर्वः प्रतिवक्तास्मीति तस्मात्स्त्रियः पत्याविच्छन्ते तस्मादु स्त्र्यनुरात्रं पत्याविच्छते तां प्रातरुपायन्सैतदेव प्रत्यपद्यत, इति ।

ते देवा इन्द्रस्याभिप्रायमजानन्तः परस्परमिदमब्रुवन् । इयं वै पुरतो दृश्यमानैवेन्द्रस्य प्रिया जाया सा वावाता मध्यजातीया । राज्ञां हि विविधाः स्त्रियस्तत्रोत्तमजातेर्महिषीति नाम । मध्यमजातेर्वावातेति । अधमजातेः परिवृक्तिरिति । अत एवाश्वमेधेऽश्वं प्रति राजस्त्रीणां कर्तव्यविशेष एतैर्नामभिराम्नाताः-भूरिति महिषी भुव इति वावाता सुवरिति परिवृक्तिरिति । तस्याश्च वावातायाः प्रासहेति नाम राजप्रियत्वात् । प्रसह्य बलात्कारेण सर्वं कार्यं कर्तुं शक्तेत्यर्थः । तस्मादेतस्यामेव निमित्तभूतायां सत्यां राजाभिप्रायं ज्ञातुमिच्छामहा इति विचार्य सर्वेऽङ्गीकृत्य तस्यां वावातायां स्वाभीष्टमैच्छन्त ।

साऽपि वावातैवान्देवानिदमब्रवीत् । रात्रौ राजाभिप्रायं विचारयितुं शक्यत्वात्परेद्युः प्रातःकाले वो युष्माकं प्रत्युत्तरं वक्ष्यामि वक्ष्यामीति । यस्मादेवं तस्माल्लोकेऽपि प्रियाः स्त्रियः सर्वमवगन्तव्यं वृत्तान्तं पत्यावगन्तुमिच्छन्ते । यस्माद्विविक्तावसरे सर्वमवगन्तुं सुशकं तस्मादु तस्मादेव कारणात्प्रिया स्त्री, अनुरात्रं रात्रिसमये विविक्तवेलायां पत्यौ सर्वमवगन्तुमिच्छते । देवास्तु प्रातःकाले वावातामुपागच्छन् । सा वावातैतदेव वक्ष्यमाणमन्त्ररूपं वाक्यं प्रत्युत्तरत्वेन प्राप्तवती

तस्मिन्मन्त्रे पादत्रयं पठति—

यद्धावान पुरुतमं पुराषाळा वृत्रहेन्द्रो नामान्यप्राः। अचेति प्रासहस्पति स्तुविष्मानिति, इति ।

पुरातनानां पुरुषाणां मध्ये साहिष्णुः पुरुष इन्द्रः स च पुरुतममतिशयेन प्रभूतं यदुद्धारितरूपं वस्तु वावान । आदौ दीर्घश्छान्दसः । ववान सम्यग्भजे लब्धवानित्यर्थः । स च वृत्रहेन्द्रस्तस्मिन्नुद्धारे नामानि, आप्ता माहेन्द्रग्रहो माध्यंदिनमित्यादीनि स्वाभीष्टनामान्या समन्तात्पूरितवान् । प्रकृष्टं सहो बलं येषां ते प्रासहास्तेषां पतिः प्रासहस्पतिरिन्द्रः, अचेति, अजानाद्देवानामभिष्टिं ज्ञातवान्कटाक्षेणानुगृहीतवानित्यर्थः । स चेन्द्रस्तुविष्मान्बहुधनवान् ।

अस्मिंस्तृतीयपादे पादयोरप्रसिद्धत्वादर्थं व्याचष्टे—

इन्द्रो वै प्रासहस्पतिस्तुविष्मान्, इति ।

चतुर्थं पादमनूद्य व्याचष्टे

यदीमुश्मसि कर्तवे [illegible]ति यदेवैतदेवोचाणावरत्तदित्येवैनांस्तदब्रवीत्, इति ।

पादत्रयोक्तं वावातायां वचनं श्रुत्वा चतुर्थपादेन देवाः परस्परं ब्रुवते । यदि, ईं यदिदमस्माकमप्यत्र भागोऽस्तीत्येतादृशं कार्यं कर्तवे कर्तुमुश्मसि वयं सर्वे कामयामहे तत्सर्वमकरदिन्द्रः संपूर्णमकरोत् । अथवा चतुर्थपादोऽपि वावातायाः एव वचनम् । हे देवा वयं सर्वे यदिदं कार्यं कर्तुं कामयामहे तद्युष्मद्भागप्रदानरूपं कार्यमिन्द्रोऽकरोदिति । इदमेव द्वितीयं व्याख्यानं यदेवैतदित्यादिब्राह्मणेन स्पष्टीकृतम् । हे देवा मया सह युष्माभिरालोचितं कार्यमिन्द्रः कृतवानित्यनेनैव प्रकारेण तस्मिन्मन्त्रे सा वावाताऽब्रवीत् ।

उपाख्यानशेषं दर्शयति—

ते देवा अब्रुवन्नप्यस्या इहास्तु या नोऽस्मिन्न वै
कमविदादिति तथेति तस्या अप्यत्राकुर्वन्, इति ।

ते देवा वावाताया उत्तरं श्रुत्वा परस्परमिदमब्रुवन् । वावाता नोऽस्माक मुपकारिण्यस्मिन्निष्केवल्ये शस्त्रे कमपि संबन्धं न वा अविदन्नैव लब्धवती । अस्या अपि वावाताया इह निष्केवल्ये शस्त्रे संबन्धोऽस्तु । इत्येतदङ्गीकृत्य तस्या अप्यत्र संबन्धमकुर्वन् ।

इदानीं धाय्यां विधत्ते-

तस्मादेषाऽत्रापि शस्यते यद्धा-
वान पुरुतमं पुराषाळिति, इति ।

यस्माद्वावातायाः संबन्धः कृतस्तस्मात्कारणाद्यद्वावानेत्येषाऽप्यृग्निष्केवल्य-शस्त्रे धाय्यात्वेन शंसनीया ।

अस्या ऋचो वक्त्री येन्द्रस्य जायोक्ता तत्प्रशंसाबुद्धिस्थं कंचित्प्र-योगं विधत्ते-

सेना वा इन्द्रस्य प्रिया जाया वावाता प्रसहा
नाम को नाम प्रजापतिः श्वशुरस्तद्याऽस्य कामे
सेना जयेत्तस्या अर्धात्तिष्ठंस्तृणमुभयतः परि-
च्छिद्येतरां सेनामभ्यस्येत्प्रासहे कस्त्वा पश्य-
तीति तद्यथैवादः स्नुषा श्वशुरालज्जमाना निली-
यमानैत्येवमेव सा सेना भज्यमाना निलीयमा-
नैति यत्रैवं विद्वांस्तृणमुभयतः परिच्छिद्येतरां
सेनामभ्यस्यति प्रासहे कस्त्वा पश्यतीति, इति ।

पूर्वत्रास्येन्द्रस्य प्रिया जाया वावाता प्रासहा नामेति यैवमुक्ता सेयं लोकव्यवहारे सेना वै युद्धार्थोद्यतसेनारूपेण वर्तते, इन्द्रजायायाः सेनाभि-मानित्वात् । तच्च शाखान्तरे समाम्नातम्- इन्द्राणी वै सेनाया देवता ' इति । को नाम क इत्यनेन नाम्ना युक्तः प्रजापतिस्तस्या इन्द्रजायायाः श्वशुरः प्रजापतेरिन्द्रोत्पादकत्वात् । तथा चान्यत्र श्रूयते -- ' प्रजापतिरिन्द्रमसृजतानु-जावरं देवानाम् ' इति । तत्तथा सति, अस्य लौकिकस्य पुरुषस्य युद्धार्थिनो

या स्वकीया सेना जयतीति कामो भवति । एतस्मिन्काम सति स पुमां-स्तस्याः स्वकीयायाः सेनाया अर्वाचीनमर्धभागेऽवीते भूमाववस्थितः किंचि-त्तृणमध्य आदाय मूलतोऽग्रत उभयतः परिच्छिद्येतरां परकीयां सेनामभिल-क्ष्यास्येत्, बाणवल्लक्षयेत् । तत्रायं मन्त्रः—प्रासहे कृत्वा पश्यतीति । हे प्रास-हारूय इन्द्रजाये कः प्रजापतिस्त्वदीयः श्वशुरस्त्वां चक्षुषा पश्यति । अनेन मन्त्रेण तृणे क्षिप्ते सति परसेनाया भङ्ग दृष्टान्त उच्यते । तत्रास्मिन्विवक्षितार्थे यथैवादो निदर्शनं भवति तथा कथयामः । अनूचानानामीशानां वा गृहेषु युवतिः स्नुषा श्वशुरं दृष्ट्वा तस्माल्लज्जमाना लज्जां प्राप्नुवती निलीयमाना वस्त्रा-वगुण्ठनहस्ताद्यङ्गसंकोचेन तिरोहिते वसति गृहाभ्यन्तरमागच्छति । एवमेव सा परकीया सेनाऽभिमन्त्रितवृणरूपास्त्रप्रक्षेपेण भज्यमाना सती तत्र तत्रारण्यपर्वता-दिषु निलीयमाना तिरोहिता सती स्वकीयं देशमेति । कुत्रायमितरसेनाभङ्ग इत्या-शङ्क्य यत्रैवमित्यादिना पूर्वोक्त एवार्थः स्पष्टीकृतः ।

प्रासङ्गिकं परिसमाप्य प्रकृतमनुसरति—

तानिन्द्र उवाचापि वोऽत्रास्त्विति
ते देवा अब्रुवन्विराड्याज्यास्तु निष्के-
वल्यस्य या त्रयस्त्रिंशदक्षरा, इति ।

तावतीया वचनेनेन्द्रसमीपं प्रति देवेष्वागतेषु तान्देवानिन्द्र एवमुवाच युष्मा-कमप्यत्र निष्केवल्येऽक्षितो भागोऽपेक्षितोऽस्तीति । ततो देवास्त्रयस्त्रिंशदक्षरां विराट्छ-न्दस्कां पिबा सोममित्येतां याज्यां प्रार्थितवन्तः ।

तां याज्यां प्रशंसति—

त्रयस्त्रिंशद्वै देवा अष्टौ वसव एकादश रुद्रा
द्वादशाऽऽदित्याः प्रजापतिश्च वषट्कारश्च देवता-
अक्षरभाजः करोत्यक्षरमक्षरमेव तद्देवता अनु
प्रपिबन्ति देवपात्रेणैव तद्देवतास्तृप्यन्ति, इति ।

एतद्वाक्यं पूर्ववैव व्याख्यातम् । यद्यप्यस्या याज्यायास्त्रयस्त्रिंशदक्षराणि साक्षान्न दृश्यन्ते तथाऽपि संयोगाक्षरादिविभागेन संख्या पूरणीया । ततो देव साम्यात्प्रत्यक्षरमेकैकदेवतातृप्तिः सिध्यति ।

अथाभिचारप्रयोगं विधत्ते—

यं कामयेतानायतनवान्स्यादित्यविराजाऽस्य यजेद्गायत्र्या वा त्रिष्टुभा वाऽन्येन वा छन्दसा वषट्कुर्यादनायतनवन्तमेवैनं तत्करोति, इति ।

आयतनमाश्रयो गृहादिरस्यास्तीत्यायतनवांस्तद्विपरीतो यजमानोऽस्त्विति काम यमानो होता विराड्व्यतिरिक्तगायत्र्यादिच्छन्दोयुक्तां याज्यां पठित्वा तदन्ते वषट्कुर्यात् । तया सत्यायतनहीनो यजमानो भवति ।

उक्तार्थव्यतिरेकं विधत्ते–

यं कामयेताऽऽयतनवान्स्यादिति विराजाऽस्य यजेत्पिबा सोममिन्द्र मन्दतु त्वेत्येतयाऽऽयतनवन्तमेवैनं तत्करोति ॥ २२ ॥ इति ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऐतरेय ब्राह्मणभाष्ये द्वादशाध्याय एकादशः खण्डः ॥ ११ ॥ (२२, [९३]

स्तुतमनुशंसतीतिविधिबलेन निष्कैवल्यशस्त्रस्य स्तोत्रपूर्वकत्वाद्बुद्धिस्थस्य साम्न आश्रयत्वेन ऋचं विधातुमाख्यायिकामाह–

ऋक्च वा इदमग्रे साम चाऽऽस्तां सैव नाम ऋगासीदमो नाम साम सा वा ऋक्सामोपावदन्मिथुनं संभवाव प्रजात्या इति नेत्यब्रवीत्साम ज्यायान्वा अतो मम महिमेति ते द्वे भूत्वोपावदतां तेन प्रतिचन समवदत तास्तिस्रो भूत्वोपावदंस्तत्तिसृभिः समभवद्यत्तिसृभिः समभवत्तस्मात्तिसृभिः स्तुवन्ति तिसृभिरुद्गायन्ति तिसृभिर्हि साम संमितं तस्मादेकस्य बह्व्यो जाया भवन्ति नैकस्यै बहवः सह पतयो यद्वै तत्सा चामश्च सम-

---

१ ऋ. १०-१३०-२ ॥

भवतां तत्सामाभवत्तत्साम्नः सामत्वम्, इति ।

यदिदमिदानीमृगाश्रितं सामोभयमेळनरूपमवीयते तदिदमग्रे मेळनात्पुरा ऋगक्षरपदरूपा पृथग्भूता साम च गीतिरूपं पृथग्भूतमित्येवं द्वे अपि पृथगेवाऽऽस्तां तयोः परस्परमेळनयोग्यतां प्रदर्शयितुमस्मिन्नेव सामनाम्न्यन्तर्भावः प्रदर्श्यते । सामेति नाम्नि वेदतत्तेति पूर्वमक्षरं तदेवैकं नाम तन्नामवाच्या, ऋगासीत् । अम इत्येकं नाम तद्वाच्यं सामाऽऽसीत् । अतो मेळनयोग्यतायां सत्यां सैव ऋक्साम प्रत्युपावदत्समीपमागत्योक्तवती । आवामुभे मिथुनं यथा भवति तथा संभवाव । तच्च संभवनं प्रजोपत्त्यर्थमिति वदुक्तं साम निराकरोत्स्वाभिप्रायं चावदत् । अतोऽस्मादृङ्महिम्नो ज्यायानभ्यधिको मम साम्नो महिमा तस्माद्विवादश्च विवाहश्च तुल्ययोरिति न्यायविरोध इति । ततः साम्ना स्वस्य तुल्यत्वसिद्धये ते ऋचौ द्वे संभूयोपेत्य पूर्ववदुक्तवत्यौ । चेत्यक्षरद्वयात्मको निपातोऽपिशब्दार्थः । ते द्वे ऋचौ प्रत्यपि साम न समवदत संवादमङ्गीकारं नाकरोत् । पुनस्ता ऋचस्तिस्रो भूत्वोपेत्य पूर्ववदुक्तवत्यः । तदानीं ताभिस्तिसृभिः समभवत्संभवनं संयोगमकरोत् । यस्मात्संयोगः संभूतस्तस्मात्साम्युक्तामिस्तिसृभिर्निर्दिष्टं सामगाः स्तुवन्ति यज्ञे स्तोत्रं कुर्वन्ति । तस्यैव व्याख्यानं तिसृभिरुद्गायन्तीति । औद्गात्रं कर्म कुर्वन्तीत्यर्थः । अत एव शाखान्तरे श्रूयते 'एकं साम तृचे क्रियते स्तोत्रियम्' इति । यद्यपि च्छन्दःसामनामके ग्रन्थ एकस्यामृचि सामोत्पन्नं तथाऽप्युत्तरारूपे ग्रन्थ आम्नातेषु त्र्यृचेषु त्रयोगकाले साम गातव्यम् । तत्र प्रथमायामृचि योनिरूपायां यत्सामोत्पन्नं छन्दःसामग्रन्थे समाम्नातं तदवलोक्य तत्सादृश्येन द्वितीयतृतीययोर्ऋचोर्गानं समूहनीयम् । एतदपि शाखान्तरे विहितम्—'यद्योन्यां तदुत्तरयोर्गायति' इति । तस्मादौद्गात्रं कर्म तिसृभिर्ऋग्भिर्निष्पद्यते । यस्मादाख्यानोक्तप्रकारेण तिसृभिर्ऋग्भिः साम संमितं साम्न एकस्य महिमा तुल्यः संवृत्तस्तस्मात्लोकेऽप्येकस्य पुरुषस्य सामस्थानीयस्य बह्व्यो जाया ऋक्स्थानीया भवन्ति न तु विपर्ययेणैकस्याः स्त्रिया बहवः पतयः परस्परैकमयेन सह वर्तमाना दृश्यन्ते । यस्माद्ऋगक्षरपदादिरूपा सेयमेनेन शब्देनाभिधेया साम चामशब्देनाभिधेयं सत्याश्चादुभयं संयुक्तं सत्सामाभवत्तस्मादेकोभयात्मकवस्तुनः सामनाम संपन्नम् ।

उक्तार्थवेदनं प्रशंसति—

सामन्भवति य एवं वेद, इति ।

ऋक्सामयोरेकत्ववेदिता यः स सर्वैरभ्यर्हितैः सहितो भवति ।

लौकिकवृत्तान्तोदाहरणेनापि सामस्वरूपं प्रशंसति—

यो वै भवति यः श्रेष्ठतामश्नुते स सामन्भवत्यसामन्य इति हि निन्दन्ति, इति ।

यः पुमान्भूतिमैश्वर्यं प्राप्नोति यश्च विद्यावृत्ताभ्यां श्रेष्ठत्वं प्राप्नोति स सर्वोऽपि सामन्भवति सर्वेषु स्वकीयत्वबुद्ध्या समदृष्टिर्भवति । अन्यथा सर्वे जनास्तमसामन्यः पक्षपातीति निन्दन्ति । अतः सामन्यरूपस्य लोके प्रशस्तत्वादृचाप्यक्षरपरिष्ठस्य गानस्य चैकत्वेन सामत्वं प्रशस्तमित्यर्थः ।

नन्वस्त्वेवं सामत्वं निष्केवल्यशस्त्रे किमायातमित्याशङ्क्य सामसादृश्येन शस्त्रप्रशंसां दर्शयति—

ते वै पञ्चान्यद्भूत्वा पञ्चान्यद्भूत्वा कल्पेतामाहावश्च हिंकारश्च प्रस्तावश्च प्रथमा च ऋगुद्गीथश्च मध्यमा च प्रतिहारश्चोत्तमा च निधनं च वषट्कारश्च, इति ।

ते वै त एव वमृयाणाः शस्त्रावयवाः पञ्चसंख्याका अन्यत्पृथगेव शस्त्ररूपं भूत्वा वर्तन्ते । तथा हिंकारादयः पञ्च सामांशा वैचदेवावयवा अन्यत्पृथक्सामरूपं भूत्वा वर्तन्ते च (?) शस्त्रसामनी स्वाहावादयश्च (?) वयवोपेते उभे कल्पेतां स्वव्यापारसमर्थे भवतः आहावः शौसावोमिति मन्त्रः । स्तोत्रिये ऋचे प्रथममध्यमोत्तमास्तिस्र ऋचः । याज्यान्ते पठितव्यो वषट्कारः । तदेतत्पञ्चकं शस्त्रस्वरूपम् । उग्दात्रा पठितव्यः साम्न आदौ हिमित्येवंशब्दो हिंकारः । प्रस्तोत्रा गातव्यः सामावयवः प्रस्तावः । उग्दात्रा गातव्य उग्दीथः । प्रतिहर्त्रा गातव्यः प्रतिहारः । अन्ते सर्वैर्गातव्यो भागो निधनम् । तदेतत्पञ्चकं स्तोत्रस्वरूपम् । अतः सामसादृश्येन निष्केवल्यशस्त्रं प्रशस्तम् ।

प्रकारान्तरेण प्रशंसति—

ते यत्पञ्चान्यदभूत्वा पञ्चान्यदभूत्वा कल्पेतां तस्मादाहुः पाङ्क्तो यज्ञः पाङ्क्ताः पशव इति, इति ।

यस्मात्सामशस्त्रयोरुक्तप्रकारेण प्रत्येकं पञ्चावयवत्वं संपन्नं तस्मात्पञ्चानां सङ्ख्या योगादयं यज्ञः पाङ्क्त इत्येवं ब्रह्मवादिन आहुः । तथा गवादिपशवोऽपि

चतुर्भिः पादैर्मुखेन च योगात्पाङ्क्तः । अतो यज्ञपाङ्क्तत्वप्रसिद्धिसंवादनात्पशुसाम्याच्च शस्त्रं प्रशस्तम् ।

पुनः प्रकारान्तरेण प्रशंसति—

यदु विराजं दशिनीमभिसमपद्येतां तस्मादाहुर्विराजि यज्ञो दशिन्यां प्रतिष्ठित इति, इति ।

दशाक्षरा विराडिति श्रुत्यन्तराद्दशानामक्षराणां समूहो दशिनी या विराडस्ति तामभिलक्ष्य पञ्चकद्वयात्मके शस्त्रसामनी समपद्येतां विराट्सदृशे जाते इत्यर्थः । यदु यस्मादेव कारणात्संख्यया विराट्सादृश्यं तस्माद्भिज्ञा एवमाहुः । दशसंख्योपेतायां शस्त्रसामरूपायां विराजि यज्ञो व्यवस्थित इति ।

पुनरपि गृहस्थपुरुषसादृश्येन शस्त्रं प्रशंसति—

आत्मा वै स्तोत्रियः प्रजाऽनुरूपः पत्नी धाय्या पशवः प्रगाथो गृहाः सूक्तम्, इति ।

येन ऋचेन सामगाः स्तुवन्ति स स्तोत्रियस्तृचो निष्केवल्यशस्त्रस्य प्रारम्भे शंसनीयः । स चाऽऽत्मा वै गृहस्थशरीरस्थानीय एव स्तोत्रियं ऋचमनु द्वितीयो यस्तृचः शस्यते सोऽयमनुरूपः । स च प्रजा पुत्रपौत्रादिस्थानीयः । येयं धाय्या शस्त्रे प्रक्षेपणीया सा पत्नीस्थानीया । यः प्रगाथः स पशुस्थानीयः । यन्निविद्धानीयं सूक्तं तद्गृहस्थानीयम् ।

एतद्वेदनं प्रशंसति—

स वा अस्मिंश्च लोकेऽमुष्मिंश्च प्रजया च पशुभिश्च गृहेषु वसति य एवं वेद ॥२३॥ इति ।

पशुभिश्च सहित इति शेषः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऐतरेयब्राह्मणभाष्ये द्वादशाध्याये द्वादशः खण्डः ॥ १२ ॥ (२३) [९४]

अथ निष्केवल्यशस्त्रभागा स्वरविशेषाश्च वक्तव्याः ।

तत्र प्रथमभागं विधत्ते -

स्तोत्रियं शंसत्यात्मा वै स्तोत्रियः, इति ।

अभि त्वा शूर नोनुमः (९ ३३ २२) इत्यास्मिन्प्रगाथे ऋचं संपाद्य सामगाः स्तुवन्ति सोऽयं स्तोत्रियस्तमादौ शंसेत् । तस्य गृहस्थदेहस्वरूपत्वं पूर्वमेवोक्तम् ।

तस्मिन्स्तोत्रिये स्वरविशेषं विधत्ते -

तं मध्यमया वाचा शंसत्या-
त्मानमेव तत्संस्कुरुते, इति ।

अत्युच्चत्वमतिनीचत्वं च यस्यां वाचि नास्ति सा मध्यमा । यावता ध्वनिना देवयजनदेशस्थाः शृण्वन्ति न बहिर्देशस्थास्तावन्तं ध्वनिं कुर्यात् तेनाऽऽत्मानमेव देहमेव संस्कुरुते ।

ऋचान्तरं विधत्ते–

अनुरूपं शंसति प्रजा वा अनुरूपः, इति ।

स्तोत्रियेण सदृशरूपृचोऽनुरूपः । स चात्राभि त्वा पूर्वपीतय इन्द्रस्तोमेभिरायव इत्येष प्रगाथः । उभयोः प्रगाथयोः समानच्छन्दस्त्वात्समानदेवताकत्वाच्चानुरूपत्वम् । तमिमं ऋच शंसेत् तस्य च पुत्रादिप्रजास्थानीयस्यानुरूपत्वमपेक्षितं पितृ(ता)पुत्रयोः कुलशीलादिना समनरूपत्वात् ।

तस्य ध्वनिविशेषं विधत्ते–

स उच्चैस्तरामिवानुरूपः शंस्तव्यः प्रजा-
मेव तच्छ्रेयसीमात्मनः कुरुते , इति ।

स्तोत्रियध्वनेरप्यधिकं ध्वनिं कुर्यात् । तथा सति स्वस्मादाधिक्यं पुत्रादौ संपादितं भवति ।

ततो यद्वावानेत्येतस्या धाय्यायाः शंसनं विधत्ते–

धाय्यां शंसति पत्नी वै धाय्या, इति ।

पत्नीत्वं पूर्वमेवोक्तम् ।

स्वरविशेषं विधत्ते—

सा नीचैस्तरामिव धाय्या शंस्तव्या, इति ।

अत्यन्तनीचो ध्वनिः कर्तव्यः ।

होतुरेतद्वेदनं प्रशंसति -

अप्रतिवादिनी हास्य गृहेषु पत्नी भवति यत्रैवं

विद्धान्नीचैस्तरां धाय्यां शंसति, इति ।

पत्युः प्रतिकूलं वदतीति प्रतिवादिनी तद्विपर्ययेणानुकूलवादिनी भवति । पिबा सुतस्य रसिन इत्येवं प्रगाथं विधत्ते–

प्रगाथं शंसति, इति ।

तत्र स्वरविशेषं विधत्ते–

स स्वरवत्या वाचा शंसितव्यः पशवो वै स्वरः पशवः प्रगाथः पशूनामवरुद्ध्यै, इति ।

स्वरवत्या स्वरयुक्तया वाचेत्यर्थः । प्रगाथस्य पशुत्वं पूर्वमुक्तं स्वरस्य पशुत्वं संख्यासाम्यात् । चत्वारः स्वराः पशवोऽपि चतुष्पदाः ।

निविद्धानीयं पञ्चदशर्चं सूक्तं विधत्ते–

इन्द्रस्य नु वीर्याणि प्रवोचमिति सूक्तं शंसति, इति ।

तदेतत्प्रशंसति–

तद्धा एतत्प्रियमिन्द्रस्य सूक्तं निष्केवल्यं हैरण्यस्तूपमेतेन वै सूक्तेन हिरण्यस्तूप आङ्गिरस इन्द्रस्य प्रियं धामोपागच्छत्स परमं लोकमजयत्, इति ।

यदेतदिन्द्रस्य नु वीर्याणि प्रवोचमिति निष्केवल्यशस्त्रं सूक्तं तदेतदिन्द्रस्य प्रियं हिरण्यस्तूपनाम्ना महर्षिणा दृष्टत्वाद्धैरण्यस्तूपं तदेवैतेनेत्यादिना स्पष्टी क्रियते । अङ्गिरसः पुत्रो हिरण्यस्तूपाख्यो मुनिरेतेनैव सूक्तेनेन्द्रं स्तुत्वा तदीयं स्थानं प्राप्य ततोऽप्युत्तमं लोकमजयत् ।

वेदनं प्रशंसति–

उपेन्द्रस्य प्रियं धाम गच्छति जयति परमं लोकं य एवं वेद, इति ।

सूक्ते ध्वनिविशेषं विधत्ते–

गृहा वै प्रतिष्ठा सूक्तं तत्प्रतिष्ठिततमया

---

१ ऋ. १·३२-१ ॥

वाचा शंस्तव्यं तस्माद्यद्यपि दूर इव पशू-
ल्लँभते गृहानेवैनानाजिगमिषति गृहा हि
पशूनां प्रतिष्ठा प्रतिष्ठा ॥ २४ ॥ इति ।

इन्द्रस्य नु वीर्याणीत्यस्मिन्सूक्ते शस्त्रस्य समापनेनावस्थानात्तस्या प्रतिष्ठा-रूपत्वम् । गृहा अपि स्थितिहेतुत्वात्प्रतिष्ठारूपाः । तथा सत्येतत्सूक्तं प्रतिष्ठि-वतमयाऽद्भुतविलम्बितत्वादिदोषरहितया श्राव्येण ध्वनिनोपेतया वाचा शंसेत् । तस्माद्गृहस्थानीयस्य सूक्तस्य ध्वनिः प्रतिष्ठिततमस्तस्माल्लोकेऽपि यद्यपि तृणभक्षणार्थमरण्ये गतान्दूरदेश एवावस्थितान्पशून्दिवसे पुरुषो लभते पश्यति तथाऽप्येनान्पशून्सायंकाले गृहानेवाऽऽजिगमिषत्यानेतुमिच्छति । यस्मा-त्पशूनां गृहाः प्रतिष्ठा सुखेनावस्थातुं स्थानम् । द्विरभ्यासोऽध्यायस-माप्त्यर्थः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऐतरेयब्राह्मण-भाष्ये द्वादशाध्याये त्रयोदशः खण्डः ॥ १३ ॥ (२४) [९५]

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकवीरबुक्कगसाम्रा-ज्यधुरंधरसायणाचार्यकृतावैतरेयब्राह्मणभाष्ये
द्वादशोऽध्यायः ॥ १२ ॥

अथ त्रयोदशोऽध्यायः ।

वक्त्याहावमभेदं प्रतिगरणमथानुष्टुभः शस्यमाना
मृत्योः संनद्धवादिक्रमणमथ मरुत्वद्विधानप्रशंसा ॥
तच्छेषा ये विशेषाः प्रतिपदनुचरप्रक्रमाः सप्तभागं
निष्केवल्यं च शस्त्रं तदवयवकृताः स्तोत्रियाद्याश्च पञ्च ॥ १ ॥

अथ तृतीयसवनं वक्तुमादावाख्यायिकामाह-

सोमो वै राजाऽमुष्मिल्लँोक आसीत्तं देवाश्च
ऋषयश्चाभ्यध्यायन्कथमयमस्मात्सोमो राजाऽऽ-
गच्छेदिति तेऽब्रुवंश्छन्दांसि यूयं न इमं
सोमं राजानमाहरतेति तथेति ते सुपर्णा

भूत्वोदपतंस्ते यत्सुपर्णा भूत्वोदपतंस्तदेत-
त्सौपर्णमित्याख्यानविद आचक्षते, इति ।

पुरा सोमवल्ली द्युलोक एवाऽऽसीन्न त्वेवस्मिँल्लोके तदानीं सोममभिलक्ष्य केन प्रकारेण सोमो न आगच्छेदिति देवा ऋषयश्च विचारितवन्तः । विचार्य गायत्र्यादीनि च्छन्दांसि प्रत्येवमब्रुवन् । हे छन्दांस्यस्मर्थं सोममाहरतेति । तानि च तदङ्गीकृत्य ते लोकप्रसिद्धाः पक्षिणो भूत्वा द्युलोकं प्रत्युदपतम् । यस्मादेवं तस्मादेतत्सोमाहरणप्रतिवादकं ग्रन्थजातं सौपर्णमाख्यानमिति पौराणिका आख्यानविदः कथयन्ति ।

अथोत्पतत्सु च्छन्दःसु मध्ये जगतीवृत्तान्तमाह -

छन्दांसि वै तत्सोमं राजानमच्छाचरंस्तानि
ह तर्हि चतुरक्षराणि चतुरक्षराण्येव च्छन्दां-
स्यासन्सा जगती चतुरक्षरा प्रथमोदपतत्सा
पतित्वाऽर्धमध्वनो गत्वाऽश्राम्यत्सा परास्य
त्रीण्यक्षराण्येकाक्षरा भूत्वा दीक्षां च तपश्च
हरन्ती पुनरभ्यवापतत्तस्मात्तस्य वित्ता
दीक्षा वित्तं तपो यस्य पशवः सन्ति जागता
हि पशवो जगती हि तानाहरत्, इति ।

गायत्र्यादिच्छन्दांस्युत्पतने प्रवृत्तानि तदानीं सोममच्छ प्राप्तुं द्युलोकं प्रत्यचरंस्तानि च च्छन्दांसि तस्मिन्काले चतुरक्षरोपेतान्यतः पुरा सर्वदा चतुरक्षराण्येवाऽऽसन्न तु कस्यापि च्छन्दसोऽधिकाक्षरताऽऽसीत् । ततः सा जगती चतुरक्षरा सती छन्दोन्तरेभ्यः सर्वेभ्यः प्रथमं प्रवृत्ता सोमस्थानं प्रत्युदपतत् । सा च मार्गस्यार्धं गत्वा श्रान्ता सती श्रमवशात्त्रीण्यक्षराणि परित्यज्य स्वयमेकाक्षरा भूत्वा सोममाहर्तुमशक्नुवती सोमयागसंबन्धिनीं दीक्षां दीक्षणीयेष्ट्यादिरूपां क्षीरपानादिरूपं तपश्च हरन्ती तस्माल्लोकादानयन्ती पुनरेवं लोकमभिलक्ष्यावापतत्, अधोमुखी समागता । यस्मादेवं तस्माल्लोके यस्य पुरुषस्य पशवः सन्ति तेन दीक्षा वित्ता लब्धा तपश्च लब्धं भवति । न च दीक्षातपसोर्जगत्या समानीतयोः सत्योः पशूनां तदुभयकारणत्वं कथमिति शङ्कनीयम् । पशूनां जागतत्वेन जगतीद्वारा दीक्षासंबन्धसंभवात् । जागतत्वं

कथमिति चेत् । जगत्या पशूनामानीत्वादिति द्रष्टव्यम् । अत एव शाखान्तरे जगतीं प्रकृत्यैवमान्नातम्-' सा पशुभिश्च दीक्षया चाऽऽगच्छत्तस्माज्जगती छन्दसां पशव्यतमा तस्मादुत्तमा तस्मात्पशुमन्तं दीक्षोपनमति ' इति ।

त्रिष्टुभो वृत्तान्तमाह-

अथ त्रिष्टुबुदपतत्सा पतित्वा भूयोऽर्धा-
दध्वनो गत्वाऽश्राम्यत्सा परास्यैकमक्षरं
त्र्यक्षरा भूत्वा दक्षिणा हरन्ती पुनरभ्यवाप-
तत्तस्मान्मध्यंदिने दक्षिणा नीयन्ते त्रिष्टुभो
लोके त्रिष्टुब्भि ता आहरत् ॥ २५ ॥ इति ।

सा त्रिष्टुब्द्युलोके भूयो भूयः पतित्वाऽपि मार्गस्यार्धादेवाश्राम्यदित्यन्वयः । यस्मादेव दक्षिणाः सर्वा आनीतवती तस्मात्त्रिष्टुभः स्थाने माध्यंदिनसवने यजमानैर्दत्ताः सर्वा दक्षिणा ऋत्विग्भिर्नीयन्ते ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऐतरेय-ब्राह्मणभाष्ये त्रयोदशाध्याये प्रथम खण्डः ॥ १ ॥ (२५) [९६]

अथ गायत्रीवृत्तान्तमाह-

ते देवा अब्रुवन्गायत्रीं त्वं न इमं सोमं राजान-
माहरेति सा तथेत्यब्रवीत्तां वै मा सर्वेण स्वस्त्य-
यनेनानुमन्त्रयध्वमिति तथेति सोदपतत्तां देवाः
सर्वेण स्वस्त्ययनेनान्वमन्त्रयन्त प्रेति चेति
चेत्येतद्वै सर्वं स्वस्त्ययनं यत्प्रेति चेति तद्योऽस्य
प्रियः स्यात्तमेतेनानुमन्त्रयेत प्रेति चेति चेति
स्वस्त्येव गच्छति स्वस्ति पुनरागच्छति, इति ।

जगतीत्रिष्टुभोः सोमानयनसामर्थ्याभावं दृष्ट्वा ते देवा गायत्रीं प्रार्थितवन्तः । हे गायत्रि त्वं नोऽस्मदर्थमिमं सोममाहरेति । सा च गायत्री तथेत्यङ्गीकृत्य देवान्प्रत्येवमब्रवीत् । हे देवा यदाऽहं सोमम नेतुं गच्छामि तदानीं मामेवं गच्छन्तीं मां यूयं सर्वेऽपि यथाशक्ति सर्वेण स्वस्त्ययनेनानुमन्त्रयध्वं

क्षेममचरणं स्वस्त्ययनं तदर्थमाशीर्वादरूपेण मन्त्रेण ममानुपन्त्रणं कुरुतेति । एवमुक्त्वा तथेति देवैरङ्गीकृते सति सा गायत्री द्युलोकं प्रत्युत्पतनमकरोत्तदानीं देवाः स्वागतप्रकारेण सर्वथापि क्षेमप्रापणमन्त्रेण गायत्रीमनुमन्त्रितवन्तः । कोऽसौ मन्त्र इति । प्रशब्द एको मन्त्रः । आशब्दो द्वितीयो मन्त्रः । तदुभयप्रदर्शनार्थमितिशब्दद्वयम् । उभयसमुच्चयार्थौ चकारद्वयम् । क्षेमेण सोमं प्रपन्नुहि पुनरपि क्षेमेणाऽऽगच्छेत्ययमाशीर्वादमन्त्रद्वयस्यार्थः । एतदेव मन्त्रद्वयं सर्वं स्वस्त्ययनं प्रेत्येकगोति द्वितीयं यदस्ति, इतोऽधिकं नान्यत्स्वल्पमयनमस्ति । यस्मादिदमेव सर्वक्षेमप्रापकं तस्मादिदानीमपि यः पुमान्ग्रामान्तरं जिगमिषुरस्य गृहस्वामिनः प्रियः स्यात्तं जिगमिषुं प्रेत्येतीति मन्त्रद्वयेनानुमन्त्रयेत तेनाऽऽशीर्वादप्रसादेनायं क्षेमेणैव गच्छति पुनरागच्छति च ।

इत्थं प्रासङ्गिकं लौकिकविधिमुक्त्वा प्राकृतमेव गायत्रीवृत्तान्तमनुसरति—

सा पतित्वा सोमपालान्भीषयित्वा पभ्यां च मुखेन च सोमं राजानं समगृभ्णाद्यानि चेतरे छन्दस्सी अक्षराण्यजहितां तानि चोपसमगृभ्णात्, इति ।

गायत्री पतित्वोत्पतनेन सोमं प्राप्य गन्धर्वान्स्वानभ्राजादीन्सोमरक्षकानास्फोठनायुधप्रदर्शनादिना भीषयित्वा भीत्या तेष्वपसृतेषु स्वयं पक्षिरूपा सती स्वकीयाभ्यां पभ्यां मुखेन च सोमं सम्यग्गृहीतवती स्वानभ्राजादीनां सोमपालकत्वमाध्वर्यवे सोमप्रकरणे मन्त्रतद्ब्राह्मणाभ्यामवगन्तव्ये । स्वानभ्राजान्धारेवम्भारेहस्तसुहस्तकृशानवेतवः (?) सोमक्रयणास्तान्त्रक्षध्वमिति मन्त्रः । स्वानभ्राजेत्यादिते वाऽमुष्मिंल्लोके सोममरक्षन्निति ब्राह्मणम् । न केवलं गायत्री सोममेव गृहीतवती किंत्वितरे छन्दस्सी जगतीत्रिष्टुबाख्ये यानि चत्वार्यक्षराण्यजहितां परित्यक्तवत्यौ तानि चोपेत्य सम्यग्गृहीतवती ।

अथ तस्या गायत्र्या गन्धर्वेण सह युद्धे यो वृत्तान्तस्तं दर्शयति—

तस्या अनु विसृज्य कृशानुः सोमपालः सव्यस्य पदो नखमच्छिदत्तच्छल्यकोऽभवत्तस्मात्स नखमिव यद्वशमस्रवत्सा वशाऽभवत्तस्मात्सा हविरिवाथ थः शल्यो यदनीकमासीत्स सर्पो

निर्दश्यभवत्सहसः स्वजो यानि पर्णानि ते मन्थावला यानि स्नावानि ते गण्डूपदा यत्ते-जनं सोऽन्धाहिः सो सा तथेषुरभवत् ॥२६॥ इति ।

स्वानभ्राजादिषु सोमरक्षकेषु यः सप्तमो गन्धर्वः कृशानुनामकः सोऽयं तस्या गायत्र्या अनु पृष्ठतो बाणं विसृज्य तदीयस्य वामपादस्यैकं नखं छिन्न-वान् । तच्च नखं शल्यको मर्कटशरीरपरिमितः शलल्याख्यो मृग आसीत् । यस्य मृगस्य पुच्छसमीपे बहवो रोमविशेषाः प्रादेशपरिमितास्तीक्ष्णाग्रा लोह-मया उत्पद्यन्ते स शल्यकः । यस्मादयं नखादुत्पन्नस्तस्मात्स नखमिव तीक्ष्णा-ग्ररोमोपेतः । तत्र च्छिन्ननखपादप्रवेशे यद्वर्शं मेदोऽस्रवत्सा वशा मेध्या काचि दजाऽव्यादिपशुष्वासीत् । तस्माद्गायत्र्या उत्पन्नत्वात्सा वशा हविरिव देव-तायोग्यं हविरेवाऽऽसीत् । तच्च हविष्टुं शाखान्तरे श्रूयते—'एतामेव वशामा दित्येभ्यः कामायाऽऽलभेत' इति । अथ नखच्छेदनाय गन्धर्वेण विसृष्टो बाणः सोऽपि नखसंघट्टनेन कुण्ठिताग्रो बहुधा भग्नो भूमौ पतितः । तस्य बाणस्य यः शल्यः कृष्णायसनिर्मितो बाणाग्रे स्थापितस्तस्य च शल्यस्य यदनीकं मुखं संघट्टनने कुण्ठितमासीत्सोऽयं शल्यस्तदनीकोभयात्मको बाणभागो नि-र्दंशी दंशनासमर्थः सर्पोऽभवत् । जलमध्ये संचरतो दुन्दुभाख्यस्य सर्पस्य विषरहितत्वाद्दंशनसामर्थ्यं नास्ति । तस्मात्कुण्ठिताग्रस्य लोहस्य योऽयं सहो वेगस्तस्मात्तहसो बाणवेगात्स्वज उभयतःशिराः सर्पोऽभवत् । तस्य बाणस्य मूले यानि पर्णानि कङ्कपत्राणि ते मन्थावला अभवन् । ये जीवविशेषा वृक्ष-शाखास्वधोमुखा अवलम्बन्ते ते मन्थाबलाः । तस्मिन्बाणे यानि स्नावानि पत्र-बन्धनार्थाः स्नायुविशेषास्ते गण्डूपदा अभवन्धनुस्कारादिस्थानेषु ये सर्पवज्जायन्ते ते गण्डूपदाः । तस्मिन्बाणे यत्तेजनं लोहपत्रव्यातिरिक्तं काष्ठं सोऽन्धाहिरभवत्, दृष्टिरहितः सर्पोऽभूत् । तथा तेनोक्तप्रकारेणासुर्गन्धर्वेण मुक्तो बाणः सो साऽभवत् । उशब्दः समुच्चयार्थः । सा च सा चेत्युक्तं भवति । तथोक्ते सति तत्तज्जातीर्नि-र्दिशिसर्पादिरूपेत्युक्तार्थोपसंहारः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऐतरेयब्रा-ह्मणभाष्ये त्रयोदशाध्याये द्वितीयः खण्डः ॥२। (२६) [९७]

अथ तृतीयसवनार्थं सवनस्योत्पत्तिं दर्शयति—

सा यद्दक्षिणेन पदा समगृभ्णात्तत्प्रातःसवन-
मभवत्तद्गायत्री स्वमायतनमकुरुत तस्मात्तत्स-
मृद्धतमं मन्यन्ते सर्वेषां सवनानामग्रियो
मुख्यो भवति श्रेष्ठतामश्नुते य एवं वेदाथ
यत्सव्येन पदा समगृभ्णात्तन्माध्यंदिनं सवन-
मभवत्ताद्विस्रंसत तद्विस्रस्तं नान्वाप्नोत्पूर्वं सवनं
ते देवाः पराजिज्ञासन्त तस्मिंस्त्रिष्टुभं छन्दसाम-
दधुरिन्द्रं देवतानां तेन तत्समावद्वीर्यमभवत्पू-
र्वेण सवनेनोभाभ्यां सवनाभ्यां समावद्वीर्याभ्यां
समावज्जामीभ्यां राध्नोति य एवं वेदाथ यन्मु-
खेन समगृभ्णात्तत्तृतीयसवनमभवत्, इति ।

सा गायत्री सोममानयन्ती दक्षिणेन पदा पादेन यत्सोमस्य स्वरूपं याव-
द्गृहीतवती तत्तावत्प्रातःसवनमभवत् । तच्च प्रातःसवनं सा गायत्री स्वकीयं
स्थानमकरोत् । तस्मात्तत्सर्वेषां सवनानां मध्येऽतिशयेन समृद्धमिति याज्ञिका
मन्यन्ते । तत्र प्रयोगबाहुल्यसद्भावात् । य एवमुक्तार्थं वेद स स्वकीयानां मध्ये
श्रेष्ठो मुख्यः सन्विद्यावृत्तादिरूपां श्रेष्ठतां प्राप्नोति । अथ सा गायत्री वामपा-
देन यत्सोमस्य स्वरूपं गृहीतवती तन्माध्यंदिनं सवनं विस्रस्तमभूत् । वामपा-
दात्तत्र तत्र विस्रस्तं गलितं तन्माध्यंदिनं सवनं पूर्वोक्तप्रातःसवनानुगमनाय
शक्तं नाभूत् । ते देवा विचार्य तस्मिन्माध्यंदिने सवने स्वामित्वेन च्छन्दसां
मध्ये त्रिष्टुभं देवतानां मध्य इन्द्रं च स्थापितवन्तः । तेन तस्माध्यंदिनं सवनं
प्रातःसवनेन सह समावद्वीर्यं तुल्यसामर्थ्यमभूत् । उक्तार्थवेदिता तुल्यसामर्थ्या-
भ्यामेव तुल्यजातिभ्यामुभाभ्यां सवनाभ्यां समृद्धो भवति । जामीशब्दो
जातिवाची तुल्यजातिभ्यामित्यर्थः । अथ गायत्री मुखेन यत्सोमस्वरूपं गृही-
तवती तत्तृतीयसवनमभूत् ।

तस्मिन्सवन ऋजीषस्वरूपे निःसारे सोम आशिरादिकं विधत्ते—

तस्य पतन्ती रसमधयत्तद्धीतरसं नान्वाप्नोत्पूर्वं

सवने ते देवाः पराजिज्ञासन्त तत्पशुष्वपश्यंस्त-
द्यदाशिरमवनयन्त्याज्येन पशुना चरन्ति तेन
तत्समावद्वीर्यमभवत्पूर्वाभ्यां सवनाभ्याम्, इति ।

सा गायत्री मुखेन तृतीयसवनरूपं सोमं गृहीत्वा द्युलोकादधः पतन्ती तस्य सोमस्य रसमधयत्सारं पीतवती । तत्तृतीयसवनं धीतरसं पीतसारं भूत्वा पूर्वोक्तप्रातःसवनमाध्यंदिनसवने द्वे अनुगन्तुं नाशक्नोत् । ते देवास्त-त्प्रतीकारं विचार्य तत्साधनं पशुष्वपश्यन् । पशुषु क्षीरं यदस्ति यच्चाऽऽज्य-मस्ति यदपि हृदयाद्यङ्गमस्ति तत्सर्वं सारं तस्माद्यत्पीतरसे सोमसंबन्धिनि ऋजीष आशिरं क्षीरमवनयन्ति सिञ्चन्ति याज्ञिकास्तथाऽऽज्यपशुभ्यां चर-न्त्यनुतिष्ठन्ति तदानीं तेनानुष्ठानेन तत्तृतीयसवनं पूर्वसवनाभ्यां तुल्यसामर्थ्य-मभूत् । अयमर्थः सर्वोऽपि शाखान्तरे संगृह्याऽऽम्नातः-' ब्रह्मवादिनो वदन्ति तस्मात्सत्याद्गायत्री कनिष्ठा छन्दसां सती यज्ञमुखं प्रतीयायेति यदेवादः सोममाहरत्तस्माद्यज्ञमुखं पर्यैत्तस्मात्तेजस्विनी तमापभ्यां द्वे सवने समगृभ्णान्मु-खेनैकं यन्मुखेन समगृभ्णात्तदधयत्तस्माद्द्वे सवने शुक्रवती प्रातःसवनं च माध्यंदिनं च तस्मात्तृतीयसवन ऋजीषमभिषुत्य धीतमिव हि मध्यत आशि रमवनयति सशुक्रत्वायेति ।

वेदनं प्रशंसति—

सर्वैः सवनैः समावद्वीर्यैः समावज्जा-
मिभी राप्नोति य एवं वेद ॥ २७ ॥ इति ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऐतरेय-ब्राह्मणभाष्ये त्रयोदशाध्यायेः खण्डः ॥ ३ ॥ (२७) [९८]

ननु पूर्वत्र सर्वाणि च्छन्दांसि चतुरक्षराणीत्युक्तं तेष्वपि त्रिष्टुभ एकमक्षरं गतं जगत्याश्च त्रीण्यक्षराजि गतानि । तथा सति सर्वश्रुत्यन्तरविरोधः । तेषु च श्रुत्यन्तरेष्वष्टाक्षरा गायत्री । एकादशाक्षरा त्रिष्टुप् । द्वादशाक्षरा जगतीति सर्वत्र श्रूयतेऽनुष्ठानं च तथैव क्रियते तत्कथं विरोधपरिहार इत्याख्यायिकया परिहारं दर्शयितुमारभते-

ते वा इमे इतरे छन्दसी गायत्रीमभ्यवदेतां वित्तं

नावक्षराण्यनुपर्यागुरिति नेत्यब्रवीद्गायत्री यथा-
वित्तमेव न इति ते देवेषु प्रश्नमैतां ते देवा अब्रु-
वन्यथावित्तमेव इति तस्माद्वाप्येतर्हि वित्त्यां
व्याहुर्यथावित्तमेव न इति ततो वा अष्टाक्षरा
गायत्र्यभवत्त्र्यक्षरा त्रिष्टुबेकाक्षरा जगती, इति ।

ये त्रिष्टुब्जगत्यौ पुरा स्वकीयान्यक्षराणि परित्यक्तवत्यौ ते एवेमे इतरे गायत्रीव्यतिरिक्ते छन्दसी गायत्रीमभिलक्ष्य समागत्यैवमुक्तवत्यौ । हे गायत्रि यत्त्वया वित्तं लब्धमधिकमक्षरचतुष्टयं तदेतन्नौ त्रिष्टुब्जगत्योरावयोः । तस्मात्तानि चत्वार्यक्षराण्यनुपर्यागुरावां त्रिष्टुब्जगत्यावनुलक्ष्य पर्यावृत्य गच्छन्तिवति । गायत्री तयोर्वचनं नेवि निराकृत्य तत्रैवामुपपत्तिमब्रवीत् । नोऽस्माकं यथावित्तमेव लब्धमनतिक्रम्यैव स्वामित्वं युक्तम् । यद्वस्तु येन लब्धं तत्तस्यैवेति लौकिकन्यायस्तं न्यायं निर्णेतुं ते त्रिष्टुब्जगत्यौ देवेषु प्रश्नमैतां प्राप्नुताम । हे देवाः कथं न्याय इति तयोः प्रश्नः । ते च देवा उत्तरमेवमब्रुवन् । वो युष्माकं तिसृणां यथावित्तमेवाक्षरस्वीकारो युक्त इति । यस्माद्दैवैरेवमुक्तं तस्माद्ध तत एव कारणादिदानीमपि वित्त्यां कस्यांचित्पुरुषस्य द्रव्यलब्धौ सत्यां व्याहुर्विप्रतिपन्नं प्रति न्यायाभिज्ञा एवमाहुः । नोऽस्माकं सर्वेषामपि लब्धमनतिक्रम्यैव वस्तुस्वीकारो युक्त इवि । बुद्धादौ जये सति परसेनायां प्रविश्य येन यल्लभ्यते तेनैव तद्गृह्यत इति वक्तृणामभिप्रायः । देवैर्न्याये निर्णीते सति तदूर्ध्वं गायत्री स्वकीयैः स्वभावसिद्धैश्चतुरक्षरैर्युद्धे लब्धैश्चतुरक्षरैरपि स्वयमष्टाक्षराऽभूत् । त्रिष्टुभः पूर्वं वर्तमानेषु चतुर्ष्वेकाक्षरस्य गतत्वात्त्र्यक्षरैव सा । तथा जगत्याश्चतुरक्षरेष्वक्षरत्रयस्य गतत्वादेकाक्षरैव साऽभवत् ।

इदानीं त्रिष्टुभोऽक्षरत्रयादधिकानामक्षराणां प्राप्तिप्रकारं दर्शयति—

साऽष्टाक्षरा गायत्री प्रातःसवनमुदयच्छन्नाश-
क्नोत्त्रिष्टुप्त्र्यक्षरा माध्यंदिनं सवनमुद्यन्तुं तां
गायत्र्यब्रवीदायान्यपि मेऽत्रास्त्विति सा तथे-
त्यब्रवीत्त्रिष्टुप्तां वै मैतैरष्टाभिरक्षरैरुपसंधेहीति
तथेति तामुपसमदधादेतद्वै तद्गायत्र्यै माध्यंदिने

यन्मरुत्वतीयस्योत्तरे प्रतिपदो यश्चानुचरः सैकादशाक्षरा भूत्वा माध्यंदिनं सवनमुदयच्छत्, इति ।

येयमष्टाक्षरा गायत्री सेयं प्रातःसवनमुदयच्छदुद्यमनं निर्वोढुं तस्य प्रातःसवनस्याकरोत् । या तु त्रिष्टुप्त्र्यक्षराऽक्षरत्रयमात्रेण युक्ता सती माध्यंदिनसवनमुद्यन्तं निर्वोढुं नाशक्नोत्तामशक्तां त्रिष्टुभं दृष्ट्वा गायत्र्येवमब्रवीत् । आयानि त्वत्सहायार्थमहमागच्छानि मे ममाप्यत्रास्मिन्माध्यंदिने सवने भागोऽस्त्विति । तद्वचनमङ्गीकृत्य सा त्रिष्टुबेवमब्रवीद्गायत्रीं तां वै मा तादृशीं त्र्यक्षरामेव मां स्वकीयैरेतैरष्टाभिरक्षरैरुपसंधेहि सामीप्येन संधानं कुरु प्रविशेत्यर्थः । तद्वचनमङ्गीकृत्य सा गायत्री तां त्रिष्टुभमुपदधात्स्वकीयैरष्टाभिरक्षरैः प्राविशत् । कोऽसौ गायत्र्या लब्धो भाग इति स उच्यते । मरुत्वतीयस्य शस्त्रस्योत्तरे प्रतिपदौ, आ त्वा रथमित्यस्मिन्पारम्भरूपे ऋचे प्रथमाया उत्तरे ये द्वे ऋचौ प्रतिपदौ पारम्भरूपे विद्येते यश्चेदं वसो सुनीमित्यनुचररूपस्त्र्यृचस्तदेवैतदृक्पञ्चकं माध्यंदिनसवने गायत्र्यै त्रिष्टुभा दत्तं ताश्च पञ्च चौ गायत्रीछन्दस्कास्ततो गायत्रीप्रवेशात्सा त्रिष्टुबेकादशाक्षरा भूत्वा माध्यंदिनसवनप्रयोगमुदयच्छन्निरवहत् ।

अथ जगत्याः स्वकीयादेकस्मादक्षरादधिकानामक्षराणां प्राप्तिप्रकारं दर्शयति-

नाशक्नोज्जगत्येकाक्षरा तृतीयसवनमुद्यन्तुं तां गायत्र्यब्रवीदायान्यपि मेऽत्रास्त्विति सा तथेत्यब्रवीज्जगती तां वै मैतैरेकादशभिरक्षरैरुपसंधेहीति तथेति तामुपसमदधादेतद्वै तद्गायत्र्यै तृतीयसवने यद्वैश्वदेवस्योत्तरे प्रतिपदौ यश्चानुचरः सा द्वादशाक्षरा भूत्वा तृतीयसवनमुदयच्छत्, इति ।

वैश्वदेवशस्त्रस्य प्रतिपदनुचरावुपरिष्टादुदाहरिष्येते ।

उक्तमर्थं निगमयति-

ततो वा अष्टाक्षरा गायत्र्यभयदेकादशाक्षरा

त्रिष्टुब्दादशाक्षरा जगती, इति ।

वेदनं प्रशंसति —

सर्वैश्छन्दोभिः समावद्वीर्यैः समावज्जा-
मिभी राध्नोति य एवं वेद, इति ।

गायत्रीं विशेषणविशेषेण प्रशंसति—

एकं वै सत्तत्त्रेधाऽभवत्तस्मादाहुर्दातव्यमेवं
विदुष इत्येकं हि सत्तत्त्रेधाऽभवत् ॥२८॥ इति ।

तद्गायत्र्याः स्वरूपं पूर्वं चतुरक्षररूपेणैकमेव सत्स्वादधिकाक्षरचतुष्टयत्व-संपादनेन स्वकीयानामष्टरक्षराणां त्रिष्टुब्जगत्योः प्रवेशेन च त्रेधाऽभवत् । यस्मा-दीदृशो गायत्र्या महिमा तस्मादेवंविदुषे गायत्रीमहिमानं ज्ञातवते पुरुषाय लोके सुवर्णादिकं दातव्यमित्येवं धर्मरहस्यविदः प्राहुः । यस्माद्गायत्रीस्वरूपमेव सत्त्रे-धाऽभूत्तस्मात्तद्विदे दानमुचितमेवेत्युपसंहारार्थं पुनर्वचनम् ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऐतरेय-
ब्राह्मणभाष्ये त्रयोदशाध्याये चतुर्थः खण्डः ॥ ४ ॥ (२८) [९९]

एवं तावत्तृतीयसवनमवतारयितुं सोमाहरणकथा वर्णिता । अथ तृतीयसवन-मुच्यते । तत्र वैश्वदैवाग्निमारुतयोः क्लृप्तिः संगृह्यते—

" स्याद्वैश्वदेवे सवितुः पुनस्तु
द्यावापृथिव्यार्भववैश्वदेविका ।
वैश्वानरीयं मरुतां च शंसनं
स्युर्जातवेदस्यमिहाऽऽग्निमारुते " ॥

तृतीयसवनस्याऽऽदावादित्यग्रहं विधत्ते -

ते देवा अब्रुवन्नादित्यान्युष्माभिरिदं सवन-
मुद्यच्छामेति तथेति तस्मादादित्यारम्भणं
तृतीयसवनमादित्यग्रहः पुरस्तात्तस्य, इति

तृतीयसवनं निर्वहन्त्या जगत्या अक्षरसंपूर्तिमवगतवन्तः । ते देवा आदि-त्यान्द्वादशसंख्याकान्प्रत्येवमब्रुवन् । हे, आदित्या युष्माभिः सहिता वयमि तृतीयसवनमुद्यच्छाम निर्वाहं करवामहा इति । आदित्याश्च तथेत्यङ्गीकृतवन्तः ।

यस्मादारम्भे देवैरादित्यसाहित्यं प्रार्थितं तस्यादादित्यारम्भणं तृतीयसवनमादित्यग्रह आरम्भणे सर्वेषां ग्रहाणामादौ यस्य सवनस्य तदिदमादित्यारम्भणं स एवार्थ आदित्यग्रह इत्यादिना स्पष्टी क्रियते । तस्य तृतीयसवनस्य पुरस्तादादावादित्यदेवताको ग्रहः कर्तव्यः ।

तस्य ग्रहस्य याज्यां विधत्ते-

> [1]यजत्यादित्यासो अदितिर्मादयन्तामिति मद्वत्या रूपसमृद्धया मद्वद्वै तृतीयसवनस्य रूपम्, इति ।

अदितेः पुत्रा आदित्यास्ते च तन्माताऽदितिश्च मादयन्तां ग्रहेणानेन तुष्यन्तु । इत्येषा याज्या मद्वती । मदी हर्ष इत्यस्माद्धातोरुत्पन्नेन मच्छब्देन युक्ता । तस्यामादित्यानामादितेश्च हर्षवर्णनाद्विवक्षितदेवताविषयत्वेन रूपसमृद्धा । तृतीयसवनस्य स्वरूपमपि मद्वद्वै हर्षोपेतमेव तत्समाप्तौ देवतानां यजमानानामृत्विजां हर्षोत्पत्तेः ।

इतरग्रहवत्प्रसक्तावनुवषट्कारभक्षौ प्रतिषेधति-

> नानुवषट्करोति न भक्षयति संस्था वा एषा यदनुवषट्कारः संस्थाभक्षः प्राणा आदित्या नेत्प्राणान्संस्थापयानीति, इति ।

अनुवषट्कारभक्षयोर्ग्रहसमाप्तिरूपत्वादादित्यानां च प्राणरूपत्वादादित्यग्रहं समापयन्नहं प्राणानेव समापितवान्भविष्यामीति भीत्या तत्समाप्तिरूपावनुवषट्कारभक्षौ न कुर्यात् । नेदिति भयद्योतनार्थो निपातः ।

अथ सावित्रग्रहं वैश्वदेवशस्त्रस्य प्रतिपदं च विधत्ते-

> त आदित्या अब्रुवन्सवितारं त्वयेदं सह सवनमुद्यच्छामेति तथेति तस्मात्सावित्री प्रतिपद्भवति वैश्वदेवस्य सावित्रग्रहः पुरस्तात्तस्य यजति दमूना देवः सविता वरेण्य इति मद्वत्या रूपसमृद्धया मद्वद्वै तृतीयसवनस्य रूपं नानुवषट्करोति न भक्षयति संस्था वा एषा यद-

---

[1] ऋ. ७. ५१-२ ॥

नुवषट्कारः संस्था भक्षः प्राणः सविता नेत्प्राणं संस्थापयानीति, इति ।

वैश्वदेवशस्त्रस्य तत्सवितुर्वृणीमह इत्येषा सवितृदेवताका प्रतिपत्प्रारम्भरूपा-कर्तव्या दमूना देव इत्यादिका ग्रहस्य याज्या । सा च संहितायामनाम्नातत्वा-त्सूत्रकारेण पठिता । तस्यां च अमद्दक्षेत मित्र्य इति मदिधातुः प्रयुक्तः । तस्मादियं मद्वती । अन्यत्सर्वमादित्यग्रहवद्व्याख्येयम् ।

अथ निवित्पदद्वारा सावित्रग्रहं प्रशंसति—

उभे वा एष एते सवने विपिबति यत्स-वितां प्रातःसवनं च तृतीयसवनं च तद्य-त्पिबवत्सावित्र्यै निविदः पदं पुरस्ताद्ध-वति मद्दुपरिष्टादुभयोरेवैनं तत्सवनयोरा-भजति प्रातःसवने च तृतीयसवने च, इति ।

ग्रहस्य देवता यः सवितास्ति, एष देवः प्रातःसवनं च तृतीयसवनं चेत्येते उभे अपि सवने विपिबति विलक्षणत्वेन पिबति । तत्कथमिति तदे-वोच्यते । वैश्वदेवशस्त्रे सावित्र्यै सवितृदेवताकाया निविदः पदं पिबवत्पिबति-धातुयुक्तं पुरस्तादादौ भवति मद्वत्पदं मदधातुयुक्तमुपरिष्टादन्ते भवति । तेन प्रातःसवने च तृतीयसवने चोभयोरपि सवनयोरेनं सवितारमाभजति भावितं करोति । सविता देवः सोमस्य पिबत्वित्येतन्निविद आदौ प्रयुज्यमानं पदं पिबवत्पदम् । तथाऽन्ते प्रयुज्यमानं सविता देव इह श्रवदिह सोमस्य मत्स-दिति मद्वत्पदमप्युदाहरणीयम् । तमोरुभयोः पदयोः सवनद्वयरूपयोर्विलक्ष-णत्वात्सवितुः पानमिति विलक्षणमिति द्रष्टव्यम् । एवंविधसवितृदेवताकत्वा-त्प्रशस्तोऽयं ग्रह इत्याभिप्रायः । अथवा निवित्पदविधानार्थमिदं वाक्यं द्रष्टव्यम् ।

अथ तस्मिन्वैश्वदेवशस्त्र एकया च दशभिश्च स्वभूत इत्येतां वायुदेवताका-मृचं विधत्ते—

बह्व्यः प्रातर्वार्यव्याः शस्यन्त एका तृतीयसवने तस्मादूर्ध्वाः पुरुषस्य भूयांसः प्राणा यच्चावाचः, इति ।

वायुरग्रे गा इत्याद्यत वायव्या ऋचो बह्वृचः प्रातःसवने शस्यन्ते । तृतीयसवने तु एकैव पूर्वोदाहृता । तस्वास्प्रातःसवने वायुदेवताकानां भूयस्त्वात्पुरुषस्यापि प्रातःसवनीयस्थानीये मुखे वर्तमानत्वादूर्ध्वाश्चक्षुर्घ्राणादयः प्राणा भूयांसः । यच्च ये केचिदवाञ्चो नाभेरर्वाचीने तृतीयस्थानीये देशे वर्तमाना पायुगुह्यादयोऽवाञ्चः प्राणा अल्पीयांस इति शेषः ।

तस्मिन्नेव वैश्वदेवशस्त्रे द्यावापृथिवीदेवताकं सूक्तं विधत्ते-

द्यावापृथिवीयं शंसति द्यावापृथिवी वै प्रतिष्ठे इयमेवेह प्रतिष्ठाऽसावमुत्र तद्यद्द्यावापृथिवीयं शंसति प्रतिष्ठयोरेवैनं तत्प्रतिष्ठापयति ॥ २९ ॥

इह मनुष्यजन्मनीयमेव भूमिः प्रतिष्ठाऽऽश्रयः । अमुत्र जन्मान्तरेऽसावेव द्युलोकः प्रतिष्ठाऽऽश्रयः । एवं द्यावापृथिव्यावेव प्रतिष्ठे यस्मात्तस्मात्तदीयसूक्तशंसनेनैवं यजमानं प्रतिष्ठारूपयोर्द्यावापृथिव्योरेवावस्थापयति ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऐतरेयब्राह्मणभाष्ये त्रयोदशाध्याये पञ्चमः खण्डः ॥ ५ ॥ (२९) [१००]

प्र द्यावा यज्ञैः पृथिवी ऋतावृधेत्येतद्द्यावापृथिवीयं सूक्तं विधाय तक्षन्रथं सुवृतघेत्येतदार्भवं सूक्तं विधत्ते-

आर्भवं शंसति, इति ।

ऋभुनामका देवा यस्मिन्सूक्ते सन्ति तदिदमार्भवं तस्य सूक्तस्य प्रथमायामृचि तृतीयपादे तक्षन्पितृभ्यामृभवो युवद्वय इति तद्देवताकत्वं प्रतीयते ।

अथ धाय्ये विधातुमाख्यायिकामाह-

ऋभवो वै देवेषु तपसा सोमपथिमभ्यजयंस्तेभ्यः प्रातःसवने वाचि कल्पयिषंस्तानग्निर्वसुभिः प्रातःसवनादनुदत तेभ्यो माध्यंदिने सवने वाचि कल्पयिषंस्तानिन्द्रो रुद्रैर्माध्यंदिनात्सवनादनुदत तेभ्यस्तृतीयसवने वाचि कल्पयिषंस्तान्विश्वे देवा अनोनुद्यन्त नेह पास्यन्ति

नेहेति स प्रजापतिरब्रवीत्सवितारं तव वा इमेऽन्तेवासास्त्वमेवैभिः सोमपिबस्वेति स तथेत्यब्रवीत्सहिता तान्वै त्वमुभयतः पारीपिवेति तान्प्रजापतिरुभयतः पर्यापिवत्, इति ।

देवेषु सर्वेषु मध्य ऋभुनामकाः केचन देवत्वं प्राप्ता मनुष्यविशेषाः प्रजापतिमुद्दिश्य तपः कृत्वा तेन तपसा सोमपीथमभ्यजयन्सोमपानमाभिलक्ष्य जितवन्तः प्रजापतेः सकाशात्तल्लब्धवन्त इत्यर्थः । स प्रजापतिरन्या देवताश्च तेभ्य ऋभुभ्यः प्रातःसवने वाचि कल्पयिषन्सोमपानं कल्पयितुमैच्छंस्तदानीं प्रातःसवनाभिमान्यग्निर्देवः स्वभूतैर्वसुभिः सह तस्मात्प्रातःसवनात्तानृभूननुदत निराकरोत् । तथेन्द्रो रुद्रैः सह माध्यंदिनात्सवनान्निराकरोत् । विश्वे देवास्तृतीयसवनादनोनुद्यन्त भृशं निराकुर्वन् । निराकरणप्रकारः स च नेहेति वाक्येन पुनः पुनरनूद्यते । इह तृतीयसवन ऋभवो न पास्यन्ति । विश्वेषां देवानां प्रत्येकं निराकरणवाक्येन संबन्धान्नेहेति नियुक्तम् । ततः स प्रजापतिर्निराकृतानृभून्दृष्ट्वा सवितारमब्रवीत् हे सवितस्त्वमेम ऋभवोऽन्तेवासाः समीपवासिनः शिष्या अतस्त्वमेवैभिः सह सम्यक्पिबस्व तथेत्यङ्गीकृत्य सविता प्रजापतिमिदमब्रवीत् । हे प्रजापते त्वं तान्वै तानेम ऋभूनुभयतः पिब तेषामृभूणामुभयोः पार्श्वयोः स्थित्वा त्वमपि सोमपानं कुरु । एवमुक्तः प्रजापतिस्तथैवाकरोत् । अथ धाय्ये विधत्ते

ते एते धाय्ये अनिरुक्ते प्राजापत्ये शस्येते अभित आर्भवं सुरूपकृत्नुमूतयेऽयं वेनश्चोदयत्पृश्निगर्भा इति प्रजापतिरेवैनांस्तदुभयतः परिपिबति तस्माद्धु श्रेष्ठी पात्रे रोचयत्येव यं कामयते तम्, इति ।

सुरूपकृत्नुमित्येका धाय्याऽयं वेन इति द्वितीया ते इते धाय्ये आर्भवसूक्ते अभितः शस्येते । सुरूपकृत्नुमित्येषा सूक्तात्पूर्वं शंसनीया । अथं वेन इत्येषा सूक्तात्पश्चाच्छंसनीया । कीदृश्यौ धाय्ये अनिरुक्ते निःशेषेणोक्तो देवोनिरुक्तस्तादृशो ययोर्धाय्ययोर्नास्ति ते अनिरुक्ते । न खल्वनयोर्ऋचोरीदृशो देव इति सहसा निर्णेतुं शक्यते । प्रजापतेरपि जगत्सृष्टेः पूर्वं मूर्तस्य निर्वक्तु-

१ ऋ. १-४ १ ॥ २ ऋ. १० १२३ १ ॥

मशक्यत्वात्सोऽप्यनिरुक्तोऽतो योग्यत्वात्ते उभे प्रजापतिदेवताके । एतयोर्धाय्ययोः शंसने प्रजापतिरेवैनानुभूनुभयतः परिपिबति । यस्मात्प्रजापतिरग्निर्वस्वादिदेवतानामृभुषु रुच्यभावे सति पितृद्वारा बलाद्रुचिमुत्पादितवांस्तस्मादु तस्मादेव कारणाल्लोकेऽपि श्रेष्ठी कश्चिद्धनवतिर्यं स्वकीयं भृत्यमिरेरङ्गीकृतमपि सर्वेभ्यो रोचयितुं कामयते तं भृत्यमाचारहीनं पात्रे प्रतिग्रहयोग्यस्थाने बलात्सर्वेभ्यो रोचयत्येव ।

अथापरमृग्द्वयं विधत्ते-

तेभ्यो वै देवा अपैवाबीभत्सन्त मनुष्यगन्धात्त एते धाय्ये अन्तरदधत येभ्यो मातैवा पित्र इति ॥ ३० ॥ इति ।

* अग्निवस्वादयो देवास्तेभ्य ऋभुभ्योऽपैव स्वयमपगता एव सन्तोऽबीभत्सन्त, एवं मनसि बीभत्सां कृतवन्तः । कस्मात्कारणादिति तदुच्यते । मनुष्यगन्धादिति । एते मनुष्या अस्मत्पङ्क्तियोग्या न भवन्तीति शङ्क्येत्यर्थः । बीभत्सां प्राप्यैते वक्ष्यमाणे द्वे धाय्ये अन्तरदधत ऋभूणामन्यादीनां च मध्येऽन्तर्धानं व्यवधानमकुर्वत । के ते धाय्ये इत्युच्येते । येभ्यो माता मधुवदित्येका । एवा पित्रे विश्वदेवायेत्यपराऽयं वेन इत्येतस्मात्पूर्वमेतदुभयं शंसेदित्यर्थः ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे ऐतरेयब्राह्मणभाष्ये त्रयोदशाध्याये षष्ठः खण्डः ॥६॥ (३०) [१०१]

---

* अत्र अ. ट. पुस्तकयोर्मन्त्रद्वयस्य व्याख्यानं वर्तते तद्यथा-" येभ्यो मातेति माता सर्वस्य निर्मात्री पृथिवी येभ्यो देवेभ्यो देवतार्थं मधुमन्माधुर्योपेतं पयः सारभूतं क्षीरं पिन्वते क्षरति । तथाऽदितिरदीनाऽद्रिबर्हा मेघैः परिवृढा प्रवृद्धा परिवृढमेघा वा द्यौश्च पीयूषं पिन्वते । द्यावापृथिव्यौ हविरुत्पादयत इत्यर्थः । ऋषिरात्मानं संबोध्याऽऽह । उक्थशुष्मान्स्तुतिबलान्वृषभरान्वृष्टेराहर्तॄन् । ह्वयहोरिति भः । स्वमसः सुकर्मणस्तानादित्यानदितेः पुत्रान्देवान्स्वस्तयेऽविनाशायानुमदानुस्तुहि । माद्यतेर्लोटि व्यत्ययेन शप् । मन्दतेर्वा स्तुत्यर्थस्यानित्यमागमशासनमिति नुमभावः । एवा पित्र इति पित्रे पालकाय विश्वदेवाय सर्वदेवतारूपाय देवानां मन्त्रप्रतिपाद्यत्वात् । अस्य च मन्त्राभिमानित्वाद्विश्वदेवत्वम् । यद्वाऽत्र देवशब्दः स्तुत्यर्थः । सर्वैः स्तुत्याय वृष्णे वर्षकाय बृहस्पतये देवायैवैवमुक्तप्रकारेण यज्ञैस्तत्साधनैर्हविर्भिराज्यचर्वादिलक्षणैर्नमसा स्तुत्या च विधेम परिचरेम । हे बृहस्पते सुप्रजाः शोभनपुत्रा वीरवन्तो वीर्योपेता वयं रयीणां धनानां पतयः स्याम " ।

अथ विश्वदेवदेववाकमा नो भद्राः (१ ८९ ·१) इत्येतत्सूक्तं विधत्ते–

वैश्वदेवं शंसति, इति ।

लौकिकदृष्टान्तेन प्रशंसत्राहावं विधत्ते–

यथा वै प्रजा एवं वैश्वदेवं तद्यथाऽन्तरं जनता एवं सूक्तानि यथाऽरण्यान्येवं धाय्यास्तदुभयतो धाय्यां पर्याह्वयते तस्मात्तान्यरण्यानि सन्त्यनरण्यानि मृगैश्च वयोभिश्चेति ह स्माऽऽह, इति ।

लोके यथा प्रजा एवमत्र वैश्वदेवशस्त्रं प्रजाशब्देन तन्निवासस्थानं राज्यमुपलक्ष्यते राज्यसदृशं शस्त्रमित्यर्थः । तत्र प्रजाशब्देन राज्ये विवक्षिते राज्येऽन्तरमभ्यन्तरमभ्यन्तरे जनता जनसमूहा यथा तिष्ठन्ति, एवं तस्मिन्सूक्ते शस्त्रे सूक्तानि तिष्ठन्ति । यथा वाऽरण्यानि राज्ये क्वचित्क्वचिद्भवन्ति, एवमस्मिञ्शस्त्रे धाय्याः क्वचित्क्वचिन्निक्षिप्यन्ते । तथा सत्यरण्यस्थानीयां धाय्यामुभयतः पर्याह्वयते । शौनावोमित्येष मन्त्रः पर्याहावः अस्य धाय्यायाः पार्श्वयोर्यस्मात्पाठस्तस्मालोकेऽपि बहुवृक्षसंकीर्णानि स्थानानि स्वभावतोऽरण्यानि मनुष्यशून्यानि सन्त्यपि मृगैश्च पक्षिभिश्च संकीर्णान्यनरण्यान्यशून्यान्येवेति कश्चिदभिज्ञ आह स्म ।

एवमेकेन दृष्टान्तेन पर्याहावं प्रशस्य पुनरप्यन्येन दृष्टान्तेन प्रशंसति–

यथा वै पुरुष एवं वैश्वदेवं तस्य यथाऽवान्तरमङ्गान्येवं सूक्तानि यथा पर्वाण्येवं धाय्यास्तदुभयतो धाय्यां पर्याह्वयते तस्मात्पुरुषस्य पर्वाणि शिथिराणि सन्ति दृढानि ब्रह्मणाऽऽहितानि धृतानि, इति ।

लोके यथा पुरुषो हस्तपादादिमान्मनुष्यदेहस्तद्वदिदं वैश्वदेवशस्त्रं तस्य शरीरस्यावान्तरमभ्यन्तरप्रवेशाङ्गान्यवयवा यथा वर्तन्त एवं शस्त्रस्याभ्यन्तरे सूक्तानि निविष्टानि । यथा तेषामवयवानां संधय एवमेता धाय्याः शस्त्रे तिष्ठन्ति । तथा सति धाय्या उभयपार्श्वपर्वाणि शिथिराणि पूर्वं शिथिलानि

सन्त्यपि पश्चात्प्रयत्नेन धारितानि दृढानि संपद्यन्ते ब्रह्म वा आहाव इति श्रुत्वादाहावरूपेण ब्रह्मणैव धाय्यारूपाणि पर्वाणि धृतानि भवन्ति ।

अथ धाय्यानां शस्त्रयाज्यानां च प्रकृतौ विकृतौ चान्यत्वं निराकृत्यैकरूपत्वं विधत्ते—

मूलं वा एतद्यज्ञस्य यद्धाय्याश्च याज्याश्च तद्यदन्या अन्या धाय्याश्च याज्याश्च कुर्युरुन्मूलमेव तद्यज्ञं कुर्युस्तस्मात्ताः समान्य एव स्युः, इति ।

धाय्यानां शस्त्रयाज्यानां वृक्षमूलवद्यज्ञमूलता । तत्प्रकृतिगताः परित्यज्य विकृतावन्यस्वीकारे यज्ञरूपो वृक्ष उन्मूलितः स्यात् । तस्मात्प्रकृतौ याः सन्ति ता एव विकृतावित्युभयत्र समान्य एवैकविधा एव कर्तव्याः ।

वैश्वदेवशस्त्रमवयवशः प्रशस्य समुदायाकारेण प्रशंसति—

पाञ्चजन्यं वा एतदुक्थं यद्वैश्वदेवं सर्वेषां वा एतत्पञ्चजनानामुक्थं देवमनुष्याणां गन्धर्वाप्सरसां सर्पाणां च पितॄणां चैतेषां वा एतत्पञ्चजनानामुक्थं सर्व एनं पञ्चजना विदुः, इति ।

यद्वैश्वदेवनामकमुक्थं शस्त्रमस्ति तदेतत्पाञ्चजन्यं वै पञ्चविधानां जनानां संबन्ध्येव । स एवार्थः सर्वेषामित्यादिना स्पष्टी क्रियते । ये पञ्चविधा जनाः सन्ति तेषां सर्वेषामेव संबन्ध्येतच्छस्त्रम् । पञ्चविधत्वमेव मनुष्याणामित्यादिनोच्यते । अग्नीन्द्रादिदेवगण एको वर्गः । ब्रह्मक्षत्रियादिमनुष्यगणो द्वितीयो वर्गः । गन्धर्वाणामप्सरसां वर्गस्तृतीयः । सर्पाणां वर्गश्चतुर्थः । पितॄणां वर्गः पञ्चमः । एतेषां पञ्चविधानां जनानां तुष्टिहेतुत्वात्तदीयमेतच्छस्त्रम् । एनं वैश्वदेवशस्त्रस्य शंसितारं होतारं सर्वे पञ्चजना विदुर्जानन्ति तेष्वस्य कीर्तिः प्रसरतीत्यर्थः ।

वेदनं प्रशंसति—

एनं पञ्चिन्यै जनतायै हविनो गच्छन्ति य एवं वेद, इति ।

जनानां देवमनुष्याणां समूहो जनता । सा च पञ्चसंख्योपेतत्वात्पञ्चिनी तस्यै तत्प्रीत्यर्थं हविनो होतुं कुशलाः पुरुषा एनं वेदितारमागच्छन्ति ।

अथ शंसनपूर्वकाले दिग्ध्यानं विधत्ते–

सर्वदेवत्यो वा एष होता यो वैश्वदेवं
शंसति सर्वा दिशो ध्यायेच्छंसिष्यन्स-
र्वास्वेव तद्दिक्षु रसं दधाति, इति ।

यो होता वैश्वदेवं शस्त्रं शंसति एष सर्वदेवत्यो वै सर्वा देवता अस्येति तत्प-रितोषहेतुरित्यर्थः । अतः सोऽयं शंसितुमुद्युक्तः सर्वा दिशो मनसा ध्यायेत्तेन शंसनेन सर्वास्वेव तद्दिक्षु रसं दधाति ।

क्वचिद्ध्यानं विधत्ते–

यस्यामस्य दिशि द्वेष्यः स्यान्न तां
ध्यायेदनुहायैवास्य तद्वीर्यमादत्ते, इति ।

अस्य होतुर्द्वेष्यः शत्रुर्यस्यां दिशि वसति तामेकां दिशं न ध्यायेत् । तथा सति, अनुहायैव द्वेष्यस्य पृष्ठतो गत्वैव तद्वीर्यं सर्वं स्वीकरोति ।

शस्त्रस्य परिधानीयामृचं विधत्ते–

अदितिर्द्यौरदितिरन्तरिक्षमित्युत्तमया परिदधा-
तीयं वा अदितिरियं द्यौरियमन्तरिक्षम्, इति ।

अखण्डितत्वाददीनत्वाद्वा भूमिरेवादितिरित्युच्यते । सैवं भूमिरेव द्युलो-करूपाऽन्तरिक्षरूपा चास्यां भूमौ कर्म कृत्वा तत्तल्लोकप्राप्तेः संपादयितुं शक्यत्वात् ।

द्वितीयपादमनूद्य व्याचष्टे–

अदितिर्माता स पिता स पुत्र
इतीयं वै मातेयं पितेयं पुत्रः, इति ।

येयमदितिर्भूमिः सैव माता । सोऽदितिरूप एव पिता । सोऽदितिरूप एव पुत्रः । इयं वा इत्यादिनोक्तार्थप्रसिद्धिरुच्यते । सत्यां भूमौ मातापितृ (त्वा)-पुत्रादिभिरवस्थातुं शक्यत्वात्तेषामदितिरूपत्वं प्रसिद्धमित्यर्थः ।

तृतीयपादमनूद्य व्याचष्टे–

विश्वे देवा अदितिः पञ्चजना इत्यस्या वै विश्वे

---

१ ऋ. १ ८९ १ ।

देवा अस्यां पञ्चजनाः, इति ।

विश्वेषां देवानां भूमौ मनुष्यैः पूज्यमानत्वात्पञ्चजनानां देवमनुष्यादीनां भूमावेवस्थानाददितेस्तद्रूपत्वम् ।

चतुर्थं पादमनूद्य व्याचष्टे—

अदितिर्जातमदितिर्जनित्वमितीयं
वै जातमियं जनित्वम्, इति ।

जातं पूर्वमुत्पन्नं प्राणिरूपं जनित्वमितःपरमुत्पत्स्यमानं प्राणिरूपं तयोरुभयोर्भूमौ संभवाददितेस्तद्रूपत्वम् ।

परिधानीयाया अस्या ऋचः शंसने प्रकारविशेषं विधत्ते—

द्विः पच्छः परिदधाति चतुष्पादा वै पशवः
पशूनामवरुद्ध्यै सकृदर्धर्चशः प्रतिष्ठाया एव
द्विप्रतिष्ठो वै पुरुषश्चतुष्पादाः पशवो यजमानमेव
तद्द्विप्रतिष्ठं चतुष्पात्सु पशुषु प्रतिष्ठापयति, इति ।

त्रिः प्रथमां त्रिरुत्तमामन्वाहेति विधेः सार्वत्रिकत्वादस्याः परिधानीयायास्त्रिरावृत्तिः प्राप्ता । तत्र द्वयोरावृत्त्योः पच्छः शंसेत् । एकैकस्मिन्पादेऽवसायावसाय शंसनं कुर्यात् । तत्र पादानां चतुष्टयेन पशूनां प्राप्त्यापशुप्राप्तिर्भवति । तृतीयस्यामावृत्तावर्धर्चशः शंसेत् । अर्धर्चेऽवसाय पठेदित्यर्थः । तच्च प्रतिष्ठायै स्थैर्येणावस्थानार्थमेव भवति । किंच पुरुषोऽयं द्विप्रतिष्ठः पाद्द्वयोपेतः पशवश्चतुष्पादास्तथा सत्युभयविधशंसनेन द्विपादं यजमानमेव चतुष्पात्सु पशुषु प्रतिष्ठापयति ।

परिधानकाले भूमिस्पर्शं विधत्ते—

सदैव पञ्चजनीयया परिदध्यात्तदुपस्पृशन्भूमिं परिदध्यात्तद्यस्यामेव यज्ञं संभरति
तस्यामेवैनं तदन्ततः प्रतिष्ठापयति, इति ।

सदैव सर्वेष्वपि यज्ञप्रयोगेषु पञ्चजनीयया विश्वे देवा आदितिः पञ्चजना इत्युक्तत्वादियमृक्पञ्चजनीया तया परिधानं समापनं यदा कुर्यात्तदानीं

भूमिमुपस्पृशन्परिदध्यात् । तथा सति यस्यामेव भूमौ यज्ञं संभरति, अनुष्ठातुं यज्ञसाधनानि संपादयति तस्यामेव भूमावेनं यज्ञमनेनोपस्पर्शनेनान्ततः प्रतिष्ठापयति ।

शस्त्रयाज्यां विधत्ते—

विश्वे देवाः शृणुतेमं हवं म इति वैश्वदेवमुक्थं शस्त्वा वैश्वदेव्या यजति यथाभागं तद्देवताः प्रीणाति ॥ ३१ ॥ इति ।

वैश्वदेवशस्त्रशंसनादूर्ध्वं विश्वे देवाः शृणुतेत्येतां वैश्वदेवीं याज्यां पठेत् । तस्यां ये अन्तरिक्षे य उपर्यविष्ठेत्यादिना भिन्नवर्गाणां देवगणानामभिधानात्तासां देवतानां स्वस्वभागमतिक्रम्य प्रीतिं करोति ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऐतरेयब्राह्मणभाष्ये त्रयोदशाध्यायेः सप्तमः खण्डः ॥ ७ ॥ (३१) [१०२]

अथ घृतयागसौम्ययागयोर्याज्यां विधत्ते—

आग्नेयी प्रथमा घृतयाज्या सौमी सौम्ययाज्या वैष्ववी घृतयाज्या त्वं सोम पितृभिः संविदान इति सौम्यस्य पितृमत्या यजति, इति ।

सौम्यचरोरुभयतो घृतसाध्यौ द्वौ यागावनुष्ठेयौ । तत्राग्निदेवताका विष्णुदेवताका चेति द्वे याज्ये । घृताहवनो घृतपृष्ठो अग्निरित्याग्नेयी प्रथमा याज्या उरु विष्णो विक्रमस्वेति वैष्णवी द्वितीया घृतयाज्या । अस्ति कश्चित्सोमदेवताकश्चरुस्तस्य त्वं सोमेति सौमी याज्या तत्र पितृभिः संविदान इति श्रुत्वादिवं पितृमतीं तां याज्या सौम्यचरौ पठेत् । तस्य चरोः पुरस्तादाग्नेययाज्यया घृतयागः । उपरिष्टाद्वैष्णवयाज्यया घृतयागः । तद्याज्याद्वयमाश्वलायनेन पठितम् ।

सौमीं याज्यां प्रशंसति—

घ्नन्ति वा एतत्सोमं यदभिषुण्वन्ति तस्यैतामनुस्तरणीं कुर्वन्ति यत्सौम्यः पितृभ्यो वा अनु-

---

१. ऋ. ६-५२-१३ ॥ २. ऋ. ८-४८ १३ ॥

स्तरणी तस्मात्सौम्यस्य पितृमत्या यजाति, इति ।

ऋत्विजः सोममभिषुण्वन्तीति यदस्ति सोऽयं सोमस्य वध एव । तत्र यः सौम्यश्चरुरस्ति, एतां सौम्यचरुरूपां तस्य मृतस्य सोमस्यानुस्तरणीं कुर्वन्ति । मृतस्य दीक्षितस्य दहनकाले कांचिद्वृद्धां गां हत्वा दीक्षितावयवेषु गोरवयवानवस्थाप्य दहेत् । सेयं गौर्मृतं दीक्षितमनु मृतत्वार्द्धिसितत्वाच्चानुस्तरणीत्युच्यते । यस्मात्सा पितृभ्यो योग्या तस्मात्पितृमत्या याज्यया सौम्ययागस्य हविर्यजेत् ।

घृतयागसहितं सौम्यं चरुं संगृह्य प्रशंसति-

अवाधिषुर्वा एतत्सोमं यदभ्यसुष-
वुस्तदेनं पुनः संभावयान्ति, इति ।

अभ्यसुषवुरभितः सोमं सुतवन्त इति यदस्ति, एतेन सोममवधिषुर्वै, ऋत्विजो हतवन्त एव तस्मादेनं व्यथितं सोमं घृतचरुभ्यां व्ययापरिहाराय संभावयन्ति ।

संगृह्य प्रशस्य देवताद्वारा पुनर्विस्तरेण प्रशंसां दर्शयति-

पुनराप्याययन्त्युपसदां रूपेणोपसदां किल वै तद्रूपं
यदेता देवता अग्निः सोमो विष्णुरिति, इति ।

योऽयं हतः सोमस्तं सोममुपसदां रूपेण संपादितेन पुनराप्याययन्ति । अग्निः सोमो विष्णुरिति या एतास्तिस्रो देवतास्तदेतदुपसदामेव स्वरूपं तत्राप्येतस्य देवतात्रयस्य विद्यमानत्वात् ।

अथ होतुराज्यावेक्षणं विधत्ते-

प्रतिगृह्य सौम्यं होता पूर्वश्छन्दोगभ्योऽवेक्षेत, इति ।

हुतशेषं सौम्यं चरुमध्वर्युणा दत्तं होता प्रतिगृह्य चरुमध्ये सिक्ते बहुले घृते छन्दोगेभ्य उद्गातृभ्यः स्वयं पूर्वभावी सन्स्वकीयां देहच्छायामवेक्षेत ।

अत्र पूर्वपक्षमुत्थाप्य दूषयति-

तं हैके पूर्वं छन्दोगेभ्यो हरान्ति तत्तथा न
कुर्याद्वषट्कर्ता प्रथमः सर्वभक्षान्भक्षयतीति ह
स्माऽऽह तेनैव रूपेण तस्माद्वषट्कर्तैव पूर्वोऽवे
क्षेताथैनं छन्दोगेभ्यो हरान्ति ॥ ३२ ॥ इति ।

केचन याज्ञिका होतुराज्यावेक्षणात्पूर्वमेव तं घृतयुक्तं सौम्यं चरुं छन्दोगेभ्यः समर्पयन्ति । तत्समर्पणं तथा न कुर्यात् । हविःशेषभक्षणेषु वषट्कर्ता होता प्रथमः पूर्वभावी सन्हविःशेषान्भक्षयति । इत्येवमभिज्ञो महर्षिराह स्म । तस्मात्कारणात्तेनैव रूपेण भक्षणक्रमेणैवावेक्षणेऽपि होतैव प्रथमो भूत्वाऽवेक्षेत । अनन्तरमेवैनं सौम्यं चरुं छन्दोगेभ्यः समर्पयेयुः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऐतरेयब्राह्मणभाष्ये त्रयोदशाध्यायेऽष्टमः खण्डः ॥ ८ ॥ (३२) [१०३]

अथाऽऽग्निमारुतशस्त्रं वक्तव्यं तदर्थमादावुपाख्यानमाह -

प्रजापतिर्वै स्वां दुहितरमभ्यध्यायद्दिवमित्यन्य आहुरुषसमित्यन्ये तामृश्यो भूत्वा रोहितं भूतामभ्यैत्तं देवा अपश्यन्नकृतं वै प्रजापतिः करोतीति ते तमैच्छन्न एनमारिष्यत्येतमन्योन्यस्मिन्नाविन्दंस्तेषां या एव घोरतमास्तन्व आसंस्ता एकधा समभरंस्ताः संभूता एष देवोऽभवत्तदस्यैतद्भूतवन्नाम, इति ।

पुरा कदाचित्प्रजापतिः स्वकीयां दुहितरमभिलक्ष्य भार्यात्वेन ध्यानमकरोत् । तस्यां दुहितरि महर्षीणां मतभेदं आसीत् । अन्ये केचन महर्षयो दिवं द्युलोकदेवतां ध्यातवानित्याहुः । अपरे तु महर्षय उषसमुष कालदेवतां ध्यातवानित्याहुः । ऋश्यो मृगविशेषः । तथा चाभिधानकार आह-गोकर्णपृषतैणर्श्यरोहिताश्चमरो मृगा इति । स प्रजापतिस्तथाविध ऋश्योऽभूत् । सा च दुहिता रोहितं लोहितं भूता प्राप्ता । ऋतुमती जातेत्यर्थः । तादृशीं तां दुहितरमभ्यैदभिगतवान्मिथुनधर्मं प्राप्तवानित्यर्थः । तं दुहितृगामिनं प्रजापतिं देवाः परस्परमिदमब्रुवन् । अयं प्रजापतिरकृतं वै, अकर्तव्यमेव निषिद्धाचरणं करोतीति विचार्य यः पुरुष एनं प्रजापतिमारिष्यति, आर्तिं प्रापयितुं क्षमस्तादृशं पुरुषमैच्छन्नन्वेषणं कृतवन्तः । कृत्वा चान्योन्यस्मिंस्तेषां मध्ये तं प्रजापतिघातकं नाविन्दन्नालभन्त त्वं हन्तुं शक्नोषि त्वं हन्तुमिति परस्परं पृष्ट्वैकैकस्य शक्तिराहित्यं निश्चितवन्तः । सर्वेषु देवेषु या एव कश्चिद्घोरतमास्तन्वोऽत्युग्राणि शरीराण्यासंस्ताः सर्वा एकधा समभरन्मेलयित्वैकं शरीरं कृतवन्तस्ता घोरतमास्तन्वः संभृता

एकत्वेन संपादिताः सत्य एष देवोऽभवत् । एष इति हस्तेन प्रदर्श्य रुद्रोऽभिधीयते । तत्तस्मादेव कारणादस्य रुद्रस्यैतल्लोकप्रसिद्धं भूतवद्भूतशब्दोपेतं नाम संपन्नम् । भूतपतिरिति भूतवन्नाम । तच्च तस्य भवत्यर्थानुगमाद्युक्तम् ।

एतन्नामवेदनं प्रशंसति—

भवति वै स योऽस्यैतदेवं नाम वेद, इति ।

वेदिता भवति वै भूतिमानेव संपद्यते ।

अथ तेन रुद्रेण सह देवानां संवादं दर्शयति—

तं देवा अब्रुवन्नयं वै प्रजापतिरकृतमकरिमं विध्येति स तथेत्यब्रवीत्स वै वो वरं वृणा इति वृणीष्वेति स एतमेव वरमवृणीत पशूनामाधिपत्यं तदस्यैतत्पशुमन्नाम, इति ।

तं रुद्रं देवा एवमब्रुवन् हे रुद्रायं प्रजापतिरकृतमकर्निषिद्धाचरणं कृतवांस्तस्मादिमं बाणेन प्रहरेति । स रुद्रस्तदङ्गीकृत्योत्कोचत्वेन पशूनामाधिपत्यं कृतवान् । तस्मात्कारणादस्य रुद्रस्यैतल्लोकप्रसिद्धं पशूनतिरित्येतादृशं पशुशब्दोपेतं नाम संपन्नम् ।

तद्वेदनं प्रशंसति—

पशुमान्भवति योऽस्यैतदेवं नाम वेद, इति ।

अथ रुद्रप्रजापत्योर्वृत्तान्तं दर्शयति—

तमभ्यायत्याविध्यत्स विद्ध ऊर्ध्व उदप्रपत-त्तमेतं मृग इत्याचक्षते य उ एव मृगव्याधः स उ एव स या रोहित्सा रोहिणी यो एवे-षुस्त्रिकाण्डा सो एवेषुस्त्रिकाण्डा, इति

स रुद्रोऽभ्यायत्य बाणयुक्तं धनुरभित आकृष्य तं प्रजापतिमविध्यत् । ऋश्यमृगरूपः स प्रजापतिर्विद्धः सन्नूर्ध्वमुख उदप्रपतत्प्रकर्षेणोत्पतनमकरोत् । तमेवमुत्पतितमृगरूपं प्रजापतिमाकाशे दृष्ट्वा सर्व एव ते जना मृग इत्याचक्षते रोहिण्यार्द्रयोर्नक्षत्रयोर्मध्येऽवस्थितं मृगशीर्षनक्षत्रं कथयन्ति नक्षत्ररूपेण निष्पन्न इत्यर्थः । य उ एव यस्तु रुद्रो मृगव्याधो मृगघाती स रुद्र आकाशे

दृश्यमानः स उ एव लोकप्रसिद्धो मृगव्याध आसीत् । या दुहिता रोहिता रोहिद्वर्णा मृगी सेयमाकाशे रोहिणीनक्षत्रमभूत् । यो एव या तु रुद्रेण वेरितेषुस्त्रिकाण्डाऽनीकं शल्यस्तेजनमित्यवयवत्रयोपेता सो एव सैव लोकप्रसिद्धा काण्डत्रयोपेतेषुर्बाणोऽभवत् ।

अथ मनुष्योत्पत्तिं दर्शयति -

तद्धा इदं प्रजापते रेतः सिक्तमधावत्तत्सरोऽभवत्ते देवा अब्रुवन्मेदं प्रजापते रेतो दुषदिति यदब्रुवन्मेदं प्रजापते रेतो दुषदिति तन्मादुषमभवत्तन्मादुषस्य मादुषत्वं मादुषं ह वै नामैतद्यन्मानुषं सन्मानुषमित्याचक्षते परोक्षेण परोक्षप्रिया इव हि देवाः ॥ ३३ ॥ इति ।

मृगरूपेण प्रजापतिना यदेतो मृग्यां सिक्तं तदेतदतिबहुत्वाद्भूमौ पतितं सत्प्रवाहरूपेणाधावत् । तच्च क्वचिन्निम्नदेशेऽवस्थाय प्रौढं सरोऽभूत् । ते देवा एवमब्रुवन्प्रजापतेरिदं रेतो मा दुषत्दुष्टमस्पृश्यं मा भूदिति । यस्मान्मा दुषदित्यवदंस्तस्माद्दोषरहितस्य रेतसो मादुषमिति नाम संपन्नम् । जनास्तु दकारस्थाने नकारं प्रक्षिप्य मानुषमिति ब्राह्मणक्षत्रियादिशरीरमाचक्षते । तद्धस्तुतो दैवाचारेण दोषरहितत्वान्मादुषमेव । तथा सति मादुषनामयोग्यमपि तच्छरीरं परोक्षेण नाम्ना व्यवहर्तव्यमित्यभिप्रेत्य वर्णव्यत्ययेन मानुषमित्याचक्षते । यस्माल्लोके देववत्पूज्यां उतमः पुरुषाः परोक्षप्रिया इव हि प्रत्यक्षे मातापितुनिर्मिते देवदत्तादिनाम्नि न प्रीतिं कुर्वन्ति किंतूपाध्यायाचार्यस्वामीत्यादिके मातपित्राद्दीनामकल्पितत्वेन परोक्षे नाम्नि प्रीतिं कुर्वन्ति तस्मात्परोक्षत्वाय नकारप्रक्षेपो युज्यते ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऐतरेयब्राह्मणभाष्ये त्रयोदशाध्याये नवम खण्डः ॥ ९ ॥ (३३) [१०४]

अथाऽऽदित्यादिदेवतोत्पत्तिं दर्शयति –

तदग्निना पर्यादधुस्तन्मरुतोऽधून्वंस्तदग्निर्न प्राच्यावयत्तदग्निना वैश्वानरेण पर्यादधुस्तन्मरुतोऽ-

धून्वंस्तदग्निर्वैश्वानरः प्राच्यावयत्तस्य यद्रेतसः प्रथममुददीप्यत तदसावादित्योऽभवद्यद्द्वितीयमासीत्तद्भृगुरभवत्तं वरुणो न्यगृह्णीत तस्मात्स भृगुर्वारुणिरथ यत्तृतीयमदीदेदिव त आदित्या अभवन्येऽङ्गारा आसंस्तेऽङ्गिरसोऽभवन्यदङ्गाराः पुनरवशान्ता उददीप्यन्त तद्बृहस्पतिरभवत्, इति।

प्रजापतेः संबन्धि यद्रेतो देवैर्दोषरहितं कृतं तद्रेतो देवा अग्निना पर्यादधुः परितो वेष्टितवन्तः। सरोरूपेणावास्थितस्य रेतसो दाहेन द्रवीभावं निवारयितुं परितोऽग्निं प्रज्वलितवन्त इत्यर्थः। यदाऽग्निः प्रज्वलितस्तदा मरुतो वायवस्तद्रेतोऽधून्वञ्शोषणाय वायुसंयुक्तमकुर्वन्। सोऽग्निस्तद्रेतो न प्राच्यावयत्। द्रवीभावात्प्रच्युतं नाकरोत्। द्रवबाहुल्यात्पिण्डाकारं कर्तुं नाशक्नोदित्यर्थः। "वैश्वानरो नाम कश्चिदग्निविशेषः प्राणिनामुदरे प्रविश्यान्नपानादिकं पाचयति। तथा च भगवतोक्तम्—

" अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रितः।
प्राणापानसमायुक्तः पचाम्यन्नं चतुर्विधम् " इति॥

तेन वैश्वानरनामकेनाग्निविशेषेण तद्रेतः पूर्ववत्पर्यादधः। देवैरग्नौ परिक्षिप्ते सति वरुणस्तद्रेतः पूर्ववदधून्वन्। सोऽयं वैश्वानरोऽग्निस्तद्रेतो द्रवीभावात्प्रच्युतमकरोत्। तस्य पिण्डीभूतस्य रेतसो यत्प्रथमं पिण्डरूपमुददीप्यतोद्दीप्तमभूत्तद्रूपमसौ दिवि दृश्यमान आदित्योऽभवत्। द्वितीयं यत्पिण्डरूपमासीत्तद्ऋषिर्भृगुरभवत्तं भृगुं वरुणो न्यगृह्णीत निगृह्य स्वेपुत्रत्वेन स्वीकृतवान्। तस्मात्स भृगुर्वारुणिरित्युच्यते। वरुणस्यापत्यं वारुणिः। एतदेवाभिप्रेत्य तैत्तिरीया आमनन्ति—' भृगुर्वै वारुणिः। वरुणं पितरमुपससार ' इति। अथानन्तरं तृतीयं पिण्डरूपमदीदेदिवातिशयेन दीप्तमवाऽऽसीत्। त आदित्या अदितेः पुत्रा देवविशेषा अभवन्। पूर्वमादित्यशब्देन मण्डलवर्ती सूर्य उक्तः। अत्रादितेः पुत्रा इतरे देवा उच्यन्ते। ये रेतःपिण्डा दग्धाः सन्तोऽङ्गारा अभवंस्ते सर्वेऽप्यङ्गिरोनामका ऋषयोऽभवन्। पुनरपि तत्र यदङ्गारा ये केचिदङ्गारा अवशान्ताः शान्तिरहिताः सन्त उददीप्यन्त, उत्कर्षेण दीप्तास्तत्सर्वं बृहस्पतिरभवत्।

अथ पशुसृष्टिं दर्शयति—

यानि परिक्षाणान्यासंस्ते कृष्णाः पशवोऽभवन्या लोहिनी मृत्तिका ते रोहिता अथ यद्धस्माऽसीत्तत्पुरुष्यं व्यसर्पद्गौरो गवय ऋश्य उष्ट्रो गर्दभ इति ये चैतेऽरुणाः पशवस्ते च, इति ।

अङ्गारेषु शान्तेषु यानि कृष्णवर्णान्यासन्काष्ठानि ते कृष्णवर्णाः पशवोऽभवन् । अग्निदाहेन भूमौ या लोहिनी रक्तवर्णा मृत्तिका विष्ठति ते रोहिता रक्तवर्णाः पशवोऽभवन् । अत्राग्निस्थाने यद्धस्माऽऽसीत्तत्पुरुष्यं पुरुषशरीरजातं भूत्वा व्यसर्पत्, विविधमरण्यादावगच्छत् । किं तत्पुरुष्यमिति तदेवोच्यते । गौरो गवय ऋश्य इत्येतेऽरण्यमृगाः । उष्ट्रगर्दभौ प्रसिद्धौ । एवमादिकं पुरुषशरीरम् । येऽप्येतेऽरुणाः पशवस्ते च व्यसर्पन् ।

एवमुपाख्यानेनाऽऽग्नेमारुतशस्त्रस्योपोद्घातमभिधाय तस्मिन्शस्त्रे शंसनीयामेकामृचं विधत्ते—

तान्वा एष देवोऽभ्यवदत मम वा इदं मम वै वास्तुहामिति तमेतयर्चा निरवादयन्त यैषा रौद्री शस्यते, इति ।

तान्वै तानेव पशून्सर्वानभिलक्ष्यैष रुद्र इदं सर्वं ममेवेत्यब्रवीत् । तत्रोपपत्तिं चोक्तवान् । वास्तुहं वास्तौ यज्ञभूमौ हीनं यद्द्रव्यमस्ति तत्सर्वं ममेति श्रुत्यन्तरेऽपि प्रसिद्धम् । तथाच तैत्तिरीया रुद्रवाक्यमामनन्ति—'यद्यज्ञवास्तौ हीयते मम वै तत्' इति । तं रुद्रं सर्वान्पशूनभिगच्छन्तमेतया वक्ष्यमाणयर्चा निरवादयन्त निरपेक्षमकुर्वन् । तया तुष्टो रुद्रः पशूपेक्षां परित्यजति स्म । का सार्गीति सोच्यते । यैषा रौद्री रुद्रदेवताका शस्यते साऽवगन्तव्या ।

तस्या ऋचः पादत्रयं पठति—

[1]आ ते पितर्मरुतां सुम्नमेतु या नः सूर्यस्य संदृशो युयोथाः । त्वं नो वीरो अर्वति क्षमेथाः, इति ।

मरुतो देवानां पितर्हे रुद्र ते तव सुम्नं सुखमेत्वागच्छतु । नोऽस्मान्सूर्यस्य संदृशः सूर्यावलोकनान्मा युयोथा मा वियोजय दृष्टियुक्तान्कुर्वित्यर्थः । किंच

[1] ऋ. २-३३-१ ।

हे रुद्र वीरस्त्वं नोऽस्माकमर्वति पश्वादिवस्तुनि क्षमेथा सहिष्णुर्भव । अस्मदीयान्पश्वादिवस्तूनि मा विवासयेत्यर्थः ।

तृतीयपादस्य त्वं नो वीर इत्यत्रत्यः पाठः । आभि नो वीर इति शाखान्तरपाठस्तयोर्मध्ये स्वपाठं विधाय शाखान्तरपाठं निषेधति-

इति ब्रूयान्नाभि न इत्यनभिमानुको
हैष देवः प्रजा भवति, इति ।

इत्यनेन पूर्वोक्तेन प्रकारेण त्वं नो वीर इति पाठमेव शंसनकाले ब्रूयान्नाभि न इति पाठं ब्रूयात् । त्वं नो वीर इति पाठे सत्येष देवः प्रजा अनभिमानुको भवति । अभिमानुकोऽभि न इति पाठान्तरेऽभिशब्दस्य विद्यमानत्वात्पुत्रादिकाः प्रजा अभिलक्ष्य ताः श्रयिष्यामीति रुद्रो मनुते । त्वं न इति पाठे तु न तथेत्यर्थः ।

चतुर्थपादेऽपि स्वाभिमतपाठविधिपूर्वकं पाठान्तरं विधत्ते-

प्रजायेमहि रुद्रिय प्रजाभिरिति ब्रूयान्न
रुद्रेत्येतस्यैव नाम्नः परिहृत्यै, इति ।

हे रुद्रिय रुद्रसंबन्धिभूत्य त्वदनुज्ञया वयं प्रजाभिः प्रजायेमहि पुत्रपौत्रादिरूपेणोत्पद्येमहि । अस्मिन्पादे रुद्रियेत्येतमेव पाठं ब्रूयान्न तु रुद्रेति पाठम् । एतस्यैव रुद्रनाम्न उग्रस्य परिहाराय रुद्रियेति पाठादरः ।

आ ते पितरित्यस्या ऋचः स्थाने कांचिदन्यामृचं विधत्ते-

तदु खलु शं नः करतीत्येव शंसेच्छ-
मिति प्रतिपद्यते सर्वस्मा एव शान्त्यै नृभ्यो
नारिभ्यो गव इति पुमांसो वै नरः
स्त्रियो नार्यः सर्वस्मा एव शान्त्यै, इति ।

तदु खलु तत्रैव पूर्वामृचं परित्यज्य तस्या एव स्थाने शं नः करत्यर्वत इत्येवामृचं शंसेत् । तथा सति को लाभ इति तदुच्यते । तस्या ऋच आदौ यच्छमित्येनेन पदेन प्रतिपद्यते प्रारम्भः क्रियते तस्य पदस्य शान्तिवाचकत्वात्सर्वस्मै सर्वस्यापि स्वकीयस्य वस्तुनः शान्तिर्भवति । सर्वस्मा इत्यस्य

शं नः करत्यर्वते०-१ ४३ ६ ।

व्याख्यानं नृम्य इत्यादि । तस्यापि व्याख्यानं पुमांस इत्यादि । सर्वस्मा एव शान्त्या इत्युपसंहारः ।

प्रकारान्तरेण वामदेव्यं प्रशंसति—

सोऽनिरुक्ता रौद्री शान्ता सर्वायुः सर्वायुत्वाय, इति ।

सो साऽप्यृगनिरुक्ता रुद्रवाचकपदाभावादस्पष्टदेवताका ऽपि एव रौद्री रुद्रदेवताका सत्यपि घोरार्थवाचकरुद्रपदाभावादियं शान्ता तां शंसेद्धोता सर्वायुर्भवति । तच्च यजमानस्य सर्वायुत्वाय संपद्यते ।

वेदनं प्रशंसति—

सर्वमायुरेति य एवं वेद, इति ।

पुनरपि प्रकारान्तरेण प्रशंसति—

सो गायत्री ब्रह्म वै गायत्री ब्रह्मणै-
वैनं तं नमस्यति ॥ ३४ ॥ इति ।

सो सा च ऋग्गायत्रीछन्दस्का । गायत्री च ब्रह्म ब्राह्मणजातिरेव । उभयोः प्रजापतिमुखजत्वात् । अतो ब्रह्मणैव ब्राह्मणैनैनं रुद्रं नमस्करोति ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे ऐतरेयब्राह्मण-भाष्ये त्रयोदशाध्याये दशमः खण्डः ॥१०॥ (३४) [१०५]

अथ वैश्वानराय पृथुराजसे विप इत्यनेन सूक्तेनाऽग्निमारुतशस्त्रस्य प्रारम्भं विधत्ते—

वैश्वानरीयेणाऽग्निमारुतं प्रतिपद्यते वैश्वा-
नरो वा एतद्रेतः सिक्तं प्राच्यावयत्तस्माद्वै-
श्वानरीयेणाऽग्निमारुतं प्रतिपद्यते, इति ।

रेतसः प्रच्यावनं काठिन्यापादनम् । तस्मिन्वैश्वानरीयसूक्ते क्वचिद्विशेषं विधत्ते—

अनवानं प्रथम ऋक्शंस्तव्याऽग्नीन्वा एषोऽ-
चीँष्यशान्तान्प्रसीदन्नेति य आग्निमारुतं
शंसति प्राणेनैव तदग्नीँस्तरति, इति ।

अवानशब्देनोच्छ्वासनिश्वासावुच्येते । तौ यथा न भवतस्तथा प्रथमा, ऋक्शंस्तव्या । तथा सति सर्वानग्नीन्वै ज्वालारूपानग्नीनेवैष होताऽशान्तान्कृत्वा प्रसीदन्प्रसादं कुर्वन्नेति गच्छति । यः पुमानाग्निमारुतशस्त्रं शंसति तस्य प्रसाद-हेतुत्वं कथमिति तदुच्यते । उच्छ्वासनिश्वासनिरोधादनवानं शंसन्प्राणवायुनैव तानग्नींस्तरत्युल्लङ्घयति, अग्निकृतमुद्रेकं शमयतीत्यर्थः ।

शंसनकाले प्रामादिकस्य वर्णादिलोपरूपस्यापराधस्य प्रतीकारं दर्शयति—

अधीयन्नुपहन्यादन्यं विवक्तारमिच्छे-
त्तमेव तत्सेतुं कृत्वा तरति, इति ।

अधीयन्नधीयानः शंसनं कुर्वन्होता यद्युपहन्यादुपघातं वर्णलोपं कुर्यात्तदा-नीमन्यं कंचित्पुरुषं विवक्तारं विविच्य वक्तुं समर्थमिच्छेत्समीपेऽवस्थापयेत् । तदानीं तमेव पुरुषमपराधतरणोपायं सेतुं कृत्वा तममराधमुल्लङ्घयति । अयं पक्षोऽनुकल्पः ।

मुख्यपक्षं दर्शयति—

तस्मादाग्निमारुते न व्युच्यमेष्टव्यो विवक्ता, इति ।

यस्मात्प्रमादं कृत्वा विवक्तृपुरुषसंपादनं न मुख्यं तस्मादाग्निमारुते शस्त्रे न व्युच्यं न पश्चाद्विवक्तव्यं किंतु प्रथममेव विवक्ता विविच्य वक्तुं समर्थो होता, एष्टव्यः प्रयत्नेन संपादनीयः ।

अथ प्रतक्षसः प्रतवस इत्येतन्मरुद्देवताकं सूक्तं विधत्ते—

मारुतं शंसति मरुतो ह वा एतद्रेतः सिक्तं
धून्वन्तः प्राच्यावयस्तस्मान्मारुतं शंसति, इति ।

मरुतां धूननेन प्रजापतिरेतःशोपणं पूर्वमेवोक्तम् ।

अथ प्रगाथद्वयं विधत्ते—

[1]यज्ञा यज्ञा वो अग्नये देवो वो द्रवि-
णोदा इति मध्ये योनिं चानुरूपं च
शंसति तद्यन्मध्ये योनिं चानुरूपं च
शंसति तस्मान्मध्ये योनिर्धृता, इति ।

---

१. ऋ. १-८९-१ ॥ २. ऋ. ६-४८-१ ॥

यज्ञायज्ञीय इत्येकः प्रगाथः । देवो व इति द्वितीयः । तत्र प्रथमे प्रगाथे ऋचः संपद्यते । सोऽयं स्तोत्रियस्तस्मिंस्तृचे सामगैः स्तूयमानत्वात् । अत एवासौ द्वयोर्मध्ये प्रथममाविर्भावाद्योनिरित्युच्यते । द्वितीयप्रगाथे समुत्पन्नस्तृचोऽनुरूपो यादृशः स्तोत्रियस्तादृशत्वमनुरूपत्वम् । तदेतदुभयं शस्त्रमध्ये शंसनीयं न तु शस्त्रान्तरेष्विव स्तोत्रियानुरूपयोरादौ शंसनीयम् । तथा सति यस्मादत्र सूक्तमध्ये योनेरनुरूपस्य च शंसनं तस्मात्लोकेऽपि नारीणां शरीरमध्ये योनिर्वृता ।

शस्त्रमध्ये तयोः स्थानविशेषं दर्शयति —

यदु द्वे सूक्ते शस्त्वा शंसति प्रतिष्ठयोरेव तदुपरिष्टात्प्रजननं दधाति प्रजात्यै, इति ।

यदु यस्मादेव कारणाद्वैश्वानरीयं मारुतं चेति द्वे सूक्ते शस्त्वा पश्चादेतौ स्तोत्रियानुरूपौ शंसति तस्मात्कारणाद्द्वित्वसंख्योपेतयोः प्रतिष्ठयोः स्थितिहेत्वोः पादयोरेवोपरिष्टादूर्ध्वदेशे प्रजननं प्रजोत्पादकमिन्द्रियं दधाति । तच्च प्रजात्यै प्रजोत्पादनाय संपद्यते ।

वेदनं प्रशंसति—

प्रजायते प्रजया पशुभिर्य एवं वेद ॥ ३५ ॥ इति ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऐतरेयब्राह्मणभाष्ये त्रयोदशाध्याय एकादशः खण्डः ॥ ११ ॥ (३५) [१०६]

अथ प्रेतव्यसीमित्येतज्जातवेदोदेवताकं सूक्तं विधत्ते –

जातवेदस्यं शंसति, इति ।

तदेतत्प्रशंसति—

प्रजापतिः प्रजा असृजत ताः सृष्टाः पराच्य एवाऽऽयन्न व्यावर्तन्त ता अग्निना पर्यगच्छता अग्निमुपावर्तन्त ममेवाद्याप्युपावृत्ताः सोऽब्रवीज्जातः वै प्रजा अनेनाविदामिति यदब्रवीज्जाता वै प्रजा अनेनाविदामिति तज्जातवे-

दस्यमभवत्तज्जातवेदसो जातवेदस्त्वम्, इति ।

पुरा प्रजापतिना सृष्टा प्रजाः प्रजापतिं पृष्ठतः कृत्वा पराङ्मुखत्वेनैवाऽऽगच्छन्न पुनरावृत्तास्तदानीं प्रजापतिस्ताः प्रजा अग्निना पर्यगच्छत्परितोऽग्निप्राकारं कृतवान् । अतस्ताः प्रजा दूरं गन्तुमशक्ता अग्निमुपेत्य पुनरावर्तन्त । यस्मादेवं तस्मादद्यापि शीतार्ताः प्रजास्तमेवाग्निमुपावृत्ताः परितो गच्छन्त्योऽप्यग्निं दृष्ट्वा समीपे कृत्वा सेवितुमावर्तन्ते । ततः संतुष्टः प्रजापतिरेनमब्रवीत् । जाता उत्पन्ना याः प्रजास्ताः सर्वा अहमनेनाग्निनाऽविदं लब्धवानस्मि ज्ञातवानस्मीति वा । यस्माज्जाता अविदमनेनेत्युक्तवांस्तस्मादग्निसंबन्धि जातवेदस्यं सूक्तमभवत् । जातवेदसोऽग्नि((ग्ने)रपि जातान्वेत्त्यनेनेति व्युत्पत्त्या तन्नाम संपन्नम् ।

आपो हि ष्ठा मयोभुव इत्यादिकं तृचं विधत्ते-

ता अग्निना परिगता निरुद्धाः शोचत्यो दीध्यत्योऽतिष्ठंस्ता अद्भिरभ्यषिञ्चत्तस्मादुपरिष्टाज्जातवेदस्याऽऽपोहिष्ठीयं शंसति, इति ।

अग्निना परिगताः परितो वेष्टिता निरुद्धा गन्तुमशक्ताः शोचत्यः शोकं व्याप्नुवत्यो दीध्यत्यो दीप्यमानाः प्रजास्तत्रैवातिष्ठन् । प्रजापतिस्ताः प्रजाः संतापपरिहारायाद्भिरभ्यषिञ्चत् । यस्मादेवं तस्माज्जातवेदस्याख्यस्योपरिष्टादापो हि ष्ठेत्यादिकं तृचं शंसेत् ।

तत्र कंचिद्विशेषं विधत्ते -

तस्मात्तच्छमयतेव शंस्तव्यं ता अद्भिरभिषिच्य निजा स्यैवामन्यत, इति ।

यस्मादापोहिष्ठीयं तापशमनकारणं तस्मात्तच्छमयतेव होत्रा शंसनीयम् । यथा वह्निं शमयन्पुरुषः शनैः शनैः क्रमेण जलं सिञ्चति, एवमनेनापि शनैः शंसनं कर्तव्यम् । ततः स प्रजापतिस्ताः प्रजा अद्भिरभिषिच्य निजा एव स्वकीया एव ताः प्रजा इत्यमन्यत । स्याशब्दस्तच्छब्दपर्याय एकवचनान्तोऽपि बहुवचनान्तत्वेन परिणमयितव्यः । तथा सति ताः प्रजा इत्युक्तं भवति । तस्माच्छनैः शंसनेन शस्त्रस्य स्वकीयत्वं संपद्यत इत्यर्थः । यद्वा ता अद्भिरित्याद्यर्धं वाद उत्तरशेषत्वेन योजनीयः ।

उत नोऽहिर्बुध्न्य इत्यस्या ऋचः शंसनं तदेववास्तुविद्वारेणोन्नयति–

तासु वा अहिना बुध्न्येन परोक्षात्तेजोऽदधादेष ह वा अहिर्बुध्न्यो यदग्निर्गार्हपत्योऽग्निनैवाऽऽसु तद्गार्हपत्येन परोक्षात्तेजो दधाति तस्मादाहुर्जुह्वदेवाजुह्वतोऽवसीयानिति ॥ ३६ ॥ इति ।

तास्वभिषेकादूर्ध्वं स्वकीयत्वेन स्वीकृतासु प्रजासु प्रजापतिरहिना बुध्न्येनाहिशब्दबुध्न्यशब्दद्वयनामकाग्निविशेषेण परोक्षात्परोक्षरूपेण तेजोऽदधात् । प्रजानां संतापभीरुत्वात् । ता यथा न पश्यन्ति तथा तास्वग्निविशेषसंबन्धि तेजः स्थापितवान् । यो गार्हपत्योऽग्निरस्ति, एष एवाहिशब्देन बुध्न्यशब्देनाभिहितः । अतस्तदीयाशंसने सति गार्हपत्येनैवाग्निना प्रजासु परोक्षत्वेन तेजः स्थापयति । यस्मादाग्नेयं तेजोऽपेक्षितं तस्मादजुह्वतो होमरहितात्पुरुषाज्जुह्वदेव होमं कुर्वन्नेव पुरुषोऽवसीयानत्यन्तं श्रेष्ठ इत्येवं जना आहुः ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऐतरेयब्राह्मणभाष्ये त्रयोदशाध्याये द्वादशः खण्डः ॥ १२ ॥ (३६) [१०७]

अथ देवानां पत्नीरुशतीरवन्तु न इत्यृग्द्वयं देवपत्नीदेवताकं विधत्ते–

देवानां पत्नीः शंसत्यनूचीरग्निं गृहपतिं तस्मादनूची पत्नी गार्हपत्यमास्ते, इति ।

देवानां पत्नीरित्यनेन देवतावाचकेन शब्देन तत्प्रतिपादकमृग्द्वयं विवक्षितम् । ततश्च देवानां पत्नीर्गृहपतिमग्निमनूचीः शंसेत् । गृहपतिरग्निरित्येवाभ्यां शब्दाभ्यां तत्प्रतिपादिकोत नोऽहिर्बुध्न्य इत्यृग्विवक्षिता । तदपेक्षया देवपत्नीनामकस्य मन्त्रजातस्य पश्चाद्भावित्वमन्वक्त्वम् । अतः पूर्वोक्ताया ऋचः पश्चाच्छंसेदित्यर्थः । यस्मादेवं तस्माद्यज्ञशालायां पत्नी गार्हपत्यमनूच्य पश्चाद्देवविष्ठत इत्यर्थः ।

अत्र कंचित्पूर्वपक्षमुत्थापयति–

तदाहू राकां पूर्वां शंसेज्जाम्यै वै पूर्वपेयमिति, इति ।

संपूर्णचन्द्रमण्डलयुक्ता पौर्णमासी राका । तदभिमानिदेवतायाः प्रतिपादि-

---

उत नोऽहिर्बुध्न्यः ०–६·५०·१४ । देवानां पत्नीः ०५·४६·६ ।

कर्णापि राकेत्युच्यते । तां राकां पूर्वां देवपत्नीभ्यः पूर्वभाविनीं शंसेत् । सेयं राका देवानां जामी नाम भगिनी तस्मात्तस्या एव पूर्वपेयं प्रथमतः सोमपानं युक्तमिति पूर्वपक्षः ।

तं निराकृत्य देवपत्नीनामेव पूर्वत्वं दर्शयति—

तत्तन्नाऽऽदृत्यं देवानामेव पत्नीः पूर्वाः शंसेदेष ह वा एतत्पत्नीषु रेतो दधाति यद्दक्षिणार्हपत्योऽग्निनैवाऽऽसु तद्गार्हपत्येन पत्नीषु प्रत्यक्षाद्रेतो दधाति प्रजात्यै, इति ।

राकायाः पूर्वत्वमनादरणीयं देवपत्नीनामेव पूर्वत्वं युक्तं गार्हपत्योऽग्निः पत्नीष्वेव रेतः स्थापयति न तु भागिन्यां तस्मात्पत्नीनां पूर्वशंसनेन प्रत्यक्षमेव पत्नीषु गार्हपत्यमुखेन रेतः स्थापयति । तच्च प्रजात्यै संपद्यते ।

वेदनं प्रशंसति -

प्रजायते प्रजया पशुभिर्य एवं वेद, इति ।

लौकिकोदाहरणेन पत्नीनां पूर्वभावित्वं भगिन्याः पश्चाद्भावित्वं चोपपादयति—

तस्मात्समानोदर्या स्वसाऽन्योदर्यायै जायाऽनुजीविनी जीवति, इति ।

पुरुषाणामेकोदरजाऽपि भगिनी परस्मै दीयते । भिन्नोदरजाऽपि जाया स्वार्थं स्वीक्रियते । तथा सति परस्मै दत्ता भगिनी यदा कदाचिद्भ्रातृजायामनुसृत्य तदत्तान्नपानाभ्यां जीवन्ती सती जीवति कंचित्कालमवतिष्ठति ।

राकामहमित्यृग्द्वयं विधत्ते—

राकां शंसति राका ह वा एतां पुरुषस्य सेवनीं सीव्यति यैषा शिश्नेऽधि, इति ।

देवतावाचिराकाशब्देन तदभिधायिन्यृगभिधीयते । तां शंसेत् । पुरुषस्य शिश्नेऽधि शिश्नस्योपरि स्थिता गुदवलयपर्यन्तं व्याप्ता यैषा सेवनी, एतच्छब्दो-

---

२ ऋ. २-३२-४ ॥

पस्थपदाभिधेया शिराऽस्ति तां शिरां राकारूपा देवता स्तीव्यति दृढबद्धां करोति । तस्मात्तदीयामृचं शंसेत् ।

वेदनं प्रशंसति—

पुमांसोऽस्य पुत्रा जायन्ते य एवं वेद, इति ।

पौवीरवी कन्येत्येतामृचं विधत्ते—

पावीरवीं शंसति वाग्वै सरस्वती पावी-
रवी वाच्येव तद्वाचं दधाति, इति ।

येयं वागभिमानिनी सरस्वती देवता सैव पावस्य शोधस्य हेतुत्वात्पावीरवी । तत्पाठेन वाच्येव देवतायां मन्त्ररूपायां वाचं स्थापयति ।

अत्र विचारमवतारयति—

तदाहुर्यामीं पूर्वां शंसेत्, पित्र्या३मिति, इति ।

इमं यम प्रस्तरमित्येषा यमदेवताकत्वाद्याम्योदरितामवर इत्येषा पितृदेवताकत्वात्पित्र्या । उभयोः पौर्वापर्यकारणस्यानिश्चयाद्विचारस्तदर्था प्लुतिः ।

तत्र निर्णयं दर्शयति—

यामीमेव पूर्वां शंसेदिमं यम प्रस्त-
रमा हि सीदेति राज्ञो वै पूर्वपेयं
तस्माद्यामीमेव पूर्वां शंसेत्, इति ।

यमो हि राजा । यमः पितॄणां राजेति श्रुत्यन्तरात् । राज्ञश्च प्रथमपानं युक्तम् ।

पूर्वोक्तयाम्या अन्यां यामीं विधत्ते—

मातली कव्यैर्यमो अङ्गिरोभिरिति काव्याना-
मनूचीं शंसत्यृषिणैव वै देवान्कव्याः परेणैव
पितॄंस्तस्मात्काव्यानामनूचीं शंसति, इति ।

काव्यैरिति श्रुत्यन्तरादियं काव्यानामृक्सा च पूर्वोक्तामृचमनु पश्चाद्-च्छतीत्यनूची तां तथैव शंसेत् । काव्या देवानां स्तोतारः केचिदृषयजाति-

---

१ ऋ. ६-४९-१। २ ऋ. १० १४-४ । उदीरतामवर । ३ ऋ. १०-१५ १ । ४ ऋ. १०-१४-३ ।

विशेषाः पितृभ्योऽप्युत्तमजातीयाः । तदेव देवानवरेण पितॄन्परेणेत्युच्यते । अत एव पूर्वमुक्ताया याम्या वक्ष्यमाणत्याः पित्र्यायाश्च मध्ये तच्छंसनं युक्तम् ।

अथ तिस्रः पितृदेवताका ऋचो विधत्ते-

[1]उदीरतामवर उत्परास इति पित्र्याः शंसति, इति ।

उदाहृतं पादं द्वितीयपादेन सह व्याख्यातुं द्वितीयपादं पठति-

उन्मध्यमाः पितरः सोम्यास इति, इति ।

पादद्वयं व्याचष्टे-

ये चैवावमा ये च परमा ये च मध्यमास्तान्सर्वाननन्तरायं प्रीणाति, इति ।

अवरे निकृष्टाः पितर उदीरतामुत्कर्षेण गच्छन्तु । परास उत्कृष्टाः पितर उदीरताम् । तथा मध्यमा निकृष्टोत्कृष्टमध्यवर्तिनः पितर उदीरतां ते त्रिविधाः पितरः सोम्यासः सोमयोग्या इत्येतस्य पादद्वयस्य पाठेन त्रिविधानपि पितृननन्तरायं कस्याप्यन्तरायो यथा न भवति तथा तर्पयति ।

विहितासु तिसृष्वृक्षु प्रथमाया उदाहृतत्वादनन्तरभाविनीं द्वितीयामृचं दर्शयति-

[2]आहं पितॄन्सुविदत्राँ अवित्सीति द्वितीयां शंसति, इति ।

तस्या ऋचस्तृतीयपादमनूद्य व्याचष्टे-

बर्हिषदो ये स्वधया सुतस्येत्येतद्ध वा एषां प्रियं धाम यद्बर्हिषद इति प्रियेणैवैनांस्तद्धाम्ना समर्धयति, इति ।

बर्हिषि दर्भे सीदन्त्युपविशन्तीति बर्हिषदः पितरः । अत्र बर्हिषद इति यदुच्यत एतद्ध वा एतदेव बर्हिरेषां पितॄणां प्रियं स्थानं तस्मादेतत्पाठेनैनान्पितॄन्प्रियेणैव धाम्ना स्थानेन समृद्धान्करोति ।

---

१ ऋ. १०-१५-१ । २ ऋ. १०-१५-३

वेदनं प्रशंसति—

प्रियेण धाम्ना समृध्यते य एवं वेद, इति ।

तृतीयामृचं दर्शयति—

इदं पितृभ्यो नमो अस्त्वद्येति नमस्कारवतीमन्ततः शंसति तस्मादन्ततः पितृभ्यो नमस्क्रियते, इति ।

अस्यामृचि नमो अस्त्विति श्रूयमाणत्वादियं नमस्कारवती वामेतां तिसृणां पित्र्याणामन्ते शंसेत् । यस्मादेवं तस्माच्छ्राद्धस्यान्ते नमो वः पितर इत्यादिना पितृभ्यो नमस्कारः क्रियते ।

एवासु पित्र्यासु कंचिद्विशेषं विचार्य निर्णयं दर्शयति—

तदाहुर्व्याहावं पित्र्याः शंसेत् । अव्याहावा३मिति । व्याहावमेव शंसेदसंस्थितं वै पितृयज्ञस्य साध्वसंस्थितं वा एष पितृयज्ञं संस्थापयति यो व्याहावं शंसति तस्माद्व्याहावमेव शंस्तव्यम् ॥ ३७ ॥ इति ।

शोंसावोमिति मन्त्र आहावः । अनेन मन्त्रेण प्रत्यृचं व्याहावं विशेषेणाऽऽहूयाऽऽहूय किं तिस्रः पित्र्याः शंसेत् । आहोस्विदव्याहावं पृथक्पृथगाहावमन्त्रं विना शंसेदिति विचारं ब्रह्मवादिन आहुः । अत्र पित्र्याः शंसतीत्येकेनैव विधिना विहितत्वात्पृथक्पृथगाहावो नास्तीति पक्षः प्रतिभाति । पुनरपि द्वितीयां शंसति नमस्कारवतीं शंसतीति पृथग्विधिदर्शनात्प्रत्येकमाहावः कर्तव्य इत्यपि प्रतिभाति । विचारार्थं प्लुतिद्वयम् । तत्र पृथक्पृथगाहाव एव सिद्धान्तः । तत्रेयमुपपत्तिः । पितृयज्ञस्य संबन्धि यदङ्गमसंस्थितमेव वर्ततेऽसमाप्तं तिष्ठति तदङ्गं साधु समाप्तं कर्तव्यम् । यो होता पृथगाहावं कृत्वा शंसति, एष होता पूर्वमसंस्थितमसमाप्तं पितृयज्ञं संस्थापयति । तस्मात्पृथक्पृथगाहावमन्त्रं पठित्वैव शंस्तव्यम् ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऐतरेयब्राह्मणभाष्ये त्रयोदशाध्याये त्रयोदशः खण्डः ॥१३॥ (३७) [१०८]

---

१ ऋ. १०-१५-२ ।

अथ चतस्र ऋचो विधत्ते-

**स्वादुष्किलायं मधुमाँ उतायमितीन्द्रस्यैन्द्री-
रनुपानीयाः शंसत्येताभिर्वा इन्द्रस्तृतीयसवन-
मन्वपिबत्तदनुपानीयानामनुपानीयात्वम्, इति ।**

स्वादुष्किलायमित्यादिका ऋच ऐन्द्र्य इन्द्रदेवताकत्वात्पपिवांसमिन्द्रमितीन्द्रस्तृतीयपादे श्रूयते । ताश्चेन्द्रस्यानुपानीया भोजनादूर्ध्वं यत्पानं तत्पश्चाद्भावित्वादनुपानं तत्स्थानीया एता ऋचः । ताः शंसेत् । कथमिवाऽऽसामनुपानीयात्वमिति तदुच्यते । अयमिन्द्रस्तृतीयसवनमनु पश्चादेताभिर्ऋग्भिः शस्यमानः सन्सोममपिबत्तस्मादनुपानीयेति नाव संपन्नम् ।

एतच्छंसमकाऽऽलेऽध्वर्योः प्रतिगरमन्त्रे विशेषं विधत्ते-

**माद्यन्तीव वै तर्हि देवता यदेता होता
शंसति तस्मादेतासु मद्धत्प्रतिगीर्यम्, इति ।**

तस्मिन्नुपानीयानामृचां शंसनकाले होतुः शंसनं श्रुत्वा देवताः सर्वा माद्यन्तीव वै सर्वथा हृष्यन्त्येव । तस्मात्कारणादेतास्वृक्षु शस्यमानास्वध्वर्युणा मद्धत्प्रतिगीर्थं मदिधातुयुक्तं प्रतिगरणं पठनीयम् । मदामो देवेत्ययं मदिधातुयुक्तः प्रतिगरणमन्त्रः ।

ऋगन्तरं विधत्ते-

**ययोरोजसा स्कभिता रजांसीति वैष्णुवारुणी-
मृचं शंसति विष्णुर्वै यज्ञस्य दुरिष्टं पाति
वरुणः स्विष्टं तयोरुभयोरेव शान्त्यै, इति ।**

विष्णुर्वरुणश्च मिलित्वा देवता यस्या ऋचः सा वैष्णुवारुणी तां जपेच्छंसेदित्यर्थः । तस्याश्चतुर्थपादे विष्णुरगन्वरुणेति श्रवणाद्वैष्णुवारुणीत्वम् । सा चाऽऽश्वलायनेन पठिता । दुरिष्टमङ्गविकलं यदनुष्ठितं तद्विष्णुः पाति वैकल्यं निवारयतीत्यर्थः । स्विष्टं साकल्येन यदङ्गमनुष्ठितं तद्वरुणः पाति तस्य फलप्रतिबन्धं निवारयतीत्यर्थः । तस्मादियमृक्तयोरुभयोर्विष्णुवरुणयोरेव शान्त्यै प्रीत्यै संपद्यते ।

विष्णोर्नु कं वीर्याणि प्रवोचामिति वैष्णवीं

---

१ क. ६-४७-१ । २ क.१-१५४-१।

शंसति यथा वै मत्यमेवं यज्ञस्य विष्णुस्त-
द्यथा दुष्कृष्टं दुर्मतीकृतं सुकृष्टं सुमतीकृतं
कुर्वन्नियादेवैतद्यज्ञस्य दुष्टुतं दुःशस्तं सुष्टुतं
सुशस्तं कुर्वन्नेति यदेतां होता शंसति, इति ।

विष्णोरिति श्रूयमाणत्वादियं वैष्णवी । मतौ बुद्धौ सम्यक्त्वेन प्रतिभातं कार्यं मत्यम् । अयं दृष्टान्तः । विष्णुर्दार्ष्टान्तिकः । यथा मत्यं कार्यं लोके फल-पर्यवसायि भवति तथा विष्णुरपि फलपर्यवसायीत्यर्थः । उक्तयोर्दृष्टान्तदार्ष्टान्तिकयोस्तात्पर्यं तद्यथेत्यादिना प्रपञ्च्यते । यथा लोके दुष्कृष्टं कर्षकैः सस्य-स्थाने दोषयुक्तं यथा भवति तथा कर्षणं कृतम् । यत्किंचिद्राजकार्यममात्यैर्दु-र्मतीकृतं दुष्टं मतमन्यथा चिन्तितं पूर्वं तत्कार्यमदुर्मतं सत्पश्चाद्बुद्धिपमादादु-र्मतं संपादितं. तत्र कश्चिद्बुद्धिमान्कर्षकः कृष्टस्थाने दुष्टस्य तृणादेरपनयनेन सुकृष्टं कुर्वन्नियात्कर्षकस्य पृष्ठतो गच्छेत् । राजकार्यमपि दुर्बुद्धिनाऽमात्येन दुर्मतीकृतं कश्चित्सुबुद्धिरमात्यः सुमती कुर्वन्गच्छेत् । यथैतदुभयं लोक एवमे-वास्मिन्कर्मणि यज्ञसंबन्धि यत्स्तोत्रमकुशलैरुद्गातृभिर्दोषसहितं कृतं यदपि होतृभिः शस्त्रं दोषसहितं पठितं तदुभयमपि विष्णुः ऋषेण सुष्टुतं सुशस्तं कुर्व-न्नेति गच्छति तत्तत्यदोषं परिहरतीत्यर्थः । यद्यदा वैष्णवीमेतां होता शंसति तदा तदुभयसमाधानमिति द्रष्टव्यम् ।

ऋगन्तरं विधत्ते—

तन्तुं तत्वन्रजसो भानुमन्विहीति
प्रजापत्यां शंसति प्रजा वै तन्तुः
प्रजामेवास्मा एतत्संतनोति, इति ।

अस्यामृचि काचिदपि देवता साक्षाद्वाचकशब्देन नोक्ता तस्मादियमनि-रुक्ता । तादृश्याश्च प्रजापतिर्देवता । तद्देवताकत्वं पूर्वमेव निरूपितं वामेतां प्राजापत्यां शंसेत् । हे प्रजापते तन्तुं तन्वन्पुत्रपौत्रादिसंततिं विस्तारयन्रजसो रजआत्मकस्य जगतो भानुं भासकमादित्यमन्विह्यनुरुध्य गच्छ । आदित्यो हि पुनः पुनः संचरन्नहोरात्रानिष्पत्तिं करोति तत्कालानुसारेणैव त्वमपि संतान-वृद्धिं कुर्वित्यर्थः । अस्मिन्पादे तन्तुशब्देन पुत्रपौत्रादिप्रजा विवक्षिता तन्तु-

वद्भिस्तार्यमाणत्वात्तस्मादेतत्पादपाठेनास्मै यजमानाय प्रजामेव संतनोति, अविच्छिन्नां करोति ।

द्वितीयपादमनूद्य व्याचष्टे-

ज्योतिष्मतः पथो रक्ष धिया कृता-
नीति देवयाना वै ज्योतिष्मन्तः
पन्थानस्तानेवास्मा एताद्धितनोति, इति ।

हे प्रजापते धिया कृतान्भागाद्यनुष्ठानबुद्ध्या संपादिताञ्ज्योतिष्मतः प्रकाशयुक्तान्पथः स्वर्गमार्गान्रक्ष विघ्नपरिहारेण पालय । अत्र ज्योतिष्मत्पथिशब्दाभ्यां देवगमनमार्गा विवक्षिताः । देवा येषु मार्गेषु यान्ति ते देवयानाः । सर्वेषां देवानां तेजस्वित्वात्तन्मार्गेषु न कदाऽप्यन्धकारोऽस्ति । तस्मादेतत्पादपाठेनास्मै यजमानाय तानेव मार्गान्होता विस्तारयति ।

उत्तरार्धमनूद्य व्याचष्टे-

अनुल्बणं वयत जोगुवामपो मनुर्भव जनया दैव्यं
जनमित्येवैनं तन्मनोः प्रजया संतनोति प्रजात्यै, इति ।

पुनः पुनः कर्मसु गच्छन्ति प्रवर्तन्त इत्यनुष्ठानशीला जोगुशब्देनोच्यन्ते । तादृशानां जोगुवामस्मत्संततावुत्पन्नानां पुत्रादीनामपोऽनुष्ठीयमानमेतत्कर्मानुल्बणमनतिरिक्तं वयत हे प्रजापते वय निर्वह । बहुवचनं पूजार्थम् । मनुर्भव त्वमपि मनुष्योत्पादनार्थमनुरूपो भव । ततो दैव्यं देवताराधनयोग्यं जनं पुत्रादिरूपं मनुष्यं जनयोत्पादय । तत्तेनार्धपाठेनैनं यजमानं मनोः संबन्धिन्या प्रजया मनुष्यरूपया संतनोति संयोजयति । तच्च प्रजात्यै यजमानस्य प्रजोत्पादनाय संपद्यते ।

वेदनं प्रशंसति-

प्रजायते प्रजया पशुभिर्य एवं वेद, इति ।

ऋगन्तरेण शस्त्रसमाप्तिं विधत्ते-

एवा न इन्द्रो मघवा विरप्शीत्युत्तमया परि-
दधातीयं वा इन्द्रो मघवा विरप्शी, इति ।

---

१ ऋ. ४-१-२० ।

योऽयमिन्द्रोऽस्ति सोऽयं न एवास्मदर्थमेव करत्करोत्विति द्वितीयपादे वक्ष्यमाणेन संबन्धः । कीदृश इन्द्रः । मघवा धनवान् । तथा विरप्शी । रप राभस्य इत्यस्माद्धातोरुत्पन्नोऽयं शब्दः । विशेषेण राभस्यवान्सर्वदोद्युक्त इत्यर्थः । अनयर्चोत्तमया शस्त्रापेक्षयाऽन्तिमया परिधानं कुर्यात् । उदाहृते प्रथमपाद इन्द्रादिशब्दैः सर्वैरपीयं वै भूमिरेवोपलक्ष्यते । अनया भूमिस्पर्शस्य विधास्यमानत्वात् ।

द्वितीयपादमनूद्य व्याचष्टे–

करत्सत्या चर्षणीधृदनर्वेतीयं सत्याचर्षणीधृदनर्वा, इति ।

चर्षणीशब्दो मनुष्यवाची । तान्धारयति पोषयति चर्षणीधृदिन्द्रः । सोऽयमनर्वा हयं परित्यज्य यागभूमावुपविष्टत्वादश्वरहितस्त्वादृशः सन्सत्या फलप्रदानस्याऽऽवश्यकत्वेन सत्यानि कर्माणि करत्करोतु विघ्नपरिहारेण संपादयतु । अस्मिन्नपि पादे सत्यादिपदैः पूर्ववदियं भूमिरेवोपलक्षणीया ।

तृतीयपादमनूद्य व्याचष्टे–

त्वं राजा जनुषां धेह्यस्मे इतीयं वै राजा जनुषाम्, इति ।

जनुषां जातानामस्मे अस्माकमृत्विजां ह इन्द्र त्वं राजा भूत्वा धेहि वक्ष्यमाणमभीष्टं संपादय । अस्मिन्नपि पादे राजा जनुषामिति पदद्वयेन पूर्ववदियं भूमिरेवोपलक्षणीया ।

चतुर्थपादमनूद्य व्याचष्टे–

अधि श्रवो माहिनं यज्जरित्र इतीयं
वै माहिनं यज्ञश्रवो यजमानो जरिता
यजमानायैवैतामाशिषमाशास्ते, इति ।

जरित्रे स्तोत्रे यजमानाय यत्प्रसिद्धं माहिनं महत्त्वं श्रवः कीर्तिं चाधिधेहीति पूर्वेणान्वयः । ह इन्द्राऽऽधिक्येन संपादयेत्यर्थः । अस्मिन्नपि पादे माहिनमित्यनेनेयं भूमिरेवोपलक्षणीया । यच्छब्दो नपुंसकलिङ्गे य इति पुंलिङ्गत्वेन विपरिणमयितव्यः । तेन यो यज्ञ इति प्रसिद्धं यज्ञमाचष्टे । सोऽपीयं भूमिरेव । कीर्तिवाचिना श्रवःशब्देनापि भूमिरेवोपलक्षणीया । यजमानो

ऋत्विक्शब्देनाभिधेयः । एतत्पादचतुष्टयपाठेन होता यजमानार्थमेवाऽऽशासनीयं सर्वं प्रार्थयते ।

परिधानकाले होतुर्भूमिस्पर्शनं विधत्ते -

तदुपस्पृशन्भूमिं परिदध्यात्तद्यस्यामेव यज्ञं संभरति तस्यामेवैनं तदन्ततः प्रतिष्ठापयति, इति ।

तत्तदा शस्त्रसमाप्तिकाले भूमिं स्पृशन्नेव समापयेत् । तत्तेन स्पर्शेन यस्यामेव भूमौ यज्ञमनुष्ठातुं साधनं संभरति संपादयति तस्यामेव भूमावेनं यज्ञं तदन्तं तस्तत्समाप्तिपर्यन्तं प्रतिष्ठापयति ।

अथ शस्त्रयाज्यां विधत्ते—

[1]अग्ने मरुद्भिः शुभयद्भिर्ऋक्वभिरित्याग्निमारुतमुक्थं शस्त्वाऽऽग्निमारुत्या यजति यथाभागं तद्देवताः प्रीणाति प्रीणाति ॥ ३८ ॥ इति ।

आग्निमारुतश्च यस्योक्थस्य शस्त्रस्य देवता तदाग्निमारुतमुक्थं पूर्वोक्तप्रकारेण शस्त्वा तत ऊर्ध्वमग्न मरुद्भिरित्येतया मारुत्या यजेत् । आग्निमारुतयाज्यां पठेदित्यर्थः । तथा सति तस्मिञ्शस्त्रे प्रतिपादिता यावत्यो देवताः सन्ति वाः सर्वास्तत्तद्भागमनतिक्रम्य तर्पयति । अभ्यासोऽध्यायसमाप्त्यर्थः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे ऐतरेय ब्राह्मणभाष्ये त्रयोदशाध्याये चतुर्दशः खण्डः ॥१४॥ (३८) [१०९]

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकवीरबुक्कणसाम्रा ज्यधुरंधरसायणाचार्यकृतावैतरेयब्राह्मणभाष्ये त्रयोदशोऽध्यायः ॥ १३ ॥

अथ चतुर्दशोऽध्यायः ।

त्रयोदशे सोमकथा प्रकीर्तिता
राजक्रयार्था सवनान्विताऽपि च ।
स्याद्वैश्वदेवं च मरुत्वतीयं
तत्तद्विशेषा उदिताः क्रमेण ॥

---

[1] ऋ. ५-६१-८ ।

अथ चतुर्दशाध्याये पूर्वोक्तोऽग्निष्टोमः सर्वयज्ञकतूनां प्रकृतित्वेन स्तूयते । तदर्थमुपाख्यानमाह—

देवा वा असुरैर्युद्धमुपप्रायन्विजयाय तानग्निर्नान्वकामयतैतुं तं देवा ऽब्रुवन्नेह्यस्माकं वै त्वमेकोऽसीति स नास्तुतोऽन्वेष्यामीत्यब्रवीत्स्तुत नु मेति तथेति तं ते समुत्क्रम्योपनिवृत्त्यास्तुवंस्तांस्तुतोऽनु प्रैत्, इति ।

यदा देवा विजयार्थमसुरैः सह युद्धमुपक्रान्तवन्तस्तदानीमग्निस्तान्देवाननु पश्चादैतुमागन्तुं नाकामयत । अग्निमिच्छारहितं देवा एवमब्रुवन् । हेऽग्ने त्वमप्येह्यागच्छास्माकमेव मध्ये त्वमेकोऽसि न त्वत्तोऽन्य इति । ततः सोऽग्निरेवमब्रवीद्युष्माभिरस्तुतः सन्नहं नान्वेष्यामि युष्माकं पृष्ठतो न गमिष्यामि तस्मान्नु क्षिप्रमेव मा स्तुत स्तोत्रं कुरुतेति । देवास्तथेत्यङ्गीकृत्य समुत्क्रम्योत्थायोपनिवृत्त्याग्नेरभिमुखत्वेन निवृत्तिं कृत्वा तमग्निमस्तुवन् । सोऽप्यग्निः स्तुतः संस्तान्देवाननुसृत्य प्रैद्युद्धार्थं प्रकर्षेणागच्छत् ।

अग्नेर्युद्धप्रकारं दर्शयति—

स त्रिश्रेणिर्भूत्वा त्र्यनीकोऽसुरान्युद्धमुपप्रायद्विजयाय त्रिश्रेणिरिति च्छन्दांस्येव श्रेणीरकुरुत त्र्यनीक इति सवनान्येवानीकाति तानसंभाव्यं पराभावयत्ततो वै देवा अभवन्पराऽसुराः, इति ।

सोऽग्निर्विजयाय त्रिश्रेणिः सोमपानपङ्क्तित्रययुक्तस्त्र्यनीकस्त्रिभिरनीकैः सेनापतिरूपैः सेनामुख्यैर्युक्तोऽसुरान्प्रति युद्धमुपप्रायत्तत्समीपं प्रकर्षेण गतवान् । त्रिश्रेणिरिति यदुक्तं तत्र गायत्रीत्रिष्टुब्जगतीरूपाणि च्छन्दांस्येव तिस्रः श्रेणीरकुरुत । त्र्यनीक इति यदुक्तं तत्र प्रातःसवनमाध्यंदिन (सवन) तृतीयसवनान्येव त्रीण्यनीकानि सेनामुखान्यकुरुत । ततस्तानसुरान्पुनः शत्रुशेषो यथा न संभव्यते तथा पराभावयत्पराभूतानकरोत् ततो युद्धादेवा विजयिनोऽभवन्नसुराः पराभूवाः ।

वेदनं प्रशंसति-

भवत्यात्मना पराऽस्य द्विषन्पाप्मा भ्रातृव्यो भवति य एवं वेद, इति ।

एवमग्निश्छन्दस्त्रयसवनत्रययुक्तोऽग्निष्टोमरूपोऽभवदित्येकेन प्रकारेणाग्निष्टोमं स्तुत्वा पुनरपि प्रकारान्तरेण स्तौति-

सा वा एषा गायत्र्येव यदग्निष्टोमश्चतुर्विंशत्यक्षरा वै गायत्री चतुर्विंशतिरग्निष्टोमस्य स्तुतशस्त्राणि, इति ।

योऽयं पूर्वोक्तोऽग्निष्टोमोऽस्ति सा वा एषा गायत्र्येव । अग्निष्टोमगायत्र्योः संख्यासाम्यात् । गायत्रीगतेष्वक्षरेषु या संख्या सैवाग्निष्टोममतेषु स्तोत्रशस्त्रेषु । तथा हि-बहिष्पवमानो माध्यंदिनपवमान आर्भवपवमान इति त्रीणि पवमानस्तोत्राणि चत्वार्याज्यस्तोत्राणि चत्वारि पृष्ठस्तोत्राण्येकं यज्ञायज्ञीयं स्तोत्रमेवमेतानि द्वादश संपन्नानि । शस्त्राण्यपि तावन्त्येव । आज्यप्रउगे निष्केवल्यमरुत्वतीये वैश्वदेवाग्निमारुते इति होतुः शस्त्राणि षट् । तथा होत्रकाणामपि षट् । एवं स्तोत्रशस्त्रसंख्ययाऽग्निष्टोमस्य गायत्रीरूपत्वम् ।

प्रकारान्तरेण गायत्रीसाम्यं संपाद्य प्रशंसति-

तद्वै यदिदमाहुः सुधायां ह वै वाजी सुहितो दधातीति गायत्री वै तन्न ह वै गायत्री क्षमा रमत ऊर्ध्वा ह वा एषा यजमानमादाय स्वरेतीत्यग्निष्टोमो वै तन्न ह वा अग्निष्टोमः क्षमा रमत ऊर्ध्वो ह वा एष यजमानमादाय स्वरेति, इति

तद्वै तत्रैव यज्ञसभायां वेदवादिनो यदिदं वचनमाहुः । किं वचनमिति तदुच्यते । सुष्ठु धीयन्ते सुहुतिनोऽस्यां दिवि सा द्यौः सुधा । तस्यामेव वाजी वाजोऽन्नं सोमरूपं यस्मिन्नस्तीत्यग्निष्टोम उच्यते । स च सुहितः साद्गुण्येनानुष्ठितो दधाति सुधाशब्दवाच्यायां दिवि यजमानं स्थापयति यद्वेदवादिनां वचनं तद्गायत्री वै । गायत्रीसाम्यमभिप्रेत्यैवोक्तमित्यर्थः । न ह वा इत्यादिना तदेव स्पष्टी क्रियते । क्षमेति सप्तम्यर्थो विवक्षितः । क्षमायां भूमौ गायत्र्याख्या देवता न ह वै रमते नैव क्रीडति किंत्वेषा गायत्री, ऊर्ध्वा ह वा ऊर्ध्वगामिन्येव भूत्वाऽनुष्ठितवन्तं यजमानमादाय स्वरेति स्वर्गं प्रापयति

एवंप्रकारेण येयं गायत्री वर्णिता यद्गायत्रीरूपोऽग्निष्टोम एष । तयोः समत्वात् । अग्निष्टोमोऽपि क्षमायां न रमते किंत्वनुष्ठित ऊर्ध्वगामी सन्नेष यजमानमादाय स्वर्गमामोति ।

इत्थं गायत्रीसाम्येन स्तुत्वा संवत्सरसामेन स्तौति–

स वा एष संवत्सर एव यदग्निष्टोमश्चतुर्विंशत्यर्धमासो वै संवत्सरश्चतुर्विंशतिरग्निष्टोमस्य स्तुतशस्त्राणि, इति ।

योऽयमग्निष्टोमः स एव संवत्सर एव । अर्धमाससंख्यायाः स्तोत्रशस्त्रसंख्यायाश्च समानत्वात् ।

समुद्रसाम्येन प्रशंसति–

तं यथा समुद्रं श्रोत्या एवं सर्वे यज्ञक्रतवोऽपियन्ति॥३९॥ इति ।

स्रोत्याः प्रवाहरूपा नद्यो लोके यथा समुद्रं प्राप्नुवन्ति तथैवोक्थ्यषोडश्यतिरात्राहीनसत्ररूपाः सर्वे क्रतवो विकृतिरूपाः प्रकृतिरूपं तमग्निष्टोममपियन्ति प्राप्नुवन्ति । अग्निष्टोमात्प्राचीना इष्टिपशुबन्धादयोऽपि तमग्निष्टोमं प्राप्नुवन्ति । तथा सति सर्वशब्दो मुख्यार्थः संपद्यते न तु संकोचः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऐतरेयब्राह्मणभाष्ये चतुर्दशाध्याये प्रथम खण्डः ॥ १ ॥ (३९) [११०]

अग्निष्टोमादपि प्राचीनानां यज्ञानामग्निष्टोमप्राप्तिं दर्शयति–

दीक्षणीयेष्टिस्तायते तामेवानु याः काश्चेष्टयस्ताः सर्वा अग्निष्टोममपियन्ति, इति ।

अग्निष्टोमस्य प्रारम्भे येयं दीक्षणीयेष्टिस्तायते विस्तार्यते तामनु तत्सादृश्येन वेदोक्ताः सर्वा अपीष्टयोऽग्निष्टोमं प्राप्नुवन्ति । अत्र विकृतिरूपा एवेष्टयो विवक्षिताः प्रकृतिरूपयोर्दर्शपूर्णमासयोर्वक्ष्यमाणत्वात् ।

दीक्षणीयेष्टिगतचोदकप्राप्तेडोपाह्वानसादृश्येन पाकयज्ञानामग्निष्टोमप्राप्तिं दर्शयति–

इळामुपह्वयत इळाविधा वै पाकयज्ञा इळामेवानु ये के च पाकयज्ञास्ते सर्वेऽग्निष्टोममपियन्ति, इति ।

पाकयज्ञाश्च सप्तसंख्याकाः । हुतः प्रहुत आहुतः शूलगवो बलिहरणं प्रत्यवरोहणमष्टकाहोम इति । सोऽयं सूत्रान्तरकारस्य पक्षः । आश्वलायनस्तु हुतादीक्षीनेव पाकयज्ञानाह । ते च पाकयज्ञा इळाविधा इडासदृशाः। इळा खलु वैषा पाकयज्ञ इति श्रुत्यन्तरात् । ततो दीक्षणीयेष्टाविडोपाह्वानेन तत्सदृशाः पाकयज्ञाः सर्वेऽप्यग्निष्टोमं प्राप्नुवन्ति ।

अग्निहोत्रस्य तत्प्राप्तिं दर्शयति-

सायंप्रातरग्निहोत्रं जुह्वति सायंप्रातर्व्रतं प्रयच्छन्ति स्वाहाकारेणाग्निहोत्रं जुह्वति स्वाहाकारेण व्रतं प्रयच्छन्ति स्वाहाकारमेवान्वग्निहोत्रमग्निष्टोममप्येति, इति ।

यथा प्रतिदिनं कालद्वयेऽग्निहोत्रहोमस्तथा दीक्षितस्य कालद्वये क्षीरपानरूपं व्रतप्रदानम् । अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहेति यथा स्वाहाकारेणाग्निहोत्रहोमस्तथा ते नः पान्तु ते नोऽवन्तु तेभ्यो नमस्तेभ्यः स्वाहेति स्वाहाकारेण दीक्षितो व्रतदानमाचरति । अतो व्रतगतस्वाहाकारमेवानुसृत्याग्निहोत्रस्याग्निष्टोमप्राप्तिः ।

अग्निष्टोमगतप्रायणीयेष्टिसादृश्येन दर्शपूर्णमासयोरग्निष्टोमप्राप्तिं दर्शयति-

पञ्चदश प्रायणीये सामिधेनीरन्वाह पञ्चदश दर्शपूर्णमासयोः प्रायणीयमेवानु दर्शपूर्णमासावग्निष्टोममपीतः, इति ।

प्रायणीयकर्मणि धाय्यारहितत्वात्सामिधेन्यश्चोदकप्राप्ताः पञ्चदशैव । तथा प्रकृतिभूतयोर्दर्शपूर्णमासयोरपि ।

अग्निष्टोमगतसोमद्वारा लौकिकानामपि सर्वेषामौषधानामग्निष्टोमप्राप्तिं दर्शयति-

सोमं राजानं क्रीणन्त्यौषधो वै सोमो राजौषधिभिस्तं भिषज्यन्ति यं भिषज्यन्ति सोममेव राजानं क्रीयमाणमनु यानि कानि च भेषजानि तानि सर्वाण्यग्निष्टोममपियन्ति, इति ।

लोके यं व्याधिग्रस्तं चिकित्सका भिषज्यन्ति चिकित्सन्ते तं पुरुषमोषधिभिरमृतवल्ल्यादिभिश्चिकित्सन्ते । सोमस्याप्यौषधत्वात्तमनु सर्वाण्यप्यौषधान्यग्निष्टोमं प्राप्नुवन्ति ।

अग्निष्टोमगवातिथ्यकर्मद्वारा चातुर्मास्ययागानां तत्प्राप्तिं दर्शयति –

अग्निमातिथ्ये मन्थन्त्यग्निं चातुर्मास्येष्वातिथ्यमेवानु चातुर्मास्यान्यग्निष्टोममापियन्ति, इति ।

प्रवर्ग्यसाम्येन दाक्षायणयज्ञस्याग्निष्टोमप्राप्तिं दर्शयति–

पयसा प्रवर्ग्ये चरन्ति पयसा दाक्षायणयज्ञे प्रवर्ग्यमेवानु दाक्षायणयज्ञोऽग्निष्टोममप्येति, इति ।

दर्शपूर्णमासयोरेव गुणविकृतिरूपः कश्चिद्दाक्षायणाख्यो यज्ञः । तथा च शाखान्तरे दर्शपूर्णमाससंनिधौ श्रूयते—' दाक्षायणयज्ञेन स्वर्गकामो यजेत ' इति । तस्य च प्रवर्ग्यस्य च क्षीरद्रव्येण साम्यम् ।

पशुबन्धानामग्निष्टोमप्राप्तिं दर्शयति–

पशुरुपवसथे भवति तमेवानु ये के च पशुबन्धास्ते सर्वेऽग्निष्टोममपियन्ति, इति ।

सुत्यादिवसात्पूर्वो दिवस उपवसथाख्यस्तस्मिन्नग्नीषोमीयः पशुरनुष्ठीयते तद्विकृतिरूपा वेदोक्ताः सर्वे पशुबन्धाः ।

यज्ञान्तरस्याग्निष्टोमप्राप्तिं दर्शयति–

इळादधो नाम यज्ञक्रतुस्तं दध्ना चरन्ति दध्ना दधिघर्मे दधिघर्ममेवान्विळादधोऽग्निष्टोममप्येति ॥ ४० ॥ इति ।

दर्शपूर्णमासविकृतिरूप एव कश्चिदिळादधनामको यज्ञोऽस्ति, अत एवाऽऽपस्तम्बो दर्शपूर्णमाससंनिधावेवमाह–एतेनेळादयः सार्वसंनियज्ञो वसिष्ठयज्ञः शौनकयज्ञश्च व्याख्याता इति । दधिघर्मनामकस्त्वग्निष्टोमगतस्तयोरुभयोर्दधिद्रव्येण साम्यम् ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे ऐतरेयब्राह्मणभाष्ये त्रयोदशाध्याये दशमः खण्डः ॥ २ ॥ (४०) [११९]

क्रत्वन्तराणामाग्निष्टोमप्राप्तिं दर्शयति-

इति नु पुरस्तादथोपरिष्टात्पञ्चदशोक्थ्यस्य स्तोत्राणि पञ्चदश शस्त्राणि स मासो मासधा संवत्सरो विहित संवत्सरोऽग्निर्वैश्वानरोऽग्निष्टोमः संवत्सरमेवानूक्थ्योऽग्निष्टोममप्येत्युक्थ्यमपि यन्तमनु वाजपेयोऽप्येत्यत्युक्थ्यो हि स भवति, इति ।

इति नु पूर्वखण्डोक्तप्रकाररेणैव पुरस्तादग्निष्टोमात्प्राचीनस्य कर्मजातस्याग्निष्टोमप्रवेश उक्त इति शेषः । अथानन्तरमुपरिष्टादितरेषां क्रतूनां तत्प्रवेश उच्यते तत्र योऽयमुक्थ्यः क्रतुस्तस्य पञ्चदशसंख्याकानि स्तोत्राण्यग्निष्टोमविकृतित्वात् । तदीयानि द्वादश स्तोत्राण्यतिदिश्यन्ते । तत ऊर्ध्वं त्रीण्युक्थसंज्ञकानि स्तोत्राणि । एवं पञ्चदश संपद्यन्ते । शस्त्रेष्वप्ययं न्यायो योज्यः । तानि शस्त्राणि स्तोत्राणि च मिलित्वा मासगतां रात्रिसंख्यां प्राप्नुवन्त्यतः सोऽयं स्तोत्रशस्त्रसमूहो मासः संपद्यते । मासधा मासप्रकारेण मासावृत्त्या संवत्सरो विहितः संपादितो भवति । स च संवत्सरो वैश्वानराग्निरूपः । गर्भप्रविष्टस्य पुरुषस्य संवत्सरमात्रेण वैश्वानराख्यस्योदर्याग्नेः पाटवसंभवात् । अग्निश्चाग्निष्टोमस्वरूपः पूर्वोक्तया रीत्या श्रेणित्रयरूपेणानीकत्रयरूपेण चाग्नेरेवाग्निष्टोमरूपेणाऽऽविर्भूतत्वात् । एवं सति स उक्थ्याख्यक्रतुः स्तोत्रशस्त्रादिपरम्परया संवत्सरमेवानुप्रविश्य तद्द्वाराऽग्निष्टोमं प्रविशति । तं विशन्तमुक्थ्यमनु वाजपेयाख्योऽपि क्रतुरग्निष्टोममप्येति प्राप्नोति । स हि वाजपेयोऽत्युक्थ्यो भवति । उक्थ्याख्यं क्रतुमतिक्रम्य वर्तमानत्वात् । उक्थ्ये यानि पञ्चदश स्तोत्राणि तत ऊर्ध्वं वाजपेये स्तोत्रद्वयं सोऽयमुक्थ्यातिक्रमस्तस्यादुक्थ्यद्वारा वाजपेयस्य तत्प्राप्तिः ।

अथातिरात्राप्तोर्यामयोः क्रत्वोरग्निष्टोमप्रवेशं दर्शयति-

द्वादश रात्रेः पर्यायाः सर्वे [illegible] द्वौ द्वौ संपद्य त्रिंशदेकविंशं षोळशिसाम त्रिवृत्संधिः सा त्रिंशत्स मासास्त्रिंशन्मासस्य रात्रयो मासधा संवत्सरो विहितः संवत्सरोऽग्निर्वैश्वानरोऽग्निर-

ग्निष्टोमः संवत्सरमेवान्वतिरात्रोऽग्निष्टो-
ममप्येत्यतिरात्रमपि यन्तमन्वसोर्यामेऽ-
प्येत्यत्यातेरह्ने हि स भवति, इति ।

अतिरात्रयागे द्वादशसंख्याका रात्रेः पर्यायाः । ते चाऽऽपस्तम्बेनैव स्पष्टीकृताः । अतिरात्रमेव षोडशिनमग्नी मुनयस्तत्र त्रयोदशभ्यश्चमसगणेभ्यो राजानमग्नियेरेचयति । षोडशिना प्रचर्य रात्रिपर्यायैः प्रचरति । होतृचमसमुख्यः प्रथमो गणो मैत्रावरुणचमसमुख्यो द्वितीयो ब्राह्मणाच्छंसिचमसमुख्यस्तृतीयोऽच्छावाकचमसमुख्यश्चतुर्थः । प्रथमाभ्यां गणाभ्यामध्वर्युश्चरत्युत्तराभ्यां प्रतिप्रस्थातैष प्रथमः पर्याय एवं विहितो द्वितीयस्तृतीयश्चेति । अस्यायमर्थः । अतिरात्राख्यं क्रतुं यदाऽनुतिष्ठति तदानीं चोदकप्राप्तं सर्वमनुष्ठायानन्तरं सायंकाले षोडशिग्रहसंबन्धिनश्चमसान्पूरयित्वा तत ऊर्ध्वं त्रयोदशचमसगणपर्याप्तं सोममवस्थाप्य षोडशिग्रहप्रचारं कृत्वा तत ऊर्ध्वं रात्रिपर्यायैः प्रचरेत् । तेषु पर्यायेषु च होतृचमसमादिं कृत्वा यश्चमसगणः प्रवर्तते सोऽयं प्रथमः । मैत्रावरुणचमसस्याऽऽदित्वे द्वितीयश्चमसगणो भवति । ब्राह्मणाच्छंसिचमसस्याऽऽदित्वे तृतीयश्चमसगणो भवति । अच्छावाकचमसस्याऽऽदित्वे चतुर्थश्चमसगणो भवति । तेषु चतुर्षु गणेषु प्रथमद्वितीयाभ्यां गणाभ्यामध्वर्युरनुतिष्ठेत् । तृतीयचतुर्भ्यां तु प्रतिप्रस्थाताऽनुतिष्ठेत् । एवं गणचतुष्टयानुष्ठानमेकः पर्यायो भवति । पुनरपि द्वितीयतृतीयपर्यायौ तथैवानुष्ठेयौ । तेषु पर्यायेषु द्वादश गणाः संपद्यन्ते । एतत्सर्वमभिप्रेत्य द्वादश रात्रेः पर्याया इत्युक्तम् । ते सर्वेऽपि पञ्चदशास्तदीयस्तोत्रेषु ऋचगतानामृचामावृत्तिविशेषेण पञ्चदशस्तोमस्य सामगैः संपादितत्वात्पञ्चदशस्तोमयुक्ताः । द्वादशपर्याया ये सन्ति तेषु द्वौ द्वौ पर्यायौ संपद्य मिलित्वा पञ्चदशसंख्याया द्विरावृत्त्या त्रिंशत्संख्यायां ते सर्वे पर्यवस्यन्ति । किंच षोडशस्तोत्रे यत्सामास्ति तदेकविंशं भवति । तदीयऋचगतानामृचामावृत्त्या सामगैरेकविंशतिस्तोमसंपादनात् । योऽयमतिरात्रस्तस्यान्ते संधिरेतन्नामकं स्तोत्रं तत्र त्रिवृत्स्तोमः सामगैः पठ्यते । तस्य च स्तोमस्य त्रिषु ऋचेष्वावृत्तिरहितेषु निष्पन्नत्वादृचां नवसंख्या संपद्यते । एकविंशतिसंख्या नवसंख्या च मिलित्वा त्रिंशत्संख्या भवति । अनया त्रिंशत्संख्यया वा पूर्वोक्तत्रिंशत्संख्यया वा मासरात्रिसाम्यान्मासः संपद्यते ।

मासधेत्यादि पूर्ववद्योजनीयम् । एवं सति वत्सरद्वाराऽतिरात्रोऽग्निष्टोमं प्रविशति । प्रविशन्तमतिरात्रमनु तद्द्वारेणाप्तोर्यामोऽपि प्रविशति । स ह्यतिरात्रमतिलङ्घ्य स्तोत्राधिक्येन वर्तमानत्वादत्यतिरात्रः । एकोनविंशत्स्तोत्राण्यतिरात्रेऽप्तोर्यामे तु त्रयस्त्रिंशदित्याधिक्यमतोऽतिरात्रद्वाराऽप्तोर्यामस्याग्निष्टोमे प्रवेशः ।

उक्तं सर्वयज्ञक्रतुत्वान्तर्भावमुपसंहरति—

एतद्वै ये च पुरस्ताद्ये चोपरिष्टाद्यज्ञक्रतवस्ते सर्वेऽग्निष्टोममापियन्ति, इति ।

एतद्वा एतेनैवोक्तप्रकारेणाग्निष्टोमस्य पूर्वभाविन इष्ट्यग्निहोत्रादयो ये यज्ञक्रतवो ये चोत्तरभाविन उक्थ्यवाजपेयादयो यज्ञक्रतवस्ते सर्वेऽग्निष्टोमं प्राप्नुवन्ति ।

अथ प्रकारान्तरेणाग्निष्टोमं प्रशंसति—

तस्य संस्तुतस्य नवतिशतं स्तोत्रियाः सा या नवतिस्ते दश त्रिवृतोऽथ या नवतिस्ते दशाथ या दश तासामेका स्तोत्रियोदेति त्रिवृत्परिशिष्यते सोऽसावेकविंशोऽध्याहितस्तपति विषुवान्वा एष स्तोमानो दश वा एतस्मादवाञ्चस्त्रिवृतो दश पराञ्चो मध्य एष एकविंश उभयतोऽध्याहितस्तपति तद्याऽसौ स्तोत्रियोदेति सैतस्मिन्नध्यूढ्वा स यजमानस्तद्वै वं क्षत्त्रं सहो बलम्, इति ।

तस्याग्निष्टोमस्योद्गातृभिः संस्तुतस्य स्तोत्रियाः स्तोत्रसंबन्धिन्य ऋचो नवत्यधिकं शतं संपद्यन्ते । कथमिति चेत्तदुच्यते । प्रातःसवने बहिष्पवमानाख्यं यत्स्तोत्रं तस्य त्रिवृत्स्तोमः क्रियते त्रिवृतश्चाऽऽवृत्तिरहितत्वाद्विद्यमानेषु त्रिषु त्र्यृचेषु विद्यमाना नवर्चः स्तोत्रिया भवन्ति । तत ऊर्ध्वं चत्वार्याज्यस्तोत्राणि तेष्वेकैकस्मिन्नपि विद्यमानानां तिसृणामृचामावृत्तिविशेषेण पञ्चदशस्तोमः संपादनीयः । तथासत्येकैकस्मिन्स्तोत्रे पञ्चदशर्च इत्येवं चतुर्षु स्तोत्रेषु मिलिता षष्टिः संपद्यते । तदेवं प्रातःसवन एकोनसप्ततिः । माध्यंदिने सवने माध्यंदिनपवमानाख्यमेकं स्तोत्रं तस्यापि पञ्चदशस्तोमयुक्तत्वात्स्तोत्रियाः पञ्चदश संपद्यन्ते । चत्वारि पृष्ठस्तोत्राणि तेषु सप्तदशस्तोमे कृते सत्यष्टषष्टिसंख्याकाः स्तोत्रिया भवन्ति । उभयं मिलित्वा माध्यंदिनसवने त्र्यशीतिः संपद्यते । तृतीयसवन आर्भवपवमानस्तोत्रस्य सप्तदशस्तोमोपेतत्वात्तस्मिन्सप्तदश ऋचः ।

यज्ञायज्ञीयस्तोत्रस्यैकविंशस्तोमोपेतत्वात्तत्रैकविंशतिर्मिलित्वा तृतीयसवनेऽष्टाविंशत् । एवं सवनत्रये मिलित्वा नवत्यधिकशतसंख्याकाः स्तोत्रिया भवन्ति । तत्र या नवतिस्ते दशसंख्याकास्त्रिवृतः स्तोमाः संपद्यन्ते । एकैकस्मिन्दशकेऽन्तिममेकां परित्यज्यावशिष्टानामृचां नवसंख्योपेतत्वात्त्रिवृत्स्तोमत्वम् । ततो नवसु दशकेषु नव त्रिवृत्स्तोमाः । यास्तु तेषु नवकेषु परित्यक्ता नवर्चः स एकस्त्रिवृत्स्तोमः । एवं दशसंख्याकास्त्रिवृत्स्तोमाः । अथानन्तरं यच्छतमस्ति तस्मिन्नपि या नवतिस्ते पूर्वोक्तन्यायेन दश त्रिवृत्स्तोमा गणनीयाः । अथ नवतेरूर्ध्वभाविन्यो या ऋचो दश तासां दशानामृचां मध्य एका स्तोत्रियोदेत्यतिरिच्यते । अवशिष्टासु स्तोत्रियासु त्रिवृत्स्तोमः परिशिष्यते । एवं सत्येकविंशतिसंख्याकास्त्रिवृत्स्तोमास्तेभ्योऽतीरिक्ता काचिदगित्येवावत्संपन्नम् । तत्रैकविंशतित्रिवृत्स्तोमसंघो योऽस्ति स सर्वोऽप्यसौ मण्डले दृश्यमान एकविंशतिसंख्यापूरकोऽध्याहितो मण्डले स्थापित आदित्यस्तपति प्रकाशते । आदित्यस्यैकविंशतिसंख्यापूरकत्वमन्यत्र श्रुतम्—" द्वादश मासाः पञ्चर्तवस्त्रय इमे लोका असावादित्य एकविंशः " इति । यत्तु सर्वं गवामयनाख्यं तत्र यान्येकविंशत्यहानि तत्सादृश्यादपि यथोक्तस्त्रिवृत्स्तोमसंघः प्रशस्तः । कथं सादृश्यमिति तदुच्यते । तस्मिन्सत्रे यन्मध्यममहस्तद्विषुवन्नामक दिवाकीर्त्यं तस्य पुरस्ताद्दशान्युपरिष्टाद्दशाहानि । एवमत्रापि पूर्वोक्तरीत्या संपादितानामेकविंशतिसंख्याकानां त्रिवृत्स्तोमानां मध्ये यस्त्रिवृत्स्तोमः स एव विषुवान्भविष्यति । एतस्माद्विषुवद्रूपात्स्तोमादर्वाञ्चः पूर्वभाविनो दश त्रिवृत्स्तोमाः पराञ्च उत्तरभाविनोऽपि दश त्रिवृत्स्तोमा उभयोर्दशकयोर्मध्य एष एकविंशतिसंख्यापूरकस्त्रिवृत्स्तोम उभयतोऽध्याहितः पार्श्वद्वये दशकव्याप्तः संस्तपत्यादित्यवत्प्रकाशते । तत्तत्रैकविंशतित्रिवृत्स्तोमेभ्य ऊर्ध्वं याऽसावृगेका स्तोत्रियोदेत्यतिरिक्ता भवति सेयमेतस्मिन्नेकविंशतिसंघेऽध्यूढळाऽधिकत्वेनावस्थापिता । स यजमानोऽतिरिक्तस्तोत्रियारूपो यजमानत्वेनावगन्तव्यः । किंच तत्स्तोत्रियारूपं दैवं क्षत्रं देवसंबन्धिनी क्षत्रियजातिरिन्द्रवरुणादिरूपा तत्क्षत्रं सहः पराभिभवक्षमं बलं सैन्यम् । एवमग्निष्टोमः स्तोत्रिय (या) द्वारा प्रशस्तः ।

उक्तार्थवेदनं प्रशंसति—

अश्नुते ह वै दैवं क्षत्रं सहो बलमेतस्य ह सायुज्यं सरूपतां सलोकतामश्नुते य एवं वेद ॥ ४१ ॥ इति ।

उक्तार्थवेदिता पराभवसहिष्णुसैन्योपेतामिन्द्रादिवैक्षात्त्रियजातिमश्नुते प्राप्नोति। तत्र तेन क्षत्त्रेणेन्द्रादिना सायुज्यं सहवासं सरूपतां समानरूपत्वं सलोकतामेकलोकावस्थितिं च प्राप्नोति ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऐतरेयब्राह्मणभाष्ये त्रयोदशाध्याये तृतीयः खण्डः ॥ ३ ॥ (४१) [११२]

अथ त्रिवृदादिस्तोमचतुष्टयद्वारेणाग्निष्टोमं स्तोतुमाख्यायिकामाह—

देवा वा असुरैर्विजिग्याना ऊर्ध्वाः स्वर्गं लोकमायन्सोऽग्निर्दिविस्पृगूर्ध्व उदश्रयत स स्वर्गस्य लोकस्य द्वारमवृणोदग्निर्वै स्वर्गस्य लोकस्याधिपतिस्तं वसवः प्रथमा आगच्छंस्त एनमब्रुवन्नति नोऽर्जस्याकाशं नः कुर्विति स नास्तुतोऽतिस्रक्ष्य इत्यब्रवीत्स्तुत नु मेति तथेति तं ते त्रिवृता स्तोमेनास्तुवंस्तान्स्तुतोऽत्यार्जत ते यथालोकमगच्छन्, इति।

ये देवा अग्निसहिताः पूर्वमसुरैः सह युद्धं कृत्वा विजिग्याना विजयं प्राप्तास्ते देवा ऊर्ध्वगामिनः सन्तः स्वर्गं लोकमायन्प्राप्नुवन्। तदानीं सोऽग्निः स्वस्थान एव स्थित्वा दिविस्पृग्द्युलोकं स्पृशन्नूर्ध्वमुन्नतः सन्नुदश्रयतोपरि. तनं देशमाश्रितवान्द्युलोकपर्यन्तं स्वकीयां ज्वालां वर्धितवानित्यर्थः। ततः सोऽग्निः स्वर्गलोकद्वारमवृणोत्तयाऽऽच्छादितमकरोत्। न चेतरेषु देवेषु स्थितेषु कथमग्नेरीदृक्सामर्थ्यमिति वाच्यम्। यस्मादग्निरेव स्वर्गलोकस्याधिपतिः। अग्नौ ह्यग्निष्टोमादिकर्माण्यनुष्ठाय स्वर्गं प्राप्नुवन्ति। तं स्वर्गद्वारनिरोधिनमग्निमष्टौ वसवः प्रथमाः पुरोगामिनो भूत्वाऽऽगच्छन्प्राप्तवन्तः। प्राप्य चैनमग्निं ते वसव एवमब्रुवन्। हेऽग्ने त्वं नोऽस्मानत्यर्जसि त्वदीयां ज्वालामतिलङ्घ्यार्जयितुं स्वर्गं प्रापयितुमर्हसि नोऽस्माकं तत्प्राप्त्यर्थमाकाशं त्वदीयज्वालाशमनेनावकाशं कुर्विति। ततः सोऽग्निरेवमब्रवीत्। युष्माभिरस्तुतोऽहं नातिस्रक्ष्ये द्वारावरोधं न परित्यक्ष्यामि तस्मादवरोधपरिहाराय नु क्षिप्रमेव मामग्निं स्तुत स्तोत्रं कुरुतेति। ते वसवस्तथेत्यङ्गीकृत्य त्रिवृन्नामकेन स्तोमेनाग्निमस्तुवन्। तस्य च स्तोमस्य विधायकं छन्दोगब्राह्मणमेवमाम्नायते—'तिसृभ्यो ह्येव करोति स प्रथमया तिसृभ्यो ह्येव करोति स मध्यमया तिसृभ्यो ह्येव

करोति स उत्तमयोद्यती त्रिवृतो विष्टुतिः ' इति । अस्यायमर्थः। उपास्मै गायता नर इति यः प्रथमस्यृचो द्वितीयस्यृचः पवमानस्य ते कव इति यस्तृतीयस्यृच एतेषु त्रिषु त्र्यृचात्मकेषु सूक्तेषु विद्यमानानां नवानामृचां त्रिभिः पर्यायैर्गानं कर्तव्यम् । तत्र प्रथमे पर्याये त्रिषु सूक्तेष्वाद्यास्तिस्र ऋचो गातव्याः । द्वितीयपर्याये मध्यमा ऋचो गातव्याः । तृतीयपर्याय उत्तमा ऋचो गातव्याः । त्रिवृभ्य इति तृतीयार्थे पञ्चमी । हिं करोतीत्यनेन गानमुपलक्ष्यते । सेयं यथोक्तप्रकारोपेता गीतिस्त्रिवृत्स्तोमस्य विष्टुतिः स्तुतिप्रकारविशेषः । तस्या विष्टुतेरुद्यतीत्येवं नामधेयमिति । ईदृशेन स्तोमेन स्तुतोऽग्निस्तान्वसून्त्यार्जत निरुद्धं द्वारमतिलङ्घ्य स्वर्गमध्ये प्रापितवान् । ते च वसवो देवा यथालोकं स्वस्य स्वस्योचितं लोकं स्थानविशेषमनतिक्रम्य तत्राऽऽगच्छन् ।

अथ पञ्चदशस्तोमेन स्तुतिं दर्शयति—

तं रुद्रा आगच्छंस्त एनमब्रुवन्नति नोऽर्जस्याकाशं नः कुर्विति स नास्तुतोऽतिस्रक्ष्य इत्यब्रवीत्स्तुत नु मेति तथेति तं ते पञ्चदशेन स्तोमेनास्तुवंस्तान्स्तुतोऽत्यार्जत ते यथालोकमगच्छन्, इति ।

पञ्चदशनामकस्य स्वरूपं छन्दोगैरेवमाम्नायते -' पञ्चभ्यो हिं करोति स त्रिभिः स एकया स एकया पञ्चभ्यो हिं करोति स एकया स त्रिभिः स एकया पञ्चभ्यो हिं करोति स एकया स एकया स त्रिभिः ' इति । अस्यार्थः । त्र्यृचात्मकमेकं सूक्तं त्रिरावर्तनीयम् । तत्र प्रथमायामावृत्तौ प्रथमायाँ ऋचस्त्रिरभ्यासः । द्वितीयावृत्तौ मध्यमाया उत्तमावृत्तावुत्तमायाः सोऽयं पञ्चदशस्तोम इति । अन्यत्पूर्ववद्व्याख्येयम् ।

अथ सप्तदशस्तोमेन स्तुतिं दर्शयति—

तमादित्या आगच्छंस्त एनमब्रुवन्नति नोऽर्जस्याकाशं नः कुर्विति स नास्तुतोऽस्रक्ष्य इत्यब्रवीत्स्तुवंस्तान्स्तुतोऽत्यार्जत ते यथा-

लोकमगच्छन्, इति।

सप्तदशस्तोमस्य स्वरूपं छन्दोगैरेवमाम्नायते-'पञ्चभ्यो हिं करोति स तिसृभिः स एकया स एकया पञ्चभ्यो हिं करोति स एकया स तिसृभिः स एकया सप्तभ्यो हिं करोति स एकया स तिसृभिः स तिसृभिः' इति। अत्र प्रथमावृत्तौ प्रथमायामृचि त्रिरभ्यासः। द्वितीयावृत्तौ मध्यमायाम्। तृतीयावृत्तौ मध्वमोत्तमयोः सोऽयं सप्तदशस्तोम इति। अन्यत्पूर्ववत्।

एकविंशस्तोमेन स्तुतिं दर्शयति-

तं विश्वे देवा आगच्छंस्त एनमब्रुवन्नति नोऽर्जस्याकाशं नः कुर्विति स नास्तुतोऽतिस्रक्ष्य इत्यब्रवीत्स्तुत नु मेति तथेति तं तं एकविंशेन स्तोमेनास्तुवंस्तान्स्तुतोऽत्यार्जत ते यथालोकमगच्छन्, इति।

एकविंशस्तोमस्य स्वरूपं छन्दोगैरेवमाम्नायते-'सप्तभ्यो हिं करोति स तिसृभिः स तिसृभिः स एकया सप्तभ्यो हिं करोति स एकया स तिसृभिः स तिसृभिः सप्तभ्यो हिं करोति स तिसृभिः स एकया स तिसृभिः' इति। प्रथमपर्याये त्र्यृचस्योत्तमाया ऋचः सकृत्पाठः द्वितीयपर्याये प्रथमायाः सकृत्पाठस्तृतीयपर्याये मध्यमायाः सकृत्पाठः। अथ शिष्टानां तु सर्वत्र त्रिरावृत्तिः सोऽयमेकविंशस्तोम इति। अन्यत्पूर्ववद्व्याख्येयम्।

स्तोमचतुष्टयमुपसंहरति-

एकैकेन वै तं देवाः स्तोमेनास्तुवंस्तान्स्तुतोऽत्यार्जत ते यथालोकमगच्छन्, इति।

अग्निष्टोमप्रयोगे चतुर्णामुक्तानां स्तोमानां विकल्पशङ्कानिवृत्त्यर्थं समुच्चयं विधत्ते-

अथ हैनमेष एतैः सर्वैः स्तोमैः स्तौति यो यजते, इति।

अर्थवादवैलक्षण्येन विधित्वं द्योतयितुमथशब्दः। योऽग्निष्टोमेन यजत एष एतैश्चतुर्भिः स्तोमैः स्तुवीत।

अनुष्ठातुः स्वर्गप्राप्तिफलस्य सिद्धत्वात्तेन सह समुच्चित्य वेदितुरपि तत्फलं दर्शयति–

यश्चैनमेवं वेदाती तू तमर्जाताः (र्जते), इति ।

यजमानो येन प्रकारेण यजतेऽनेनैव प्रकारेणैनमग्निष्टोमं यश्च वेद तमपि वेदितारं द्वारनिरोधमतिलङ्घ्याज्जातै (र्जत ए)व प्रापयत्येव । अती त्विति दीर्घश्छान्दसः ।

वेदनमात्रेणानुष्ठानसमफलत्वं प्रतिपादयितुं पुनरप्याह–

अति ह वा एनमर्जते स्वर्गं लोकमभि य एवं वेद ॥ ४२ ॥

वेदनमात्रेण सिद्धेऽपि फले कर्मभूयस्त्वात्फलभूयस्त्वमिति न्यायेनानुष्ठानवैयर्थ्यं नास्ति ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऐतरेयब्राह्मणभाष्ये त्रयोदशाध्याये दशमः खण्डः ॥ ४ ॥ (४२) [११३]

अथाग्निष्टोमादिशब्दनिर्वचनेन प्रशंसति–

स वा एषोऽग्निरेव यदग्निष्टोमस्तं यदस्तुवंस्तस्मादग्निस्तोमस्तमग्निस्तोमं सन्तमग्निष्टोम इत्याचक्षते परोक्षेण परोक्षप्रिया इव हि देवाः, इति ।

योऽयमग्निष्टोमोऽस्ति स एष साक्षादग्निरेव स्वशरीरमेव त्रिभिश्छन्दोभिस्त्रिभिः सवनैश्च विभज्य क्रतोर्निष्पादितत्वात् । तं क्रतुरूपमाग्नं यद्यस्मात्कारणादेवा अस्तुवंस्तस्मादग्निविषयस्तुतियुक्तत्वादयं क्रतुरग्निस्तोम इत्येतन्नामकः । तन्नामयुक्तं क्रतु (तुं) परोक्षनाम्ना व्याहर्तुं सकारतकारयोः षकारठकारावादिश्याग्निष्टोम इति वैदिका आचक्षते । वर्णान्तरेणाव्यवहितार्थप्रतीतिरहितं नाम परोक्षमित्युच्यते । यस्माल्लोके देवाः पूज्या आचार्यादयः परोक्षनामप्रिया एव तस्मात्क्रतोरपि तद्युक्तम् ।

नामान्तरस्य निर्वचनं दर्शयति–

तं यच्चतुष्टया देवाश्चतुर्भिः स्तोमैरस्तुवंस्तस्मा-

च्चतुस्तोमस्तं चस्तुतोमं सन्तं चतुष्टोम इत्या-
चक्षते परोक्षेण परोक्षप्रिया इव हि देवाः, इति ।

चतुष्टयाश्चतुर्विधा वसवो रुद्रा आदित्या विश्वे देवाश्चेति । स्तोमाश्च त्रिवृत्पञ्चदशः सप्तदश एकविंश इत्येवं चत्वारः । चतुष्टोमनामनिर्वचनं पूर्ववद्योजनीयम् ।

ज्योतिष्टोमनामानिर्वचनं दर्शयति-

अथ यदेनमूर्ध्वं सन्तं ज्योतिर्भूतमस्तुवंस्तस्माज्ज्यो-
तिस्तोमस्तं ज्योतिस्तोमं सन्तं ज्योतिष्टोम इत्या-
चक्षते परोक्षेण परोक्षप्रिया इव हि देवाः, इति ।

अथ नामद्वयानन्तरं तृतीयं नाम कथ्यत इति शेषः । अग्निर्भूमिमारभ्य द्युलोकपर्यन्तमूर्ध्वावस्थितस्तथा प्रकाशमानत्वाज्ज्योतिर्भूतस्तं तादृशं देवा अस्तुवंस्तस्माज्ज्योतिस्तोमः । ज्योतिषः स्तोमः स्तुतिरस्मिन्क्रतौ स ज्योतिस्तोमः । अन्यत्पूर्ववत् ।

नामनिर्वचनेन प्रशस्य पुनरप्याद्यन्तराहित्येन प्रशंसति—

स वा एषोऽपूर्वोऽनपरो यज्ञक्रतुर्यथा
रथचक्रमनन्तमेवं यदग्निष्टोमस्तस्य
यथैव प्रायणं तथोदयनम्, इति ।

स एषोऽग्निष्टोमः पूर्वापररहितः पूर्व आदिरपरोऽन्त आद्यन्तरहितो यज्ञक्रतुः । यथा लोके रथचक्रमनन्तं पुनः पुनः परिवर्तमानस्य रथचक्रस्यायमादिरयमन्त इति विभागः कर्तुं न शक्यते तस्मादिदमन्तरहितम् । आदिरहितस्याप्येतदुपलक्षणम् । एवं क्रतुरपि । ननु प्रायणीयेष्टिरादिरुदयनीयेष्टिरन्त इति चेत् । नैवम् । योऽग्निष्टोमोऽस्ति तस्य यादृशं प्रायणीयं कर्म तादृशमेवोदयनीयं कर्म तयोः समानधर्मकत्वादतो विवेक्तुमशक्यत्वादाद्यन्तरहितः क्रतुः ।

उक्तमर्थं मन्त्रोदाहरणेन दृढयति-

तदेषाऽभि यज्ञगाथा गीयते यदस्य पूर्वमपरं
तदस्य यदस्यापरं तदस्य पूर्वम् । अहेरिव सर्पणं
शाकलस्य न विजानन्ति यतरत्परस्तादिति, इति ।

सर्वैरपि सुभाषितत्वेन गीयत इति गाथा यज्ञविषया गाथा । तच्चास्मिन्नग्निष्टोमस्याऽऽद्यन्तयोः प्रायणीयोदयनीययोरेव विषये काचिदेषा यज्ञगाथाऽभिज्ञैर्गीयते सर्वतः पठ्यते यदस्येत्यादिगाथा । अस्याग्निष्टोमस्य यत्पूर्वमुपक्रमरूपं कर्मास्ति तदेवास्यापरं समाप्तिरूपं कर्म । यदु यदप्यस्यापरं समाप्तिपरं तदु तदेवास्य पूर्वमुपक्रमरूपम् । आदित्यः प्रायणीयश्चरुरादित्य उदयनीयश्चरुरिति द्रव्यदेवतयोरुभयत्रैकविधत्वात्तयोरेकत्वोपचारः । आद्यन्तयोरभिज्ञाने पूर्वं ब्राह्मणे रथचक्रदृष्टान्तो दर्शितः । मन्त्रे त्वन्यो दृष्टान्त उच्यते । शाकलशब्दः सर्पविशेषवाची । शाकलनाम्नोऽहेः सर्पविशेषस्य यथा सर्पणं गमनं तथैवायमग्निष्टोमः । स च सर्पणकाले मुखेन पुच्छस्य दंशनं कृत्वा वलयाकारो भवति तत्र किं मुखं किं वा पुच्छमिति न ज्ञायत एवमत्राप्यदितिदेवताकस्य चरोः साम्ये सति प्रायणीयोदनीययोर्यतरत्कर्म परस्तात्पश्चाद्भावि यतरच्च पूर्वभावि किमपि न विजानन्ति ।

अस्य गाथायास्तात्पर्यं संक्षिप्य दर्शयति—

यथा ह्येवास्य प्रायणमेवमुदयनमसादिति, इति ।

अस्याग्निष्टोमस्य प्रायणं प्रारम्भो यादृश एवमुदयनं समाप्तिरसदस्ति भवतीत्यर्थः ।

अत्र कंचिदाक्षेपमुद्भावयति—

तदाहुर्यत्त्रिवृत्प्रायणमेकविंशमुदयनं केन ते समे इति, इति ।

पूर्वोदाहृतत्रिवृत्स्तोमः प्रातःसवनादौ प्रयोज्यत्वात्प्रायणमुपक्रमरूपम् । एकविंशस्तोमस्तु तृतीयसवनान्ते प्रयोज्यत्वादुदयनं समाप्तिरूपम् । केन कारणेन ते प्रायणोदयने समे भवेतामित्याक्षेपः ।

तत्र परिहारं दर्शयति -

यो वा एकविंशस्त्रिवृद्वै सोऽथो यदुभौ तृचौ तृचिनावित्ते ब्रूयात्तेनेति ॥ ४३ ॥ इति ।

योऽयमेकविंशस्तोमोऽस्ति स एव त्रिवृदवगन्तव्यः स्तोमत्वाकारेण तयोरेकविधत्वात् । अथो अपि च यद्यस्मात्कारणात्स्तोमद्वयाश्रयभूतावुभौ तृचौ तृचिनौ ऋचि (च) त्वधर्मयुक्तौ । तत्र त्रिवृत्स्तोमाश्रयस्योपास्मै गायता नर इति सूक्तस्य ऋचत्वधर्मः प्रसिद्ध एव । एकविंशस्तोमाश्रयस्य यज्ञा यज्ञा वो-

अग्नय इति सूक्तस्य प्रगाथे द्वे एव तस्मिन्नृचावाम्नायेते । तथाऽपि स्तोत्रकाले प्रग्रथनेन पादानावर्त्य त्र्यृचत्वं संपाद्यते । तेन त्र्यृचत्वधर्मोपेतत्वकारणेन द्वयोः स्तोमयोरेकविधत्वमित्युत्तरं ब्रूयात् ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऐतरेय-ब्राह्मणभाष्ये चतुर्दशाध्याये पञ्चम खण्डः ॥ ५ ॥ (४३) [११४]

पुनरादित्यसाम्येन प्रशंसति-

यो वा एष तपत्येषोऽग्निष्टोम एष साह्नस्तं सहैवाह्ना संस्थापयेयुः साह्नो वै नाम, इति ।

य एव प्रसिद्ध एषोऽस्मत्प्रत्यक्ष आदित्यस्तपति, एषोऽग्निष्टोमस्तयोरादित्याग्निष्टोमयोः सदृशत्वात् । कथं साम्यमिति तदुच्यते । एषोऽग्निष्टोम आदित्यवत्साह्न आदित्योऽह्ना सह वर्तते तथाऽयमपि । तमग्निष्टोमं यत एकेनाह्ना समापयेयुस्तस्मादादित्यस्येव साह्न इति क्रतोर्नाम संपन्नम् ।

इदानीमग्निष्टोमानुष्ठाने त्वरां निषेधति-

तेनासंत्वरमाणाश्चरेयुर्यथैव प्रातःसवन एवं माध्यंदिन एवं तृतीयसवन एवमु ह यजमानोऽप्रमायुको भवति, इति ।

यस्मादेकमहः साकल्येनानुष्ठानाय पर्याप्तं तेन कारणेन सर्वेऽप्यृत्विजोऽसंत्वरमाणास्त्वरामकुर्वन्त उत्तरोत्तरानुष्ठानं सम्यक्पर्यालोचयन्तश्चरेयुरनुतिष्ठेयुः । यथैव प्रातःसवने मध्यरात्रादूर्ध्वमारभ्य मध्याह्नात्पूर्वकालस्यानुष्ठानपर्याप्तत्वान्नास्ति त्वरैवमुत्तरयोरपि सवनयोः । एवमु हानेनैव प्रकारेण शनैरनुष्ठाने सति बुद्धिसमाधानेनाङ्गलोपाभावाद्यजमानोऽप्रमायुकोऽप्रमृत्युरहितो भवति ।

विपक्षे बाधकं दर्शयति-

यद्ध वा इदं पूर्वयोः सवनयोरसंत्वरमाणाश्चरन्ति तस्माद्धेदं ग्राव्णो ग्रामता बहुलाविष्टा अथ यद्धेदं तृतीयसवने संत्वरमाणाश्चरन्ति तस्माद्धेतं प्रत्यञ्चि दीर्घारण्यानि भवन्ति तथा ह यजमानः प्रमायुको भवति, इति ।

यद्ध वै यदि प्रथमद्वितीययोः सवनयोः कालसंकोचाभावादसंत्वरमाणा इदं कर्म चरन्त्यनुतिष्ठयुस्तदानीं तस्माद्ध तस्मादेवाङ्गलोपाभावात्कारणादिदं दृश्यते । किमिदमिति तदुच्यते । प्राच्यो ग्रामताः पूर्वदिग्वर्तिनो ग्रामसमूहा बहुलाविष्टा बहुभिर्जनैः संपूर्णा भवन्ति । अथ तद्विपर्ययेण यद्ध यदि तृतीयसवने कालसंकोचमाशङ्क्य संत्वरमाणा अतित्वरया युक्ता इदं कर्म चरन्त्यनुतिष्ठन्ति तस्माद्ध तदानीमङ्गवैकल्यसंभवादेवेदं लोके दृश्यते नत्यश्च पश्चिमादिग्वर्तीनि दीर्घारण्यानि जनशून्यानि भवन्ति । तथा ह वादृशेन संभाविताङ्गवैकल्ययुक्तेनानुष्ठानेन यजमानः प्रमायुको भवति । अप्रमृत्युना म्रियत इत्यर्थः ।

विपक्षे बाधकमुक्त्वा स्वपक्षं निगमयति—

तेनासंत्वरमाणाश्चरेयुर्यथैव प्रातःसवन एवं माध्यंदिन एवं तृतीयसवन एवमु ह यजमानोऽप्रमायुको भवति, इति ।

अथ त्रिषु सवनेषु शस्त्रस्योत्तरोत्तरं ध्वन्याधिक्यं विधत्ते—

स एतमेव शस्त्रेणानु पर्यावर्तेत यदा वा एष प्रातरुदेत्यथ मन्द्रं तपति तस्मान्मन्द्रया वाचा प्रातःसवने शंसेदथ यदाऽभ्येत्यथ बलीयस्तपति तस्माद्बलीयस्या वाचा मध्यंदिने शंसेदथ यदाऽभितरामेत्यथ बलिष्ठतमं तपति तस्माद्बलिष्ठतमया वाचा तृतीयसवने शंसेदेवं शंसेद्यदि वाच ईशीत वाग्घि शस्त्रं यया तु वाचोत्तरेत्तरण्योत्सहेत समापनाय तया प्रतिपद्येतैतत्सुश्स्ततमिव भवति, इति ।

स ह्येतैवमेवाऽऽदित्यमनुसृत्य शस्त्रेण पर्यावर्तत यथा यथाऽऽदित्य उत्तरोत्तराधिक्येन तपति तथा तथैवोत्तरोत्तरध्वन्याधिक्येन होता शंसेत् । यदा वा इत्यादिना तदेव स्पष्टी क्रियते । यस्मिन्नेव काल एष आदित्यः प्रातरुदेति प्रातःकालमभिव्यञ्जयितुमुदितो भवति, अथ तदानीं मन्द्रमल्पं यथा भवति तथा तपति तस्मादादित्यमनुवर्तमानो होता प्रातःसवने मन्द्रया स्वल्पध्वन्युपेतया वाचा शंसेत् । अथ प्रातःकालादूर्ध्वं यदाऽभ्येति मध्याह्नकालं निष्पाद-

यितुमाभिमुख्येनोर्ध्वं गच्छति, अथ तदानीं सूर्यो बलीयः प्रबलं यथा भवति तथा तपति तस्माद्धोताऽपि बलीयस्या प्रबलध्वनियुक्तया वाचा मध्यंदिने शंसेत् । अथ मध्याह्नादूर्ध्वं यदा सूर्योऽभितरामेति पश्चिमाभिमुखानां पुरुषाणामत्यन्तमाभिमुख्येन गच्छति, अथेदानीमादित्यो बलिष्ठतमं तपति मध्याह्नतापादप्यत्यन्तं प्रबलस्तापो भवति भूमौ दिक्षु चोष्णत्वबाहुल्यात् । तस्मात्तदानीं होता माध्यंदिनसवनध्वनेरप्यधिकध्वनियुक्तया वाचा तृतीयसवने शंसेत् । यद्ययं होता वाचः ईशीतेश्वरो भवेद्वृश्यवाक्स्याच्छ्लेष्मादिदोषेण ध्वनेर्मान्द्यं न प्राप्नुयात्तदानीं येन ध्वनिना तृतीयसवने प्रारम्भः कृत एवं तेनैव ध्वनिना शंसेत् । किमर्थं ध्वन्याधिक्यामिति तदुच्यते । यस्माद्वागेव शस्त्रं वाङ् निष्पाद्यत्वात्तस्माद्यया तु यादृशध्वनियुक्तयेव वाचोत्तरोत्तरिण्योत्तरोत्तराभिर्वृद्धिभाजा समापनायोत्सहेत शस्त्रं समापयितुमुत्साहवान्भवेत् । न तु मध्ये नीचध्वनिर्भवेत् । तथा (या) तथाविधध्वन्युपेतया वाचा शस्त्रं प्रतिपद्येत प्रारभेत । तदेतदुक्तलक्षणोपेतं शस्त्रं सुशस्ततमामिव भवति श्रुतिवैकल्यराहित्येनात्यन्तं शस्तमेव भवति ।

ननु तृतीयसवने त्वरामन्तरेण शनैः शंसेदिति पूर्वत्रोक्तं तथा सति कालस्याल्पत्वेन समापनात्प्रागेव सूर्योऽस्तमियादित्याशङ्क्य वस्तुतोऽस्तमयाभावान्नास्ति दोष इत्यभिप्रेत्याऽऽह—

स वा एष न कदाचनास्तमेति नोदेति, इति ।

अस्तमयः स्वरूपनाशः । उदयः सूर्योत्पत्तिः । न हि सूर्यस्य कदाचिदपि स्वरूपनाशोत्पत्ती विद्येते ।

कथं तर्हि जनानां सूर्यास्तमयव्यवहार इत्याशङ्क्याऽऽह—

तं यदस्तमेतीति मन्यन्तेऽह्न एव तदन्तमित्वाऽथाऽऽत्मानं विपर्यस्यते रात्रीमेवावस्तात्कुरुतेऽहः परस्तात्, इति ।

यद्यदा प्राणिनः सूर्योदयादूर्ध्वं यागचतुष्टयानन्तरं सूर्योऽस्तमेतीति तं सूर्यमस्तमितं मन्यन्ते तत्तदानीं सूर्यस्तत्प्राणियुक्ते देशे प्रकाशरूपस्याह्न एवान्तमित्वा समाप्तिं प्राप्याथानन्तरं स्वात्मानं विपर्यस्यते विपर्यस्तं करोति । कथं विपर्यास इति स उच्यते । अवस्तादवीते देशे रात्रिमेव कुर्वते परस्तादागामिनि देशेऽहः कुरुते । अयमर्थः । मेरोः प्रदक्षिणं कुर्वन्नादित्यो यद्देशवासिनां प्राणिनां दृष्टिपथमागच्छति तद्देशवासिभिरयमुदेतीति व्यवह्रियते । यद्देशवासिनां

दृष्टिपथमतिक्रम्य सूर्ये गते सति सूर्योऽस्तमेतीति तद्देशवासिभिर्व्यवह्रियते । अतस्तस्मिन्देशे रात्रिर्भवति । आदित्येन गन्तव्ये देशान्तरे तद्देशवासिभिः प्राणिभिः सूर्यस्य दृष्टत्वादहर्भवति । एवं च सति सूर्यस्य विनाशरूपोऽस्तमयः कदाचिदपि नास्तीति सिद्धम् ।

अनेनैव न्यायेन सूर्यस्य स्वरूपोत्पत्तिलक्षणोदयाभावं दर्शयति —

अथ यदेनं प्रातरुदेतीति मन्यन्ते रात्रे-
रेव तदन्तमित्वाऽथाऽऽत्मानं विपर्यस्यतेऽ-
हरेवावस्तात्कुरुते रात्रिं परस्तात्, इति ।

पूर्ववद्व्याख्येयम् ।

परमार्थतोऽस्तमयस्याभावं निगमयति–

स वा एष न कदाचन निम्रोचति, इति ।

निम्रोचनमस्तमयः । एतस्योपलक्षणत्वान्न कदाचिदुदेतीत्यपि द्रष्टव्यम् ।

वेदनं प्रशंसति–

न ह वै कदाचन निम्रोचत्येतस्य ह
सायुज्यं सरूपतां सलोकतामश्नुते य
एवं वेद य एवं वेद ॥ ४४ ॥ इति ।

वेदितुरस्तमयाभावो नामापमृत्युराहित्यमिह जन्मनि तादृशो भूत्वा पश्चादेतस्याऽऽदित्यस्य सहवाससमानरूपत्वसमानलोकत्वानि प्राप्नोति । न च सहवासेनैव समानलोकत्वं सिध्यतीति वाच्यम् । कदाचिदपि स्वेच्छया पृथगवस्थानेऽपि तल्लोकभ्रंशो नास्तीति विवक्षया समानलोकत्वमुच्यते । अभ्यासोऽध्यायसमाप्त्यर्थः ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऐतरेयब्राह्मणभाष्ये चतुर्दशाध्याये षष्ठः खण्डः ॥६॥ (४४) [११५]

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकवीरबुक्कमहाराज्यधुरंधरसायणाचार्यकृतावैतरेयब्राह्मणभाष्ये चतुर्दशोऽध्यायः ॥ १४ ॥

अथ पञ्चदशोऽध्यायः।

अग्निष्टोमः सर्वयज्ञक्रतूनां
योनित्वेनास्तूयत प्राक्परस्तात्।
देवैः स्तोमैः संस्तुतोऽसौ चतुर्भि-
र्वाचा मन्द्रैर्मध्यमैरुत्तमैश्च ॥ १ ॥

अथेष्टिसंस्थादिकं वक्तव्यम्। तत्र दीक्षणीयेष्टेः संस्थामाख्यायिकया दर्शयति-

यज्ञो वै देवेभ्योऽन्नाद्यमुदक्रामत्ते देवा अब्रुवन्यज्ञो वै नोऽन्नाद्यमुदक्रमीदन्विमं यज्ञमन्नमन्विच्छामेति तेऽब्रुवन्कथमन्विच्छामेति ब्राह्मणेन च च्छन्दोभिश्चेत्यब्रुवंस्ते ब्राह्मणं छन्दोभिरदीक्षयंस्तस्यान्तं यज्ञमतन्वतापि पत्नीः समयाजयंस्तस्माद्धाप्येतर्हि दीक्षणीयायामिष्टावान्तमेव यज्ञं तन्वतेऽपि पत्नीः संयाजयन्ति तमनुन्यायमन्ववायन्, इति।

पुरा कदाचिद्यज्ञो ज्योतिष्टोमाख्यः केनापि निमित्तेनापरक्तः सन्देवेभ्यः सकाशादुदक्रामन्निष्क्रान्तवान्। तस्मिन्नुत्क्रान्ते तत्फलरूपमन्नाद्यमुदक्रामत्। ततो देवाः परस्परमिदमब्रुवन्यदेतदुभयमस्मदीयमुदक्रामत्तदेतदुभयं सर्वत्रान्विच्छामान्वेषणं करवाम। तत्र कथमन्वेषणमित्युपायं विचार्य ब्राह्मणमृत्विग्यजमानरूपं गायत्र्यादिच्छन्दांसि च तदन्वेषणोपायत्वेन निश्चित्य तैश्छन्दोभिर्ब्राह्मणं यजमानरूपमदीक्षयन्दीक्षणीयेष्ट्या संस्कृतवन्तः। तस्य ब्राह्मणस्य यज्ञं दीक्षणीयेष्टिरूपमान्तं समाप्तिपर्यन्तमतन्वत विस्तारितवन्तः। तं यज्ञमनुष्ठाय पत्नीनामिका देवता अपि समयाजयन्पत्नीसंयाजानुष्ठानमपि कृतवन्त इत्यर्थः। यस्मादेवं देवैः कृतं तस्मादेव कारणादिदानीमपि दीक्षणीयायामिष्टौ चोदकप्राप्तं यज्ञं समाप्तिपर्यन्तमनुतिष्ठन्ति। पत्नीसंयाजानप्यनुतिष्ठन्ति। उत्तरकालनिष्पाद्यव्यावृत्तये पत्नीसंयाज ग्रहणम्। पत्नीसंयाजैरेव समाप्तिरित्यभिप्रेत्याऽऽन्वामित्युक्तम्। तं देवैः कृतमनुन्यायमनुक्रमगतमनुष्ठान-

मनु पश्चान्मनुष्या अप्यन्ववायन्नवगतवन्तोऽनुष्ठितवन्त इत्यर्थः । तमनुन्यायमिति वाक्यमुत्तरशेषत्वेन वा योज्यम् ।

दीक्षणीयेष्टेः पत्नीसंयाजेषु समाप्तिं दर्शयित्वा प्रायणीयस्य शंयुवाके समाप्तिं दर्शयति—

ते प्रायणीयमतन्वत तं प्रायणीयेन नेदीयोऽन्वागच्छंस्ते कर्मभिः समत्वरन्त तच्छंय्वन्तमकुर्वंस्तस्माद्धाप्येतर्हि प्रायणीयं शंय्वन्तमेव भवति तमनुन्यायमन्ववायन्, इति ।

तं देवाः प्रायणीयाख्यं कर्मानुष्ठितवन्तः प्रायणीयेन कर्मणा तं पूर्वोक्तदीक्षणीयेष्टिरूपं ज्योतिष्टोमरूपं वा यज्ञं नेदीयोऽत्यन्तसमीपे यथा भवति तथैवान्वगच्छन्ननुष्ठितवन्तः । दीक्षणीयेष्टेरूर्ध्वं चिरं व्यवधानमकृत्वा प्रायणीयमनुष्ठितवन्त इत्यर्थः ते देवाः कर्मभिः प्रायणीयाङ्गरूपैः समत्वरन्त सम्यक्त्वरां कृतवन्तः । दीक्षणीयेष्टिवत्पत्नीसंयाजपर्यन्तं नान्वतिष्ठन्किंतु त्वरां कृत्वा पत्नीसंयाजेभ्यः पूर्वमेव शंयुवाकपर्यन्तं कृत्वोपरताः । तस्माद्धेत्यादि पूर्ववत् ।

अथाऽऽतिथ्येष्टेरन्तं दर्शयति—

त आतिथ्यमतन्वत तमातिथ्येन नेदीयोऽन्वागच्छंस्ते कर्मभिः समत्वरन्त तदिळान्तमकुर्वंस्तस्माद्धाप्येतर्ह्यातिथ्यमिळान्तमेव भवति तमनुन्यायमन्ववायन्, इति ।

अनुयाजेभ्यः पूर्वं यदिडोपाह्वानं तदन्तमेवाऽऽतिथ्येष्टिकर्म कृत्वोपरताः । अन्यत्पूर्ववद्व्याख्येयम् ।

अथोपसत्स्वनुष्ठेयं दर्शयति—

त उपसदोऽतन्वत तमुपसद्भिर्नेदीयोऽन्वागच्छंस्ते कर्मभिः समत्वरन्त ते तिस्रः सामिधेनीरनूच्य तिस्रो देवता अयजंस्तस्माद्धाप्येत र्ह्युपसत्सु तिस्र एव सामिधेनीरनूच्य तिस्रो

देवता यजन्ति तमनुन्यायमन्ववायन्, इति।

तिस्रः सामिधेन्य आश्वलायनेन दर्शिताः–'उपसद्याय मीढ्वष इति तिस्र एकैकां त्रिरनवानं वा सामिधेन्यः' इति। अग्निः सोमो विष्णुश्चेत्येतास्तिस्रो देवताः। स्पष्टमन्यत्।

अथाग्नीषोमीयपशावनुष्ठेयं दर्शयति–

त उपवसथमतन्वत तमुपवसथ्येऽहन्याप्नुवं-
स्तमाप्त्वाऽऽन्तं यज्ञमतन्वतापि पत्नीः सम-
याजयंस्तस्माद्वाप्येतत्युपवसथ आन्तमेव यज्ञं
तन्वतेऽपि पत्नीः संयाजयन्ति, इति।

उपवसथशब्देन सोमयागसमीपवासितत्वात्पूर्वस्मिन्नहन्यनुष्ठेयोऽग्नीषोमीयपशुर्विवक्षितः। तं पशुं देवा उपवसथ्येऽहनि सोमयागदिनात्पूर्वेद्युः प्राप्नुवन्प्राप्य च तं यज्ञं समाप्तिपर्यन्तमनुष्ठितवन्तः। पत्नीसंयाजानप्यन्वतिष्ठन्। दीक्षणीयेष्टिवत्पत्नीसंयाजान्तत्वमेव द्रष्टव्यम्। स्पष्टमन्यत्।

उक्तास्विष्टिषु होतुरनुवचनस्य मन्द्रस्वरं विधत्ते–

तस्मादेतेषु पूर्वेषु कर्मसु शनै-
स्तरां शनैस्तरामिवानुब्रूयात्, इति।

यस्मादग्नीषोमीयात्पूर्वभावित्वेनोपक्रमरूपा दीक्षणीयादयस्तस्मादेतेषु पूर्वेषु दीक्षणीयाद्युपसदन्तेषु कर्मसु शनैस्तरामिवात्यन्तनीचस्वरेणैव होताऽनुब्रूयात्।

अग्नीषोमीयपशौ होतुरनुवचने ध्वनेरिळा(डा)नुसारित्वं विधत्ते–

अनूत्सारमिव हि ते तमायंस्तस्मादुपव-
सथे यावत्या वाचा कामयीत तावत्याऽ-
नुब्रूयादाप्तो हि स तर्हि भवतीति, इति।

अनूत्सारमुत्तरोत्तरभावी सार उत्सारस्तमनुसृत्यानुसृत्येति तस्यार्थः। दीक्षणीयेष्टेः सारभूता प्रायणीयेष्टिः। तदपेक्षया सोमयागस्य समीपवर्तित्वात्। एवमातिथ्यादिषु द्रष्टव्यम्। ईदृशमुत्तरोत्तरसारमनुसृत्य ते देवास्तं सोमयागमायन्प्राप्तवन्तः। तस्मादत्यन्तसार उपवसथेऽग्नीषोमीयपशौ होता यावत्या वाचा कामयीत यावन्तमुच्चध्वनिमिच्छेत्तावता ध्वनिनाऽनुवचनं कुर्यात्। तर्हि तस्मिन्नग्नीषोमीयपशुकाले स सोमयागः प्राप्तो भवतीति होतुराशयः।

लोकेऽप्यभीष्टे वस्तुनि बन्धौ वा चिरकालेन प्राप्ते जाते हर्षद्योतनायोच्चध्वनिना गानं कुर्वन्ति तद्वदत्रापि द्रष्टव्यम्।

देवनां यज्ञप्राप्त्युपायमभिप्रायान्नाद्यप्राप्त्युपायं दर्शयति—

तमाप्त्वाऽब्रुवंस्तिष्ठस्व नोऽन्नाद्यायेति स नेत्यब्रवीत्कथं वस्तिष्ठेयेति तानीक्षतैव तमब्रुवन्ब्राह्मणेन च च्छन्दोभिश्च सयुग्भूत्वाऽन्नाद्याय तिष्ठस्वेति तथेति तस्माद्ब्राह्मणेतर्हि यज्ञः सयुग्भूत्वा देवेभ्यो हव्यं वहति ब्राह्मणेन च च्छन्दोभिश्च ॥ ४५ ॥ इति।

ते देवास्तं ज्योतिष्टोमयज्ञं प्राप्येदमब्रुवन्। हे यज्ञ नोऽस्माकमन्नाद्यसिद्ध्यर्थं तिष्ठस्व स्थितिं कुर्विति। स यज्ञस्तद्वाक्यं निराकरोत्। अन्नाद्यनिष्पादकं साधनमन्तरेण वो युष्मदर्थं कथं स्थितः स्यामिति स्वाभिप्रायमब्रवीत् तेष्वनुग्रहद्योतनाय तान्देवानीक्षतैव पश्यन्नेवाऽऽस्त न तूपेक्षां कृतवान्। ततो देवा यज्ञस्याभिप्रायं ज्ञात्वा ते देवास्तं यज्ञमिदमब्रुवन्। हे यज्ञ नोऽस्मदर्थं त्वं साधनेन ऋत्विग्यजमानरूपेण ब्राह्मणेन तत्तन्मन्त्रगतैश्छन्दोभिश्च सयुग्भूत्वा सहावस्थितो भूत्वा पश्चादन्नाद्याय तिष्ठस्वाङ्गी कुर्विति। तथा यज्ञोऽप्यङ्गी चकार। यस्मादेवं तस्मादिदानीमपि यज्ञो ब्राह्मणमन्त्रसहितो भूत्वा देवेभ्योऽन्नाद्यरूपं हविर्वहति।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऐतरेयब्राह्मणभाष्ये पञ्चदशाध्याये प्रथमः खण्डः ॥ १ ॥ (४५) [११६]

दक्षिणीयादिष्वग्नीषोमीयान्तेषु होतुर्ध्वनिविशेषं विधायान्ते ब्राह्मणेनार्त्विजां यज्ञनिष्पत्तिरित्युक्तं तत्र वर्ज्यब्राह्मणविशेषं दर्शयितुं प्रस्तौति—

त्रीणि ह वै यज्ञे क्रियन्ते जग्धं गीर्णं वान्तम्, इति।

जग्धं भक्षितावशिष्टं भोजनपात्रे स्थितम्। गीर्णमुदरे प्रविष्टम्। वान्तं सकृदुदरे प्रविश्य पुनर्निर्गतम्। तान्येतानि त्रीणि दुर्बुद्धिभिर्यज्ञे क्रियन्ते। जग्धादिस्थानीयानि त्रीणि वर्ज्यानीत्यर्थः।

तत्र जग्धस्थानीयं दर्शयित्वा निषेधति—

तद्धेतदेव जग्धं यदाशंसमानमार्त्विज्यं कारयत उत वा मे दद्यादुत वा मा वृणीतेति तद्ध तत्पराङेव यथा जग्धं न हैव तद्यजमानं भुनक्ति, इति ।

कश्चिद्ब्राह्मण आर्त्विज्यमाशंसते कामयते । केनाभिप्रायेणेति तदुच्यते । आर्त्विज्यार्थं यज्ञशालां मयि गते सति यजमानो मे मह्यमुत वा दद्यात्किंचिद्धनं वा प्रयच्छेदुत वा मा वृणीत प्रयोगाभिज्ञं मां दृष्ट्वा त्वमार्त्विज्यं कुर्विति वृणीतेत्येवं धनार्जनलम्पटः सन्ननुष्ठानतात्पर्यरहितो निरन्तरमार्त्विज्यं कामयते । तादृशं कामयमानं पुरुषं यजमान आर्त्विज्यं कारयत इति यदस्ति तदेव जग्धम् । यथा लोके जग्धं पात्रस्थितं भक्षितावशिष्टमुच्छिष्टत्वादितरैरस्पृश्यं तथा तद्ध तस्मिन्नेव यागे तल्लम्पटस्याऽऽर्त्विज्यं पराङेव निकृष्टमेव । तत्तादृशमार्त्विज्यं यजमानं न भुनक्ति न पालयति यज्ञो विकलो भवतीत्यर्थः ।

गीर्णमुदाहृत्य निषेधति—

अथ हैतदेव गीर्णं यद्भिभ्यदार्त्विज्यं कारयत उत वा मा न बाधेतोत वा मे न यज्ञवेशसं कुर्यादिति तद्ध तत्पराङेव यथा गीर्णं न हैव तद्यजमानं भुनक्ति, इति ।

यजमानो यस्मिन्ग्रामे यजते तत्र कश्चिद्ब्राह्मणो ग्रामणीः प्रभुर्भूत्वा प्रयोगकौशलरहितोऽवहितोऽवतिष्ठते । तेनाऽऽर्त्विज्यं वर्जयितुमयं यजमानो बिभेति । केनाभिप्रायेणेति तदुच्यते । अयमत्र प्रभुमयि द्वेषं कृत्वा कालान्तरे मां बाधेत । अथवेदानीमेव यज्ञवेशसं यज्ञविघातं कुर्यात् । तदुभयं मा भूदित्यनेनाभिप्रायेण तस्माद्भीतिं प्राप्नुवन्नार्त्विज्यं तेन प्रभुणा कारयत इति यदस्ति तदेतद्गीर्णम् । यथा लोके गीर्णमुदरस्थं पुनर्भोगयोग्यं न भवति तथा तद्ध तस्मिन्यागे तद्भीतिमात्रप्रयुक्तमार्त्विज्यं पराङेव निकृष्टमेव । तत्तादृशं प्रयोगकौशलरहितेन प्रभुणा कृतमार्त्विज्यं यजमानं न पालयति ।

वान्तं दर्शयित्वा निषेधति—

अथ हैतदेव वान्तं यदभिशस्यमानमार्त्विज्यं

कारयते यथा ह वा इदं वान्तान्मनुष्या बीभत्सन्त एवं तस्माद्देवास्तद्ध तत्पराङ्देव यथा वान्तं न हैव तद्यजमानं भुनक्ति, इति ।

कश्चित्पुरुषः प्रयोगकुशलोऽपि केनचित्कारणेनात्यपवादेन सर्वैर्निन्द्यते तादृशमभिशस्यमानं यजमानः स्वकीयबन्धुत्वादिदाक्षिण्येनापवादपरिहारार्थमार्त्विज्यं कारयत इति यदस्ति तदेतद्वान्तम् । तत्रेदं निदर्शनमुच्यते । यथा लोके मनुष्या वान्ताद्बीभत्सन्ते वान्तं दृष्ट्वा कश्मलमेतादिति निष्ठीवनं कुर्युरेवं देवास्तस्मादभिशस्यमानकृतादार्त्विज्यात्सर्वे बीभत्सन्ते । ततो यथा लोके वान्तमतिनिकृष्टं तथा तस्मिन्यज्ञे तदार्त्विज्यमतिनिकृष्टं तच्च यजमानं सर्वथा न पालयति ।

वर्ज्यत्वेनोक्तं त्रिविधमुपसंहरति—

स एतेषां त्रयाणामाशां नेयात्, इति ।

स यजमान एतेषां पूर्वोक्तानां धनलम्पटभयहेत्वभिशस्तानां त्रयाणामार्त्विज्यार्थं मनस्यपेक्षामपि न कुर्यात् ।

अथ प्रमादकृतस्य प्रायश्चित्तं दर्शयति—

तं यद्येतेषां त्रयाणामेकंचिदकाममभ्याभवेत्तस्यास्ति वामदेव्यस्य स्तोत्रे प्रायश्चित्तिः, इति ।

यदि कदाचिदेतेषां धनलम्पटादीनां त्रयाणां मध्ये वर्तमानं तं पुरुषमेकंचिदेकमप्यकाममबुद्धिपूर्वमभ्याभवेदभिलक्ष्याऽऽर्त्विज्यं भवेत्तदानीं तस्य वैकल्यस्य प्रायश्चित्तिरस्ति । कुत्रास्तीति तदुच्यते । वामदेव्यस्य स्तोत्रे वामदेवमहर्षिणा दृष्टं साम वामदेव्यं कया नश्चित्र आभुवत् (४-३१-१) इत्येतस्यामृच्युत्पन्नं तच्च साम ऋचे गायन्त उद्गातारः पृष्ठस्तोत्रमनुतिष्ठन्ति । तत्र कश्चित्प्रयोगविशेषः प्रायश्चित्तिः ।

उक्तं साम प्रशंसति—

इदं वा वामदेव्यं यजमानलोकोऽमृतलोकः स्वर्गो लोकः, इति ।

यजमानस्य लोकः पृथिवी । अमृतलोको मुक्तिपदम् । स्वर्गो देवलोकः ।

इदं वा उक्तलोकत्रयमिदं सर्वमपीदं वामदेव्यम् । कया नश्चित्र इत्यस्यामृच्यु-त्पन्नयिदं सामगानां प्रसिद्धं वामदेव्याख्यं साम ।

तस्मिन्साम्नि कर्तव्यं प्रायश्चित्तप्रकारं दर्शयति—

तत्त्रिभिरक्षरैर्न्यूनं तस्य स्तोत्र उपसृप्य त्रेधाऽऽत्मानं विगृह्णीयात्पुरुष इति, इति ।

तद्वामदेव्यं साम त्रिभिरक्षरैर्न्यूनम् । कया नश्चित्र इत्यादिकरूपृचो गायत्री छन्दस्कस्तस्य च च्छन्दसस्त्रिषु पादेषु प्रत्येकमष्टावक्षराण्यपेक्षितानि । अभीषुण इत्येतस्यां तृतीयस्यामृचि प्रतिपादं सप्तैवाक्षराणि । अतस्त्रिभिरक्षरैरून्यूनत्वम् । तस्य वामदेव्यस्य साम्नः संबन्धिनि स्तोत्र उपसृप्य गानं प्रक्रम्याऽऽत्मानं स्ववाचकं पुरुष इति शब्दं त्रेधा विगृह्णीयात् । प्रत्यक्षरं विभज्यैकैकस्मिन्पादे प्रक्षिपेत् । तद्यथा । अभीषुणः सखीनां पु अविता जरितॄणां रु शतं भवास्यू तिभिः ष इति प्रक्षिप्य गायेत् ।

उक्तप्रकारेणाऽऽर्त्विज्ये वैकल्यपरिहारं दर्शयति—

स एतेषु लोकेष्वात्मानं दधात्यस्मिन्य-जमानलोकेऽस्मिन्नमृतलोकेऽस्मिन्स्वर्ग लोके स सर्वां दुरिष्टिमत्येति, इति ।

स कृतप्रायश्चित्तो यजमान एतेषु लोकेषु स्वात्मानं स्थापयति । त एव त्रयो लोका अस्मिन्नित्यादिना स्पष्टी क्रियन्ते । स यजमानः सर्वां दुरिष्टिं दोषोपेतं यज्ञमत्येत्यतिक्रामति ।

एवं नैमित्तिकमक्षरत्रयप्रक्षेपं विधाय नित्यप्रयोगेऽपि तं विधत्ते -

अपि यदि समृद्धा इव ऋत्विजः स्युरिति ह स्माऽऽहाथ हैतज्जपेदेवेति ॥ ४६ ॥ इति ।

होत्रादय ऋत्विजो यद्यपि समृद्धा इव धनलाम्पठ्यादिपूर्वोक्तवैकल्यरहिता एव स्युस्तथाऽप्येतत्पुरुष इत्यक्षरत्रयं स्तोत्रे जपेदेवेत्यैतरेयो मुनिराह स्म ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऐतरेयब्राह्मण-भाष्ये त्रयोदशाध्याये दशमः खण्डः ॥ २ ॥ (४६) [११७]

पूर्वत्र यज्ञो ब्राह्मणेन च्छन्दोभिश्च सयुग्भूत्वा हव्यं वहतीत्युक्तम् । तत्र ब्राह्मणयुक्तो वक्तव्यविशेषोऽभिहितः ।

अथ च्छन्दःप्रयुक्तं विशेषमाह—

छन्दांसि वै देवेभ्यो हव्यमूढ्वा श्रान्तानि जघनार्धे यज्ञस्य तिष्ठन्ति यथाऽश्वो वाऽश्वतरो वोहिवांस्तिष्ठेदेवं तेभ्य एतं मैत्रावरुणं पशुपुरोळाशमनु देविका हवींषि निर्वपेत्, इति।

गायत्र्यादीनि च्छन्दांसि देवार्थं हव्यवहनं कृत्वा श्रमं प्राप्य यज्ञस्य जघनार्धे पश्चिमभागे क्वचित्तूष्णीं तिष्ठन्ति। यथा लोके कश्चिदश्वो वा गर्दभाश्वसांकर्येण जातोऽश्वतरो वोहिवान्भारवहनं कृतवान्सन्दूरदेशे वहनेन श्रान्तस्तिष्ठेदेवमेतानि च्छन्दांस्यपि। तेभ्यः श्रान्तेभ्यः श्रमपरिहारार्थं हवींषि निर्वपेत्। देविका इति तेषां हविर्विशेषाणां नाम। कस्मिन्काले निर्वपेत् इति तदुच्यते। यज्ञस्यावसाने योऽयमनुबन्ध्याख्यः पशुबन्धस्तस्य पशोः संबन्धी मित्रावरुणदेवताको यः पुरोडाशस्तमनु तस्मिन्ननुष्ठिते पश्चान्निर्वपेत्।

तत्र प्रथमं हविर्विधत्ते—

धात्रे पुरोळाशं द्वादशकपालं यो धाता स वषट्कारः, इति।

धातृनाम्ने देवाय द्वादशसु कपालेषु संस्कृतं पुरोडाशं निर्वपेत्। योऽयं धातृनामको देवः स वषट्कारस्वरूपः। तेन पुरोडाशेन वषट्कारदेवतायाः श्रमोऽपगच्छति।

द्वितीयं हविर्विधत्ते—

अनुमत्यै चरुं याऽनुमतिः सा गायत्री, इति।

कलाहीने साऽनुमतिः पूर्णे राका निशाकर इत्यभिधानाच्चतुर्दशीमिश्रा पूर्णिमाऽनुमतिशब्दवाच्या। तदभिमानिन्या देवतायाः अपि तदेव नाम। तस्याश्चानुमतेर्गायत्रीरूपत्वात्तदीयः श्रमोऽपगच्छति।

तृतीयं हविर्विधत्ते—

राकायै चरुं या राका सा त्रिष्टुप्, इति।

पूर्ववद्व्याख्येयम्।

चतुर्थपञ्चमे हविषी विधत्ते—

सिनीवाल्यै चरुं या सिनीवाली सा

जगती कुह्वै चरुं या कुहूः साऽनुष्टुप्, इति ।

सा दृष्टेन्दुः सिनीवाली सा नष्टेन्दुकला कुहूरित्यमावास्यादैविध्यमभिहितम् । तदभिमानिदेवतायास्तदेव नामेति पूर्ववद्योजनीयम् । इतरेषां छन्दसां कथं श्रमपरिहार इत्याशङ्क्य सर्वेषामन्येषामुक्तच्छन्दोनुवर्तित्वात्तावतैव श्रान्तिपरिहार इत्यभिप्रेत्याऽऽह-

एतानि वाव सर्वाणि च्छन्दांसि गायत्रं त्रैष्टुभं जागतमानुष्टुभमन्वन्यान्येतानि हि यज्ञे प्रतमामिव क्रियन्ते, इति ।

एतान्येव गायत्र्यादीनि चत्वारि सर्वच्छन्दोरूपाणि । अन्यानि तूष्णिगादीनि गायत्र्यादिक्रमनुसृत्यैव वर्तन्ते । यस्मादेतानि चत्वारि यज्ञप्रयोगे प्रतमामिव प्राचुर्यातिशयेनैव क्रियन्ते प्रयुज्यन्ते तस्मादेतदनुसारित्वमितरेषां युक्तम् ।

उक्तार्थवेदनपूर्वमनुष्ठानं प्रशंसति -

एतैर्ह वा अस्य च्छन्दोभिर्यजतः सर्वैश्छन्दोभिरिष्टं भवति य एवं वेद, इति ।

एतैर्गायत्र्यादिभिः सर्वैरुष्णिगादिभिः ।

विद्वत्प्रसिद्ध्या छन्दांसि प्रशंसति-

तद्वै यदिदमाहुः सुधायां ह वै वाजी सहितो दधातीति च्छन्दांसि वै तत्सुधायां ह वा एनं छन्दांसि दधति, इति ।

वाजोऽन्नं हविर्लक्षणं तद्युक्तो ज्योतिष्टोमो वाजी । स च सुहितः सम्यगनुष्ठितः सुधायाममृते स्वर्गे दधाति यजमानं स्थापयतीति शेषः । अनेन प्रकारेण तद्वै तस्मिन्नेव यज्ञप्रतिपादके शास्त्रे यदिदं वचनमभिज्ञा आहुस्तत्तु च्छन्दांसि वै तद्वचनं यथोक्तगायत्र्यादिच्छन्दांस्येवाभिलक्ष्योक्तम् । यस्माच्छन्दांस्येनं यजमानं सुधायां स्वर्गे स्थापयन्ति तस्माच्छन्दोभिर्यायेणैतद्वचनं युक्तम् ।

वेदनं प्रशंसति-

अननुध्यायिनं लोकं जयति य एवं वेद, इति ।

मनसाऽनुध्यातुमनर्हमत्यपूर्वसुखोपेतं लोकं प्राप्नोति ।

अत्र कंचित्पूर्वपक्षमुद्भावयति –

तद्धैक आहुर्धातारमेव सर्वासां पुरस्तात्पुरस्तादाज्येन परियजेत्तदासु सर्वासु मिथुनं दधातीति, इति ।

तद्ध तस्मिन्नेव च्छन्दसां श्रमपरिहारार्थे हविषां पञ्चके केचित्पूर्वपक्षिण एवमाहुः । सर्वासामनुमत्यादीनां स्त्रीदेवतानां पुरस्तात्पुरुषदेवतारूपं धातारमेवाऽऽज्यद्रव्येण परितो यजेत् । सर्वसंग्रहार्थं पुरस्तादिति वीप्सा । तत्तेन सर्वत्र धातृविषयप्रयोगेणाऽऽसु सर्वासु स्त्रीदेवतासु मिथुनं संपादयति ।

तामिमं पूर्वपक्षं दूषयति –

तदु वा आहुर्जामि वा एतद्यज्ञे क्रियते यत्र समानीभ्यामृग्भ्यां समानेऽहन्यजतीति, इति ।

तदु वै तत्रैव पूर्वोक्तविषये केचिदभिज्ञा एवमाहुः । यत्र यस्मिन्प्रयोगे समानीभ्यामेकविधाभ्यामृग्भ्यां समानेऽहन्नेकस्मिन्नेवाहनि यजति तदेतदनुष्ठानं यज्ञे जामि वै, आलस्यमेव क्रियते संपाद्यते । प्रयुक्तयोरेवर्चोः पुनः प्रयोगस्य चर्वितचर्वणसदृशत्वात् । धातृदेवताके पुरोडाशे धाता ददातु दाशुष इति पुरोनुवाक्या । धाता प्रजामिति याज्या । तत्र यद्युपरितनामपि चतुर्णां हविषां पुरस्तादाज्येन धातारं यजेत्तदानीमिदमृग्द्वयं पुनरपि चतुर्वारमावर्तनीयम् । तथा सति नीरसो यज्ञः फलं दातुं समर्थो न भवेदित्यर्थः ।

कथं तर्हि मिथुनसिद्धिः स्यादित्याशङ्क्य लौकिकदृष्टान्तेन तत्सिद्धिमुपपादयति –

यदिह वा अपि बह्व्य इव जायाः पतिर्वाव तासां मिथुनं तद्यदासां धातारं पुरस्ताद्यजति तदासु सर्वासु मिथुनं दधाति, इति ।

यदिह वा यद्यपि लोके जाया बहुसंख्याका एव स्युस्तथाऽपि पतिर्वाव पतिरेक एव संस्तासां मिथुनं संपादयति । तथा सति यद्यासामनुमत्यादीनां पुरस्ताद्धातारं सकृदेव यजति तदानीमासु सर्वास्वनुमत्यादिषु स एक एव धाता मिथुनं संपादयति ।

वक्ष्यमाणैर्हविर्भिः सांकर्यशङ्कां वारयितुमुक्तार्थं विविच्य निगमयति-

इति नु देविकानाम् ॥ ४७॥ इति ।

अनेनोक्तप्रकारेण देविकाभिधानां देवतानां हवींष्युक्तानीति शेषः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऐतरेय-ब्राह्मणभाष्ये पञ्चदशाध्याये तृतीय खण्डः ॥ ३ ॥ (४७) [११८]

हविरन्तराणि प्रतिजानीते—

अथ देवीनाम्, इति ।

अथ देवीनामकानां देवतानां हवींषि निर्वपेदिति शेषः ।

तत्र प्रथमं हविर्विधत्ते—

सूर्याय पुरोळाशमेककपालं यः सूर्यः स धाता स उ एव वषट्कारः, इति ।

एकैकंपालं निर्वपेदिति शेषः । सूर्यस्य पूर्वोक्तं धातुस्वरूपत्वं तद्द्वारा वषट्कारस्वरूपत्वं चोपचर्य तदीयश्रमापनयो द्रष्टव्यः ।

उत्तराणि चत्वारि हवींषि विधत्ते-

दिवे चरुं या द्यौः साऽनुमतिः सो एव गायत्र्युषसे चरुं योषाः सा राका सो एव त्रिष्टुब्गवे चरुं या गौः सा सिनीवाली सो एव जगती पृथिव्यै चरुं या पृथिवी सा कुहूः सो एवानुष्टुप्, इति ।

प्रथमहविर्वन्द्याख्येयम् ।

एतेषां हविषां प्रशंसार्थं पूर्वोक्तमर्थवादं पुनरपि पठति—

एतानि वाव सर्वाणि च्छन्दांसि गायत्रं त्रैष्टुभं जागतमानुष्टुभमन्वन्यान्येतानि हि यज्ञे प्रतमामिव क्रियन्त एतैर्ह वा अस्य च्छन्दोभिर्यजतः सर्वैश्छन्दोभिरिष्टं भवति य एवं वेद तद्धै यदिदमाहुः सुधाथां ह वै वाजी सुहितो दधातीति च्छन्दांसि वै तत्सुधायां ह वा एनं

छन्दांसि दधत्यननुध्यायिनं लोकं जयति य एवं वेद तद्धैक आहुः सूर्यमेव सर्वासां पुरस्तात्पुरस्तादाज्येन परियजेत्तदासु सर्वासु मिथुनं दधातीति तदु वा आहुर्जामि वा एतद्यज्ञे क्रियते यत्र समानीभ्यामृग्भ्यां समानेऽहन्यजतीति यदिह वा अपि बह्व्य इव जायाः पतिर्वाव तासां मिथुनं तद्यदासां सूर्यं पुरस्ताद्यजति तदासु सर्वासु मिथुनं दधाति, इति।

धातारमित्येतस्य स्थाने सूर्यमित्येतावानेव विशेषः। अन्यत्सर्वं पूर्ववत्।

देविकानाम्नां देवीनाम्नां च हविषां तुल्यं सामर्थ्यमभिप्रेत्य विकल्पं दर्शयति—

ता या इमास्ता अमूर्या अमूस्ता इमा अन्यतराभिर्वाव तं काममाप्नोति य एतासूभयीषु, इति।

या देवीनाम्ना प्रसिद्धा इमा इदानीमुक्ताः सूर्याय पुरोडाशमित्यादयो याः सन्ति ता अमूः प्राक्तनग्रन्थेनोक्ता धात्रे पुरोडाशमित्यादयो देविकाः। एवं देवीरुद्दिश्य देविकातादात्म्यमुक्तम्। अथ देविका उद्दिश्य देवीतादात्म्यमुच्यते। या अमूः पूर्वत्रोक्ता देविकाः सन्ति ता इमा इदानीमुक्ता देव्यः। एवमन्योन्यतादात्म्ये सति यः काम एतासूभयविधासु लभ्यते तं काममन्यतराभिर्वैकविधाभिरेव प्राप्नोति। तस्माद्विकल्पेन प्रयोग इत्यर्थः।

अथ नैमित्तिकं समुच्चयं विधत्ते—

ता उभयीर्गतश्रियः प्रजातिकामस्य संनिर्वपेत्, इति।

अनूचानादीनां मध्ये कश्चिद्गतश्रीः। तथा च श्रुत्यन्तरे श्रूयते—'अथो वै गतश्रियः शुश्रुवान्ग्रामणी राजन्यः' इति। तादृशो गतश्रीर्यदि प्रजातिं प्रजोत्पादनसामर्थ्यं कामयते तदानीं तस्य ता देविका देवीश्चोभयीः संनिर्वपेत्समुच्चित्य निर्वपेत्।

धनकामस्य समुच्चयं निषेधति—

न त्वेपिष्यमाणस्य, इति।

धनमपेक्षमाणस्य तु नैव संनिर्वपेत् । उभयविधानां समुच्चित्य निर्वापो न कार्यः ।

विपक्षे बाधकं दर्शयति–

यदेना एषिष्यमाणस्य सांनिर्वपेदीश्वरो हास्य वित्ते देवा अरन्तोर्यद्धा अयमात्मनेऽलममंस्तेति, इति ।

वित्तमेषिष्यमाणस्य यद्येना उभयीः समुच्चित्य निर्वपेत्तदानीमस्य धनकामस्य वित्ते देवाः सर्वेऽप्यरन्तोरीश्वरः (?) अरन्तुमक्रीडितुं समर्था भवन्ति । एतदपेक्षितं वित्तं द्विषन्तीत्यर्थः । तत्र हेतुरुच्यते । यद्वै यस्मादेव कारणादयं धनार्थी, आत्मने स्वार्थमेवालममंस्त संपूर्णं वित्तं मनसा ध्यातवान् । धनलोभेन यागादिषु प्रवृत्तत्वादेतदपेक्षिते धने देवानां द्वेषो युज्यते ।

धनकामस्य समुच्चयं निषिध्य प्रजाकामस्य पूर्वत्र विहितं समुच्चयमर्थवादेन प्रशंसति–

ता ह शुचिवृक्षो गौपालायनो वृद्धद्युम्नस्याऽऽभिप्रतारिणस्योभयीर्यज्ञे संनिरुवाप तस्य ह रथगृत्सं गाहमानं दृष्ट्वोवाचेत्थमहमस्य राजन्यस्य देविकाश्च देवीश्चोभयीर्यज्ञे सममादयं यदस्येत्थं रथगृत्सो गाहत इति चतुःषष्टिं कवचिनः शश्वद्धास्य ते पुत्रनसार आसुः ॥४८॥ इति ।

शुचयः शुद्धाः समीचीनपुष्पफला वृक्षा यस्य महर्षेराश्रमे सोऽयं शुचिवृक्षनामकः सम्यक्तृणोदकप्रदानेन गोशुश्रूषां करोतीति गोपालनामा कश्चिदृषिस्तस्यापत्यं गौपालायनः पूर्वोक्तनामकः शुचिवृक्षः । वृद्धं प्रभूतं द्युम्नं धनं यस्य राज्ञः सोऽयं वृद्धद्युम्नः । अभितः शत्रून्प्रकर्षेण तरति निराकरोतीत्यभिप्रतारी कश्चिद्राजा तस्य पुत्र आभिप्रतारिणः पूर्वोक्तो वृद्धद्युम्नः । तस्य राज्ञो यज्ञे देविका देवीश्चोभयीरित्थमनेन शास्त्रोक्तप्रकारेण सममादयं समुच्चित्य मादितवानस्मि समुच्चयानुष्ठानेन वत्तदेवता हर्षितवानस्मि । तत्प्रसादादयं रथगृत्सो राजपुत्रः क्रीडार्थं जले गाहत इति । न केवलं शुचिवृक्षेण दृष्टो रथगृत्स एवैकः किंतु चतुःषष्टिसंख्याकाः शश्वत्कवचिनः सर्वदा युद्धार्थमु

द्यताः शूरा अस्य वृद्धद्युम्नस्य राज्ञस्ते तथावयस्का एव पुत्राः पौत्राश्चाऽऽसुः॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऐतरेय-
ब्राह्मणभाष्ये पञ्चदशाध्याये चतुर्थः खण्डः ॥४॥ (४८) [११९]

ज्योतिष्टोमस्तावत्सप्तसंस्थः समाप्तिभेदात्सप्तविधः । अग्निष्टोमोऽत्यग्निष्टोम उक्थ्यः षोडशी वाजपेयोऽतिरात्रोऽप्तोर्याम इति सप्त संस्था इत्याश्वलायनेनाभिहित्वात् । तत्राग्निष्टोमसाम्ना यज्ञायज्ञीयाख्येन यत्र समाप्तिः सोऽयं प्रथमरूपोऽग्निष्टोमः । स सर्वोऽपि पूर्वत्रोक्तः । अथोक्थ्यसंस्थारूपो ज्योतिष्टोमो वक्तव्यः ।

तदर्थमाख्यायिकामाह—

अग्निष्टोमं वै देवा अश्रयन्तोक्थान्यसुरास्ते समावद्वीर्या एवाऽऽसन्न व्यवर्तन्त तान्भरद्वाज ऋषीणामपश्यदिमे वा असुरा उक्थेषु श्रितास्तानेषां न कश्चन पश्यतीति सोऽग्निमुदह्वयत्, इति ।

यदा देवा अग्निष्टोममाश्रितवन्तस्तदानीमसुरा अप्युक्थनामकानि स्तोत्राणि शस्त्राणि चाऽऽश्रित्यावस्थिताः । ततस्ते देवाश्चासुराश्च यज्ञे तुल्यवीर्या एवाऽऽसन्न तु देवाः शौर्याधिक्येन व्यावृत्तिं प्राप्तास्तदानीमृषीणां मध्ये सूक्ष्मदर्शी भरद्वाजस्तानसुरान्रहस्युक्थपरानपश्यत्। दृष्ट्वा चैवमुवाच—इमे रहस्यवस्थिता असुरा उक्थेषु स्तोत्रशस्त्रेष्वाश्रितास्तानसुरानेषां देवानामृषीणां च मध्ये न कोऽपि पश्यतीति । तथोक्त्वा स भरद्वाजोऽसुरनिराकरणार्थं केनचिन्मन्त्रेणाग्निमुदह्वयदुच्चध्वनिनाऽऽह्वानं कृतवान् ।

तमिमं मन्त्रं दर्शयति—

एह्यू षुब्रवाणि तेऽग्न इत्येतरा गिर इति, इति ।

हेऽग्न एह्यु आगच्छैव ते तव सुब्रवाणि शोभनं कार्यं कथयानि । इतरा देववाक्यार्थव्यतिरिक्ता गिरोऽसुरवाच इत्येत्थमनेन प्रकारेण श्रुत्यन्तरादिति शेषः ।

अस्मिन्मन्त्र इतरशब्दार्थं दर्शयति—

असुर्या ह वा इतरा गिरः, इति ।

१ ऋ. ६-१६-१६ ।

असुरेभ्यो हिता असुर्यास्ताश्च गिरो देववाक्यादितरा देवविरोधिन्य इत्यर्थः ।

तथाऽग्निवाक्यं दर्शयति-

सोऽग्निरुपोत्तिष्ठन्नब्रवीत्किंस्विदेव मह्यं
कृशो दीर्घः पलितो वक्ष्यतीति, इति ।

भरद्वाजेनाऽऽहूतोऽग्निस्तत्समीपं प्रत्यागन्तुमुत्तिष्ठन्नेवमब्रवीत् । मह्यमग्नये सार्षिः किंस्विदेव किंनाम वक्ष्यतीति । कृशो दीर्घः पलित इत्यृषिविशेषणानि ।

तानि च स्पष्टी करोति-

भरद्वाजो ह वै कृशो दीर्घः पलित आस, इति ।

स्पष्टोऽर्थः ।

किंस्वित्पलितो वक्ष्यतीत्यग्निना पृष्टस्य भरद्वाजस्योत्तरं दर्शयति-

सोऽब्रवीदिमे वा असुरा उक्थेषु श्रिता-
स्तान्वो न कश्चन पश्यतीति, इति ।

स भरद्वाजोऽग्निं प्रत्येवमब्रवीत् । इमे वा इत्यादि पूर्ववद्व्याख्येयम् ।

अथोक्थस्तोत्रस्य साधनभूतं साकमश्वनामकं साम यदस्ति तदयं नाम निर्वक्ति-

तानग्निरश्वो भूत्वाऽभ्यत्यद्रवद्यदग्निरश्वो
भूत्वाऽभ्यत्यद्रवत्तत्साकमश्वं सामाभव-
त्तत्साकमश्वस्य साकमश्वत्वम्, इति ।

सोऽग्निर्भरद्वाजस्योत्तरं श्रुत्वा तत ऊर्ध्वं स्वयमश्वाकारो भूत्वा तानसुरा-नभिलक्ष्यात्यद्रवदतिशयेनागच्छत् । असुराणामुपरि वेगवन्तमात्मरूपमश्वं प्रवर्त्या-सुरान्मारितवानित्यर्थः । यस्मात्स्वयमश्वाकारो भूत्वा तैरसुरैः सार्कं युद्धं कृत्वा जितवांस्तस्मादेतद्वृत्तान्तसूचनाय प्रवृत्तायामेषु षुम्नवाणि त इत्यादिकायामृष्यु-त्पन्नस्य साम्नः साकमश्वमिति नाम संपन्नम् ।

तस्य साम्न उक्थस्तोत्रनिष्पादत्वं विधत्ते-

तदाहुः साकमश्वेनोक्थानि प्रणयेदप्रणीतानि वाव
तान्युक्थानि यान्यन्यत्र साकमश्वादिति, इति ।

तत्तत्र साकमश्वविषये प्रयोगाभिज्ञा आहुः साकवश्वनामकेन साम्ना स्तोत्रा-ण्युक्थनामकानि प्रणयेत्साकमश्वादन्यत्र सामान्तरेण यान्युक्थानि स्तोत्राणि प्रणी-यन्ते तान्यप्रणीतान्येव भवन्ति तस्मादिदमेव सामोक्थस्तोत्रनिष्पादकम् ।

पक्षान्तरं विधत्ते—

प्रमंहिष्ठीयेन प्रणयेदित्याहुः प्रमंहिष्ठीयेन वै देवा असुरानुक्थेभ्यः प्राणुदन्त, इति ।

प्र मंहिष्ठाय गायतेत्यस्यामृच्युत्पन्नं साम प्रमंहिष्ठीयं तेन साम्नोक्थस्तो-त्राणि निष्पादयेत् । उक्थेष्वाश्रितानसुरान्देवा एतेन साम्नोक्थेभ्यो निरा-कृतवन्तः ।

उभयोः साम्नोरौच्छिकं विकल्पं दर्शयति—

तत्प्राहैव प्रमंहिष्ठीयेन नयेत्प्र साकमश्वेन, ॥ ४९ ॥ इति ।

अहेत्ययं शब्दोऽन्यत्र निषेधार्थोऽप्यत्र विकल्पार्थः । निपातानामनेकार्थ-त्वात् । तान्युक्थस्तोत्राणि प्रमंहिष्ठीयेन साम्ना प्रणयेत् । अहैवाथवा साकमश्वेन साम्ना प्रणयेत् ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऐतरेय-ब्राह्मणभाष्ये पञ्चदशाध्याये पञ्चमः खण्डः ॥ ५ ॥ (४९) [१२०]

उक्थस्तोत्रेषु सामविशेषं विधायोक्थशस्त्रेषु सूक्तं विधातुमादौ मैत्रावरुणशस्त्रे किंचित्सूक्तं विधत्ते—

ते वा असुरा मैत्रावरुणस्योक्थमश्रयन्त-सोऽब्रवीदिन्द्रः कश्चाहं चेमानितोऽसुरान्नो-त्स्यावहा इत्यहं चेत्यब्रवीद्वरुणस्तस्मादै-न्द्रावरुणं मैत्रावरुणस्तृतीयसवने शंसती-न्द्रश्च हि तान्वरुणश्च ततो नुदेताम्, इति ।

उक्थ्यस्य क्रतोरग्निष्टोमविकृतित्वादतिदिष्टमग्निष्टोमप्रयोगमनुष्ठाय तत ऊर्ध्व-मुक्थ्यपर्यायास्त्रयोऽनुष्ठेयाः । तथा चाऽऽपस्तम्ब आह—'उक्थ्यश्चेदग्निष्टो-ममवसायाथ त्रिभ्यश्चमसगणेभ्यो राजानमतिरेचयति' इति । तत्र प्रथमे चमसगणे

१ क. ८-१०३-८ ।

मैत्रावरुणस्य यच्छस्त्रमस्ति उक्थ्य (क्थ) स्तोत्रेषु साम्ना निराकृतास्त एवासुरा इदं मैत्रावरुणशस्त्रमश्रयन्त तदानीं तत्रावस्थितः स इन्द्र ईश्वरदेवान्प्रत्येवमब्रवीत् । असुराणामपनोदने मम सहायोऽपेक्षितस्ततो हे देवा युष्माकं मध्ये कश्चाहं चेमानसुरानितो मैत्रावरुणशस्त्रान्नोत्स्यावहा अपनोदं करिष्याव इति । देवेष्ववस्थितो वरुणोऽहं चेत्यब्रवीद्धि, इन्द्र त्वं चाहं चेत्यर्थः । यस्मादेवं तस्मादुभयोर्मेलनेन तेषामसुराणामपनोदार्थमैन्द्रावरुणं सूक्तं तृतीयसवने मैत्रावरुणानामक ऋत्विक्शंसेत् । 'इन्द्रावरुणा युवमध्वराय न इत्येतद्दशर्चं सूक्तमैन्द्रावरुणं तेन तुष्ट इन्द्रश्च वरुणश्च तानसुरांस्ततः शस्त्रादपनुदेतां निराकुर्याताम् ।

द्वितीये चमसगणे किंचित्सूक्तद्वयं विधत्ते-

> ते वै ततोऽपहता असुरा ब्राह्मणाच्छंसिन उक्थमश्रयन्त सोऽब्रवीदिन्द्रः कश्चाहं चेमानितोऽसुरान्नोत्स्यावहा इत्यहं चेत्यब्रवीद्बृहस्पतिस्तस्मादैन्द्राबार्हस्पत्यं ब्राह्मणाच्छंसी तृतीयसवने शंसतीन्द्रश्च हि तान्बृहस्पतिश्च ततो नुदेताम्, इति ।

ततो मैत्रावरुणशस्त्रान्निराकृता असुरा ब्राह्मणाच्छंसिनः शस्त्रमाश्रितवन्तः । 'उदप्रुतो न वयो रक्षमाणा इत्येदवचस्पतिदेवताकं द्वादशर्चं सूक्तम् । 'अच्छा म इन्द्रं मतयः स्वार्विद इत्येकादशर्चमैन्द्रं सूक्तम् । तदुभयं मिलितं सदैन्द्राबार्हस्पत्यं संपद्यते । तदेतद्ब्राह्मणाच्छंसी ब्रूयात् । अन्यत्पूर्ववद्व्याख्येयम् ।

तृतीये चमसगणे सूक्तं विधत्ते-

> ते वै ततोऽपहता असुरा अच्छावाकस्योक्थमश्रयन्त सोऽब्रवीदिन्द्रः कश्चाहं चेमानितोऽसुरान्नोत्स्यावहा इत्यहं चेत्यब्रवीद्विष्णुस्तस्मादैन्द्रावैष्णवमच्छावाकस्तृतीयसवने शंसतीन्द्रश्च हि तान्विष्णुश्च ततो नुदेताम्, इति ।

[४]सं वां कर्मणा समिषेत्यष्टर्चमैन्द्रावैष्णवंसूक्तम् । अन्यत्पूर्ववद्व्याख्येयम् ।

---

१ ऋ. ७-८२-१ । २ ऋ. १०-६८-१ । ३ ऋ. १०-४३-१ । ४ ऋ. ६-६९-१ ।

सूक्तानां द्विदेवताकत्वं प्रशंसति—

द्वंद्वमिन्द्रेण देवताः शस्यन्ते द्वंद्वं वै मिथुनं तस्माद्द्वंद्वान्मिथुनं प्रजायते प्रजात्यै, इति ।

इन्द्रेण सह द्वंद्वं युग्मं भूत्वा वरुणबृहस्पतिविष्णुदेवताः क्रमेण शस्यन्ते । द्वंद्वं च लोके स्त्रीपुरुषरूपं मिथुनं तादृशान्मिथुनादपत्यरूपं मिथुनं प्रजायते । ततो द्वंद्वशंसनं यजमानस्य प्रजात्यै भवति ।

वेदनं प्रशंसति—

प्रजायते प्रजया पशुभिर्य एवं वेद, इति ।

शस्त्रिणां त्रयाणां होत्रकाणां सूक्तानि विधाय पोतुर्नेष्टुश्च मन्त्रान्तराणि विधत्ते—

अथ हैते पोत्रीयाश्च नेष्ट्रीयाश्च चत्वार ऋतुयाजाः षळृचः सा विराड्दशिनी तद्विराजि यज्ञं दशिन्यां प्रतिष्ठाप-यन्ति प्रतिष्ठापयन्ति ॥ ५८ ॥ इति ।

प्रैषग्रन्थे पञ्चमे सूक्ते होता यक्षदित्यादिकौ द्वितीयाष्टमौ मन्त्रौ पोतुर्द्वावृतुयाजौ तथा तत्रैव तृतीयनवमौ मन्त्रौ नेष्टुर्द्वावृतुयाजौ । इत्येवं चत्वार ऋतुयाजास्ते मिलित्वा पोतृसंबन्धान्नेष्टृसंबन्धाच्च पोत्रीया नेष्ट्रीयाश्च भवन्ति । तथा प्रस्थितयाज्याः पोतुस्तिस्र ऋचो नेष्टुश्च तिस्र ऋच इत्येवं षळृचो भवन्ति तदेतन्मन्त्रदशकं प्रशंसति—सा विराडित्यादिना । सा पूर्वोक्ता मन्त्रसमष्टिर्दशिनी दशसंख्यायुक्ता सती विराट्छन्दः संपद्यते । दशाक्षरा विराडिति श्रुत्यन्तरात् । तत्तेन दशसंप्रयोगेण दशिन्यां दशसंख्योपेतायां विराजि यज्ञमृत्विजः प्रतिष्ठापयन्ति ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऐतरेय-ब्राह्मणभाष्ये पञ्चदशाध्याये षष्ठः खण्डः ॥ ६ ॥ (५०) [१२१]

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकवीरबुक्कणसाम्राज्यधुरंधरसायणाचार्यकृतावैतरेयब्राह्मणभाष्ये पञ्चदशोऽध्यायः ॥ १५ ॥

इत्यैतरेयब्राह्मणे तृतीयपञ्चिका समाप्ता ॥ ३ ॥

(पञ्चिकाङ्कः ३ । अध्यायाङ्कः—१५ । खण्डाङ्कः—१ १ ।)

अथ चतुर्थपञ्चिकाप्रारम्भः ।

षोडशोऽध्यायः ।

संस्थेष्टीनां वाग्यमश्चर्त्विजां च
यागादेर्वा देविकानां विशेषाः ॥
संस्थोक्थ्यस्य स्तोत्रशस्त्रप्रकल्पिः
शस्त्राण्याहुः शस्त्रिणां होत्रकाणाम् ॥ १ ॥

ज्योतिष्टोमभेद उक्थ्यः समाप्तिः । अथ षोडश्युच्यते । तद्विषयं शंसनं विधत्ते—

देवा वै प्रथमेनाह्नेन्द्राय वज्रं समभरंस्तं द्वितीये नाह्नाऽसिञ्चंस्तं तृतीयेनाह्ना प्रायच्छंस्तं चतुर्थेऽहन्प्राहरत्तस्माच्चतुर्थेऽहन्षोळशिनं शंसाति, इत्रि ।

अग्निष्टोक्थ्यादिसंस्थाविशेषः स्वतन्त्रः क्रतुत्वाद्यथा पृथगनुष्ठातुं योग्यस्तथा षोडशी स्वतन्त्रः क्रतुः । तथा च शाखान्तरे पठन्ति—'न वै षोडशी नाम यज्ञोऽस्ति यद्वाव षोडशꣳ स्तोत्रꣳ षोडशꣳ शस्त्रं तेन षोडशी' इति । तथा सत्येयं संस्थाविशेषः पृष्ठ्यषडहचतुर्थेऽहनि प्रयुज्यते । अतस्तत्रैवैतच्छंसनाविधानं देवाः पुरा पृष्ठ्यषडहे प्रथमेनाह्ना प्रथमदिवसनिष्पाद्येन सोमप्रयोगेणेन्द्रार्थं वज्रं समभरन्संपादितवन्तः । अत्र सर्वत्राहःशब्दोऽह्ना निष्पाद्यसोमप्रयोगमभिधत्ते । तत्र संपादितं वज्रं द्वितीयेनाह्नाऽसिञ्चन् । सेचनं नाम लोहमयानां शङ्कुकुठारादीनां तीक्ष्णत्वाय दाढर्याय चाग्नौ प्रताप्य यथोचितं नीरे स्थापनं तदिदं सेचनं वज्रे कृतवन्तः । कृत्वा च तृतीयेनाह्ना तं वज्रमिन्द्राय प्रायच्छन्दत्तवन्तः । स चेन्द्रस्तं वज्रं चतुर्थेऽहनि शत्रोरुपरि प्राहरत् । तस्मात्पृष्ठ्यषडहस्य चतुर्थाहःप्रयोगे षोळशिनं शस्त्रं शंसेत् । असाावि सोम इन्द्र ते (१-८४-१) इत्यादिकं षोळश्याख्यं शस्त्रम् । तथा चाऽऽश्वलायन आह—अथ षोळश्यसावि सोम इन्द्र त इति स्तोत्रियानुरूपाविति ।

षोळशिशंसनं प्रशंसति—

वज्रो वा एष यत्षोळशी तद्यच्चतुर्थेऽहन्षोळशिनं

शंसति वज्रमेव तत्प्रहरति द्विषते भ्रातृव्याय
वधं योऽस्य स्तृत्यस्तस्मै स्तर्तवै, इति ।

षोळशिनो वज्रस्वरूपत्वाद्यः पुमानस्य यजमानस्य स्तृत्यो हिंसनीयस्तस्मै स्तर्तवै तस्य हिंसार्थं वधहेतुं वज्रमेव भ्रातृव्याय प्रहरति ।

तस्य शस्त्रस्य कालं विधत्ते—

वज्रो वै षोळशी पशव उक्थानि तं
परस्तादुक्थानां पर्यस्य शंसति, इति ।

यथा पूर्वत्राग्निष्टोमप्रयुक्तानां द्वादशशस्त्राणामुपरि त्रीण्युक्थ्यशस्त्राणि प्रयुक्तानि तथाऽत्रापि त्रयाणामुक्थशस्त्राणां परस्तादुपरि पर्यस्य षोळशिनमेव शंसेत् । उक्थानां पशुरूपत्वात्षोळशिनो वज्ररूपत्वाच्चायं क्रम उपपन्नः ।

तामेतामुपपत्तिं प्रकटयति—

तं यत्परस्तादुक्थानां पर्यस्य शंसति वज्रेणैव
तत्षोळशिना पशून्परिगच्छति तस्मात्पशवो
वज्रेणैव षोळशिना परिगता [illegible]भ्युपाव-
र्तन्ते तस्मादश्वो वा पुरुषो वा गौर्वा हस्ती वा
परिगत एव स्वयमात्मनेऽत एव वाचाऽभिषिद्ध
उपावर्तते वज्रमेव षोळशिनं पश्यन्वज्रेणैव षोळ-
शिना परिगतो वाग्घि वज्रो वाक्षोळशी, इति ।

तं षोळशिनं यद्यस्मात्कारणादुक्थशस्त्राणां परस्तात्पर्यस्य शंसति । तत्तेन शंसनेन षोळशिरूपेण वज्रेणैवोक्तरूपान्पशून्परिगच्छति परितो नियमेन याति । तस्माल्लोकेऽप्यरण्ये संचारार्थं गताः पशवः षोळशिना वज्रेणैव नियमितत्वात्सायंकाले मनुष्यानभिलक्ष्य तत्तद्गृहेषूपावर्तन्ते । अन्यथा तस्मादरण्यादरण्यान्तरमेव गच्छेयुः । न केवलं तृणचरणार्थमरण्यगतानां सायंकाले पुनरागमनाय वज्ररूपेण नियमितत्वं किं तर्हि ग्रामेष्वपि । तस्मात्षोळशिवज्रनियमितत्वादश्वपुरुषगोहस्त्यादीनामन्यतमः स्वयमेव परप्रेरणामन्तरेणैव परिगतो नियमित आत्मना (?) स्वयं बन्धनाय तत्स्थाने समागच्छति । किं चात एव

षोळशिवज्रनियमितत्वादेव वाचा शीघ्रमागच्छेत्यादिवाक्येनाभिषिद्धोऽभितो बद्धः पुरुषो वर्तते । यथा रज्ज्वा बद्धो बलीवर्द आनीयमान आगच्छति तद्वद्वाचा बद्धः पुरुषः । अत एवारण्यकाण्डे वक्ष्यति—'तस्य वास्तन्तिर्नामानि दामानि तदस्येदं वाचा तन्त्या नामभिर्दामभिः सर्वं सितम्' इति । वाङ्मात्रेणाऽऽगमने कारणमुच्यते । षोळशिनं वाग्वज्ररूपमेव पश्यन्षोळशिना वज्रेणैव नियमितो भवति तद्द्वारा तस्य वज्रत्वम् । षोळशी च वाङ्मयैः सूक्तादिभिर्निष्पन्नत्वात्स्वयमपि वाङ्मयो भवति । वाक्श्च वज्रत्वं लोके प्रसिद्धं राजादीनां भर्त्सनादौ वज्रप्रहारेणैव चित्ते व्यथोदयात् । तदेवं सर्वनियामकत्वात्षोळशिनः प्रशस्तत्वं सिद्धम् । यदुक्तं पुरस्तादुक्थानां पर्यस्य शंसतीति तत्रोक्थशस्त्रेभ्य उत्तरकालावस्थानमेव पर्यस्येति शब्देन विवक्षितमिति व्याख्यातमथवोत्तरकालस्य परस्तादिति शब्देन विवक्षितमिति व्याख्यातमथवोत्तरकालस्य परस्तादिति शब्देनैव सिद्धत्वात्पर्यस्येति शब्देन शस्त्रगतानामृचामध्ययनपाठाद्विपर्यासोऽभिधीयते । द्विविधं षोळशिशस्त्रं विहृतमविहृतं च । तत्राविहृतं नामाध्ययनक्रमेणैव शंसनम् । विहृतं तु ऋचां परस्परव्यतिषङ्गः । स त्वाश्वलायनेन दर्शितः—'ऊर्ध्वं स्तोत्रियानुरूपाभ्यां तदेव शस्त्रं विहृत्यादान्यवधायार्धर्चशः शंसेत्पूर्वासां पूर्वाणि पदानि गायत्र्यः पङ्क्तिभिः पङ्क्तीनां तु द्वे द्वे पदे शिष्येते ताभ्यां प्रणुयात्' इति । तदेतदुदाहृत्य प्रदर्श्यते—'इमा धाना घृतस्नुवो हरी इहोप वक्षतः । इन्द्रं सुखतमे रथे' (१-१६ २) इत्येषा गायत्री । 'सुसंदृशं त्वा वयं मघवन्वन्दिषीमहि । प्र नूनं पूर्णवन्धुरः स्तुतो याहि वशाँ अनु योजा न्विन्द्र ते हरी (१-८२-३ योऽयमध्ययनपाठः सोऽविहृतः । विहृतपाठस्तूच्यते । इमा धाना घृतस्नुवः सुसंदृशं त्वा वयम् । हरी इहोपवक्षतो मघवन्वन्दिषीमहोमिन्द्रं सुखतमे रथे प्र नूनं पूर्णवन्धुरः । स्तुतो याहि वशाँ अनु योजा न्विन्द्र ते हरोमिति । अनेन प्रकारेण विपर्यस्य शंसेत् ।

अथ प्रश्नोत्तराभ्यां षोळशिशब्दं निर्वक्ति—

तदाहुः किं षोळशिन षोळशित्वामिति षोळशः स्तोत्राणां षोळशः शस्त्राणां षोळशाभिरक्षरैरादत्ते षोळशभिः प्रणौति षोळशपदां निविदं दधाति तत्षोळशिनः षोळशित्वम्, इति ।

षोळशिशब्दो ग्रहविशेषं स्तोत्रविशेषं शस्त्रविशेषं चाभिधत्ते । तेषामेकैकस्वरूपवतां षोळशिशब्दवाच्यत्वमयुक्तम् । तच्छब्दप्रवृत्तौ निमित्तान्तरं तु न पश्याम इति ब्रह्मवादिनामभिप्रायः । षोडशसंख्यायुक्तत्वात्षोळशित्वमित्युत्तरम् । तत्र कथमिति तदुच्यते । अग्निष्टोमसंस्थो ज्योतिष्टोमो द्वादशशस्त्रोपेतः । तथा च शाखान्तरे श्रूयते—'द्वादशाग्निष्टोमस्य स्तोत्राणि इति । तद्गर्भित उक्थसंस्थास्त्रिभिः स्तोत्रैरतिरिच्यते । तस्मात्पञ्चदश स्तोत्राणि भवन्ति । तद्गर्भितः षोळशिसंस्थ एकेन स्तोत्रेणातिरिच्यते । ततः स्तोत्राणां मध्य एतत्स्तोत्रप्रयोगः षोडशसंख्यापूरको भवति । तथा शस्त्राणां मध्येऽप्येतच्छस्त्रप्रयोगः षोडशसंख्यापूरकः । किं चास्मिञ्छस्त्रे होत्रा संपादिताया अनुष्टुभः पूर्वार्धगतानि षोडशाक्षराण्युच्चार्यावस्गति । उत्तरार्धगतानि षोडशाक्षराण्युच्चार्य प्रणौति प्रणवमुच्चारयति । किं चास्य मदे जरितरित्यादिका षोडशपदोपेता निविच्छस्त्रमध्ये प्रक्षिप्यते । अतो बहुधा षोडशसंख्यायोगादयं प्रयोगः षोळशिनामोपेतः ।

प्रकारान्तरेण षोळशिनं प्रशंसति—

द्वे वा अक्षरे अतिरिच्येते षोळशिनोऽनुष्टुभमभिसंपन्नस्य वाचो वाव तौ स्तनौ सत्यानृते वाव ते, इति ।

योऽयं षोळशी सोऽयं द्व्यक्षराधिकामनुष्टुभं यदा संपन्नो भवति तदानीं हे एवाक्षरे अधिके भवतः । तथा हि सूत्रकारो विहृतस्येत्युपक्रम्य शाखान्तरीया इन्द्र जुषस्वेत्यादिका ऋचः पठितवान् । तस्याः पूर्वस्मिन्नर्धर्चे षोडशाक्षराण्युत्तरार्धर्चेऽष्टादश ततोऽक्षरद्वयाधिक्यं वाग्वा अनुष्टुबिति श्रुत्यन्तरे सा वाचोऽनुष्टुबवयवत्वात्तदात्मिकाया वाग्देवतायाः स्त्रीरूपायां अधिकाक्षररूपौ स्तनौ संपद्येते । यदेतल्लोके सत्यवदनं यच्चानृतवदनं तदुभयमपि वाचः स्तनरूपमतोऽधिकाक्षरायाः सत्यानृतरूपत्वम् ।

उक्तार्थवेदनं प्रशंसति—

अवत्येनं सत्यं नैनमनृतं हिनस्ति य एवं वेद ॥ १ ॥ इति ।

एनं वेदितारं सत्यवाक्पालयति सुकृतोत्पादकत्वात् । अनृतवाग्म हिनस्ति दुरितस्यानुदयात् ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऐतरेयब्राह्मण-भाष्ये षोडशाध्याये प्रथमः खण्डः ॥ १ ॥ [१२२]

षोळशिशस्त्रं विधाय षोळाशिस्तोत्रनिष्पादकं सामविशेषं विधत्ते—

गौरिवीतं षोळशिसाम कुर्वीत तेजस्कामो ब्रह्मवर्चसकामस्तेजो वै ब्रह्मवर्चसं गौरिवीतं तेजस्वी ब्रह्मवर्चसी भवति य एवं विद्वान्गौरिवीतं षोळशिसाम कुरुते , इति ।

केनचिन्महर्षिणा गौरिवीतनाम्ना दृष्टत्वात्साम्नापि गौरिवीतनामकं तत्तु आभि प्रगोपतिं गिरा (८·६९-४) इत्यास्यामृच्युत्पन्नं तदत्र षोळाशिस्तोत्रे साम कुर्वीत । तेजः शरीरकान्तिः । ब्रह्मवर्चसं श्रुताध्ययनसंपत्तिः ।

सामान्तरं विधत्ते -

नानदं षोळाशिसाम कर्तव्यमित्याहुरिन्द्रो वै वृत्राय वज्रमुदयच्छत्तमस्मै प्राहरत्तमभ्यहनत्सोऽभिहतो व्यनदद्यद्व्यनदत्तन्नानदं सामाभवत्तन्नानदस्य नानदत्वमभ्रातृव्यं वा एतद्भ्रातृव्यहा साम यन्नानदम् , इति ।

मानदाख्यं किंचित्साम तत्तु प्रत्यस्मै पिपीषत इत्यस्यामृच्युत्पन्नं तदेतत्साम षोळाशिस्तोत्रे कर्तव्यमित्यन्ये केचिदाहुः । तस्य नानदत्वं कथमिति तदुच्यते । वज्रप्रहारेणाभिहतो वृत्रो व्यनदद्विशिष्टमुच्चैर्ध्वनिं नानदं कृतवान् । स च ध्वनिर्नदसामाकारेण संपन्नः । ततो नानदोत्पन्नत्वान्नानदमिति नाम । तत्साम भ्रातृव्यरहितं तत्परिशीलनवन्तः सर्वेऽपि मैत्रीमेव प्रतिपद्यन्ते न तु कश्चिदपि द्वेषम् । किं चैतत्साम भ्रातृव्यहा पूर्वं विद्यमानस्य शत्रो र्घातकम् ।

वेदनं प्रशंसति—

अभ्रातृव्यो भ्रातृव्यहा भवति य एवं विद्वान्नानदं षोळशिसाम कुरुते, इति।

गौरिवीतं नानदं वा सामेत्येवं पक्षद्वयं संपन्नं तयोः पक्षयोः शस्त्रविशेषव्यवस्थां विधत्ते—

तद्यदि नानदं कुर्युरविहृतः षोळशी शंस्तव्योऽविहृतासु हि तासु स्तुवते यदि गौरिवीतं विहृतः षोळशी शंस्तव्यो विहृतासु हि तासु स्तुवते, इति।

अविहृतरूपः परस्परव्यतिषङ्गरहितो यथाधीतपाठः सोऽयं नानदपक्षे कर्तव्यः। यतः सामगा अप्यविहृतासु व्यतिषङ्गरहितास्वृक्षु नानदसाम्ना स्तुवते तस्मादविहृतत्वमेवात्र योग्यम्। यथा वाव स्तोत्रमेवं शस्त्रमिति न्यायात्। गौरिवीतपक्षे शस्त्रमपि परस्परव्यतिषङ्गेण विहृतं पठनीयं सामगैर्विहृतासु व्यतिषक्तास्वृक्षुगौरिवीतसाम्ना स्तूयमानत्वात्।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऐतरेयब्राह्मणभाष्ये षोडशाध्याये द्वितीयः खण्ड ॥ २ ॥ (१२३)

अथ विहरणप्रकारं विधत्ते—

अथातश्छन्दांस्येव व्यतिषजत्या[1] त्वा वहन्तु हरय उपो षु शृणुही गिर इति गायत्रीश्च पङ्क्तीश्च व्यतिषजति गायत्रो वै पुरुषः पाङ्क्ता पशवः पुरुषमेष तत्पशुभिर्व्यतिषजति पशुषु प्रतिष्ठापयति यदु गायत्री च पङ्क्तिश्च ते द्वे अनुष्टुभौ तेनो वाचो रूपादनुष्टुभो रूपाद्ज्ररूपान्नैति, इति।

अथ सामद्वयविधानानन्तरमतो गौरिवीतपक्षे विहृतस्यापेक्षितत्वात्तदुच्यत इति शेषः। स्वस्वस्थानाद्विभज्यान्यत्र नयनं विहरणम्। तच्च समानच्छन्दस्कयोरेव भवति। तद्व्यावृत्त्यर्थमुच्यते—छन्दांस्येव व्यतिषजतीति। परस्परविलक्षणानि च्छन्दांस्येव व्यतिषक्तानि कुर्युरिति। तत्र कस्य च्छन्दसः

---

[1] ऋ. १-१६-१। २ ऋ. १-८२-१

केन च्छन्दसा सह व्यतिषङ्ग इति तदेतदुदाहरणपूर्वकं प्रदर्श्यते । आ त्वावह-न्त्वित्यादिकास्तिस्र ऋचो गायत्रीछन्दस्का उपोष्वित्येका सुसंदृशामिति द्वे एतास्तिस्रः पङ्क्तिच्छन्दस्कास्ता उभयीः परस्परं व्यतिषजन्मिश्रयेत् । गायत्र्याः प्रथमपादमुक्त्वा तेन सह पङ्क्तेः प्रथमपादमुच्चारयेत् । सोऽयं प्रकारोऽस्माभिः पूर्वमेवोदाहृतः । लोके पुरुषो गायत्र उपनीतेन गायत्र्या अनुष्ठेयत्वात् । पशवश्च पाङ्क्तैश्चतुर्भिः पादैर्मुखेन च पञ्चसंख्योपेतत्वात् । तत्र गायत्रीपङ्क्त्योर्मेलनेन पुरुषस्य पशूनां च मेलनं भवति । अतः पुरुषं पशुषु प्रतिष्ठापयति । किं च यद्धेणैव कारणेन गायत्री च पङ्क्तिश्च मिलिते सत्ये (त्यो) ते द्वे अनुष्टुभौ संपद्येते । गायत्र्यास्त्रिपादत्वात्पङ्क्तेश्च पञ्चपादत्वान्मिलितानामष्टानां पादानां विद्यमानत्वात्तेनो तेनैव मेलनेन कारणेनायं पुरुषो वामूपादनुष्टुब्रूपाद्बृहतीरूपाच्च नैति-कदाचिदपि वियुक्तो न भवति । शस्त्रस्याक्षरात्मकत्वेन वामूपत्वमष्टपादसंपत्त्या वनुष्टुब्द्वयरूपत्वं षोडशिनः पञ्चादिनियामकत्वेन बृहतीरूपत्वमतो नास्ति त्रिविधवियोगः ।

छन्दोन्तरयोर्विहरणं विधत्ते-

'यदिन्द्र पृतनाज्येऽयं ते अस्तु हर्यत इत्युष्णिहश्च बृहतीश्च व्यतिषजत्यौष्णिहो वै पुरुषो बार्हताः पशवः पुरुषमेव तत्पशुभिर्व्यतिषजति पशुषु प्रतिष्ठापयति यदुष्णिक्च बृहती च ते द्वे अनुष्टुभौ तेनो वाचो रूपादनुष्टुभो रूपाद्बृहतीरूपान्नैति, इति ।

यदिन्द्र इत्यादिकास्तिस्र उष्णिक्छन्दस्काः ऋचोऽयं ते अस्त्वित्यादिकास्तिस्रो बृहतीछन्दस्काः । उपनीतः पुरुषो व्याहृत्यक्षरचतुष्टयोपेतां चतुर्विंशत्यक्षरां गायत्रीं व्यतिषजत्युष्णिक्चाष्टाविंशत्यक्षरा ततः पुरुषस्यौष्णिहत्वम् । पशूनां बार्हतत्वं शाखान्तरे श्रुतम्-' छन्दांसि पशुष्वाजिमयुस्तान्बृहत्युदजयत्तस्माद्बार्हताः पशव उच्यन्ते ' इति । बृहती च षट्त्रिंशदक्षरा तस्या उष्णिग्योगे सति चतुःषष्टयक्षरसंपत्तेरनुष्टुब्द्वयम् ।

छन्दोन्तरयोर्विहरणं विधत्ते-

'आधूर्ष्वस्मै बृहन्वीर ब्रह्मकृतिं जुषाण इति ।

---

१ ऋ. ८-१२-२५ ॥ २ ऋ. ३-४४-१ ॥ ऋ. ७-३४-४ ॥
४ ऋ. ७-२९-२ ॥

द्विपदां च त्रिष्टुभं च व्यतिषजति द्विपाद्वै पुरुषो वीर्यं त्रिष्टुप्पुरुषमेव तद्वीर्येण व्यतिषजति वीर्ये प्रतिष्ठापयति तस्मात्पुरुषो वीर्ये प्रतिष्ठितः सर्वेषां पशूनां वीर्यवत्तमो यदु द्विपदा च विंशत्यक्षरा त्रिष्टुप्च ते द्वे अनुष्टुभौ तेनो वाचो रूपादनुष्टुभो रूपाद्वज्ररूपान्नौति, इति ।

आघृष्वस्मा इत्येषा पादद्वयोपेता ब्रह्मन्वीरेत्येषा त्रिष्टुप्छन्दस्का । पुरुषस्य द्विपात्त्वं प्रसिद्धं त्रिष्टुभो वीर्यहेतुत्वाद्वीर्यत्वं तस्मादुभयमेलनेन पुरुषं वीर्ये प्रतिष्ठापयति । तस्माल्लोकेऽपि सर्वेषां द्विपदां चतुष्पदानां पशूनां मध्ये पुरुषस्य शक्त्याधिक्यात्पुरुषो वीर्ये प्रतिष्ठितः । द्विपदा चेथं विंशत्यक्षराऽष्टाक्षरे प्रथमे पादे संयुक्ताक्षरयोर्विभागेन पञ्चाक्षरत्वे सति दशसंख्यापूर्तेः । एवं पञ्चाक्षरैस्त्रिष्टुभश्चतुर्णां पादानां संधानं त्रिष्टुप्चत्वारिंशदक्षरा मिलित्वा चतुःषष्टिसंपत्त्याऽनुष्टुब्द्वयं संभवति ।

छन्दोन्तरयोर्विहरणं विधत्ते—

एष ब्रह्मा प्र ते महे विदथे शंसिषं हरी इति द्विपदाश्च जगतीश्च व्यतिषजति द्विपाद्वै पुरुषो जागताः पशवः पुरुषमेव तत्पशुभिर्व्यतिषजति पशुषु प्रतिष्ठापयति तस्मात्पुरुषः पशुषु प्रतिष्ठितोऽत्ति चैनानधि च तिष्ठति वशे चास्य यदु द्विपदा च षोळशाक्षरा जगती च ते द्वे अनुष्टुभौ तेनो वाचो रूपादनुष्टुभो रूपाद्वज्ररूपान्नौति, इति ।

एष ब्रह्मेत्यादिकास्तिस्रो द्विपदाः प्र ते मह इत्यादिकास्तिस्रो जगत्यः । पशूनां जागतत्वं शाखान्तरे सोमाहरणकथायां श्रूयते—'सा पशुभिश्च दीक्षया चाऽऽगच्छत्तस्माज्जगती छन्दसां पशव्यतमा' इति । यस्मान्मेलनेन पुरुषं पशुषु प्रतिष्ठापयति तस्मादयं पुरुषः पशुषु प्रतिष्ठितः । तस्मिन्क्षीरादिकमत्ति चैनान्पशूनधितिष्ठति नियमयति च । तस्मादस्य पुरुषस्य वशे सर्वे पशवो वर्तन्ते ।

---

१ ऋ. १०·९६ १ ।

यद्यस्मादेव कारणादियं द्विपदा षोडशाक्षरा जगती चाष्टाचत्वारिंशदक्षरा ततो मिलित्वा चतुःषष्टित्वादनुष्टुब्द्वयत्वम् ।

छन्दोन्तरसंयुक्ताः काश्चिदृचो विधत्ते—

त्रिकद्रुकेषु माहिषो यवाशिरम् । प्रोष्वस्मै पुरोरथमित्यतिच्छन्दसः शंसाति च्छन्दसां वै यो रसोऽत्यक्षरत्सोऽतिच्छन्दसमभ्यत्यक्षरत्तदतिच्छन्दसोऽतिच्छन्दस्त्वं सर्वेभ्यो वा एष च्छन्देभ्य संनिर्मितो यत्षोळशी तद्यदातिच्छन्दसः शंसाति सर्वेभ्य एवैनं तच्छन्दोभ्यः संनिर्मिमीते, इति ।

त्रिकद्रुकेष्विति त्र्युचे यास्तिस्र ऋचस्ता अतिच्छन्दोयुक्तास्तथा प्रोष्वस्मा इति त्र्यृचोऽपि ता उभयीः शंसेत् । छन्दसां गायत्र्यादीनां यो रसः सारोऽत्यक्षरदतिशयेनास्रवत्तदानीं स रसोऽतिच्छन्दसमभिलक्ष्यातिशयेनास्रवत् । तस्माच्छन्दोरसस्यातिशयेन स्रवणादतिच्छन्दस्त्वं नाम संपन्नम् । षोडशी चोक्तप्रकारेण सर्वेभ्यश्छन्दोभ्यः सम्यङ्निर्मितस्तस्मादतिच्छन्दसां शंसनेनायं होतैनं यजमानं सर्वच्छन्दोभ्यो निर्मिमीते ।

वेदनं प्रशंसति—

सर्वेभ्यश्छन्दोभ्यः संनिर्मितेन षोळशिना राध्नोति य एवं वेद ॥ ३ ॥ इति ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऐतरेयब्राह्मण भाष्ये षोडशाध्याये तृतीयः खण्डः ॥ ३ ॥ (१२४)

अथ पूर्वोक्तानामतिच्छन्दसामनुष्टुप्-संपादनाय मेलनं विधत्ते—

महानाम्नीनामुपसर्गानुपसृजति, इति ।

विदा मघवन्नित्यस्मिन्नवाके प्रोक्ता ऋचो महानाम्न्यस्तासां संबन्धिन उपसर्गाः पञ्चविधाः । ते चाऽऽश्वलायनेन दर्शिताः—' प्रचेतन प्रचेतयाऽग्न इहि पिब मत्स्व । ऋतुश्छन्द ऋतं बृहत्सुम्न आधेहि नो वसवित्यनुष्टुप् ' इति । तत्र प्रचेतयेत्येकः प्रथम उपसर्गः प्रचेतयेति द्वितीयस्यानुभावपि द्वितीयस्यां महा-

---

१ ऋ. २-२२-१ । २. १०-१५३ १ ॥

नाम्न्यामाम्नातौ । आयाहि पिब मत्स्वेति तृतीय उपसर्गतृतीयस्यां महानाम्न्यामाम्नातः । क्रतुश्छन्द ऋतं बृहदित्ययं चतुर्थ उपसर्गः स च षष्ठ्यां महानाम्न्यामाम्नातः । तुम्न आधेहि नो वसविति पञ्चम उपसर्गः स चाष्टम्यां महानाम्न्यामाम्नातः । एतेषु पञ्चसूपसर्गेषु मिलित्वा द्वात्रिंशदक्षरसद्भावादियमेकाऽनुष्टुबिति सूत्रस्यार्थः । इयं चानुष्टुबविहतषोळाशिनि तयै (थै) व पठनीया । अन्यत्र तु विहतषोळशिनि पञ्चाप्युपसर्गान्विभज्यातिच्छन्दःसु पञ्चसु योजनीया । अत एवोपसृज्यमानत्वादुपसर्गा इत्युच्यन्ते । तदेतत्संयोजनमन्त्रोपसृजतीति शब्देन विधीयते । त्रिकद्रुकेष्विति येयं प्रथमाऽतिच्छन्दास्तस्याश्चतुःषष्टयक्षरत्वान्न पराण्यपेक्षते सेयमनुष्टुब्द्वयसंपत्तिः शक्येति । द्वितीयस्यामृचि तदनुष्टुब्दं पूरयितुं प्रचेतनेत्यक्षरचतुष्टयं योजनीयम् । तृतीयस्यामृचि प्रचेतयेति योजनीयम् । प्रोष्वस्मा इत्यादिषु तिसृष्ववशिष्टास्त्रय उपसर्गाः क्रमेण योजनीयाः । सोऽयं प्रकार आश्वलायनेनोक्तः— साऽनुष्टुभमतिच्छन्दःस्ववदध्याद्द्वितीयतृतीययोः पादयोरवसानत उपदध्यात्प्रचेतनेति पूर्वस्यां प्रचेतयेत्युत्तरस्यामुत्तरास्वितरान्पादान्षष्ठान्कृत्वाऽनुष्टुप्कारं शंसेदिति ।

अथ महानाम्नीः प्रशंसति—

> अयं वै लोकः प्रथमा महानाम्न्यन्तरिक्षलोको द्वितीयाऽसौ लोकस्तृतीया सर्वेभ्यो वा एष लोकेभ्यः संनिर्मितो यत्षोळशी तद्यन्महानाम्नीनामुपसर्गानुपसृजति सर्वेभ्य एवैनं तल्लोकेभ्यः संनिर्मिमीते, इति ।

प्रथमत्वादिसाम्येन लोकत्रयरूपत्वमृचां द्रष्टव्यं षोडशिनो लोकत्रयनिर्मितत्वात् । महानाम्नीनामुपसर्गैः संयोजने सति तन्निर्माणं सिध्यति ।

वेदनं प्रशंसति—

> सर्वेभ्यो लोकेभ्यः संनिर्मितेन षोळशिना राध्नोति य एवं वेद, इति ।

अथ विहरणनैरपेक्ष्येणाध्यापकैः प्रज्ञाता नवानुष्टुभो विधत्ते—

प्रप्र वास्त्रिष्टुभमिषमर्चत प्रार्चत यो व्यतीरँ-
फाणयदिति प्रज्ञाता अनुष्टुभः शंसति तद्य-
थेह चेह चापथेन चरित्वा पन्थानं पर्यवेया-
त्तादृक्तद्यत्प्रज्ञाता अनुष्टुभः शंसति, इति।

प्रप्रव इत्येकस्यृचः प्रथमोऽर्चतेति द्वितीयो यो व्यतीनिति तृतीयः । यथा लोके कश्चिन्मार्गानभिज्ञस्तत्र तत्र केनचिदपथेन चरित्वा पश्चादन्यमुखेन विज्ञाय समीचीनं पन्थानं परिगच्छेदेवमत्रापि पूर्वोक्तरीत्या कश्चिमा अनुष्टुभः शस्त्वा पश्चा-देतासां स्वत.सिद्धानामनुष्टुभां शंसनं द्रष्टव्यम् ।

पूर्वत्र सामविशेषमुपजीव्य विहृताविहृतयोः शस्त्रविशेषयोर्व्यवस्था दर्शिता । इदानीं पुरुषविशेषमुपजीव्य तां व्यवस्थां दर्शयति—

स यो व्याप्तो गतश्रीरिव मन्येताविहृतं षोळ-
शिनं शंसयेन्नेच्छन्दसां कृच्छ्रादवपद्या इत्यथ
यः पाप्मानमपजिघांसुः स्याद्विहृतं षोळशिनं
शंसयेद्व्यतिषक्त इव वै पुरुषः पाप्मानं व्यति-
षक्तमेवास्मै तत्पाप्मानं शमलमपहान्ति, इति।

स लोकप्रसिद्धो य पुरुषः पुत्रपौत्रादिभिर्व्याप्तो गतश्रीरिव प्राप्तश्रीव-त्समृद्धधन एवाहमिति मन्येत स पुमानविहृतं विहरणरहितं षोळशिनं शंस-येत् । अविहृते शस्त्रे होतारं प्रेरयेत् । तस्य कोऽभिप्राय इति स उच्यते । छन्दसां कृच्छ्रात्पूर्वोक्तानां गायत्र्यादीनां विहरणक्लेशादवपद्यै, अवपत्तिमा-पदं प्राप्नुयां तन्मा भूदिति विहरणप्रयुक्तिभीतिद्योतनार्थो नेदिति शब्दः । अथ पुमान्पुत्रधनराहित्यरूपं पाप्मानमपजिघांसुरपहन्तुमिच्छन्स्यात्स पुमान्विहृते शस्त्रे होतारं प्रेरयेत् । अयं पुरुषो दारिद्र्यादिरूपेण पाप्मना व्यतिषक्त इव वै मिश्रित एव तस्माद्विहृतप्रयोगेण पामरूपशमलं मालिन्यहेतुव्यतिषक्तं दारि द्र्यादिसंबन्धमपहन्ति ।

वेदनं प्रशंसति—

अप पाप्मानं हते य एवं वेद, इति।

---

१ ऋ. ८-६९-१ । २ ऋ. ८-६९-८ । ऋ. ८-७० १३ ।

अथ शस्त्रसमापनीयां कांचिदृचं विधत्ते -

उद्यद्ब्रध्नस्य विष्टपमित्युत्तमया परिदधाति स्वर्गो वै लोको ब्रध्नस्य विष्टपं स्वर्गमेव तल्लोकं यजमानं गमयति, इति ।

अस्यामृचि ब्रध्नस्य विष्टपमिति श्रूयत आदित्यो ब्रध्नशब्दवाच्योऽसावादित्यो ब्रध्न इति श्रुत्यन्तरात् । तस्य विष्टपं स्थानं स्वर्गलोकोऽतस्तत्पाठेन यजमानं स्वर्गं प्रापयति ।

शस्त्रयाज्यां विधत्ते—

अपाः पूर्वेषां हरिवः सुतानामिति यजति, इति ।

हे हरिवो हे इन्द्र षोळशिनः पूर्वेषां सुतानां सोमानां रसमिति शेषः । अपाः पीतवानसीति प्रथमपादस्यार्थः ।

तमिमं पादं प्रशंसति—

सर्वेभ्यो वा एष सवनेभ्यः संनिर्मितो यत्षोळशी तद्यदपाः पूर्वेषां हरिवः सुतानामिति यजति पीतवद्वै प्रातःसवनं प्रातःसवनादेवैनं तत्संनिर्मिमीते, इति ।

यः षोळशी विद्यत एष सर्वेभ्यः सवनेभ्यः सम्यङ्निर्मित इत्येवं संपादनीयम् । तथा सति तद्यदपाः पूर्वेषामिति पादं पठेत् । तदानीं तत्र प्रातःसवनं पीतवदिन्द्रेण पीतमेवेत्यमर्थः प्रतीयते । तस्मादेनं षोडशिनं प्रातःसवनं निर्मितत्वाद्भवति ।

तस्या ऋचो द्वितीयपादमनूद्य व्याचष्टे—

अथो इदं सवनं केवलं त इति माध्यंदिनं वै सवनं केवलं माध्यंदिनादेवैनं तत्सवनात्संनिर्मिमीते, इति ।

अथो अपि च हे, इन्द्रेदं माध्यंदिनं सवनं ते केवलं तवैव सर्वत्र ।

---

१ ऋ. ८-६९-७ । २ ऋ. १० ५६-१३ ।

अस्मिन्पादे केवलं सवनमपीन्द्रस्येत्येतदुपपन्नम् । इन्द्रेण पुरो द्वारं वृण्वता माहेन्द्रं ग्रहं माध्यंदिनं सवनानां निष्केवल्यादीनां स्वार्थमेव कृतत्वात् । अत एतत्पादपाठेन माध्यंदिनसवनात्षोडशी निर्मितो भवति ।

तृतीयमादवनूद्य व्याचष्टे -

ममद्धि सोमं मधुमन्तमिन्द्रेति मद्भद्वै तृतीय-
सवनं तृतीयसवनादेवैनं तत्संनिर्मिमीते, इति ।

हे, इन्द्र मधुमन्तं माधुर्यरसोपेतं सोमं पीत्वा ममद्धि मदं हर्षं प्राप्नुहि । अस्मिन्पादे मदिधात्वर्थः श्रूयते । तृतीयसवनमपि मद्भद्वै मदिधातूपेतं निवित्पदेषु मदिधातोर्विद्यमानत्वात् । तस्मादेतत्पादपाठेन षोडशी तृतीयसवनान्निर्मितो भवति ।

चतुर्थपादमनूद्य व्याचष्टे -

सत्रा वृषञ्जठर आवृषस्वेति वृषण्वद्वै
षोळशिनो रूपं सर्वेभ्यो वा एष सव-
नेभ्यः संनिर्मितो यत्षोळशी तद्यदपाः
पूर्वेषां हरिवः सुतानामिति यजति सर्वेभ्य
एवैनं तत्सवनेभ्यः सांनिर्मिमीते, इति ।

हे वृषन्वर्षणसमर्थ सत्रा सोमयागरूपे सत्रे जठरे स्वकीय उदर आवृषस्व समन्तात्सोमरसवृष्टिं कुरु । अत्र चतुर्थपादे वृषञ्शब्दो विद्यते । षोडशिस्वरूपमपि वृषण्वद्वर्षणोपेतं तृप्तिहेतुत्वात् । यः षोडशी विद्यते सोऽयमुक्तेन प्रकारेण सर्वेभ्यः सवनेभ्यो हि निर्मितः । तस्मादपाः पूर्वेषामिति याज्यापाठेन सर्वसवनेभ्य एवैनं निर्मितवान्भवति ।

वेदनं प्रशंसति -

सर्वेभ्यः सवनेभ्यः संनिर्मितेन षोळ-
शिना राध्नोति य एवं वेद, इति ।

अस्या याज्यायाः पादेषु पूर्ववदुपसर्गान्विधत्ते -

महानाम्नीनां पञ्चाक्षरानुपसर्गानुपसृजत्येकाद-
शाक्षरेषु पादेषु सर्वेभ्यो वा एष च्छन्दोभ्य

संनिर्मितो यत्षोळशी तद्यन्महानाम्नीनां पञ्चाक्षरानुपसर्गानुपसृजत्येकादशाक्षरेषु पादेषु सर्वेभ्य एवैनं तच्छन्दोभ्यः संनिर्मिमीते, इति ।

महानाम्नीनामृचां संबन्धिनस्तदीयानुवाके समाम्नाता एवा ह्येवेत्यादयः पञ्चाक्षरा उपसर्गास्तानेकादशाक्षरेषु चतुर्ष्वपि पादेषु संयोजयेत् । तथा सति चतुःषष्टयक्षरत्वादनुष्टुब्द्वयं संपद्यते । एवं सति यः षोळशी सर्वेभ्यश्छन्दोभ्यो निर्मातव्यः सोऽयमेतत्संयोजनेन तथैव निर्मितो भवति ।

वेदनं प्रशंसति—

सर्वेभ्यश्छन्दोभ्यः संनिर्मितेन षोळशिना राध्नोति य एवं वेद ॥४॥ इति ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऐतरेयब्राह्मणभाष्ये षोडशाध्याये चतुर्थः खण्डः ॥ ४ ॥ [१२५]

षोडशी समाप्तः । अथातिरात्रो वक्तव्यः । तत्रेन्द्रस्य च्छन्दसां च प्राधान्यं कथयितुमितिहासमाह—

अहर्वै देवा अश्रयन्त रात्रीमसुरास्ते समावदवीर्या एवाऽऽसन्न व्यावर्तन्त सोऽब्रवीदिन्द्रः कश्चाहं चेमानितोऽसुरान्रात्रीमन्ववेष्याव इति स देवेषु न प्रत्यविन्ददबिभयू रात्रेस्तमसो मृत्योस्तस्माद्धाप्येतर्हि नक्तं यावन्मात्रमिवैवापक्रम्य बिभेति तम इव हि रात्रिर्मृत्युरिव, इति ।

पुरा कदाचिदहोरात्रयोर्मध्ये देवा अहरेवाऽऽश्रितवन्तोऽसुराश्च रात्रिमाश्रितवन्तः । ते देवाश्चासुराश्च समानबला एवाऽऽसन् । बलाधिक्येन वर्गान्तराव्यावृत्तमितरवर्गस्थानं प्राप्नुवन् । तदानीमिन्द्रो देवान्प्रत्यब्रवीत् । मम सहायोऽपेक्षितो हे देवा भवतां मध्ये कश्चाहं चेमानसुरान्रात्रीमनुगतानितो रात्र्या अवेष्यावोऽवसारयिष्याव इति । ततो विचार्य स इन्द्रो देवेषु मध्ये

तादृशं शूरं कमपि प्रतीक्ष्य नाविन्दन्न लब्धवान् । रात्रेः संबन्धि यत्तमो मृत्यु-सदृशं तस्मात्तमसो मृत्योरिव सर्वे देवा अबिभयुर्भीता अभवन् । यस्मादेवानां भीतिस्तस्मादिदानीमपि यावन्मात्रमिवैव यत्किंचिदपि वा दूरं रात्रौ गृहादपक्रम्य सर्वः पुरुषो बिभेति । तम इव हि तमोरूपैव रात्रिस्तस्मान्मृत्युरिव भयहेतुः ।

अथ च्छन्दसामिन्द्रसहकारित्वं दर्शयति—

तं वै छन्दांस्येवान्ववायंस्तं यच्छन्दांस्येवान्ववायंस्तस्मादिन्द्रश्चैव च्छन्दांसि च रात्रीं वहन्ति न निविच्छस्यते न पुरोरुङ्न धाय्या नान्या देवतेन्द्रश्च ह्येव च्छन्दांसि च रात्रीं वहन्ति, इति ।

तं वा असुरनिराकरणाय प्रवृत्तं तमेवेन्द्रमेकं गायत्र्यादिच्छन्दांस्येवान्ववायन्ननुगम्य निराकर्तुं गताः । यस्मादेवं तस्मादिन्द्रच्छन्दांस्येवातिरात्रप्रयोगे रात्रीं वहन्ति रात्रिप्रयोगस्य निर्वाहकाणि भवन्ति । इन्द्रविषयच्छन्दांस्येव तत्र शस्यन्ते न तु निविद्वा पुरोरुग्वा धाय्या वा देवतान्तरं वा किंचिच्छस्यते । तस्मादिन्द्रश्छन्दांसि चेत्येतावन्त एव निर्वाहकाः ।

तेषामिन्द्रच्छन्दसामसुरनिराकरणसाधनं दर्शयति -

तान्वै पर्यायैरेव पर्यायमनुदन्त यत्पर्यायैः पर्यायमनुदन्त तत्पर्यायाणां पर्यायत्वम्, इति ।

तान्वै रात्रिमाश्रितानसुरान्पर्यायैश्चमसगणानां क्रमानुष्ठानैरेव पर्यायैस्तत्र तत्र यतमाना यागभूमौ परीत्यानुदन्त निराकृतवन्तः । यत्र यत्रासुराः सुप्ता अवस्थितास्तत्र तत्र प्रयत्नेनावेक्ष्य निःसारितवन्तः । द्वादशानां चमसगणानामनुष्ठानाय त्रयः पर्याया एकैकस्मिन्पर्याये चत्वारो गणा अनुष्ठीयन्ते । यस्मात्परितो गत्वा गत्वा चमसपर्यायैर्निराकृतवन्तस्तस्मात्परिगम्य निराकरणसाधनत्वात्पर्यायत्वं संपन्नम् ।

क्रमेण निराकरणप्रकारं दर्शयति—

तान्वै प्रथमेनैव पर्यायेण पूर्वरात्रादनुदन्त मध्यमेन मध्यरात्रादुत्तमेनापररात्रात्, इति ।

दश दश घटिका एकैको भाग इत्येवं रात्रेस्त्रयो भागाश्चत्वारश्चमसगणा एकः पर्याय इत्येवं द्वादशानां चमसगणानां त्रयः पर्यायास्तैः क्रमेण रात्रि-भागत्रयादसुरानपानुदन्त ।

तस्मिन्निराकरणे छन्दसां सौकर्याधिक्येन प्रशंसां दर्शयति—

अपि शर्वर्या अनुस्मसीत्यब्रुवन्नपिशर्वराणि खलु वा एतानि छन्दांसीति ह स्माऽऽहैतानि हीन्द्रं रात्रेस्तमसो मृत्योर्बिभ्यतमत्यपारयंस्तदपिशर्वराणामपिशर्वरत्वम् ॥ ५ ॥ इति ।

हे, इन्द्र वयमपि शर्वर्याः कृत्स्नाया रात्रेः सकाशादसुरानपसारयितुं त्वामनुगम्य स्मासि तिष्ठाम इत्येवं छन्दांस्यब्रुवन् । तदेतद्वाक्यमैतरेयः श्रुत्वा तदानीमेवैवानि च्छदांस्यपिशर्वराण्येवेति नाम्ना व्यवहृतवान् । एतच्च युक्तम् । यस्मान्मृत्योरिव रात्रेस्तमसो बिभ्यतमिन्द्रमेतानि च्छन्दांस्यपारयन्यस्माद्देवो रात्रिमतीत्य नीतवन्ति तस्मात्कारणाच्छर्वर्याः सर्वस्मादपि पारनयनं द्योतयितुमपिशर्वराणीति नाम च्छन्दसां युक्तम् ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऐतरेय-ब्राह्मणभाष्ये षोडशाध्याये पञ्चमः खण्डः ॥ ५ ॥ [१२६]

इन्द्रस्य च्छन्दसां च प्राधान्यमभिहितम् । अथ शस्त्रं विधातव्यं षोडशिपर्यन्तं पूर्ववदनुष्ठाय षोडशिन ऊर्ध्वं रात्रिपर्यायाः शंसनीयास्तत्र त्रयः पर्यायास्तत्रैकपर्यायश्चतुःशस्त्रोपेतः । होतुरेकं शस्त्रं होत्रकाणां च त्रयाणामेकैकमिति चतुष्टयम् ।

अत्र प्रथमपर्याये होतुः शस्त्रं विधत्ते—

पान्त मा वो अन्धस इत्यन्धस्वत्याऽनुष्टुभा रात्रीं प्रतिपद्यते, इति ।

अन्धःशब्दो यस्यामृच्यस्ति सेयमन्धस्वती । सा चानुष्टुप्छन्दस्का तया रात्रीं रात्रिशस्त्रं प्रतिपद्यते प्रारभेत ।

तस्यामृचि च्छन्दः प्रशंसति—

आनुष्टुभी वै रात्रिरेतद्रात्रिरूपम्, इति ।

---

१ ऋ. ८-९२-१ ।

गायत्रीत्रिष्टुब्जगत्यनुष्टुभां मध्ये गायत्र्यादीनां त्रयाणां सवनत्रयगतानामहानि प्रयुक्तत्वादनुष्टुभः प्रयोगाय रात्रिरेव कालः परिशिष्यते तस्माद्रात्रेरनुष्टुप्सम्बन्धित्वादियमनुष्टुग्रात्रेः स्वरूपम् ।

अथ त्रिषु पर्यायेषु शस्त्रयाज्यां विधत्ते—

अन्धस्वत्यः पीतवत्यो मद्वत्यस्त्रिष्टुभो याज्या भवन्त्यभिरूपा यद्यज्ञेऽभिरूपं तत्समृद्धम्, इति ।

अन्धःशब्दो यास्वृक्ष्वस्ति ता अन्धस्वत्यस्तादृश्यश्चतस्र ऋचः प्रथमपर्याये होत्रादीनां चतुर्णां शस्त्रयाज्याः कर्तव्यास्ताश्च त्रिष्टुप्छन्दस्का एव । तत्राध्वर्यवो भरतेन्द्राय सोममित्येषा होतुः शस्त्रयाज्या । सा चान्धस्वती त्रिष्टुप्छन्दस्का च । तस्या द्वितीयपादे सिञ्चता मद्यमन्ध इत्यन्धःशब्दः श्रूयते । एवमितरेषां त्रयाणां शस्त्रयाज्या उदाहरणीयाः । पिबतिधातुर्यास्वृक्ष्वस्ति ताः पीतवत्यस्तादृश्यो मध्यपर्याये याज्याः कर्तव्याः । अपाय्यस्यान्धसो मदायेति होतुः शस्त्रयाज्या । तत्रापाय्येति पिबतिधातुः श्रूयते । मदिधातुर्यास्वृक्ष्वति ता मद्वत्यः । तादृश्यस्तृतीयपर्याये याज्याः कर्तव्याः । तिष्ठा हरी इत्येषां होतुः शस्त्रयाज्या । तस्या अवसाने रारिमा ते मदायेति मदिधातुः श्रूयते । एवं सर्वमुदाहार्यम् । रात्रावन्नभोजनादन्धस्वतीनामपानुरूप्यं क्षीरपानात्पीतवतीनां तत ऊर्ध्वं हर्षान्मद्वतीनामेवमानुरूप्ये सति तत्तत्कर्म समृद्धं भवति ।

प्रथमपर्याये प्रयोगविशेषं विधत्ते—

प्रथमेन पर्यायेण स्तुवते प्रथमान्येव षदानि पुनराददते यदेवैषामश्वा गाव आसंस्तदेवैषां तेनाऽऽददते, इति ।

यदा सामगाः प्रथमेन पर्यायेण स्तुवते तदानीं स्तोत्रियाणां प्रथमपादान्द्विरभ्यस्यन्ति । एवं शस्त्रेऽपि पुरुहूतं पुरुष्टुतमित्यादिकाः प्रथमपादा द्विरभ्यसनीया यथा वाव स्तोत्रमेवं शस्त्रमित्युक्तत्वात् । एवं सत्येषामसुराणामश्वा गाव आसन्निति यदस्ति तत्सर्वमसुराणां धनं तेन प्रथमपादाभ्यासेन स्वीकुर्वन्ति ।

द्वितीयपर्याये विशेषं विधत्ते–

मध्यमेन पर्यायेण स्तुवते मध्यमान्येव
पदानि पुनराददते यदेवैषामनो रथा
आसंस्तदेवैषां तेनाऽऽददते , इति ।

अयं त इन्द्र सोम इत्यस्यामृचि निपूतो आधि बर्हिषीत्येवं मध्यमः पादो द्विरभ्यसनीयः । एषामसुराणामनः शकटं यदस्ति ये च रथास्तत्सर्वं तेनाभ्यासेन स्वीकृतं भवति ।

तृतीयपर्याये विशेषं विधते –

उत्तमेन पर्यायेण स्तुवत उत्तमान्येव पदानि
पुनराददते यदेवैषां वासो हिरण्यं मणि-
रध्यात्ममासीत्तदेवैषां तेनाऽऽददते, इति ।

इदं ह्यन्वोजसा सुतमित्यस्यामृचि पिबात्वस्य गिर्वणः । पिबात्वस्य गिर्वण इत्युत्तमस्य पादस्य द्विरभ्यासः । आत्मानं शरीरमधिकृत्य वर्तत इत्यध्या-ममसुराणां शरीरेऽवस्थितं वासो हिरण्यं मणिरित्येवमादिकं सर्वं गृहीतं भवति ।

वेदनं प्रशंसति —

आ द्विषतो वसु दत्ते निरेनमेभ्यः सर्वेभ्यो
लोकेभ्यो नुदते य एवं वेद , इति ।

द्विषतः शत्रोः सकाशात्तदीयं धनमादत्त एनं शत्रुं सर्वेभ्यो लोकेभ्यो निर्णुदते निराकरोति ।

अत्र कंचित्प्रश्नमुत्थापयति –

पवमानवदहरित्याहुर्न रात्रिः पवमा-
नवती कथमुभे पवमानवती भवतः
केन ते समावद्धाजौ भवत इति, इति ।

बहिष्पवमानो माध्यंदिनः पवमान आर्भवः पवमानश्चेत्येवमहनि पवमान-स्तोत्रत्रयं विद्यते न तु रात्रौ तदस्त्यत उभयोः पवमानत्वं कथं सिध्यति । तद-सिद्धौ च केनोपायेनाहश्च रात्रिश्चेत्येते समावद्धाजौ भवतः समानभागयुक्ते भवत इति प्रश्नवादिन आहुः ।

तत्रोत्तरमाह–

यदेवेन्द्राय[1] मद्वने सुतमिदं[2] वसो सुतमन्ध इदं[3] ह्यन्वोजसा सुतमिति स्तुवन्ति च शंसन्ति च तेन रात्रिः पवमानवती तेनोभे पवमानवती भवतस्तेन ते समावद्वाजौ भवतः, इति ।

यदेवेन्द्राय मद्वने सुतमिदं वसोसुतमन्ध इदं ह्यन्वोजसा सुतमिति ताभिरेताभिस्तिसृभिरुद्गातारः स्तुवन्ति । होतारः शंसन्ति । अहनि यथा त्रिष्वपि पवमानस्तोत्रनामसु पवमानशब्दोऽनुवृत्त एवमत्रापि तिसृष्वृक्षु सुतशब्दोऽनुवृत्तोऽतः पवमानसाम्याद्रात्रिः पवमानवती । तेन प्रकारेणोभयोः पवमानवत्त्वे साम्ये सति तुल्यभागत्वं सिध्यति ।

पुनरपि प्रश्नान्तरमुत्थापयति–

पञ्चदशस्तोत्रमहरित्याहुर्न रात्रिः पञ्चदशस्तोत्रा कथमुभे पञ्चदशस्तोत्रे भवतः केन ते समावद्वाजौ भवत इति, इति ।

अग्निष्टोमस्तोत्राणि द्वादश उक्थ्यस्तोत्राणि षोडश्यन्यानि प्रयुज्यन्ते । तस्मादहः पञ्चदशस्तोत्रोपेतं रात्रौ तु न तानि विद्यन्ते । कथं पञ्चदशस्तोत्रसाम्येन तयोर्भागसाम्यं सिध्यतीति प्रश्नः ।

तत्रोत्तरमाह–

द्वादश स्तोत्राण्यपिशर्वराणि तिसृभिर्देवताभिः संधिना राथंतरेण स्तुवते तेन रात्रिः पञ्चदशस्तोत्रा तेनोभे पञ्चदशस्तोत्रे भवतस्तेन ते समावद्वाजौ भवतः, इति ।

द्वादशसु चमसगणपर्यायेषु द्वादश स्तोत्राणि विद्यन्ते तान्यपिशर्वराणि । रात्रावनुष्ठेयानां छन्दसामपिशर्वरसंज्ञा पूर्वमुक्ता । तैश्छन्दोभिर्निष्पाद्यत्वात्स्तोत्राण्यपि तन्नामकानि । रथंतरसाम्ना निष्पाद्यं यत्संधिस्तोत्रं तत्र तिस्रो

---

१ ऋ. ८।९२।१९। २ ऋ. ८।२।१। ३ ऋ. ३।५१।१०।

देवताः श्रूयन्ते । ताभिः स्तोतव्याभिस्तिसृभिर्देवताभिः स्तोत्रमपि त्रेधा भिद्यते । तेन कारणेन ताभिः पञ्चदशस्तोत्रा संपन्ना । तथा सत्युभयोरहोरात्रयोः स्तोत्रसंख्यासाम्यात्समानभागोपेतत्वं सिध्यति ।

शस्त्रबाहुल्यं प्रशंसति—

परिमितं स्तुवन्त्यपरिमितमनुशंसाति परिमितं वै भूतमपरिमितं भव्यमपरिमितस्याविरुद्ध्या इति, इति ।

उद्गातारः परिमितं यथा भवति तथा स्तुवन्ति । त्रिवृत्पञ्चदश (शः) सप्तदश एकविंश इत्येवं चतुर्भिरेव स्तोमैरत्र सर्वस्तोत्रनिष्पत्तेः । होता त्वपरिमितं यथा भवति तथाऽनुशंसति । शंसनीया ऋच एतावत्य एवेति सर्वत्रानुगतस्य संख्यानियमस्य कस्यचिदभावात् । पूर्वभाविनः स्तोत्रस्य परिमितत्वमुत्तरभाविनः शस्त्रस्यापरिमितत्वं च लौकिकन्यायानुसारि । लोके भूतं पूर्वं संपादितं धनं परिमितमियदेवेति नियतिरस्ति भव्यमितः परं संपादनीयं धनमपरिमितं तृष्णाया निरवधिकत्वेनैतावदेव संपादयिष्यामि न त्वधिकमिति नियतेरभावात् । तस्मादुपरितनशंसनबाहुल्यमपरिमितधनप्राप्त्यै भवतीत्यभिप्रेत्य होतुरपरिमितमनुशंसनम् ।

प्रकारान्तरेण शस्त्रबाहुल्यं प्रशंसति—

अति शंसाति स्तोत्रमाति वै प्रजाऽऽत्मानमाति पशवस्तद्यत्स्तोत्रमाति शंसति यदेवास्यात्मानं तदेवास्यैतेनावरुन्धेऽवरुन्धे ॥ ६ ॥ इति ।

स्तोत्रगतामृक्संख्यामतिलङ्घ्य होता शंसतीति यदस्ति तद्युक्तमेव । लोके ह्यात्मानमतिलङ्घ्य प्रजानां चावस्थितत्वात् । स्वयमेक एव पुत्रादयस्तु बहवो गवाश्वादिपशवश्च बहवस्तस्मादात्मस्थानीयं स्तोत्रं प्रजापशुस्थानीयशस्त्राधिक्येन यदेव प्रजापश्वादि धनं तस्य यजमानस्य स्वात्मानमतिक्रम्याधिकमभीष्टं तत्सर्वमस्य यजमानस्य होता संपादयति । पदाभ्यासोऽध्यायसमाप्त्यर्थः ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऐतरेयब्राह्मण भाष्ये षोडशाध्याये षष्ठः खण्डः ॥ ६ ॥ (१२७)

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकवीरबुक्कगसाम्राज्यधुरंधरसायणाचार्यकृतावैतरेयब्राह्मणभाष्ये षोडशोऽध्यायः ॥ १६ ॥

अथ सप्तदशोऽध्यायः ।

पृष्ठे षोडश्यङ्गि संस्थाचतुर्थे
सर्वच्छन्दोविक्रियाऽनुष्टुबाख्ये ॥
पर्यायाणां स्याच्चतुःशस्त्रकाणां
रात्रौ संधेः संख्यया पाञ्चदश्यम् ॥ १ ॥

अथातिरात्रकृतावेव रात्रिपर्यायेभ्य ऊर्ध्वमाश्विनशस्त्रमाख्यायिकामुखेन विधत्ते-

प्रजापतिर्वै सोमाय राज्ञे दुहितरं प्रायच्छत्सूर्यां सावित्रीं तस्यै सर्वे देवा वरा आगच्छंस्तस्या एतत्सहस्रं वहतुमन्वाकरोद्यदेतदाश्विनमित्याचक्षतेऽनाश्विनं हैव तद्यदर्वाक्सहस्रं तस्मात्तत्सहस्रं वैव शंसेद्भूयो वा, इति ।

पुरा कदाचित्प्रजापतिः कांचिद्दुहितरं सोमाय राज्ञे प्रायच्छत् । विवाहार्थं दातुमुद्युक्तवान् । कीदृशीं दुहितरं सूर्यामित्येतन्नामधेययुक्तां सावित्रीं सवित्रा लब्धाम् । यद्यप्येषा सवितुः पुत्री तथाऽपि स्नेहातिशयेन प्रजापतेर्दुहितेत्युच्यते । तस्यै दुहित्रे तल्लाभार्थं सर्वे देवा वरा भूत्वा प्रजापतेः सकाशमागमन् । स च प्रजापतिस्तस्यै दुहितृलाभार्थमेतद्वक्ष्यमाणमृचां सहस्रं वहतुमन्वाकरोत् । वहनस्य विवाहस्यालंकारार्थं माङ्गल्यार्थं च वरस्य पुरतो वहनीयो हरिद्रागुडादिमङ्गलद्रव्यसंघो वहतुर्यदेतद्दृक्सहस्रं याज्ञिका आश्विनसहस्रमित्याचक्षते तत्सहस्रमेव वहतुरूपेण प्रत्यभिज्ञातवान् । स देवानां मध्ये यो वर आश्विनशस्त्रमन्त्रानेक एव पठति तस्मै दास्यामीति प्रतिज्ञातवानित्यर्थः । सहस्रादर्वाचीना ऋचो यस्मिञ्शस्त्रे तदर्वाक्सहस्रं तादृशं यदस्ति तदनाश्विनमेव । यस्मादाश्विनं सहस्रं प्रजापतिरङ्गीकृतवांस्तस्माद्धोता सहस्रमेव शंसेत् । ततोऽप्यधिकं वा शंसेत् । न तु न्यूनम् ।

शंसनस्येतिकर्तव्यतां विधत्ते—

प्राश्य घृतं शंसेद्यथा ह वा इदमनो वा रथो वाऽक्तो वर्तत एवं हैवाक्तो वर्तते, इति ।

प्रथमतो घृतं प्राश्य पश्चाच्छंसेत् । यथा लोके किंचिदिदं निदर्शनं तद्वत् । किं निदर्शनमिति तदुच्यते । अनः स्वल्पशकटं वा प्रौढो रथो वा यदा प्रवर्त्यते तदानीमस्य चक्रभ्रमणस्थाने मषीमिश्रेण तैलेनाञ्जने कृते पश्चात्स्वल्पं शकटं रथो वा सहसा प्रवर्तते । एवमसौ होता घृतेनाक्तः शस्त्रे प्रवर्तते ।

इतिकर्तव्यतान्तरं विधत्ते—

शकुनिरिवोत्पतिष्यन्नाह्वयीत, इति ।

यथा लोके शकुनिः कश्चित्पक्षी पद्भ्यां भूमिं दृढमवष्टभ्योत्पतिष्यन्नूर्ध्वमुखोत्पतनं कर्तुमिच्छन्पक्ष्यन्तरमभिलक्ष्य ध्वनिं करोत्येवमसौ होता तदाकारं पटनं कुर्वन्नाहावं पठेत् । तदेतदाश्वलायनाचार्यैः स्पष्टीकृतम्—[1] प्राश्य प्रतिप्रसृप्य पश्चात्स्वस्य धिष्ण्यस्योपविशेत्समस्तजङ्घोरुररत्निभ्यां जानुभ्यां चोपस्थं कृत्वा यथा शकुनिरुत्पतिष्यन्नुपस्थकृतस्तथैवाऽऽश्विनं शंसेत् ' इति ।

आश्विनशस्त्रस्य प्रतिपदमाख्यायिकामुखेन विधत्ते—

तस्मिन्देवा न समजानत ममेदमस्तु ममेदमस्त्विति ते संजानाना अब्रुवन्नाजिमस्याऽऽयामहै स यो न उज्जेष्यति तस्येदं भविष्यतीति तेऽग्नेरेवाधि गृहपतेरादित्यं काष्ठामकुर्वत तस्मादाग्नेयी प्रतिपद्भवत्याश्विनस्याग्निर्होता गृहपतिः स राजेति, इति ।

तस्मिन्नाश्विनशस्त्रे देवाः परस्परं न समजानत संज्ञानं प्रतिपत्तिं नाकुर्वन् । कीदृशी तदीया प्रतिपत्तिरिति सोच्यते । ममैवेदमाश्विनमस्त्विति सर्वेषामभिप्रायः । सर्वविषयत्वं द्योतयितुमियं वीप्सा । ते विप्रतिपन्ना देवाः संजानानाः संप्रतिपत्तिं कर्तुमुद्युक्ताः परस्परमिदमब्रुवन् । अस्याऽऽश्विनशस्त्रस्य लाभाय वयं सर्वे कांचिदाजिमयामहै समयबन्धपुरःसरा धावनरूपा गतिराजिस्तां प्रापवाम । तस्मिन्नाजिधावने नोऽस्माकं मध्ये च यः प्रबलो यः कोऽपि प्रथममुत्कर्षेण जेष्यति तस्येदमाश्विनं भविष्यतीति समयबन्धस्तेन कृतसमया देवा गृहपतेरग्नेरेवाधि गार्हपत्यस्योपरि द्युलोकवर्तिनमादित्यं काष्ठां धावनसमाप्तिमकुर्वत । गार्हपत्यमारभ्याऽऽदित्यपर्यन्तं धावेदिति तदीया मर्यादा । यस्मादग्निराश्विनप्राप्तिहेतोर्धावनस्योपक्रमस्थानं तस्मादाग्नेयी काष्ठिदृगाश्विनस्य प्रतिपद्भवति प्रारम्भरूपा कर्तव्या । अग्निर्होतेति तस्याः प्रतीकम् ।

अत्र कंचित्पूर्वपक्षमुद्भावयति -

तद्धैक आहुरग्निं मन्ये पितरमग्नि-
मापिमित्येतया प्रतिपद्येत, इति ।

प्रारभेतेत्यर्थः ।

तत्रोपपत्तिं पूर्वपक्ष्यभिप्रेतां दर्शयति—

दिवि शुक्रं यजतं सूर्यस्येति प्रथ-
मयैव ऋचा काष्ठामाप्नोतीति, इति ।

तस्याश्चतुर्थपादे सूर्यस्य यजतं यस्मादग्निविशेषणं पठ्यते तथा सति प्रथमयैवर्चा सूर्यरूपा काष्ठा धावनाभिरूपाऽऽप्ता भवतीति तेषामभिप्रायः ।

तमिमं पक्षं दूषयति

तत्तन्नाऽऽदृत्यं य एनं तत्र ब्रूयादग्निमिति वै प्रत्य-
पाद्यग्निमापत्स्यतीति शश्वत्तथा स्यात्, इति ।

तस्मिन्नशस्त्रोपक्रमे तन्मतमग्निं मन्ये पितरमित्यादिकं नाऽऽदरणीयम् अनादरणे हेतुरुच्यते । तत्राग्निं मन्य इत्येतयोपक्रमपक्षे यः कोऽपि विरोधी समागत्यैवं होतारं ब्रूयाच्छपेत् । कथं शाप इति तदुच्यते । अनेन होत्राऽग्निमाग्निमित्येव प्रत्यपादि प्रारब्धं तस्यामृच्यग्निं पितरमाग्निं भ्रातरमित्येवमनल्पमग्निस्वरूपं पित्राद्याभिधानादग्निमसौ होता मामेतीति दग्धो भवियतीति यदि शपेत्तदानीं शश्वदवश्यं तथा स्यात् ।

परमतं दूषयित्वा स्वमतं निगमयति—

तस्मादग्निर्होता गृहपतिः स राजेत्येत-
यैव प्रतिपद्येत गृहपतिवती प्रजातिमती
शान्ता सर्वायुः सर्वायुत्वाय, इति ।

अस्यामृचि गृहपतिशब्दः स्पष्टं दृश्यते । तस्मादियं गृहपतिवती । तथा द्वितीयपादे विश्वा वेद जनिमेति सर्वप्राणिजनानाभिज्ञानकथनादियं प्रजातिमती । बहुलत्वोऽग्निशब्दस्याभावादियं शान्ता । तस्मादेतया प्रतिपद्यमानो होता सर्वायुर्भवति । तच्च यजमानस्य सर्वायुत्वाय संपद्यते ।

वेदनं प्रशंसति—

सर्वामायुरेति य एवं वेद ॥ ७ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऐतरेयब्राह्मण-
भाष्ये सप्तदशाध्याये प्रथमः खण्ड ॥ १ ॥ (७) [१२८]

अथाऽऽग्नेयकाण्डं विधत्ते—

**तासां वै देवतानामाजिं धावन्तीनामभिसृ-
ष्टानामग्निर्मुखं प्रथमः प्रत्यपद्यत तमश्विना-
वन्वागच्छतां तमब्रूतामपोदित्यावां वा इदं
जेष्याव इति स तथेत्यब्रवीत्तस्य वै ममे-
हाप्यस्त्विति तथेति तस्मा अप्यत्राकु-
रुतां तस्मादाग्नेयमाश्विने शस्यते, इति ।**

देवताः सर्वा गार्हपत्याग्निसमीपान्निर्गत्य सूर्यपर्यन्तामाजिमुद्दिश्य धाव-न्त्योऽभिसृष्टा अभितः प्रवृत्ता एका देवतैकस्यां दिशि धावत्यन्या परस्यां दिशीत्येवं सर्वतो धावन्ति । तासां देवतानां मध्येऽग्निर्मुखं यथा भवति तथा मुख्यो भविष्यामीत्यभिप्रायेण प्रथमः प्रत्यपद्यत पुरोगामी धावनं कृतवान् । तमग्निमनु पश्चादश्विनावागच्छतां समीपं गत्वा तमग्निमब्रूतां हेऽग्ने त्वं शान्तो भविष्यसि तस्मादपोदिह्युत्कर्षेणापेहि दूरेऽपसराऽऽवामुभावेवेदमाश्विनमुद्दिश्य जेष्याव इति । सोऽग्निरङ्गीकृत्य तस्यापगच्छतो ममापीह शस्त्रे भागोऽस्त्वित्यङ्गीकृतवान् । अश्विनावङ्गीकृत्य तस्माद् (अ) ग्नये विभागं दत्तवन्तौ । यस्मादेवं तस्मादा-ग्नेयं बहूनामृचां समूहरूपं काण्डमाश्विने शस्त्रे होत्रा शस्यते । शंसनीयं तच्च काण्डं सर्वं सूत्रे द्रष्टव्यम् ।

अथोषस्यं काण्डं विधत्ते—

**ता उषसमन्वागच्छतां तामब्रूतामपोदित्यावां
वा इदं जेष्याव इति सा तथेत्यब्रवीत्तस्यै वै
ममेहाप्यस्त्विति तथेति तस्या अप्यत्राकु-
रुतां तस्मादुषस्यमाश्विने शस्यते, इति ।**

तावश्विनावुषसमेतन्नामयुक्तां देवतामन्यत्पूर्ववद्व्याख्येयम् ।

ऐन्द्रं काण्डं विधत्ते—

तावि॑न्द्रमन्वागच्छतां तमब्रूतामावां वा
इदं मघवञ्जेष्याव इति न ह तं दधृषतु-
रपोदिहीति वक्तुं स तथेत्यब्रवीत्तस्य वै
ममेहाप्यस्त्विति तथेति तस्मा अप्यत्रा-
कुरुतां तस्मादैन्द्रमाश्विने शस्यते, इति ।

हे मघवन्नावां जेष्याव इत्येवमब्रूतामिन्द्रस्य स्वामित्वात्तमिन्द्रमुद्दिश्यापोदिहीति वक्तुं न दधृषतुर्धार्ष्ट्यं नाकुरुताम् । अन्यत्पूर्ववत् ।

अथाऽऽश्विनं काण्डं विधत्ते—

तदश्विना उदजयतामाश्विनावाश्नुवातां
यदश्विना उदजयतामाश्विनावाश्नुवातां
तस्मादेतदाश्विनमित्याचक्षते, इति ।

तत्तस्यामाजौ सहसा सूर्यपर्यन्तं गत्वा तावाश्विनावुत्कर्षेणाजयतां तत स्तावेव शस्त्रम याऽश्नुवातां व्याप्तवन्तौ । यद्यस्मादाश्विनौ जयपूर्वकं शस्त्रं व्याप्त वन्तौ तस्मादेतच्छस्त्रमाश्विनमिति याज्ञिका आचक्षते । आश्विनं काण्डं शंसे दित्यभिप्रायः ।

वेदनं प्रशंसति—

अश्नुते यद्यत्कामयते य एवं वेद, इति ।

प्रश्नोत्तराभ्यां शस्त्रस्याऽऽश्विनत्वमुपपादयति—

तदाहुर्यच्छस्यत आग्नेयं शस्यत उषस्यं
शस्यत ऐन्द्रमथ कस्मादेतदाश्विनामित्या-
चक्षत इत्यश्विनौ हि तदुदजयतामाश्विनावा
श्नुवातां यदश्विना उदजयतामाश्विनावाश्नु-
वातां तस्मादेतदाश्विनमित्याचक्षते, इति ।

आश्विनकाण्डवदाग्नेयोषस्यैन्द्रकाण्डानामपि शस्यमानत्वाच्छस्त्रस्याऽऽग्नेया-दिनामपरित्यागेनाऽऽश्विनत्वान्नि कः पक्षपात इति प्रश्नः । अग्निरुषा इन्द्र-

श्वेते परतोऽपसृप्ता न तु सूर्यपर्यन्तमधावन् । आश्विनौ तु धावन्तौ जयपूर्वकं शस्त्रं प्राप्तवन्ताविति तदीयत्वप्रसिद्धिः शस्त्रस्य युक्ता ।

वेदनं प्रशंसति–

अश्नुते यद्यत्कामयते य एवं वेद ॥ ८ ॥ इति ।

पूर्वमाश्विनसंबन्धमात्रवेदनमिह त्वग्न्यादिसंबन्धराहित्यवेदनं चेति विशेषः ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऐतरेय-ब्राह्मणभाष्ये सप्तदशाध्याये द्वितीयः खण्डः ॥ २ ॥ (८) [१२९]

अथाऽऽश्विनशस्त्रप्रशंसार्थं देवानामाजिधावनकथा पूर्वमुपन्यस्ता तमेव कथा-शेषमाश्विनशस्त्रप्रशंसार्थमेव पुनरप्यनुवर्तयति –

अश्वतरीरथेनाग्निराजिमधावत्तासां प्राजमानो योनिमकूलयत्तस्मात्ता न विजायन्ते, इति ।

अश्वगर्दभसांकर्येण जाताः स्त्रीव्यक्तयोऽश्वतर्यः । तद्युक्तेन रथेनायमग्नि-राजिमुद्दिश्य धावनं कृतवान् । तदानीं प्राजमानः प्रकर्षेणाश्वतरीः प्रेरयन् । अज पशुप्रेरण इति धातुजन्योऽयं शब्दः । तत्प्रेरणकाले तासां पूर्वपुच्छभागमुपस्पृश्य योनिमकूलयत्, दग्धवान् । तस्माद्दग्धयोनित्वात्ता अश्वतर्यो न विजायन्ते विज-ननमपत्योत्पादनं न कुर्वन्ति ।

अग्नेराजिधावनमुक्त्वोषसो धावनं दर्शयति–

गोभिररुणैरुषा आजिमधावत्तस्मादुषस्यागता-यामरुणामिवैव प्रभात्युषसो मरूप, इति ।

अरुणैर्गोभिरीषद्रक्तवर्णैर्नलीवर्दैर्युक्तेन रथेन यस्मादुषसो धावनं तस्माल्लोकेऽपि रात्रेरवसाने समागतायामुषसि तस्या उषसो रूपं प्राच्यां दिश्यरुणमिवैव रक्त-वर्णमेव भूत्वा प्रभाति प्रभायुक्तं भवति ।

इन्द्रस्याऽऽजिधावनं दर्शयति–

अश्वरथेनेन्द्र आजिमधावत्तस्मात्स उच्चैर्घोष उपाब्दिमान्क्षत्त्रस्य रूपमैन्द्रो हि सः, इति ।

यस्मादश्वयुक्तेन रथेनेन्द्रोऽधावत्तस्माल्लोकेऽपि सोऽश्वयुक्तो रथ उच्चैर्घोषो

बहुलध्वनिर्दृश्यते । तथा क्षत्रस्य रूपमुपाब्दिमाऊशब्दोपेतं दृश्यते । यदा क्षत्रियो निर्गच्छति तदीया याष्टिका अन्ये सेवका अश्वपुरतः शब्दं कुर्वंत एव गच्छन्ति । स च शब्द ऐन्द्रो ह्यसुरयुद्धेषु तद्भीत्यर्थमिन्द्रेण कृतत्वा दैन्द्रत्वम् ।

अश्विनोर्धावनं दर्शयति—

गर्दभरथेनाश्विना उदजयतामश्विनावाश्नुवातां यदश्विना उदजयतामश्विनावाश्नुवातां तस्मात्स सृतजवो दुग्धदोहः सर्वेषामेतर्हि वाहनानामनाशिष्ठो रेतसस्त्वस्य वीर्यं नाहरतां तस्मात्स द्विरेता वाजी, इति ।

अश्विनौ गर्दभयुक्तेन रथेन शीघ्रं गत्वा जयपूर्वकमश्विनौ व्याप्तवन्तौ । यद्यस्मादुभौ रथमारुह्यातिवेगेन गत्वा व्याप्तवन्तौ तस्मात्स गर्दभो भारातिशयेन तीव्रधावनेन च लोके सृतजवो गतवेगो दुग्धदोहो गतक्षीररसश्चाभवत् । तस्मादिदानीमपि गजाश्वादिवाहनानां सर्वेषां मध्ये गर्दभोऽनाशिष्ठोऽत्यन्तवेगरहितो दृश्यते । तदीयस्य रेतसस्तु वीर्यं सामर्थ्यमश्विनो नाहरतां न विनाशितवन्तौ तस्माद्वेगेन या(पा) नयोर्यंग्य क्षीरेण च राहित्येऽपि स गर्दभो द्विरेता गर्दभाश्वतरजातिद्वयोत्पादको वाजी गमनवान्दृश्यते ।

एवं शस्त्रप्रशंसार्थमवशिष्टगुणाख्यानशेषमभिधाय सौर्याणां मन्त्रसमूहानां संख्यां विधातुं पूर्वपक्षमुद्भावयति—

तदाहुः सप्त सौर्याणि च्छन्दांसि शंसेद्यथैवाऽऽग्नेयं यथोषस्यं यथाऽऽश्विनं सप्त वै देवलोकाः सर्वेषु देवलोकेषु राध्नोतीति, इति ।

आग्नेयोषस्याश्विनकाण्डानि यथा प्रत्यकं गायत्र्यादिभिः सप्तच्छन्दोभिर्युक्तान्येवमत्र सौर्येऽपि काण्डे सप्त च्छन्दांसि शंसनीयानि । तथा सति भोगस्थानरूपाणां देवलोकानामवान्तरभेदेन सप्तविधत्वात्तत्समृद्धिः सिध्यतीति पूर्वपक्षिण आहुः ।

तं पक्षं निराकृत्य च्छन्दस्त्रयपक्षं विधते—

तत्तन्नाऽऽदृत्यं त्रीण्येव शंसेत्त्रयो वा इने त्रिवृतो लोका एषामेव लोकानामभिजित्यै, इति ।

पृथिव्यन्तरिक्षद्युलोकास्त्रय एव त्रिवृतः सत्त्वरजस्तमोगुणैस्त्रिविधा अतस्त्रयाणामभिजयाय त्रीण्येव च्छन्दांसि शंसेत् ।

त्रयाणां छन्दसां प्रारम्भं निश्चेतुं पूर्वपक्षमाह ·

तदाहुरुदु त्यं जातवेदसामिति सौर्याणि प्रतिपद्येतेति, इति ।

यानि सौर्याणि त्रीणि च्छन्दांसि तेषां प्रारम्भ उदु त्यमिति शंसेदिति पूर्वः पक्षः ।

तमेतं दूषयति—

तत्तन्नाऽऽदृत्यं यथैव गत्वा काष्ठामपराध्नुयात्तादृक्तत्, इति ।

लोके कश्चिद्भाषापूर्वकमप्रमादेन धावनं कृत्वा काष्ठामवधिस्थानं प्राप्यापराध्नुयात्तत्रावसाने स्खलनपतनादिरूपमपराधं कुर्यात्तादृगेव तद्भवति । आग्नेयकाण्डमारभ्य सूर्यकाण्डपर्यन्तमस्खलन्होता समाप्तौ सूर्यकाण्डे स्खलति तस्मादुदु त्यं न शंसेत् ।

तदानीं सिद्धान्तमाह—

सूर्यो नो दिवस्पात्वित्येतेनैव प्रतिपद्येत यथैव गत्वा काष्ठामभिपद्येत तादृक्तत्, इति ।

यथा लोके कश्चिदवधिं प्राप्य स्खलनरहितः स्वाभीष्टं प्राप्नुयात्तादृगेव तद्द्रष्टव्यम् । सूर्यो न इत्यस्मिन्मन्त्रे सूर्यवाय्वग्नीनां लोकत्रयादक्षणं प्रार्थयतो रक्षित(तृ)त्वादेवापराधे न प्रामोति पूर्वत्रैवं नास्तीति विशेषः ।

प्रथमसूक्तं विधाय नवर्चं सूक्तान्तरं विधत्ते -

उदु त्यं जातवेदसामिति द्वितीयं शंसति, इति ।

तदेतदुभयं गायत्रीछन्दस्कम् ।

---

१ ऋ. १-५०-१ । २ ऋ. १०-१५८-१ ।

अथ त्रैष्टुभं सूक्तं विधत्ते-

चित्रं देवानामुदगादनीकमिति त्रैष्टुभमसौ वाव चित्रं देवानामुदेति तस्मादेतच्छंसति, इति ।

अस्मिन्मन्त्रे देवानां संबन्धि किंचिच्चित्रं रूपमुदगादुदयं प्रामोतीति श्रूयते । असौ वावाऽऽदित्य एव देवानां संबन्धि चित्रं रूपमुदेति । कालभेदेन वर्णभेददर्शनात् । तस्मादेतत्सूक्तं प्रशस्तत्वादत्र शंसनीयम् ।

तृतीयं छन्दो विधत्ते-

नमो मित्रस्य वरुणस्य चक्षस इति जागतं तद्वाशीःपदमाशिषमेवैतेनाऽऽशास्त आत्मने च यजमानाय च ॥ ९ ॥ इति ।

तदु तदस्य नमो मित्रस्येत्यादिकमाशीःपदमाशिषः प्रतिपादकं द्वितीयचतुर्थपादयोः सप्तर्यत शंसतेत्याशीरर्थस्य लोडन्तस्य पदद्वयस्य प्रयुक्तत्वात्तत्वात्तच्छंसनेन होता स्वस्य यजमानस्य चाऽऽशिषं प्रार्थयते ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऐतरेयब्राह्मणभाष्ये सप्तदशाध्याये तृतीयः खण्डः ॥ ३ ॥ (९) [१३-]

ऐन्द्रादिप्रगाथान्विधातुं प्रस्तौति-

तदाहुः सूर्यो नातिशस्यो बृहती नातिशस्या यत्सूर्यमतिशंसेद्ब्रह्मवर्चसमतिपद्येत यद्बृहतीमतिशंसेत्प्राणानतिपद्येतेति, इति ।

तत्तस्मिन्नाश्विनशस्त्रे केचिदभिज्ञा एवमाहुः । देवानां मध्ये यः सूर्योऽस्ति स नातिशस्यः सूर्यमतिलङ्घ्य शंसनं न कर्तव्यम् । तथा छन्दसां मध्ये बृहतीमतिलङ्घ्य शंसनं न कर्तव्यम् । सूर्यस्योपासकेषु ब्रह्मवर्चसप्रदत्वात्तदभिलङ्घने ब्रह्मवर्चसं नश्येत् । बृहत्याः प्राणरूपत्वात्तदतिलङ्घने प्राणान्विनाशयेदिति तेषामभिप्रायः ।

इदानीमेकं प्रगाथं विधत्ते -

---

१ ऋ. १-११५-१ ।

[1]इन्द्र क्रतुं न आभरेत्यैन्द्रं प्रगाथं शंसति, इति ।

हे, इन्द्र नोऽस्माकं क्रतुमतिरात्राख्यमाभराऽऽनयेत्यस्य पादस्यार्थः ।
द्वितीयमर्धर्चं पठति–

शिक्षा णो अस्मिन्पुरुहूत यामनि
जीवा ज्योतिरशीमहीति, इति ।

पुरुषु बहुषु यागेष्वाहूयमान हे, इन्द नोऽस्मानस्मिन्नतिरात्रयागरूपे यामनि नियमँविशेषे शिक्ष, उपदेशेन प्रवर्तय । जीवास्त्वत्प्रसादेन जीवन्तो वयं ज्योतिरादित्यमण्डलप्रमशीमहि प्राप्नुयाम ।

अत्र ज्योतिःशब्दस्याऽऽदित्यपरत्वात्प्रगाथस्यैन्द्रत्वेऽपि सूर्यमतिक्रम्य शंसनं न भविष्यतीत्येतद्दर्शयति–

असौ वाव ज्योतिस्तेन सूर्यं नातिशंसति, इति ।

अत्रोत्तरस्या ऋचो विष्टारपङ्क्तित्वेऽपि प्रग्रथनेन बृहतीत्वसंपादनाद्बृहतीमतिलङ्घ्य शंसनं न भविष्यतीत्येतद्दर्शयति–

यदु बार्हतः प्रगाथस्तेन बृहतीं नातिशंसति, इति ।

अस्मिन्प्रगाथे पूर्वस्या ऋचः षट्त्रिंशदक्षरत्वात्पादचतुष्टयोपेतत्वाच्च सा स्वभावत एव बृहती । पुनरपि तस्याश्चतुर्थंपादमष्टाक्षरं द्विरावर्त्यैतरस्या ऋचः प्रथमार्धेन विंशत्यक्षरेण सह प्रग्रथ्य षट्त्रिंशदक्षरा द्वितीया बृहती संपादनीया । तत्राप्यन्तिमं पादमष्टाक्षरं द्विरावर्त्योत्तरार्धेन विंशत्यक्षरेण सह प्रग्रथ्य तृतीया बृहती संपादनीया । एवं सति बृहत्या अतिक्रमो न भवति ।

प्रगाथान्तरं विधत्ते–

[2]अभि त्वा शूर नोनुम इति राथंतरीं योनिं शंसति राथंतरेण वै संधिनाऽऽश्विनाय स्तुवते तद्यद्राथंतरीं योनिं शंसति रथंतरस्यैव सयोनित्वाय, इति ।

रथंतराख्यं सामाभि त्वा शूरेत्यत्रोत्पन्नं तस्माद्रथंतरयोनित्वमुद्गातारो

१ ऋ. ७-३३-२६ ॥ २ ऋ. ७-३३-२२ ॥

ह्यतिरात्रे रथंतरसामसाध्येनान्तिमेन संधिना स्तोत्रेणाऽऽश्विनशस्त्रपदर्शनार्थमेव स्तुवते । अतो रथंतरयोनिशंसने सति स्तोत्रगतस्य रथंतरस्यैव साम्नः सयोनित्वं समानस्थानत्वं संपद्यते ।

अत्र सूर्यातिक्रमाभावं दर्शयति—

ईशानमस्य जगतः स्वर्दृशमित्यसौ वाव स्वर्दृक्तेन सूर्यं नातिशंसति, इति ।

ईशानमित्यादिकः प्रथमाया ऋचस्तृतीयपादोऽस्य सर्वस्य जगत ईशानं स्वामिनं स्वर्दृशं स्वर्गलोके दृश्यमानमभिनोनुम इति प्रथमपादगतेनान्वयः । अत्र स्वर्दृक्शब्देनासावादित्य एवोच्यते । तेन सूर्यातिक्रमो नास्ति ।

पूर्ववद्बृहत्यतिक्रमाभावं दर्शयति -

यदु बार्हतः प्रगाथस्तेन बृहतीं नातिशंसति, इति ।

प्रगाथान्तरं विधत्ते—

बहवः सूरचक्षस इति मैत्रावरुणं प्रगाथं शंसत्यहर्वै मित्रो रात्रिर्वरुण उभे वा एषोऽहोरात्रे आरभते योऽतिरात्रमुपैति तद्यन्मैत्रावरुणं प्रगाथं शंसत्यहोरात्रयोरेवैनं तत्प्रतिष्ठापयति, इति ।

अह्नो मित्रः स्वामी रात्रेश्च वरुणस्तस्मात्तयोस्तद्रूपत्वम् । यो यजमानोऽतिरात्रक्रममनुतिष्ठत्येष पुमानहोरात्रे उभे अप्युद्दिश्य क्रतुं प्रारभत उभयोः कालयोरनुध्येयविशेषसद्भावात् । अतो मैत्रावरुणप्रगाथशंसनेनाहोरात्रयोरेव कालयोरेनं यजमानं प्रतिष्ठितं करोति ।

पूर्ववदनतिक्रमं दर्शयति -

सूरचक्षस इति तेन सूर्यं नातिशंसति यदु बार्हतः प्रगाथस्तेन बृहतीं नातिशंसति, इति ।

सूरचक्षस इति श्रूयमाणं सूरदं सूर्यवाच्यास्तस्य नातिक्रमः ।

पुनरप्यन्ये द्वे ऋचौ विधत्ते—

[2]महीद्यौः पृथिवी च नस्ते[3] हि द्यावापृथिवी

---

१ ऋ. ७-६६-१० ॥ २ ऋ. १-२२ १३ ॥ ३ ऋ १ १६१ १ ॥

विश्वशंभुवेति द्यावापृथिवीये शंसति द्यावापृथिवी वै प्रतिष्ठे इयमेवेह प्रतिष्ठाऽसावमुत्र तद्यद्द्यावापृथिवीये शंसति प्रतिष्ठयोरेवैनं तत्प्रतिष्ठापयति, इति।

मही द्यौरित्येका ते हीति द्वितीया। उभे अप्यृचौ द्यावापृथिवीदेवताके। ते च द्यावापृथिव्यौ सर्वेषां प्राणिनामाधारभूते। इह मनुष्यजन्मनीयमेव पृथिवी प्राणिनामाश्रयः। अमुत्र जन्मान्तरेऽसौ द्युलोक आश्रयः। तथा सति द्यावापृथिवीययोर्ऋचोः शंसनेनोभयोरपि प्रतिष्ठारूपयोर्लोकयोरेनं यजमानं प्रतिष्ठापयति।

अत्र सूर्यस्यानतिक्रमं दर्शयति -

देवो देवी धर्मणा सूर्यः शुचिरिति तेन सूर्यं नातिशंसति, इति

उत्तरस्यामृचि देवो देवीत्यस्मिन्पादे सूर्यस्य श्रूयमाणत्वात्तदतिक्रमो नास्ति।

बृहत्या अनतिक्रमं दर्शयति—

यदु गायत्री च जगती च ते द्वे बृहत्यौ तेन बृहतीं नातिशंसति, इति।

प्रथमाया गायत्रीछन्दस्त्वाच्चतुर्विंशत्यक्षरत्वम्। द्वितीया जगतीच्छन्दस्काऽष्टाचत्वारिंशदक्षरा मिलित्वा द्वासप्ततिरक्षराणि संपद्यन्ते। तेषां द्वेधा विभागे सति षट्त्रिंशदक्षरे द्वे बृहत्यौ भवतः। तेन बृहत्या अनतिक्रमः।

अथान्यामेकामृचं विधत्ते—

विश्वस्य देवी मृचयस्य जन्मनो न या रोषाति न ग्रभदिति द्विपदां शंसति, इति।

इयमृक्पादद्वयोपेताऽस्मिन्ब्राह्मण एवोक्ता। मृचि धातुर्गत्यर्थः। मर्चयति गच्छतीति गतिमान्प्राणी। विश्वस्य सर्वस्य मृचयस्य गतिमतः प्राणिनो यज्जन्म तस्य जन्मनो देवी स्वामिनी काचिन्निर्ऋतिरूपा मृत्युदेवता विद्यते। या मृत्युदेवताऽस्मासु न रोषाति न कुप्यति न ग्रभदेव गृह्णातीति द्विपदाया ऋचोऽर्थः। तामेतां द्विपदां शंसेत्।

एतामृचं प्रशंसति-

चितैधमुक्थमिति ह स्म वा एतदाचक्षते यदेतदाश्विनं निर्ऋतिर्ह स्म पाशिन्युपास्ते यदैव होता परिधास्यत्यथ पाशान्प्रतिमोक्ष्यामीति ततो वा एतां बृहस्पतिर्द्विपदामपश्यन्न या रोषाति न रभादिति तया निर्ऋत्याः पाशिन्या अधराचः पाशानपास्यत्तद्यदेतां द्विपदां होता शंसति निर्ऋत्या एव तत्पाशिन्या अधराचः पाशानपास्यति स्वस्त्येव होतोन्मुच्यते सर्वायुः सर्वायुत्वाय, इति ।

यदेतदाश्विनं शस्त्रमस्ति तदेतच्चितैधमुक्थमिति रहस्याभिज्ञा आचक्षते । चिता एधाः काष्ठसमूहा मनुष्यं दग्धुं यास्मिञ्श्मशाने स्थाने तत्स्थानं चितैधम् । तत्सदृशमिदमुक्थं शस्त्रं यथा श्मशानं दृष्ट्वा जीवनार्थिनो बिभ्यति तद्वदाश्विनं शस्त्रं भयहेतुरित्यर्थः । तत्कथमिति तदेवोच्यते । निर्ऋतिर्मृत्युदेवता सा च पाशिनी पाशहस्ता सत्युपास्ते होतुः समीपे निवसति । केनाभिप्रायेणेति सोऽभिधीयते । यदैवायं होता परिधास्यति शस्त्रसमाप्तिं करिष्यति तदैव बन्धनार्थं पाशानस्मिन्होतरि प्रतिमोक्ष्यामि प्रजेष्यामीति तस्या अभिप्रायः । ततो वै तस्मादेव निर्ऋत्याः परिहरणीयत्वकारणात्तदपाकरणार्थं बृहस्पतिरेतां द्विपदां तत्परिहारहेतुत्वेनापश्यत् । काऽसौ द्विपदेति वक्षायां तदीयो द्वितीयः पादो न येत्यादिकः प्रदर्शनार्थमुपादीयते । तया द्विपदया पाशहस्तायाः निर्ऋत्याः सकाशादधराचोऽधो लम्बमानान्पाशान्बृहस्पतिरपास्यत्, द्विपदायां पठ्यमानायां तद्धस्तात्पाशाः पतिता इत्यर्थः । तद्वद्धोताऽपि द्विपदायाः शंसनेन पाशानपास्यति निराकरोति । स्वस्त्येव क्षेमेणैवायं होता निर्ऋतिपाशान्मुच्यते । ततः सर्वायुर्भवति यजमानस्यापि सर्वायुत्वाय शंसनं संपद्यते ।

वेदनं प्रशंसति-

सर्वमायुरेति य एवं वेद, इति ।

तत्र सूर्यस्यानतिक्रमं दर्शयति-

मृचयस्य जन्मन इत्यसौ वाव मर्चयतीव तेन

सूर्यं नातिशंसति, इति ।

द्विपदायां गतिवाची मृचयशब्दोऽस्त्यसौ वाचाऽऽदित्योऽपि मर्चयतीव सर्वदा गच्छत्येव । तेन सूर्याभिधानान्नास्त्यतिक्रमः ।

बृहत्या अनतिक्रमं दर्शयति -

यदु द्विपदा पुरुषच्छन्दसं सा सर्वाणि च्छन्दां-
स्यभ्याप्ता तेन बृहतीं नाति शंसति ॥१०॥ इति ।

यदु यस्मादेव कारणादियं द्विपदा तस्मादेव पुरुषसादृश्यात्पुरुषसंबन्धच्छन्दो भवति पुरुषश्च सर्वच्छन्दसां प्रयोक्तेति पुरुषद्वारा सा द्विपदा सर्वाणि च्छन्दां-स्यभितो व्याप्नोति । तेन बृहत्या अपि व्याप्तत्वान्नास्त्यतिक्रमः ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऐतरेयब्राह्मण-
भाष्ये सप्तदशाध्याये चतुर्थः खण्डः ॥ ४ ॥ (१०) [१३१]

अथाऽऽश्विनस्य समाप्त्यर्थमेकामृचं विधत्ते —

ब्राह्मणस्पत्यया परिदधाति ब्रह्म वै बृहस्प-
तिर्ब्रह्मण्येवैनं तदन्ततः प्रतिष्ठापयति, इति ।

बृहस्पते अति यदर्य इत्येषा ब्राह्मणस्पत्या बृहस्पतेर्देवेषु ब्राह्मणजातिस्व-रूपत्वात् । तेन परिधानेनैतच्छस्त्रं ब्रह्मण्येव ब्राह्मणरूपे बृहस्पतावेव प्रतिष्ठितं भवति ।

नित्यप्रयोगार्थं परिधानीयां विधाय काम्यप्रयोगार्थं विधत्ते–

एवा पित्रे विश्वदेवाय वृष्ण इत्येतया
परिदध्यात्प्रजाकामः पशुकामः इति ।

तस्या ऋचस्तृतीयपादमनूद्य व्याचष्टे–

बृहस्पते सुप्रजा वीरवन्त इति
प्रजया वै सुप्रजा वीरवान्, इति ।

पुत्रादिरूपया प्रजया पिता सुप्रजाः शोभनापत्यो वीरवाञ्शूरभृत्ययुक्तश्च । तेन तृतीयपादोक्तसुप्रजा वीरवन्त इत्येतदुपपन्नम् ।

---

१ ऋ. २-२४-१५ ॥ २ ऋ. ४-५०-६ ॥

चतुर्थपादमनुवदति-

वयं स्याम पतयो रयीणामिति, इति ।

हे बृहस्पते त्वत्प्रसादाद्वयं रयीणां धनानां पतयः स्याम ।

अस्यार्थस्य स्पष्टत्वाद्व्याख्यानमुपेक्ष्य ज्ञानपूर्वकानुष्ठानं प्रशंसति-

प्रजावान्पशुमान्रायिमान्वीरवान्भवति
यत्रैवं विद्वानेतया परिदधाति, इति ।

फलान्तरार्थमन्त्रामृचं विधत्ते-

बृहस्पते अति यदर्यो अर्हादित्येतया
परिदध्यात्तेजस्कामो ब्रह्मवर्चसकामोऽ-
तीव वाऽन्यान्ब्रह्मवर्चसमर्हति, इति ।

अत्र पादे योऽयमतिशब्दस्तत्प्रसादादनुष्ठाताऽन्यपुरुषानतीवातिक्रम्यैवाधिकं ब्रह्मवर्चसमर्हति प्राप्नोतीत्यर्थः ।

द्वितीयपादे प्रथमपदमनूद्य व्याचष्टे-

द्युमदिति द्युमदिव वै ब्रह्मवर्चसं विभा-
तीति वीव वै ब्रह्मवर्चसं भाति, इति ।

द्युमद्विभाति क्रतुमज्जनोष्विति द्वितीयः पादः । ब्रह्मवर्चसविशेषणत्वेन द्युतिमत्पर्यायो द्युमदिति शब्दः प्रयुज्यते । श्रुताध्ययनसंपत्तिरूपं ब्रह्मवर्चसं विद्वत्सभायां द्युमदिव वै प्रकाशयुक्तमेव भूत्वा विभाति सर्वेषामेव भासत इति तस्य पदस्य तात्पर्यम् । एतत्पादशंसने ब्रह्मवर्चसं वीव वै विशेषेणैव भाति ।

तृतीयपादमनूद्य व्याचष्टे-

यदीदयच्छवस ऋतप्रजातेति
दीदायेव वै ब्रह्मवर्चसम्, इति ।

अस्मिन्नपि पादे ब्रह्मवर्चसाविशेषत्वेन दीप्यमानत्ववाचकं दीदयादिति पदमस्ति ब्रह्मवर्चसं दीदायेव वै ब्राह्मणेषु दीप्यत एवेति तस्य पादस्यार्थः ।

चतुर्थपादमनूद्य व्याचष्टे—

तदस्मासु द्रविणं धेहि चित्रमिति
चित्रमिव वै ब्रह्मवर्चसम्, इति।

अस्मिन्पादे यच्चित्रविशेषणं तद्युक्तमेव ब्रह्मवर्चसस्य वेदेन शास्त्रेणाऽऽचारेण च विचित्रत्वात् ।

वेदनपूर्वकमनुष्ठानं प्रशंसति—

ब्रह्मवर्चसी ब्रह्मयशसी भवति
यत्रैवं विद्वानेतया परिदधाति, इति ।

ब्रह्मवर्चसी वृत्तसंपन्नः । ब्रह्मयशसी तन्निमित्तकीर्तियुक्तः ।

उक्तमर्थं निगमयति—

तस्मादेवं विद्वानेतया परिदध्यात्, इति ।

सूर्यस्यानतिक्रमं दर्शयति—

ब्राह्मणस्पत्या तेन सूर्यं नाति शंसति, इति ।

यस्मादियमृग्ब्रह्मणस्पतिदेवताका सूर्यश्च संध्योपासनादौ ब्राह्मणानां स्वामी तस्मान्नातिक्रमः ।

बृहत्या अनतिक्रमं दर्शयति—

यदु त्रिष्टुभं त्रिः शंसति सा सर्वाणि च्छन्दां-
स्यभ्याप्ता तेन बृहतीं नाति शंसति, इति ।

त्रिः प्रथमां त्रिरुत्तमामिति न्यायेन परिधानीयायास्त्रिरावृत्तिरस्तीयं त्रिष्टुप्त्रिरावर्त्यमाना द्वात्रिंशदधिकशताक्षरा संपद्यते । तेष्वक्षरेषु सर्वच्छन्दसामन्तर्भावयितुं शक्यत्वादियं सर्वाणि च्छन्दांस्यभितो व्याप्तेत्यतो बृहत्या अपि तदाप्तत्वान्नास्त्यतिक्रमः । यदुक्तं सूत्रकारेण—आश्विनेन ग्रहेण सपुरोळाशेन चरन्तीति ।

तत्रोभयार्थं द्वे याज्ये विधत्ते—

गायत्र्या च त्रिष्टुभा च वषट्कुर्यात्, इति ।

उभा पिबतमश्विनेति गायत्री । अश्विना वायुनेति त्रिष्टुप् । ताभ्यां वषट् कुर्यात् । याज्यात्वेन तदुभयं पठेदित्यर्थः ।

तदेतदुभयं प्रशंसति-

ब्रह्म वै गायत्री वीर्यं त्रिष्टुब्ब्रह्म-
णैव तद्वीर्यं संदधाति, इति ।

गायत्र्या ब्राह्मणस्य च प्रजापतिमुखजत्वसाम्यादेकत्वं त्रिष्टुभो वीर्यहेतुत्वात्तद्भूयस्त्वम् । तदुभयपाठे सति ब्राह्मण्येन सह वीर्यं संपादयति ।

वेदनपूर्वकमनुष्ठानं प्रशंसति-

ब्रह्मवर्चसी ब्रह्मयशसी वीर्यवान्भवति यत्रैवं
विद्वान्गायत्र्या च त्रिष्टुभा च वषट्करोति, इति ।

तदुक्तयोर्गायत्रीत्रिष्टुभोः प्रतीकद्वयं दर्शयति-

[1]अश्विना वायुना युवं सुद-
क्षोभा पिबतमश्विनेति, इति ।

अश्विनेत्यादिकं त्रिष्टुभः प्रतीकमुभा पिबतमित्यादिकं गायत्र्याः प्रतीकम् । एते त्रिष्टुब्गायत्र्यौ याज्ये इत्येकः पक्षः ।

पक्षान्तरं विधत्ते -

गायत्र्या च विराजा च वषट्कुर्याद्ब्रह्म वै गाय-
त्र्यन्नं विराड्ब्रह्मणैव तदन्नाद्यं संदधाति, इति ।

गायत्र्या ब्रह्मत्वं पूर्वमुक्तं विराजोऽन्नसाधनत्वादन्नत्वम् । अतस्तदुभयपाठे सत्यन्नाद्यमाद्यमन्नं ब्राह्मणजात्या संयोजयति ।

वेदनपूर्वकमनुष्ठानं प्रशंसति-

ब्रम्हवर्चसी ब्रम्हयशसी भवति ब्रम्हाद्यमन्नमत्ति यत्रैवं
विद्वान्गायत्र्या च विराजा च वषट्करोति, इति ।

ब्राह्मणेनात्तुं योग्यं पवित्रीभूतं ब्रह्माद्यम् ।

तयोर्गायत्रीविराजोः प्रतीकपदर्शनपुरःसरमेतं पक्षं निगमयति-

तस्मादेवं विद्वान्गायत्र्या चैव विराजा च

---

[1] ऋ. १-४१-१५ ॥ [2] ऋ. ३-५८-७ ॥

वषट्कुर्यात्प्र वामन्धांसि मद्यान्यस्थुरुभा पिबतमश्विनेत्येताभ्याम् ॥ ११ ॥ इति ।

प्र वामन्धांसीति विराट् । उभा पिबतमिति गायत्री । गायत्र्या चैव विराजा चैवेत्येवकारेण पूर्वोक्तस्य त्रिष्टुप्पक्षस्य व्यावृत्तिः । तस्मादपि विराट्पक्षः प्रशस्त इत्यर्थः ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऐतरेयब्राह्मणभाष्ये सप्तदशाध्याये पञ्चमः खण्डः ॥५॥ (११) १३२]

अग्निष्टोम उक्थ्यः षोडश्यतिरात्रश्चैवं चतुःसंस्थो ज्योतिष्टोमः सार्धेनाध्याय षोडशकेनाभिहितः । अथैतच्चतुष्टयमुपजीव्य प्रवर्तमानं गवामयननामकं संवत्सरसत्रमभिधातव्यम् । संवत्सरगतेषु षष्ट्यधिकशतत्रयदिवसेष्वेकैकस्मिन्दिवसे पूर्वोक्तानां चतसृणां संस्थानां मध्ये कयाचित्संस्थया युक्तः सोमप्रयोगः सर्वोऽप्यनुष्ठेयः । सोऽयमेकैकदिनसाध्यः सोमप्रयोगो वेदेष्वहःशब्दन व्यवह्रियते । संवत्सरसत्रस्याऽऽद्ये दिवसे कश्चिदतिरात्रसंस्थः सोमप्रयोगोऽनुष्ठेयः । तदनन्तरभाविनि द्वितीयदिवसेऽनुष्ठेयं सोमप्रयोगं विधत्ते–

चतुर्विंशमेतदहरुपयन्त्यारम्भणीयम्, इति ।

चतुर्विंशतिनामकः कश्चित्सोमविशेषः । स च च्छन्दोगैरेवमाम्नायते– " अष्टाभ्यो हि करोति स तिसृभिः स चतसृभिः स एकया । अष्टाभ्यो हिं करोति स एकया स तिसृभिः स चतसृभिः । अष्टाभ्यो हिं करोति स चतसृभिः स एकया स तिसृभिः " इति । अस्यायमर्थः । स्तोत्रस्याऽऽधारभूते ऋचे विद्यमानास्तिस्र ऋच आवृत्तिविशेषेण चतुर्विंशतिसंख्याका ऋचः कर्तव्याः । सा चाऽऽवृत्तिस्त्रिभिः पर्यायैः संपद्यते । तत्र प्रथमे पर्याये प्रथमामृचं त्रिरभ्यस्य स उद्गाता ताभिस्तिसृभिर्गायेत् । द्वितीयामृचं चतुर्वारमभ्यस्य ताभिश्चतसृभिर्गायेत् । तृतीयाया ऋचः सकृदेव पाठो न चाऽऽवृत्तिः । एवं प्रथमपर्यायेऽष्टौ ऋचः संपद्यन्ते । ताभिर्हि करोत्युद्गायेत् । द्वितीयपर्याये प्रथमायाः सकृत्पाठः । द्वितीयायास्त्रिरावृत्तिः । तृतीयायाश्चतुरावृत्तिरित्येवमत्राप्यष्टौ संपद्यन्ते । तृतीयपर्याये प्रथमायाश्चतुरावृत्तिर्द्वितीयायाः सकृत्पाठस्तृतीयाया-

---

१ ऋ. ७-६८-२ ॥

स्त्रिरावृत्तिरित्येवमत्राप्यष्टौ संपद्यन्ते । तत्सर्वं मिलित्वा चतुर्विंशतिसंख्या ऋचो भवन्ति । सोऽयं चतुर्विंशतिस्तोमोऽनेन स्तोत्राणि यस्मिन्नहनि निष्पाद्यन्ते तदह-श्चतुर्विंशता दशमे तदहरुपयन्त्यनुतिष्ठेयुः । अत्र सत्रेषु सर्वत्रोपयन्त्यसत इति शब्दावनुष्ठानपरावेताभ्यां विधानमेव सत्रत्वलिङ्गम् । तत्र ये यजमानास्त ऋत्विज इति श्रुत्यन्तराद्ऋत्विजां सर्वेषां यजमानत्वेनोपयन्तीति बहुवचनम् । तस्यैतस्याङ्ग आरम्भणीयमिति नामधेयम् ।

तस्यैतस्य नाम्नो निर्वचनं दर्शयति-

एतेन वै संवत्सरमारभन्त एतेन स्तोमांश्च च्छन्दांसि चैतेन सर्वा देवता अनारब्धं वै तच्छन्दोऽनारब्धा सा देवता यदेतस्मिन्नहनि नाऽऽरभन्ते तदारम्भणीयस्याऽऽरम्भणीयत्वम् , इति ।

एतेनैव चतुर्विंशेनाङ्गा साध्येनः संवत्सरसत्रमारभन्ते । तत्र सामगैः प्रयोक्तव्या ये स्तोमा बह्वृचैः प्रयोक्तव्यानि यानि च्छन्दांसि याश्च तत्तन्मन्त्रपतिपाद्याः सर्वा देवतास्तत्सर्वमनेनैवाङ्गाऽऽरभन्ते । यदि कथंचिदेतस्मिन्नहनि च्छन्दो वा देवतान्तरं वा नाऽऽरभेरंस्तदानीमन्यस्मिन्नहन्यारब्धमपि च्छन्दो-देवतादिकमनारब्धसदृशमेव भवति । तस्मादस्मिन्नेवाहनि सर्वस्य मुख्यः प्रारम्भः । तथा सत्यारभ्यते सर्वस्मिन्नहनीति व्युत्पत्त्याऽऽरम्भणीयं नाम संपन्नम् । यद्यप्येतस्मादङ्गः पूर्वभाविनि प्रायणीयाख्येऽहनि सत्रं प्रारब्धं तथाऽपि तस्य प्रायणीयस्यातिरात्रसंयुक्तस्य संवत्सरोपक्रमसाधारणत्वादस्य सत्रस्य विशेषेण प्रारम्भोऽस्मिन्नेव भवतीत्याभिप्रेत्यैतस्याऽऽरम्भणीयत्वमेव युक्तम् (?) ।

अस्मिन्नहनि स्तोमविशेषं विधत्ते-

चतुर्विंशस्तोमो भवति तच्चतुर्विंशस्य चतुर्विंशत्वम् , इति ।

यान्यत्र स्तोत्राणि सन्ति तेषु सर्वेषु यः पूर्वमुदाहृतश्चतुर्विंशत्य (?) संख्यासंपादनरूपः स्तोमः स एव कर्तव्यः । ईदृशस्तोमयोगादेषाङ्गोऽपि चतुर्विंशनाम संपन्नम् ।

तं स्तोमं प्रशंसति-

चतुर्विंशतिर्वा अर्धमासा अर्धमासश एव

तत्संवत्सरमारभन्ते, इति ।

द्वादशसु मासेषु विद्यमाना अर्धमासाश्चतुर्विंशतिसंख्याकाः । तथा सत्यर्धमासशब्द एकमर्धमासं समाप्य पुनरप्यपरोऽर्धमास इत्येवं क्रमेण चतुर्विंशतिसंपत्तौ संवत्सरसत्रप्रारम्भो भवति । तस्माच्चतुर्विंशस्तोमः प्रशस्त एतस्मिन्नहनि ।

सोमयागस्य संस्थाविशेषं विधत्ते–

उक्थ्यो भवति पशवो वा
उक्थानि पशूनामवरुद्ध्यै, इति ।

अग्निष्टोमादूर्ध्वभावी योऽयमुक्थ्योऽस्ति सोऽस्मिन्नहनि प्रयोक्तव्यः । तत्र द्वादशस्तोत्रेभ्य उत्तराणि त्रीण्युक्थनामकानि स्तोत्राणि तेषां पशुप्राप्तिहेतुत्वात्पशुत्वम् । अत उक्थ्यानुष्ठानं पशुप्राप्तये भवति ।

तस्मिन्नहनि चोदकप्राप्तस्तोत्रशस्त्रसंख्यां प्रशंसति–

तस्य पञ्चदश स्तोत्राणि भवन्ति पञ्चदश शस्त्राणि
स मासो मासश एव तत्संवत्सरमारभन्ते, इति ।

मासगतानां दिवसानां त्रिंशत्त्वात्स्तोत्रशस्त्रसंख्यायाश्च तथात्वान्मासत्वसंपत्तिः । मासश एकैकमासक्रमेणेत्यर्थः ।

स्तोत्रगतानामृचां संख्यां प्रशंसति–

तस्य षष्टिश्च त्रीणि च शतानि
स्तोत्रियास्तावन्ति संवत्सरस्याहान्य-
हःश एव तत्संवत्सरमारभन्ते, इति ।

एकैकस्य स्तोत्रस्य चतुर्विंशतिसंख्यायावृत्तत्वात्तत्रत्याः स्तोत्रयोग्या ऋचश्चतुर्विंशतिः संपद्यन्ते । तथा सति दशसु स्तोत्रेषु चत्वारिंशदधिकं शतद्वयं पञ्चसु स्तोत्रेषु विंशत्यधिकमेकं शतमेतदुभयं मिलित्वा षष्ट्यधिकशतत्रयसंख्याकाः स्तोत्रियाः संपद्यन्ते । संवत्सरसंबन्धीन्यहान्यपि तत्संख्याकानि तथा सत्यहःशोऽहःक्रमेणैव संवत्सरसत्रमारभन्ते । तदेवमुक्तपक्ष उपपादितः ।

अथ पक्षान्तरं विधत्ते–

अग्निष्टोम एतदहः स्यादित्याहुरग्निष्टोमो वै
संवत्सरो न वा एतदन्योऽग्निष्टोमादहर्दाधार न

विव्याचेति, इति ।

यदिदं द्वितीयमहः सोऽग्निष्टोमः कर्तव्यः । अग्निष्टोमस्य संवत्सरप्रकृतित्वात् । कथमिति चेत्तदुच्यते । अग्निष्टोमादन्य उक्थ्यादिरूपः कश्चिदपि क्रतुः संवत्सरसत्रावयवभूत एतदहर्नैव दाधार नैव धारयितुं शक्तः । अनुपदिष्टान्यङ्गानि सर्वाण्यग्निष्टोमादातिदिश्यन्ते तदेतदग्निष्टोमस्य धारयितृत्वं तस्मादग्निष्टोमव्यतिरिक्तः क्रतुरेतदहर्न विव्याच विवेक्तुमनुष्ठापयितुं न शक्त इत्येवं पक्षान्तरवादिनामभिप्रायः ।

अस्मिन्पक्षे स्तोमविशेषं विधत्ते -

स यद्यग्निष्टोमः स्यादष्टाचत्वारिंशास्त्रयः पवमानाः स्युश्चतुर्विंशानीतराणि स्तोत्राणि तदु षष्टिश्चैव त्रीणि च शतानि स्तोत्रियास्तावन्ति संवत्सरस्याहान्यहःश एव तत्संवत्सरमारभन्ते, इति ।

अग्निष्टोमपक्षे बहिष्पवमानमाध्यंदिनपवमानार्भवपवमानेषु त्रिषु स्तोत्रेष्वष्टाचत्वारिंशनामकः स्तोमः कर्तव्यः । स च षड्ढ-दोगैरेवमाम्नातः-' षोडशभ्यो ह्यं करोति स तिसृभिः स द्वादशभिः स एकया षोडशभ्यो ह्यं करोति स एकया स तिसृभिः स द्वादशभिः षोडशभ्यो ह्यं करोति स द्वादशभिः स एकया स तिसृभिः ' इति । प्रथमे पर्याये प्रथमाया ऋचस्त्रिरावृत्तिः । द्वितीयाया द्वादशकृत्व आवृत्तिः । तृतीयायाः सकृत्पाठः । द्वितीयपर्याये प्रथमायाः सकृत्पाठो द्वितीयायास्त्रिरावृत्तिस्तृतीयाया द्वादशकृत्व आवृत्तिः । तृतीयपर्याये प्रथमाया द्वादशकृत्व आवृत्तिर्द्वितीयायाः सकृत्पाठस्तृतीयायास्त्रिरावृत्तिमिलित्वाऽष्टाचत्वारिंशत्स्तो (स्तो?) त्रियाः संपद्यन्ते । सोऽयमष्टाचत्वारिंशत्स्तोमः । तमेतं पवमानेषु त्रिषु कृत्वा शिष्टेषु नवसु स्तोत्रेषु चतुर्विंशस्तोमं कुर्यात् । तथा सति पवमानस्तोत्रेषु चतुश्चत्वारिंशदधिकशतसंख्याकाः स्तोत्रियाः संपद्यन्ते । इतरस्तोत्रेषु षोडशाधिकशतद्वयसंख्याकास्ततो मिलित्वा षष्ट्यधिकशतत्रयसंख्याका भवन्ति । संवत्सरगतानामह्नामपि तावत्त्वादहःक्रमेणैव संवत्सरमारभन्ते ।

एवं पक्षद्वयमुपन्यस्य तयोः समविकल्पत्वमभिप्रेत्य पुनरपि पूर्वोक्तमुक्थ्यमुपन्यस्यति-

उक्थ्य एव स्यात्पशुमान्हि यज्ञः पशुसमृद्धं सत्रं

सर्वाणि चतुर्विंशानि स्तोत्राणि प्रत्यक्षाद्धचेतदह-श्चतुर्विंशं तस्मादुक्थ्य एव स्यात् ॥ १२ ॥ इति ।

उक्थ्यस्तोत्राणां पशुसाधनत्वादुक्थ्यो यज्ञः पशुसमृद्धः सत्रं च पशुसमृद्धं कर्तव्यम् । किंचोक्थ्यपक्षे सर्वाणि स्तोत्राणि चतुर्विंशस्तोमकानि । अग्निष्टोमपक्षे पवमानव्यतिरिक्तान्येव । तथा सति प्रत्यक्षान्मुख्यवृत्त्यैवैतदहश्चतुर्विंशं भवति । संख्यान्तरस्य कुत्राप्यप्रविष्टत्वात् । तस्मादुक्थ्य एव कार्यः । एवशब्दो विकल्पार्थः । अग्निष्टोम इदमहरुक्थ्यो वेति सूत्रकारवचनात् ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऐतरेयब्राह्मणभाष्ये सप्तदशाध्याये षष्ठः खण्डः ॥ ६ ॥ (१२) [१३३]

पृष्ठस्तोत्रे चोदकप्राप्तं विकल्पितं सामद्वयमनूद्य प्रशंसति—

बृहद्रथंतरे सामनी भवत एते वै यज्ञस्य नावौ संपारिण्यौ यद्बृहद्रथंतरे ताभ्यामेव तत्संवत्सरं तरन्ति, इति ।

त्वामिद्धि हवामहे (६-४६-१) इत्यस्यामृच्युत्पन्नं साम बृहत् । अभि त्वा शूर नोनुमः [७ ३२-२२] इत्यस्यामृच्युत्पन्नं रथंतरम् । एते उभे अपि यज्ञाख्यस्य समुद्रस्य सम्यक्परतीरप्राप्तिसाधनभूते नावौ । संवत्सरसत्रस्य समुद्ररूपत्वं शाखान्तरे दर्शितम्—'समुद्रं वा एते प्लवन्ते ये संवत्सरमुपयन्ति' इति । तथा सति तत्पारनयनहेत्वोः साम्नोर्नौरूपत्वं युक्तम् । अतो बृहद्रथंतररूपाभ्यां नौभ्यामेव संवत्सरं(र) सत्ररूपं समुद्रं तरन्ति गवामयनस्य पारं गच्छन्तीत्यर्थः ।

प्रकारान्तरेण प्रशंसति—

पादौ वै बृहद्रथंतरे शिर एतदहः पादाभ्यामेव तच्छ्रियं शिरोऽभ्यायन्ति, इति ।

यथा मनुष्यस्य पादौ तथा सत्रस्य बृहद्रथन्तरे सामनी । एतच्चाऽऽरम्भणीयमहः शिरःस्थानीयम् । ततो यथा लोके पुरुषाः पादाभ्यामेव देशान्तरात्स्वगृहे गत्वा तत्र शिरोऽभिलक्ष्याभ्यङ्क्तकर्णाभरणादिरूपां श्रियमायन्ति प्राप्नुवन्ति, एवमेते साग्निणः सामभ्यामेतदहः प्राप्नुवन्ति ।

पुनरपि प्रकारान्तरेण प्रशंसति—

पक्षौ वै बृहद्रथंतरे शिर एतदहः पक्षाभ्यामेव तच्छ्रियं शिरोऽभ्यायुवते, इति ।

यथा लोके पक्षी पक्षाभ्यामेवाऽऽकाशे संचरञ्शिरोऽभिलक्ष्य नानाविधदिग्दर्शनरूपां श्रियं मिश्रयत्येवमत्रापि सामभ्यामेतस्मिन्नहनि श्रियमनुष्ठानरूपां सत्रिणो युवते मिश्रयन्ति ।

सामद्वयस्य परित्यागं निषेधति—

ते उभे न समवसृज्ये य उभे समवसृजेयुर्यथैव च्छिन्ना नौर्बन्धनात्तीरं तीरमृच्छन्ती प्लवेतैवमेव ते सत्रिणस्तीरं तीरमृच्छन्तः प्लवेरन्य उभे समवसृजेयुः, इति ।

उभे सामनी न समवसृज्ये न परित्याज्ये एकस्याप्यननुष्ठानमुभयपरित्यागः । ये सत्रिणोऽनभिज्ञाः सन्त उभयं परित्यजन्ति तेषां छिन्ननौसादृश्यं प्रसज्येत । लोके हि नाविकः सायंकाले नावं कयाचिद्रज्ज्वा तीरस्थे स्थाणौ बध्नाति । यदा प्रवाहवेगाद्रात्रौ सा रज्जुस्त्रुटयति तदानीं बन्धनस्थाणोश्छिन्ना नौः प्रवाहवेगेनेवस्ततो नीयमाना परतीरमर्वाक्तीरं च पुनः पुनः प्राप्नुवती रक्षकाभावात्प्लवेत यत्र क्वापि गच्छेत् । एवमेव ते सत्रिणः सामद्वयाभावे तत्तीरसदृशानहर्विशेषानृच्छन्तोऽनुतिष्ठन्तोऽपि प्लवेरन्विनश्येयुरित्यर्थः । ये सामद्वयमपि परित्यजन्ति तेषामेवायं दोष इति दर्शयितुमुभे समवसृजेयुरिति पुनरभिधानम् ।

उभयोः सान्नोर्विकल्पितत्वादेकपरित्यागे दोषो नास्तीत्येतद्दर्शयति—

तद्यदि रथंतरमवसृजेयुर्बृहतैवोभे अनवसृष्टे अथ यदि बृहदवसृजेयू रथंतरेणैवोभे अनवसृष्टे, इति ।

तत्तयोः सान्नोर्मध्ये यदा रथंतरं परित्यजेयुर्बृहदेवानुतिष्ठेयुस्तदा बृहतैव प्रयोगसंपूर्तेः फलत उभयमप्यपरित्यक्तमेव भवति । एवं बृहत्परित्यागपक्षेऽपि रथंतरेणैव संपूर्तिः ।

प्रकारान्तरेण सामद्वयं प्रशंसति—

यद्वै रथंतरं तद्वैरूपं यद्बृहत्तद्वैराजं यद्रथंतरं तच्छाक्वरं

यद्बृहत्तद्रैवतमेवमेते उभे अनवसृष्टे भवतः, इति ।

पृष्ठ्यषडहे षट्स्वपि दिवसेषु क्रमेण पृष्ठस्तोत्रनिष्पादकानि षट्सामानि रथंतरं वैरूपं बृहद्वैराजं शाक्करं रैवतमिति । तत्र रथंतरस्य बृहतश्चोत्पत्तिस्थानं पूर्वमुक्तम् । यद्द्याव इन्द्र ते शतम् [८-७० ५] इत्यस्यामृच्युत्पन्नं वैरूपं साम । पिबा सोममिन्द्र मन्दतु त्वा [७-२३-१] इत्यस्यामृच्युत्पन्नं वैराजं साम । प्रोष्वस्मै पुरोरथम् [१०-१३३-१] इत्यस्यां गीयमानं रैवतं साम । तत्र बृहद्रथंतरयोरेवात्रोत्तरस्थानीयत्वादशेषसामफलसिद्ध्यर्थमेते उभे अपरित्यक्ते एव भवतः, उभयपरित्यागः सर्वथा न योग्य इत्यर्थः ।

उक्तस्याह्नोऽनुष्ठानं प्रशंसति—

ये वा एवं विद्वांस एतदहरुपयन्त्याप्त्वा वै तेऽहःशः संवत्सरमाप्त्वाऽर्धमासश आप्त्वा मासश आप्त्वा स्तोमांश्च च्छन्दांसि चाऽऽप्त्वा सर्वा देवतास्तप एव तप्यमानाः सोमपीथं भक्षयन्तः संवत्सरमभिषुण्वन्त आसते, इति ।

ये सत्रिणः पूर्वोक्तप्रकारेणैतस्याह्नो महिमानं विद्वांस एतदहरनुतिष्ठन्ति ते सत्रिणः संवत्सरसत्रमहर्द्वारेणार्धमासद्वारेण मासद्वारेण स्तोमच्छन्दोद्वारेण सर्वदेवताद्वारेण प्राप्य तपश्चरन्तो निर्विघ्नं सोमयागं कुर्वन्तः संवत्सरमपि नैरन्तर्येण सोममभिषुण्वन्त आसते विघ्नः कोऽपि न भवतीत्यर्थः ।

अथ सत्रगतस्योत्तरपक्षस्य प्रत्यवरोहं विधत्ते—

ये वा अत ऊर्ध्वं संवत्सरमुपयन्ति गुरुं वै ते भारमभिनिदधते स वै गुरुर्भारः शृणात्यथ य एनं परस्तात्कर्मभिराप्त्वाऽवस्तादुपैति स वै स्वस्ति संवत्सरस्य पारमश्नुते ॥ १३ ॥ इति ।

ये वै केचन मन्दबुद्धयः सत्रिणोऽत आरम्भणीय चतुर्विंशमहः प्रारभ्योर्ध्वमानुलोम्येनैसत्संवत्सरसत्रमुपयन्ति, अनुतिष्ठन्ति ते सत्रिणो गुरुं वै प्रौढमेव भारमभिनिदधते स्वस्योपरि स्थापयन्ति । स वै गुरुर्भारः स एव शृणाति

भारवाहकान्सत्रिणो विनाशयति । अथ पूर्वोक्तवैलक्षण्येन सत्रिण एनं संवत्सरं परस्तादादित आरभ्य विहितैः कर्मभिः पूर्वपक्षगतैराप्त्वाऽनुष्ठायोत्तरपक्षेऽवस्तात्प्रत्यवरोहक्रमेणोपैति, उपयन्त्यनुतिष्ठन्ति । स वै त एव सत्रिणः स्वस्ति क्षेमेण संवत्सरसत्रस्य पारं समाप्तिमश्नुते प्राप्नुवन्ति । अयमर्थः । अस्ति किंचिद्विषुवनामकं संवत्सरसत्रस्य मध्ये प्रधानमहस्तस्याधस्तात्षण्मासाः सोऽयं प्रथमः पक्ष उपरिष्टादपि षण्मासाः सोऽयमुत्तरः पक्षः । यथा लोके कस्याश्चिच्छालायाः स्तम्भयोः पूर्वं दीर्घं वंशं प्रौढं प्रसार्योभयोः पार्श्वयोः पक्षद्वयं कुर्वन्ति, एवं संवत्सरसत्रस्यापि । तथा च शाखान्तरं श्रयते-'यथा शालायै पक्षसी मध्यमं वंशमभिसमायच्छति, एवꣳ संवत्सरस्य पक्षसी दिवाकीर्त्यमभिसंतन्वन्ति' इति । दिवैव मन्त्राणां कीर्तनीयत्वाद्विषुवनामकमेकं दिवाकीर्त्यम् । तत्र पूर्वपक्षरूपे मासषट्के यः प्रयोगक्रम एवमुत्तरपक्षेऽपि मासषट्केऽपि तेनैव क्रमेण स प्रयोगो यद्यनुष्ठीयेत तदानीमतिभारः स्यात् । नूतनानुष्ठानविशेषाभावेनाऽऽलस्ये सति वैकल्यं भवति स एव भार इत्युच्यते । अतस्तत्परिहारार्थं पूर्वेषु षट्सु मासेषु यानि कर्माणि येनाऽऽनुपूर्व्येणानुष्ठितानि तानि कर्माण्युत्तरेषु मासेषु तद्विपरीतक्रमेणानुष्ठेयानि । तथा सत्यालस्याभावादविघ्नेनैव संवत्सरसत्रं समाप्यत इति ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऐतरेयब्राह्मणभाष्ये सप्तदशाध्याये सप्तमः खण्डः ॥ ७ ॥ (१३ [१२])

अथास्मिन्नारम्भणीये चतुर्विंशेऽहनि निष्केवल्यशस्त्रे किंचिद्विशेषं विवक्षन्

यद्वै चतुर्विंशं तन्महाव्रतं बृहद्दिवेनात्र होता रेतः सिञ्चति तददो महाव्रतीयेनाह्ना प्रजनयति संवत्सरे संवत्सरे वै रेतः सिक्तं जायते तस्मात्समानं बृहद्दिवो निष्केवल्यं भवत्येष ह वा एनं परस्तात्कर्मभिराप्त्वाऽवस्तादुपैति य एवं विद्वानेतदहरुपैति, इति ।

यदेतद्द्वितीयं चतुर्विंशमहस्तदेव संवत्सरसत्रस्योपान्त्यं महाव्रताख्यमहर्भवति । आरोहक्रमेण चतुर्विंशाख्यं पूर्वपक्षगतं द्वितीयमहरवरोहक्रमेण महाव्रताख्यमुपान्त्यत्वाद्द्वितीयमहर्भवति । अनेन द्वितीयत्वसाम्येन तयोः परस्परैक्यमुपचर्यते ।

किंचोभयत्र बृहद्दिवसाम्यमस्ति तदिदास भुवनेषु ज्येष्ठम् [१०-१२०-१] इत्येतत्सूक्तं बृहद्दिवशब्देन विवक्षितं प्रौढस्य द्युलोकस्य प्राप्तिहेतुत्वात् । एतदेवोभयत्र निष्केवल्यशस्त्रे क्रियते । तथा सत्यस्मिन्द्वितीयेऽह्नि चतुर्विंशनामके बृहद्दिवनाम्ना तदिदासेत्यादिना निष्केवल्यशस्त्रगतसूक्तेन होता रेतः सिञ्चति तदहः । तदेतत्सिक्तं रेतो महाव्रतीयेनोपान्त्येनाह्ना बृहद्दिवाख्यनिष्केवल्यसूक्तयुक्तेन प्रजनयति । अत्र सत्रसंवत्सरमध्य एव रेतःसेकः प्रजननं च द्वितीयोपान्त्यविषयोः संपन्नम् । ततो लोकेऽप्येकैकस्मिन्संवत्सरे रेतःसेक उत्पत्तिश्चेत्युभयं संपद्यते । यस्माद्द्वितीयोपान्त्ययोरह्नोरुभयोरपि मिलित्वा प्राणिनो जन्मरूपमेकं कार्यमपेक्षितम् । तस्माद्बृहद्दिवनामकेन सूक्तेनोभयत्र निष्केवल्यशस्त्रं समानमेकरूपं कर्तव्यम् । यः पुमानेवं महाव्रवाहसाम्येनात्र सत्रार्थं निष्केवल्यकर्तव्यतां विद्वानेतद्द्वितीयमहरनुतिष्ठति स पुमान्परस्तात्सत्रस्य प्रथममभाग आनुलोम्येन क्रियमाणैः कर्मभिराप्त्वा प्राप्यावस्तादपरभागे प्रातिलोम्येनैव संवत्सरमनुतिष्ठति ।

वेदनं प्रशंसति

स्वस्ति संवत्सरस्य पारमश्नुते य एवं वेद, इति ।

अथ संवत्सरसत्रस्याऽऽद्यन्ते द्वे अहनी विधत्ते—

यो वै संवत्सरस्यावारं च पारं च वेद स वै स्वस्ति संवत्सरस्य पारमश्नुतेऽतिरात्रो वा अस्य प्रायणीयोऽवारमुदयनीयः पारम्, इति ।

यः पुमान्संवत्सरसत्रस्य समुद्रस्थानीयस्यावारमर्वाक्तीरस्थानीयं प्रथममहः पारं परतीरस्थानीयमन्तिममहर्यो वे (हर्वे) द तयोरह्नोरनुष्ठेयं कर्तव्यं निश्चिनोति स पुमानविघ्नेनैव संवत्सरसत्रस्य पारं समाप्तिं प्राप्नोति । योऽयमतिरात्रसंस्थः स एवास्य प्रायणीय आरम्भेऽनुष्ठेयत्वादर्वाक्तीरस्थानीयः । स एवातिरात्रः पुनरुदयनीयः समाप्तावनुष्ठेयत्वात्परतीरस्थानीयः ।

वेदनं प्रशंसति—

स्वस्ति संवत्सरस्य पारमश्नुते य एवं वेद, इति ।

उक्तावाद्यन्तावतिरात्रौ प्रशंसति—

यो वै संवत्सरस्यावरोधनं चोद्रोधनं च वेद स वै स्वस्ति संवत्सरस्य पारमश्नुतेऽतिरात्रो वा अस्य

प्रायणीयोऽवरोधनमुदयनीय उद्रोधनम् , इति ।

अवरुध्यते स्वाधीनं क्रियते येन प्रारम्भरूपेण कर्मणा तत्कर्मावरोधनम् । उद्रुध्यते समाप्यते येन कर्मणा तदुद्रोधनमन्यत्पूर्ववत् ।

वेदनं प्रशंसति-

स्वस्ति संवत्सरस्य पारमश्नुते य एवं वेद, इति ।

पुनरपि प्रकारान्तरेण प्रशंसति-

यो वै संवत्सरस्य प्राणोदानौ वेद स वै स्वस्ति संवत्सरस्य पारमश्नुतेऽतिरात्रो वा अस्य प्रायणीयः प्राण उदान उदयनीयः, इति ।

प्रायणीयोऽतिरात्रः प्रशब्दसामान्यात्प्राण इत्युच्यते । उच्छब्दसामान्यादुदयनीयोऽतिरात्र उदानः ।

वेदनं प्रशंसति-

स्वस्ति संवत्सरस्य पारमश्नुते य एवं वेद य एवं वेद ॥ १४ ॥ इति ।

अभ्यासोऽध्यायसमाप्त्यर्थः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऐतरेयब्राह्मणभाष्ये सप्तदशाध्यायेऽष्टमः खण्डः ॥ ८ ॥ (१४) [१३५]

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकवीरबुक्कणसाम्राज्यधुरंधरसायणाचार्यकृतावैतरेयब्राह्मणभाष्ये सप्तदशोऽध्यायः ॥ १७ ॥

अथाष्टादशोऽध्यायः ।

आश्विनस्य विधिः प्रातरनुवाक उदीरितः ॥
संख्याप्रतिपदावन्ये सौर्यादीन्यधिकानि तु ॥ १ ॥

तत्र गवामयनस्य प्रायणीयोदयनीयावाद्यन्तावतिरात्रावुक्तावथ मासकल्पविधानायाभिप्लवषडहे पूर्वभागरूपाणि त्रीण्यहानि विधत्ते -

ज्योतिर्गौरायुरिति स्तोमेभिर्यन्त्ययं वै लोको ज्योतिरन्तरिक्षं गौरसौ लोक आयुः, इति ।

स्तोमशब्दो ज्योतिरादिभिः प्रत्येकमभिसंबध्यते । तथा सति ज्योतिष्टोमो गोष्टोम आयुष्टोम इत्येतरैहोभिर्यन्ति अनुतिष्ठेयुरित्यर्थः । तदेतदहस्त्रयं त्रित्वसाम्यात्क्रमेण लोकत्रयरूपम् । शाखान्तरेऽप्येतद्दर्शितम्-' ज्योतिष्टोमं प्रथममुपयन्त्यास्मिन्नेव तेन लोके प्रतितिष्ठन्ति गोष्टोमं द्वितीयमुपयन्त्यन्तरिक्ष एव तेन प्रतितिष्ठन्ति आयुष्टोमं तृतीयमुपयन्त्यमुष्मिन्नेव लोके प्रतितिष्ठन्ति ' इति ।

षडहे पूर्वभागं त्र्यहमुक्त्वा तदुत्तरभागं विधत्ते-

स एवैष उत्तरस्त्र्यहः, इति ।

त्रयाणां पूर्वोक्तानामेवाह्नां समूहः पुनरनुष्ठीयमान उत्तरस्त्र्यहो भवति ।

तत्र षडहे षण्णामप्यह्नां क्रमं दर्शयति -

ज्योतिर्गौरायुरिति त्रीण्यहानि
गौरायुर्ज्योतिरिति त्रीणि इति ।

ज्योतिष्टोमादीनामेव ज्योतिरित्यादीनि नामानि तैर्नामभिर्धर्मा अविदिश्यन्ते । ज्योतिरादिनामका ये स्वतन्त्रा एकाहाः सन्ति तदीयधर्मा अत्रानुष्ठेया इत्यर्थः ।

योऽयमुभयोस्त्र्यहयोः क्रमव्यत्यास(स्त)मिमं प्रशंसति -

अयं वै लोको ज्योतिरसौ लोको ज्योतिस्ते
एते ज्योतिषी उभयतः संलोकेते, इति ।

प्रथमस्य त्र्यहस्याऽऽदौ ज्योतिर्नामकमहर्यदस्ति तत्पार्थग्यद्भूलोकस्वरूपम् । यच्चोत्तरस्य त्र्यहस्यावसाने ज्योतिर्नामकमहस्तदुत्तमत्वसाम्याद्द्युलोकस्वरूपम् । तेएते षडहस्याऽऽद्यन्तयोर्वर्तमाने ज्योतिषी उभयतोऽवस्थाय परस्परं संलोकेते संमुखत्वेनेक्षेते ।

अहर्विशेषांस्तत्क्रमं चोक्त्वा समष्टिरूपं षडहं विधत्ते-

तेनैतेनोभयतोज्योतिषा षळहेन यन्ति
तद्यदेतेनोभयतोज्योतिषा षळहेन यन्त्य-
नयोरेव तल्लोकयोरुभयतः प्रतितिष्ठन्तो
यन्त्यस्मिंश्च लोकेऽमुष्मिंश्चोभयोः, इति ।

उभयत आद्यन्तयोर्ज्योतिर्नामकमहर्यस्मिन्षडहे तदेतदुभयतोज्योतिस्तेनैतेन षड-

हेनानुतिष्ठेयुः । तदनुष्ठानेनोभयतो वर्तमानयोः प्रतिष्ठां प्रापयन्ति वर्तन्ते लोक योरुभयत इत्यस्यैव विवरणमस्मिंश्च लोकेऽमुष्मिंश्चोभयोरिति । अथवोत्तरशेषत्वे नास्मिंश्चेत्यादिकमन्वेतव्यम् ।

अस्मिन्नभिप्लवषडहे संस्थाविशेषान्विधत्ते-

परियद्वा एतद्देवचक्रं यदाभिप्लवः षळह-
स्तस्य यावभितोऽभिष्टोमौ तौ प्रधी ये च-
त्वारो मध्य उक्थ्यास्तन्नभ्यम्, इति।

योऽयमभिप्लवः षडहस्तदेतदस्मिंश्चामुष्मिंश्चोभयोर्लोकयोः परियद्वै परिवर्तमा-नमेव देवचक्रम् । यथा लोके रथस्य चक्रं पुनः पुनः परिवर्तते तद्वदिदं देव चक्रमसकृत्षडहं परिवर्तनस्य वक्ष्यमाणत्वात् । रथचक्रस्य हि निष्पादकानि त्रीणि फलकानि । तत्र मध्यमफलकेऽरं प्रवेशयितुं प्रौढं नाभिच्छिद्रं क्रियते । तस्य फलकस्योभयोः पार्श्वयोर्वर्तुलत्वाय फलकद्वयं कीलितं भवति । एवमस्मि-न्नपि षडहे ज्योतिर्यागावाद्यन्तवर्तिनावभिष्टोमसंस्थौ प्रधी भवतः प्रकर्षेणोभयतो धीयेते स्थाप्येते इति प्रधी फलकद्वयस्थानीयावित्यर्थः । एतस्मिन्ये तु मध्ये चत्वारोऽहर्विशेषा उक्थ्यसंस्थास्तदैतन्नभ्यं नाभियोग्यस्थानमुक्थ्यसंस्थाः कर्तव्या इत्यर्थः ।

वेदनं प्रशंसति-

गच्छति वै वर्तमानेन यत्र कामयते तत्स्वस्ति
संवत्सरस्य पारमश्नुते य एवं वेद, इति

वेदिता यत्र यस्मिँल्लोके गन्तुं कामयते तत्रानेनैव परिवर्तमानेन देवचक्रेण गच्छति । तत्तेन देवचक्रेण निर्विघ्नमेव संवत्सरसत्रसमाप्तिं गच्छति ।

उक्तस्याभिप्लवषडहस्यैकस्मिन्मासि पञ्चकृत्व आवृत्तिं विधत्ते-

यो वै तदवेद यत्प्रथमः षळहः स वै
स्वस्ति संवत्सरस्य पारमश्नुते यस्तदवेद
यद्द्वितीयो यस्तदवेद यत्तृतीयो यस्तदवेद
यच्चतुर्थो यस्तदवेद यत्पञ्चमः ॥ १५ ॥ इति ।

प्रथमः षडह इति यदस्ति तद्यो वेद स पुमान्निर्विघ्नेन सत्रपारं प्राप्नोति । तथा द्वितीयः षडह इति यदस्ति तद्यो वेद स वै स्वस्तीत्यादिकमनुवर्तनी-

यम् । एवमुत्तरेष्वपि त्रिषु पर्यायेषु द्रष्टव्यम् । षडहे पञ्चकृत्व आवर्तिते ?) माने सति त्रिंशदहानि भूत्वा मासः संपद्यते ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऐतरेयब्राह्मणभाष्येऽष्टादशाध्याये प्रथमः खण्डः ॥ १ ॥ (१५) [१३६]

उक्तेषु पञ्चसु षडहेषु प्रथममनूद्य प्रशंसति—

प्रथमं षळहमुपयान्ति षळहानि भवन्ति षड्वा ऋतव ऋतुश एव तत्संवत्सरमाप्नुवन्त्यृतुशः संवत्सरे प्रतितिष्ठन्तो यन्ति, इति ।

अनुष्ठिते षडहे षट्संख्याकान्यहानि भवन्ति । ततः संख्यासाम्यादृतुद्वारा संवत्सरं प्राप्य तत्र प्रतिष्ठिताः सन्तो वर्तन्ते ।

पूर्वेण षडहेन सहितं द्वितीयं षडहं प्रशंसति—

द्वितीयं षळहमुपयान्ति द्वादशाहानि भवन्ति द्वादश वै मासा मासश एव तत्संवत्सरमाप्नुवन्ति मासशः संवत्सरे प्रतितिष्ठन्तो यन्ति, इति ।

पूर्ववद्व्याख्येयम् ।

उक्ताभ्यां षष्टहाभ्यां सहितं तृतीयं षडहं प्रशंसति—

तृतीयं षळहमुपयन्त्यष्टादशाहानि भवन्ति तानि द्वेधा नवान्यानि नवान्यानि नव वै प्राणा नव स्वर्गा लोकाः प्राणांश्चैव तत्स्वर्गांश्च लोकानाप्नुवन्ति प्राणेषु चैव तत्स्वर्गेषु च लोकेषु प्रतितिष्ठन्तो यन्ति, इति ।

त्रिषु षडहेषु यान्यष्टादशाहानि तेषां द्वेधा त्रिभागे सति प्रत्येकं नवसंख्या संपद्यते । प्राणाः सप्तसूर्ध्वच्छिद्रेषु द्वयोरधश्छिद्रयोर्नवसंख्याकाः स्वर्गलोकाश्च नवभोगस्थानभेदेन नवविधा अतः संख्यासाम्यात्प्राणान्स्वर्गलोकांश्च प्राप्य तत्र प्रतिष्ठिता वर्तन्ते ।

पूर्वैस्त्रिभिः षडहैश्चतुर्थं षडहं प्रशंसति-

चतुर्थं षळहमुपयान्ति चतुर्विंशतिरहानि भवन्ति चतुर्विंशतिर्वा अर्धमासा अर्धमासश्च एव तत्संवत्सरमाप्नुवन्त्यर्धमासशः संवत्सरे प्रतितिष्ठन्तो यन्ति, इति ।

अतः संख्यासाम्यादर्धमासद्वारा संवत्सरे प्रतिष्ठिताः ।

पूर्वैश्चतुर्भिः षडहैः साहितं पञ्चमं षडहं प्रशंसति-

पञ्चमं षळहमुपयान्ति त्रिंशदहानि भवन्ति त्रिंशदक्षरा वै विराड्विराळन्नाद्यं विराजमेव तन्मासि मास्यभिसंपादयन्तो यन्ति, इति ।

अहःसंख्याया विराट्साम्याद्विराजश्चान्नाद्यहेतुत्वात्प्रतिमासं विराड्द्वाराऽन्नाद्यं प्राप्नुवन्ति ।

पुनरपि षडहपञ्चकं प्रशंसति-

अन्नाद्यकामाः खलु वै सत्रमासत तद्यद्विराजं मासि मास्यभिसंपादयन्तो यन्त्यन्नाद्यमेव तन्मासि मास्यवरुन्धाना यन्त्यस्मै च लोकायामुष्मै चोभाभ्याम् ॥ १६ ॥ इति ।

ये सत्रस्यानुष्ठातारस्ते ह्यन्नाद्यकामा अनुतिष्ठन्ति । तथा सति पूर्वोक्तरीत्या संख्यासाम्यात्पञ्चसु षडहेषु त्रिंशदक्षररूपां विराजं प्रतिमासं संपादयन्तो वर्तन्ते । प्रतिमासमन्नाद्यं प्राप्नुवन्तो लोकद्वयं च गच्छन्ति । प्रतिमासं षडहपञ्चकमनुतिष्ठेयुरिति तात्पर्यार्थः । तत्र चत्वारोऽभिप्लवाः षडहाः पञ्चमस्तु पृष्ठ्यः षडह इति सूत्रकारैरभिधानादयं विशेषः शाखान्तरे द्रष्टव्यः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऐतरेयब्राह्मणभाष्येऽष्टादशाध्याये द्वितीयः खण्डः ॥२॥ (१६) १३७]

संवत्सरसत्रस्यावयवान्मासानभिधाय सत्रं विधत्ते—

गवामयनेन यन्ति गावो वा आदित्या आदित्यानामेव तदयनेन यन्ति, इति ।

संवत्सरसत्राणां प्रकृतिभूतस्यैतस्य सत्रस्य गवामयनामिति नामधेयम् । तेन यन्त्यनुतिष्ठेयुः । गमनसाम्याद्गवामादित्यत्वम् । तथा सत्यादित्यानामेवायनेनानुष्ठानं कृतं भवति ।

तदेतद्गवामयनं प्रशंसति—

गावो वै सत्रमासत शफाञ्शृङ्गाणि सिषासत्यस्तासां दशमे मासि शफाः शृङ्गाण्यजायन्त ता अब्रुवन्यस्मै कामायादीक्षामह्यापाम तमुत्तिष्ठामेति ता या उदतिष्ठंस्ता एताः शृङ्गिण्यः, इति ।

पुरा कदाचिद्गवाभिमानिन्यो देवताः स्वकीयानां गोदेहानां पादगताञ्शफाञ्शिरोगतानि शृङ्गाणि च सिषासत्यः प्राप्तुमिच्छन्त्यः सत्रमन्वतिष्ठन् । तासां दशमे मासि तदुभयं संपन्नम् । ततस्ता गावः परस्परमिदमब्रुवन् । यस्मै कामाय वयमदीक्षामहि सत्रदीक्षामाप्तवत्यस्तं काममापाम वयं प्राप्तवत्यः । ततोऽस्मात्सत्रादुत्तिष्ठामेति विचार्योत्थाय गताः । ताः प्रसिद्धा गाव उदतिष्ठन् । ता इमाः शृङ्गिण्यो दृश्यन्ते । अनेन दशसु मासेष्वनुष्ठेयं गवामयनं प्रशस्तम् ।

द्वादशसु मासेष्वनुष्ठेयं यद्गवामयनमस्ति तदिदानीं प्रशंसति—

अथ याः समापयिष्यामः संवत्सरमित्यासत तासामश्रद्धया शृङ्गाणि प्रावर्तन्त ता एतास्तूपरा ऊर्जं त्वसुन्वंस्तस्मादु ताः सर्वानृतून्प्राप्त्वोत्तरमुत्तिष्ठन्त्यूर्जं ह्यसुन्वन्सर्वस्य वै गावः प्रेमाणं सर्वस्य चारुतां गताः, इति ।

सत्रमनुतिष्ठन्तीनां गवां मध्ये शफशृङ्गार्थिनीनां दशभिर्मासैः सिद्धिर्जाता । यासां तु गवां शृङ्गापेक्षा नास्ति किंतूर्गपेक्षैव तादृश्यो या गाव ऊर्जासिद्ध्यर्थं द्वादशमासात्मकं संवत्सरं समापयिष्याम इत्यभिप्रेत्य तथैवान्वतिष्ठन् । तासां

गवां शृङ्गेष्वश्रद्धया शृङ्गाणि न प्रावर्तन्त नोत्पन्नानीत्यर्थः । ता एता गावो लोके तूपराः शृङ्गरहिता दृश्यन्ते । तासु(स्तु) शृङ्गरहिता अपि सत्रानुष्ठानेनोर्जं बलाधिक्यमसुन्वन्संपादितवत्यः । तस्माद्बलाधिक्य [क्य] लक्षणस्य फलस्य सद्भावादेव ता गावः सर्वानुतून्षट्संख्याकानपि तस्मिन्सत्रानुष्ठाने प्राप्योत्तरमूर्ध्वकाले सत्रादुत्तिष्ठन्ति । यस्मादूर्जं [र्जं] बलातिशयमसुन्वन्प्राप्तवत्यस्तस्मादृद्वादशमासानुष्ठानं युक्तम् । ताः शृङ्गरहिता गावः प्रहारभयाभावात्सर्वस्य जगतः प्रेमाणं प्रियत्वं गताः । तथा बलाधिक्येन शरीरपुष्ट्या च सर्वस्य भारवहनादिकार्यस्य नेत्रदर्शनस्य चात्यन्तचारुतां रमणीयतां गताः ।

वेदनं प्रशंसति—

सर्वस्य प्रेमाणं सर्वस्य चारुतां गच्छति य एवं वेद, इति ।

अथाऽऽदित्यानामयनमाङ्गिरसामयनं च गवामयनविकल्पेनोभयं वक्तुं प्रस्तौति—

आदित्याश्च ह वा अङ्गिरसश्च स्वर्गे लोकेऽस्पर्धन्त वयं पूर्व एष्यामो वयमिति ते हाऽऽदित्याः पूर्वे स्वर्गं लोकं जग्मुः पश्चेवाङ्गिरसः षष्ठ्यां वा वर्षेषु, इति ।

आदित्याख्याश्च ये देवा ये चाङ्गिरस[रो] नामका ऋषयस्तदु (उ) भये स्वर्गे लोके परस्परं स्वर्गप्राप्तावस्पर्धन्तास्माकमेव प्रथमं गमनापेक्षि आदित्या अङ्गिरसोऽपि । तथैव तत्राऽऽदित्याः सहसा प्रथमं स्वर्गं प्रापुः । आङ्गिरस-तु पश्चेव विलम्बेनैव षष्टिसंख्याकेषु वर्षेष्वतीतेषु स्वर्गं प्राप्ताः । वाशब्देन पक्षान्तरं द्योत्यते । आङ्गिरसां मध्ये तत्तच्छक्त्यनुसारेण कोचिन्षष्टेः पूर्वं वा गता इत्यर्थः ।

अथाऽऽदित्यायनेऽहःकल्पिं विधत्ते—

यथा वा प्रायणीयोऽतिरात्रश्चतुर्विंश उक्थ्यः सर्वेऽभिप्लवाः षळहा आक्ष्यन्त्यन्यान्यहानि तदादित्यानामयनम् , इति ।

अत्र वाशब्दो न विकल्पार्थः किंतु गवामयनप्रकारव्यावृत्त्यर्थः । गवामयने प्रायणीयाख्यं प्रथममहोऽ[हर]तिरात्रसंस्थं चतुर्विंशमुक्थ्यमहर्द्वितीयं तत्र यथा तथैवाऽऽदित्यानामयनेऽपि तत ऊर्ध्वं विशेषोऽस्ति सर्वेऽभिप्लवाः षडहाः पूर्वोक्ताभ्यां प्रथमाद्वितीयाभ्यामन्यानि सर्वाण्यहान्याक्ष्यन्ति व्याप्तिं करिष्यन्ति । गवामयने त्वेकैकस्मिन्मासि चत्वार एवाभिप्लवषडहाः । अत इदं वैषम्यं तदिदमादित्यानामयनम् ।

अथाङ्गिरसामयनस्य क्लृप्तिं दर्शयति—

प्रायणीयोऽतिरात्रश्चतुर्विंश उक्थ्यः सर्वे पृष्ठ्याः षळहा आक्ष्यन्त्यन्यान्यहानि तदङ्गिरसामयनम्, इति ।

प्रथमाद्वितीयव्यतिरिक्तानि सर्वाण्यहानि पृष्ठ्यषडहैर्व्याप्तानीत्येतावानत्र विशेषः । अथवाऽऽक्ष्यन्तिशब्दोऽहर्विशेषनामधेयम् । तथा च बौधायन आह— ' अभिजिद्विषुवान्विश्वजिदशममहर्महाव्रतमुदयनीयोऽतिरात्र इत्येतान्याक्ष्यन्ति भवन्ति ' इति । तदेतद्बौधायनस्य मतम् । अन्यदपि यान्यन्यानि पृष्ठ्याभिप्लवेभ्य इति शालिकिराचार्यो मेने । यानि चान्यानि पृष्ठ्याभिप्लवेभ्यो दशमाच्चेत्यौपमेन्यव इति । तथा सति प्रायणीयारम्भणीयाभ्यामभिप्लवषडहेभ्यश्चान्यानि यान्यहानि सन्ति तान्याक्ष्यन्ति । एतन्नामकानीत्युभयत्र व्याख्येयम् । सर्वथाऽप्यस्त्येनयोरुभयोरपि गवामयनाद्विशेषः । गवामयने त्वेकस्मिन्मासि चत्वारोऽभिप्लवाः षडहाः पञ्चमः पृष्ठ्यः षडहः । तथा चाऽऽश्वलायन आह—' अथ गवामयनं सर्वकामाः प्रायणीयचतुर्विंशे उपेत्य चतुरभिप्लवान्पृष्ठ्यपञ्चमान्पञ्च मासानुपयन्ति ' इति । आदित्यानामयने पृष्ठ्यः षडहो नास्ति, आङ्गिरसामयनेऽभिप्लवः षडहो नास्तीति वैषम्यम् ।

अयनद्वयगतमभिप्लवषडहं पृष्ठ्यषडहं च दर्शयति—

सा यथा सुतिरञ्जसायन्येवमभिप्लवः षळहः स्वर्गस्य लोकस्याथ यथा महापथः पर्याण एवं पृष्ठ्यः षळहः स्वर्गस्य लोकस्य तद्यदुभाभ्यां यन्त्युभाभ्यां वै यन्न रिष्यत्युभयोः कामयोरुपाप्त्यै यश्चाभिप्लवे षळहे यश्च पृष्ठ्ये ॥१७॥ इति ।

यथा लोकस्य प्रसिद्धा श्रुती राजमार्गरूपाऽऋजसायनी दुःखहेतूनां कण्टकपाषाणादीनामभावादृजसा सन्यगयनस्य गमनस्य साधनभूतैवमभिष्टवः षडह स्वर्गस्य लोकस्याऽऋजा प्राप्तिहेतुः । अथ पृष्ठ्यषडहस्य दृष्टान्त उच्यते । यथा लोके महापथः पौढमार्गो नगरद्वयमध्यवर्ती पर्याणः परितोऽयनस्य गमनस्य साधनभूतो नगरसमीपेऽरण्यपर्वताद्यभावाद्यस्यां दिशि गन्तुमपेक्षा तत्र गन्तुं शक्यत एवमयं पृष्ठ्यः षडहः स्वर्गस्य प्राप्तिहेतुः । तथा सत्यनयोरुभयोरुभाभ्यां यत्र गच्छन्पुरुषो न रिष्यति न विनश्यति । योऽभिप्लवे कामोऽस्ति यश्च पृष्ठ्यषडहे तयोरुभयोः कामयोः प्राप्त्यै षडहद्वयं संपद्यते ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऐतरेयब्राह्मण-
भाष्येऽष्टादशाध्याये तृतीयः खण्डः ॥ ३ ॥ (१७ [११८]

इत्थं गवामयनमादित्यानामयनमङ्गिरसामयनं चैते संवत्सरसत्रविशेषा उक्ताः । तत्र सर्वत्र पूर्वोत्तरयोर्मासषट्कयोर्मध्यवर्ती यत्राधानमहरस्ति तदेतद्विधत्ते—

एकविंशमेतदहरुपयन्ति विषुवन्तं मध्ये संवत्सरस्य, इति ।

छन्दोगब्राह्मणे सप्तभ्यो हिं करोतीत्यादिना विहितो योऽयमेकविंशः स्तोमस्तेनैव स्तोमेनास्य सर्वस्तोत्रमवृत्तेरिदमहरेकविंशमित्युच्यते । तत्र विषुवन्नामकं संवत्सरसत्रस्य ये पूर्वे षण्मासा ये चोत्तरे तयोर्मासषट्कयोरुभयतो वर्तमानयोर्मध्ये तदेतदहरनुष्ठेयम् । एतच्च नोर्मध्यमासषट्कयोरन्तर्भवति । किंत्वतिरिक्तमेकम् । तथा चाऽऽश्वलायन आह—अथ विषुवानेकविंशो न पूर्वस्य पक्षसो नोत्तरस्येति ।

तदेतदहः प्रशंसति—

एतेन वै देवा एकविंशेनाऽऽदित्यं
स्वर्गाय लोकायोदयच्छन्, इति ।

पुरा देवा एतेनाङ्गा स्वर्गलोकाख्यमादित्यमुदयच्छन्नित ऊर्ध्वं प्रापितवन्तः । तथा च शाखान्तरे पठ्यते—' एकविंश एष भवति । एतेन वै देवा एकविंशेनाऽऽदित्यमित उत्तमꣳ सुवर्गं लोकमारोहयन् ' इति ।

आदित्यस्य तेनाङ्गा साम्यं दर्शयति—

स एष इत एकविंशः, इति ।

योऽयमादित्योऽस्ति स एष इतो भूलोकादारभ्य गण्यमान एकविंशति-संख्यापूरको भवति । तथा चान्यत्राऽऽम्नायते–' द्वादश मासाः पञ्चर्तवस्त्रय इमे लोका असावादित्य एकविंशः ' इति । अथवाऽत्रैव विषुवतः पुरस्तात्पश्चाच्च वक्ष्यमाणमहर्दशकद्वयमपेक्ष्य विषुव एकविंश इत्युच्यते । अस्मिन्पक्ष इदं वाक्य-मुत्तरशेषत्वेन योजनीयम् ।

इदानीमुभयतो दशकद्वयं विधत्ते–

तस्य दशावस्तादहानि दिवाकीर्त्यस्य भवन्ति दश परस्तान्मध्य एष एकविंश उभयतो विराजि प्रतिष्ठित उभयतो हि वा एष विराजि प्रतिष्ठि-तस्तस्मादेषोऽन्तरेमाल्लोकान्यन्न व्यथते, इति।

दिवैव कीर्तनीयं मन्त्रजातं यस्मिन्विषुवत्यहनि तदहर्दिवाकीर्त्यम् । तस्या-ह्नोऽवस्तादधोभागे दशाहानि भवन्ति । परस्तादूर्ध्वभागेऽपि दशाहानि भवन्ति । तयोर्दशकयोर्मध्य इष एकविंशो विषुवान्वर्तते । तस्य विषुवतोऽध-स्तात्पूर्वपक्षे षष्ठे मासे स्वरसामानोऽहर्विशेषास्त्रयस्तेभ्यः पूर्वमभिजिदाख्यमे-काहस्ततः पूर्वे पृष्ठ्यः षडह इति दशाहानि विषुवदूर्ध्वं तु प्रत्यवरोहक्रमेण त्रयः स्वरसामानस्ततो विश्वजिदाख्यमेकाहस्तत ऊर्ध्वं पृष्ठ्यः षडह इति दशाहानि । एवमुभयोः पार्श्वयोरह्नां दशसंख्योपेतत्वाद्विराडेतस्यामुभयतोऽ वस्थितायां विराज्ययमेकविंशः प्रतिष्ठितः । यथोक्तगणनया विराजि प्रतिष्ठा-मेव हिशब्दोऽप्ये(पे)तेन वाक्येन स्पष्टी करोति । तस्मादुभयतो विराड्द्वयेन रक्षितत्वादेष आदित्यो विषुवदहस्थानीयः । इमाल्लोकानन्तरा, एषां लोकानां सर्वेषां मध्ये यन्गच्छन्नपि न व्यथते व्यथां न प्रामोति । विषुवानप्येकविंश-आदित्योऽप्येकविंशस्तस्मादुभयोरेकत्वे सति विषुवतो यद्विराड्द्वयोपेतत्वं तदे वाऽऽदित्यस्योभयतोविराट्त्वं भवति । आदित्यस्य व्यथाराहित्ये येन (त्येन ?) विषुवतो वैकल्यराहित्यं सिध्यति । अथवा विषुवतो यथा विराड्द्वयमुभयतो रक्षकमेवमादित्यस्याप्यधस्तादुपरिष्टाच्च वर्तमानं लोकद्वयम् । एतदेवाभिप्रेत्य शाखान्तरे श्रूयते–' तस्मादन्तरेमौ लोकौ यन्सर्वेषु सुवर्गेषु लोकेषु अभित-पन्नेति ' इति ।

अथ विषुवत उभयतः समीपवर्तिनः स्वरसामाख्यानहर्विशेषान्प्रशंसति–

तस्य वै देवा आदित्यस्य स्वर्गाल्लोकादवपाता-

दविभयुस्तं त्रिभिः स्वर्गैर्लोकैरवस्तात्प्रत्युत्तभ्नुवन्स्तोमा वै त्रयः स्वर्गा लोकास्तस्य पराचोऽतिपातादविभयुस्तं त्रिभिः स्वर्गैर्लोकैः परस्तात्प्रत्यस्तभ्नुवन्स्तोमा वै त्रयः स्वर्गा लोकास्तत्त्रयोऽवस्तात्सप्तदशा भवन्ति त्रयः परस्तान्मध्य एष एकविंश उभयतः स्वरसामभिर्धृत उभयतो हि वा एष स्वरसामभिर्धृतस्तस्मादेषोऽन्तरेमाँल्लोकान्यन्न व्यथते, इति ।

योऽयमादित्योऽस्ति तस्याऽऽदित्यस्य स्वर्गलोकादवपात आधाराभावादधः पतनं तस्मादेवा अविभयुरादित्योऽधः पतिष्यतीति भीताः सन्तस्तमादित्यमवस्तान्मण्डलस्याधोभागे त्रिभिः स्वर्गैर्लोकैः स्वर्गशब्दोपलक्षितैर्भूरादीभिः प्रत्युत्तभ्नुवन्नधःपातप्रतिबन्धार्थमुत्तम्भनमाधाररूपमकुर्वन् । यथा गृहगतवंशादीनामधःपातनिवारणाय स्तम्भेनोत्तम्भनं कुर्वन्ति तद्वदिति । वर्तमानस्याऽऽदित्यस्य यथा त्रयो लोका उत्तम्भकास्तथैवाऽऽदित्यस्थानीयस्य विषुवतोऽह्नः स्वर्गलोकसदृशास्त्रयः स्तोमा एवोत्तम्भकाः । सप्तदशस्तोमयुक्ताः स्वरसामानोऽहर्विशेषाः स्तोमशब्देनात्र विवक्षिताः । पुनरपि देवास्तस्याऽऽदित्यस्य परांचोऽतिपातान्मण्डलात्परागभूतेषूर्ध्ववर्तिषु लोकेषु योऽयमतिपातो दृष्टिगोचरं देशमुल्लङ्घ्य यत्र क्वापि दूरदेशगमनं तस्मादतिपाताद्भीताः सन्तः परस्तादादित्यमण्डलस्योपरि त्रिभिर्जनतपःसत्यशब्दाभिधेयैस्त्रिभिः स्वर्गैर्लोकैस्तमादित्यं प्रत्यस्तभ्नुवन् । यथा पूर्ववाधःपतननिवृत्त्यर्थमुत्तम्भनं कृतमेवमुपरिष्टादतिपातनिवृत्त्यर्थं प्रतिस्तम्भनं प्रतिबन्धकस्तम्भमकुर्वन् । आदित्यस्थानीयस्य तु विषुवतोऽह्न उत्तरपक्षगताः स्तोमशब्दोपलक्षिताः स्वरसामाख्यास्त्रयोऽहर्विशेषा एव प्रतिस्तम्भकाः । तत्तथा सति ये विषुवतोऽह्नोऽवस्तादधोवर्तिनस्त्रयोऽहर्विशेषास्ते सप्तदशस्तोमयुक्ताः कार्याः । एवं च सति मध्येऽवस्थित एकविंशाख्योऽहर्विशेष उभयतोऽधस्तादुपरिष्टाच्च स्वरसामनामकैस्त्रिभिस्त्रिभिरहोभिर्धृतः । अयमेवार्थः शाखान्तरप्रसिद्धद्योतकेन हिशब्दयुक्तेन वाक्येन पुनर्दृढीकृतः । यस्माद्विषुवद्दहस्थानीय आदित्यः स्वरसामस्थानीयैरुभयतोऽवस्थितैस्त्रिभिर्लोकैर्धृतस्तस्मात्कारणादप्यादित्योऽन्तरायमध्येऽवस्थित

इमाल्लोकान्सर्वान्सर्वदा यन्गच्छन्नपि न व्यथते व्यथां न प्राप्नोति । अत्रार्थवादेन पूर्वेषूत्तरेषु च त्रिष्वहस्सु सप्तदशस्तोमविधिरुन्नेयः । तथा च शाखान्तरे श्रूयते– 'उक्थ्या एव सप्तदशाः परःसामानः कार्याः' इति । स्वरसामाख्यानामह्नामेव परःसामेति नामान्तरम् ।

अथ विहितानेतान्पूर्वोत्तरा·सप्तदश स्तोमान्प्रकारान्तरेण पुनः प्रशंसति–

तस्य वै देवा आदित्यस्य स्वर्गाल्लोकादवपातादबिभयुस्तं परमैः स्वर्गैर्लोकैरवस्तात्प्रत्युत्तभ्नुवन्स्तोमा वै परमाः स्वर्गा लोकास्तस्य पराचोऽतिपातादबिभयुस्तं परमैः स्वर्गैर्लोकैः परस्तात्प्रत्यस्तभ्नुवन्स्तोमा वै परमाः स्वर्गा लोकास्तत्रयोऽवस्तात्सप्तदशा भवन्ति त्रयः परस्तात्ते द्वौ द्वौ संपद्य त्रयश्चतुस्त्रिंशा भवन्ति चतुस्त्रिंशो वै स्तोमानामुत्तमस्तेषु वा एष एतदध्याहितस्तपति तेषु हि वा एष एतदध्याहितस्तपति, इति ।

तेषु हि लोकेषु वर्तमानो य आदित्यस्तस्य स्वर्गलोकादवपातः स्यादिति देवा भीताः सन्तः स्तोमानामादित्यस्तम्भनत्वरूपं परमत्वं तेनोभयतो वर्तमानाः षट्संख्याकाः सप्तदशस्तोमका द्वौ द्वावेकीभूय त्रिसंख्याकाश्चतुस्त्रिंशस्तोमा भवन्ति । त्रिवृत्पञ्चदशसप्तदशैकविंशत्रिण (न) वत्रयस्त्रिंशाख्याश्छन्दोगैराम्नाता ये स्तोमाः सन्ति तेषामयं चतुस्त्रिंशस्तोम उत्तमः पूर्वापेक्षया संख्याधिक्यात् । तेषु स्तोमस्थानीयेषूभयतः स्थितेषु स्वर्गेष्वेषोऽध्याहित आदित्यो जगत्स्रष्टा स्थापितः सन्नेतस्मात्प्रत्यक्षं यथा भवति तथा तपति संतापं करोति । तेषु हीति वाक्येन तदेव दृढी क्रियते ।

विष्णुर्वै एवं प्रशंसामभिप्रेत्य तद्रूपत्वेनोपचरितमादित्यं पुनः प्रशंसति–

स वा एष उत्तरोऽस्मात्सर्वस्माद्भूताद्भविष्यतः सर्वमेवेदमतिरोचते यदिदं किंचोत्तरो भवति, इति ।

योऽयमादित्योऽभिहितः स एवैष भूताद्भविष्यतश्च सर्वस्मादस्माज्जगत उत्तर

उत्कृष्टो यदिदं किंच जगदस्तीदं सर्वमेवातिक्रम्य रोचते दीप्यते तद्वदयं विषुवानप्यन्येभ्यः सर्वेभ्योऽहोभ्य उत्तर उत्कृष्टो भवति ।

वेदनं प्रशंसति-

यस्मादुत्तरो बुभूषति तस्मादुत्तरो भवति य एवं वेद ॥ १८ ॥ इति ।

एतद्वेदनादुत्कृष्टो भूत्वा प्रतिष्ठयाऽधिकं शोभते तस्मादुत्कृष्टतरो भवति ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऐतरेयब्राह्मण-भाष्येऽष्टादशाध्याये चतुर्थः खण्डः ॥ ४ ॥ (१८) [१३९]

स्वरसामाख्येष्वहस्सु सप्तदश स्तोमाः पूर्वं विहिता इदानीं तान्यहानि विधत्ते-

स्वरसाम्न उपयन्तीमे वै लोकाः स्वरसामान इमान्वै लोकान्स्वरसामभिरस्पृण्वंस्तत्स्वरसाम्नां स्वरसामत्वं तद्यत्स्वरसाम्न उपयन्त्येष्वेवैनं तल्लोकेस्वाभजन्ति, इति ।

स्वरसामाख्यान्षट्संख्याकानहर्विशेषाननुतिष्ठेयुः । आदित्यस्याधस्तादुपरिष्टाच्च वर्तमाना इम एव लोकाः स्वरसामरूपास्तस्मादनुष्ठितैरेतैः स्वरसामभिरिमाँल्लोकानस्पृण्वन्प्रीतानकुर्वंस्तस्मादेतेषामङ्गां स्वरसेपेतसामवत्प्रीतिहेतुत्वात्स्वरसामेति नाम संपन्नम् । एतेषामनुष्ठातारो लोकेषु सर्वेष्वाभजन्ति भोगभाजो भवन्ति ।

अथ स्वरसामभ्यः सर्वेभ्योऽधस्तादुपरिष्टाच्च द्वे अहनी विधत्ते-

तेषां वै देवाः सप्तदशानां प्रवृलयादबिभयुः समा इव वै स्तोमा अविगूढळा इवेमे ह न प्रवृलियेरन्निति तान्सर्वैः स्तोमैरवस्तात्पर्यार्षन्सर्वैः पृष्ठैः परस्तात्तद्यदभिजित्सर्वस्तोमोऽवस्ताद्भवति विश्वजित्सर्वपृष्ठः परस्तात्तत्सप्तदशानुभयतः पर्यूषन्ति धृत्या अप्रवृलयाय, इति ।

ये स्वरसामानः सप्तदशस्तोमयुक्तास्तेषां प्रवृलयात्प्रकर्षेण विशरणाद्देवा अबिभयुः। वृलृ विशरण इति धातोरिदं रूपम्। विशरणशङ्का कथमिति तदुच्यते। षट्स्वहस्सु प्रयोक्तव्या एते सप्तदश स्तोमाः समा इव वै सदृशा एव तस्मादविगूहळा इव गूहनस्य गोपनस्याभावाच्छिथिला एवैकबन्धत्वे सति नूतनत्वचमत्कारामावादनादरेण विशीर्णा भवन्ति। तस्मादिमे स्तोमा न प्रवृलियेरन्प्रकर्षेण विशीर्णा मा भूवन्निति विचार्य तान्सप्तदश स्तोमानवस्तादधोभागे सर्वैः स्तोमैस्त्रिवृत्पञ्चदशसप्तदशैकविंशत्रिणव (न) त्रयस्त्रिंशाख्यैः पर्यार्षन्परितो गता रक्षणाय परितो वेष्टनं कृतवन्त इत्यर्थः। तथा परस्तात्सप्तदशस्तोमानामुपरिभागे सर्वैः पृष्ठै रथंतरबृहद्वैरूपवैराजशाक्करैवतसामाख्यैः पृष्ठस्तोत्रैः पर्यार्षन्। तस्मात्स्वरसान्नानधस्तात्पूर्वस्मिन्दिवसे सर्वस्तोमयुक्तमभिजिदाख्यमहरनुष्ठेयम्। तथा तेषामुपरिष्टात्सर्वपृष्ठस्तोत्रयुक्तं विश्वजिदाख्यमहरनुष्ठेयम्। यदेतद्विविधमनुष्ठानं तेन सप्तदशस्तोमानुभयतः पर्युषन्ति परिरक्षन्ति तच्च रक्षणं धृत्यै दार्ढ्यायापवृलयाय शैथिल्याभावाय संपद्यते।

अथ विषुवत्यहनि पञ्च सामानि विधत्ते—

तस्य वै देवा आदित्यस्य स्वर्गाल्लोकादवपातादबिभयुस्तं पञ्चभी रश्मिभिरुदवयन्रश्मयो वै दिवाकीर्त्यानि महादिवाकीर्त्यं पृष्ठं भवति विकर्णं ब्रह्मसाम भासमग्निष्टोमसामोभे बृहद्रथंतरे पवमानयोर्भवतस्तदादित्यं पञ्चभी रश्मिभिरुद्यन्ति धृत्या अनवपाताय, इति।

देवाः पुनरपि तस्याऽऽदित्यस्य स्वर्गलोकादधःपतनमाशङ्क्य तस्माद्भीताः। यद्यपि पृथिव्यादिलोकत्रयमुत्तम्भकमुक्तं तथाऽप्युपरि रज्जुभिरिव दृढबन्धनस्याभावादिति ततश्चलने सति पार्श्वयोः पतनमाशङ्क्य ते मा भूदिति देवास्तमादित्यं पञ्चभी रश्मिभिः पञ्चभिर्दैवैरुदवयन्नूर्ध्वमुत्क्षिप्य वयनं कृतवन्तो दृढं बद्धवन्त इत्यर्थः। ये बन्धनहेतवो रश्मयस्तत्स्थानीयान्यस्मिन्विषुवति दिवा कीर्त्यानि दिवैव पठनीयानि पञ्च सामानि तेषु मध्ये महादिवाकीर्त्यनामकमेकं साम। तच्च विभ्राड्बृहत्पिबतु सोम्यं मधु [१०-१७०-१] इत्यस्यामृच्युत्पन्नम्। तत्सामयुक्तं पृष्ठस्तोत्रं कर्तव्यम्। तथा विकर्णाख्यमेकं साम। तच्च पृक्षस्य वृष्णो अरुषस्य नू सहः [६ ८-१] इत्यस्यामृच्युत्पन्नम्। तदेतद्ब्रह्मसाम कर्तव्यम्। ब्राह्मणाच्छंसिनमभिलक्ष्य गीयमानं ब्रह्मसाम। तथा

भासाख्यमपरं साम । तदपि पृक्षस्येत्यस्यामेवोत्पन्नम् । तच्चाग्निष्टोमसाम कर्तव्यम् । येन साम्नाऽग्निष्टोमसंस्था समाप्यते तदग्निष्टोमसाम । बृहद्रथंतरे प्रसिद्धे भवतः । माध्यंदिनपवमानार्भवपवमानयोः कर्तव्यत्वात् । पञ्चसामप्रयोगेणाऽऽदित्यं पञ्चभिः सामरज्जुभिरूर्ध्वं बध्नन्ति । तच्चाऽऽदित्यस्य धारणाय भवति । तेन धारणेनाधःपातो न भवति ।

अथ प्रातरनुवाकस्य चोदकप्राप्तकालं बाधितुं कालान्तरं विधत्ते-

उदित आदित्ये प्रातरनुवाकमनुब्रूयात्सर्वं ह्येवैतदहर्दिवाकीर्त्यं भवति, इति ।

प्रकृतावादित्योदयात्प्रागेव प्रातरनुवाकः पठ्यते । अत्र तु सर्वस्याह्नो दिवाकीर्त्यत्वसिद्ध्यर्थमुदयादूर्ध्वमनुब्रूयात् ।

सवनीयपशौ कंचिद्विशेषं विधत्ते-

सौर्यं पशुमन्यङ्गश्वेतं सवनीयस्योपालम्भ्यमालभेरन्सूर्यदेवत्यं ह्येतदहः, इति ।

सूर्यो देवता यस्य पशोः सोऽयं सौर्योऽन्यङ्गं वर्णान्तरेण संपादितं चिह्नमन्यङ्गं तादृशश्चासौ श्वेतश्च सोऽयमन्यङ्गश्वेतो वर्णान्तरेण मिश्रितः सर्वश्वेत इत्यर्थः । तादृशः पशुरत्र सवनीयस्थान उपालम्भ्योऽतस्तमालभेरन् । यस्मादेतदहः सूर्यदेवत्यं तस्माद्युक्तः सूर्यदेवत्यः पशुः ।

सामिधेनीषु विशेषं विधत्ते-

एकविंशतिं सामिधेनीरनुब्रूयात्प्रत्यक्षाद्ध्येतदहरेकविंशम्, इति ।

एतद्विषुवन्नामकमहरेकविंशस्तोमयुक्तत्वात्प्रत्यक्षाद्धि साक्षादेव मुख्यमेवैकविंशं तस्मात्सामिधेनीनामेकविंशतिसंख्या युक्ता । अत्र चोदकप्राप्ताः पञ्चदश धाय्याः षट्संख्याका इत्येकविंशतिः । तथा चाऽऽश्वलायन आह-' विषुवान्दिवाकीर्त्य उदिते प्रातरनुवाकः पृथुपाजा अमर्त्य इति षड्धाय्याः सामिधेनीनां सौर्यः सवनीयस्योपालम्भ्यः ' इति ।

निष्केवल्यशस्त्रे निविद्धानं विधत्ते-

एकपञ्चाशतं द्विपञ्चाशतं वा शस्त्वा मध्ये

निविदं दधाति तावतीरुत्तराः शंसति शतायुर्वै पुरुषः शतवीर्यः शतेन्द्रिय आयुष्येवैनं तद्वीर्य इन्द्रिये दधाति ॥ १९ ॥ इति ।

तस्मिञ्शस्त्रे स्तोत्रियानुरूपयोस्तृचयोः षड्ऋचो यद्वावानेत्येका धाय्या बृहद्रथंतरयोर्योनी द्वे उत्तमसाम प्रगाथस्य प्रयथनेन तिस्रो नृणामुत्वानृतमामिति तिस्रो यास्तिग्मशृङ्ग इत्येकादशर्चोऽभित्यमिति पञ्चदशर्च इत्येवमेकचत्वारिंशत् । तत्र प्रथमया त्रिरभ्यस्तया सह त्रिचत्वारिंशत् । इन्द्रस्य नु वीर्याणीत्यस्मिन्पञ्चदशर्चे सूक्तेऽष्टौ नव वा शंसनीयाः । तत्राष्टत्वपक्ष एकपञ्चाशद्भवन्ति । नवपक्षे द्विपञ्चाशत् । तच्छंसनादूर्ध्वमिन्द्रस्य नु वीर्याणीत्यस्य सूक्तस्य मध्य ऐन्द्रीं निविदं दध्यात् । तत ऊर्ध्वं पुनरपि तावतीर्ऋचः शंसेत् । तथा सति शतसंख्यासंपत्त्या पुरुषायुःसाम्यं भवति । इन्द्रियाणि च शतसंख्यासु नाडीषु संचाराच्छतं भवन्ति । तदीयव्यापाराश्च तथा शतसंख्याकाः । एवं सति यजमानं संपूर्ण आयुषि वीर्य इन्द्रियेष्ववस्थापयति ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऐतरेयब्राह्मणभाष्येऽष्टादशाध्याये पञ्चमः खण्डः ॥ ५ ॥ (१९) [१४०]

अथ कस्याश्चिदृचः शंसनं विधत्ते—

दूरोहणं रोहति स्वर्गो वै लोको दूरोहणम्, इति ।

दुःशकं रोहणं यस्मिन्नादित्यमण्डले तद्दूरोहणं तत्राऽऽरोहणस्य साधनत्वान्मन्त्रस्वरूपमपि दूरोहणमित्युच्यते । तद्रोहत्यारोहणार्थं शंसेदित्यर्थः । यद्वा मन्त्रस्य दुःशक उच्चारणविशेषो दूरोहणं स च विशेषः सूत्रेऽवगन्तव्यः । तं रोहति विशिष्टमुच्चारणं कुर्यादित्यर्थः । योऽयं स्वर्गलोकस्तस्याऽऽरोहणं दुःशकमिति दूरोहणत्वम् । तादृशं स्वर्गं लोकं प्रापयतीत्यर्थः ।

वेदनं प्रशंसति—

स्वर्गमेव तल्लोकं रोहति य एवं वेद, इति ।

विहितमर्थं प्रशंसति—

यदेव दूरोहणा३म्, असौ वै दूरोहो योऽसौ तपति काश्चिद्धा अत्र गच्छति स यद्दूरोहणं

रोहत्येतमेव तद्रोहति, इति ।

दूरोहणमिति यदुक्तं तत्किमिति शेषः । प्रश्नार्था प्लुतिः । असावित्यत्रोत्तरमुच्यते । योऽसावादित्यस्तपति, असावेव दूरोहो दुःशकारोहणस्थानावस्थितत्वात् । अथवा यः कश्चिद्यजमानः सम्यगनुष्ठायाज्ञाऽऽदित्यलोके गच्छति सोऽपि दुरोहो दुःशकस्थानारोहणत्वात् । एवं सति यदि दूरोहणं मन्त्रं रोहति शंसेत्तत्तेन शंसनेनैतमेवाऽऽदित्यं लोकं रोहति प्राप्नोति ।

मन्त्रविशेषं विवक्षते-

हंसवत्या रोहति, इति ।

हंसशब्दो यस्यामृच्यस्ति सेयं हंसवती तया रोहेत्तमुच्चारयेदित्यर्थः ।

तस्या ऋचः प्रथमपादे पूर्वभागमनूद्य व्याचष्टे-

हंसः शुचिषदित्येष वै हंसः शुचिषत्, इति ।

हन्ति सर्वदा गच्छतीति हंसः । शुचौ शुद्धे द्युलोके सीदति तिष्ठतीति शुचिषत् । अस्मिन्भागे यः प्रतिपाद्यते स एव मण्डले दृश्यमान ब । स च सर्वदा गतिमत्वाद्धंसो भवति द्युलोकेऽवस्थानाच्छुचिषदपि भवति ।

उत्तरभागमनूद्य व्याचष्टे-

वसुरन्तरिक्षसदित्येष वै वसुरन्तरिक्षसत्, इति ।

वसति सर्वदेति वसुर्वायुर्न हि वायोरहनि रात्रौ वा कदाचिदस्तमयोऽस्ति तादृशो वायुरन्तरिक्षे सीदतीत्यन्तरिक्षसत् । आदित्यस्य परमात्मरूपत्वेन सर्वात्मकत्वादन्तरिक्षसद्वायुरप्येष एवेत्युच्यते ।

द्वितीयपादस्य पूर्वभागमनूद्य व्याचष्टे-

होता वेदिषदित्येष वै होता वेदिषत्, इति ।

होता होमस्य कर्ता । यागवेद्यां सीदतीति वेदिषत् । आदित्यस्य तद्रूपत्वं पूर्ववत् ।

उत्तरभागमनूद्य व्याचष्टे-

अतिथिर्दुरोणसदित्येष वा अतिथिर्दुरोणसत्, इति ।

न विद्यते तिथिविशेषनियमो यात्रार्थे यस्य सोऽयमतिथिः सन्दुरोणेषु तत्तद्गृहेषु सीदति यावितुं प्रचरतीति दुरोणसत् । आदित्यस्य तद्रूपत्वमपि द्रष्टव्यम् ।

---

१ ऋ. ४-४०-५ ॥

तृतीयपादं चतुर्धा विभज्य प्रथमभागमनूद्य व्याचष्टे–

नृषदित्येष वै नृषत्, इति।

नृषु मनुष्येषु वृष्टिरूपेण सीदतीति नृषत् । तथा चाऽऽरण्यकाण्डे वक्ष्यति– 'आदित्यश्चक्षुर्भूत्वाऽक्षिणी प्राविशत्' इति । तस्मादेष आदित्य एव नृषच्छब्दवाच्यः ।

द्वितीयभागमनूद्य व्याचष्टे–

वरसदित्येष वै वरसद्वरं वा एतत्स-
द्मनां यस्मिन्नेष आसन्नस्तपति, इति ।

वरे श्रेष्ठे मण्डले सीदतीति वरसत् । एतस्याऽऽदित्यस्य मण्डलेऽवस्थानं प्रसिद्धम् । यानि सद्मानि निवासस्थानानि सन्ति तेषां मध्ये यस्मिन्मण्डल एष आदित्य आसन्न उपविष्टः संस्तपत्येतन्मण्डलं वरं श्रेष्ठं सद्म ।

तृतीयभागमनूद्य व्याचष्टे–

ऋतसदित्येष वै सत्यसत्, इति ।

ऋतं सत्यवदनं वेदवाक्यं तत्र सीदति प्रतिपाद्यत इत्यृतसत् । आदित्यस्य सत्येन वेदवाक्येन प्रतिपाद्यत्वमनेकमन्त्रेषु प्रसिद्धम् ।

चतुर्थभागमनूद्य व्याचष्टे -

व्योमसदित्येष वै व्योमसद्योम वा एत-
त्सद्मनां यस्मिन्नेष आसन्नस्तपति, इति ।

व्योम्न्याकाशमार्गे सीदतीति व्योमसत् । आदित्यस्य तथाविधत्वं प्रसिद्धम् । यस्मिन्व्योमस्थान एष आदित्यः प्रत्यासन्नस्तपति तदेतत्स्थानं सद्मनां निवासस्थानानां मध्ये व्योम गृहाद्यावरणशून्यमाकाशम् ।

चतुर्थं पादं पञ्चधा विभज्य प्रथमभागमनूद्य व्याचष्टे -

अब्जा इत्येष वा अब्जा अद्भ्यो वा एष
प्रातरुदेत्यपः सायं प्रविशति, इति ।

अद्भ्यो जायते योऽयं(यं मका(क)रादिः सोऽयमब्जा तद्रूपत्वमस्य सर्वात्मकत्वादवगन्तव्यम् । किंचायमादित्योऽस्मद्दृष्ट्या प्रातःकाले पूर्वसमुद्रगताभ्योऽद्भ्य उदेति सायंकाले पश्चिमसमुद्रादितो अपः प्रविशतीव लक्ष्यते तस्मादब्जाः ।

द्वितीयभागमनूद्य व्याचष्टे-

गोजा इत्येष वै गोजाः, इति।

गोभ्यो जायते जीवादिः स गोजा अस्य तद्रूपत्वं पूर्ववत्।

तृतीयभागमनूद्य व्याचष्टे-

ऋतजा इत्येष वै सत्यजाः, इति।

ऋतं सत्यं वैदिकमन्त्रजातं तस्माज्जायत इत्यृतजाः। वैदिकानुष्ठानेन हि देवलोकादौ जायत इति प्रसिद्धमादित्यस्य तद्रूपत्वं पूर्ववत्।

चतुर्थभागमनूद्य व्याचष्टे-

अद्रिजा इत्येष वा अद्रिजाः, इति।

अद्रावुदयगिरावुत्पद्यत इत्यद्रिजाः। आदित्यस्य तथात्वं पुराणादौ प्रसिद्धम्।

पञ्चमभागमनूद्य व्याचष्टे-

ऋतमित्येष वै सत्यम्, इति।

ऋतशब्दः सत्यवाची। सत्यं च द्विविधम्-व्यावहारिकं पारमार्थिकं च। तत्र व्यावहारिकं वाचा सत्यभाषणम्। पारमार्थिकं परं ब्रह्म। सत्यं ज्ञानमनन्तं ब्रह्मेति श्रुतेः। तदिदमृतशब्देन विवक्षितम्। अयं चाऽऽदित्यो ब्रह्मरूपं सत्यम्। अत एव शाखान्तरे बृहदिति मन्त्रशेषं पठन्ति। मन्त्रान्तरे चैवं श्रूयते-असावादित्यो ब्रह्मेति।

कृत्स्नस्य तात्पर्यं दर्शयति-

एष एतानि सर्वाण्येषा ह वा अस्य
च्छन्दःसु प्रत्यक्षतमादिव रूपम्, इति।

शुचिषदित्यादिशब्दैर्यानि रूपाण्यभिहितानि तानि सर्वाण्येष एव। अस्य परब्रह्मत्वेन सर्वात्मकत्वात्। छन्दःसु वेदेषु मध्य एषा ह वै येयं हंसवती, ऋक्सैवास्याऽऽदित्यस्य सर्वात्मकं रूपं प्रत्यक्षतमादिवातिशयेन प्रत्यक्षं विस्पष्टं यथा भवति तथा प्रतिपादयतीति शेषः।

मन्त्रतात्पर्यं दर्शयन्नेव विधिं निगमयति-

तस्माद्यत्र क्व च दूरोहणं रोहेद्धंसवत्येव रोहेत्, इति।

यत्र क्वापि कर्मणि दूरोहणविधानमस्ति तत्र सर्वत्र हंसवत्यैव विज्ञेयम् ।

फलभेदेन सूक्तान्तरं विधत्ते—

तार्क्ष्यं स्वर्गकामस्य रोहेत्, इति ।

तार्क्ष्याख्येण महर्षिणा दृष्टं तार्क्ष्यम् । तस्मिन्सूक्ते स्वर्गकामस्य यजमानस्य रोहेन्नतु हंसवत्या ।

तदेतत्प्रशंसति—

तार्क्ष्यो ह वा एतं पूर्वोऽध्वानमैद्यत्रादो गायत्री सुपर्णो भूत्वा सोममाहरत्तद्यथा क्षेत्रज्ञमध्वनः पुर एतारं कुर्वीत तादृक्तद्यदेव तार्क्ष्यैऽयं वै तार्क्ष्यो योऽयं पवत एष स्वर्गस्य लोकस्याभिवोढ्ळा, इति ।

अत्रैव वक्ष्यमाणं कार्यं संपन्नं तत्र तार्क्ष्यो ह वै गरुड एव पूर्वः प्रथमगामी सन्नेतमध्वानमैत्प्राप्तवान् । किं वक्ष्यमाणमिति तदुच्यते । गायत्री सुपर्णः पक्षी भूत्वा सोममाहरत् । एतच्च पूर्वमेव प्रतिपादितम् । एवं सति तार्क्ष्ये सूक्ते यदेव शंसनं तत्तत्र शंसने दृष्टान्तः कथ्यते । यथा लोके क्षेत्रज्ञं मार्गविशेषाभिज्ञं तद्देशवासिनं कंचित्पुरुषमध्वनो मार्गस्य पुर एतारं पुरतो गन्तारं मार्गप्रदर्शकं कुर्वीत तादृक्तत्तार्क्ष्यशंसनम् । योऽयं वायुरन्तरिक्षे पवतेऽयमेव तार्क्ष्यस्वरूपः एष च स्वर्गस्य लोकस्याभिवोढ्ळा नेता भवति । तस्मात्तार्क्ष्यसूक्तेनैव दूरोहणं रोहेत् ।

तस्य सूक्तस्य प्रथमायामृचि प्रथमपादमनूद्य व्याचष्टे—

'त्यमू षु वाजिनं देवजूतमित्येष वै वाजी देवजूतः, इति ।

चतुर्थपादे तार्क्ष्यमिति वक्ष्यति । कीदृशं तार्क्ष्यम् । त्यमूषु[1] । त्यच्छब्दः सर्वनामत्वात्प्रसिद्धवाची । उशब्द एवकारार्थः । पुराणादिषु प्रसिद्धमेव । वाजिनमन्नवन्तं देवजूतं देवानां मध्ये वेगवन्तम् । अस्मिन्पादेऽभिधीयमानः एष वै तार्क्ष्य एव तस्यान्नवत्त्वाद्देवेषु मध्ये वेगवत्त्वाच्च ।

---

१ ऋ. १०-१७८-१ ।

द्वितीयपादमनूद्य व्याचष्टे—

सहावानं तरुतारं रथानामित्येष वै सहावां-
स्तरुतैष हीमाँल्लोकान्सद्यस्तरति, इति ।

पुनरपि कीदृशं तार्क्ष्यम् । सहावानं सहाः सेहनं सर्वा (र्वा) दीनामभिभवस्तद्-वन्तम् । रथानां तरुतारमुल्लङ्घयितारम् । एष तार्क्ष्य एवास्मिन्पादेऽभिहितः । सहावानभिभवक्षमः । तरुतोल्लङ्घयिता भवति । यस्मादेष इमाँल्लोकान्तद्यस्तदानीमेव तरितुं क्षमः ।

तृतीयपादमनूद्य व्याचष्टे—

अरिष्टनेमिं पृतनाजमाशुमित्येष वा
अरिष्टनेमिः पृतनाजिदाशुः, इति ।

पुनरपि कीदृशं तार्क्ष्यमरिष्टनेमिं रिष्टं हिंसा तद्राहित्यमरिष्टम् । तस्य च नेमिस्थानीयम् । यथा रथचक्रस्य नेमिः परितो रक्षिका भवति तादृशम् । पृतना परकीयसेना तां जयतीति पृतनाजम् । आशुं वेगवन्तम् । अस्मिन्पादेऽभिहितानां गुणानां तार्क्ष्ये सद्भावादेषु एवाय प्रतिपाद्यः ।

चतुर्थपादे प्रथमभागमनूद्य व्याचष्टे—

स्वस्तय इति स्वस्तितामाशास्ते, इति ।

स्वस्तये क्षेमार्थमनेन पादेन क्षेमः प्रार्थितो भवति ।

उत्तरभागमनूद्य व्याचष्टे—

तार्क्ष्यमिहा हुवेमेति ह्वयत्येवैनमेतत्, इति ।

तार्क्ष्यं गरुडमिह कर्मणि हुवेमाऽऽह्वयामः । एतेन भागेन तार्क्ष्यमाह्वयत्येव ।

तार्क्ष्यसक्ते द्वितीयस्या ऋचः पूर्वार्धं प्रथमभागमनूद्य व्याचष्टे—

इन्द्रस्येव रातिमाजोहुवानाः स्वस्तय
इति स्वस्तितामेवाऽऽशास्ते, इति ।

यथेन्द्रस्य दातव्यं हविः प्रयच्छामस्तथैवास्य तार्क्ष्यस्य रातिं दातव्यं वसु, आजोहुवानाः समन्तात्पुनः पुनर्ददाना वयमारुहेमेति वक्ष्यमाणेन संबन्धः । किमर्थं स्वस्तये क्षेमार्थम् । एतत्पाठेन स्वस्तितामेव क्षेममेवाऽऽशास्ते प्रार्थयते ।

---

१ ऋ. १० १७८.२ ।

उत्तरभागमनूद्य व्याचष्टे—

नावमिवाऽऽरुहेमेति समेवैनमेतदधिरोहति स्वर्गस्य लोकस्य समष्ट्यै संपत्त्यै संगत्यै, इति ।

यथा लोके नद्युत्तरणाय नावमारोहत्येवं स्वर्गं प्राप्तुं दूरोहणमारुहेम । एतद्भागपाठेनैनं दूरोहणं स्वर्गं समेव सम्यगेवाधिरोहति । अतस्तच्छंसनं स्वर्गस्य समष्ट्यै प्राप्त्यै भवति । सा च प्राप्तिः संपत्त्यै भोगाय भोग्यवस्तुसंपादनाय भवति । संपादनं संपत्त्यै भोगसंबन्धाय भवति ।

उत्तरार्धमनूद्य व्याचष्टे—

उर्वी न पृथ्वी बहुले गभीरे मा वामेतौ मा परेतौ रिषामेतीमे एवैतदनुमन्त्रयत आ च परा च मेष्यन्, इति ।

नकार. समुच्चयार्थः । उर्वी च भूमिश्च पृथ्वी विस्तीर्णा द्यौश्च बहुले उभे अत्यतिदीर्घे गभीरे अत्यन्तगाम्भीर्येण युक्ते उभयोरियत्ता निश्चेतुमशक्येत्यर्थः । तादृश्यौ हे द्यावापृथिव्यौ वयमेतावागमनवेलायां परेतौ पुनर्गमनवेलायां च वामुभे मा रिषाम हिंसायुक्ते मा करवाम । एतत्पाठेन होताऽऽमेष्यंश्चाऽऽगमिष्यन्नपि परामेष्यंश्च पुनरपि परावृत्य गमिष्यन्नपीमे एव द्यावापृथिव्यावेवानुमन्त्रयते ।

तृतीयस्या ऋचः पूर्वार्धमनूद्य व्याचष्टे—

[1]सद्यश्चिद्यः शवसा पञ्च कृष्टीः सूर्य इव ज्योतिषाऽपस्ततानेति प्रत्यक्षं सूर्यमभिवदति, इति ।

यस्ताक्ष्यः सद्यश्चित्तस्मिन्नेव क्षणे शवसा बलेन पञ्च कृष्टीः पञ्चविधान्पुरुषजातिविशेषान्देवमनुष्यासुरराक्षसगन्धर्वानतिविस्तारितवान् । यथा सूर्यो ज्योतिषा स्वकीयरश्मिसमूहेनापो वृष्ट्युदकं ततान विस्तारयति तद्वत् । एतत्पाठेन ताक्ष्यं देवं प्रत्यक्षं सूर्यं रूपं कृत्वाऽभिवदति प्रशंसति ।

उत्तरार्धमनूद्य व्याचष्टे—

सहस्रसाः शतसा अस्य रंहिर्न स्मा वरन्ते

---

१ ऋ. १०-१७८-३ ॥

युवतिं न शर्यामित्याशिषमेवैतेनाऽऽशास्त
आत्मने च यजमानेभ्यश्च ॥ २० ॥ इति ।

अस्य तार्क्ष्यस्य रंहिर्गतिः सहस्रसाः सहस्रभेदयुक्ता शतसाः शतभेदयुक्ता । वन षण संभक्ताविति धातुः । सहस्रं सनुते संभजतीति सहस्रसास्तां गतिं केऽपि न स्मा वरन्ते न वारयन्ति । यथा लोके शर्यां दारुकाष्ठनिर्मितां युवतिं शत्रु-शरीरविश्रणयोग्यां युवतिं तद्वत् । नकार उपमार्थः । यथाऽशिशूरेण धानुष्केण प्रयुक्तो बाणः केनाऽपि न निवार्यते तथा त्वदीयगतिरित्यर्थः । एतेनार्धर्चपाठेनायं होताऽऽत्मने च स्वार्थमपि यजमानेभ्यश्च तत्रानुष्ठातृबहुयजमानार्थमप्याशिषमेव प्रार्थयते रक्षार्थाय तार्क्ष्यगतेरनिवार्यत्वाभिधानात् ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऐतरेयब्रा-
ह्मणभाष्येऽष्टादशाध्याये षष्ठः खण्डः ॥ ६ ॥ (२०) [१४१]

अथ दूरोहणसूक्तशंसनस्य प्रकारान्तरं विधत्ते-

आह्वय दूरोहणं रोहति स्वर्गो वै लोको
दूरोहणं वागाह्वावो ब्रह्म वै वाक्स यदाह्वयते
तदब्रह्मणाऽऽह्वावेन स्वर्गं लोकं रोहति, इति ।

शोंसावोमित्यध्वर्योराह्वानं कृत्वाऽनन्तरं त्र्यमुष्विन्द्रादिकं दूरोहणसूक्तं रोहेदारोहणक्रमेण पठेत् । दूरोहणस्य स्वर्गरूपत्वादावस्य वाग्रूपत्वाद्वाचश्च वेदात्मिकाया ब्रह्मत्वात् । प्रथममाह्वाने सति ब्रह्मरूपेणाऽऽह्वावेन स्वर्गमा-रोहति ।

अपरं प्रकारविशेषं विधत्ते-

स पच्छः प्रथमं रोहतीमं तं लोकमाप्नोत्यथार्धर्चशोऽ-
न्तरिक्षं तदाप्नोत्यथ त्रिपद्याऽमुं तं लोकमाप्नोत्यथ
केवल्या तदेतस्मिन्प्रतितिष्ठति य एष तपति, इति ।

द्वेधा सूक्तस्य शंसनम्, रोहक्रमेणावरोहक्रमेण चेति । तत्राऽऽरोहे चतुर्वार-मावर्तनीयम् । प्रथमावृत्तौ पच्छः पादशः पठेत् । एकैकस्मिन्पादेऽवसानं कृत्वा शंसेत् । द्वितीयस्यामावृत्तावर्धर्चश एकैकस्मिन्नर्धर्चेऽवसानं कृत्वा पठेत् । तृती-

यस्यामावृत्तौ त्रिपद्यावृत्त्या पादत्रयेऽवसानं कृत्वा पठेत् । चतुर्थ्यामावृत्ताववसान-रहितया संपूर्णया शंसेत् । एताभिश्चतसृभिरावृत्तिभिर्लोकत्रयं प्राप्य पश्चात्प्रका शमानसूर्यमण्डले प्रतितिष्ठति ।

आरोहप्रकारविशेषं विधाय प्रत्यवरोहणं विधत्ते—

त्रिपद्या प्रत्यवरोहति तथा शाखां धारयमाण-स्तदमुष्मिँल्लोके प्रतितिष्ठत्यर्धर्चशोऽन्तरिक्षे प-च्छोऽस्मिँल्लोक आप्त्वैव तत्स्वर्गं लोकं यजमाना अस्मिँल्लोके प्रतितिष्ठन्ति, इति ।

प्रत्यवरोहक्रमे प्रथमावृत्तौ पादत्रयेऽवसानं द्वितीयावृत्तावर्धर्चेऽवसानं तृती-यावृत्तौ पादेऽवसानम् । तथा सति यथा लोके वृक्षाग्रमारुह्य पुरुषः प्रत्यवरो-हन्हस्तेन शाखां दृढमवलम्ब्य स्थिरो भवति, एवमयं प्रथमतः स्वर्गे प्रतिष्ठाय पश्चादन्तरिक्षे भूलोके च प्रतितिष्ठति । यथा होतुः प्रतिष्ठा तथा यजमानाना-मपि । स्वर्गं प्राप्य पुनरागत्यास्मिँल्लोके प्रतितिष्ठन्ति । तावेतावारोहप्रत्यव-रोहौ हंसवतीपक्षे तार्क्ष्यपक्षेऽपि समानौ । एवमुच्चारणस्य दुःशकत्वादस्य शंस-नस्य दूरोहणसंज्ञा ।

कामनाभेदेन प्रकारान्तरं विधत्ते—

अथ य एककामाः स्युः स्वर्गकामाः पराञ्चमेव तेषां रोहेत्ते जयेयुर्हैव स्वर्गं लोकम्, इति ।

एकस्मिन्नेव लोके कामो येषां त एककामाः स्वर्गं लोकमेव कामयन्ते न त्वेनं लोकं तेषां पराञ्चमेव प्रत्यवरोहरहितमेव रोहेत्, शस्त्रं पठेत् । तावता ते स्वर्गं लोकं जयेयुर्हैव प्राप्नुवन्त्येव ।

अस्मिन्पक्षे कंचिद्दोषं दर्शयति—

नेत्त्वेवास्मिँल्लोके ज्योगिव वसेयुः, इति ।

ते स्वर्गं प्राप्नुवन्त्येव किंत्वत्र दोषोऽस्त्येव । ते यजमाना अस्मिन्नेव लोके ज्योगिव चिरकालमेव नेद्वसेयुः सर्वथा न तिष्ठेयुः । परिभव (य) द्योतकेन नेदि-त्यनेनाऽऽयुःक्षयहेतुरयं पक्षो दूषितः ।

सूक्तान्तराणि विधत्ते—

मिथुनानि सूक्तानि शस्यन्ते त्रैष्टुभानि च

जागतानि च मिथुनं वै पशवः पशवश्छन्दांसि पशूनामवरुद्ध्यै ॥ २१ ॥ इति ।

मिथुनशब्द एकत्वनिवारकस्ततो बहूनीत्युक्तं भवति । यस्तिग्मशृङ्ग इत्यादीनि त्रैष्टुभानि दिवश्चिदस्य वरिमेत्यादीनि जागतानि तदेतच्छन्दोद्वयं मिथुनसदृशम् । पशवोऽपि मिथुनात्मकाश्छन्दांसि च पशुसाधनत्वात्पशवोऽतस्तेषां शंसनं पशुप्राप्त्यै भवति ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऐतरेयब्राह्मणभाष्येऽष्टादशाध्याये सप्तमः खण्डः ॥ ७ ॥ (२१) [१४२]

अथ विषुवन्नामहर्विशेषं मनुष्यसाम्येन प्रशंसति-

यथा वै पुरुष एवं विषुवांस्तस्य यथा दक्षिणोऽर्ध एवं पूर्वोऽर्धो विषुवतो यथोत्तरोऽर्ध एवमुत्तरोऽर्धो विषुवतस्तस्मादुत्तर इत्याचक्षते प्रबाहुक्सतः शिर एव विषुवान्बि(न्वि)दलसंहित एव वै पुरुषस्तद्धापि स्यूमेव मध्ये शीर्ष्णो विज्ञायते, इति ।

यथा लोकेषु पुरुषो दक्षिणवामभागाभ्यां भागद्वयमध्ये शिरता च युक्तस्तस्य विषुवतः षण्मासात्मक पूर्वभागः पुरुषसंबन्धिदक्षिणभागस्थानीयस्तत्रावरोहरूपमासषट्कात्मक उत्तरार्धो वामभागस्थानीयस्तस्मादुत्तर इत्याचक्षते न त्वनुष्ठानाधिक्यविवक्षया । प्रबाहुक्सतो वामदक्षिणभागौ समौ कृत्वाऽवस्थितस्य पुरुषस्य शिरो यथोन्नतं सन्मध्येऽवतिष्ठत एवं मासषट्कयोर्मध्ये विषुवानुत्कृष्टोऽवतिष्ठते । बि (वि) दलं भागस्ताभ्यां बि (वि) दलाभ्यां दक्षिणवामभागाभ्यां संहितः संयोजित एव लोकेषु पुरुषो भवति । तद्धापि तस्मादेव भागद्वयसंधानरूपात्कारणाच्छीर्ष्णो मध्ये स्यूमेव विज्ञायते । स्यूम स्यूतम । यथा वस्त्रयोः संधिः सूच्या स्यूतः संयोजितो भवति । एवं शिरसि दक्षिणोत्तरकपालयोः संधौ स्यूतेव काचिद्रेखा दृश्यते । एवञ्च भूमौ पतिते शुष्के मांसरहिते शिरःकपालद्वयसन्धिरूपेऽस्थनि विस्पष्टमुपलभ्यते । अतः सर्वात्मना पुरुषसादृश्यात्प्रशस्तोऽयं विषुवान् ।

अथ कंचित्पूर्वपक्षमुत्थापयति–

तदाहुर्विषुवत्येवैतदहः शंसेद्विषुवान्वा एतदुक्थानामुक्थं विषुवान्विषुवानिति ह विषुवन्तो भवन्ति श्रेष्ठतामश्नुवत इति, इति ।

विषुवन्नामके मुख्येऽहनि यच्छस्त्रं विहितं तत्तस्मिञ्शस्त्रे पूर्वपक्षिण एवमाहुः । दक्षिणायनस्योत्तरायणस्य च मध्ये विषुवन्नामकतुलामेषसंक्रान्तिद्वयरूपो यः कालविशेषः सोऽयं विषुवच्छब्दाभिधेयः । स च व्यवहारः स्मृतिषु प्रचुरः । अस्मिन्नेव विषुवति काल एतदहः शंसेत् । एतस्मिन्नहनि विहितं शस्त्रमहःशब्देनोपलक्ष्यते । एतत्संक्रान्तिद्वयमु (यु ?) क्तमहरुक्तानामहां मध्य उक्थशस्त्रोपेतशस्त्रयोग्यमित्यर्थः । अत एव विषुवान्वैषुवन्नामकशस्त्रवानेव संक्रान्तिकालविशेषः । तत्कथमित्युच्यते । तं संक्रान्तिकालं विषुवान्विषुवानित्येव सर्वे व्यवहरन्ति । अतस्तस्मिन्काले शस्त्रपाठे सति यजमाना विषुवन्तो योग्यशस्त्रयुक्ता भवन्ति । सर्वेष्वनुष्ठातृषु श्रेष्ठतां प्राप्नुवन्तीति पूर्वपक्षिणामाशयः ।

तं पक्षं निराकरोति–

तत्तन्नाऽऽदृत्यं संवत्सर एव शंसेद्रेतो वा एतत्संवत्सरं दधतो यन्ति, इति ।

कर्मान्तरेष्वपि विषुवाख्यसंक्रान्तियुक्ते काले समाप्ते सति शस्त्रमेवच्छंसनीयमिति यत्पूर्वपक्षिणां मतं तस्मिञ्शस्त्रे तन्मतं नाऽऽदरणीयम् । किंतु संवत्सरसत्र एव गवामयने तत्पूर्वोक्तं शस्त्रं शंसेत् । एवं सति यजमाना अत्यन्तसंयोगेन संवत्सरकालमेतद्रेतो धारयन्तो यन्त्यनुतिष्ठन्ति ।

विपक्षे बाधकं दर्शयति–

यानि वै पुरा संवत्सराद्रेतांसि जायन्ते यानि पञ्चमास्यानि यानि षण्मास्यानि स्रीव्यन्ति वै तानि न वै तैर्भुञ्जते, इति ।

संवत्सरधारणात्पुरैव कतिपयमासधारणेन यानि रेतांसि जायन्ते पञ्चमाससंबन्धीनि वा षण्मासंबन्धीनि वा तानि स्रीव्यन्ति वै स्रवन्त्येव गर्भस्रावो भवति । न तु तैरल्पमासधृतै रेतोभिः पुत्रादिशरीरं भुञ्जतेऽनुभवन्ति ।

गुणकथनपूर्वकं स्वपक्षमुपसंहरति-

अथ यान्येव दशमास्यानि जायन्ते
यानि सांवत्सरिकाणि तैर्भुञ्जते तस्मा-
त्संवत्सर एवैतदहः शंसेत्, इति ।

अथ पूर्वोक्तवैपरीत्येन यान्येव रेतांसि दशमास्यानि दशसु मासेषु धृतानि च भूत्वा पश्चाज्जायन्ते यानि च संवत्सरे धृतानि तैः सर्वैः पुत्रादि-शरीरमनुभवन्ति । तस्माद्गुणसद्भावात्संवत्सरसत्र एव तस्मिन्विषुवत्याह्नि यथोक्तं शस्त्रं शंसेत् ।

पुनरपि प्रकारान्तरेण प्रशंसति-

संवत्सरो ह्येतदहराप्नोति संवत्सरं ह्येतदहराप्नुवन्त्येष
ह वै संवत्सरेण पाप्मानमपहत एष विषुवताऽङ्गेभ्यो
ह्येव मासैः पाप्मानमपहते शीर्ष्णो विषुवता, इति ।

योऽयं संवत्सरः सत्ररूपः कर्मविशेषो यच्चैतद्विषुवदाख्यमहरुभयोः परस्परं संप्राप्तिरस्ति । तत्र संवत्सरः कर्ता सन्नहरामोति । अहश्च कर्तृ भूत्वा संवत्सरमामोति । व्यत्ययेनात्र बहुवचनम् । तयोः परस्परमविनाभावे सत्येष यजमानः संवत्सरेण पाप्मानमपहते विनाशयति । तथैवैष यजमानो विषुवता संवत्सरमध्यगतेनाह्ना पाप्मानं विनाशयति । तद्विविच्यते । संवत्सरावयवैर्मासैर्हस्तपादाद्यङ्गेभ्यः सकाशात्पाप्मानं नाशयति । विषुवता मुख्येनाह्ना शीर्ष्णः शिरसः सकाशात्पाप्मानं नाशयति ।

वेदनं प्रशंसति -

अप संवत्सरेण पाप्मानं हतेऽप*
विषुवता य एवं वेद, इति ।

अथ प्रशस्तस्य विषुवतः प्रसङ्गाद्बुद्धिस्थे प्रशस्ते महाव्रताख्येऽहनि कांचित्पशुं विधत्ते -

वैश्वकर्मणमृषभं सवनीयस्योपालम्भ्यमालभेर-

---

* अपेत्यस्य संबन्धः केनास्तीति शङ्कासद्भावेऽपि कुतो भाष्यकारेण संबन्धो न प्रदर्शित इति न ज्ञायते । परं च 'अप' इत्यनेन हते, इत्यस्य द्विरावृत्तिः सूचिता स्यादिति प्रतिभाति । तथा च विषुवताऽपहते इति वाक्यं संभवेदिति ज्ञेयम् ।

न्द्ररूपमुभयत एतं महाव्रतीयेऽहनि, इति ।

वैश्वकर्मणं विश्वकर्मदेवताकमृषभं पुंगवं सवनीयस्य चोदकमाप्तस्य पशोः स्थान उपालम्भनीयं द्विरूपं वर्णद्वयोपेतमुभयत । एतं दक्षिणोत्तरपार्श्वयोर्विलक्षणवर्णेन लाञ्छितं पशुं महाव्रतप्रयोगयुक्ते सत्रस्योपान्त्येऽहन्यालभेरन् ।

तत्र देवतां प्रशंसति–

इन्द्रो वै वृत्रं हत्वा विश्वकर्माऽभवत्प्रजापतिः प्रजाः सृष्ट्वा विश्वकर्माऽभवत्संवत्सरो विश्वकर्मेन्द्रमेव तदात्मानं प्रजापतिं संवत्सरं विश्वकर्माणमाप्नुवन्तीन्द्र एव तदात्मनि प्रजापतौ संवत्सरे विश्वकर्मण्यन्ततः प्रतितिष्ठन्ति प्रतितिष्ठति य एवं वेद य एवं वेद ॥ २२ ॥ इति ।

इन्द्रो वृत्रवधादूर्ध्वं विघ्नकर्तुरभावाद्विश्वकर्मा जगत्पालनरूपकर्मयुक्तोऽभवत् । प्रजापतिश्च प्रजाः सृष्ट्वोत्पाद्य कृत्स्नं जगत्सृष्टिरूपकर्मयुक्तोऽभवत् । स उभयविधो विश्वकर्मा देवः संवत्सरात्मकः । अतः संवत्सरसत्रे द्विरूपपशुालम्भनेन तदात्मानं संवत्सरात्मानमिन्द्रमेव तथा संवत्सररूपं प्रजापतिमित्युभयविधं विश्वकर्माणं यजमानाः प्राप्नुवन्ति । प्राप्य च तदात्मनि संवत्सरात्मनीन्द्रे संवत्सररूपे प्रजापतौ द्विविधेऽपि विश्वकर्मण्यन्ततः संवत्सरसत्रस्यान्ते प्रतितिष्ठन्त्येव । यः पुनरेवं वेद सोऽपि प्रतितिष्ठति । अभ्यासोऽध्यायपरिसमाप्त्यर्थः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऐतरेयब्राह्मणभाष्येऽष्टादशाध्यायेऽष्टमः खण्डः ॥ ८ ॥ (२८) [१४३]

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकवीरबुक्कणसाम्राज्यधुरंधरसायणाचार्यकृतावैतरेयब्राह्मणभाष्येऽष्टादशोऽध्यायः ॥ १८ ॥

अथैकोनविंशोऽध्यायः ।

अभिप्लवः स्यात्षडहोऽथ मास-
स्त्र्यहोऽथ पूर्वः स्वरसामनामा ॥

गवां च शस्यस्य ततः प्रशंसा
मध्ये दिवाकीर्त्यमहश्च तस्य ॥ १ ॥

अथ द्वादशाहो वक्तव्यः । तदर्थमाख्यायिकामाह -

प्रजापतिरकामयत प्रजायेय भूयान्स्यामिति स तपोऽतप्यत स तपस्तप्त्वेमं द्वादशाहमपश्यदात्मन एवाङ्गेषु च प्राणेषु च तमात्मान एवङ्गेभ्यश्च प्राणेभ्यश्च द्वादशधा निरमिमीत तमाहरत्तेनायजत ततो वै सोऽभवदात्मना प्र प्रजया पशुभिरजायत, इति।

प्रजापतिः प्रजोत्पादनेनातिप्रभूतः स्यामिति कामयित्वा तत्साधनं निर्णेतुं चित्तैकाग्र्यलक्षणं तपः कृत्वा स्वाभीष्टसाधनत्वेन स्वकीयेषु हस्तपादाद्यङ्गेषु प्राणादिवायुषु चावस्थितं द्वादशाहं दृष्ट्वा तं स्वाङ्गेभ्यः प्राणेभ्यश्च निःसार्य द्वादशधा कृत्वा निर्मितवान् । ततो निर्मितमाहृत्य तेनेष्ट्वा स प्रजापतिरभवत्, भूतिं प्राप्तवान् । आत्मना स्वेनैव रूपेण सर्वाधिको भूत्वा प्रजापशुरूपेण बहुलं प्राजायत ।

वेदनं प्रशंसति—

भवत्यात्मना प्र प्रजया पशुभिर्जायते य एवं वेद, इति ।

अनेनार्थवादेन द्वादशाहयागविधिरुन्नेयः । तथा च शाखान्तरे विधिः श्रूयते—'यः कामयेत प्रजायेयेति स द्वादशरात्रेण यजेत प्रैव जायते' इति ।

सोऽकामयत कथं नु गायत्र्या सर्वतो द्वादशाहं परिभूय सर्वामृद्धिमृध्नुयामिति तं वै तेजसैव पुरस्तात्पर्यभवच्छन्दोभिर्मध्यतोऽक्षरैरुपरिष्टाद्गायत्र्या सर्वतो द्वादशाहं परिभूय सर्वामृद्धिमाप्नोत्, इति ।

स प्रजापतिः पुनरेवमकामयत । कथं नु केन खलु प्रकारेण गायत्र्या सर्वतो द्वादशाहं व्याप्य सर्वां भोग्यवस्तुसमृद्धिमाप्नुयामिति विचार्य गायत्रीं

त्रेधा व्यभजत । ध्वनिरूपं तेज एको भागोऽक्षरसंख्ययाऽभिव्यज्यमानं छन्दो द्वितीयो भागोऽक्षराणि तृतीयो भागः । तैस्त्रिभिर्भागैरादिमध्यावसानेषु सर्वतो द्वादशाहं गायत्र्या व्याप्य समृद्धिं प्राप्तवान् । छन्दोभिरिति बहुवचनं पूजार्थम् ।

वेदनं प्रशंसति—

सर्वामृद्धिमृध्नोति य एवं वेद, इति ।

अथ द्वादशाहस्याहःकल्पनिमुपकल्पनामुखेन दर्शयति—

यो वै गायत्रीं पक्षिणीं चक्षुष्मतीं ज्योतिष्मतीं भास्वतीं वेद गायत्र्या पक्षिण्या चक्षुष्मत्या ज्योतिष्मत्या भास्वत्या स्वर्गं लोकमेत्येषा वै गायत्री पक्षिणी चक्षुष्मती ज्योतिष्मती भास्वती यद्द्वादशाहस्तस्य यावभितोऽतिरात्रौ तौ पक्षौ यावन्तराऽग्निष्टोमौ ते चक्षुषी येऽष्टौ मध्य उक्थ्याः स आत्मा, इति ।

आदिमध्यावसानेषु द्वादशाहस्य गायत्र्या व्याप्तत्वादभेदमभिप्रेत्य द्वादशाहमेव गायत्रीशब्देन व्यवहरति । सा च गायत्री पक्षद्वयोपेता चक्षुर्द्वयोपेता ज्योतिःशब्दोपलक्षितमध्यशरीरोपेता तत एव सा भास्वती प्रकाशवती । अहीनसत्राणां सर्वेषां प्रकृतित्वेन भासकत्वाद्भास्वत्त्वम् । ईदृशीं गायत्रीं यो वेद स तामनुष्ठाय यथोक्तगुणवत्त्वविशिष्टया गायत्र्या स्वर्गं लोकं प्राप्नोति । गूढाभिप्रायेण रूपकं परिकल्प्यैषा वा इत्यादिना स्वाभिप्रायः प्रकटी क्रियते । द्वादशाह एव यथोक्तगुणविशिष्टा गायत्री तस्येत्यादिना द्वादशाहे ते गुणाः प्रदर्श्यन्ते । तस्य द्वादशाहस्याऽऽद्यन्तावहर्विशेषावतिरात्रसंस्थौ । तावेव पक्षस्थानीयौ तयोरन्तर्भाविनौ द्वितीयैकादशाहविशेषावग्निष्टोमसंस्थौ । तौ चक्षुःस्वरूपौ । ये च तृतीयमारभ्य दशमपर्यन्ता अष्टावहर्विशेषा मध्ये वर्तन्ते ते सर्वेऽप्युक्थ्यसंस्थाः । सोऽष्टाहस्तमूह आत्मा मध्यशरीरम् ।

वेदनं प्रशंसति—

गायत्र्या पक्षिण्या चक्षुष्मत्या ज्योतिष्मत्या भास्वत्या स्वर्गं लोकमेति य एवं वेद ॥ २३ ॥ इति ।

यथोक्ताहःक्लृप्तिराश्वलायनाचार्यैर्दर्शिता—' अथ भरतद्वादशाह इममेवैकाहं पृथक्संस्थाभिरुपेयुरतिरात्रमग्रेऽथाग्निष्टोममथाष्टा उक्थ्यानथाग्निष्टोममथातिरात्रम् ' इति ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऐतरेयब्राह्मण-भाष्य एकोनविंशाध्याये प्रथमः खण्डः ॥१॥ (२३) [१४४]

भरतद्वादशाहं विधाय व्यूढद्वादशाहं विधत्ते—

त्रयश्च वा एते त्र्यहा आदशमम-
हरा द्वावतिरात्रौ यद्द्वादशाहः, इति ।

योऽयं व्यूढद्वादशाहोऽस्ति सोऽयमेतादृशः । तत्राऽऽद्यन्तौ यौ द्वावतिरात्रौ प्रथमद्वादशौ यच्च दशमहस्तत्परित्यज्यावशिष्टेष्वहःसु नवसंख्याकेषु त्रयस्त्र्यहाः कर्तव्याः । त्रिरात्रः कश्चित्कर्मविशेषः । सोऽयं त्रिवारमावर्तनीयः । आदशमामित्यत्र योऽयमाकारः स वर्जनार्थः । निपातानामनेकार्थत्वात् । यद्वा मर्यादायामयमाङ्भविष्यति । आद्यन्तावतिरात्रौ दशममहश्च मर्यादां कृत्वाऽवशिष्टो नवरात्रस्त्रिरावृत्तस्त्र्यहात्मक इत्यर्थः । तत्र चोदकेन दक्षिणादिसंख्याविकल्पः प्राप्त एका दीक्षा तिस्रो दीक्षा इत्यादिविकल्पस्य प्रकृतौ श्रुतत्वात् ।

तं विकल्पमपवदितुं नियमविशेषं विधत्ते—

द्वादशाहानि दीक्षितो भवति
यज्ञिय एव तैर्भवति, इति ।

द्वादशसु दिनेषु दीक्षाख्यानियमेऽनुष्ठिते सति तैर्द्वादशभिर्दीक्षाविशेषैरयं पुरुषो यज्ञयोग्य एव भवति ।

उपसत्सु विशेषं विधत्ते—

द्वादश रात्रीरुपसद उपैति शरीरमेव ताभिर्धूनुते, इति ।

प्रकृतौ तिस्र एवोपसदस्ताश्चैकैकां चतुर्षु दिनेष्वावर्त्य द्वादशसु दिनेषूपसदोऽनुतिष्ठेत् । स ताभिर्द्वादशभिरुपसद्भिः शरीरमेव धूनुते कम्पयति शरीरगतमांसादिधातुशोषणेन पापक्षयो भवति । तथा च सूत्रकारेणोपसंहृतम्—' यदा वै दीक्षितः क्रुद्धो भवति, अथ मेध्यो भवति ' इति । उपसद्दिनेष्वस्य क्षीरमात्राहारत्वाद्भवत्येव कार्श्यं तदिदं सर्वं धूनुत इत्यनेन विवक्षितम् ।

अथ द्वादशसु दिनेषु सोमाभिषवं विधत्ते–

द्वादशाहं प्रसुतः, इति ।

भवेदिति शेषः । दीक्षोपसदावङ्गकर्मणी अभिषवस्तु प्रधानकर्म ।

वेदनं प्रशंसति–

भूत्वा शरीरं धूत्वा शुद्धः पूतो
देवता अप्येति य एवं वेद, इति ।

द्वादशाहं प्रसुत इति पदद्वयमनुवर्तनीयम् । वेदिता द्वादशसु दिनेषु सोमाभिषवयुक्तो भूत्वा पूर्वोक्ताभिरुपसद्भिः शरीरं धूत्वा शरीरगतं पापं परित्यज्यात एव शुद्ध इह लोके भूत्वा परलोकेऽपि पूतः सर्वा देवताः प्राप्नोति । अथवा शुद्ध इत्यन्तो विधिवाक्यशेषः । पूत इत्यादिका वेदनप्रशंसा द्रष्टव्या ।

यथोक्तदीक्षोपसत्सुत्यादिनसंख्याः प्रशंसति–

षट्त्रिंशदहो वा एष यद्द्वादशाहः षट्त्रिंशदक्षरा वै बृहती बृहत्या वा एतदयनं यद्द्वादशाहो बृहत्या वै देवा इमाँल्लोकानाश्नुवत ते वै दशभिरेवाक्षरैरिमं लोकमाश्नुवत दशभिरन्तरिक्षं दशभिर्दिवं चतुर्भिश्चतस्रो दिशो द्वाभ्यामेवास्मिँल्लोके प्रत्यतिष्ठन्, इति ।

यो द्वादशाहोऽस्त्येष पूर्वोक्तरीत्या षट्त्रिंशदहिनात्मकः । बृहतीछन्दश्च षट्त्रिंशदक्षरं तस्माद्यो द्वादशाहोऽस्त्येतद्बृहत्या अयनं स्थानमित्यर्थः । देवाश्च बृहत्या सर्वाँल्लोकानाश्नुवन् (त) प्राप्नुवन् । दशभिर्दशभिरक्षरैः प्रत्येकं लोकत्रयप्राप्तिः । चतुर्भिरक्षरैर्दिक्चतुष्टयप्राप्तिः । द्वाभ्यामक्षराभ्यामस्मिँल्लोके प्रतिष्ठां प्राप्ताः । तथाविधबृहतीसाम्यादिनगता षट्त्रिंशत्संख्या प्रशस्ता ।

वेदनं प्रशंसति–

प्रतितिष्ठति य एवं वेद, इति ।

अत्र किंचिच्छोधमुद्भावयति–

तदाहुर्यदन्यानि च्छन्दांसि वर्षीयांसि भूयोक्षरतराण्यथ कस्मादेतां बृहतीत्याचक्षत इति, इति ।

यस्मात्कारणाद्बृहत्या अन्यान्युत्तराणि पङ्क्तित्रिष्टुब्जगतीछन्दांस्युत्तरोत्तरं चतुरक्षराधिकान्यतो वर्षीयांसि । तस्यैव व्याख्यानं भूयोक्षरतराणीति । अथैवं सति पङ्क्त्यादीनि च्छन्दांस्युपेक्ष्य कस्मात्कारणादेतां षट्त्रिंशदक्षरमात्रयुक्तां वैदिका बृहतीत्याचक्षत इति चोद्यम् ।

पूर्वोक्तमेवार्थवादमुपजीव्य परिहारमाह -

एतया हि देवा इमाँल्लोकानाश्नुवत ते वै दशभिरेवाक्षरैरिमं लोकमाश्नुवत दशभिरन्तरिक्षं दशभिर्दिवं चतुर्भिश्चतस्रो दिशो द्वाभ्यामेवास्मिँल्लोके प्रत्यतिष्ठंस्तस्मादेतां बृहतीत्याचक्षते, इति ।

अक्षरसंख्यान्यूनत्वेऽपि लोकत्रयप्राप्तिहेतुत्वात्प्रौढत्वमभिप्रेत्य बृहतीत्याभिधानम् ।

उक्तार्थवेदनं प्रशंसति—

अश्नुते यद्यत्कामयते य एवं वेद ॥२४॥ इति ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऐतरेयब्राह्मणभाष्ये एकोनविंशाध्याये द्वितीयः खण्डः ॥२॥ (२१) [१४०]

अस्मिन्काण्डे कर्मणि यजनयाजनयोरधिकारिविशेषौ दर्शयति -

प्रजापतियज्ञो वा एष यद्द्वादशाहः प्रजापतिर्वा एतेनाग्रेऽयजत द्वादशाहेन सोऽब्रवीद्दतूंश्च मासांश्च याजयत मा द्वादशाहेनेति तं दीक्षयित्वाऽनपक्रमं गमयित्वाऽब्रुवन्देहि नु नोऽथ त्वा याजयिष्याम इति तेभ्य इषमूर्जं प्रायच्छत्सैषोर्गृतुषु च मासेषु च निहिता ददतं वै ते तमयाजयंस्तस्माद्दद्याज्यः प्रतिगृह्णन्तो वै ते तमयाजयंस्तस्मात्प्रतिगृह्णता याज्यम्, इति ।

यो द्वादशाहः स प्रजापतेर्यज्ञः । कथमिति तदुच्यते । प्रजापतिरेवाग्रे

सर्वेभ्यः पूर्वमेतेन द्वादशाहेनायजत तस्मादयं प्रजापतियज्ञ इति । तद्यजन-प्रकार उच्यते । स प्रजापतिर्वसन्ताद्यृतुदेवांश्चैत्रादिमासदेवांश्चाब्रवीत् । हे देवा यूयमृत्विजो भूत्वा मां द्वादशाहक्रतुना याजयतेति । ते च मासर्तुदेवा ऋत्विजो भूत्वा तं प्रजापतिं दीक्षायित्वा तत्राध्वानमनपक्रमं निर्गमनरहितं गमयित्वाऽब्रुवन् । न हि यज्ञं संकल्प्य दीक्षां कृत्वा तदनुष्ठानमन्तरेण देवयजनदेशान्निर्गन्तुं शक्यते । हे प्रजापते नु क्षिप्रमेव नोऽस्माकं देहि अपेक्षितं प्रयच्छ । अथानन्तरं त्वां याजयिष्याम इत्यृतुभिर्मासैश्चोक्तः प्रजापतिस्तेभ्य ऋतुभ्यो मासेभ्य इषमन्नमूर्जं क्षीरादिरसं प्रायच्छत् । सैषोर्गृतुरूपा मासरूपा, ऋतुषु च मासेषु चेदानीमपि निहिता । अतश्च स्वकालोचितप्रकारेण ऋतुषु मासेषु च प्रवर्तमानेषु गोक्षीरा-दिबाहुल्यं भवति । ततोऽन्नपाने ददतं तं प्रजापतिं त ऋतवश्च मासाश्चायाजयन् । तस्माद्ददत्पुरुषो याज्यो यष्टुं योग्यः । न हि दानहीनस्याधिकारोऽस्ति । तथा ते मासाश्चर्तवश्च प्रतिगृह्णन्तो वै प्रजापतिदत्ते अन्नपाने स्वीकुर्वन्तः सन्तः प्रजापतिमयाजयन् । तस्मादिदानीमप्यृत्विजा दक्षिणां प्रतिगृह्णता याज्यं यजनं कर्तव्यम् ।

यजमानानामृत्विजां च वेदनं प्रशंसति—

> उभये राध्नुवन्ति य एवं विद्वांसा यजन्ते च याजयन्ति च, इति ।

द्वादशाहे दीक्षां प्राप्नुवत्सु यजमानेषु दीक्षाप्राप्तिं प्रशंसति—

> ते वा इम ऋतवश्च मासाश्च गुरव इवामन्यन्त द्वादशाहे प्रतिगृह्य तेऽब्रुवन्प्रजापतिं याजय नो द्वादशाहेनेति स तथेत्यब्रवीत्ते वै दीक्ष-ध्वमिति ते पूर्वपक्षाः पूर्वेऽदीक्षन्त ते पाप्मानम-पाहत तस्मात्ते दिवेव दिवेव ह्यपहतपाप्मानोऽ-परपक्षा अपरेऽदीक्षन्त ते नतरां पाप्मानमपा-हत तस्मात्ते तम इव तम इव ह्यनपहतपाप्मान-स्तस्मादेवं विद्वान्दीक्षमाणेषु पूर्वः पूर्व एव दिदीक्षिषेत, इति ।

---

* व्यत्ययेनैकवचनम् ।

ये पूर्वमृत्विक्त्वेन व्यवस्थिता ऋतवश्च मासाश्च ते वा इमे द्विविधा अपि द्वादशाहे दक्षिणां प्रतिगृह्य गुरव इव पापभारगौरवेणाऽऽक्रान्ता एव वयमित्यमन्यन्त । ततस्ते पापपरिहाराय द्वादशाहेन क्रतुना नोऽस्मान्याजयेति प्रजापतिमब्रुवन् । प्रजापतिरङ्गीकृत्य ते यूयं दीक्षां कुरुध्वमित्यब्रवीत् । तेषु मासेषु पूर्वपक्षाः शुक्लपक्षाभिमानिनो देवा ये सन्ति ते पूर्वे प्रथमभाविनः सन्तो दीक्षामकुर्वत । तादृशास्ते पूर्वपक्षाः स्वकीयं पाप्मानमपाहत नाशितवन्तः । तस्मात्पापराहित्यात्ते शुक्लपक्षा दिवेव दिवसा इव प्रकाशयुक्ता लोकेऽप्यपहतपाप्मानः पुरुषा दिवेव हि दिवसा इव पुण्यरूपेण तेजसा युक्ता भवन्ति । अथापरपक्षाः कृष्णपक्षाभिमानिनो देवा ये सन्ति ते त्वपरे पश्चात्प्रवर्तमाना दीक्षां क्रतवन्तस्ते मालिन्यदोषेण पाप्मानं नतरामपाहतातिशयेन विनाशं न क्रतवन्तः । तस्मात्क्रत्स्नपापविनाशाभावात्ते कृष्णपक्षास्तम इव कृष्णवर्णा दृश्यन्ते तदीयरात्रिषु चन्द्रप्रकाशस्याभावात् । लोकेऽप्यनपहतपाप्मानः पापविनाशरहिताः पुरुषास्तम इव स्वन्धकारतमोलिप्ततत्वेन निन्द्या भवन्ति । तस्मात्कारणादेव पूर्वापरकालवैषम्यं विद्वान्पुरुषो दीक्षमाणेषु यजमानेष्वेकैकस्मात्पूर्वः पूर्वपक्षे दिदीक्षिषेत दीक्षितुमिच्छेत् ।

वेदनं प्रशंसति—

अप पाप्मानं हते य एवं वेद, इति ।

यजमानपापविनाशहेतुत्वाद्दीक्षितं प्रशंसति -

स वा अयं प्रजापतिः संवत्सर ऋतुषु च मासेषु च प्रत्यतिष्ठत्ते वा इम ऋतवश्च मासाश्च प्रजापतावेव संवत्सरे प्रत्यतिष्ठंस्त एतैऽन्योऽन्यास्मिन्प्रतिष्ठिता एवं ह वाव स ऋत्विजि प्रतितिष्ठति यो द्वादशाहेन यजते तस्मादाहुर्न पापः पुरुषो याज्यो द्वादशाहेन नेदयं मयि प्रतितिष्ठादिति, इति ।

यः प्रजापतिर्द्वादशाहेनायष्ट स प्रजापतिः संवत्सरकालात्मको भूत्वर्तुषु च मासेषु च प्रत्यतिष्ठत्प्रतिष्ठितोऽभवत् । तदार्त्विज्यबलात्प्रजापतेरुत्कर्षात् । ते

वा इम ऋतवश्च मासाश्च प्रजापतिरूपे संवत्सरे प्रतिष्ठिता अभवन् । प्रजापति-प्रसादेन तत्पापविनाशात् । त एते प्रजापतिर्ऋतवो मासाश्चान्योन्यपापवि-नाशादन्योन्यस्मिन्प्रतिष्ठिताः एवमेवेदानीमपि यो द्वादशाहेन यजते सोऽय-मृत्विजि प्रतितिष्ठति । ऋत्विक्प्रसादेन यजमानस्य पापविनाशात् । यस्मादेवं तस्मादभिज्ञा एवमाहुः । पापपुरुषो द्वादशाहेन ऋत्विग्भिर्न याज्यस्तस्य कर्म-ण्यार्त्विज्यं न कार्यमिति । अयं पापो मयृत्विजि न प्रतितिष्ठात्सर्वथा मा प्रवि-शत्ये(त्वे)वमभिजानामीत्याभिप्रायः ।

द्वादशाहं प्रकारान्तरेण प्रशंसति—

ज्येष्ठयज्ञो वा एष यद्द्वादशाहः स वै देवानां ज्येष्ठो य एतेनाग्रेऽयजत श्रेष्ठयज्ञो वा एष यद्द्वादशाहः स वै देवानां श्रेष्ठो य एतेनाग्रेऽयजत, इति ।

यो द्वादशाहोऽस्त्यसौ ज्येष्ठस्य यज्ञः । कथमिति तदुच्यते । यः पुमाने-तेन द्वादशाहेनाग्रे प्रथममयजत स एव देवानां मध्ये ज्येष्ठो वयसा प्रवृद्धो भवति । किं चायं द्वादशाहः श्रेष्ठस्य यज्ञो यः प्रथममयजत स देवेषु मध्ये गुणतः श्रेष्ठः ।

एतां द्वादशाहप्रशंसामुपजीव्याधिकारिविशेषं दर्शयति—

ज्येष्ठः श्रेष्ठो यजेत कल्याणीह समा भवति न पापः पुरुषो याज्यो द्वादशाहेन नेदयं मयि प्रतितिष्ठादिति, इति ।

पुमान्भ्रातॄणां मध्ये वयसा ज्येष्ठो गुणैः श्रेष्ठश्च तादृशोऽनेन यजेत । त(य)-स्मिन्देशे तथाविधकर्तृको याग इहास्मिन्देशे समा कल्याणी भवति संवत्सरः सर्वोपद्रवरहितः सुखकरो भवति । यस्माज्ज्येष्ठस्य श्रेष्ठस्य चाधिकारस्तस्मात्पापः कनिष्ठो गुणहीनश्च पुरुषो न तेन याजनीयः । ऋत्विजि मयि पापी पुरुषोऽयं नैव प्रतितिष्ठत्विति तस्यर्त्विजोऽभिप्रायः ।

प्रकारान्तरेण द्वादशाहं ज्यैष्ठ्यश्रैष्ठ्यहेतुतया प्रशंसति—

इन्द्राय वै देवा ज्यैष्ठ्याय श्रैष्ठ्याय नाति-ष्ठन्त सोऽब्रवीदबृहस्पतिं याजय मा

द्वादशाहेनेति तमयाजयत्ततो वै तस्मै
देवा ज्यैष्ठ्याय श्रैष्ठ्यायातिष्ठन्त, इति ।

इन्द्रस्य वयसा ज्येष्ठत्वं गुणैः श्रेष्ठत्वं च देवा नाङ्गी कृतवन्तः । ततः सोऽङ्गीकारो द्वादशाहेन लब्धः ।

वेदनं प्रशंसति-

तिष्ठन्तेऽस्मै स्वा ज्यैष्ठ्याय श्रैष्ठ्याय समस्मि-
न्स्वाः श्रेष्ठतायां जानते य एवं वेद, इति ।

अस्मा अस्य वेदितुः स्वा ज्ञातयो ज्यैष्ठ्याय श्रैष्ठ्याय तिष्ठन्ते ज्यैष्ठ्यं श्रैष्ठ्यं चाङ्गी कुर्वन्ति । किंचास्मिन्वेदितरि येयं श्रेष्ठता. तस्यां ज्ञातयः संजानत ऐक मत्यं प्राप्नुवन्ति ।

यथा(अथ) व्यूढळे द्वादशाहे प्रथमदशमद्वादशादिनव्यतिरिक्तो यो नवरात्रस्तत्र ये त्रयस्त्र्यहाः पूर्वमुक्तास्तान्प्रशंसति-

ऊर्ध्वो वै प्रथमस्त्र्यहस्तिर्यङ्मध्यमोऽर्वाङुत्तमः स
यदूर्ध्वः प्रथमस्त्र्यहस्तस्मादयमामिरूर्ध्व उद्दीप्यत
ऊर्ध्वा ह्येतस्य दिग्यत्तिर्यङ्मध्यमस्तस्मादयं वायु-
स्तिर्यङ्पवते तिरश्चीरापो वहन्ति तिरश्ची ह्ये-
तस्य दिग्यदर्वाङुत्तमस्तस्मादसावर्वाङ्तपत्यर्वाङ्व-
र्षत्यर्वाञ्चि नक्षत्राण्यर्वाची ह्येतस्य दिक्सम्यञ्चो वा
इमे लोकाः सम्यञ्च एते त्र्यहाः, इति ।

योऽयं नवरात्रे प्रथमस्त्र्यहः सोऽयमूर्ध्वो वा आरोहप्रकार एव । तद्यथा-- गायत्रं प्रातःसवनं त्रैष्टुभं माध्यंदिनं सवनं जागतं तृतीयसवनमित्ययं स्वभाव-सिद्धः क्रमस्तस्य व्यत्यासभावादूर्ध्व इत्युच्यते । यस्तु मध्यमस्त्र्यहः सोऽयं तिर्यङ्वर्तते । तद्यथा--जागतं प्रातःसवनं गायत्रं माध्यंदिनं त्रैष्टुभं तृतीय-मित्यत्र नात्यन्तमनुक्रमो नाप्यत्यन्तं व्युत्क्रमः । तस्मादयं तिर्यङ्च उत्तमस्त्र्यहः सोऽर्वाङ्ध्रोर्मुखः । तद्यथा त्रैष्टुभं प्रातःसवनं जागतं माध्यंदिनं गायत्रं तृती-यसवनमित्येतदहरर्वाक्त्वं प्रथमो जागतान्तो द्वितीयस्त्रैष्टुभान्तस्तृतीयो गायत्रान्त इत्येवमूर्ध्वतिर्यक्त्वार्वाक्त्वानि त्रिष्वपि त्र्यहेषु द्रष्टव्यानि । यस्मात्स प्रथम-

स्त्र्यह ऊर्ध्वस्तस्मात्तदात्मकोऽयमग्निरूर्ध्वोभिमुखो दीप्यते तस्य चाग्नेरूर्ध्वा दिक्प्रिया । मध्यमस्य त्र्यहस्य तिर्यक्त्वात्तद्रूपो वायुस्तिर्यङ्वर्तते । वायुना प्रेरिता आपस्तिरश्चीस्तिर्यग्भूताः प्रवहन्ति । एतस्य वायोस्तिर्यक्त्वात्तिरश्ची दिक्प्रिया । उत्तमस्य त्र्यहस्यार्वाक्त्वात्तद्रूपोऽसावादित्योऽधोमुखस्तपत्यादित्य-प्रेरितः पर्जन्योऽधोमुखो वर्षति । आदित्यवन्नक्षत्राण्यर्वाञ्च्यधोमुखानि प्रकाशन्ते । एतस्याऽऽदित्यस्यार्वाची दिक्प्रिया । किं चैते त्रयो लोकास्तत्तद्वासिनां सुखहेतुत्वात्सम्यञ्चः । एवं च त्र्यहा लोकत्रयसाम्येनानुष्ठातॄणां सुख-हेतुत्वात्सम्यञ्चः ।

वेदनं प्रशंसति—

सम्यञ्चोऽस्मा इमे लोकाः श्रियै
दीयति य एवं वेद ॥ २५ ॥ इति।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऐतरेयब्राह्मणभाष्ये एकोनविंशाध्याये तृतीयः खण्डः ॥३॥ (२५) [१४६]

अथ द्वादशाहे दीक्षायाः कालविशेषं विधातुं प्रस्तौति—

दीक्षा वै देवेभ्योऽपाक्रामत्तां वासन्तिकाभ्यां मासाभ्यामन्वयुञ्जत तां वासन्तिकाभ्यां मासाभ्यां नोदाप्नुवंस्तां ग्रैष्माभ्यां तां वार्षिकाभ्यां तां शारदाभ्यां तां हैमन्तिकाभ्यां मासाभ्यामन्वयुञ्जत तां हैमन्तिकाभ्यां मासाभ्यां नोदाप्नुवंस्तां शौशिराभ्यां मासाभ्यामन्वयुञ्जत तां शौशिराभ्यां मासाभ्यामाप्नुवन्, इति।

पुरा कदाचिद्दीक्षा स्त्रीमूर्तिरूपा सती देवेष्वपरक्ता तेभ्यो देवेभ्यो निर्गता देवाश्च वासन्तिकाभ्यां चैत्रवैशाखमासाभ्यां तां दीक्षामनुगताभ्यां दीक्षामनुगम्यायुञ्जत वद्युका भवाम इत्येवमपेक्षितवन्तः । ततस्त्वरया गच्छन्तीं दीक्षां ताभ्यां मासाभ्यामुत्कर्षेण नोदाप्नुवन्, ना (प्तुम) शक्नुवन् । एवं ग्रैष्मवार्षिकशारदेषु मासेषु यथायोगं पदान्यध्याहृत्य व्याख्येयम् । अध्याहारविवक्षां

दर्शयितुमेव हैमन्तिके पर्याये संपूर्णं शाकमम्नातम् । यथोक्तपञ्चर्तुगतैर्मासैस्तत्प्राप्त्यभावेऽपि शैशिरमासाभ्यां तत्प्राप्तिर्जाता ।

वेदनं प्रशंसति—

आप्नोति यमीप्सति नैनं द्विष-
न्नाप्नोति य एवं वेद, इति ।

वेदिता पुरुषो यं कामयाप्तुमिच्छति तमाप्नोति । किंचैनं वेदितारं द्विषन्वैरी न प्राप्नोति ।

इदानीं कालं विधत्ते—

तस्माद्यं सत्रिया दीक्षोपनमेदेतयोरेव शैशिरयो-
र्मासयोरागतयोर्दीक्षेत साक्षादेव तद्दीक्षायामाग-
तायां दीक्षते प्रत्यक्षाद्दीक्षां परिगृह्णाति तस्मादे-
तयोरेव शैशिरयोर्मासयोरागतयोर्ये चैव ग्राम्याः
पशवो ये चाऽऽरण्या अणिमानमेव तत्पुरुषिमाणं
नियन्ति दीक्षाग्रएव तदुपनिप्लवन्ते, इति ।

यस्माच्छैशिराभ्यां मासाभ्यां देवानां दीक्षाप्राप्तिस्तस्माद्यं पुरुषं द्वादशाहादिसत्रसंबन्धिना दीक्षां प्राप्नुयात् । दीक्षां तत्र करिष्यामीति यस्येच्छा जायते स पुमानेतयोरेव शिशिरसंबन्धिमाघफाल्गुनयोर्मासयोः प्राप्तयोः सतो-दीक्षां कुर्यात् । तथा सति दीक्षायां साक्षादेवाऽऽगतायां बलात्कारमन्तरेण स्वप्रिये काले स्वतुल्ययेव समागतायां सत्यामयं दीक्षितो भवति । अतः प्रत्यक्षात्प्रत्यक्षेण दृश्यमानामिव मुख्यां दीक्षां परिगृह्णाति । यस्मादुक्तमास-द्वयागमे दीक्षा तस्मात्तयोर्मासयोरागतयोः सतोर्ग्राम्या गवादिपशव आरण्या द्विखुरादिपशवश्चाणिमाणं (नं) कृशत्वं परुषिमाणं पारुष्यं च नियन्ति नितरां प्राप्नुवन्ति । वर्षाशरद्धेमन्तेष्वृतुषु संतापराहित्यात्सर्वत्र हरिततृणं भक्षयित्वा पशवः पुष्टाङ्गाः स्निग्धाश्चावभासन्ते । शैशिर ऋतौ तृणस्य शोषणोपक्रमत्वा-त्संपूर्णभक्षणाभावेन पशव कृशा भवन्ति । अत एवास्थिदर्शनात्परुषा दृश्यन्ते । एतच्च युक्तमेव तत्तस्मिञ्शिशिरर्तौ दीक्षारूपमेवोपेत्य नितरां प्लवन्ते

संचरन्ति । दीक्षितोऽपि नियमविशेषैः पीडितः कृशः परुषश्च भवति । अतः पशूनां कृशत्वं पारुष्यं च दीक्षाकाललिङ्गम् ।

दीक्षार्थिनः कंचित्पशुं विधत्ते–

स पुरस्ताद्दीक्षायाः प्राजापत्यं पशुमालभते, इति ।

यो दीक्षां वाञ्छति स पुमान्दीक्षोपक्रमात्पुरा प्रजापतिदेवताकं पशुमालभेत । द्विविधो हि द्वादशाहः साग्निचित्यो निरग्निचित्यश्च । तत्राग्निचयनयुक्ते पशुरयमवगन्तव्यः ।

सामिधेनीषु चोदकप्राप्तं पाञ्चदश्यमपवदितुं विशेषं विधत्ते–

तस्य सप्तदश सामिधेनीरनुब्रूयात्सप्तदशो वै प्रजापतिः प्रजापतेराप्त्यै, इति ।

द्वयोर्विंशत्योः प्रक्षेपेण सप्तदशसंख्या संपद्यते । सप्तदशत्वं द्वादशमासा इत्यादिना पूर्वमेवोक्तम् । अतः सप्तदशसंख्या प्रजापतेः प्राप्त्यै संपद्यते ।

आग्नीयाज्यासु विशेषं विधत्ते–

तस्याऽऽग्नियो जामदग्न्यो भवन्ति, इति ।

पशोः प्राप्तिहेतुत्वात्प्रयाजा आग्निया(य) इत्युच्यन्ते । तदत्र जमदग्निना दृष्टाः समिद्धो अद्यमनुषः [१०-११०-१] इत्यादिसूक्ते समाम्नातौ द्रष्टव्याः ।

अत्र चोद्यमुद्भावयति–

तदाहुर्यदन्येषु पशुषु यथ ऋष्याग्नियो भवन्त्यथ कस्मादस्मिन्सर्वेषां जामदग्न्य एवेति, इति ।

उक्तप्राजापत्यपशुव्यतिरिक्तेषु सर्वेषु पशुष्वाग्नियो यथ ऋषि भवन्ति । यस्य यजमानस्य गोत्रप्रवर्तको य ऋषिर्भवति तमनतिक्रम्य तेन दृष्टा एवाऽऽग्नियो भवन्ति । एवं सत्यत्रापि जमदग्निगोत्रजानामेव समिद्धो अद्येत्याग्निय ऋचा युक्ता न त्वन्येषाम् । अथैवं सति कस्मात्कारणादस्मिन्पशौ सर्वेषां जमदग्निगोत्रजानामन्येषां चैता एवाऽऽग्नियः क्रियन्त इति चोद्यम् ।

तस्योत्तरमाह–

एतत्ते वै जामदग्न्यः सर्वसमृद्धाः सर्व-

रूप एष पशुः सर्वसमृद्धस्तद्यज्जामदग्न्यो
भवन्ति सर्वरूपतायै सर्वसमृद्ध्यै, इति ।

जमदग्निना दृष्टा ऋचो जामदग्न्यः सर्वरूपा वै सर्वासामृचां स्वरूपभूता एव सर्वसमृद्धाः सर्वसमृद्धिफलहेतुत्वात् । एष प्रजापतिदेवताकः पशुरपि सर्वरूपः । प्रजापतेः सर्वदेवतात्मकत्वेन तदीयपशोरपि सर्वपश्वात्मकत्वम् । अतोऽयं पशुरपि सर्वफलसमृद्धिहेतुत्वात्सर्वैः फलैः समृद्धः । तत्तथा सति यज्जामदग्नीनामनुष्ठानं तत्सर्वानुष्ठानासिद्ध्यर्थं च भवति ।

पश्वङ्गे पशुपुरोडाशे विशेषं विवक्षते-

तस्य वायव्यः पशुपुरोळाशो भवति, इति ।

तस्य प्राजापत्यस्य पशोर्वायुर्देवता यस्य पुरोडाशस्य सोऽयं वायव्यः ।

अत्र चोद्यमुद्भावयति-

तदाहुर्यदन्यदेवत्य उत पशुर्भवत्यथ कस्मा-
द्वायव्यः पशुपुरोळाशः क्रियत इति, इति ।

यद्यस्मात्कारणादस्यदेवत्य उत वायुव्यतिरिक्तप्रजापतिदेवताक एवायं पशुर्भवति तस्मात्पुरोडाशोऽपि प्रजापतिदेवताक एव युक्तः । यद्देवत्यः पशुस्तद्देवत्यः पुरोडाश इत्यभिधानात् । अथैवं सति प्रजापतिं परित्यज्य कस्मात्कारणात्पुरोडाशो वायुदेवताकः क्रियत इति चोद्यम् ।

तस्योत्तरमाह-

प्रजापतिर्वै यज्ञो यज्ञस्यायातयामताया
इति ब्रूयाद्यदु वायव्यस्तेन प्रजापतेर्नैति
वायुर्ह्येव प्रजापतिः, इति ।

पशुरूपस्य यज्ञस्य प्रजापतिदेवतात्मकत्वेन प्रजापतिरूपत्वम् । तादृशस्यास्य यज्ञस्य पशुहविषि पुरोडाशे तदैवतैक्ये सति यातयामत्वमसारत्वमालस्यकारणं भवेत् । सति हि भेदे भिन्नदेवताकं कर्माऽऽलस्यरहितं भवति । तस्मादयातयामतायै निःसारत्वरूपालस्यपरिहाराय देवतान्तरं युक्तमित्युत्तरं ब्रूयात् । न च वायुदेवताकत्वे प्रजापतेः सकाशात्पुरोडाशोऽपगच्छतीति शङ्कनीयम् । वायुप्रजापत्योः कर्मकारणभावेनैकत्वे सति वायव्यस्यैव प्राजापत्य-

त्वात् । तदिदमुच्यते–यदु वायव्यस्तेन प्रजापतेर्नैतीति । नापगच्छतीत्यर्थः ।

वायुप्रजापत्योरेकत्वं मन्त्रसंवादेन दृढयति–

तदुक्तमृषिणा पवमानः प्रजापतिरिति, इति ।

त्वष्टारमग्रजां गोपामित्यस्या ऋचश्चतुर्थपादे यः पवमानो वायुः स प्रजापतिरिति तादात्म्यं सामानाधिकरण्येन दर्शितम् । पूर्वं भरतद्वादशाहो व्यूहळद्वादशाहश्चेति द्वौ द्वादशाहभेदावुक्तौ । प्रकारान्तरेणापि सत्ररूपोऽहीनरूपश्चेत्येवं द्विविधो द्वादशाहः ।

तत्र सत्रपक्षे विशेषान्विधते–

सत्रमु चेत्संन्युप्याग्नीन्यजेरन्सर्वे दीक्षेरन्सर्वे सुनुयुर्वसन्तमभ्युदवस्यत्यूर्ग्वै वसन्त इषमेव तदूर्जमभ्युदवस्यति ॥ २६ ॥ इति ।

सत्रमु चेत्, यद्ययं द्वादशाहः सत्ररूपो भवेत्तदानीं सत्रस्य बहुयजमानत्वात्सर्वेषां यजमानानामग्नीन्संन्युप्य संभूयैकत्वेनावस्थाप्य तस्मिन्सर्वे यजेरन् । यजमानत्वादेव सर्वेऽपि दीक्षेरन्, दीक्षां कुर्युः । य एव यजमानास्त एव ऋत्विज इत्युक्तत्वेन सर्वे यजमानाः सुनुयुर्ऋत्विक्कार्यमभिषवं कुर्युः । वसन्तमभिलक्ष्योदवस्यति, उदवसानीयां समाप्तिकालीनामिष्टिमनुतिष्ठेत्, वसन्तर्तौ समापयेदित्यर्थः । वसन्तकाले सति फलानां गृहेष्वागमनेन रसबाहुल्यादूर्ग्वै रस एव वसन्तः । तथा सत्येति तदेतत्समापनेनेषमन्नमूर्जं रसं वाऽभिलक्ष्योदवस्यति यजमानसंघो द्वादशाहं समापयति ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऐतरेयब्राह्मणभाष्य एकोनविंशाध्याये चतुर्थः खण्डः ॥ ४ ॥ (२६) [१४७]

अथ व्यूहळद्वादशाहे यदेतद्व्यूहळत्वं तदेतत्प्रशंसितुमाख्यायिकामाह–

छन्दांसि वा अन्योन्यस्याऽऽयतनमभ्यध्यायन्गायत्री त्रिष्टुभश्च जगत्यै चाऽऽयतनमभ्यध्यायत्त्रिष्टुब्गायत्र्यै च जगत्यै च जगती गायत्र्यै च त्रिष्टुभश्च ततो वा एतं प्रजापति-

व्यूढ्वळच्छन्दसं द्वादशाहमपश्यत्तमाहरत्तेनायजत
तेन स सर्वान्कामांश्छन्दांस्यगमयत्, इति ।

गायत्री त्रिष्टुब्जगतीत्येतानि त्रीणि च्छन्दांस्यन्योन्यस्याऽऽयतनमभिप्राप्तु-मध्यायन्स्वमनस्यचिन्तयन् । तेषां च त्रयाणां छन्दसां क्रमेण सवनत्रयं स्थानम् । तत्र गायत्री त्रिष्टुब्जगत्योः स्थाने माध्यंदिनसवनतृतीयसवने ध्यात-वती । त्रिष्टुप्स्वस्थानव्यतिरिक्तं स्थानद्वयमभ्यध्यायत् । तथा जगत्यपि । ततः प्रजापतिश्छन्दसामभिलाषं दृष्ट्वा तत्संपादनक्रमेण तं व्यूढ्वळच्छन्दसं द्वादशा-हमपश्यत् । स्वंस्वस्थानविपरीतत्वेनोढानि स्थानान्तरे प्रक्षिप्तानि च्छन्दांसि यस्मिन्द्वादशाहे सोऽयं व्यूढ्वळच्छन्दाः । तादृशं द्वादशाहं दृष्ट्वा तत्साधनान्या-हृत्य तेनेष्ट्वा स प्रजापतिस्तेषामपेक्षितान्स्थानविपर्यासलक्षणान्सर्वान्कामान्गायत्र्या दिच्छन्दांसि प्रापितवान् ।

वेदनं प्रशंसति—

सर्वान्कामान्गच्छति य एवं वेद, इति ।

इदानीं व्यूहनं विधत्ते—

छन्दांसि व्यूहत्यायतायै, इति ।

गायत्र्यादीनि च्छन्दांसि व्यूहति तत्तदायतनविपर्यासेनावस्थापयेत् । तच्च व्यूहनमसारत्वप्रयुक्तालस्यपरिहाराय भवति ।

उक्तव्यूहनमनूद्य प्रशंसति—

छन्दांस्येव व्यूहति तद्यथाऽदोऽश्वैर्वाऽनड्वद्भिर्वाऽ-न्यैरन्यैरश्रान्ततरैरश्रान्ततरैरुपविमोकं यान्त्येवमेवै-तच्छन्दोभिरन्यैरन्यैरश्रान्ततरैरश्रान्ततरैरुपविमोकं स्व-र्गं लोकं यान्ति यच्छन्दांसि व्यूहति, इति ।

गायत्र्यादीनि च्छन्दांस्यस्मिन्द्वादशाहविशेषे व्यूहत्येव न त्वत्र संदेहः कार्यः । तत्तस्मिन्व्यूहने यथा लोकेऽदो निदर्शनं तन्न्यायो द्रष्टव्यः । किं निद-र्शनमिति तदुच्यते । ये राजानो रथमारुह्य तत्रत्यैरश्वैर्दूरदेशं गच्छन्ति ते राजानो योजने योजन उपविमोकं श्रान्तानश्वानुपविमुच्योपविमुच्यान्यैरन्यैः पुनः पुनर्नूतनैर्दूरदेशं यान्ति । तत्रोपपत्तिरश्रान्ततरैरिति । अतिशयेन श्रमर-हितैः । पौनःपुन्यं द्योतयितुं वा वृत्तिश्च । लाङ्गले घटीयन्त्रे वा तदा तदा

श्रान्तानश्वाननड्वाहो वा विमुच्य विमुच्य नूतनैरनड्वद्भिः प्रवर्तन्त एवमेवात्रापि च्छन्दसां स्थानविपर्यासे सति स्वस्वस्थाने श्रान्तानि च्छन्दांसि पुनः पुनरुपविमुच्य तदा तदा नूतनैश्छन्दोभिः सात्विणः स्वर्गं लोकं गच्छन्ति । यदा छन्दांसि व्यूहति तदानीमेतादिति द्रष्टव्यम् ।

अथ बृहद्रथंतरसामनी उपाख्यानेन प्रशंसति—

इमौ वै लोकौ सहाऽऽस्तां तौ व्यैतां नावर्षन्न समतपत्ते पञ्चजना न समजानत तौ देवाः समनयंस्तौ संयन्तावेतं देवविवाहं व्यवहेतां रथंतरेणैवेयममूं जिन्वाति बृहताऽसाविमाम्, इति ।

इमौ भूलोकस्वर्गलोकौ पूर्वस्मिन्काले सहैवाऽऽस्तामत्यन्तं प्रीतियुक्तावेकत्रैवावस्थितौ । कदाचित्तावुभौ केनापि निमित्तेन व्यैतां वियोगं प्राप्तवन्तौ परस्परविरोधेन सहवासं परित्यज्य दूरदेशेऽवस्थितौ । तदानीं द्युलोकवर्ती पर्जन्यो नावर्षदवृष्टिं न संपादितवान् । आदित्यश्च द्युलोकवर्ती न समतपत्, आतपरूपं प्रकाशं न कृतवान् । तदानीं ते पञ्चजनाः पूर्वोक्ता देवमनुष्यादयः पञ्चविधाः प्राणिनो न समजानतान्धकारग्रस्ताः सन्तः कमपि मार्गमज्ञात्वा परस्परैकमत्यरहिता अभवन् । तदानीं तादृशः प्राणिनो दृष्ट्वा तावुभौ लोकौ समनयन्परसंगतिं प्रापितवन्तः । तावुभौ लोकौ संयन्तौ परस्परसंगमं प्राप्तवन्तावेतं परस्परोपकाररूपं देवविवाहं देवानामुचितं विवाहं व्यवहेतां विविधत्वेन कृतवन्तौ । लोकेऽपि विवाहो नाम परस्परविपर्यासेन संबन्धप्रापणम् । तथाहि । वरस्य पिता स्वपुत्रं कन्यापितुर्जामातृत्वेन संबन्धयति । कन्यापिता च स्वपुत्रीं वरपितुः स्नुषात्वेन संबन्धयति । तदिदं विपर्यासेन संबन्धनयनं विवाहः । तयोश्च विवाहे परस्परमुपकुरुतः । तत्रैयं भूमिः साम्ना रथंतरेण तन्नामकेनैवामूं दिवं जिन्वति प्रीणयति । असौ द्यौश्चेमां भूमिं बृहता साम्ना जिन्वति । तत एव सर्वत्रेयं वै रथंतरमसौ बृहदिति लोकद्वयरूपेण सामद्वयं स्तूयते ।

द्वादशाहे बृहद्रथंतरयोरपेक्षितत्वेन प्रशंसां कृत्वा तत्प्रसङ्गाल्लोकद्वयस्यान्यानपि परोपकारान्दर्शयति—

नौधसेनैवेयममूं जिन्वाति श्यैतेनासाविमां धूमे-

नैवेयममूं जिन्वति वृष्ट्याऽसाविमां देवयजन-
मेवेयममुष्यामदधात्पशूनसावस्याम्, इति

इमामिन्द्र सुतं पिब (१-८४-४) इत्यस्यामूच्युत्पन्नं साम नौधसम् । त्वामिदा ह्यो नरः (८-९९ १) इत्यस्यामूच्युत्पन्नं साम श्यैतम् । तस्यां लोकयोः परस्परं प्रीतिः । भूमावग्निजन्यो धूमो दिवि गच्छति । द्युलोकात्समुत्पन्ना वृष्टि-रुर्व्यां गच्छति । सोऽयं धूमवृष्टिभ्यां परस्परोपकारः । देवयजनं देवयागयोग्यं कंचिद्देशमियं भूमिरमुष्यां दिव्यदधात् । असौ च द्यौः पशूनस्यां भूमावदधात् । अतो देवयजनपशुभ्यां परस्परोपकारः ।

तत्र देवयजनशब्देन विवक्षितमर्थं व्याचष्टे -

एतद्धा इयममुष्यां देवयजनमदधाद्य-
देतच्चन्द्रमसि कृष्णामिव, इति ।

चन्द्रमण्डले शशमृगादिशब्देन लोके व्यवह्रियमाणं यदेतत्कृष्णमिव कृष्ण वर्णमिव रूपं दृश्यत एतदेव देवयजनं देवयागयोग्यं वस्तु, इयं भूमिरमुष्यां दिवि स्थापितवती ।

चन्द्रमसि कृष्णरूपप्रसङ्गाद्यागेषु मुख्यत्वेन शुक्लपक्षं विधत्ते-

तस्मादापूर्यमाणपक्षेषु यजन्त एतदेवोपेप्सन्ते, इति ।

यस्माद्यागयोग्यं कृष्णं चन्द्रमसि स्थितं तस्मात्कारणाच्छुक्लपक्षेषु यागं कुर्वन्तो यजमाना एतदेव चन्द्रमण्डलमुपाप्तुमिच्छन्ति । दिने दिने वर्धमानया कलया सर्वतः पूर्यमाणं चन्द्रमण्डलमेषु शुक्लपक्षेषु तेनाऽऽपूर्यमाणपक्षाः । कार्मिणां दक्षिणमार्गेण चन्द्रमण्डलप्राप्तिः सर्वासूपनिषत्सु प्रसिद्धा ।

देवयजनशब्दं व्याख्याय पशुशब्दं व्याचष्टे-

ऊषानसावस्यां तद्धापि तुरः कावषेय
उवाचोषः पोषो जनमेजय केति तस्मा-
द्धाप्येतर्हि गव्यं मीमांसमानाः पृच्छन्ति
सन्ति तत्रोषाः३ इति । ऊषो हि पोषोऽसौ
वै लोक इमं लोकमभिपर्यावर्तत, इति ।

असौ द्युलोकोऽस्यां भूमावूषानादधतीत्यध्याहारः । देशान्तरप्रसिद्धि-मुपजीव्य पशुशब्दस्योषशब्दो व्याख्यानम् । वश कान्ताविति यस्माद्धातो-रूषशब्दो निष्पन्नः । ऊषाः कमनीयाः । पशूनां चमरादीनां कमनीयत्वं प्रसिद्धम् । ऊषशब्दव्यवहार एव तद्धापीत्यादिना प्रदर्श्यते । यस्मादूषः पशु-रिति देशविशेषे पर्यायत्वेन प्रसिद्धौ तद्धापि तस्मादेव कारणात्तुरनामकः कश्चि-न्महर्षिः कवषस्य पुत्रो जनमेजयनामानं राजानं संबोध्यैवमुवाच । हे जन-मेजय क ऊषः पोषशब्दाभिधेयपुष्टिहेतुः पशुरिति यस्मात्तूषशब्दं पशुषु व्याज-हार तस्माद्ध तस्मादेव कारणादिदानीमपि गव्यं मीमांसमानाः केचिद्देश विशेषेषु गोरसं क्षीरादिकं विचारयन्त एवं पृच्छन्ति । तत्र तेषु देशेषु किमूषाः सन्तीति गोविषयः प्रश्नस्तेषामभिप्रेतः । प्रश्नार्थो प्लुतिः । यस्मादूष-शब्दवाच्यः पोषहेतुर्गवादिरूपः पशुस्तस्मादूषशब्देन पशुशब्दव्याख्यान मुचितम् । असौ द्युलोक इमं भूलोकमभिलक्ष्य पर्यावर्तत तेन पशुनोपकृतवा नित्यर्थः ।

इत्थं बृहद्रथंतरप्रसङ्गेन द्यावापृथिव्योः परस्परमुपकारं बहुधा प्रपञ्च्यो-पसंहरति—

ततो वै द्यावापृथिवी अभवतां न द्यावाऽन्त-
रिक्षान्नान्तरिक्षाद्भूमिः ॥ २७ ॥ इति ।

ततो वै तस्मादेव परस्परोपकारकत्वकारणाद्द्यावापृथिव्यौ वियुक्ते अपि परस्परैकमत्येन प्राण्युपकारिण्यावभवताम् । न च तत्रान्तरिक्षलोकः कुत्र वर्तत इति शङ्कनीयम् । द्यावा द्युलोको नान्तरिक्षलोकादन्य इति शेषः । भूमिर्नान्त-रिक्षादन्या । उभयोर्द्यावापृथिव्योरेवान्तरिक्षेण संबध्यैवावस्थानात् । तस्माद्वर्णि-तयोर्द्यावापृथिव्योरेवान्तरिक्षस्यान्तर्भाव इत्यभिप्रायः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऐतरेयब्राह्मण-भाष्ये एकोनविंशाध्याये पञ्चमः खण्डः ॥ ॥ (२७) [१४८]

अथास्मिन्द्वादशाहमध्ये पृष्ठ्यषडहे पृष्ठस्तोत्रोपयुक्तानि सामानि विधातु-माख्याधिकामाह—

बृहच्च वा इदमग्रे रथंतरं चाऽऽस्तां वाक्च
वै तन्मनश्चाऽऽस्तां वाग्वै रथंतरं मनो बृह-

तद्बृहत्पूर्वं ससृजानं रथंतरमत्यमन्यत तद्रथंतरं गर्भमधत्त तद्वैरूपमसृजत, इति ।

ये बृहद्रथंतरे पूर्वमिमे वै लोकावित्यादिना संस्तुते ते उभे एवेदं वैरूपादि सामजातमन्तर्भाव्य तदुत्पत्तेः पूर्वमास्ताम् । इदं वैरूपादि सामजातमुत्पत्तेरग्रे पूर्वं नाऽऽसीत् । ते च सामनी मनोवाग्रूपे अभवताम् । तत्र वागेव रथंतरं साम मनो बृहत्साम । तदेतन्मनोरूपं बृहत्साम । ससृजानं सृष्टिं कर्तुमुद्युक्तं तत्पूर्वं प्रथमत एव तृप्तिसिद्धये वाग्रूपं रथंतरं सामात्यमन्यत । वाग्रूपत्वादेव स्त्रीरूपत्वम् । मनोरूपत्वात्स्वस्य पुरुषरूपत्वम् । तस्मादतिशयितं तत्स्वरूपं ध्यातवद्बृहत्साम स्वस्य पुरुषत्वाभिमानेन रथंतरसाम्नि स्त्रीत्वभावनया सङ्गमकरोदित्यर्थः । ततः स्त्रीस्थानीयं सामान्तरमसृजत ।

वैरूपस्योत्पत्तिमभिधाय वैराजसाम्न उत्पत्तिं दर्शयति-

ते द्वे भूत्वा रथंतरं च वैरूपं च बृहदत्यमन्येतां तद्बृहद्गर्भमधत्त तद्वैराजमसृजत, इति ।

मातृस्थानीयं रथंतरं पुत्रस्थानीयं वैरूपं चेति ते सामनी द्वे भूत्वा यद्बृहत्सामैकाकित्येन वर्तमानमस्ति तदत्यमन्येतां तस्माद्बृहतोऽप्येकाकिनोऽतिशयेन मन्येतां न्यूनत्वेन बृहत्साम्नि स्त्रीत्वबुद्धिं कृत्वा संयोगमकुरुताम् । तत्र बृहत्साम गर्भं धृत्वा वैराजाख्यं सामान्तरमसृजत ।

शाक्करसाम्न उत्पत्तिं दर्शयति-

ते द्वे भूत्वा बृहच्च वैराजं च रथंतरं च वैरूपं चात्यमन्येतां तद्रथंतरं गर्भमधत्त तच्छाक्वरमसृजत, इति ।

वैराजसाम्नः सृष्टेरूर्ध्वं तद्युक्तस्य बृहत्साम्नो न्यूनत्वेऽपगते सति ते सामनी द्वे भूत्वा मिलित्वा वैरूपसहितस्य रथंतरस्य वाग्रूपत्वेन स्त्रीत्वमभिप्रेत्य स्त्रीत्वमत्यमन्येतां स्वाधिकां मत्वा संयोगमकुरुताम् । ततो रथंतरसाम गर्भं धृत्वा शाक्काख्यं सामान्तरमसृजत ।

रैवतसाम्न उत्पत्तिं दर्शयति-

तानि त्रीणि भूत्वा रथंतरं च वैरूपं च

शाक्करं च बृहच्च वैराजं चात्यमन्यन्त
तद्बृहद्गर्भमधत्त तद्रैवतमसृजत, इति ।

मातृस्थानीयं रथंतरं पुत्रस्थानीये वैरूपशाक्करे चेत्येवं त्रीणि भूत्वा वैराजेन युक्तस्य बृहत्साम्नो न्यूनत्वबुद्ध्या तदत्यमन्यन्त । तस्मादतिशयं पुरुषस्थानीयं स्वपक्षे मत्वा संयोगमकुर्वत तदो बृहद्गर्भमधत्त । गर्भं धृत्वा रैवताख्यं सामान्तरमसृजत ।

उक्तानां षण्णां साम्नां पृष्ठस्तोत्रसाधनत्वं दर्शयति—

तानि त्रीण्यन्यानि त्रीण्य-
न्यानि षट्पृष्ठान्यासन्, इति ।

तानि पूर्वोक्तानि रथंतरवैरूपशाक्कराणि त्रीणि सामान्यन्यानीतरेभ्यो विलक्षणानि पृष्ठाख्ये षडहे प्रथमतृतीयपञ्चमेष्वयुग्मेष्वहःसु पृष्ठस्तोत्रनिष्पादकान्यासन् । तथा बृहद्वैराजरैवतरूपाणि त्रीणि सामान्यन्यानि रथंतरादिभ्यो विलक्षणानि भूत्वा द्वितीयचतुर्थषष्ठेषु युग्मरूपेष्वहःसु पृष्ठस्तोत्रनिष्पादकान्यासन् ।

अथ षड्विधपृष्ठस्तोत्रसामाधारत्वेन षड्विधानि च्छन्दांसि दर्शयति—

तानि ह तर्हि त्रीणि च्छन्दांसि षट्पृष्ठानि
नोदाप्नुवन्सा गायत्री गर्भमधत्त साऽनुष्टुभम-
सृजत त्रिष्टुब्गर्भमधत्त सा पङ्क्तिमसृजत जगती
गर्भमधत्त साऽतिच्छन्दसमसृजत तानि त्रीण्य-
न्यानि त्रीण्यन्यानि षट्छन्दांस्यासन्षट्पृष्ठानि
तानि तथाऽकल्पन्त कल्पते यज्ञोऽपि, इति ।

तर्हि तस्मिन्षट्सामसंपत्तिकाले गायत्रीत्रिष्टुब्जगतीरूपाणि च्छन्दांसि त्रीणि भूत्वा तानि पूर्वोक्तानि षट्पृष्ठसामानि नोदाप्नुवन्पृष्ठानां निष्पत्तिं कर्तुं नाशक्नुवन् । ततो गायत्र्यादीनि त्रीण्यपि गर्भं धृत्वा पुनरन्यान्यनुष्टुप्पङ्क्त्यतिच्छन्दोरूपाणि च्छन्दांस्यसृजन्त । ततस्तानि सिद्धानि गायत्र्यादीनि त्रीण्यन्यानि पूर्वसिद्धत्वेनैव पृथग्भावात्तान्यासन् । तथैवानुष्टुबादीनि त्रीण्यन्यानि च्छन्दांसि तदानीमुत्पन्नानीति मिलित्वा षट्छन्दांस्यासन् । ततः षट्संख्याकानि पृष्ठसामानि धारयितुं तानि षट्छन्दांसि तथाऽकल्पन्त तेनव

क्रमेण समर्थान्यभवन् । प्रथमद्वितीयतृतीयेष्वहःसु गायत्रीत्रिष्टुब्जगत्यः पृष्ठस्तोत्रनिष्पादि (दि) काश्चतुर्थपञ्चमषष्ठेष्वह स्वनुष्टुप्पङ्क्त्यतिच्छन्दांसि स्तोत्रनिष्पादकानि । एवं सति यज्ञोऽपि पृष्ठ्यः षडहाख्यः कल्पते स्वप्रयोजनाय समर्थो भवति ।

वेदनपूर्वकमनुष्ठानं प्रशंसति -

तस्यै जनतायै कल्पते यत्रैवमेतां छन्दसां च पृष्ठानां च क्लृप्तिं विद्वान्दीक्षते दीक्षते ॥ २८ ॥ इति ।

यत्र यस्यां जनतायामेवमुक्तप्रकारेण गायत्र्यादिच्छन्दसां रथंतरादिपृष्ठानां चैतां क्लृप्तिं कल्पनाप्रकारं जानीते स दीक्षां प्राप्नोति । स पुमांस्तस्यै जनतायै तस्यां यज्ञसभायां कल्पते समर्थो भवति । अध्यायसमाप्त्यर्थः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऐतरेय-
ब्राह्मणभाष्य एकोनविंशाध्याये षष्ठः खण्डः ॥ ६ ॥ (२८) [१४९]

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकवीरबुक्कभूपसाम्राज्य
धुरंधरसायणाचार्यकृतावैतरेयब्राह्मणभाष्य
एकोनविंशोऽध्यायः ॥ १९ ॥

अथ विंशोऽध्यायः ।

ज्योतिष्मत्यो भारतो द्वादशाहो
दीक्षाकालो याजनं पाशुकं च ॥
व्यूहच्छन्दोद्वादशाहप्रशंसा
पृष्ठादीनां छन्दसां तत्र क्लृप्तिः ॥ १ ॥

इदानीं द्वादशाहक्रतौ प्रायणीयोदयनीयावतिरात्रौ यच्च दशममहस्तत्स्थितयं वर्जयित्वा यो नवरात्रस्तं विधातुमुपक्रमते--

अग्निर्वै देवता प्रथममहर्वहति त्रिवृत्स्तोमो रथंतरं साम गायत्री छन्दः, इति ।

देवतानामग्र्यो योऽयमग्निरस्ति सोऽयमत्र देवता भूत्वा नवरात्रस्य प्रथममहर्वहति निष्पादयति । तथा स्तोमानां मध्ये त्रिवृत्स्तोमः प्रथमस्याह्नो

निर्वाहकः साम्नां मध्ये रथंतराख्यं साम प्रथमस्याह्नः पृष्ठसामानिर्वाकं छन्दसां मध्ये गायत्रीछन्दः प्रथमस्याह्नो निर्वाहकम् ।

उक्तार्थवेदनं प्रशंसति—

यथादेवतमेनेन यथास्तोमं यथासाम यथाछन्दसं राध्नोति य एवं वेद, इति ।

यः पुमानेवमग्निर्वृद्रथंतरगायत्रीछन्दसां प्रथमेऽहनि देवतात्वं स्तोमत्वं पृष्ठसामत्वं छन्दस्त्वं च क्रमेण वेद स पुमाननेन वेदेन यथादेवतं तस्याह्न उचितां देवतामनतिक्रम्य तथा स्तोमसामच्छन्दांस्यप्युचितान्यनतिक्रम्य समृद्धो भवति ।

प्रथमेऽह्नि विनियोज्यान्मन्त्रविशेषानादौ तावल्लक्षणमुखेन संक्षिप्य दर्शयति—

यद्वा एति च प्रेति च तत्प्रथमस्याह्नो रूपं यद्युक्तवद्यद्रथवद्यदाशुमद्यात्पिबवद्यत्प्रथमे पदे देवता निरुच्यते यदयं लोकोऽभ्युदितो यद्राथंतरं यद्गायत्रं यत्करिष्यदेतानि वै प्रथमस्याह्नो रूपाणि, इति ।

यद्वै यस्मिन्नेव मन्त्र एति च । आकारस्वरनिर्देशार्थमिति चशब्द उपरि प्रयुक्तः । उपसर्गेषु मध्ये योऽयमाङस्ति सोऽयमेतिपरो निर्दिश्यते । तथा प्रेत्युपसर्गनिर्देशः । आ प्रेत्यनयोरुपसर्गयोरन्यतर उपसर्गो यस्मिन्मन्त्रेऽस्ति तन्मन्त्रस्वरूपं प्रथमस्याह्नो रूपं लक्षणमित्यर्थः । तथा यन्मन्त्रस्वरूपं युक्तवद्युजिधातूपेतं रथवद्रथशब्दोपेतमाशुमदाशुशब्दोपेतं पिबवत्पिबतिधातूपेतम् । तथा मन्त्रस्य प्रथमे पादे देवता निरुच्यते निर्दिश्यते । तथाऽयं लोको भूलोकोऽभ्युदितः कथितो भवति । तथा यद्राथंतरं रथंतरसामसंबन्धि गायत्रं गायत्रीछन्दसः संबन्धि गायत्रं साम वा । करिष्यत्करोतेर्धातोर्भविष्यप्रत्ययान्तमीदृशं यद्यदस्त्येतानि वै सर्वाण्यपि प्रथमस्याह्नो रूपाणि निरूपकाणि लक्षणानीत्यर्थः ।

एवं लक्षणमुखेन मन्त्रविशेषान्विधाय प्रतीकोदाहरणेन विस्पष्टं विधत्ते—

उप प्रयन्तो अध्वरमिति प्रथ-

---

१ ऋ. १·७४-१ ॥

मस्याह्न आज्यं भवति, इति ।

प्रकृतौ प वो देवायाग्नय इत्यादिशस्त्रं तद्ग्राधित्वा नवरात्रस्य प्रथमेऽह्न-पुप प्रयन्त इति सूक्तेनाऽऽज्यशस्त्रं शंसनीयम् ।

तस्मिन्सूक्ते पूर्वोक्तलक्षणेष्वेकं लक्षणं योजयित्वा दर्शयति -

प्रेति प्रथमेऽहनि प्रथमस्याह्नो रूपम् , इति ।

प्रशब्दरूपोऽयमुपसर्गः सोऽयं सूक्तगते प्रयन्त इति पदे दृश्यते । अतः प्रथमेऽहनि विनियोक्तुं योग्यत्वात्प्रथमस्याह्नोऽनुलम् ।

मन्त्रान्तरे लक्षणान्तरं दर्शयति—

'वायवा याहि दर्शतेति प्रउगमेति प्रथमेऽहनि प्रथमस्याह्नो रूपम् , इति।

यद्यपि वायवायाहीत्यादिकस्य प्रोपसर्गस्य प्राकृतत्वाच्चोदकेनैव तत्प्राप्तिस्तथाऽपि लक्षणं दर्शयितुमयमुपन्यासः । एत्याकाररूपं पदमत्रास्त्यायाहीति श्रुतत्वात् । अतः प्रथमेऽहनि विनियोक्तुं योग्यत्वात्प्रथमस्याह्नो रूपम् ।

अथ ऋचद्वये लक्षणद्वयं दर्शयति -

'आ त्वा रथं यथोतय इदं' वसो सुतमन्ध इति मरुत्वतीयस्य प्रतिपदनुचरौ रथवच्च पिबवच्च प्रथमेऽहनि प्रथमस्याह्नो रूपम् , इति।

आ त्वा रथमिति ऋचो मरुत्वतीयशस्त्रस्य प्रतिपत्तच्च इथशब्दोपेतमिदं वसो सुतमिति तस्य शस्त्रस्यानुचरस्तच्च पिबवत्पिबासुपूर्णमिति द्वितीयपादे श्रुतत्वात्प्रथमेऽह्नीत्यादिकं पूर्ववत् ।

मन्त्रान्तरं लक्षणान्तरं च दर्शयति -

इन्द्र नेदीय एदिहीतीन्द्रनिहवः प्रगाथः प्रथमे पदे देवता निरुच्यते प्रथमेऽहनि प्रथमस्याह्नो रूपम् , इति ।

इन्द्र नेदीय इत्ययमृग्द्वयरूपत्वात्प्रगाथः । इन्द्रो नितरामाहूयते यस्मिन्प्र-

---

१ ऋ. १-२-१ ॥ २ ऋ. ८ ६ ३ १ ॥ ३ ऋ ८ २ १ ॥
४ ऋ. ८-५३-५ ॥

गाथे सोऽयमिन्द्रानिहवः । एदिहीत्येवमाह्वानमत्र श्रूयते । अस्य प्रगाथस्य प्रथमे पाद इन्द्रेति च देवता निर्दिश्यते । तदेतत्प्रथमस्याह्नो रूपं लक्षणम् ।

मन्त्रान्तरे लक्षणान्तरं दर्शयति—

> [1]प्रैतु ब्रह्मणस्पतिरिति ब्राह्मणस्पत्यः प्रेति प्रथमेऽहनि प्रथमस्याह्नो रूपम्, इति ।

ब्राह्मणस्पत्यः प्रगाथ इत्यनुवर्तते । अत्र प्रशब्दो लक्षणम् ।

अथ मन्त्रत्रये लक्षणं दर्शयति—

> [2]अग्निर्नेता त्वं सोम [3]क्रतुभिः पिन्वन्त्यप इति धाय्याः प्रथमेषु पदेषु देवता निरुच्यन्ते प्रथमेऽहनि प्रथमस्याह्नो रूपम्, इति ।

शस्त्रमध्ये प्रक्षेषणीया ऋचो धाय्याः । अग्निर्नेतेति प्रथमा धाय्या त्वं सोम इति द्वितीया पिन्वन्त्यप इति तृतीया । एतासां विसृणामृचां प्रथमेषु पादेष्वग्निसोममरुद्देवता निर्दिश्यन्ते । पिन्वन्त्यपो मरुतः सुदानव इति श्रवणात् । सोऽयं देवतानिर्देशो लक्षणम् ।

मन्त्रान्तरे प्रशब्दरूपं लक्षणं दर्शयति—

> [4]प्र व इन्द्राय बृहत इति मरुत्वतीयः प्रगाथः प्रेति प्रथमेऽहनि प्रथमस्याह्नो रूपम्, इति ।

मन्त्रान्तर आकाररूपं लक्षणं दर्शयति—

> आ यात्विन्द्रो वस उप न इति [5]सूक्तमेति प्रथमेऽहनि प्रथमस्याह्नो रूपम्, इति ।

अथ निष्केवल्यशस्त्रगतस्य मन्त्रस्य रथंतरसंबन्धरूपं लक्षणं दर्शयति—

> अभि त्वा शूर [6]नोनुमोऽभि [7]त्वा पूर्व पीतय इति रथंतरं पृष्ठं भवति राथंतरेऽहनि प्रथ-

---

१ ऋ. १-४०-३ । २ ऋ. ३-११ ४ । ३ ऋ. १-९१-२ । ४ ऋ. १-६४ ६ । ५ ऋ. ८-८९-३ । ६ ऋ. ४-२१-१ । ७ ऋ. ७-३३-२२ । ८ ऋ. ८-३-७ ।

मेऽहनि प्रथमस्याह्नो रूपम्, इति ।

अभि त्वा शूरेति रथंतरसाम्नो योनिभूतः । अभि त्वा पूर्वपीतय इति तस्यानुचरः । अतोऽभि त्वा शूरेत्यत्र रथंतरसामसाध्यं पृष्ठं भवति । इदं प्रगाथद्वयं रथंतरसामसंबन्धिन्यहनि योग्यमतो रथंतरसंबन्धस्य रूपस्य लक्षणस्य सद्भावात्प्रथमेऽहनि प्रयुज्यते ।

मन्त्रान्तरे त्वाकाररूपं लक्षणं दर्शयति—

[1]यद्धावान पुरुतमं पुराषाळिति धाय्याऽऽ-
वृत्रहेन्द्रो नामान्यपरा इत्येति प्रथमेऽहनि
प्रथमस्याह्नो रूपम्, इति ।

यद्धावानेति शस्त्रमध्ये प्रक्षेपणीया । तस्या द्वितीयपादादावा वृत्र हेत्याकारः श्रुतः ।

मन्त्रान्तरे पिबतिधातुरूपं लक्षणं दर्शयति—

[2]पिबा सुतस्य रसिन इति सामप्रगाथः पिब-
वान्प्रथमेऽहनि प्रथमस्याह्नो रूपम्, इति ।

पिबा सुतस्येत्ययं कस्यचित्सामविशेषस्याऽऽधारभूतः प्रगाथः ।
अथ निविद्धानीयस्य सूक्तस्याऽऽद्यौ किंचित्सूक्तान्तरं विधत्ते -

[3]त्यमू षु वाजिनं देवजूतामिति तार्क्ष्यं पुरस्तात्सूक्तस्य
शंसति स्वस्त्ययनं वै तार्क्ष्यः स्वस्तितायै, इति ।

तार्क्ष्यो देवताऽस्य तार्क्ष्यं स्वस्त्ययनं क्षेमप्राप्तिरूपमतो निविद्धानीयसूक्तस्य पुरस्तात्तार्क्ष्यसूक्तशंसनं स्वस्तितायै यजमानस्य क्षेमाय भवति ।

वेदनं प्रशंसति—

स्वस्त्यय॰ मेव तत्कुरुते स्वस्ति संवत्सरस्य पार॰
मश्नुते य एवं वेद ॥ २९ ॥ इति ।

---

१ ऋ. १०-७४ ६ । २ ऋ. ८ ३-१ । ३ ऋ. १०-१७८-१ ।

वेदिताऽनेन वेदनेन स्वस्त्ययनमेव क्षेमप्राप्तिमेव संपादयति । तथा द्वादशाहद्वारा संवत्सरसत्रस्य पारमश्नुते समाप्तिं प्राप्नोति ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऐतरेयब्राह्मणभाष्ये विंशाध्याये प्रथमः खण्डः ॥ १ ॥ (२९) [१५०]

यस्य सूक्तस्य पुरस्तात्तार्क्ष्यशंसनं विहितं तस्मिन्निविद्धानसूक्त आकाररूपं लक्षणं दर्शयति—

आ न इन्द्रो दूरादा न आसादिति सूक्तमेति प्रथमेऽहनि प्रथमस्याह्नो रूपम्, इति ।

इदानीं निष्केवल्यमरुत्वतीययोः शस्त्रयोर्निविद्धाने सूक्ते स्तोतुमाह—

संपातौ भवतो निष्केवल्यमरुत्वतीययोर्निविद्धाने वामदेवो वा इमाँल्लोकानपश्यत्तान्संपातैः समपतद्यत्संपातैः समपतत्तत्संपातानां संपातत्वं तद्यत्संपातौ प्रथमेऽहनि शंसति स्वर्गस्य लोकस्य समष्ट्यै संपत्त्यै संगत्यै, इति ।

संपातिं प्राप्नुवन्त्याभ्यां यजमानाः सर्वाँल्लोकानिति संपातौ निष्केवल्यमरुत्वतीयनिविद्धानयोः सूक्तयोर्वैकृतयोः संपात इति संज्ञा । आ यात्विन्द्रो वस इति मरुत्वतीयशस्त्रस्य निविद्धानं सूक्तम् । आ न इन्द्र इति निष्केवल्यस्य निविद्धानं सूक्तम् । एतयोः संपात इति संज्ञा प्रतिपाद्यते । पुरा कदाचिद्वामदेव इमान्भूरादीँल्लोकान्दृष्ट्वा तत्प्राप्त्युपायं विचार्य संपातसूक्तैस्तान्प्राप्तवान् । अतः संपतति सम्यक्प्रामोति लोकानेतैरिति संपातत्वं नाम संपन्नम् । तथा सत्यत्र प्रथमेऽहनि निष्केवल्यमरुत्वतीययोः संपातनामकसूक्ते यदि शंसेत्तदानीं तच्छंसनं स्वर्गलोकप्राप्तिभोग्यवस्तुसंपत्तिभोगसंबन्धार्थं संपद्यते ।

अथ द्वयोस्त्र्यृचयो रथंतरसंबन्धरूपं लक्षणं दर्शयति—

तत्सवितुर्वृणीमहेऽद्या नो देव सवितरिति

---

१ ऋ. ४-२०-१ । २ ऋ. ५-८२-१ । ३ ऋ. ५-८२-४ ।

वैश्वदेवस्य प्रतिपदनुचरौ राथंतरेऽहनि
प्रथमेऽहनि प्रथमस्याह्नो रूपम्, इति ।

अद्या न इति व्यूचस्तस्यानुचरोऽत उभयोरपि रथंतरसंबन्धोऽस्तीति रथंतरसंबद्धेऽहनि योग्यताऽस्ति ।

सूक्तान्तरे युजिधातुरूपं लक्षणं दर्शयति-

युञ्जते मन उत युञ्जते धिय इति सावित्रं युक्तवत्प्रथमेऽहनि प्रथमस्याह्नो रूपम्, इति ।

प्रथमाया ऋचोऽवसाने देवस्य सवितुः परिष्टुतिरिति श्रुतत्वादिदं सवितृदेवताकम् । युजिधातुस्तु विस्पष्टः ।

सूक्तान्तरे प्रशब्दरूपं लक्षणं दर्शयति-

प्र द्यावा यज्ञैः पृथिवी ऋतावृधेति द्यावापृथिवीयं प्रेति प्रथमेऽहनि प्रथमस्याह्नो रूपम्, इति ।

अस्मिन्वैश्वदेवशस्त्रे सूक्तान्तरं विधत्ते-

इहेह वो मनसा बन्धुता नर इत्यार्भव यद्वा एति च प्रेति च तत्प्रथमस्याह्नो रूपं तद्यत्प्रेति सर्वमभविष्यत्प्रैष्यन्नेवास्माल्लोकाद्यजमाना इति तद्यदिहेह वो मनसा बन्धुता नर इत्यार्भवं प्रथमेऽहनि शंसत्ययं वै लोक इहेहास्मिन्नेवैनांस्तल्लोके रमयति, इति ।

इहेह व इत्येतत्सूक्तमृभुदेवताकं द्वितीयाया ऋचोऽन्ते तेन देवत्वमृभवः समानशीति श्रवणात् । आकारप्रशब्दादिकं लक्षणं मन्त्रे नास्तीत्याशङ्क्य यद्वेत्यादिना तत्सद्भावे बाध उपन्यस्यते । यदेतदेति च प्रेति चेति तदेतत्प्रथमस्याह्नो रूपं लक्षणमिति पूर्वमुक्तं तत्तथा सति यदि प्रेत्यनेन लक्षणेन युक्तं सर्वं सूक्तजातमभविष्यत्तदानीं यजमाना अस्माल्लोकात्प्रैष्यन्ति मरिष्य-

---

युञ्जते मन उत०-५-८१-१ । प्र द्यावा यज्ञैः पृथिवी० १-१५९-१ । इहेह वो मनसा०-३-६०-१ ।

न्त्येवेति बाधोपन्यासः । तद्यदित्यादिना समाधानमुपन्यस्यते । यस्मात्पश-ब्दयोगे बाधोऽस्ति तस्मात्कारणादिहेहेति सूक्तं यदि प्रथमेऽहनि शंसेत्त-दानीमिहेहशब्देनास्य भूलोकस्य विवक्षितत्वादस्मिन्नेव भूलोके तत्सूक्तपाठे-नैनान्यजमानान्तरमयति चिरं क्रीडयति । ततः प्रशब्दप्रयुक्तो मरणबाधोऽपि परिहृतो भवति ।

सूक्तान्तरस्य प्रथमपादे देवताभिधानं लक्षणं दर्शयति—

> देवान्हुवे बृहच्छ्रवसः स्वस्तय इति वैश्व-
> देवं प्रथमे पदे देवता निरुच्यन्ते प्रथ-
> मेऽहनि प्रथमस्याह्नो रूपम् , इति ।

देवानित्यादिके सूक्ते बहुवचनान्तस्य देवशब्दस्य श्रवणाद्देवताबाहुल्येनेदं सूक्तं वैश्वदेवम् । प्रथमपादे देवशब्दस्तु विस्पष्टः ।

तत्र स्वस्तिशब्दस्य तात्पर्यं दर्शयति—

> महान्तं वा एतेऽध्वानमेष्यन्तो भवन्ति ये
> संवत्सरं वा द्वादशाहं वाऽऽसते तद्यद्देवा-
> न्हुवे बृहच्छ्रवसः स्वस्तय इति वैश्वदेवं
> प्रथमेऽहनि शंसति स्वस्तितायै, इति ।

ये यजमानाः संवत्सरसत्रं द्वादशाहं वाऽनुतिष्ठन्ति, एते दीर्घमध्वानं गन्तु-मुद्युक्ता भवन्ति । प्रयोगबाहुल्येनैकाहवत्सहसा समाप्त्यभावात् । अतो देवा-नित्यादिसूक्ते स्वस्तय इत्येतस्य शंसनं स्वस्तितायै क्षेमार्थं भवति ।

वेदनं प्रशंसति—

> स्वस्त्ययनमेव तत्कुरुते स्वस्ति संवत्सरस्य
> पारमश्नुते य एवं वेद येषां चैवं विद्वानेत-
> च्छोता देवान्हुवे बृहच्छ्रवसः स्वस्तय इति वै-
> श्वदेवं प्रथमेऽहनि शंसति, इति ।

उक्तार्थस्य वेदिता तेन स्वस्त्ययनमेव द्वादशाहस्य क्षेमप्राप्तिमेव कुरुते । क्षेमेणैव संवत्सरसत्रस्य समाप्तिं प्राप्नोति । किंच येषां यजमानानामुक्तार्थवेदी

---

१ ऋ. १०—६६—१४।

होवा शंसति तेऽपि यजमाना द्वादशाहं क्षेमेणैव प्राप्नुवन्ति संवत्सरसत्रं च समापयन्ति ।

सूक्तान्तरस्य प्रथमे पादे देवताभिधानलक्षणं दर्शयति-

[1]वैश्वानराय पृथुपाजसे विप इत्याग्निमारुतस्य प्रतिपत्प्रथमे पदे देवता निरुच्यते प्रथमेऽहनि प्रथमस्याह्नो रूपम् , इति ।

आग्निमारुतशस्त्रस्य वैश्वानरायेति सूक्तं प्रतिपत्कर्तव्यम् । स एव शब्द-विस्पष्टं देवतामभिधत्ते-

सूक्तान्तरे प्रशब्दरूपं लिङ्गं दर्शयति-

[2]प्रत्वक्षसः प्रतवसो विरप्शिन इति मारुतं प्रेति प्रथमेऽहनि प्रथमस्याह्नो रूपम्, इति ।

प्रत्वक्षस इति सूक्ते द्वितीयस्या ऋचो द्वितीयपादे वय इव मरुत इति श्रवो णादिदं सूक्तं मरुद्देवताकं शंसेत् । अत्र प्रशब्दो विस्पष्टः ।

वक्ष्यमाणस्य जातवेदस्यसूक्तस्य पुरस्तादेतामृचं विधत्ते-

[3]जातवेदसे सुनवाम सोममिति जातवेदस्यां पुरस्तात्सूक्तस्य शंसति स्वस्त्ययनं वै जात-वेदस्याः स्वस्तितायै, इति ।

जातवेदा देवता यस्या ऋचः सेयं जातवेदस्या । तद्देवताकत्वं प्रथमपादे देवताभिधानं लिङ्गं च विस्पष्टम् । अस्यामृच्यरातीयतो निदहातीति शत्रुदाह-श्रवणान्नावेव सिंधुमिति नौदृष्टान्तेन दुरितात्ययश्रवणाच्च स्वस्त्ययनं क्षेमगम-नमत्र विद्यते । तस्मादियं क्षेमप्राप्तये भवति ।

स्वस्त्ययनमेव तत्कुरुते स्वस्ति संवत्सरस्य पारमश्नुते य एवं वेद, इति ।

वेदनं प्रशंसति-

---

१ ऋ. ३-३-१ । २ ऋ. १-८७-१ । ३ ऋ. १-९९-१

सूक्तान्तरे प्रशब्दलिङ्गं दर्शयति–

प्रतव्यसीं नव्यसीं धीतिमग्नय इति जातवेदस्यं प्रेति प्रथमेऽहनि प्रथमस्याह्नो रूपम्, इति ।

यद्यप्यस्मिन्सूक्ते जातवेदःशब्दो न श्रुतस्तथाऽऽपि तदर्थवाची शब्दः श्रूयते । जातमुत्पन्नं विश्वं तद्वेत्तीति जातवेदास्तत्पर्यायो विश्ववेदःशब्दः । त च यमेरिरे भृगवो विश्ववेदसमिति चतुर्थ्यामृचि श्रूयते । तस्मादिदं सूक्तं जातवेदस्यं निविद्धानीयं शंसेत् । अत्र प्रतव्यसीमिति प्रशब्दो विस्पष्टः ।

वैश्वानरायेत्यादिकं यदाग्निमारुतं शस्त्रमुक्तं तदेतत्प्रशंसति–

समानमाग्निमारुतं भवति यच्चाग्निष्टोमे यद्वै यज्ञे समानं क्रियते तत्प्रजा अनु समनन्ति तस्मात्समानमाग्निमारुतं भवति ॥ ३० ॥ इति ।

अस्मिन्प्रथमेऽहनि यदाग्निमारुतं शस्त्रमुक्तं यच्चाग्निष्टोमे पूर्वनिरूपितमाग्निमारुतशस्त्रं तदुभयं समानमेकविधं न्यूनाधिकमन्त्राणामभावात् । यज्ञे यदेवाङ्गं समानं क्रियते तदङ्गमनु पश्चात्प्रजा ऋत्विग्रूपाः पुत्रादिरूपाश्च समनन्ति सम्यक्चेष्टन्ते सुखेन जीवन्तीत्यर्थः । तस्मात्समानं तुल्यमाग्निमारुतशस्त्रं कर्तव्यम् । अत्र प्रथमस्याह्नो लिङ्गेष्वाशुभद्रायत्रं करिष्यदयं लोकोऽभ्युदित इति लिङ्गचतुष्टयमत्र नोदाहृतं तद्यथासंभवमन्वेष्टव्यम् ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऐतरेयब्राह्मणभाष्ये विंशेऽध्याये द्वितीयः खण्डः ॥२॥ (३०) १५१]

द्वादशाहगतनवरात्रे प्रथममहर्निरूप्य द्वितीयमहर्निरूपयति–

इन्द्रो वै देवता द्वितीयमहर्वहति पञ्चदशस्तोमो बृहत्साम त्रिष्टुप्छन्दः, इति ।

देवतानां मध्य इन्द्रो देवता स्तोमानां मध्ये पञ्चदशस्तोमः साम्नां मध्ये बृहत्साम च्छन्दसां मध्ये त्रिष्टुप्छन्द इत्येतच्चतुष्टयं द्वितीयस्याह्नो निर्वाहकम् ।

---

१ क. १-१४३-१ ।

वेदनं प्रशंसति—

यथादेवतमेनेन यथास्तोमं यथासाम यथा छन्दसं राध्नोति य एवं वेद, इति।

वेदिता स्वकीयवेदनेन यथोक्तदेवतास्तोमसामच्छन्दांस्यनतिक्रम्य तत्प्रसादेन समृद्धो भवति ।

यथा द्वितीयस्याह्नो गमकानि मन्त्रगतानि लिङ्गानि निर्दिशति—

यद्वै नेति न प्रेति यत्स्थितं तद्द्वितीयस्याह्नो रूपं यदूर्ध्ववद्यत्प्रतिवद्यदन्तर्वद्यद्वृषण्वद्यद्वृधन्वद्यन्मध्यमे पदे देवता निरुच्यते यदन्तरिक्षमभ्युदितं यद्दार्हतं यत्त्रैष्टुभं यत्कुर्वदेतानि वै द्वितीयस्याह्नो रूपाणि, इति ।

प्रथमस्याह्न एति प्रेति लिङ्गद्वयं यद्वै यदेवोक्तं तदत्र द्वितीयस्याह्नो लिङ्गं न भवतीति नकारद्वयेनोभयं निषिध्यते । यत्स्थितं स्थितिधातुरूपवद्धातुषु स्थानेष्वप्रच्युतत्वेनावस्थितं वा मन्त्रे दृश्यते तद्द्वितीयस्याह्नो रूपं लिङ्गम् । तथैवोर्ध्वशब्दोपेतं प्रतिशब्दोपेतमन्तःशब्दोपेतं वृषश (ऋष) ब्दोपेतं वृधऊशब्दोपेतं च यदाम्नातं तत्सर्वं द्वितीयस्याह्नो रूपम् । यत्र साक्षाच्छन्दो न श्रूयते तत्र तदर्थो द्रष्टव्यः । मध्यमे पदे देवताभिधानमन्तरिक्षलोकाभिधानं बृहत्सामसंबन्धं त्रिष्टुप्छन्दःसंबद्धं वर्तमानार्थप्रत्ययप्रयुक्तं करोतिधातुरूपमित्येतानि सर्वाणि द्वितीयस्याह्नो रूपाणि निरूपकाणि लिङ्गानि द्रष्टव्यानि ।

अस्मिन्द्वितेऽहन्याज्यशस्त्रं विधत्ते—

अग्निं दूतं वृणीमह इति द्वितीयस्याह्न आज्यं भवति कुर्वद्द्वितीयेऽहनि द्वितीयस्याह्नो रूपम् , इति ।

अत्र कुर्वदिति लिङ्गेनोपन्यासः । यद्यप्यग्निं दूतमित्यादौ साक्षात्कुर्वच्छब्दो न श्रूयते तथाऽपि करोत्यर्थस्य सर्वधातुगतसामान्यत्वाद्वर्तमानार्थवाचिप्रत्ययान्तं धातुमात्रं कुर्वच्छब्देन विवक्षितम् । अत्रापि वृणीमह इति वर्तमानार्थवाचिप्रत्ययान्तो धातुः श्रूयते । तस्माद्द्वितीयेऽहन्येतत्सूक्तं विनियोक्तुं योग्यम् । ततो द्वितीयस्याह्नो लिङ्गम् ।

---

१ ऋ. १–१२–१ ।

आज्यशस्त्रं विधाय प्रउगशस्त्रं विधत्ते—

[1]वायो ये ते सहस्रिण इति प्रउगं सुतः सोम ऋतावृधेति वृधन्वद्द्वितीयेऽहनि द्वितीयस्याह्नो रूपम्, इति ।

वायो ये त इत्यादिकं शस्त्रं कुर्यात् । एतस्मिन्सूक्ते चतुर्थ्यां ऋचो द्वितीयः पादः सुतः सोम ऋतावृधेति । अस्य पादस्यान्ते वृधेति श्रवणादिदं प्रउगं वृधन्वद्वृधिधातुयुक्तम् । द्वितीयशस्त्रस्य त्र्यृच इत्यादिकं पूर्ववत् ।

अथ मरुत्वतीयं शस्त्रं विधत्ते—

[2]विश्वानरस्य वस्पतिमिन्द्र[3] इत्सोमपा एक इति मरुत्वतीयस्य प्रतिपदनुचरौ वृधन्वच्चान्तर्वच्च द्वितीयेऽहनि द्वितीयस्याह्नो रूपम्, इति ।

विश्वानरस्येत्ययं त्र्यृचः शस्त्रस्य प्रतिपत्तस्मिंस्त्र्यृचे द्वितीयस्या ऋचः प्रथमपादे वृधन्वद्वृधिधातुयुक्तं लिङ्गमस्ति । अभिष्टये सदावृधमिति श्रवणात् । इन्द्र इदित्ययं त्र्यृचोऽनुरूपस्तत्रान्तःशब्दयुक्तं लिङ्गमस्ति । प्रथमाया ऋचस्तृतीयपादेऽन्तर्देवानिति श्रवणात् ।

अथ प्रगाथद्वये लिङ्गद्वयं दर्शयति—

[4]इन्द्र नेदीय एदिहीत्यच्युतः प्रगाथ उत्तिष्ठ ब्रह्मणस्पत इति ब्राह्मणस्पत्य ऊर्ध्ववान्द्वितीयेऽहनि द्वितीयस्याह्नो रूपम्, इति ।

इन्द्र नेदीय इत्यादिकः प्रगाथः प्रथमेऽह्न्यपि विहित उत्तरत्रापि विधास्यते । तस्मादत्र विधीयमानोऽच्युतो भवति प्रच्युतेरभावात् । तदिदमच्युतत्वं स्थितशब्दार्थत्वात्स्थितवालिङ्गम् । उत्तिष्ठेत्ययं प्रगाथ ऊर्ध्वलिङ्गवान् । ऊर्ध्ववाचिन उच्छब्दस्य श्रवणात् ।

अथ तिसृषु धाय्यास्वच्युतत्वलिङ्गं दर्शयति—

[5]अग्निर्नेता [6]त्वं सोम क्रतुभिः पिन्वन्त्यप इति

---

१ ऋ. २-४१-१ । २ ऋ. ८-६८-४ । ३ ऋ. ८-२-४ । ४ ऋ. ८-५३-५ । ५ ऋ. १-४०-१ । ६ ऋ. ३-२१-४ । ७ ऋ. १-९१ २ । ८ ऋ. १-६४ ६ ।

धाय्या उच्युताः, इति ।

अग्निर्नेतेति प्रथमा धाय्या त्वं सोमेति द्वितीया पिन्वन्तीति तृतीया । प्रथमेऽहन्यप्येतासां विहितत्वादच्युतत्वम् ।

प्रगाथान्तरे लिङ्गं दर्शयति—

बृहदिन्द्राय गायतेति मरुत्वतीयः प्रगाथो येन ज्योतिरजनयन्नृतावृध इति वृधन्वान्तृतीयेऽहनि द्वितीयस्याह्नो रूपम्, इति ।

बृहदिन्द्रायेत्येष मरुद्देवताको मरुतो वृत्रहन्तमामिति द्वितीयपादे मरुतां श्रवणात् । तस्य येन ज्योतिरिति तृतीयः पादस्तत्र ऋतावृध इति श्रवणाद्यं प्रगाथो वृधिधातुरूपलिङ्गवान् ।

लिङ्गदर्शनद्वारा सूक्तं विधत्ते—

इन्द्र सोमं सोमपते पिबेममिति सूक्तं सजोषा रुद्रैस्तृपदा वृषस्वेति वृषण्वदाद्वितीयेऽहनि द्वितीयस्याह्नो रूपम्, इति ।

इन्द्र सोममित्यस्मिन्सूक्ते सजोषा इत्यादिको द्वितीयस्या ऋचश्चतुर्थः पादस्तत्र वृषस्वेति श्रवणाद्वृषण्वल्लिङ्गमस्ति ।

अथ निष्केवल्यशस्त्रस्य स्तोत्रियानुरूपयोः प्रगाथयोर्बृहत्सामसंबन्धरूपं लिङ्गं दर्शयति ·

त्वामिद्धि हवामहे त्वं ह्योहि चरेव इति बृहत्पृष्ठं भवति बार्हतेऽहनि द्वितीयेऽहनि द्वितीयस्याह्नो रूपम्, इति ।

त्वामिद्धीति बृहत्साम्न आधारभूतः स्तोत्रियः प्रगाथस्त्वं ह्योहीत्यनुचरः प्रगाथः । प्रथमे प्रगाथे बृहत्सामयुक्तं पृष्ठस्तोत्रं भवति । अत्र प्रगाथद्वयस्य बृहत्सामसंबन्धाद्बार्हते बृहत्सामसंबन्धिन्यहनि तदुभयं योग्यम् । द्वितीयस्य

---

१ ऋ. ८-८९-१ । २ ऋ. ३-३२-१ । ३ ऋ. ६ ४६-१ । ४ ऋ. ८-६१-७ ।

चाह्नो बृहत्सामसंबन्धित्वात्तस्मिन्नहनि विनियोक्तव्यम् । अयं च बृहत्सामसंबन्धो द्वितीयस्याह्नो लिङ्गम् ।

अथैकस्यामृच्यच्युतत्वलिङ्गं दर्शयति –

'यद्धावानेति धाय्याऽच्युता, इति ।

प्रथमेऽहन्यप्यस्या ऋचो विहितत्वादच्युतत्वम् ।

अथ प्रगाथान्तरे बृहत्सामसंबन्धिरूपं लिङ्गं दर्शयति–

'उभयं शृणवच्च न इति सामप्रगाथो यच्चे-
दमद्य यदु च ह्य आसीदिति बार्हतेऽहनि
द्वितीयेऽहनि द्वितीयस्याह्नो रूपम्, इति ।

उभयमित्यादिको बृहत्साम्ना सह प्रयुज्यमानः प्रगाथः । उभयशब्दस्य कोऽर्थः सोऽभिधीयते । अद्यास्मिन्दिने यत्कार्यमासीदिदं च कार्यमेकं यदु च यदपि ह्यः पूर्वेद्युः कार्यमासीत्तदपीत्येवं कार्यद्वयं शृणवच्छ्रुतमा ीदिति मन्त्रगतस्योभयं शृणवदित्यस्यार्थः । बार्हत इत्यादि पूर्ववत् ।

सूक्तान्तरे पूर्ववदच्युतत्वलिङ्गं दर्शयति–

'त्यमू षु वाजिनं देवजूतामिति तार्क्ष्योऽच्युतः ॥३१॥ इति ।

तार्क्ष्यदेवताकस्य सूक्तविशेषस्य प्रथमेऽहनि विहितत्वादुत्तरोत्तरोपयोक्ष्यमाणत्वादच्युतत्वम् ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऐतरेयब्राह्मणभाष्ये विंशाध्याये तृतीयः खण्डः ॥ ३ ॥ (३१) [१५२]

सूक्तान्तरे वृषन्शब्दोपेतं लिङ्गं दर्शयति–

'या त ऊतिरवमा या परमेति सूक्तं जहि
वृष्ण्यानि कृणुही पराच इति वृषण्वद्-
द्वितीयेऽहनि द्वितीयस्याह्नो रूपम्, इति ।

या त ऊतिरित्यस्मिन्सूक्ते जहि वृष्ण्यानीति तृतीयस्या ऋचश्चतुर्थः पादस्तत्र वृषशब्दादुक्तं लिङ्गं दृश्यते ।

---

१ ऋ. १०-७४ ९ । २ ऋ. ८-६१-१ । ३ ऋ. १०-१७८-१ ।
४ ऋ. ६-२१-१ ।

अथ वैश्वदेवशस्त्रगतयोस्त्र्यृचयोर्बृहत्सामसंबन्धं रूपं दर्शयति-

[1]'विश्वो देवस्य नेतुस्तंत्सवितुर्वरेण्यमा विश्वदेवं सप्तितिमिति वैश्वदेवस्य प्रतिपदनुचरौ बार्हतेऽहनि द्वितीयेऽहनि द्वितीयस्याह्नो रूपम्, इति।

विश्वो देवस्येत्येका ऋक्तत्सवितुरिति द्वे ऋचौ। सोऽयमेकस्त्र्यृचो बृहत्साम-संबन्धभूतो वैश्वदेवशस्त्रस्य प्रतिपद्भवति। आ विश्वदेवमित्येष त्र्यृचस्तस्यानुचरः। अत उभयोर्बृहत्सामसंबन्धः।

सूक्तान्तरे लिङ्गं दर्शयति-

[2]'उदु ष्य देवः सविता हिरण्ययेति सावित्रमूर्ध्ववदाद्वितीयेऽहनि द्वितीयस्याह्नो रूपम्, इति।

अस्मिंस्त्र्यृचात्मके सावित्रसूक्त ऊर्ध्ववाचिन उच्छब्दस्य श्रवणादूर्ध्वलिङ्गमस्ति।

सूक्तान्तरे लिङ्गं दर्शयति-

[3]'ते हि द्यावापृथिवी विश्वशंभुवेति द्यावापृथिवीयं सुजन्मनी धिषणे अन्तरीयत इत्यन्तर्वदाद्वितीयेऽहनि द्वितीयस्याह्नो रूपम्, इति।

अस्मिन्द्यावापृथिवीये सूक्ते सुजन्मनी इत्येष प्रथमाया ऋचस्तुरीयः पादः। तत्रान्तःपदस्य श्रूयमाणत्वादन्तर्वल्लिङ्गम्।

सूक्तान्तरे लिङ्गं दर्शयति-

[4]'तक्षन्रथं सुवृतं विद्मनापस इत्यार्भवं तक्षन्हरी इन्द्र वाहा वृषण्वसू इति वृषण्वदाद्वितीयेऽहनि द्वितीयस्याह्नो रूपम्, इति।

तक्षन्रथमिति सूक्तमृभुदेवताकम्। प्रथमाया ऋचस्तृतीयपादे वक्षान्पितुभ्या-

---

१ ऋ. ५-५०-१। २ ऋ. ३-६२-१०। ३ ऋ. ५-८२-७। ४ ऋ. ६-७१-१। ५ ऋ. १-१६१-१। ६ ऋ. १-१११-१।

मृभव इति श्रवणात् । तत्रैव तक्षन्हरी इत्यादिको द्वितीयः पादस्तस्मिन्वृषण्वसू इति वृषण्वल्लिङ्गं दृश्यते ।

सूक्तान्तरे लिङ्गं दर्शयति—

यज्ञस्य वो रथ्यं विश्पतिं विशामिति वैश्वदेवं वृषाकेतुर्यजतो द्यामशायतेति वृषण्वद्द्वितीयेऽहनि द्वितीयस्याह्नो रूपम्, इति ।

यज्ञस्येत्यादिसूक्त इन्द्रो मित्रो वरुण इत्येवं बहुदेवताश्रवणादिदं वैश्वदेवम् । वृषाकेतुरित्येष प्रथमायाश्चतुर्थः पादस्तत्र वृषण्वल्लिङ्गमस्ति ।

तदेतत्सूक्तं प्रशंसति—

तदु शार्यातमङ्गिरसो वै स्वर्गाय लोकाय सत्रमासत ते ह स्म द्वितीयं द्वितीयमेवाहरागत्य मुह्यन्ति तान्वा एतच्छार्यातो मानवो द्वितीयेऽहनि सूक्तमशंसयत्ततो वै ते प्र यज्ञमजानन्प्र स्वर्गं लोकं तद्यदेतत्सूक्तं द्वितीयेऽहनि शंसति यज्ञस्य प्रज्ञात्यै स्वर्गस्य लोकस्यानुख्यात्यै, इति ।

तदु यज्ञस्य वो रथ्यमित्यादिकं सूक्तं शार्यातस्य कस्यचिन्महर्षेः संबन्धादित्यवगन्तव्यम् । कथं संबन्ध इति तदुच्यते । पुरा कदाचिदङ्गिरसो वै महर्षयः स्वर्गार्थं सत्रमनुष्ठातुमुद्युक्तास्ते महर्षयो यस्मिन्यस्मिन्सत्रे पृष्ठचषळ (ड)हस्य द्वितीयमहरनुतिष्ठन्ति तत्र सर्वत्र द्वितीयेऽहनि शस्त्रबाहुल्यात्कुत्र किं शस्त्रं पठितव्यमित्यज्ञात्वा मुह्यन्ति । तदानीं शार्यातनामकः कश्चिन्मानव ऋत्विग्भूत्वा तानङ्गिरसो महर्षीन्यज्ञस्य व इत्यादिकं सूक्तं द्वितीयेऽह्न्यशंसयत् । ततः सूक्तप्रभावादेव ते महर्षयो यज्ञं प्र(प्रा)जानन्यज्ञं प्रकर्षेण ज्ञातवन्तः । तद्यज्ञसाध्यं स्वर्गं लोकं च प्र(प्रा)जानन् । तस्माद्द्वितीयेऽह्न्येतस्य सूक्तस्य शंसनेन व्यामोहमन्तरेण यज्ञः प्रज्ञातो भवति स्वर्गाश्चवगम्यते ।

शस्त्रान्तरस्य प्रतिपदि लिङ्गं दर्शयति—

---

१ ऋ. १०-९२-१ ।

'पृक्षस्य वृष्णो अरुषस्य नू सह इत्यामि-
मारुतस्य प्रतिपद्वृषण्वददुवितीयेऽहनि
दुवितीयस्याहनो रूपम्, इति ।

तत्र वृष्णा इति श्रवणाद्वृषण्वल्लिङ्गम् ।

मारुतसूक्ते लिङ्गं दर्शयति—

'वृष्णे शर्धाय सुमखाय वेधस इति मारुतं वृष-
ण्वदाद्वितीयेऽहनि दुवितीयस्याहनो रूपम्, इति ।

अत्र प्रथमाया ऋचो द्वितीयपादे प्रभरा मरुद्भ्य इति श्रवणादिदं सूक्तं मारुतम् । वृषण्वल्लिङ्गं स्पष्टम् ।

जातवेदस्यायामूच्यच्युतत्वलिङ्गं दर्शयति—

'जातवेदसे सुनवाम सोममिति जातवेदस्याऽच्युता, इति ।

प्रथमेऽहन्यस्या ऋचो विहितत्वादच्युतत्वम् ।

सूक्तान्तरे लिङ्गं दर्शयति—

'यज्ञेन वर्धत जातवेदसमिति जातवेदस्य
वृधन्वददुवितीयेऽहनि दुवितीयस्याहनो
रूपमहनो रूपम् ॥ ३२ ॥ इति ।

जातवेदोदेवताकत्वं वृधन्वल्लिङ्गं चात्र विस्पष्टम् । अभ्यासोऽध्यायपरिसमाप्त्यर्थः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऐतरेयब्राह्मणभाष्ये विंशाध्याये चतुर्थः खण्डः ॥ ४ ॥ (३२) [१५३]

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकबीरबुक्कणसाम्राज्यधुरंधर सायणाचार्यकृतावैतरेयब्राह्मणभाष्ये विंशोऽध्यायः ॥ २० ॥

इत्यैतरेयब्राह्मणे चतुर्थपञ्चिका समाप्ता ॥ ४ ॥

(पञ्चिकाङ्कः—४ । अध्यायाङ्कः—२० । खण्डाङ्कः—१५३)

---

१ ऋ. ६-८-१ । २ ऋ. १-६४-१ । ३ ऋ. १-९९-१ । ४ ऋ. २-२-१ ।

28725